इदं तर्हि ज्ञापकम्–‘ स्वं रूपं शब्दस्याशब्दसंज्ञा ’ (१।१।६८) इति । अत्र रूपग्रहणं करोति । कथं कृत्वा ज्ञापकम् । अस्मिन्सूत्रे रूपग्रहणं न कर्तव्यम् । स्वं शब्दस्येत्येव सिद्धम् । न हि शब्दस्य स्वरूपमन्यदतो ब्रूयात् । पश्यति त्वाचार्यः[1] यदन्यच्छब्दस्य स्वम् । किं पुनस्तत् । अन्यदर्थः । तेनेह न[2] रूपं गृह्यते । अन्यत्र चार्थवान् गृह्यते नानर्थकः । किं कृतं भवति । अर्थवद्ग्रहणे नानर्थकस्येति परिभाषा कर्तव्या भवति । किमेतस्या ज्ञापने प्रयोजनम् । काशे कुशे[3] बभ्रुशे इति प्रगृह्यसंज्ञा न भवति इति । सैषा परिभाषातिप्रसक्ता यत्र[4] नेष्यते तत्र प्रतिषिध्यते ॥

॥ न वर्णग्रहणेषु ॥ २ ॥

कथं ज्ञायते । यदयमिड्वह्मिमह्हिङिति अत्रैकं टितं[5] करोति । अस्य किल टित्करणं विशेषणार्थम् । तच्च शक्यमकर्तुम् । ‘एरत्’[6] इति वक्ष्यामः । न च वह्मिमह्योरपि इकारस्याप्नोति अर्थवत इकारस्य ग्रहणात् । यश्च वह्मिमह्योरिकारः असावनर्थकः । अनर्थकत्वादस्य न भविष्यति । अर्थवद्ग्रहणे नानर्थकस्येति सिद्धे सति यट्कारं करोति विशेषणार्थं तज्ज्ञापयति वर्णग्रहणमिदं[7] न चैषा परिभाषा वर्णग्रहणेषु भवति । न च सामान्यग्रहणमेतत्स्यात् आर्धधातुकेटश्च विभक्तेश्चेति । अस्य चाकारो यथा स्यात् । लविषीय । पविषीय । न चात्रेष्यते । यद्यपि नेष्यते तथापि प्राप्नोति । न प्राप्नोति । कथम् । ङित इति इड् विशेष्यते । ङितो य इडिति । यश्चार्धधातुके असौ ङितश्चान्येषां च भवति । तेन तस्य न भविष्यति । एवमपि पुटिषीयेत्यत्र प्राप्नोति । अयं हि ‘ गाङ्कुटादिभ्योऽञ्णिन्ङित् ’ (१।२।१) इति ङित् क्रियते । एवं तर्हि ‘लस्य’ (३।४।७७) इत्येतदपि वर्तते तेन विशेषणं क्रियते । कथम् । लस्य तिङो य इडिति तस्याकारो भवति । स चेण्ङितो यदि भवतीति । तस्माज्ज्ञापनार्थमिदं टित्करणं न सामान्यग्रहणार्थम् ॥

यद्येतज्ज्ञाप्यते ‘ स्मिपूङ्रञ्ज्वशां सनि ’ (७।२।७४) इत्यत्र ऋवर्णग्रहणम् । तत्र ऋवर्णमात्रस्य प्राप्नोति । अर्तेश्चेष्यते । नैतदेवम् । अर्तेरेवेदं ग्रहणं न ऋवर्णस्य । कथं ज्ञायते । यदयं ‘ किरश्च पञ्चभ्यः ’ (७।२।७५) इत्याह । अत्र हि यदि ऋवर्णस्य ग्रहणं स्यात् किरश्च पञ्चभ्य इत्येतन्न वक्तव्यं स्यात् । किरादयो हि ऋवर्णान्तास्तत्र पूर्वेणैव सिद्धम् । नैतदेवमर्थम् । तत्र तावत्प्रच्छेरवश्यग्रहणं कर्तव्यम् । एकाच इति प्रतिषेधार्थम् । किरादीनामप्यार्धधातुकस्येट् प्राप्तः । ‘ सनि ग्रहगुहोश्च ’ (७।२।१२) इति उगन्तानां प्रतिषिद्धः । ‘ स्मिपूङ्रञ्ज्वशां सनि ’ (७।२।७४) इत्यनेन[8] वर्णग्रहणेन पुनः प्रापितः । वृतो वेति वर्तमान ‘ इट् सनि वा ’ (७।२।४१) इति विभाषितः । ततः इदं सूत्रं[9] नित्यार्थं भवति । यद्येवमेतत्सूत्रं न कर्तव्यं ‘ किरश्च पञ्चभ्यः ’ (७।२।७५) इति । कथम् । कॄगॄप्रच्छामिति[10] वक्तव्यम् । तत्र हि ऋकारग्रहणादृकारान्तानां ग्रहणं ज्ञापयति ।

---

१ A त्वाचार्यः अस्त्यन्यत्स्वं शब्दस्य. २ B transp. न and रूपं. ३ After कुशे, B ins. हरिशे. ४ B transp. यत्र and न. ५ AB ङितं. ६ AB एरत्. ७ After इदं, B ins. इति. ८ After अनेन, A ins. एव. ९ B om. सूत्रं. १० A कृग्दृप्रच्छां.

न[1] च किरादयः सर्वे ऋकारान्ताः । न[2]नु च पञ्चग्रहणं करोति । तज्ज्ञापयत्याचार्यः पूर्वसूत्रे ऋकारग्रहणे अर्थवद्ग्रहणमिति । वर्णग्रहणे च सति दृधृञोरिट् सिद्ध एव । ततो न चेदमकृतं भवति न वर्णग्रहणेष्विति । न च केचन दोषाः सन्ति ॥

लक्षणप्रतिपदोक्तयोः [3]प्रतिपदोक्तस्य ग्रहणम् ॥ ३ ॥

तस्य ज्ञापकं 'कर्तरि भुवः खिष्णुच्खुकञौ' (३।२।५७) इति खिष्णुज्ग्रहणम् । कथं कृत्वा ज्ञापकम् । अत्रोच्यते । अयं खिष्णुच् किमर्थमिकारादिः क्रियते । न[4] च क्स्नुरेवोच्यते । तत्राप्ययमर्थः चित्करणं न कर्तव्यं भवति । एकाचश्चित्करणानर्थक्यम् । प्रत्ययस्वरेण कृतत्वादिति । का रूपासिद्धिः । आढ्यंभविष्णुरिति । ईड्गुणावादेशमूर्धन्येषु कृतेषु सिद्धं भवति । सत्यमेवैतत् । स्वरे तु दोषो भवति । आढ्यंभविष्णुरित्यत्र 'कृत्योकेष्णुच्चार्वादयश्च' (६।२।१६०) इति इष्णुज्ग्रहणेन ग्रहणं न प्राप्नोति । किं कारणम् । नायमिष्णुच् । किं तर्हि । क्स्नुः । ननु चायमिण्मूर्धन्ययोः कृत[6]योरिष्णुर्भवति । सत्यं भवति किं त्वत्र गुणो न प्राप्नोति कित्त्वात् । नायं ककारः । कस्तर्हि । खकारश्चर्त्वभूतो निर्दिश्यते । [7]एवमप्ययमिष्णुर्भविष्यति । यत्र सूत्रे इष्णुज् गृह्यते तत्रापि सूत्रे इस्नुचार्वादयश्चेति वक्ष्यामि ॥

अथवा इदं तावदयं प्रष्टव्यः । अथास्मिन् क्स्नुचि क्रियमाणे कस्य ग्रहणं स्यात् । ताच्छीलिकस्यालंकृञादिपठितस्य । अयमपीष्णुरेव यथाव्याख्यानम् । तस्मान्नार्थ इदादिग्रहणेन । एवं सिद्धे सति यदिर्दादिग्रहणं करोति तज्ज्ञापयति--'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणं भवति' । अलंकृञादिषु (३।२।१३६) च प्रतिपदमिष्णुच् पठ्यते । अयं पुनरक्रियमाणे ई[9]जादित्वे लक्षणेन इष्णुच् क्रियते । तस्य प्रतिपदोक्तस्यैव ग्रहणं स्यात् । अस्य न स्यात् । तस्मादयमपि इष्णुजेव क्रियते । नैतदस्ति ज्ञापकम् । असत्यां परिभाषायामवश्यमयमिकारादिः कर्तव्यः । मूर्धन्येन निर्देशं करिष्यामि । अस्य हीडागमे पूर्वत्रासिद्धमिति लक्षणेन क्रियमाणं षत्वमसिद्धं भवति[10] । तेनायमिष्णुर्भवति । स च इष्णुरुच्यते । ननु चायमलंकृञादिसूत्रे (३।२।१३६) इष्णुच् क्रियते तत्कुत एतत् । षत्वानित्यत्वज्ञापनार्थं मूर्धन्येन पठ्यते तदपि ज्ञापितं स्यात् । एवं च सति लाक्षणिकं षत्वमसिद्धं भवति । तस्मादयमवश्यं खि[11]ष्णुच् कर्तव्यः सामान्यग्रहणार्थः न ज्ञापकार्थः ॥

इदं तर्हि ज्ञापकं श्रीह्यादिषु म[12]हाप्रवृद्धेति तत्र प्रवृद्धग्रहणम् । कथं कृत्वा ज्ञापकम् । अत्र प्रवृद्धग्रहणं न[13]ाख्यातव्यम् । कथं महाप्रवृद्ध इति । पूर्वपदप्रकृतिस्वरो भविष्यति 'कर्मधारयेऽनिष्ठा' (६।२।४६) 'क्ते च' (६।२।४५) । तत्र हि 'अर्थे, क्ते' (६।२।४४,४५) इत्यतःप्रभृति क्त इत्यनुवर्तते महच्छब्दश्चानिष्ठा । एवं सिद्धे सति यद् श्रीह्यादिषु प्रवृद्धशब्दं पठति तज्ज्ञापयत्याचार्यः प्रवृद्धशब्दश्च क्तान्तः यत्र पूर्वोत्तरपदानि प्रतिपदमुच्यन्ते तत्रायं विधिर्भवति । क च पूर्वोत्तरपदानि प्रतिपदमुच्यन्ते । 'श्रेण्यादयः

---

१ A om. च. २ A न. ३ B प्रतिपदोक्तस्यैव ग्रहणम्. C प्रतिपदोक्तस्य ग्रहणं न तु लाक्षणिकस्य. ४ A न स्नुरेवोच्यते. ५ A यद् (for इद्). ६ B om. कृतयोः. ७ B एवमयमिष्णुर्भवति. ८ B एतदादि° (for इदादि°). ९ AB इचादित्वे. १० After भवति, B ins. स चेष्णुरुच्यते. ११ A खिष्णुः. १२ B महावृद्धेति. १३ A न व्याख्यातव्यम्.

कृतादिभिः' (२।१।५९) इति। अत्र ह्यनिष्ठान्तानि पूर्वपदानि क्तान्तानि चोत्तरपदानि। महाप्रवृद्ध इति पुनः 'सन्महत्परमोत्तम०' (२।१।६१) इत्यत्र पूर्वपदमेव प्रतिपदोक्तं भवति नोत्तरपदम्। अथ विशेषणविशेष्यसमासः उभयं नोक्तं भवति। एवं सति किं कृतं भवति। 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' इयं परिभाषा कर्तव्या भवति। किमेतस्या ज्ञापने प्रयोजनम्। 'उस्यपदान्तात्' (६।१।९६) इत्यत्र का उस्रा कोस्रा इति पररूपं न भवति। नैतदस्ति प्रयोजनम्। अत्रापदान्तादित्युच्यते[1] अयं च पदान्तादुत्तरः। न चास्मिन् कश्चिदुस्[2] प्रतिपदोक्तः पूर्वोप्यादिश्यते। तस्मात् प्रयोजनाभावान्नास्त्येषा परिभाषा। ज्ञापनेषु[3] परिहारा वक्तव्याः॥

गौणमुख्ययोर्मुख्ये संप्रत्ययः ॥ ४ ॥

गौणस्य मुख्यस्य[4] च ग्रहणे मुख्यस्य ग्रहणं भवति। कथं ज्ञायते। यदयं 'द्यावापृथिवीशुनासीर०' (४।२।३२) इत्यत्र अग्नीषोमेत्यलाक्षणिकं षत्वं पठति। इह 'अग्नेः स्तुत्स्तोमसोमाः' (८।३।८२) इति षत्वं विधीयते ह्रस्वात्। तत्र कः प्रसङ्गः यद्दीर्घादग्निशब्दात्सोमशब्दस्य षत्वं स्यात्। ननु च वचनाद् भविष्यति। आह्रायमग्नेः परस्य षत्वं न चास्ति ह्रस्वोग्निशब्दः। तत्र वचनाद् भविष्यति। अस्ति वचनस्यावकाशः। अग्निगुणोग्निः सोमगुणस्सोमः अग्निश्च सोमश्चाग्निसोमावित्ययमवकाशः। ननु चापीत्त्वेन भवितव्यं 'देवताद्वन्द्वे च', 'ईदग्नेः' (६।३।२६,२७) इति। नैष देवताद्वन्द्वः। अस्मिन्नवकाशे सति यदग्नीषोमेति पठति तज्ज्ञापयत्याचार्यः मुख्योग्निशब्दो यस्तस्य तद् ग्रहणम्। भवतीति चात्र दीर्घः। एवं गौणमुख्ययोर्मुख्ये संप्रत्यय इति भवति॥

किमेतस्याः परिभाषाया ज्ञापने प्रयोजनम्। अग्निसोमौ माणवकावित्यत्र षत्वं न भवति। अथागौर्गौः समपद्यत गोऽभवत्। ओदित्यनेन प्रगृह्यसंज्ञा न भवति। कथं पुनरयं निपातः। अग्निरव्ययमिति गृह्यते तेन निपातत्वात्स्यादेव। गौणमुख्ययोर्मुख्ये संप्रत्यय इति नैषा परिभाषा। कुतः। यो हि गौणाग्निः अग्निरिवायमग्निः सोम इवायं सोम इति। अन्यार्थोपदेशको वासौ भवति। एवं सति लाक्षणिक एवासौ भवति। प्रायोगिको वा यश्च मुख्यः प्रतिपदोक्तो वा। तस्मादेषा लक्षणप्रतिपदोक्तयोः औपदेशिकप्रायोगिकयोर्वा अन्यतरया प्रत्युक्ता भवति॥

यदप्यस्या[5] ज्ञापकमुक्तं तदप्यज्ञापकमेव असत्यां परिभाषायां सत्यवकाशे ह्रस्वात्षत्वमुच्यमानं दीर्घान्न प्राप्नोति तदर्थमेतत्स्यात्। अथवा नेदमलाक्षणिकं षत्वं दीर्घो ह्यग्निशब्दः। एकदेशविकृतमनन्यवदिति त्वग्निशब्द[6] एव। तत्र तेनैव सूत्रेण ह्रस्वादीर्घाच्च षत्वं प्राप्नोति॥ अथवा सुषेण इति 'विभाषेटः[7]' (८।३।७९) इति विभाषा प्रकृतानुवर्तते। सा तत्र व्यवस्थिता भवति। तेन ह्रस्वान्नैव भविष्यति दीर्घाद् भविष्यत्येव। एवं च कृत्वा अप्रयोजनमेतद्भविष्यति अग्निसोमौ माणवकाविति॥

---

१ A अत्र पदान्ताद्. २ B om. उस्. ३ B ज्ञापकेषु. ४ B om. मुख्यस्य. ५ B यदि (for यद्). ६ A om. तु. ७ B om. (hapl.) विभाषेटः इति.

यदप्युक्तं[1] गोभवदिति तदप्यप्रयोजनम् । कस्मादेवात्र प्रगृह्यसंज्ञा न भवति । ओदित्यत्र तपरकरणं प्रत्याख्यायते सवर्णाभावात् । तत्र ओकारस्तत्कालतायामवधार्यं नास्तीति कृत्वा निपातसंज्ञायामवधारणं करिष्यते । निपात एव य ओकारस्तस्य प्रगृह्यसंज्ञा भवति । यो निपातश्चानिपातश्च तस्य संज्ञा मा भूदिति । यश्चायं च्यन्तः असौ घेरित्यत्र निपातस्तस्माज्ज्ञापकाभावाच्च अन्यतरयोः प्रत्युक्तत्वान्नास्त्येषा परिभाषा ॥

औपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणम् ॥ ५ ॥

औपदेशिकस्य प्रायोगिकस्य च ग्रहणे[2] औपदेशिकस्य ग्रहणं भवति न प्रायोगिकस्य च । कथं ज्ञायते । यदयं 'श्वीदितो निष्ठायाम्' (७।२।१४) इति श्विग्रहणं करोति । तत्र हि संप्रसारणे 'श्र्युकः किति' (७।२।११) इत्येव सिद्धम् । पश्यति त्वाचार्यः । औपदेशिकस्य उको ग्रहणमिति । तस्मात् श्विग्रहणं करोति । किमेतस्या ज्ञापने प्रयोजनम् । 'तरप्तमपौ घः' (१।१।२२) इति । अत्र औपदेशिकस्य ग्रहणं न प्रायोगिकस्य । इह न भवति नदीतर इति ॥

नैषास्ति परिभाषा । कुतः । उपदेशो नाम सूत्रपाठः खिल्पाठः । तत्र भव औपदेशिकः । औपदेशिको नाम प्रतिपदोक्तः । प्रायोगिकः प्रयोगमर्हतीति वा प्रयोगो भवतीति वा । तल्लक्षणप्रतिपदोक्तयोरिति अत्र संभवत्येषा परिभाषा । यदपि ज्ञापकमुक्तं तस्याप्यन्यत्प्रयोजनमस्ति । किम् । उकः कितीत्युच्यमाने श्वित इति संप्रसारणं प्राप्नोति इट् च । तत्र परत्वादिटा भवितव्यम् । नित्यं संप्रसारणम् । कृते इटि प्राप्नोति । संप्रसारणे तु कृते इट् न प्राप्नोति । उकः कितीति प्रतिषिध्यते । एवं सत्येतज्ज्ञापकमुक्तं भवति । यदा[4] तु सर्वविधिभ्य इड्विधिर्बलवानित्यकृते संप्रसारणे इड् भवति तदोकः कितीति एष प्रतिषेधोऽकिंचित्करः स्यात् । तत्र कृते संप्रसारणे इट्प्रतिषेधः कथं स्यादित्येवमनर्थकं[5] श्विग्रहणं न ज्ञापनार्थम् । यदपि[6] प्रयोजनमुक्तं नदीतर इति तदप्रयोजनम् । साहचर्यात् । यस्तमपा सहचरितस्तरप् पठित आतिशायिकस्तेन कृत्प्रत्ययान्तस्य तरपो ग्रहणं न भविष्यति[7] । एवं ज्ञापकाभावात् प्रयोजनाभावाच्चान्यस्य चासंभवान्नास्त्येवेयं परिभाषेति ॥

कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययः ॥ ६ ॥

कृत्रिमग्रहणे अकृत्रिमस्य च तत्र कृत्रिमे संप्रत्ययो भवति । कथं ज्ञायते । यदयं 'महाराजाट्ठञ्' (४।३।९७) इति निपातयति । अत्र हि समासान्तस्य टचः प्रतिषेधः 'न पूजनात्' (५।४।६९) इति । एतदाचार्यः पश्यति 'सुः पूजायाम्' (१।४।९४) इति 'अतिरतिक्रमणे च' (१।४।९५) इति स्वत्योरेव पूजितयोर्ग्रहणम्[8] । इह न भवति प्रतिषेधः ॥ नैतदस्ति ज्ञापकम् । न हि स्वती पूजायामेव विहितौ ॥ एवं तर्हि 'न पूजनात्' (५।४।६९) इति ग्रहणे स्वत्योरेव ग्रहणम् । आश्रयिग्रहणादाश्रयग्रहणमपि भवति । तेन ज्ञापकम् ॥

---

१ A यदि (for यद्). २ After औपदेशिकस्य, B ins. ग्रहणे. ३ B om. ग्रहणे. ४ B यथा. ५ A एवमर्थं (for एवमनर्थकं). ६ After यदपि, B ins. तस्य. ७ B भवति. ८ After ग्रहणं, B ins. भवति.

किमेतस्या ज्ञापने प्रयोजनम् । महाराज इति समासान्तः सिद्धो भवति । ' कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययः ' इति । येषामेतत्सूत्रं नास्ति तेषामेषा परिभाषा । किं ते ब्रुवते । काष्ठादिषु स्वती कल्याणे इति कल्याणग्रहणं किमर्थम् । यावत् ' पूजनात्पूजितम्० ' (८।१।६७) इत्यत्र पूजितशब्दे काष्ठादयो निर्दिश्यन्ते पूजने ये काष्ठादय इति । यदैव स्वती कल्याणार्थवाचिनी[1] तदैव पूजनम् । तस्मान्नार्थः कल्याणग्रहणेन । एवं प्रत्याख्यानस्य प्रयोजनं ब्रुवते । कथम् । स्वत्योः कल्याणवाचिनोः[2] पूजनमिति संज्ञा स्यात् । किं कृतं भवति । ' न पूजनात् ' (५।४।६९) इत्यत्र[3] वार्तिककारेणोक्तं स्वत्योर्ग्रहणं कर्तव्यम् (५।४।६९ वा. १) तन्न वक्तव्यं भवति । एवं सति ये[4] पूजनशब्दास्तेभ्यो नैव प्रतिषेधः प्राप्नोति । तस्मान्नार्थः परिभाषया । न च प्रयोजनमस्ति भूयिष्ठम् । एवं च

[5]कृत्रिमाकृत्रिमयोरुभयगतिर्भवति ॥ ७ ॥

'साधकतमं करणम्' (१।४।४२) इति कृत्रिमस्य 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' (३।१।१७) इत्यकृत्रिमस्य । 'आधारोधिकरणम्' (१।४।४५) इति कृत्रिमस्य ' विप्रतिषिद्धं चानधिकरणवाचि ' (२।४।१३) इत्यत्र इच्कर्मव्यतिहारे (५।४।१२७) इत्यत्र चाकृत्रिमस्य । संख्याकार्येषु च अकृत्रिमापि संख्या भवति ॥

भवति च बहुव्रीहौ तद्गुणसंविज्ञानमिति[6] ॥ ८ ॥

कथम् । यदयमाढ्यादिषु 'च्व्यर्थेषु' (३।२।५६) इत्युक्त्वा अच्वाविति प्रतिषेधं करोति । कथम् । च्विरर्थः येषामुपपदानां तानि च्व्यर्थानि । तेषु च्व्यर्थेषु । अन्यपदार्थत्वाद् बहुव्रीहिः च्विरर्थो येषां तेषूपपदेषु भविष्यति नैव च्वौ प्राप्नोति नार्थः प्रतिषेधेन । एतत्पश्यति अस्तीयं परिभाषा च्व्यर्थेषु च्वावपि प्रसज्येत । तस्मात् प्रतिषेधः । किमेतस्या ज्ञापने प्रयोजनम् । 'सर्वादीनि सर्वनामानि' (१।१।२७) इत्यत्र[7] सर्वनाम[8]संज्ञा 'भूवादयो[9] धातवः' (१।३।१) इति च धातुसंज्ञा भवति । बहुव्रीहौ तद्गुणसंविज्ञानात् । सर्वशब्दस्य सर्वनामसंज्ञायां च णत्वं प्राप्तं निपातनान्न भवति ॥

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते[10] ॥ ९ ॥

---

१ B °वादिनी. २ B °वादिनोः. ३ A om. अत्र. ४ After ये, A ins. ते. ५ C om. this Paribhāṣā. ६ After this, C gives the following additional Paribhāṣā : अवयवेन विग्रहः समुदायः समासार्थः ॥ ७ After इत्यत्र, A ins. सर्वशब्दस्य. ८ B om. सर्वनामसंज्ञा. ९ A om. (hapl.) from भूवादयो up to सर्वशब्दस्य. १० After this, C gives the following two additional Paribhāṣās : मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ निरवकाशा हि विधयः सावकाशान् विधीन् बाधन्ते ॥

कथं ज्ञायते । यदयं 'सेसिचि [1]कृतचृतच्छृदतृदनृतः' (७।२।५७) इति चृतः से परतः वा इट्प्रतिषेधं शास्ति । नृतः श्यन्विकरणस्यापवादः । नैवास्य विकरणः प्राप्नोति नार्थः इट्प्रतिषेधेन । एतत्पश्यति आचार्यः पुरस्तादपवादः अनन्तरमेव शपं बाधते न श्यन्विकरणमिति पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते इति । किमेतस्या ज्ञापने प्रयोजनम् । 'विभाषा दिक्समासे०' (१।१।२८) इत्यत्र बहुव्रीहिग्रहणं प्रत्याख्यायते । ततोनन्तरवचनं 'न[2] बहुव्रीहौ' (१।१।२९) इति प्रतिषेधो विभाष्यते । 'द्वन्द्वे च' (१।१।३०) इत्यसौ न विभाष्यते दक्षिणोत्तरपूर्वाणामिति ॥

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ १० ॥

संनिपातेन लक्ष्यते यो[3] विधिः सो[4]निमित्तं तद्विघातस्य । कथम् । यदयं 'अतो दीर्घो यञि' (७।३।१०१) इति ब्रवीति । एतत्किल न वक्तव्यम्[5] । 'अतो दीर्घो यञि' (७।३।१०१) इति । वृक्षाय प्लक्षाय 'अकृत्सार्वधातुकयोः' (७।४।२५) इति भविष्यति । एवं सिद्धे यद्यञीत्याह[6] तत्पश्यति नैवंजातीयकानां दीर्घो भविष्यति । कथंजातीयकश्चायम् । अकारान्तः सन्निपातजातीयकः नाकारविघाताय निमित्तं भवति । अनेन[7] वचनं दीर्घत्वं भवति । किं कृतं भवति । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति । किमेतस्या ज्ञापने प्रयोजनम् । शतानि सहस्राणीत्यत्र सर्वनामस्थानाश्रये नुमि कृते 'ष्णान्ता षट्' (१।१।२४) इत्यनेन[8] षट्संज्ञा प्राप्नोति । तत्र 'षड्भ्यो' लुक् (७।१।२२) इति जश्शसोर्लुक् प्राप्नोति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति । अत्र हि सर्वनामस्थानजनितं नकारान्तत्वं न सर्वनामस्थानविघाताय भवति ॥

नैतदस्ति प्रयोजनम् । नैवा[9]त्र षट्संज्ञा प्राप्नोति । 'ष्णान्ता षट्' (१।१।२४) इत्यत्र अन्तग्रहणं प्रत्याख्याय प्रयोजनमुपदिशति नित्यषकारनकारान्तायाः संख्याया इति । न चैषा नित्यनकारान्ता । अतः षट्संज्ञैव नास्ति कुतः षट्संज्ञाश्रयो लुक् ॥ इदं तर्हि प्रयोजनम् । इयेष उवोष । अत्र हि इषेः लिटि गुणे कृते 'इजादेश्च गुरुमतोऽनृच्छः' (३।१।३६) इत्याम् प्राप्तः । आमि सति 'आमः' (२।४।८१) इति च लेर्लुक् प्राप्नोति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति दोषो न भवति । अत्र लिट्संनिपातनिमित्तं गुरुमत्त्वं न लिड्विघाताय निमित्तं भवति ॥ एतदपि नास्ति प्रयोजनम् । अत्र 'इजादेर्गुरुमतोनृच्छः' (३।१।३६) इति चोच्यते मतुब्निर्देशो न वक्तव्यः । यथा 'गुरोश्च हलः' (३।३।१०३) इति । तस्य प्रत्याख्यातस्य प्रयोजनमुपदिशति नि[10]त्यसंयोगे मतुबिति । न चायं नित्यं गुरुमान् । तेनात्र न भविष्यति । इदं तर्हि प्रयोजनम् । शकटौ पद्धतौ । अत्र शकटि इ पद्धति इ इति स्थिते 'इदुद्भ्याम्'

---

१ B कृतचृतः इति. २ A om. न. ३ A om. यो. ४ A स अनिमित्तं. ५ After वक्तव्यम्, A ins. सूत्रम्. ६ B वक्ति (for आह). ७ B वचने. ८ B om. अनेन. ९ B न च (for नैव). १० B नित्ययोगे.

(७।३।११७) इत्यौकारे कृते ‘ अच्च घेः ’ (७।३।११९) इति घ शकटिपद्धतिशब्दादकारान्तादत इति टाप् प्राप्नोति । टापि च ‘ याडापः ’ (७।३।११३) इति याट् स्यात् । तत्रानिष्टं रूपं भवति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति । अत्र हि औकारसंनिपातजनितं अदन्तत्वं तदिदानीमौकारविघातायानिमित्तं भवति॥ एतदपि नास्ति प्रयोजनम् । अत्रापि हि ‘अच्च घेः’ (७।३।११९) इति अत्करणं[1] प्रत्याख्याय प्रयोजनमुच्यते तदेवं[2] यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति । किं च प्राप्नोति। टाबिति । तस्मात् प्रयोजनं मृग्यम्[3] ॥

उच्चरितप्रध्वंसिनोऽनुबन्धाः[4] ॥ ११ ॥

उच्चरितमात्रा एवानुबन्धाः प्रध्वंस्यन्ते[7] । कथं ज्ञायते । यदयं ‘स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशे०’ (६।४।६२) इति सिद्धेऽज्ग्रहणे[5] हनो ग्रहणं करोति । अत्र[6] हि हनग्रहावजन्तौ तत्र अच् इत्येव सिद्धम् । पश्यति त्वाचार्यः उच्चरितमात्रा एवानुबन्धाः प्रध्वंस्यन्ते इति । अत्र अकार उच्चरितमात्र एव लुप्यते । तत्राज्ग्रहणेन सिद्धम्[8]। तस्माद्धनग्रहोर्ग्रहणम् ॥

नानुबन्धकृतमनेकाल्त्वम् ॥ १२ ॥

अनुबन्धकृतमनेकाल्त्वं न भवति । कथं ज्ञायते । यदयम् ‘ अनेकाल्शित्सर्वस्य ’ (१।१।५५) इति शिद्ग्रहणं करोति । तत्र हि सानुबन्ध आदेशः । अनुबन्धेन सार्धमनेकाल्त्व भवति । तत्रानेकाल् इत्येव से[9] सर्वादेशः सिद्धः । नार्थः शित्करणेन । पश्यति त्वाचार्यः । योऽनुबन्धेन साकमनेकाल् आदेशः स एकाल् एव । स च न सर्वादेशः । तस्माच्छिद्ग्रहणम्[10]। किमेतस्या ज्ञापने प्रयोजनम् । ‘ऊदुपधाया गोहः’ (६।४।८९) इति[11] । अस्त्ययमनेकाल् । सर्वादेशो न भवति । सर्वादेशो न स्थानिनिर्देशः । न सर्वाया ऊदुपधायाः सर्वादेशो न भवति ॥

नानुबन्धकृतमसारूप्यम्[12] ॥ १३ ॥

अनुबन्धैः सह प्रत्ययानामसारूप्यं न भवति । कथं ज्ञायते । यदयं ‘ विभाषा कृवृषोः’ (३।१।१२०) इति विभाषा क्यपं शास्ति ण्यश्च यथा स्यादिति । अत्र हि क्यप्ण्यत् इति अनुबन्धैः सहासरूपौ[13] । तत्र हि ‘वासरूपोऽस्त्रियाम्’ (३।१।९४) इत्येव सिद्धं भवति । नार्थो विभाषावचनेन । पश्यति त्वाचार्यः अनुबन्धैः सहासारूप्यं न भवति ।

---

१ B समुच्चयकरणं. २ B एवं; after एव, B om. यथा स्याद्. ३ B कर्तव्यम्. ४ B उच्चारित°. ५ B अज्ग्रहणेन. ६ A तत्र. ७ B प्रध्वंस्यन्ते. ८ After सिद्धम्, B ins. सिध्यति. ९ B om. स. १० B शिद्ग्रहणेन; after शिद्ग्रहणं, B om. किमेतस्या ज्ञापने. ११ B om. इति. १२ After this, C gives the following additional Paribhāṣā: एकदेशविकृतमनन्यवद्भवति ॥ १३ A सह सरूपौ.

लुप्तानुबन्धका येऽसरूपास्तेषां वाऽसरूपन्यायेन समावेशो भवति । इह च ण्यत्क्यपोरनुबन्धलोपे कृते सारूप्यं भवति । ततो विभाषाऽऽरभ्यते । किमेतस्या ज्ञापने प्रयोजनम् । 'कर्मण्यण्' (३।२।१) 'आतोनुपसर्गे कः' (३।२।३) अत्र वाऽसरूपन्यायो न भवति नानुबन्धकृतमसारूप्यं भवे[1]तीति ॥

भूतपूर्वगतिरिह शास्त्रे संभवति ॥ १४ ॥

भूतपूर्वगत्या इह शास्त्रे कार्याणि क्रियन्ते । कथं ज्ञायते । यदयम् 'ओक उचः के' (७।३।६४) इति ब्रवीति । कथं कृत्वा ज्ञापकम् । उँच्[2] 'इत्येतस्मादिगुपधलक्षणः कः' (३।१।१३५)........वेत्संज्ञा । तत्र के इति न युज्यते वक्तुं....पूर्वोऽयं क इति कृत्वा उचः कादेशः क्रियेत । किमेतस्या ज्ञापने प्रयोजनम् । पव्यमित्यत्रानुत्पन्ने प्रत्यये आर्धधातुकीये आर्धधातुकसामान्ये गुणे कृते यि प्रत्यये सामान्ये वान्तादेशे (६।१।७९) कृते 'हलः' (३।१।१२४) इति ण्यत् प्राप्नोति । अजन्तोयं भूतपूर्व इति कृत्वा यद् (३।१।९७) भवति । यथा वायूनाम् इक्षूणाम् । ह्रस्वभूतपूर्वग[3]त्या नामन्यतरस्यामित्येष स्वरः सिद्धो भवति । [4]भूतपूर्वगतिर्विज्ञायत इति ॥

वसुप्र[5]वृत्त्या इह शास्त्रे कार्यं भवति ॥ १५ ॥

कथं ज्ञायते । यदयं ' वस्वेकाजाद्घसाम् (७।२।६७) इतीटमाह । कथं कृत्वा ज्ञापकम् । अत्रैकाज्ग्रहणं प्रत्याख्यायते । न हि वसौ कश्चिदेकाजास्ति । अत्र हि द्विर्वचनेन भवितव्यम् । पश्यति त्वाचार्यः वसुप्रवृत्त्या एकाजयं भवति । कथम् । इटि कृते ' अत एकहल्मध्ये०' (६।४।१२९) इत्यभ्यासलोपो भवति । एकाजयं वत्स्यतीति इटं शास्ति । किमेतस्या ज्ञापने प्रयोजनं । ' शदेः शितः ' (१।३।६०) इति आत्मनेपदं सिद्धं भवति व[6]त्स्यत्यत्र शिदिति ॥

अनन्तरस्य विधिर्वा प्रतिषेधो वा ॥ १६ ॥

कथं ज्ञायते । यदयं णिश्व्योः प्रतिषेधं (७।२।५) शास्ति । कथं कृत्वा ज्ञापकम् । णिश्विप्रतिषेधो न वक्तव्यः । यतो हि 'नेटि' (७।२।४) इति प्रतिषेधे कृते गुणे[7] [8]अयादेशे चेष्टं[9] सिध्येत् । पश्यति त्वाचार्यः । अनन्तराया हलन्तलक्षणाया वृद्धेः (७।२।३) प्रतिषेधः । न वृद्धिमात्रस्य । ततो णिश्व्योः प्रतिषेधं शास्तीति । कथं वृद्धेरपि णिश्व्योः सिचि प्रतिषेधः स्यादिति । एवं सति किं कृतं भवति । अनन्तरस्य विधिर्वा प्रतिषेधो वा इत्येषा परिभाषा वक्तव्या भवति ॥

नैतदस्ति ज्ञापकम् । अन्यत्रापि ज्ञापितायामस्यां परिभाषायां णिश्व्योः प्रतिषेधो वक्तुं शक्यते । णिश्व्योः सिचि परतो गुणः प्राप्तः वृद्धिश्च । किमत्र वक्तव्यम् ।

---

१ B om. भवति. २ A om. उच्. ३ A गती. ४ B om. भूत. ५ C वत्स्यप्रवृत्त्या चेह शास्त्रे कार्यम्. ॥ ६ AB वत्स्यति. ७ After गुणे, B ins. च कृते. ८ B यादेशे for अयादेशे. ९ B om. इष्टं सिध्येत् पश्यति.

परत्वाद् गुणो नित्यत्वाद् वृद्धिः । कृतेपि गुणे प्राप्नोत्यकृतेपीति नित्या वृद्धिः । न हि गुणेपि कृते प्राप्नोति । 'इको गुणवृद्धी' (१।१।३) इत्युच्यते । एवं तर्हि अन्तरङ्गा वृद्धिः सिचीत्युच्यते । अन्तरङ्गतरो गुणः । कथम् । न हि वृद्धेः सिजेव निमित्तं किं तर्हि परस्मैपदमपि । गुणस्य तु सिजेव भवति निमित्तम् । अन्तरङ्गत्वाद् गुणे कृते यादेशे च हल इति प्रतिषेधो भवति नार्थो णिश्व्योर्ग्रहणेन । एवं सिद्धे यण्णिश्विग्रहणं करोति तत्पश्यत्याचार्यः न सिच्यन्तरङ्गमस्तीति । अतश्चैतदेवं यत् ' इको गुणवृद्धी ' (१।१।३) इत्यत्र वृद्धिग्रहणं करोति सिजर्थम्[1] । सिचि वृद्धिरिग्लक्षणा यथा स्यादिति । तस्याश्च प्रतिषेधो यथा स्यात् ' क्ङिति च ' (१।१।५) इति । तस्यां प्रतिषिद्धायां न्यनुवीत् इति[2] उवङादेशः सिद्धो भवति । तस्मान्न ज्ञापकम् ॥

इदं तर्हि ज्ञापकम् । ' डाबुभाभ्याम्० ' (४।१।१३) इत्यत्र उभाभ्यांग्रहणम् । ' ताभ्यामन्यत्रोणादयः' (३।४।७५) इति ताभ्यांग्रहणम् । ' यथाविध्यनुप्रयोगः पूर्वस्मिन् ' (३।४।४) इति पूर्वग्रहणम् । अनन्तरस्य प्राप्नोति विधिः पूर्वमात्रस्य न प्राप्नोति । इष्यते च । अत इदमुच्यते ॥ किमेतस्या ज्ञापने प्रयोजनम् । ' सुडनपुंसकस्य ' (१।१।४३) इत्यत्र नपुंसकग्रहणेन अनन्तरा या प्राप्तिः सा प्रतिषिध्यते । ' शि सर्वनामस्थानम् ' (१।१।४२) इति न प्रतिषिध्यते । तेन कुण्डानि तिष्ठन्तीत्यत्र सर्वनामस्थानसंज्ञा सिद्धा भवति । यद्येषा परिभाषास्ति ' सामन्त्रितम् ' (२।३।४८) इति साग्रहणं किमर्थम्[3] । ननु अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति अनया संबोधनलक्षणाया एव प्रथमाया आमन्त्रितसंज्ञा भवति न प्रातिपदिकलक्षणायाः । एवं तर्हि सिद्धे यत्साग्रहणं करोति तज् ज्ञापयति अनित्यैषा परिभाषेति । किमेतस्या अनित्यत्वज्ञापने प्रयोजनम् । ' न गोश्वन्साववर्ण० '(६।१।१८२) इत्ययं प्रतिषेध इति ' सावेकाचः०' (६।१।१६८) इति काण्डस्य भवति नानन्तरस्य । ' विभाषा साकाङ्क्षे' (३।२।११४) इति ' अभिज्ञावचन-मात्रस्य ' (३।२।११२) भवति । नानन्तरस्य न यदीत्यस्य । ' ओरञ् ' (४।२।७१) इत्येवमादयो योगाः ' तदस्मिन्नस्तीति देशे ' (४।२।६७) इत्येवमादिषु चतुर्ष्वेव भवन्ति नानन्तरस्येति ॥

तद्भक्तस्तद्ग्रहणेन गृह्यते ॥ १७ ॥

यो यस्य भक्तः स तद्ग्रहणेन भवति । कथं ज्ञायते । यदयं ' न क्त्वा सेट् ' (१।२।१८) इति कित्वप्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । अत्र हि व्यवधानादेव किति प्रतिषेधो न भविष्यति[4] । तस्मान्नार्थः प्रतिषेधेन । पश्यति त्वाचार्यः अयमिडागमः परं कितं भक्तः किद्ग्रहणेन गृह्यते इति । तस्माद्वचनम् । अपरे आहुः न सेड्वचनं ज्ञापकम् । प्रतिषेधवचनमेव । कथम् । देवित्वा सेवित्वेति ' सार्वधातुकार्धधातुकयोः,' ' पुगन्तलघूपधस्य च ' (७।३।८४,८६) उच्यते । न चायमिट् सार्वधातुकं नाप्यार्धधातुकम् । यश्चार्धधातुकमसौ इटा व्यवहितः । तस्मादत्रासत्यपि कित्वे न गुणः ।

१ B सिजर्थे. २ A om. इति. ३ B किमुक्तम्. ४ A भविष्यति.

नैार्थः[1] प्रतिषेधेन । पश्यति त्वाचार्यः आर्धधातुकभक्तोयं आर्धधातुकग्रहणेन गृह्यते तद्भक्तस्तद्ग्रहणेन गृह्यते इति । एवं सति इटि गुणः प्राप्नोति स कितीति प्रतिषिध्यते । तस्मात्क्त्विप्रतिषेधो ज्ञापकार्थः । किमेतस्या ज्ञापने प्रयोजनम् । सर्वेषामिति सुडागमः सुड्भक्तः सुड्ग्रहणेन गृह्यते । तेन 'बहुवचने झल्येत्' (७।३।१०३) इत्येत्वं सिद्धं भवति ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ १८ ॥

यस्य मध्ये पतितस्तस्य ग्रहणेन गृह्यते । कथं ज्ञायते । यदयं 'नेदमदसोरकोः' (७।१।११) इति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । क इदमदसोर्ग्रहणेन गृह्यते । तस्मात्प्रतिषेधो वक्तव्यः[2] । किमेतस्या ज्ञापने प्रयोजनम् । भिनत्ति छिनत्ति । 'श्नम् धातुमध्यपतितो धातुग्रहणेन गृह्यते । 'धातोः' (६।१।१६२) अन्त उदात्तो भवतीति सिद्धं भिनत्ति छिनन्ति मध्योदात्तं[3] भवति ॥

न[4] निमित्तकार्यं नै[5]मित्तिकस्य ॥ १९ ॥

निमित्तिनो यत्कार्यमुच्यते तन्निमित्तस्य न भवति । इह रहाभ्यामुत्तरस्य यरो द्विर्वचनमुच्यते । रहौ निमित्तं भवतः । यस्य द्विर्वचनमुच्यतेसौ निमित्ती यर् तेन यरो द्विर्वचनं रहयोर्निमित्तभूतयोर्न भवति । कथं ज्ञायते । यदयं शिवादिषु क्षीरहदशब्दं पठति । अत्र हद इति योसौ रेफस्तस्य द्विर्वचनं प्राप्तं तन्न भवति । आचार्याः[6] सूत्रमात्रमेव पठन्ति 'ग्रामहृदोत्तरपदात्' (४।२।१४२) इति हृद इति निपातयन्ति 'निमित्तिकार्यं न निमित्तस्य' इति । किमेतस्या ज्ञापने प्रयोजनम् । स्पर्धते इत्यत्र रेफस्य द्विर्वचनं न भवति ॥

अभ्यासविकारेष्वपवादा नोत्सर्गान्विधीन् बाधन्ते ॥ २० ॥

अभ्यासविकारेष्वपवादा नोत्सर्गान् बाधन्ते । कथं ज्ञायते । यदयं 'दीर्घोऽकितः' (७।४।८३) इति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । अत्र ह्यकित इति प्रतिषेधः क्रियते जङ्गम्यत इति नुगागमे कृते दीर्घत्वं मा भूदिति । तद्यान्तरेणापि प्रतिषेधं सिध्यति । कथम् । अयं नुक् दीर्घत्वस्या[7]पवादः । तत्रापवादत्वान्नुका दीर्घत्वं बाधिष्यते । नैवात्र दीर्घत्वं भवति । नार्थः प्रतिषेधेन । पश्यति त्वाचार्यः । अयं नुगपवाद उत्सर्गं दीर्घत्वं न बाधिष्यते । तस्मात्प्रतिषेधोकित इति । किति दीर्घत्वं मा भूदिति । किमेतस्या ज्ञापने प्रयोजनम् । मीमांसते इत्यत्राभ्यासस्येत्वं च प्राप्नोति दीर्घत्वं च । अपवादत्वादीर्घत्वमेव स्यात्तेन 'अभ्यासविकारेषु अपवादा नोत्सर्गान् विधीन् बाधन्ते' इत्यनया परिभाषया इत्वे कृते दीर्घत्वं भवति ॥

[9]असति संभवे बाधनं भवति ॥ २१ ॥

यत्र नास्ति संभवस्तत्र बाधनं भवति । वृक्षेभ्यः प्लक्षेभ्यः इत्यत्र यञि दीर्घत्वं (७।३।१०१) प्राप्नोति झलि एत्वं (७।३।१०३) तत्र नास्त्युभयोरेकस्मिन्

---

१ After नार्थः, A ins. अनेन. २ A कर्तव्यः. ३ B मध्योदात्तो. ४ C निमित्तेन कार्यमनैमित्तिकस्य ॥ ५ B यत्तेन. ६ A आर्याः ७ B दीर्घस्य. ८ A प्रतिषेधं कितः. ९ C असति हि संभवे बाधनं भवति ॥

संभवो दीर्घत्वमेत्वेन[1] बाध्यते। कथं पुनर्ज्ञायते संभवेऽसति बाधनं भवति। यदयं 'दीर्धोकितः' (७।४।८३) इति अकित इति प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। इह जङ्गम्यते इत्यत्रास्ति संभवो यदुभयं स्यात्। नुक् च दीर्घत्वं च। अ[2]भ्यासस्य नुगागमः अचो दीर्घत्वं च। पश्यति त्वाचार्यः संभवे सति बाधनं नास्ति। तस्मादकित इति प्रतिषेधादर्थादापन्नं संभवे सति बाधनं न भवति असंभवे बाधनं भवतीति। किमेतस्या ज्ञापने प्रयोजनम्। कार्यमित्यत्र अचो यदिति यन्न भवति। न ह्यस्ति संभवो यदुक्तं व्यं[3]घतौ स्यातामिति॥

स[4]त्यपि संभवे बाधनं भवति[5] ॥ २२ ॥

कुतः। लोके दृष्टत्वात्। ए[6]वं दृ[7]श्यते लोके ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति। अस्ति च संभवः यद्दधि कौण्डिन्याय दीयते तक्रं च। सत्यपि संभवे बाधनं भवति। किमेतस्या ज्ञापने प्रयोजनम्। सर्वनाम्नोकज् विधीयमानोधिकृतं कं बाधते। अस्ति च संभवो य[8]दुभयं पर्यायेण स्यात्॥

एकयोगनिर्दिष्टानामप्येकदेशानुवर्तनम् ॥ २३ ॥

एकयोगनिर्दिष्टानाप्येकदेशः प्रवर्तते एकदेशश्च निवर्तते। कथं ज्ञायते। यदयं 'तस्मादित्युत्तरस्य' (१।१।६७) इत्याह। कथं कृत्वा ज्ञापकम्। अ[9]त्र सूत्रे इतिक[10]रणं न कर्तव्यम्। प्रकृतत्वात्। क प्रकृतत्वम्। 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१।१।६६) इति। अथवा तत्रानुवर्तते निर्दिष्टग्रहणमपि कर्तव्यं भवति। एवं सिद्धे सति यदितिकरणं करोति तज्ज्ञापयत्याचार्यः इतिकरणो नानुवर्तते निर्दिष्टग्रहणमनुवर्तत इति। एवं सति किं कृतं भवति। एकयोगनिर्दिष्टानामप्येकदेशानुवर्तनमित्येतज् ज्ञापितं भवति। किमेतस्या ज्ञापने प्रयोजनम्। 'कृते ग्रन्थे' (४।३।११६) इत्यधिकृत्य 'संज्ञायाम्'(४।३।११७) इत्यत्र ग्रन्थ इति निवृत्तम्। तथा 'संख्याव्ययादेर्ङीप्' (४।१।२६)। 'दामहायनान्ताच्च' (४।१।२७) इत्यत्र संख्यादेरित्यनुवर्तते अव्ययादेरिति निवृत्तम्॥

इ[11]तरेतराश्रयाण्यपि कार्याणि शास्त्रेषु प्रकल्पन्ते ॥ २४ ॥

कथं ज्ञायते। यदयं 'वस्वेकाजाद्घसाम्' (७।२।६७) इत्याह। एकाज्निमित्त इडागमः, [12]इण्निमित्तमेकाच्त्वम्। तदितरेतराश्रयं भवति। इतरेतराश्रयाण्यपि कार्याणि प्रकल्पन्ते। किमेतस्या ज्ञापने प्रयोजनम्। 'इग्यणः संप्रसारणम्' (१।१।४५) भवति। अत्र संप्रसारणसंज्ञया यणः स्थाने इको भवन्ति। तेनैव इकः संप्रसारणसंज्ञा क्रियते। तदितरेतराश्रयं सिद्धं भवति॥

---

१ A एतेन. २ B om. अभ्यासस्य...दीर्घत्वं च. ३ A व्यघतो स्यात्. ४ A सत्यपि संभवे बाधनं न भवति॥ C सति संभवे बाधनं भवति॥ ५ After this, C gives the following additional Paribhāṣā : अस्ति च संभवो यदुभयं स्यात्॥ ६ After एवं, B ins. हि ७ B transp. दृश्यते and लोके. ८ B उक्तं (for उभयं). ९ B अस्मिन् (for अत्र). १० इतिकरणो न कर्तव्यः. ११ B इतरेतराश्रयिकार्याणि शास्त्रेषु कल्पन्ते C इतरेतराश्रयाणि शास्त्रे न कल्पन्ते॥ १२ A इड्निमित्त.

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ २५ ॥

प्रातिपदिकग्रहणे स्त्रीपुंनपुंसकलिङ्गविशिष्टस्यापि ग्रहणं भवति । कथं ज्ञायते । यदयं 'कुमारः श्रमणादिभिः' (२।१।७०) इत्याह । कथं कृत्वा ज्ञापकम् । अत्र कुमारशब्दस्य श्रमणादिभिः सह समासः क्रियते । अयं कुमारशब्दः पुंल्लिङ्गः । श्रमणादयश्च स्त्रीलिङ्गाः । समानाधिकरणाधिकारश्च वर्तते । तत्र सामानाधिकरण्यं न प्राप्नोति । पश्यति त्वाचार्यः कुमारग्रहणे स्त्रीलिङ्गविशिष्टस्यापि ग्रहणं भवति । तेन कुमारः श्रमणेति कुमारशब्दस्य श्रमणादिभिः सह समास उपपन्नो भवति । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति । किमेतस्या ज्ञापने प्रयोजनम् । 'युवा खलतिपलितवलिनजरतीभिः' (२।१।६७) इत्यत्र समास उच्यते स च समासो युवतिशब्दस्यापि भवति । युवतिः पलिता युवपलिता ॥

यदि तर्हि एषा ज्ञाप्यते 'ङ्याप्प्रातिपदिकात्' (४।१।१) इति ङ्याप्ग्रहणमनर्थकं भवति । अत्र हि प्रातिपदिकादित्येवं सति प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि सिद्धं भवति ॥ उत्तरार्थं वक्ष्यति । 'तस्यापत्यम्' (४।१।९२) इत्यत्र ग्रहणं 'तस्याः' न प्राप्नोति । 'तेन रक्तम्' (४।२।१) इति 'तया' न प्राप्नोति । तत्र ङ्यापोरनुवृत्तिर्यथा स्यात् । प्रातिपदिकात् ङ्यापश्चेति । तेन यत्समर्थविभक्त्या गृह्यते तस्य ङ्याबुत्तरस्यापि प्रत्ययोत्पत्तिः सिद्धा भवति ॥ नैतदस्ति प्रयोजनम् । एकशेषनिर्देशात्समर्थविभक्तिषु । तस्य च तस्याश्च तस्य चेति 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' (१।२।६९) इत्येकशेषो भवति । तेन सर्वतः प्रत्ययोत्पत्तिः सिद्धा भवति । नार्थो ङ्याब्ग्रहणेन ॥

इदं तर्हि प्रयोजनम् । एतस्या एव प्रयोजनार्थं तत्र यद्वक्ष्यति 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमस्त्रीप्रत्यये' इत्येतदुपपन्नं भवति । यदि तर्हि स्त्रीप्रत्ययो गृह्यमाणो लिङ्गविशिष्टं न गृह्णाति 'चटकाया ऐरक्' (४।१।१२८) इत्यत्र चटकान्न प्राप्नोति । तथा एण्या ढक् इति एणान्न प्राप्नोति । नैतौ स्त्रीनिर्देशौ । कथम् । चटकान्तात् ङसेर्यादेशः कृतः । अतो दीर्घो यञीति दीर्घत्वे कृते चटकाया इति सिद्धं भवति । यद्येवं चटकायैरगिति वृद्धिः किं न क्रियते । असंदेहार्थम् । चटकायैरगित्युच्यमाने संदिह्यते किमयमेरगैरग्वेति । नास्ति संदेहः । यद्ययमेरक्स्यात् फकमेव ब्रूयात् । तत्राप्यर्थः उत्तरत्र ग्रहणं न कर्तव्यं भवति । एवं तर्हि बहुलमिति वर्तते । क्व प्रकृतम् । 'शेश्छन्दसि बहुलम्' (६।१।७०) इति । तेन सर्व एव संविहितो विधिर्बहुलं भवति । कारैः प्रकार इत्येवमादीनि सिद्धानि भवन्ति । 'एण्या' (४।३।१५७) इति एणशब्दात् ङसेः स्थाने ङ्या कृतः तत्र टिलोपे कृते सिद्धं भवति । तस्मान्न चेदमकृतम् । अस्त्रीप्रत्यय इति च न दोषोस्ति ॥

---

१ After this, C reads the following additional Paribhāṣā. विभक्तौ लिङ्गविशिष्टाग्रहणम्. २ B समानाधिकरणाभावः प्राप्नोति. ३ A वलित. ४ After पलिता B ins. इति. ५ B om. युवपलिता. ६ B इयं for एषा. ७ B om. अनुवृत्तिः ८ A एकदेश. ९ A एण्या फमित्यत्रा (एणान्न). १० B या आदेशः. ११ B om. कारः... भवन्ति. १२ B om. भवति...दोषोस्ति.

वर्णैकदेशा[1] वर्णग्रहणेन गृह्यन्ते ॥ २६ ॥

वर्णानामेकदेशा वर्णग्रहणेन गृह्यन्ते । कथं ज्ञायते । ' एच इग् ह्रस्वादेशे ' (१।१।४८) इति योगमारभते । कथं कृत्वा ज्ञापकम् । अयं योगो नारब्धव्यः । एच इग् ह्रस्वादेशेषु इकारोकारौ भविष्यतः । एचः सस्थानत्वात् इकारोकारौ एच उत्तरभूयस्त्वाद् भविष्यतः । उत्तरं पूर्वमित्येकदेशशब्दावेतौ । एवं सति इकारोकारावेचः[2] शब्दौ भवतः । यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते तत एषु[3] प्रत्याहार उपपन्नो भवति । प्रयोजनमपि चास्य योगस्योच्यते । इमावैचौ समाहारवर्णौ मात्रावर्णस्य मात्रा इवर्णोवर्णयो-स्तद् ह्रस्वशासनेषु एचोरिवर्णोवर्णौ[4]; मा कदाचिदवर्णो भूदित्येवमर्थं सूत्रारम्भः । यदि चैषा परिभाषास्ति[5] तत एतत्प्रयोजनमुपपन्नं[6] भवति ॥

यच्चापि ' होतृप्रशास्तॄणाम् ' (६।४।११) इति कृतणत्वमुच्चारयति । कथं कृत्वा ज्ञापकम् । इह ' रषाभ्यां० ' (८।४।११) णत्वमुच्यते । न चात्र रषौ[7] पश्यामः । पश्यति त्वाचार्यः । ऋवर्णे रेफोऽस्ति यतो णत्वमुच्चारयति । यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते । यच्चैकारौकारस्येदुतौ शास्ति । कथं कृत्वा ज्ञापकम् । एचोः प्लुतिरुच्यमाना कः प्रसङ्गो यदुत इदुतौ स्याताम् यत्र इदुतावेव न स्तः । पश्यति त्वाचार्यः एचोरिदुतौ । यथेतौ वर्णग्रहणेन गृह्येते । यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते तत एतदुपपन्नं भवति । किमेतस्या ज्ञापने प्रयोजनम् । आनृधुरित्यत्र ऋवर्णस्थं रेफं दृष्ट्वा द्विहल इति नुट् सिद्धो भवति ॥

ताच्छीलिकेषु[8] वाऽसरूपविधिर्नास्ति ॥ २७ ॥

ताच्छीलिकेषु प्रत्ययेषु वाऽसरूपविधिन्यायो न भवति । कथं ज्ञायते । यदयं ' जुचंक्रम्य० ' (३।२।१५०) इति सूत्रे पदेर्युचं[9] शास्ति । कथं कृत्वा ज्ञापकम् । अयं पदिरनुदात्तेत् । तस्य ' अनुदात्तेतश्च हलादेः ' (३।२।१४९) इति युच् सिद्धः । नार्थः पुनः पदिग्रहणेन । एवं सिद्धे सति यत्पदिग्रहणं[10] करोति तज्ज्ञापयति–ताच्छीलिकेषु वाऽसरूपविधिर्न भवति । किमेतस्या ज्ञापने प्रयोजनम् । भासते भास्वरः इति वाऽसरूपविधिना पुनरनुदात्तलक्षणो युज् न भवति । यथेतज्ज्ञाप्यते 'सूददीपदीक्षश्च' (३।२।१५३) इति दीपग्रहणमनर्थकम् । अस्माद्दीपो युग्विधीयते । ' नमिकम्पिस्म्यजसकमहिंसदीपो रः ' (३।२।१६७) इति । स विशेषविहितः सामान्यविहितं युचं बाधिष्यते । एवं सिद्धे सति प्रतिषेधाधिकारे यद्दीपग्रहणं करोति तज्ज्ञापयत्याचार्यः युज्रयोः समावेश इति । किमेतस्या ज्ञापने प्रयोजनम् । कम्रा कमनमिति च सिद्धं भवति ॥

---

१ C न ह्येकदेशा वर्णग्रहणेन गृह्यन्ते. २ B एचोः. ३ A एव प्रत्याख्यान (for एषु प्रत्याहार). ४ A इ वर्णो वर्णे सा (for इवर्णोवर्णे मा). ५ B भवति. ६ B om. प्रयोजनं. ७ A रकारं (for रषौ). ८ C ताच्छीलिकेषु न वासरूपविधिः ॥ ९ AB पचेः (for पदेः). १० AB पचि (for पदि).

प्रत्येकं वाक्यपरिसमाप्तिः ॥ २८ ॥

कथं ज्ञायते । लोकतः । तद्यथा । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति । न चोच्यते प्रत्येकमिति । प्रत्येकं च भुजिः परिसमाप्यते । शास्त्रे चापि इयमस्ति परिभाषा । कथं ज्ञायते । 'णलुत्तमो वा' (७।१।९१) इत्याह । कथं कृत्वा ज्ञापकम् । इह हि समुदितस्य त्रिकस्य उत्तमसंज्ञा क्रियते । तत्रैकस्य णल उत्तम इति विशेषणं न प्राप्नोति । पश्यति त्वाचार्यः । प्रत्येकं वाक्यपरिसमाप्तिर्भवति । तेन प्रत्येकं त्रिके उत्तमशब्दः क्रियते । किमेतस्या ज्ञापने प्रयोजनम् । प्रत्येकं गुणवृद्धिसंज्ञे भवत इति न वक्तव्यम्[1] ॥

समुदायेपि वाक्यपरिसमाप्तिः[2] ॥ २९ ॥

समुदायेपि वाक्यं परिसमाप्यते । तद्यथा गर्गाः शतं दण्ड्यन्तामित्युक्ते अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति । शास्त्रेपि चेयमस्ति परिभाषा । ज्ञापकं यदयं 'प्रथमयोः पूर्वसवर्णः' (६।१।१०२) इत्याह । कथं कृत्वा ज्ञापकम् । अयं प्रथमशब्दः सर्वत्रिकस्य समुदितस्य संज्ञा । तत इह प्रथमयोः त्रिकयोर्ग्रहणं भवति प्रथमद्वितीययोः । प्रथमयोरिति वचनात् । कथं पुनर्ज्ञायते त्रिकयोर्ग्रहणं न पुनरजायोः प्रथमयोरिति । आचार्यप्रवृत्तिर्ज्ञापयति त्रिकयोस्तद् ग्रहणं यदयं 'तस्माच्छसो नः पुंसि' (६।१।१०३) इति तस्मादित्यनेन पूर्वसवर्णं निर्दिशति । तज्ज्ञापयति शसोपि तेन पूर्वसवर्ण इति । यदि च त्रिकयोस्तद् ग्रहणं तत एवमुपपन्नम् । तस्मात् प्रथमयोर्ग्रहणं ज्ञापकम् । समुदायेपि वाक्यपरिसमाप्तिः । तेन 'ङेः प्रथमयोरम्' (७।१।२८) इत्येवमादि सिद्धं भवति ॥

भाव्यमानोण्[4] सवर्णान्न गृह्णाति ॥ ३० ॥

कथं ज्ञायते । यदयम् 'ई हल्यघोः' (६।४।११३) इति दीर्घमीकारं शास्ति । कथं कृत्वा ज्ञापकम् । एतत्सूत्रं 'इ हल्यघोः' इति वक्तव्यम् । कथमिदानीमीकारो भविष्यति । 'अणुदित्सवर्णस्य०' (१।१।६९) इति इवर्णो गृह्यते तत्रास्य[5] 'स्थानेन्तरतमः' (१।१।५०) इति दीर्घो भविष्यति दीर्घस्य नार्थो दीर्घग्रहणेन । पश्यति त्वाचार्यः[3] । भाव्यमानोण्[6] सवर्णान्न गृह्णाति ततो दीर्घोच्चारणं करोति । किमेतस्या ज्ञापने प्रयोजनम् । 'इदम इश्' (५।३।३) इत्यत्रेदमो ह्रस्वदीर्घप्लुताः पर्यायेणादेशा न भवन्ति । यद्येतज्ज्ञाप्यते 'दिव उत्' (६।१।१३१) इत्यत्र उकारस्य तपरकरणं न कर्तव्यम् । कथं वकारस्य स्थानेयमुकारो भाव्यते । तेन भाव्यमानः सवर्णान्न ग्रहीष्यतीति[7] ह्रस्व एव भविष्यति, न दीर्घप्लुतौ[8] । तस्मान्नार्थस्तपरकरणेन । पश्यति त्वाचार्यः—

---

१ After वक्तव्यं, A ins. भवति. २ After this, C reads the following additional Paribhāṣā उभयथा वाक्यसमाप्तिः ॥ ३ B आचार्यस्य. ४ C भाव्यमानोण् सवर्णान् गृह्णाति ॥ ५ After अस्य, A ins. स्थानेन्तरस्मिन्निवर्णे प्रसक्ते. ६ B om. अण्. ७ B गृह्णाति (for ग्रहीष्यति). ८ B ह्रस्वः दीर्घस्य दीर्घो भवति (for ह्रस्व एव भविष्यति).

उकार एवैको भाव्यमानोपि सवर्णान् गृह्णाति ॥ ३१ ॥

किमेतस्या ज्ञापने प्रयोजनम् । 'अदसोसेर्दादु दो मः' (८।२।८०) इत्यत्र उकारः सवर्णं गृह्णातीति अमुष्मिन् अमूभ्याम् इत्यत्र ह्रस्वस्य ह्रस्वो भवति दीर्घस्य दीर्घः ॥

इह शास्त्रे व्यवस्थितविभाषा भवति ॥ ३२ ॥

कथं ज्ञायते । यदयं 'वा क्यषः' (१।३।९०) इति ब्रवीति । कथं कृत्वा ज्ञापकम् । एतत्किल सूत्रं नारब्धव्यम् । यदि नारभ्यते विभाषात्मनेपदं कथं भविष्यति । पटपटायति पटपटायते । 'नित्यवीप्सयोः' (८।१।४) इति द्विर्वचनं पटत् पटत् । 'अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्' (६।१।९८) । 'नित्यमाम्रेडिते डाचि' (६।१।९८ वा.१) पूर्वपररूपं तकारस्य पकारः पटपटा इति स्थिते क्यॅष्वा । कथम् । इह योगविभागं करिष्यामः । 'कर्तुः क्यङ् सलोपश्च ।' (३।१।११) 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' (३।१।१२) । क्यङित्येव । तेन 'लोहितादिडाज्भ्यः' (३।१।१३) इत्येव । तत्र यदा क्यङ् तदा 'ङितः' (१।३।१२) इत्यात्मनेपदं भवति। यदा क्यष् तदा 'शेषात्०' (१।३।७८) इति परस्मैपदं भवति । नार्यो 'वा क्यषः' (१।३।९०) इत्यनेन सूत्रेण। तदेतत्सूत्रं व्यवस्थितविभाषार्थमारभ्यते । कथम्। लोहितादिषु केषांचिदात्मनेपदमेव स्यात् केषांचिदुभयम् । योगविभागेन पुनः सर्वेषामुभयम् । तेन नीलादीनामात्मनेपदमेव भवति । लोहितशब्दस्योभयम् । तत्र यद्वक्ष्यति वार्तिककारः 'लोहितादिडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि' (३।१।१३ वा. १, २) तन्न वक्तव्यं भवति । किमेतस्या ज्ञापने प्रयोजनम् ।

देवत्रातो गलो ग्राह इतियोगे च सद्विधिः ।
मियस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः ।

देवत्रात इति 'नुदविदोन्दत्राघ्रा०' (८।२।५६) इत्यत्रान्यतरस्यांग्रहणेन नैभिन्न नत्वमेव नाम्नोन्यत्रोभयम् । त्रातः त्राणः ॥ तथा गलः । गृ इत्येतस्यापि गुणे रपरत्वे च कृते 'ग्रो यङि' 'अचि विभाषा' (८।२।२०, २१) इति लत्वे क्रियमाणे स्वाङ्गे गल एव भवति स्वाङ्गादन्यत्र गरः । ग्राह इति 'विभाषा ग्रहः' (३।१।१४३) णप्रत्ययो भवति । ग्राहश्चेज्जलचर एव भवति । जलचरादन्यत्र अजेव भवति । ग्रहः ॥ इतियोगे च सद्विधिः । वर्धतीति धावति हन्तीति पलायत इति । अन्यत्र शतृशानची कदाचिद्भवेतः । 'नन्वोर्विभाषा' (३।२।१२१) इति वर्तमाने 'लटः शतृशानचौ०' (३।२।१२४) इत्यनेन व्यवस्थितविभाषया तु इतिशब्दे न भवतः ॥ तथा च गवाक्षः इति 'अवङ् स्फोटायनस्य' (६।१।१२१) वातायने नित्यं भवति, अन्यत्र विभाषा ॥ संशितव्रत इति 'शाच्छोरन्यतरस्याम्' (७।४।४१) इत्यनेनेत्वं क्रियमाणमत्र

---

१ C om. this Paribhāṣā. २ C व्यवस्थितविभाषा चेह शास्त्रे संभवति ॥ ३ After डाचि, B ins. इत्यादि पूर्वपररूपं. ४ B क्यष् स्याद्वा. ५ B नाम्न्यनत्वमेवान्यत्रोभयम्. ६ A अस्य (for एतस्य). ७ After स्वाङ्गे, B ins. एव. ८ B इति (for एव). ९ After धावति, B ins. इति. १० A भविष्यतः.

नित्यं भवति । अतोन्यत्र विभाषा । संशितव्रतः संशीतव्रतः ॥

स्वरविधौ व्यञ्जनमविद्यमानवत् ॥ ३३ ॥

स्वरे क्रियमाणे यद् व्यवधायि व्यञ्जनं तदविद्यमानवद् भवति । कथं ज्ञायते । यदयं 'यतोऽनावः' (६।१।२१३) इति अनाव इति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । नाव्यमित्यत्र 'यतोऽनावः' इति प्रतिषेधः । यद्येवमर्थं नार्थोनेन । कथम् । अच उदात्तानुदात्तस्वरिता उच्यन्ते । स चात्रादौ न भवति । तस्मादत्राचभावादेवोदात्तत्वं न भविष्यति नार्थः प्रतिषेधेन । एवं सिद्धे सति यत्प्रतिषेधं शास्ति तज्ज्ञापयति । स्वरविधौ व्यञ्जनमविद्यमानवद् भवतीति । किमेतस्या ज्ञापने प्रयोजनम् । गार्ग्यो वात्स्य इत्यत्राकारो नादिस्तस्याप्युदात्तत्वं सिद्धं भवति । तथा च पचति पठतीति उदात्तानुदात्तस्वरितस्य चकारठकारव्यवाहितस्यापि स्वरितः सिद्धो भवति ॥

अङ्गवृत्ते पुनर्वृत्तादविधिर्निष्ठितस्य ॥ ३४ ॥

अङ्गवृत्ते कार्ये कृते पुनर्वृत्तात्कार्यस्य विधिर्न भवति योन्यैः प्राप्नोति । कथं ज्ञायते । यदयं 'ज्ञाजनोर्जा' (७।३।७९) इत्याह । एतत्किल वक्तव्यं 'ज्ञाजनोर्ज' इति । का रूपसिद्धिः । जानीते जायते । जभावे कृते पश्चात् 'अतो दीर्घो यञि' (७।३।१०१) इति दीर्घत्वं भविष्यति । एवं सिद्धे सति यद्दीर्घमादेशं शास्ति तज्ज्ञापयति—अङ्गनिमित्त अजादेशे कृते पुनर्दीर्घत्वं न स्यादिति । किमेतस्या ज्ञापने प्रयोजनम् । क्रियते इत्यत्र रिङादेशे कृते अकृत्सार्वधातुकयोर्दीर्घत्वं (७।४।२५) न भविष्यति । अङ्गवृत्ते पुनर्वृत्तादविधिर्निष्ठितस्येति ॥

सकृद्गतौ विप्रतिषेधे यद् बाधितं बाधितमेव तत् ॥ ३५ ॥

यत्र द्वौ विधी युगपत्प्राप्नुतः तत्र विप्रतिषेधे परमिति कृत्वा परस्मिन्कृते पुनः प्रसङ्गात् पूर्वो विधिः प्राप्नुवन्न भवति । किं कारणम् । यत्सकृद्बाधितं बाधितमेव तत् । न पुनर्भवति । कथं ज्ञायते । यदयं 'कर्तरि कर्मव्यतिहारे' (१।३।१४) इति कर्तृग्रहणं करोति । कथं कृत्वा ज्ञापकम् । अत्र 'कर्मव्यतिहारे' इति वक्तव्यम् । नार्थः कर्तृग्रहणेन । ननु च भावकर्मणोरपि व्यतिहारे इत्यात्मनेपदं प्रसज्येत । तत्र को दोषः । न खलु कश्चिदिह, उत्तरत्र प्रतिषेधः स्यात् । यथा कर्तरि प्रतिषेधो भवति एवं भावकर्मणो-

---

१ B. संघातः. २ B अङ्गवृत्तेः C अङ्गवृत्तौ. ३ AB अवधिर्निष्ठस्य. ४ After this, C gives the following additional Paribhāṣā : वार्णादाङ्गं बलीयः. ५ A अन्यत्. ६ after किल C ins. सूत्रं. ७ A जनोर्जा. ८ A जाभावे. ९ AB अवधिः. १० After this, C gives the following additional Paribhāṣā : पुनःप्रसङ्गविज्ञानात्सिद्धम् ॥ ११ A om. इति. १२ Before व्यतिहारे B ins. कर्म. १३ A प्रयुज्येत.

रपि प्रतिषेधः प्रसज्येत । व्यतिगम्यन्ते ग्रामाः, व्यतिहन्यन्ते दस्यवः । अस्तु । पुनः-प्रसङ्गविज्ञानाद् भविष्यति । नार्थः कर्तृग्रहणेन । एवं सिद्धे सति यत्कर्तृग्रहणं करोति तज्ज्ञापयति सकृद्गतौ विप्रतिषेधे यद् बाधितं बाधितमेव तत् ॥ सकृच्च व्यतिहारलक्षणेन आत्मनेपदेन भावलक्षणमात्मनेपदं बाधितं न पुनः स्यात् । किमेतस्या ज्ञापने प्रयोजनम् । शास् हि इति स्थिते ' तुह्योस्तातङाशिष्यन्यतरस्याम्' (७।१।३५) इति तातङादेशश्च प्राप्तः । शाभावजभावौ च । परत्वात्तातङादेशे कृते पुनःप्रसङ्गाच्छाभावजभावौ न भवतः । सकृद्गतौ विप्रतिषेधे यद्बाधितं बाधितमेव तदिति न भवतः । शिष्टादित्यादि सिद्धं भवति ॥

असिद्धं बहिरङ्गमन्तरङ्गे[4] ॥ ३६ ॥

बहिरङ्गलक्षणमन्तरङ्गलक्षणे कर्तव्ये सिद्धम् । कथं ज्ञायते । यदयं ' ओमाङोश्च ' (६।१।९५) इत्याह । अत्राङि परतः पररूपवचनमनर्थकम् । अथ आ ऊढः इत्येवं स्थितस्य अकःसवर्णेदीर्घत्वं (६।१।१०१) प्राप्नोति पश्चाद् गुणः । पूर्वं तावदेकादेशो भविष्यति । तस्मिन् गुणेन सिद्धम् । अथोढः । एवं सिद्धे सति यदाह तज् ज्ञापयति—

धातूपसर्गयोरन्तरङ्गं कार्यं भवति ॥ ३७ ॥

बहिरङ्ग एकादेशः । तस्मिन् कृतेपि तस्यासिद्धत्वात् । पर आद् गुणः । स नित्यः । पश्चात् पुनर्वृद्धिः प्राप्नोति । तस्मादारम्भः एवमर्थम् । किमेतस्या ज्ञापने प्रयोजनम् । पट्व्या मृद्व्या इति परो यणादेशस्तस्यासिद्धत्वात् पूर्वो यणादेशोन्तरङ्गो भवति ॥

समानाश्रयमसिद्धं व्याश्रयं सिद्धं भवति ॥ ३८ ॥

कथं ज्ञायते अस्त्येषा परिभाषा । यदयं ' हनः सिच्' (१।२।१४) इति सिचः कित्वे कृते सिचमाश्रित्य 'अनुदात्तोपदेश०' (६।४।३७) इत्यनेनानुनासिकलोपः । तकारमाश्रित्य ' ह्रस्वादङ्गात्' (८।२।२७) इति सकारलोपः । एवमाहतेति सिद्धं भवति ॥ असत्यपि सूत्रे सिचं ' च्लेः सिच् ' (३।१।४४) इति कृत्वा हन् स् त इति स्थिते ' सार्वधातुकमपित्' (१।२।४) इति ङित् । तकारस्य ङित्वे सति तमाश्रित्य ' अनिदितां हल उपधायाः क्ङिति' (६।४।२४) इति लोपः । ' ह्रस्वादङ्गात् ' (८।२।२७) इति च सलोपः । तत आहतेति सिद्धं भवति । नार्थो ' हनः सिच् ' (१।२।१४) इति सूत्रेण । नैवम् । अक्रियमाणे सूत्रे सकारलोपे कृते हकारे योकारस्तस्य सकारमाश्रित्य आर्धधातुके ' अतो लोपः' (६।४।४८) इति लोपः प्रसज्यते ॥

---

१ A. om. बाधितं. २ A शमभाव. ३ A भवति. ४ Ater this, C gives the following Additioonal Paibhāṣās : अन्तरङ्गे कार्ये बहिरङ्गमसिद्धं स्यात् ॥ नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ५ B अथोढा. ६ After यत् A ins. एतत्. ७ C om. this Paribhāṣā. ८ A उकारं. ९ B मैवम्. १० A om. सूत्रे. ११ B इकार. १२ B प्रसज्येत.

अथ सूत्रे क्रियमाणे एवं[1]मेव कस्मान्न भवति । 'असिद्धवदत्राभात्' (६।४।२२) इति नकारस्यासिद्धत्वान्नकारेण व्यवधीयते । यावता 'अनिदितां हल:०' (६।४।२४) इत्यपि आभाच्छास्त्रम् । तस्मादुभयोः पक्षयोरसिद्धत्वान्नकारलोपस्याकारलोपो न भविष्यति[2] । तस्मान्नार्थः सूत्रेण । एवं सिद्धे सति यत्सूत्रमारभते तत्पश्यति समानाश्रयमसिद्धं व्याश्रयं सिद्धं भवति । आरम्यमाणे हि सूत्रे सकारमाश्रित्य नकारलोपः अकारलोपोपि स[3]कारमेव । तदेतत्समानाश्रयं भवति । अनारम्यमाणे सूत्रे त[4]कारमाश्रित्य नकारलोपः अ[5]कारलोपोपि सकारमेव । तद् व्याश्रयं भवति । सूत्रमारभमाणस्तु पश्यति समानाश्रयमसिद्धं भवति । किमेतस्या ज्ञापने प्रयोजनम् । पपुषः । द्वितीयाबहुवचने पापिवस् इति स्थिते 'वसोः संप्रसारणम्' (६।४।१३१ । इति शसमाश्रित्य संप्रसारणे परपूर्वत्वे च कृते पप् उस् इति स्थिते उसमाश्रित्य 'आतो लोपः' (६।४।६४) इति अजादौर्ङिति आकारलोपे क्रि[6]यमाणे 'असिद्धवदत्राभात्' (६।४।२२) इति संप्रसारणस्यासिद्धत्वादजेव नास्ति कुत आकारलोपः । अस्यां पुनः परिभाषायां सत्यां व्याश्रयत्वादेतत् सिद्धं भवति । अत्र शसमाश्रित्य व[7]सुसंप्रसारणम्, उसमाश्रित्य [8]आकारलोपः तदेतद् व्याश्रयं भवति । व्याश्रयं च सिद्धं भवति इति कृत्वा आकारलोपे कृते पपुषः इति सिद्धं भवति ॥

येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् ॥ ३९ ॥

येन वर्णेन वा संयोगेन वानन्तरेण व्यवधानमुच्यमानस्य विधेः प्राप्तिरस्ति तेन व्यवहितेपि वचनप्रामाण्यादेव विधिर्भवति । तद्यथा 'शमामष्टानां दीर्घः श्यनि' (७।३।७४) इति । अनेन शाम्यतीत्यत्र दीर्घो न प्राप्नोति[9] । किं कारणम् । योत्र दीर्घभावी सोन्येन हला व्यवहितः । न च शमादीनामष्टानामपि कश्चिदजन्तोस्ति यदर्थं वचनं स्यात् । उच्यते चेदं दीर्घत्वम् । तत्र वचनप्रामाण्यादनन्त्यस्यापि दीर्घो भवति । कथम् । न ह्यन्तरेण व्यवधानमत्र दीर्घभावी अजस्ति । एवमियं परिभाषा ज्ञापिता विज्ञेया । किमेतस्या ज्ञापने प्रयोजनम् । अधिजिगांसते इत्यत्र 'अज्झनगमां सनि' (६।४।१६) इति गमेरन्त्यदीर्घत्वे सति स[10]कारेणैव व्यवधायकेन धातोर्दीर्घत्वं भवति नाभ्यासस्य धातुव्यवाये ॥

निमित्ताभावे नैमित्तिकस्याप्यभावो भवति ॥ ४० ॥

तद्यथा । छत्रनिमित्ता छाया छत्रापाये न भवति । शास्त्रेपि ज्ञापकं यदयं सनोत्यादिषु स्तौतीति ब्रवीति । कथं कृत्वा ज्ञापकम् । अत्र ष्टु इत्ययं शब्द उपदेशे पठितः । तस्य धात्वादेरिति षकारस्य सकारः कृतः । षत्वनिमित्तं च ष्टुत्वम् । तस्या-

---

१ A om. एवं. २ B भवति. ३ B सकार एव. ४ A उकारं. ५ AB om. अकारलोपोपि. ६ B कृते. ७ B वसोः. ८ B आलोपः ९ After प्राप्नोति, A ins. इति १० A षकारेण.

भावे ष्टुत्वस्याभावो भवति । ततः स्तौतीति भवति । एवं निमित्ताभावे इति सिद्धम् । तस्या ज्ञापने प्रयोजनम् । पपुषः तस्थुषः इत्यत्र वलूनिमित्तक इट् वलभावे तस्याप्यभावः॥

[1]संनियोगशिष्टानामेकतरापाये उभयोरप्यपा[2]यः ॥ ४१ ॥

कथं ज्ञायते । लोकतः । तद्यथा देवदत्तयज्ञदत्ताभ्यामिदं कर्तव्यम् । देवदत्तापाये यज्ञदत्तो न करोति । शास्त्रे चापि ज्ञापकम् । यदयं 'बिल्वकादिभ्यश्छस्य लुक्' (६।४।१५३) इत्याह । कथं कृत्वा ज्ञापकम् । यदयमस्मिन्सूत्रे छग्रहणं करोति । अत्र हि बिल्वकादिभ्यो लुगित्युच्यमाने 'प्रत्ययस्य लुक्श्लुलुपः' (१।१।६१) इत्यनया परिभाषया बिल्वकादिभ्य उत्तरतः तद्धिते परतः नैवान्यप्रत्ययोस्ति विना छकारम् । तस्मादत्रान्तरेण च्छग्रहणं छस्यैव लुग् भवति । नार्थश्छग्रहणेन । तद्यथा । बिल्वानामदूरभवं नगरं इत्यस्मिन्विग्रहे 'नडादीनां कुक् च' (४।२।९१) इत्यनेन बिल्वशब्दाच्छप्रत्ययो भवति कुक् चागमः । 'तत्र भवः' इति बि[3]ल्वकीया । तस्यां बिल्वकीयायां भव इत्यस्मिन्नर्थेऽण् । तत्र अकृतव्यूहाः पाणिनीयाः । बिल्वक छ इति स्थिते अन्तरेण छवचनं छस्य लुकि कृते अणोपि लुक् प्रसज्यते । अयमपि हि तदा बिल्वकशब्दादुत्तरो भवति ॥

ननु च तद्धित इत्युच्यते न चा[4]र्ण् तद्धितः परोस्ति । नैष दोषः । यदा बैल्वकस्येदमित्यस्मिन् विग्रहे वृद्धलक्षणश्छः क्रियते तदाण् तद्धितपरो भवति । तस्मादण्निवृत्त्यर्थं छग्रहणं क्रियते । नैतदस्ति । अत्र ह्यणो लुकि क्रियमाणे 'असिद्धवदत्राभात्' (६।४।२२) इति छलुगसिद्धो भवति तेनाणो लुग् भवति । तस्मान्नार्थश्छग्रहणेन । एवं सिद्धे यच्छग्रहणं करोति तत्पश्यति प्रत्ययस्य निवृत्तिः क्रियमाणा सा[5]गमकस्यापि भवति । तेन कथमिह छस्यैव स्यात् । कुतो मा भूदिति । अयं कुक् छसंनियोगशिष्ट इति । एवं सति किं कृतं भवति । संनियोगशिष्टानामन्यतरापाये द्वयोरप्यभाव इत्येषा परिभाषा कर्तव्या भवति । अपर आह—छकारोच्चारणं क्रियते छकारस्यैव लुग्यथा स्यात् ककारस्य मा भूत् इति । तच्च न । प्रत्ययस्य लुगुच्यमानः कः प्रसङ्गो यदप्रत्ययस्य । कुतः । पूर्वभक्तस्य स्यादिति । पश्यति त्वाचार्यः अस्त्येषा परिभाषा यतश्छकारोच्चारणं करोति । किमेतस्याः ज्ञापने प्रयोजनम् । पञ्चेन्द्राण्यो देवता अस्येति पञ्चेन्द्रः दशेन्द्रः इति ङीप्रत्ययस्य लुकि कृते तत्राऽऽनुकोपि निवृत्तिः सिद्धा भवति ॥

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥ ४२ ॥

येन नाप्राप्त इति द्विः [6]प्रतिषेधः प्रकृतं गमयति । नाप्राप्ते प्राप्त एव । येन लक्षणेन प्राप्ते सति अन्यो विधिरारभ्यते स तस्य बाधको भवति । येन तु कश्चित्प्राप्ते कश्चिदप्राप्ते न तस्य बाधकः । कथं ज्ञायते अस्त्येषा परिभाषेति[7] । यदयं 'सनीवन्तर्ध'० (७।२।४९) इत्यत्र स्वृशब्दं पठति विभाषार्थम् । कथं कृत्वा ज्ञापकम् । अस्याप्यार्धधातुकेषु प्रत्ययेषु

---

१ C संनियोगशिष्टानामेकतराभावे उभयोरप्यभावः ॥ २ B अभावः. ३ B बिल्वकीयाः । ४ B अणः (for अण्). ५ B सागमकस्यापि. ६ AB द्विप्रतिषेधः. ७ B om इति.

'आर्धधातुकस्य'० (७।२।३५) इत्यनेनेट् प्राप्तः। स 'एकाच उपदेशेनुदात्तात्' (७।२।१०) इति प्रतिषिद्धः। तद्बाधनार्थं पुनः 'स्वरतिसूति०' (७।२।४४) इत्युच्यते। सत्यप्यार्धधातुकस्येट् प्राप्तः 'सनि ग्रहगुहोश्च' (७।२।१२) 'श्र्युकः किति' (७।२।११) इति प्रतिषिद्धः। तस्याप्यनेन बाधनं स्यात्। सनीवन्तर्धादौ स्वृग्रहणे[1] क्रियमाणे पश्यति त्वाचार्यः येन नाप्राप्ते तस्य बाधकं भवति। कथम्। न ह्यप्राप्ते कचिदपि स्वरतेरेकाज्[2]लक्षणप्रतिषेधेयं विभाषा विधिरारभ्यते अन्येष्वार्धधातुकीयेषु प्राप्तेषु च एवमेकाज्लक्षणे सन्यप्राप्ते ग्रहगुहो[3]श्चेति सनि प्राप्तेन्यत्राप्राप्ते 'स्वरतिसूति०' (७।२।४४) इत्यनेन विभाषारभ्यते स च येन प्राप्ते न च तं बाधते तस्मात् स्वृग्रहणं क्रियते। पुनरेवं सति प्राप्ताप्राप्तयोरप्यारम्भः। 'आर्धधातुकस्य०' (७।२।३५) इतीट् प्राप्तः। 'एकाच०' (७।२।१०) इति प्रतिषिद्धः। अविभाषापक्षेपि 'सनि ग्रहगुहोश्च' इति 'उगन्तानाम्' (७।२।११) इति प्रतिषिद्धः। तद्बाधनार्थं पुनः स्वृग्रहणं क्रियते। सैषा स्वृग्रहणाज्ज्ञापिता भवति॥

किमेतस्या ज्ञापने प्रयोजनम्। अदीधयुरिति पदकारस्य प्रत्याख्यानपक्षे उदाहरणमुपपन्नं भवति। कथम्। अयं ञुंसि[4] गुणः प्रतिषेधविषये आरभ्यमाणः येन प्राप्त एव प्रतिषेध आरभ्यते तं बाधते येन प्राप्ते नाप्राप्ते[5] न च तं बाधते। क्ङिति० (१।१।५) इत्येव प्रतिषिद्धः जुसि प्राप्तः। नहि कश्चिज्जुसस्ति यत्रायं प्रतिषेधो न स्यात्। 'दिधीवेवीटाम्' (१।१।६) इति पुनरनेन दीर्धीवेव्योरेवोत्तरस्मिञ्जुसि प्रतिषेधः प्राप्तः। अन्यस्य धातोर्जुस्यनेन प्राप्तः योसौ प्राप्ते चाप्राप्ते च। एवमयं जुसिगुणः येनास्य सर्वत्र प्रतिषेधः प्राप्तः तं बाधते यः कचित्प्राप्तः कचिदप्राप्तः न तं बाधते। क्ङितीत्येवं बाधते दीधीवेवीटामिति न बाधते। तस्मादन्यस्तस्यैव गुणो भवति न जुसिगुणः॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव[6] ग्रहणम्॥ ४३॥

लुग्विकरणस्यालुग्विकरणस्य च ग्रहणे लुग्विकरणस्यैव ग्रहणं भवति। कथं ज्ञायते। यदयं 'स्वरतिसूति०' (७।२।४४) इत्यत्र सूतिसूयत्योर्ग्रहणं करोति तन्निर्देशस्य प्रयोजनं सुवतिनिवृत्त्यर्थम्। नैतदस्ति। सूँतिरिति[7] ङानुबन्धस्यैव सूयतेरिष्यते तेन सुवतेर्न भविष्यति। एवं सिद्धे सति यत्तन्निर्देशं करोति तज्ज्ञापयति भवतीयं परिभाषेति[8]। षूङियस्य सूयतेरेवालुग्विकरणस्य न स्यात्। तस्मात्सूतिग्रहणं क्रियते। लुग्विकरणस्यापि यथा स्यात्। किमेतस्या ज्ञापने प्रयोजनम्। 'गातिस्थाघुपा०' (२।४।७७) इत्यत्र पाग्रहणे अलुग्विकरणस्यैव भवति। अपात्। लुग्विकरणस्य न स्यात्। [9]अपासीत्। तत्रालुग्विकरणस्यैव स्यात्। षूङियुच्यमाने लुग्विकरणस्य न स्यात्। तस्मात्सूतिसूयतीति

---

१ A स्वृग्रहणेऽक्रियमाणे. २ A स्वरिते एकाच्°. ३ B एकादेषा (इति). ४ B जुसिति. ५ A नाप्राप्ते च तं बाधते; B नाप्राप्ते च न च तं न बाधते. ६ B om. एव. ७ B सूतीति सानुबन्धस्यैव. ८ B om. इति. ९ Before अपासीत् A ins. पा.

[1]द्विर्निर्देशः क्रियते अलुग्विकरणार्थम् । आचार्यप्रवृत्तिर्ज्ञापयति लुग्विकरणस्यैव ग्रहणमिति । यदयं गातिस्थाघुपेत्यत्र तिन्निर्देशं करोति तज्ज्ञापयति अस्त्येषा परिभाषेति ॥

उभयत आश्रये नान्तादिवद् भवति ॥ ४४ ॥

यत्र उभयं प्राप्नोति अन्तश्च आदिश्च तत्रान्तादिवद्भावो[2] न भवति । तद्यथा । लोके उभयोस्तुल्यवर्णयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कर्म करोति । यदा च तौ युगपदप्युपगच्छतः न च परस्परविरोधिनौ[3] भवतः तदा क्रमेण करोति । यदा तु विरोधिनौ भवतः तदैकस्यापि[4] न करोति[5] कर्म । एवमिहापि यदि तावदन्तवदादिवन्न[6] भवति ॥ किमेतस्या ज्ञापने प्रयोजनम् । परापूर्वस्यायतेः पलायते इति । तत्र यदा[7] धातोरादिवन्न भवति तदोपसर्गस्यान्तवद् भवति । यदात्रोपसर्गस्यान्तवदेव भवति तदा धातोरादिवत् । तत एकादेशे कृते उपसर्गस्यायतौ परतः इत्येवं शक्यते वक्तुम् ॥

एकानुबन्धकृतमनित्यम् ॥ ४५ ॥

इह शास्त्रे एकानुबन्धकृतं ञित्वं णित्वं तावदनित्यं भवति । कथं ज्ञायते । यदयं मन्त्रे 'श्वेतवहोक्थशस्०' (३।२।७१) इति ण्विनित्याह[8] । तत्र णित्करणं वृद्ध्यर्थम्[9] । नित्करणं स्वरार्थं तत्त्वेतदेकानुबन्धेन शक्यते लब्धुम् । अत्र ञिरिति वक्तव्यम् । स्वरश्च वृद्धिश्च भविष्यति । एवं सिद्धे यदयं द्व्यनुबन्धं करोति तज्ज्ञापयति अस्तीयं परिभाषा एकानुबन्धकृतमनित्यमिति । किमेतस्या ज्ञापने प्रयोजनम् । ज्योतिरधिकृत्य कृते ग्रन्थे ज्योतिषम्, सोमेन्द्रावस्य चरोर्देवता सोमेन्द्रश्चरुः । णकृतस्यानित्यत्वाद् वृद्धिर्न भवति ॥

एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य[10] ॥ ४६ ॥

एकानुबन्धकग्रहणे द्व्यनुबन्धकस्य ग्रहणं न भवति । कथं ज्ञायते । यदयं 'वामदेवाड्ड्यड्ड्यौ' (४।२।९) इत्यत्र यस्येति लोपेन सिद्धे यड्डित्करणमकारलोपार्थं करोति तज् ज्ञापयति एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ग्रहणं भवति । किमेतस्या ज्ञापने प्रयोजनम् । 'ययतोश्चातदर्थे' (६।२।१५६) इति यत एव ग्रहणं भवति । अतस्तेन वामदेव्यमिति ॥

निरनुबन्धग्रहणे न सानुबन्धकस्य[11] ॥ ४७ ॥

निरनुबन्धकग्रहणे सानुबन्धकस्य ग्रहणं न भवति । कथं ज्ञायते । यदयं 'वामदेवाड्ड्यड्ड्यौ' (४।२।९) इति यकारं ङितं करोति टिलोपार्थम् । अत्र हि यस्येति लोपेन

---

१ AB तिङ्निर्देशः. २ C नान्तादिवद्भावः ३ A अपरस्पर (for परस्पर). ४ B transp. न and एकस्यापि. ५ B transp. करोति and कर्म. ६ B transp. अन्तवदादिवत् and न ७ B ins. अत्र after यदा. ८ B शसो ण्विन्. ९ AB विध्यर्थम्. १० After द्व्यनुबन्धकस्य C ins. ग्रहणम्. ११ After this, C gives the following additional Paribhāṣās : तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥ एकानुबन्धकृतमानित्यम् ॥

सिद्धम्। एवं तर्हि ज्ञापयति। यकारस्याननुबन्धकस्य ग्रहणे न सो[1]नुबन्धकस्य तस्य ग्रहणं भवति। किमेतस्या ज्ञापने प्रयोजनम्। ‘ययतोश्चातदर्थे’ (६।२।१५६) इति यकार-ग्रहणे वामदेव्यमित्यत्रैष स्वरो न भवति॥

यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते ॥ ४८ ॥

य[2]था एकारविधिं प्रति एकारोच्चारणमनर्थकम्। अकारविधिं प्रति अकारोच्चारण-मनर्थकम्। ओकारविधिं प्रत्योकारोच्चारणमनर्थकम्। एतेनैकारविधिः अ[3]कारविधिः ओकारविधिश्च पठ्यते। वक्ष्यते ‘अतो भिस एस्’ (७।१।९) इति। ‘इन्द्रवरुण०’ (४।१।४९) सूत्रे अ[4]नुग्वक्तव्यः। ङसेश्च आदेशः अद्वक्तव्यः। ‘आ[5]त ओ णलः’ इति वक्तव्यः। पश्चाद् वृद्धिसवर्णदीर्घत्वे सिद्धे वृक्षैः इन्द्राणी वृक्षात् ययाविति। अत्र पररूपं प्राप्नोति। पररूपं प्रत्येते विधयोनर्थका भवन्ति तेन पररूपं बाध्यते॥

यस्य विधेर्निमित्तं नासौ बाध्यते ॥ ४९ ॥

तद्यथा लोके यमर्थं प्रति यद्वचनं निमित्तत्वेन कल्प्यते तस्यार्थस्य तद्वचनं प्रापकं भवति। यथा अभुक्तवति भुङ्क्ष्वेति। एवमिहापि यस्य विधेः अकारैकारोच्चारणानि निमित्तं भवन्ति तानि तस्य विधेः प्रापकानि भवन्ति। अकारोच्चारणं सवर्णदीर्घत्वस्य एकारोच्चारणं च वृद्धिविधेः। कथं नाकृतेषु अकार-एकारेषु एषां विधीनां प्राप्तिरस्ति वृक्षैरित्येव-मादिषु। अत्र एकारः उकारः अकारो वाऽनयोर्विध्योर्निमित्तमेव तेन तौ विधी भवतः। पररूपं च न भवति। ‘अतो भिस ऐस्’ (७।१।९) ‘आत औ णलः’ (७।१।३४) इत्येव-मादिषु वचनव्यतिरेकाद्विधिव्यतिरेको लभ्यते। अतिजरसैः अतिजरसाद् ददरिद्राविति। यस्य विधेर्निमित्तं नासौ बाध्यते। ‘अतो भिस ऐस्’ (७।१।९) ‘टाङसिङसामिनात्स्याः’ (७।१।१२) ‘आत औ णलः’ (७।१।३४)॥

कार्यकालं संज्ञापरिभाषम्[6] ॥ ५० ॥

कोस्यार्थः। कार्यं कालो यस्य तत्कार्यकालम्। कालो नाम पाठः। न्यास इत्यर्थान्तरम्। संज्ञाश्च परिभाषाश्च यत्रैव पठ्यन्ते स एव तासां कालः य[7]त्र यत्र कार्यं तत्र तत्र तासां कार्यः। तद्यथा ‘सिचि वृद्धिः परस्मैपदेषु’ (७।२।१) उपस्थितमिदं भवति ‘वृद्धिरादैच्’ (१।१।१) इति। सैषा शास्त्राधिकृता सती अस्मात्सूत्रात्परा भवति। तथा गुणशास्त्रेभ्यः ‘अदेङ् गुणः’ (१।१।२) इत्येषा परा भवति। तथा ‘राज्ञः

---

१ A सानुबन्धकस्येति एतस्य ग्रहणं न भवति. २ A यं विधिं प्रत्यनर्थकं भवति तथा एकार°. ३ A अविधिः. ४ AB आनुक्. ५ A अतः औ णलः. ६ After this, C gives the following additional Paribhāṣā : यथोद्देशं संज्ञापरिभाषम्॥ ७ A om. यत्र यत्र...कार्यः.

क च ' (४।२।१४०) ' अलोन्त्यस्य ' (१।१।५२) इत्येषा परा भवति । तथा ' अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ' (७।१।७५) इति ' अस्तेर्भूः ' (२।४।५२) इति 'ङिच्च' (१।१।५३) 'अनेकाल्शित्सर्वस्य' (१।१।५५) इति परा भवति । एवमेतत् कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् ॥

कथं पुनर्ज्ञायते अस्त्येषा परिभाषेति । यदयं 'न मु ने' (८।२।३) इत्याह । कथं कृत्वा ज्ञापकम् ॥ अत्र हि अदश्शब्दादुत्तरस्य टा इत्येतस्य 'आङो नाऽस्त्रियाम्' (७।३।१२०) इति क्रि[१]यमाणे नादेशे घिलक्षणो मुभावः सिद्धः । तत्र ' न मु ने ' (८।२।३) इत्यनेन मुभावस्य नाभावे क्रियमाणे ' पूर्वत्रासिद्धम् ' (८।२।१) इति प्राप्ते सिद्धत्वमुच्यते । स तु नाभावः क्रियमाणोप्यस्मिन्सूत्रे न प्राप्नोति । कथम् । यद्यप्ययं मुभावः नाभावसूत्रं प्रति सिद्धः घिसंज्ञां तु प्रत्य[२]सिद्धः । तत्र मुभाव एव नास्ति । कुतो घिसंज्ञा । घिसंज्ञाभावाच्च कुतो नाभावः । तस्मात् ' न मु ने ' (८।२।३) इत्यत्र घिसंज्ञायां चेति वक्तव्यम् । न चोच्यते । तज्ज्ञापयत्याचार्यः । कार्यकालं संज्ञापरिभाषम् । यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् । ' अदसोसेर्दादु दो मः ' (८।२।८०) इति उपस्थितामिदं भवति । ' शेषो घ्यसखि ' (१।४।७) इति च मुत्वात्परा भवति । तस्मात् सिद्धायां सत्यां घिसंज्ञायां मुत्वं सिद्धं भवति । नाभावे त्वसिद्धे ततोस्य नाभावस्य सिद्धत्वमनेन क्रियते । सैषा सूत्रारम्भाज्ज्ञापिता परिभाषा भवति । किमेतस्या ज्ञापने प्रयोजनम् । 'अदसोसेर्दादु दो मः' (८।२।८०) इत्यत्र चोच्यते ईत्वोत्वयोः प्रगृह्यसंज्ञोच्यते । 'एत ईद्बहुवचने' (८।२।८१) इत्यस्मात्परा भ[३]विष्यति । कार्यकालं संज्ञापरिभाषमिति यदु[४]क्तं तदुपपन्नं भवति ॥

उक्तार्थानामप्रयोगः[५] ॥ ५१ ॥

सकृदुक्तस्यार्थस्य पुनः प्रयोगो न भवति । कुतः । लोके दृष्टत्वात् । तद्यथा लोके पुरुष इत्युक्ते पुनस्तस्यैव द्वितीयश्च करणीयं कार्यमिति च पुनः प्रयोगो भवति । .... यद्येवं ' न सामिवचने ' (५।४।५) इत्ययं प्रतिषेधो नोपपद्यते । कथम् । अत्र हि ' अनत्यन्तगतौ क्तात् ' (५।४।४) इति कनि प्राप्ते । अवश्यं चैतदनुवर्त्यं लोप इत्येवमुक्तं तस्मान्नार्थश्चकारेण । पश्यति त्वाचार्यः । अनन्त्यस्यापि वकारस्योदुच्यमानोन्त्यसमानदेशस्यैव भवति । न चानन्त्यमात्रस्य । यश्च ज्वरत्वरयोर्वकारः नासावन्त्यसमानदेशः । अकारेण व्यवहितस्य न भवति । स चकारेण बलात्क्रियते । तस्मादेष चकारो ज्ञापनार्थो भवति ॥

अनन्त्यविकारेन्त्यसदेशस्य[६] ॥ ५२ ॥

१ A क्रियमाणादेशेऽचिलक्षणे. २ B सिद्धः (for असिद्धः). ३ B भवति. ४ B om. उक्तं. ५ After this, C gives the following additional Paribhāṣās : सकृदुक्तार्थस्य प्रयोगः ॥ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ॥ ६ C अनन्त्यविकारे अन्त्यसदेशस्यैव ग्रहणम्.

किमेतस्या ज्ञापने प्रयोजनम् । अनस्तक्ष्णः इत्यल्लोपो भवति । अनन्त्यस्याकारस्य लोप इत्युच्यमानेऽन्त्यसमानदेशस्यैव भवति नान्त्यस्येति ॥

संज्ञापूर्वकविधिरनित्यः ॥ ५३ ॥

इह यः संज्ञापूर्वको विधिरारभ्यते स किल्वानित्यो भवति । कथं ज्ञायते । यदयं 'ओर्गुणः' (६।४।१४६) इत्याह । अत्र हि ओर्गुणे क्रियमाणे ओकारो भवति । तत्र लघ्वर्थमोरोदिति वक्तव्यम् । उवर्णस्य ओद् भवति । एवं सिद्धे सति यदयं गुणग्रहणं करोति तत्पश्यति संज्ञापूर्वको विधिरनित्यः । तत इहाप्यनित्यो गुणो यथा स्यात् । [3]संज्ञापूर्वको विधिरानित्य इति । किमेतस्या ज्ञापने प्रयोजनम् । स्वयंभुवोपत्यं स्वायंभुव इति गुणो न भवति ॥

नञिवयुक्तमन्यसदृशाधिकरणं तथा ह्यर्थः ॥ ५४ ॥

नञा युक्तं इवेन युक्तं यद्धि किंचिद् दृश्यते तदन्यस्मिंस्तत्सदृशे कार्यं ज्ञापयति । तद्यथा । अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशस्तुल्योदरपाणिपादनयन एवानीयते नाश्वो गर्दभो वेत्येवं तावल्लोके । शास्त्रेपि यदयं ' सिपि धातोरुर्वा ' (८।२।७४) इत्यत्र धातुग्रहणं करोति । कथं कृत्वा ज्ञापकम् । अत्र हि धातुग्रहणमनर्थकम् । सिपि परतो धातोरुच्यते । सिप् धातोरेव भवति न प्रातिपदिकात् । तत्र नार्थो धातुग्रहणेन । एवं सिद्धे सति यद्धातुग्रहणं करोति तज्ज्ञापयति । पूर्वसूत्रे धातोश्च अधातोर्भवति । तेन धातुसकारस्य सिद्धं भवति । अचकाद् भवान् अन्वशाद् भवान् । कथं धातोरेव स्यादेवमर्थं धातुग्रहणम् । किं पुनः कारणं पूर्वसूत्रे धातोरेव न प्राप्नोति । तिप्यनस्तेः (८।२।७३) इत्युच्यते । तिप्यनस्तेः सिपि धातोरुर्वा (८।२।७३,७४) इति । तत्र ' नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थः' इति अनस्तौ अस्तिसदृशे तत् कार्यं भवति । कश्चेदानीमस्तिसदृशः । अस्ति वै धातुः । योन्यो धातुः सोसावनस्तिः अस्तिसदृशो भवति । तेनानया परिभाषया पूर्वसूत्रे धातोरेव स्यात् । अधातोर्न स्यात् । तेनेह धातुग्रहणेन धातोश्चाधातोश्च क्रियते । तदेतद्धातुग्रहणं ज्ञापकं भवति । 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः'... 'अक्ष्णश्छन्दस्यसर्वनामस्थानम्' (६।१।१७०) इति । सर्वनामस्थाने तत्सदृशे वा सर्वनाम-स्थानकार्यं भवति ।

उँदित् स्ववर्गमेव गृह्णाति न सवर्णमात्रम् ॥ ५५ ॥

१ C पूर्वको विधिः. २ After अयं, A ins. आचार्यः. ३ B om. संज्ञा ... इति. ४ C तथा ह्यर्थगतिः. ५ A नाश्वो न गर्दभ इति. ६ B यदपि चायं. ७ C अणुदित्सवर्णमेव गृह्णाति न वर्णमात्रम्. ८ After this, C gives the following additional Paribhāṣās: सहचरितासहचारितयोः सहचरितस्य ग्रहणम् ॥ दृष्टानुविधिश्छन्दसि ॥ बाहुल्यं-बवत् (लोके तुल्यं बलवत्) ॥

उदिद् वर्णो गृह्यमाणः स्ववर्गमेव गृह्णाति न सवर्णमात्रम् । कथं ज्ञायते । यदयं 'न विभक्तौ तुस्माः' (१।३।४) इत्यत्र तुग्रहणादेव सिद्धे सकारस्य ग्रहणं करोति । किमेतस्या ज्ञापने प्रयोजनम् । चोः कुः (८।२।३०) इत्यत्र चुग्रहणेन शकारस्याग्रहणात्कुत्वं न भवति तेन विडिति सिद्धं भवति ॥

सर्वविधिभ्य इड्विधिर्बलवान् ॥ ५६ ॥

सर्वेभ्यो विधिभ्यो[1] इड्विधिर्बलवान् भवति । कथं ज्ञायते । यदयं 'सनि ग्रहगुहोश्च' (७।२।१२) इति चकारेण श्युकोनुकर्षणं करोति । कथं कृत्वा ज्ञापकम् । अत्र हि चकारोनर्थकः । कस्माल्लूञः सनि इण् न । तत्र तावदलेण् न भवति 'इको झल्' (१।२।९) इति कित्वं तावत् प्रतीक्षते[2] । तत्र कित्वे कृते 'श्युकः किति' (७।२।११) इति इट्प्रतिषेधो भविष्यति । नार्थश्चकारेण । पश्यति त्वाचार्यः कित्वादपि पूर्वमिडागमः । इटि कृते 'इको झल्' (१।२।९) इति कित्वं नास्ति । झलिति वचनात् । तस्माच्चकार इट्प्रतिषेधार्थः इगन्तानाम् । किमेतस्या ज्ञापने प्रयोजनम् । श्वयित्वेत्यत्र संप्रसारणात्पूर्वमिट् सिद्धो भवति । इटि कृते 'न क्त्वा सेट्' (१।२।१८) इति कित्वप्रतिषेधः । असति कित्वे संप्रसारणं न भवति ॥[3]

सर्वविधिभ्यो लोपविधिर्बलवान् ॥ ५७ ॥

इह शास्त्रे सर्वविधिभ्यो लोपविधिर्बलवान् भवति । कथं ज्ञायते । यदयं 'प्रत्ययलोपे प्रत्ययलक्षणम्'(१।१।६२) इत्याह । कथं कृत्वा ज्ञापकम् । एतत्सूत्रं नारब्धव्यम् । कथम् । प्रत्ययाश्रयाणि कार्याणि भविष्यन्ति । सर्वाणि कृत्वा पश्चात्प्रत्ययलोपं करिष्यामि । पश्यति त्वाचार्यः । लोप एव तावद्भवति । तस्मिन् कृते तदाश्रयाणि न प्राप्नुवन्ति । तस्मात् 'प्रत्ययलोपे प्रत्ययलक्षणम्' (१।१।६२) इति । किमेतस्य ज्ञापने प्रयोजनम् । ते सन्तीत्यत्रायादेशात्[4]पूर्वमस्तेरल्लोप इति । तस्मिन्कृतेऽनजादित्वादयादेशो न भवति ॥

व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् ॥ ५८ ॥

इह शास्त्रे यत्र संदेहस्तुल्यायां संहितायां तत्र व्याख्यानतो विशेषोऽवगन्तव्यः । कथं पुनर्ज्ञायते इयमस्ति परिभाषेति । यदयं प्रत्याहारग्रहणेऽणिति[5] णकारमासजति । कथं कृत्वा ज्ञापकम् । अत्र हि किल अन्यो वर्ण आसङ्क्तव्यः[6] । सन्ति हि बहवो वर्णाः । द्विरनुबध्यमाने चास्मिण्णकारेऽण्ग्रहणेषु संदेहो भवति । किं नु खलु पूर्वेणाहोस्वित्परेणेति ।

---

१ A विधानेभ्यः. २ B प्रतीक्ष्यते. ३ After this, C gives the following additional Paribhāṣās : सर्वविधिभ्यो लुग्विधिर्बलवान् ॥ प्रत्ययाप्रत्यययोः प्रत्ययविधिर्बलवान् ॥ अभिधेयवल्लिङ्गवचनानि भवन्ति ॥ स्वार्थिकाश्च प्रत्ययाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते ॥ ४ AB आदेशात् (for अयादेशात्). ५ A णिति (for अणिति). ६ B आसक्तव्यः.

पश्यति त्वाचार्यः । अस्त्यत्राण्ग्रहणं तु संदेहः[1] । व्याख्यानतो विशेषं प्रतिपादयिष्यामः । अतो ज्ञायतेऽस्तीयं परिभाषेति । व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति । किमेतस्या ज्ञापने प्रयोजनम् । 'सनीवन्तर्ध० ' (७।२।४९) इत्यत्र[2] संदेहः । किं नु खलु इवन्तानामाहोस्विद् ईवन्तानामिति । अनया स दोषो न भवति । सनि इवन्तानामिति व्याख्यायते ॥

चानुकृष्टमुत्तरत्र नानुवर्तते ॥५९॥

कथं ज्ञायते । यदयम् 'अव्यये यथाभिप्रेताख्याने कृञः क्त्वाणमुलौ' (३।४।५९) इत्यत्र णमुल्ग्रहणं करोति । कथं कृत्वा ज्ञापकम् । णमुलधिकृतोऽनुवर्तते । तत्र क्त्वा तावद्वक्तव्यम् । क्त्वा चेति चकारेण णमुलोऽधिकृतस्यानुकृष्टिर्भविष्यति । नार्थो णमुल्ग्रहणेन । पश्यति त्वाचार्यः । यद्यनुकर्षणमिह णमुलः क्रियते 'तिर्यच्यपवर्गे' (३।४।६) इत्येवमादिषु सूत्रयोगेष्वनुवृत्तिर्न स्यात् । तस्मात् क्त्वाग्रहणं क्रियते । अयुगपदुभयोरुत्तरत्रानुवृत्तिर्यथा स्यात् इति[3] । चानुकृष्टमुत्तरत्र नानुवर्तते । किमेतस्या ज्ञापने प्रयोजनम् । 'वदः सुपि क्यप् च' (३।१।१०६) इति यतो 'भुवो भावे' (३।१।१०७) इत्यत्रानुवृत्तिर्न[4] भवति ॥

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥६०॥

प्रकृतिग्रहणं यत्र भवति यङ्लुकोऽपि भवति[5] तत्र[6] ग्रहणम् । कथं ज्ञायते । यदयं 'ऊदुपधाया गोहः' (६।४।८९) इत्युपधाग्रहणं करोति । कथं कृत्वा ज्ञापकम् । तत्रोपधाग्रहणेन उकारो गृहीतो भवति । तस्मादुकारग्रहणमेवमर्थं कर्तव्यम् । ऊ उतो गोह इति । पश्यति त्वाचार्यः । एवमुच्यमाने योऽसौ गोहेरभ्यासगत उकारः जोगुहीति तस्याप्यूत्वं प्रसज्येत । तस्मादुपधाग्रहणम् । यदि च प्रकृतेर्ग्रहणे यङ्लुकोऽपि ग्रहणं भवति तत एतदुपपन्नं भवति । किमेतस्या ज्ञापने प्रयोजनम् । जञ्जुरिति यङ्लुको ग्रहणादुपधालोपः सिद्धो भवति ॥

एकस्मिन्नपि व्यपदेशिवद्भावोऽप्रातिपदिकग्रहणेन[7] ॥६१॥

य एकस्मिन्नपि व्यपदेशः[8] सोऽप्रातिपदिकेन भवति । कथं ज्ञायते । यदयं 'पूर्वादिनिः सपूर्वाच्च' (५।२।८६,८७) इत्याह । कथं कृत्वा ज्ञापकम् । अत्र हि सपूर्वादित्येव वक्तव्यम् । कथं पूर्वात् केवलाद् भविष्यति । व्यपदेशिवद्भावेन[9] च एकस्मिन्नपि सह पूर्वेण यः सपूर्वादिनिर्भविष्यति । एवं सिद्धे यत्केवलार्थं पृथक् पूर्वादिनिरित्याह तेन ज्ञायते व्यपदेशिवद्भावोऽप्रातिपदिकेन । किमेतस्या ज्ञापने प्रयोजनम् । सूत्रान्ताट्ठग्विहितः । सांग्रहसूत्रिकः । केवलान्न भविष्यति । सूत्रमधीते सौत्रः ॥

---

१ A असंदेहः (for संदेहः) २ A om. अत्र. ३ A om. इति. ४ B om. न. ५ B transp. भवति and तत्र ग्रहणम्. ६ A अत्र (for तत्र). ७ After this, C gives the Paribhāṣā : प्रकृतिग्रहणे णिजन्तस्यापि ग्रहणम् which is Paribhāṣā No. 70 below. ८ B व्यपदेशिवद्भावः. ९ AB व्यपदेशिवद्भावेन.

तदेकदेशभूतंस्तद्ग्रहणेन गृह्यते[1] ॥ ६२ ॥

इह यद्यस्यैकदेशभूतं तत्तस्य ग्रहणेन गृह्यते । तद्यथा देवदत्ता गङ्गायमुनेति देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते । तथा अनेका नद्यो गङ्गां यमुनां चानुप्रविष्टा गङ्गायमुनाग्रहणेन गृह्यन्ते । ऐ[3]वं तावल्लोके । शास्त्रेपि ज्ञापकम् । यदयं 'नेदमदसोरकोः' (७।१।११) इति प्रतिषेधं शास्ति । इदमदसोः कार्यमुच्यमानं कः प्रसङ्गः यत्सककारयोः स्यात् । नार्थः प्रतिषेधेन । पश्यति त्[4]वाचार्यः । तदेकदे[5]शभूतं तद्ग्रहणेन गृह्यते इति । ततः प्रतिषेधं शास्ति । किमेतस्या ज्ञापने प्रयोजनम् । उच्चकैः नीचकैरिति सककारयोरव्ययसंज्ञा सिद्धा भवति ॥

अर्थवशाद्विभक्तिविप[6]रिणामो भवति ॥६३॥

अर्थमभिसमीक्ष्य पञ्चमीनिर्दिष्टमपि षष्ठीनिर्दिष्टं भवति अर्थवशात् । तद्यथा । उच्चैर्गृहाणि देवदत्तस्य आमन्त्रयस्वैनम् । देवदत्तस्य गावोश्वाः सुवर्णं च आढ्यो वैधवेयो देवदत्त इति । शास्त्रेपि यदयमाह । 'आङो नाऽस्त्रियाम्' (७।३।१२०) इति । कथं कृत्वा ज्ञापकम् । अत्र घेरुत्तरस्याङो नाभावः इष्यते । अ[7]त्र घेरिति षष्ठीवृत्तं सत् अर्थात्पञ्चमीनिर्दिष्टं भवति । ज्ञापकं च । 'सुप्प्रतिना मात्रार्थे' (२।१।९) इति यस्मान्निपातयति । अत्र 'सह सुपा' (२।१।४) इति तृतीयानिर्दिष्टं सुब्ग्रहणमनुवर्तते । तेनैवानिर्दिश्यमानेपि तृतीयासंप्रत्ययो भविष्यति । न च प्रतेरुत्तरस्या विभक्तेः श्रवणमस्ति । लुकात्र भवितव्यम् । 'अव्ययादाप्सुपः' (२।४।८२) इति । तदेतज्ज्ञापकं क्रियते । पश्यति तत्र तृतीयानिर्दिष्टमपि सत् अर्थादन्यविभक्त्यन्तं स्यादिति । किमेतस्या ज्ञापने प्रयोजनम् । 'आने मुक्' (७।२।८२) इत्यत्र अत इति पञ्चमीनिर्दिष्टं सत् षष्ठीनिर्देशं भवति । यद्येवमस्येति शास्त्रे ग्रहणानि कर्तव्यानि न[8] भवन्ति । 'एकवचनस्यान्यतरस्याम्' (१।२।६९) 'वश्चास्यान्यतरस्याम्' (६।१।३९) । अस्या एवा[9]नित्यत्वज्ञापनार्थं क्रियते ॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥६४॥

इह शास्त्रे पर्जन्यवल्लक्षणं दृष्टम् । तद्यथा । पर्जन्यो यावदूनं पूर्णं चाभिवर्षति, नापूर्णमभिवर्षति । एवं लक्षणमपि भवति । दीर्घस्य दीर्घत्वं भवति चिचीषति बुभूषति । कथं ज्ञायते । यदयं 'प्रवाहणस्य ढे' (७।३।२८) इति वृद्धस्यापि वाहनशब्दस्य पुनर्वृद्धिप्रतिषेधं शास्ति । पश्यत्याचार्यः । यत्रापि वृद्धिरस्ति तत्रापि वृद्धिर्भवति । पर्जन्यवल्लक्षणप्रवृत्तेः । किमेतस्या ज्ञापने प्रयोजनम् । खट्वाढकमित्यत्र दीर्घस्यापि 'अकः सवर्णे दीर्घत्वं' (६।१।१०१) भविष्यति ॥

---

१ C °संभूत°. २ After this, C gives the following additional Paribhāṣā : कार्यनिर्देशः कार्य (-निमित्त-) प्रतिपत्तये ॥ ३ A एतद् (for एवं). ४ B om. तु. ५ B om. देश. ६ B °परिणामो (for °विपरिणामो). ७ A om. अत्र. ८ AB om. न. ९ AB नित्यत्व° (for अनित्यत्व).

अकृतव्यूहाः पाणिनीयाः ॥ ६५ ॥

[2]व्यूहो नाम रचना । यथा प्राप्तस्य साधनम् । स्थापना व्यूहो लक्षणा रचना पाणिनीयानाम[3]चार्याणामकृतवद्भवति । कार्यं दृष्ट्वा यत् कृतं तत् सर्वं निवर्तते । [4]कथं ज्ञायते । यदयं 'उर्ऋत्' (७।४।७) इत्यत्र उर्ऋदिति ब्रवीति । कथं कृत्वा ज्ञापकम् । अत्र हि वृत् इत्येवमादीनां णौ चङ्परे ऋदेव भवतीत्युच्यते । तेषां चावश्यमृकारस्य णौ पुगन्तलघूपधगुणवृद्ध्युपधैत्वैर्भवितव्यम् । तेषु कृतेषु नायमृद्भवति । युक्तं हि तावद्वक्तुम् 'इडरारामृतः' इति । तथतः 'उर्ऋत्' (७।४।७) इत्याह तज्ज्ञापयति । गुणवृद्ध्युपधैत्वानि कार्यं दृष्ट्वा निवर्तन्ते । तत ऋदेवासौ भवति । किमेतस्या ज्ञापने प्रयोजनम् । प्रियग्रामणि कुलं यस्य प्रियग्रामाणिकः । 'शेषाद्विभाषा' (५।४।१५४) इति कपि कृते ह्रस्वत्वं निवर्तते पश्चाद् 'ह्रस्वो नपुंसके०' (१।२।४७) इति ह्रस्वत्वं भवति । उच्यते कोन्यत्र विशेषः । यावता प्रियग्रामाणिक इत्येवं भवति न कश्चिद्विशेषो ज्ञाप्यते । अयमस्ति विशेषः योयं 'न कपि' (७।४।१४) इति प्रतिषेधः 'केऽणः' (७।४।१३) इति या च प्राप्तिः तस्याः प्राप्तेः स प्रतिषेधः । यत्वेतद् ह्रस्वत्वं विधीयते [5]न तस्य प्रतिषेधः । तेन 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१।२।४७) इति भवत्येव ह्रस्वत्वं, न भवति कपीति प्रतिषेधः ॥

अतन्त्रं तरनिर्देशः ॥ ६६ ॥

अप्रधानस्तरनिर्देशो यस्मिन्नर्थे उच्यते तमर्थं ब्रवीति । यस्मात्प्रातिपदिकाद् विधीयते तस्यैवार्थे भवति । कथं ज्ञायते । यदयं 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' (५।४।११) इत्याह । कथं कृत्वा ज्ञापकम् । अत्र घादुत्तर आमुर्विधीयते द्रव्यप्रकर्षादन्यत्र । तच्च न संभवति । अयं हि घसंज्ञः तरप् तमप् च । अद्रव्यप्रकर्ष इत्युच्यमाने कः प्रसङ्गः यदुत द्रव्यप्रकर्षे स्याताम् । एतदाचार्यः पश्यति । इमे तरबादयः स्वार्थे विधीयन्ते । प्रातिपदिकार्थे ते परतन्त्रा भवन्ति । अद्रव्यप्रकर्षे घादामुर्भवति । किमेतस्या ज्ञापने प्रयोजनम् । उच्चैरेव उच्चैस्तराम् । श्रेष्ठ एव श्रेष्ठतम इति सिद्धं भवति ॥

[6]प्रधानान्वाचयशिष्टयोः प्रधानशिष्टे संप्रत्ययः ॥ ६७ ॥

प्रधानं चान्वाचयश्च तौ प्रधानान्वाचयौ । प्रधानं च यच्छिष्टमन्वाचयं च यच्छिष्टं तदुभयं भवति यत्र तत्र अन्वाच[7]यशिष्टस्य ज्ञापको नास्ति तत्र प्रधानशिष्टं भवति । किं कारणं पुनर्न प्राप्नोति । संनियोगशिष्टानामन्यतरापाये उभयोरप्यभाव इति । किं पुनः प्रधानं कोन्वाचयः । यदर्थो विध्यारम्भस्तत्प्रधानं यदन्यास्मिन्विधातव्येऽन्यदुच्यते अस्मिन्निदं भवतीति सोन्वाचयः । कथं पुनर्ज्ञायते अस्त्येषा परिभाषेति । लोके तद्यथा कश्चित्कांचिदाह भिक्षां चर देवदत्तं चानय । स तत्र उभयं करोति । यदि तु देवदत्तं नासादयति

---

१ After पाणिनीयाः, C ins. कृतमपि शास्त्रं निवर्तयन्ति. २ B व्यूहो रक्षणा. ३ After आचार्याणां C ins. मते. ४ After कथं B ins. कृत्वा. ५ A om. न. ६ C प्रधानान्वयशिष्टे संप्रत्ययः ॥ ७ B अन्वाचयव्यवस्थापको नास्ति.

तदा भैक्षं [1]भवति । शास्त्रेपि ज्ञापकं 'थलि च सेटीडन्तो वा' (६।१।१९६) इति सेड्ग्रहणम् । कथं कृत्वा ज्ञापकम् । अत्र सूत्रे सेड्ग्रहणं न कर्तव्यम् । थलीडन्तो वेति वक्तव्यम् । इट [2]एव उदात्तत्वात्सेटि संप्रत्ययो भवति । नार्थः सेड्ग्रहणेन । पश्यति त्वाचार्यः । थलि [3]आयन्तो लित्स्वरश्च प्रधानाशिष्टः इट्स्वरश्चान्वाचयशिष्टः । तेन य[4]त्रे तावदिडस्ति तत्र चत्वारो भवन्ति । यत्रेदानीमिण् नास्ति तत्र प्रधानान्वाचयशिष्टयोः प्रधानशिष्टमिष्टम् । तेन त्रयः स्वराः स्युः । अनिटि ते मा भूवन्निति सेड्ग्रहणं क्रियते । किमेतस्या ज्ञापने प्रयोजनम् । 'अव्ययसर्वनाम्नामकच् प्राक्टेः', 'कस्य च दः' (५।३।७१, ७२) इति । अत्राकच्संनियोगेन कस्य च दकार उच्यते । [5]अकच्प्रत्ययो भवति । यत्र ककारस्य दकारो भवति तत्रैव स्यात् ततोन्यत्र न स्यात् । अस्यां पुनरसत्यां न दोषो भवति । अकच् अत्र प्रधानः, चकारोन्वाचयशिष्टः । तेन यत्रापि ककारस्य दकारो नास्ति तत्राप्यकच् सिद्धो भवति ।

योगविभागादिष्टसिद्धिः[6] ॥ ६८ ॥

कथं ज्ञायते अस्त्येषा परिभाषेति । यदयं 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे०' (१।२।६३) इत्यत्र बहुवचनग्रहणं करोति । कथं कृत्वा ज्ञापकम् । बहव एव तिष्यपुनर्वसवः । तत्र युक्तं यद् बहुवचनं स्यात् । नार्थो बहुवचनग्रहणेन । पश्यति त्वाचार्यः । 'विभाषा वृक्षमृग०' (२।४।१२) इत्यत्र योगविभागोस्ति । सर्वो द्वन्द्वो विभाषयैकवद् भवति । तन्निवृत्यर्थं बहुवचनग्रहणं क्रियमाणं ज्ञापकं भवति । किमेतस्या ज्ञापने प्रयोजनम् । 'अस्मदो द्वयोश्च' (१।२।५९) इत्यत्र योगविभागस्सिद्धो भवति । अस्मद एकस्मिन् बहुवचनं सिद्धं भवति । ततश्[7]च द्वयोरर्थयोरस्मदोर्बहुवचनं भवति । तत्र यदुक्तं चकारो विकल्पार्थः क्रियते इति स दोषो भवति ।

[8]प्रातिपदिकविधौ तदन्तविधिर्नास्ति ॥ ६९ ॥

यत्र प्रातिपदिकं गृहीत्वा कार्यमुच्यते तत्र तदन्तविधि[9]र्न भवति । कथं ज्ञायते । यदयं 'सेनान्तलक्षणकारिभ्यश्च' (४।१।१५२) इत्यत्र अन्तग्रहणं करोति । कथं कृत्वा ज्ञापकम् । अत्रान्तग्रहणं न कर्तव्यम् । सेनालक्षण इत्येव सिद्धम् । 'येन विधिस्तदन्तस्य' (१।१।७२) इति वचनात् । हारिषेण्यः, वारिषेण्यः । तदन्तविधिना सेनान्तादपि भविष्यति । तदत्र यदन्तग्रहणं करोति तज्ज्ञापयति अस्तीयं परिभाषेति । किमेतस्या ज्ञापने प्रयोजनम् । सूत्रनडस्यापत्ये सौत्रनाडिः । तदन्तविधिना [10]ढकञ् न भवति ॥

---

१ A न चरति (for भवति). २ A एवोघोदन्तत्वात्. ३ A आस्यन्तो. ४ B om. यत्र. ५ Before अकच् B ins. सः. ६ After this, C gives the following additional Paribhāṣā : ग्रन्थाधिक्यादर्थाधिक्यम् ॥ ७ A transp. च and द्वयोः. ८ C ग्रहणवता प्रातिपदिकेन न तदन्तविधिः. ९ B भवति. १० A इञ् भवति (for ढकञ् न भवति).

प्रकृतिग्रहणे णिजन्तस्यापि ग्रहणम् ॥ ७० ॥

कथं ज्ञायते । यदयं 'हेरचङि' (७।३।५६) इत्याह । कथं कृत्वा ज्ञापकम् । अत्र हेः कुत्वं विधीयमानं तत्र कः प्रसङ्गो यण्णौ चङ्परे स्यात् । पश्यति त्वाचार्यः प्रकृतिग्रहणे णिजन्तस्यापि ग्रहणं भवतीति तस्मात्प्रतिषेधं करोतीति अचङीति । किमेतस्या ज्ञापने प्रयोजनम् । सुनोतेः षत्वमुच्यमानं णिजन्तस्यापि भवति अभिषावयतीति ॥

संज्ञाविधौ तदन्तविधिर्नास्ति ॥ ७१ ॥

यत्र संज्ञा विधीयते तत्र तदन्तविधिर्नास्ति । कथं ज्ञायते । यदयं 'सुप्तिङन्तं पदम्' (१।४।१४) इत्यत्र अन्तग्रहणं करोति । कथं कृत्वा ज्ञापकम् । अत्रान्तग्रहणं न कर्तव्यम् । केनेदानीं सुप्तिङन्तं पदसंज्ञं भविष्यति । तदन्तविधिना । सुप्तिङ्भ्यामियं संज्ञा प्रारब्धा सुप्तिङन्तस्य भविष्यति । एतत् पश्यत्याचार्यः संज्ञाविधौ तदन्तविधिर्नास्तीति । किमेतस्या ज्ञापने प्रयोजनम् । 'तरप्तमपौ घः' (१।१।२२) इति तरबित्येतस्य घसंज्ञा तदन्तविधिना तदन्तस्य न भवति गौरितराशब्दस्य । किं च स्यात् । कुमारी गौरितरेत्यत्र 'घरूपकल्प०' (६।३।४३) इत्यनेन ह्रस्वत्वं स्यात् ॥

अभिधानलक्षणाः कृत्तद्धितसमासाः ॥७२॥

अभिधानं दृष्ट्वा कृत्ताद्धितसमासानां प्रयोगो भवति । कथं ज्ञायते । यदयं 'प्रेस्त्रोऽयज्ञे' (३।३।३२) इति कर्मग्रहणं न करोति । कथं कृत्वा ज्ञापकम् । अत्र कर्मग्रहणं कर्तव्यम् । प्रेस्त्रोऽयज्ञकर्मणीति । यथान्यत्र 'ये[5] यज्ञकर्मणि' (८।२।८८) इति ब्रवीति । एतदाचार्यः पश्यति यत्र नाभिधानं तत्र[6] कृत्प्रत्ययानां उत्पत्तिर्न भवति[7] । तेनासत्यपि कर्मग्रहणे अयज्ञकर्मणीव घञ् भवति । तस्मात् कर्मग्रहणं न क्रियते । किमेतस्या ज्ञापने प्रयोजनम् । यत्राभिधानमाश्रीयते तत्रेयं परिभाषा वक्तव्या[8] न भवति ॥

सर्वो द्वन्द्वो विभाषयैकवद् भवति ॥७३॥

कथं ज्ञायते । यदयं सूत्रे क्वचिद् बहूनामेकवचनं निपातयति 'गदमद्चरयमः०' (३।१।१००) इति । किमेतस्या ज्ञापने प्रयोजनम् । यो द्वन्द्वैकवद्भावे अपरिगणितानां द्वन्द्व एकवत् दृश्यते तत्रैव परिभाषा वर्तते ॥

प्रतिपदविधानाद्योगविभागो गरीयान्[9] ॥७४॥

---

[1] C reads this Paribhāṣā, above, after एकस्मिन्नपि व्यपदेशिवद्भावोऽप्रातिपदिकग्रहणेन. See footnote on Pari. 61. [2] A अभिभावयति. [3] C does not give this Paribhāṣā. [4] B om. कल्प. [5] A प्रे स्त्रो यज्ञकर्मणेति; B प्रे यज्ञ°. [6] B ततः (for तत्र). [7] B transp. न and भवति. [8] B transp. वक्तव्या and न. [9] After this, C gives the following additional paribhāṣā : अक्षरविधिस्यादपि योगविभागो गरीयान् ॥

प्रतिपदपाठात्सत्यामप्यर्थसिद्धौ योगविभागः क्रियमाणो गुरुतरो भवति । कथं ज्ञायते । यदयं 'नेटयलिटि रधेः' (७।१।६२) इत्याह । कथं कृत्वा ज्ञापकम् । अत्र सूत्रे रधिग्रहणं न कर्तव्यम् । जभेरचि नुम् भवति । ततो रधेश्च नुम् भवति । अचीत्येव । ततो नेटयलिटीत्येव । रधेरित्येव । पुनो[1] रधिग्रहणं न कर्तव्यम् । एवं सिद्धे सति यद्रधिग्रहणं करोति तत्पश्यति गुरुतरमेव भवति । कथम् । अक्रियमाणे रधिग्रहणे योगो भवति । प्रतिपदविधानाद्योगविभागो गरीयानिति । किमेतस्या ज्ञापने प्रयोजनम् । 'पूङः क्त्वा च' (१।२।२२) इत्यत्र योगविभागे 'न क्त्वा सेट्' (१।२।१८) इति क्त्वाग्रहणं प्रत्याख्यातं तद् गुरु भवति । त[2]न्मा भूदिति क्त्वाग्रहणमेव क्रियते ॥

समासान्तविधिरनित्यः[3] ॥७५॥

ये समासान्ता विधीयन्ते न ते सर्वकालं भवन्ति । कथं ज्ञायते । यदयं राजशब्दं प्रतेरंश्वादिषु (६।२।१९३) पठति । इदमंश्वादिषु पाठप्रयोजनम् । 'प्रतेरंश्वादयः०' (६।२।१९३) इत्यन्तोदात्तत्वं यथा स्यात् इति । प्रतिराज इति । कथं कृत्वा ज्ञापकम् । अत्रांश्वादिषु पाठोनर्थकः । अयं 'राजाहःसखिभ्यष्टच्' (५।४।९१) विधीयते । तत्र च टचोऽन्तोदात्तत्वं सिद्धं नार्थः पाठेनेति । तत्राचार्यः पश्यति अनित्यष्टच् समासान्त इति । तस्मात्पाठोन्तोदात्तार्थं क्रियते । किमेतस्या ज्ञापने प्रयोजनम् । शर्तो[4]ध्वनि इत्यत्र 'उपसर्गादध्वनः' (५।४।८५) समासान्तो न भवति ॥

अनित्यमागमशासनम् ॥७६॥

य इमे टित्किन्मित आगमाः शास्त्रे शिष्यन्ते ते अनित्याः । न[5] सर्वकालमेव भवन्ति । कथं ज्ञायते । यदयं 'श्वो न्यः' (७।१।८७) इत्याह । कथं कृत्वा ज्ञापकम् । एतत्सूत्रं थो नुडिति वक्तव्यम् । नुडागमेनापि सिद्धं भवति । त[6]तश्चेयमस्ति परिभाषा अनित्यमागमशासनमिति । पचानः इत्यपि भवति । प[7]चमान इति प्राप्ते 'आ[8]ने मुक्' (७।२।८२) न भवति । आगमस्यानित्यत्वात् ॥

शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति ॥७७॥

तद्यथा लोलूयतेरचि परतः लोलूय अ इति स्थिते यकारस्य 'यङोचि च' (२।४।७४) इति लुक् प्राप्नोति । आर्धधातुके च 'अतो लोपः' (६।४।४८) इति लोपः ।

---

१ B पुन रधि°. २ AB तस्मान्मा. ३ After this, C gives the following additional paribhāṣās : अनित्यमातिदेशिकम् ॥ वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥ प्रकृतसंबन्धात्कृतसंबन्धो गरीयान् ॥ अलिङ्गमसंख्यमव्ययम् ॥ ४ A शनाध्वनि…त; B शना… उपसर्गादध्वनः. ५ A om. न. ६ A om. ततश्चेयमस्ति…इत्यपि भवति. ७ A पच्यमानस्य (for पचमानः). ८ A आनेर्मुंद्.

किमत्र कर्तव्यम् । परत्वात् 'अतो लोपः' (६।४।४८) इति । नित्यत्वाद्यङो लुक् प्राक् । कथं नित्यः । यङ्लुकि कृते अतो लोपः प्राप्नोति अकृतेपि । अतो लोपस्त्वनित्यः । न हि यङः सर्वस्य लुकि कृते अतो लोपः प्राप्नोति । अनित्यो यङ्लुक् । कथम् । शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति । कथमनित्यः । उपद्रष्टव्यम्—अतो लोपे कृते अनच्कस्य, कृते साच्कस्य, एतदत्र शब्दान्तरम् । अत्र परत्वादतो लोपो भवति । तस्मिन्कृते पश्चादवशिष्टस्य लुक् । अत्र परत्वादतो लोपो भवति । तेन 'न धातुलोप आर्धधातुके' (१।१।४) एतं विनापि योगं अतो लोपस्य स्थानिवत्त्वाद् गुणो न भवति । लोलुवः । पोपुवः ॥

लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः ॥ ७८ ॥

तद्यथा । पा अतुस् इति स्थिते तत्र द्विर्वचनं प्राप्नोति आतो लोपश्च (६।४।६४) । परत्वादातो लोपः । नित्यत्वाद् द्विर्वचनम् । कथम् । द्विर्वचने चातोलोपो भवति । नन्वातो लोपे कृते द्विर्वचनं न प्राप्नोति । कथम् । अनच्त्वात् । उच्यते । द्विर्वचनमपि नित्यम् । कथम् । 'द्विर्वचनेचि' (१।१।५९) इति स्थानिवद्भावात् । उच्यते । अन्येन लक्षणेन द्विर्वचनं क्रियते । 'द्विर्वचनेचि' (१।१।५९) इत्यनेना····कृते एतस्मिंल्लक्षणे द्विर्वचनस्य प्राप्तिरस्ति । अत एतल्लक्षणान्तरं भवति । यश्च लक्षणान्तरेण प्राप्नोति विधिरसावनित्यो भवति । तस्मादातो लोपस्तावद् भवति । पश्चाद् द्विर्वचनम् । एवं पपतुः पपुरिति सिद्धं भवति ॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ७९ ॥

कथं ज्ञायते । यदयं वाह ऊठं (६।४।१३२) शास्ति । कथं कृत्वा ज्ञापकम् । अत्रोठ् न वक्तव्यः । वाहः संप्रसारणमित्येव सिद्धम् । पष्ठ ऊह् अस् इति स्थिते योसावप्रत्यय उक्तो ण्विन् तस्मिन् प्रत्ययलक्षणेन 'पुगन्तलघूपधस्य' (७।३।८६) इति गुणे कृते 'वृद्धिरेचि' (६।१।८८) इति सिद्धम् । पष्ठौहः पश्येति । एवं सिद्धे सति यदयं वृद्ध्यर्थं वाह ऊठं शास्ति तज्ज्ञापयति । अस्तीयं परिभाषेति । तेन बहिरङ्गलक्षणस्य गुणस्यासिद्धत्वादन्तरङ्गलक्षणा वृद्धिर्न स्यात् । तत्र ण्विनमाश्रित्य वृद्धिः बाह्याश्रयत्वाद्बहिरङ्गो गुणः । किमेतस्या ज्ञापने प्रयोजनम् । ग्रामणि कुलमित्यत्रासिद्धत्वाद् बहिरङ्गलक्षणस्य नपुंसकह्रस्वत्वस्यान्तरङ्गस्तुङ् न भवति । अत्रापि हि नपुंसकमाश्रित्य ह्रस्वत्वं तद्बाह्याश्रयं भवति बहिरङ्गम् । ह्रस्वमाश्रित्य तुक्स वर्णत्वादन्तरङ्गम् ॥

नाजानन्तर्ये बहिष्प्रक्लृप्तिः ॥ ८० ॥

अचामानन्तर्यलक्षणे कर्तव्ये बहिरङ्गपरिभाषा नावतरति । कथं ज्ञायते । यदयं 'षत्वतुकोरसिद्धः' (६।१।८६) इति तुग्विधिं प्रति एकादेशस्यासिद्धत्वं शास्ति । अत्र अभि प्र इ य इति स्थिते एकादेशं शास्ति । तत्र तुक्च परत्वान्नित्यत्वाच्च । एकादेशे कृते तुग् दीर्घत्वान्न प्राप्नोति । ततोनेनैकादेशस्यासिद्धत्वात् क्रियते 'षत्वतुकोरसिद्धः' (६।१।८६) इति ।

१ AB लुक्याक्. २ B स्थानित्वात्. ३ A किं कारणम् (for कथम्). ४ After द्विर्वचनं B. ins. नित्यं. ५ B ऊण् for ऊद्. ६ A पष्ठौहः ७ B ह्रस्वान्तस्य. ८ B अन्तरङ्गलक्षणः (for अन्तरङ्गः) ९ B तद्. १० A अन्तरङ्गत्वम्.

एतच्चानया परिभाषया सिध्यति । कथम् । धातूपसर्गावाश्रित्यैकादेशः वर्णमात्रमाश्रित्य तुक् । वर्णत्वादन्तरङ्गतरस्तुक् भवति । तत्रासिद्धत्वाद्बहिरङ्गलक्षणस्य अन्तरङ्गलक्षणस्तुग्भविष्यति । नार्थस्तुग्विधिं प्रत्यसिद्धवचनेन । एवं सिद्धे सति यदसिद्धत्वं तुग्विधौ ब्रवीति तज्ज्ञापयत्याचार्यः अस्तीयं परिभाषेति । अचि अनन्तरे आश्रीयमाणे इयं परिभाषा न भवति । इह च अच् अनन्तर आश्रीयते । एकादेशे क्रियमाणे बहिष्प्रक्लृप्तश्चायम्[1] । किमेतस्या ज्ञापने प्रयोजनम् । अक्षद्यूरिति । तत्रोठो बहिष्प्रक्लृप्तस्यासिद्धत्वात् 'इको यणचि' (६।१।७७) इति यणादेशः सिद्धो भवति ॥

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥ ८१ ॥

कथं ज्ञायते । यदयं 'तनादिकृञ्भ्य उः' (३।१।७९) इति पृथक् कृञ्ग्रहणं करोति तनादिकार्यं कृञो मा भूदिति । किं पुनस्तनादिकार्यं यत्कृञो न भवेदिति । 'अनुदात्तोपदेशवनतितनोत्यादीनाम्०' (६।४।३७) इति लोपो मा भूदिति । देवरक्ताः किंशुकाः । नैव कृञोऽनुनासिकोस्ति । इदं तर्हि 'तनादिभ्यस्तथासोः' (२।४।७९) इति लुक् सिचो मा भूदिति । किं च स्यात् । विभाषा लुक् प्रसज्येत । नैतदस्ति ज्ञापकम् । अस्त्यन्यत्तनादिकार्यं लुग्विभाषया । यदा न विभाषा तदा ह्रस्वादङ्गाल्लोपो भविष्यति । अकृतेति सिद्धम् । एवं सिद्धे यत्करोतेः पृथग् ग्रहणं[2] करोति तज्ज्ञापयति । सकृद्गतौ विप्रतिषेधः । पुनर्न भवति इति । बाधितं वा सकृद्यत्तद्बाधितमिति । तेन 'तनादिभ्यस्तथासोः' (२।४।७९) इत्यनेन बाधितं 'ह्रस्वादङ्गात्' (८।२!२७) इति लोपः पुनर्न स्यात् । अथवा 'विप्रतिषेधे परम्०' (१।४।२) इत्यनेन नियमः क्रियते । विप्रतिषेधे परमेव भवति । तेन गते विप्रतिषेधे पुनः यत्प्राप्नोति तन्न भवति । किमेतस्या ज्ञापने प्रयोजनम् । वृक्ण इत्यत्रापि 'चोः कुः' (८।२।३०) इति कुत्वेन बाधितत्वाद् 'व्रश्चभ्रस्ज०' (८।२।३६) इति षत्वं न भवति ।

पुनःप्रसङ्गविज्ञानात्सिद्धम् ॥ ८२ ॥

विप्रतिषेधे कृते यदि पुनरपि किंचित्प्राप्नोति तदपि भवति । किं पुनस्तत् । उच्यते । 'विप्रतिषेधे परम्' (१।४।२) इत्यनेन परं तावत् क्रियते । यत्तावत्परं तत्तावत् क्रियते । यदपि पूर्वमपि प्राप्नोति तदपि भवति । तद्यथा । पा अतुस् इति द्विर्वचनं प्राप्नोति । आलोपश्च नित्यत्वात्परत्वाच्च विप्रतिषेधे परमित्यनेन लोपश्च[3] आदौ क्रियते इति पुनःप्रसङ्गविज्ञानाद् द्विर्वचनमपि भवति । एवं पुनःप्रसङ्गविज्ञानात्पश्चाद् द्विर्वचनं भवति । पपतुः सिद्धम् ॥

[4]अपवादविषयेप्युत्सर्गसमावेशः ॥ ८३ ॥

कथं ज्ञायते । यदयं 'शेषे[5] विभाषा०' (८।४।१८) इति शेषग्रहणं करोति । कथं कृत्वा ज्ञापकम् । अत्र शेषग्रहणानर्थक्यम् । अन्तरेणापि हि शेषवचनं गदादिभ्यः अन्यस्मिन्नेव शेषे कार्यं विज्ञास्यते[6] । एतच्छेषग्रहणं क्रियते । गदादिषु परेषु नेः णत्वं विभाषया

---

१ B प्रक्लृप्तिः (for प्रक्लृप्तः). २ A om. ग्रहणं. ३ A om. लोपश्च. ४ C अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः । ५ AB विशेष ६ B विज्ञायते.

मा भूदिति। तेन गदादिषु पूर्वेणैव नित्यो विधिर्भविष्यति। अयं च गदादिभ्यो योन्यः तस्मिन्विभाषा विधिर्भविष्यति। एवं सिद्धे सति यच्छेषग्रहणं करोति तज्ज्ञापयति अपवादविषयेप्युत्सर्गसमावेशः। तत इह गदादिषु परेषु स्यादियं विभाषा। तस्माच्छेषवचनम्। किमेतस्या ज्ञापने प्रयोजनम्। 'प्रदीयतां दाशरथाय मैथिली' इतीत्रोपवादविषये अणपि सिद्धो भवति ॥

नविकरणस्वरो लसार्वधातुकस्वरं बाधते[1] ॥ ८४ ॥

कथं ज्ञायते। यदयं कर्तेत्यत्र तासः परस्य लसार्वधातुकस्य निघातं शास्ति तज्ज्ञापयति। भवतीयं परिभाषेति। किमेतस्या ज्ञापने प्रयोजनम्। चिनुते क्रीणीते इत्यत्र विकरणस्वराल्लसार्वधातुकस्वरः सिद्धो भवति ॥

संमुदायेषु शब्दाः प्रवृत्ताः अवयवेष्वपि वर्तन्ते ॥८५॥

कथं ज्ञायते। लोकतः। तथया लोके तैलं भुक्तं घृतं भुक्तमिति। शास्त्रेपि[3] ज्ञापकं यदयं वरेस्यानिवद्भावस्य प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। इह यायावर इति योसौ यङोकारो लुप्तः अतो लोप ईति तस्य स्थानिवद्भावप्रतिषेधः। शिष्टः आकारलोपो मा भूदिति। आर्धधातुकेचि क्ङिति आकारलोपो विधीयते। तत्र कः प्रसङ्गो यदुत यङोवयवेचि लोपः स्यात्। इह यङः समुदितस्यार्धधातुकमयं यङोवयवः आर्धधातुकं नैवाकारलोपः प्राप्नोति स्थानिवद्भावप्रतिषेधेन। एवं सिद्धे सति यद्वरेस्थानिवद्भावप्रतिषेधं शास्ति तज्ज्ञापयति समुदायेषु प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्ते इति। किमेतस्या ज्ञापने प्रयोजनम्। 'न धातुलोप आर्धधातुके' (१।१।४) इत्यत्र धात्ववयवलोपे कृते गुणवृद्धिप्रतिषेधः सिद्धो भवति ॥

प्रकृतिवदनुकरणं भवति ॥८६॥

कथं ज्ञायते। यदयं 'क्षियो दीर्घात्' (८।२।४६) इति दीर्घग्रहणं करोति। कथं कृत्वा ज्ञापकम्। अत्र दीर्घग्रहणं न कर्तव्यम्। निर्देशादेव क्षिय इति दीर्घादिति गम्यते। कथं दीर्घस्य इयङादेशो विधीयते। यदि हि ह्रस्वत्वं स्यात् क्षेरिति[8] ब्रूयात्। नैतदस्ति। यथैवाप्राप्ता सुबुत्पत्तिः एवमियङादेशोऽप्राप्तः स्यात्। कथमप्राप्ता सुबुत्पत्तिः। अर्थवत् प्रातिपदिकमधातुकम्। अयं च धातुः तस्मात्सुबुत्पत्तिर्न प्राप्नोति। उच्यते। नैष धातुः। धातोरनुकरणमेतत्। क्षि इति यो धातुः तस्मादधातुत्वात् प्रातिपदिकसंज्ञा। प्रातिपदिकात् स्वादयः। तेनात्र प्राप्ता सुबुत्पत्तिः। इयङादेशो न भवति। न चेद् भवति निर्देशादेव क्षिय

---

१ After this, C gives the following additional Paribhāṣās : धातुस्वरात्प्रत्ययस्वरो बलीयान् ॥ सतिशिष्टस्वरो बलीयानन्यत्र विकरणेभ्यः ॥ आगमा अनुदात्ता भवन्ति ॥ समासवृत्तिस्तद्धितवृत्त्या बाध्यते ॥ अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ सदृशं करणमनुकरणम् ॥ २ C om. this Paribhāṣā. ३ A om. अपि. ४ A om. इति. ५ B आर्धधातुकेनैव. ६ C om. this Paribhāṣā here, but, gives it later on, after कदिषु नावयवार्थाः प्रकाशन्ते ॥ ७ A क्षियेः; B क्षिये. ८ After इति B ins. एवं after इति. ९ B यत्र (for यथा).

इति सिद्धम्। नार्थो दीर्घवचनेन। एतदाचार्यः पश्यति—प्रकृतिवदनुकरणं भवतीति। ततो धातोरेतदनुकरणं भवति। धातुवदेवमत्र सुबुत्पत्तिर्न प्राप्नोति। यथैव नाप्राप्ता सुबुत्पत्तिरियङादेशोऽपि अप्राप्तः स्यात्। तस्माद्दीर्घवचनं कर्तव्यम्। किमेतस्या ज्ञापने प्रयोजनम्। इह कश्चिद् द्विः पचतु इत्याह। तत्प्रकृतिवदनुकरणं भवति। पदद्वयात्[1] सिद्धो भवति तेन 'तिङ्ङतिङः' (८।१।२८) इति निघातः। सर्वस्य सुबन्तस्य तिङन्तस्य च पदसंज्ञा एका। तत्र पदादिति न शक्यते वक्तुं तस्मात्समुदायपदत्वमनेन भवति तस्मादयं यत्नः इति ॥

अव्यक्त[2]गुणसंदेहे नपुंसकलिङ्गं प्रयुज्यते[3] ॥८७॥

कथं ज्ञायते। यदयं 'अर्धं नपुंसकम्' (२।२।२) इति नपुंसकग्रहणं करोति। कथं कृत्वा ज्ञापकम्। अत्र हि अर्धमिति नपुंसकादेर्वे नपुंसकं सिद्धम्। तज्ज्ञापयति—अव्यक्ते गुणसंदेहे स्त्रीनपुंसकेष्वपि नपुंसकत्वं नपुंसकलिङ्गं प्रयुज्यते। तेन पुंल्लिङ्गेऽपि स्यात्समासः। तस्मान्नपुंसकग्रहणम्। किमेतस्या ज्ञापने प्रयोजनम्। 'किं जातम्' इति निर्देशः सिद्धो भवति। द्वयं चैव हि जायते प्रायेण स्त्री पुमान् वा। अथ[4] चोच्यते 'किं जातमिति' ॥

अवयवलोपिनामतो लोपो नास्ति[5] ॥८८॥

कथं ज्ञायते। यदयं 'नलोपस्सुप्स्वरसंज्ञातुग्विधिषु कृति' (८।२।२) इति तुग्विधिं प्रति नलोपस्यासिद्धत्वं शास्ति। कथं कृत्वा ज्ञापकम्। वृत्रहभ्यामित्यत्र नलोपे कृते पश्चादतो लोपः प्राप्नोति। तस्मिन्कृते नैव तुक् प्राप्नोति। कथं कृत्वा। ह्रस्वस्येति तदा न शक्यते वक्तुम्। तस्मान्नार्थो नलोपस्यासिद्धत्वेन। तद्यस्मात्तुग्विधिं प्रति लोपस्यासिद्धत्वं शास्ति तज्ज्ञापयति अस्तीयं परिभाषेति। किमेतस्या ज्ञापने प्रयोजनम्। राजीयति राजायते एवमादयः सिद्धा भवन्ति ॥

अन्तरङ्गविधेः प्रतिपदविधिर्बलीयान्[6] ॥८९॥

कथं ज्ञायते। यदयं 'धिन्विकृण्व्योर च' (३।१।८०) इति नुमनुषङ्गयोर्ग्रहणं करोति। कथं कृत्वा ज्ञापकम्। अत्र हि धिविकृव्योरश्चेति वक्तव्यम्। एवमुच्यमाने अत्वे कृते पश्चान्नुमनुषज्यते। तत्र 'मिदचोऽन्त्यात्परः' (१।१।४७) इति वचनादस्थाने नुमः श्रवणं प्राप्नोति। इदमिह संप्रधार्यते। नुम् क्रियतामत्वमिति। अन्तरङ्गो नुम्। अन्तरङ्गत्वान्नुमि कृते पश्चादत्वं भविष्यति। कथमन्तरङ्गो नुम्। प्रकृत्याश्रयत्वात्। कथम्। नुम्विधौ धातोरुपदेशवचनं कर्तव्यम्। धातूपदेशावस्थायामेवेदितो नुम् भवतीति[7]। तेनायमन्तरङ्गः। एवं तर्हि प्रतिपदं[8] धिन्विकृण्व्योरत्वमुच्यते। नुम् सामान्यविहितः। सामान्येनेदितो[9] नुम् विधीयते। तत्र प्रतिपदविधानादत्वे कृते अनिष्टे देशे नुमः श्रवणं प्रसज्येत[11]। तस्मान्नुमनुषङ्गयोर्ग्रहणं

---

१ AB पदद्वयासिद्धा. २ A अव्यक्ते; C अव्यक्तेषु. ३ After this, C gives the following additional Paribhāṣās : कृदभिहितो भावो द्रव्यवत् प्रकाशते ॥ रूढिषु नावयवार्थाः प्रकाशन्ते॥ ४ A इति (for एव). ५ B अवयवालापिनां C अवयवालोपिनामन्तलोपो नास्ति. ६ After this, C gives the following additional Paribhāṣā : अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान् ॥ ७ A वृत्रदणं. ८ After this, C give the following additional Paribhāṣās : कृताकृतप्रसङ्गी यो विधिः स नित्यः ॥ नित्यानित्ययोर्नित्यो विधिर्बलवान् ॥ ९ B om इति. १० AB सामान्येनोदितः. ११ B प्रसज्यते.

क्रियते । किमेतस्या ज्ञापने प्रयोजनम् । यत्रान्तरङ्गं प्रतिपदं च प्राप्नोति तत्र प्रतिपदं बलीयो भवति ॥

धातुप्रातिपदिकादनुबन्धप्रातिपदिकं [1]बलीयः[2] ॥९०॥

कथं ज्ञायते । [3]यदिदं 'न वृद्भ्यश्चतुर्भ्यः' (७।२।५९) इति चतुर्ग्रहणं करोति । अत्र चतुर्ग्रहणं न कर्तव्यम् । यदि न क्रियते कथं चतुर्भ्यः संप्रत्ययो भवति । [4]वृतादींश्चतुरः पठित्वा अन्ते वृत्करणं करिष्यामः । न कर्तव्यम् । क्रि[5]यते न्यास एव । कृपू सामर्थ्ये वृथया तदपि [6]परीक्ष्यते । कृपेरपीट्प्रतिषेधः प्राप्नोति । इष्यते [7]च कृपेः 'तासि च क्लृपः' (७।२।६०) इति । तदेतदन्तरेण चतुर्ग्रहणं चतुर्भ्य एवेट्प्रतिषेधो भविष्यति । नार्थः चतुर्ग्रहणेन । नैतद् वृत्करणं वृतादिपरि[8]माणार्थम् । किं तर्हि । धुतादिपरिमाणार्थम् । कथम् । [9]असत्येतस्मिंश्चतुर्ग्रहणे एतच्छक्यते वक्तुं वृत्करणं वृतादिपरिमाणार्थमिति । क्रियमाणे हि चतुर्ग्रहणे अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । न वृतादिपरिमाणार्थमेव स्यात् । धुतादिपरिमाणार्थमेव । एवमपि चतुर्ग्रहणं न कर्तव्यम् । कथम् । धुतादिभिर्वृतादीन् विशेषयिष्यामः । धुतादीनां ये वृतादयः तेभ्यो वृद्भ्य इति । इदं तर्हि प्रयोजनम् । स्यन्दू प्रस्रवणे । स्यन्द् स्य ति इति स्थिते 'न वृद्भ्यश्चतुर्भ्यः' (७।२।५९) इति इट्प्रतिषेधोऽस्ति । ऊदितो वेति च । तत्रोदित इति तदनुबन्धप्रतिपदकार्यं न वृद्भ्यः इति धातुप्रातिपादिकम् । अनुबन्धप्रातिपदिकं बलीय इति कृत्वा वा इट् प्राप्नोति । चतुर्ग्रहणसामर्थ्याद्धातु[10]प्रातिपदिकं भवति । ततो ज्ञायते अस्तीयं परिभाषेति । किमेतस्या ज्ञापने प्रयोजनम् । कृत्रिमा, क्रिया इति सिद्धं भवति । धातुः प्रतिपदविहितः 'कृञः श च' (३।३।१००) इति अनुबन्धप्रतिपदं क्तिनं बाधते ॥

सामान्यातिदेशे विशेषानतिदेशः[11] ॥ ९१ ॥

कथं ज्ञायते । यदयं 'गोत्रादङ्कवत्' (४।३।८०) इत्याह । कथं कृत्वा ज्ञापकम् । गोत्रान्तस्येदंवदिति वक्तव्यम् । तेन तस्येदमिति यो विहितः स भविष्यति । कश्च तस्येदमिति विहितः । अङ्कवदेव । एवं सिद्धे सति यदयं 'गोत्रादङ्कवत्' (४।३।८०) इत्याह तज्ज्ञापयति अस्तीयं परिभाषेति । तेन 'तस्येदम्' (४।३।१२०) इति सामान्यं तच्छब्देन गृह्यते । षष्ठ्यन्तं तत्रै[12]व स्यात् । तस्मादङ्कवचनमिति ॥

---

१ C बलवत्. २ After this, C gives the following additional Paribhāṣās: प्रधानाप्रधानयोः प्रधाने संप्रत्ययः ॥ प्रतिशानुनासिक्याः पाणिनीयाः ॥ प्रतिशास्वरिताः पाणिनीयाः ॥ ३ A यदनेन वृद्भ्यः. ४ A वृत्तादीन्. ५ B क्रियते एव न्यासे. ६ A परीक्ष्येत. ७ A एव (for च). ८ AB परिणामार्थम्. ९ A सति (for असति). १० A प्रतिपदं; B प्रातिपदं (for प्रातिपदिकं). ११ After this, C gives the following additional Paribhāṣās : गामादाग्रहणेष्वविशेषः ॥ पदाङ्गाधिकारस्य च ग्रहणं भवति तदुत्तरस्य च ॥ १२ A एवं (for एव).

द्विर्बद्धं[१] सुबद्धं भवति ॥ ९२ ॥

कथं पुनर्गम्यते इयं परिभाषा विद्यते इति । उच्यते । यदयं ' पेषं[२]वास[३]वाहनधिषु च ' (६।३।५८) इति धिशब्दे उदकस्य उदभावं शास्ति । कथं कृत्वा न वक्तव्यम् । उच्यते । पूर्वसूत्रेण सिद्धत्वात् । 'उदकस्योर्दे[४]ः संज्ञायाम्' (६।३।५७) इति । संज्ञायामुदधिर्भविष्यति । एवं सिद्धे यद् द्वितीयसूत्रे 'पेषंवासवाहनधिषु च' (६।३।५८) इति उदकस्योदभावं शास्ति तज्ज्ञापयति । अस्तीयं परिभाषा—द्विर्बद्धं सुबद्धं भवति । किमेतस्या ज्ञापने प्रयोजनम् । यत्सकृद् बद्धं तन्न कचिद् भवत्यपि । यथाऽचिर[५]प्रकाशिका विद्युदिति । ' प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ' (७।३।४४) इति । एवमाद्यन्यदपि विमृ[६]श्य योजयितव्यम् ॥

कृद्ग्रहणे गतिकारकपू[७]र्वस्यापि ग्रहणम्[८] ॥ ९३ ॥

कृदन्तस्य शब्दस्य ग्रहणे गतिपूर्वस्य कारकपूर्वस्य च ग्रहणं भवति । कथं गम्यते इयं परिभाषास्तीति । यदयं व्यो[९]त्क्रोशीत्यत्र 'कर्मव्यतिहारे' (३।३।४३;७।३।६) इत्याह । कथं कृत्वा एतज्ज्ञापकं भवति । एतत् किल सूत्रं न वक्तव्यम् । ननु चानुप[१०]दिश्यमानेऽस्मिन् '[११]य्वौ स्यातां ' न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ' (७।३।३) इति । न दोषः । अङ्गाधिकारादिह यस्मात्प्रत्ययविधिस्तदादि प्रत्यये गृह्यते । तत्र धात्वादिरेवाङ्गम् । व्यां[१२]डो नैवा[१३]ङ्गसंज्ञा । तस्मात्कर्मव्यतिहार इति न वक्तव्यम् । यद्विहितं तत्पश्यति । अस्तीयं परिभाषेति । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् इति । किमेतस्या ज्ञापने प्रयोजनम् । प्रयायिणे प्रयायिणः माषवापा[१४]णि व्रीहिवापा[१४]णीति ' प्रातिपदिकान्तनुम्विभक्तिषु च ' (८।४।११) इति णत्वं[१५] सिद्धं भवति ॥

इति श्रीव्याडीयपरिभाषावृत्तिः समाप्ता ॥

---

१ C om. This Paribhāṣā here, but reads it later on, as द्विर्बन्धं सुबन्धं भवति after लघ्वक्षरं हि संज्ञाविधानमनित्यम्. २ A पेष (for पेषं). ३ B transp. वास and वाहन. ४ A उद (for उदः) ५ A अचिकाशिका; B चिरप्रकाशिका. ६ AB विमृष्य. ७ C om. पूर्व. ८ After this, C gives the following additional Paribhāṣās : यस्मिन् विधिन्तदादावल्ग्रहणे ॥ अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते ॥ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजन्ति ॥ विधिनियमसंभवे विधिरेव ज्यायान् ॥ यत एवकारस्ततोन्यत्रावधारणम् ॥ क्विबन्ता धातुत्वं न जहति प्रातिपदिकत्वं च ॥ नैकमुदाहरणं योगारम्भं प्रयोजयति ॥ लुप्तोप्यनुबन्धः कार्यं प्रति विशेषको भवति ॥ लघ्वक्षरं हि संज्ञाविधानमनित्यम् ॥ द्विर्बन्धं सुबन्धं भवति । इष्टार्था बहवः ... ... कार्याः ॥ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः ॥ चक्रकेऽप्यिष्टतो व्यवस्था ॥ ज्ञापकलक्षणं न सर्वत्र ॥ ९ A व्याक्रेशी. १० A अपदिश्यमाने (for अनुपदिश्यमाने). ११ A om. य्वौ. B द्वौ for य्वौ. १२ B व्याङः for व्याङोः. १३ B om. एव १४ वापानि for वापाणि. १५ B णत्वं भवतीति सिद्धम्.

व्याडिपरिभाषापाठः ।

२

१ अर्थवद्ग्रहणे[1] नानर्थकस्य ग्रहणम् ॥
२ न[2] वर्णग्रहणेषु ॥
३ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणम् । न तु लाक्षणिकस्य ॥
४ गौणमुख्ययोर्मुख्ये संप्रत्ययः ॥
५ औपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणम् ॥
६ कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययः[4] ॥
७ भवति बहुव्रीहौ[5] तद्गुणसंविज्ञानमपि ॥
८ अवयवेन[6] विग्रहः समुदायःसमासार्थः ॥
९ पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते ॥
१० मध्येऽपवादाः[7] पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥
११ निरवकाशा[8] हि विधयः सावकाशान् विधीन् बाधन्ते ॥
१२ संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥
१३ उच्चरितप्रध्वंसिनोऽनुबन्धाः ॥
१४ नानुबन्धकृतमनेकाल्त्वम् ॥
१५ नानुबन्धकृतमसारूप्यम् ॥
१६ एकदेशविकृतमनन्यवद् भवति ॥
१७ भूतपूर्वगतिरिह शास्त्रे संभवति[9] ॥
१८ वस्तुप्रवृत्त्या इह शास्त्रे कार्यं भवति ॥
१९ अनन्तरस्य विधिर्वा प्रतिषेधो वा ॥
२० तद्भक्तस्तद्ग्रहणेन गृह्यते ॥
२१ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते[10] ॥
२२ अनिमित्तेन[11] कार्ये नैमित्तिकस्य ॥
२३ अभ्यासविकारेषु अपवादा नोत्सर्गान् विधीन् बाधन्ते ॥
२४ असति हि संभवे बाधनं भवति ॥
२५ सति संभवे बाधनं भवति ॥
२६ अस्ति[12] च संभवो यदुभयं स्यात् ॥
२७ एकयोगनिर्दिष्टानामप्येकदेशानुवर्तनम् ॥
२८ इतरेतराश्रयाण्यपि कार्याणि शास्त्रेषु प्रकल्पन्ते ॥
२९ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥
३० विभक्तौ[13] लिङ्गविशिष्टाग्रहणम् ॥
३१ न[14] ह्येकदेशा वर्णग्रहणेन गृह्यन्ते ॥
३२ ताच्छीलिकेषु न[15] वासरूपविधिः ॥
३३ प्रत्येकं वाक्यपरिसमाप्तिः[16] ॥

---

१ Before अर्थवत्° D ins. ओं. २ A न चैषा परिभाषा वर्णग्रहणे भवति । D om. this Paribhāṣā. ३ After this, A B D give the following additional Paribhāṣā : कृत्रिमाकृत्रिमयोरुभयगतिर्भवति. ४ AB om. this Paribhāṣā. ५ AB om. this Paribhāṣā. ६ AB om. this Paribhāṣā. ७ After this, D gives the following additional Paribhāṣā : नानुबन्धकृतमनेजन्तत्वम् । ८ AB om. this Paribhāṣā. ९ D विज्ञायते for संभवति. १० After this, D gives the following additional Paribhāṣā : यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते. ११ AB न निमित्तकार्ये नैमित्तिकस्य. C अनैमित्तिकस्य for नैमित्तिकस्य. १२ AB om. this Paribhāṣā. १३ AB om. this Paribhāṣā. १४ AB वर्णैकदेशाः for न ह्येकदेशाः. १५ AB वासरूपविधिर्नास्ति for न वासरूपविधिः. १६ After this AB give समुदायेपि वाक्यपरिसमाप्तिः.

३४ उभयथा वाक्यसमाप्तिः ॥
३५ भाव्यमानोऽण् सवर्णान् गृह्णाति ॥
३६ व्यवस्थितविभाषा चेह शास्त्रे संभवति ॥
३७ स्वरविधौ व्यञ्जनमविद्यमानवत् ॥
३८ अङ्गवृत्तौ पुनर्वृत्तावविधिर्निष्ठितस्य ॥
३९ वार्णादाङ्गं बलीयः ॥
४० सकृद्गतौ विप्रतिषेधे यद् बाधितं बाधितमेव तत् ॥
४१ पुनःप्रसङ्गविज्ञानात् सिद्धम् ॥
४२ असिद्धं बहिरङ्गमन्तरङ्गे ॥
४३ अन्तरङ्गे कार्ये बहिरङ्गमसिद्धं स्यात् ॥
४४ नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥
४५ समानाश्रयमसिद्धं व्याश्रयं तु सिद्धमेव॥
४६ येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् ॥
४७ निमित्ताभावे नैमित्तिकस्याप्यभावः ॥
४८ संनियोगशिष्टानामेकतराभावे उभयोरप्यभावः ॥
४९ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥
५० लुग्विकरणालुग्विकरणयोरलुग्विकरण–स्यैव ग्रहणम् ॥
५१ उभयत आश्रये नान्तादिवद्भावः ॥
५२ एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ग्रहणम् ॥
५३ निरनुबन्धग्रहणे न सानुबन्धकस्य ॥
५४ तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥
५५ एकानुबन्धकृतमनित्यम् ॥
५६ यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते ॥
५७ यस्य विधेर्निमित्तं नासा बाध्यते ॥
५८ कार्यकालं संज्ञापरिभाषम् ॥
५९ यथोद्देशं संज्ञापरिभाषम् ॥
६० उक्तार्थानामप्रयोगः ॥
६१ सकृदुक्तार्थस्य प्रयोगः ॥
६२ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे॥
६३ अनन्त्यविकारे अन्त्यसदेशस्यैव ग्रहणम् ॥
६४ संज्ञापूर्वको विधिरनित्यः ॥
६५ नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥
६६ अणुदित्सवर्णमेव गृह्णाति न वर्णमात्रम्॥
६७ सहसचरिताहचरितयोः सहचरितस्यैव ग्रहणम् ॥
६८ दृष्टानुविधिश्छन्दसि । बाहुल्यंवत् ॥
६९ सर्वविधिभ्य इड्विधिर्बलवान् ॥
७० सर्वविधिभ्यो लोपविधिर्बलवान् ॥
७१ सर्वविधिभ्यो लुग्विधिर्बलवान् ॥
७२ प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्ययः ॥
७३ अभिधेयवल्लिङ्गवचनानि भवन्ति ॥

---

१ AB om. this Paribhāṣā. २ B भाव्यमानः सवर्णान्न गृह्णाति; A भाव्यमानोण् सवर्णान्न गृह्णाति. ३ After this A B D give उकार एवैको भाव्यमानोपि सवर्णान् गृह्णाति. ४ A B D इह शास्त्रे व्यवस्थितविभाषा भवति. ५ A अङ्गवृत्ते; B अङ्गवृत्तेः. ६ A B om. this Paribhāṣā. ७ AB om. this Paribhāṣā and the next viz. नाजानन्तर्ये°, but adds धातूपसर्गयोरन्तरङ्गं कार्यं भवति. ८ D संयोग for संनियोग. ९ A B om. this Paribhāṣā. १० A B om. this Paribhāṣā. ११ AB om. this Paribhāṣā. १२ AB om. shis Paribhāsā. १३ AB om. this Paribhāṣā. १४ A B D उदित् for अणुदित्°. १५ AB om. this Paribhāṣā. १६ AB om. this Paribhāṣā. १७ AB om. this Paribhāṣā. १८ स्या । AB om. this Paribhāṣā. १९ AB om. this Paribhāṣā.

७४ स्वार्थिका एव प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥

७५ व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥

७६ चानुकृष्टमुत्तरत्र नानुवर्तते ॥

७७ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥

७८ एकस्मिन्नपि व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥

७९ प्रकृतिग्रहणे णिजन्तस्यापि ग्रहणम् ॥

८० तदेकदेशभूतं तद्ग्रहणेन गृह्यते ॥

८१ कार्यनिर्देशः कार्यनिमित्तप्रतिपत्तये ॥

८२ अर्थवशाद्विभक्तिविपरिणामः ॥

८३ पर्जन्यवल्लक्षणप्रवृत्तिः ॥

८४ अकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्तयन्ति ॥

८५ अतन्त्रं तरनिर्देशः ॥

८६ प्रधानान्वाचयशिष्टयोः प्रधानाशिष्टे संप्रत्ययः ॥

८७ योगविभागादिष्टसिद्धिः ॥

८८ ग्रन्थाधिक्यादर्थाधिक्यम् ॥

८९ ग्रहणवता प्रातिपदिकेन न तदन्तविधिः[9] ॥

९० अभिधानलक्षणाः कृत्तद्धितसमासाः ॥

९१ सर्वो द्वन्द्वो विभाषयैकवद् भवति ॥

९२ प्रतिपदविधानाद् योगविभागो गरीयान् ॥

९३ अक्षरविधित्वादपि योगविभागो गरीयान् ॥

९४ समासान्तविधिरनित्यः ॥

९५ अनित्यमातिदेशिकम् ॥

९६ वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥

९७ प्रकृतसंबन्धाच्छ्रुतसंबन्धो गरीयान् ॥

९८ अलिङ्गमसंख्यमव्ययम् ॥

९९ अनित्यमागमशासनम् ॥

१०० शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो[15] भवति[16] ॥

---

१ AB om. this Pāribhāṣī; C स्वार्थिकाश्च प्रत्ययाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते. २ C om. न and ins. प्रकृतिग्रहणम् after अनुवर्तते. ३ AB om. this Paribhāṣā. ४ CD read व्यवस्तदेक for तदेक; C संभूतः (for भूतं). ५ AB om. this Paribhāṣī; C om. निमित्त. ६ C प्रधानान्वयशिष्टे संप्रत्ययः । D प्रधानान्वयविशिष्टाया अनशिष्टे संप्रत्ययः. ७ AB om. this Paribhāṣā. ८ D तदन्तविधिर्नास्ति (for न तदन्तविधिः). ९ AB read this Paribhāṣā as प्रातिपदिकविधौ तदन्तविधिर्नास्ति and add after it प्रकृतिग्रहणे णिजन्तस्यापि ग्रहणम् and संज्ञाविधौ तदन्तविधिर्नास्ति. १० AB om. this Paribhāṣā. ११ AB om. this Paribhāṣā. १२ AB om. this Paribhāṣā. १३ AB om. this Paribhāṣā. १४ AB om. this Paribhāṣā. १५ D नित्यः for अनित्यः. १६ After this, AB give the following additional Paribhāṣā लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः and after it, give again the following Paribhāṣās : असिद्धं बहिरङ्गमन्तरङ्गे । नाजानन्तर्ये बहिष्प्रक्लृप्तिः । सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव । पुनःप्रसङ्गविज्ञानात् सिद्धम्. D gives the following additional Paribhāṣās लक्षणान्तरे प्राप्नुवन् विधिरनित्यः । णेप्यण्कृतं क्वचिद्भवति.

१०१ अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः ॥

१०२ नविकरणस्वरो लसार्वधातुकस्वरं बाधते ॥

१०३ धातुस्वरात् प्रत्ययस्वरो बलीयान् ॥

१०४ सतिशिष्टस्वरो बलीयानन्यत्र विकरणेभ्यः ॥

१०५ आगमा अनुदात्ता भवन्ति ॥

१०६ निर्दिश्यमानस्यादेशा भवन्ति ॥

१०७ समासवृत्तिस्ताद्धितवृत्त्या बाध्यते ॥

१०८ अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी [8] ॥

१०९ सदृशं करणमनुकरणेमं ॥

११० अव्यक्तेषु गुणसंदेहे नपुंसकलिङ्गं प्रयुज्यते ॥

१११ कृदभिहितो भावो द्रव्यवत् प्रकाशते ॥

११२ रूढिषु नावयवार्थाः प्रकाशन्ते ॥

११३ प्रकृतिवदनुकरणं भवति ॥

११४ अवयवाल्लोपिनामन्तोलोपो नास्ति ॥

११५ अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलीयान् ॥

११६ अन्तरङ्गविधेः प्रतिपदविधिर्बलीयान् ॥

११७ कृताकृतप्रसङ्गी यो विधिः स नित्यः॥

११८ नित्यानित्ययोर्नित्यो विधिर्बलवान्॥

११९ धातुप्रातिपदिकादनुबन्धप्रातिपदिकं बलीयः ॥

१२० प्रधानाप्रधानयोः प्रधाने संप्रत्ययः॥

१२१ प्रतिज्ञानुनासिक्याः पाणिनीयाः ॥

१२२ प्रतिज्ञास्वरिताः पाणिनीयाः ॥

१२३ सामान्यातिदेशे विशेषानतिदेशः ॥

१२४ गौमादाग्रहणेष्वविशेषः ॥

१२५ पदाङ्गाधिकारे तस्य च ग्रहणं भवति तदुत्तरस्य च ॥

१२६ कृद्ग्रहणे गतिकारकस्यापि ग्रहणम्॥

१२७ यस्मिन्विधिस्तदादावल्ग्रहणे ॥

१२८ अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते ॥

---

१ AB om this Paribhāṣī. २ D गरीयान् for बलीयान्. ३ AB om. this Paribhāṣī. ४ AB om. this Paribhāṣī. ५ AB om. this Paribhāṣī. ६ AB om. this Paribhāṣī. ७ AB om. this Paribhāṣā. ८ After this, AB D give the following additional Paribhāṣā समुदायेषु हि प्रवृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते. ९ AB om. this Paribhāṣā. १० After this, D gives the following additional Paribhāṣās : विवक्षातः समासप्रवृत्तिः । अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति. ११ D om. गुण. १२ AB om. this Paribhāṣī. C तदभिहितः (for कृदभिहितः). १३ D द्रव्यत्वं वहति क्रियावत्त्वात्. १४ AB om. this Paribhāṣī. १५ C अर्थान् for अर्थाः. १६ C अंतलोपः. १७ AB om. this Paribhāṣā. १८ AB om. this Paribhāṣī. १९ AB om. this Paribhāṣī. २० AB om. this Paribhāṣī. २१ AB om. this Paribhāṣī. २२ AB om this Paribhāṣī. २३ AB om. this Paribhāṣī. २४ AB om. this Paribhāṣī. २५ AB om. this Paribhāṣā. २६ After ग्रहणे D ins. नेदुत्तरपदस्य. २७ AB om. this Paribhāṣī.

१२९ अनिनस्[१]मन्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥

१३० विधिनियम[२]संभवे विधिरेव ज्यायान् ॥

१३१ य[३]त एवकारस्ततोन्यत्रावधारणम् ॥

१३२ कि[४]क्ता धातुत्वं न जहति प्रातिपदिकत्वं च ॥

१३३ नैक[५]मुदाहरणं योगारम्भं प्रयोजयति ॥

१३४ ङ्[६]मोप्यनुबन्धः कार्यं प्रति विशेषको भवति ॥

१३५ ल[७]क्षरं हि संज्ञाविधानमनित्यम् ॥

१३६ द्वि[८]र्बद्धं सुबद्धं भवति ॥

१३७ इ[९]ष्टार्था बहवः········कार्याः ॥

१३८ गतिका[१०]रकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ॥

१३९ च[११]क्रकेष्विष्टतो व्यवस्था ॥

१४० ज्ञा[१२]पकल्लक्षणं न सर्वत्र ॥

इति व्याडिविरचिताः पाणिनीयपरिभाषाः समाप्ताः ॥

---

१ AB om. this Paribhāṣā. २ AB om. this Paribhāṣā. ३ AB om this Paribhāṣā. ४ AB om. this Paribhāṣā. ५ AB om. this Paribhāṣā. ६ AB om. this Paribhāṣī. ७ AB om. this Paribhāṣā. ८ AB द्विबद्धं सुबद्धं भवति. C द्विर्वन्धं सुवन्धं भवति. ९ AB om. this Paribhāṣā. १० AB om. this Paribhāṣā. ११ AB om. this Paribhāṣā. १२ AB om. this paribhāṣā.

शाकटायनपरिभाषासूत्राणि

३

१ अर्थवद्ग्रहणे नानर्थकस्य ॥
२ नै वर्णग्रहणेषु ॥
३ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च ॥
४ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य न लाक्षणिकस्य ॥
५ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥
६ औपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणं न तु प्रायोगिकस्य ॥
७ कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति ॥
८ अकर्मका अपि हि[3] धातवः सोपसर्गाः सकर्मका भवन्ति ॥
९ बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥
१० पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥
११ मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते ॥
१२ यो यमाश्रित्य समुत्पन्नः स तं प्रति संनिपातः । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥
१३ उच्चरितप्रध्वंसिनोनुबन्धाः ॥
१४ नानुबन्धकृतमनेकाल्त्वम् ॥
१५ नानुबन्धकृतमनेजन्तत्वम् ॥
१६ नानुबन्धकृतमसारूप्यम् ॥
१७ एकदेशविकृतमनन्यवद् भवति ॥
१८ भूतपूर्वगतिरिह शास्त्रे संभवति ॥
१९ यत्नप्रवृत्त्येह शास्त्रे कार्याणि संभवन्ति ॥
२० अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ॥
२१ तदागमस्तद्ग्रहणेन गृह्यते ॥
२२ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥
२३ न निमित्तकार्यं नैमित्तिकस्य ॥
२४ द्विर्भावे पूर्वविधावपवादा नोत्सर्गान् बाधन्ते ॥
२५ असति च संभवे बाधनं भवति ॥
२६ सत्यपि संभवे तदुभयं स्यात् ॥
२७ एकयोगनिर्दिष्टानामप्येकदेशोनुवर्तते ॥
२८ इतरेतराश्रयाणि च कार्याणि न प्रकल्प्यन्ते ॥
२९ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥
३० वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ॥
३१ ताच्छीलिके सरूपविधिर्नास्ति ॥
३२ प्रत्येकं वाक्यपरिसमाप्तिः ॥
३३ समुदाये वाक्यपरिसमाप्तिः ॥
३४ उभयथा वाक्यपरिसमाप्तिः ॥
३५ व्यवस्थितविभाषा चेह शास्त्रे संभवति ॥
३६ उभयगतिरिह शास्त्रे संभवति ॥
३७ स्वरविधौ व्यञ्जनमविद्यमानवत् ॥

---

१ B om. this Paribhāṣā keeping blank space. २ B om. this Paribhāṣā keeping blank space. ३ B om हि. ४ B om. यो यमाश्रित्य...संनिपातः. ५ B उच्चलित. ६ B om. this Paribhāṣā. ७ B explains लक्ष as meaning लक्षण in the footnote. ८ B om. this paribhāṣā.

३८ सकृद्गते स्पर्द्धे[1] यद् बाधितं तद् बाधितमेव ॥

३९ सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥

४० सामान्याश्रयं सिद्धं व्याश्रयं त्वसिद्धमेव॥

४१ येन नाव्यवधानं तेन व्यवाहितेपि वचनप्रामाण्यादेकेन वर्णेन व्यवधानमाश्रीयते ॥

४२ निमित्ताभावे नैमित्तिकस्याप्यभावः ॥

४३ संनियोगशिष्टानामन्यतराभावे उभयोरप्यभावः ॥

४४ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥

४५ श्लुग्विकरणाश्लुग्विकरणयोरश्लुग्विकरणम् ॥

४६ उभयत आश्रये[2] नान्तादिवत् ॥

४७ एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ॥

४८ अननुबन्धकग्रहणे न सानुबन्धकस्य ॥

४९ तदनुबन्धकग्रहणे नातदनुबन्धकस्य[3] ॥

५० यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते । यं प्रति निमित्तमेव न स बाध्यते ॥

५१ कार्यकालं हि संज्ञापरिभाषम् ॥

५२ यथोद्देशं संज्ञापरिभाषम् ॥

५३ उक्तार्थानामप्रयोगः[4] ॥

५४ शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः ॥

५५ नानर्थकेऽलोन्त्यविधिः ॥

५६ अन्त्याभावे अन्त्यसदेशस्य ॥

५७ संज्ञापूर्वको विधिरनित्यः ॥

५८ नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥

५९ सर्वविधिभ्य इड्विधिर्बलीयान् ॥

६० सर्वविधिभ्यो लोपविधिर्बलीयान् ॥

६१ व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् ॥

६२ चानुकृष्टमुत्तरत्र नानुवर्तते ॥

६३ प्रकृतिग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥

६४ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥

६५ व्यपदेशिवद्भावो न प्रातिपदिकग्रहणेन ॥

६६ तदादेशस्तद्ग्रहणेन गृह्यते ॥

६७ अर्थवशाद्विभक्तिपरिणामः ॥

६८ पर्जन्यवल्लक्षणे प्रवृत्तिः जले[5] वर्षति स्थले वर्षति ॥

६९ अकृतव्यूहाः शाकटायनीयाः कृतमपि शास्त्रं निवर्तयन्ति ॥

७० अतन्त्रे[6] तरनिर्देशः प्रवृद्धबाल[7]विशिष्टयोः ॥

७१ प्रधानान्वाचयशिष्टयोः प्रधानशिष्टे संप्रत्ययः ॥

७२ योगविभागादिष्टप्रसिद्धिः[8] ॥

७३ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥

७४ प्रातिपदिकविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति ॥

७५ संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति ॥

७६ अभिधानलक्षणाः कृत्तद्धितसमासाः ॥

७७ अक्षराधिक्याद्योगविभागो गरियान् ॥

७८ समासान्तो विधिरनित्यः ॥

७९ अनित्यमागमशासनम् ॥

८० लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः ॥

---

१ AB स्पर्द्दे (for स्पर्द्धे). २ B आश्रयो. ३ B न तदनु°. ४ B अप्रत्ययोगः (for अप्रयोगः). ५ B om. जले वर्षति स्थले वर्षति. ६ AB अतन्त्रान्तर°. ७ A प्रवृद्धा बालशिष्टयोः; B प्रवृद्धाबालशिष्टयोः. ८ B इष्टं न प्रसिद्धः.

८१ न लक्षणान्तरबाधनेनानित्यत्वम् ॥
८२ पुनःप्रसङ्गविज्ञानात्सिद्धम् ॥
८३ असिद्धं बहिरङ्गमन्तरङ्गे ॥
८४ नाजानन्तर्ये बहिष्प्रक्लृप्तिः ॥
८५ अपवादविषयेष्युत्सर्गसमावेशः ॥
८६ समुदाये हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्ते ॥
८७ प्रकृतिवदनुकरणं भवति ॥
८८ अव्यक्ते गुणसंदेहे नपुंसकलिङ्गं प्रयोक्तव्यम् ॥
८९ अवयवलोपिनामतोलोपाभावः ॥
९० अन्तरङ्गविधेः प्रतिपदविधिर्बलवान् ॥
९१ धातुप्रतिपदादनुबन्धप्रतिपदं बलीयः ॥
९२ सामान्यातिदेशे विशेषानतिदेशः ॥
९३ नित्यानित्ययोर्नित्यविधिर्बलवान् ॥
९४ अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान् ॥
९५ सावकाशानवकाशयोरनवकाशो विधिर्बलवान् ॥
९६ उभयत्रेह शास्त्रे षष्ठी न प्रकल्प्यते ॥
९७ उभयनिर्देशे पञ्चमीनिर्देशो बलवान् ॥
९८ द्विर्बद्धं सुबद्धं भवति ॥

इति शाकटायनीये शब्दानुशासने परिभाषासूत्राणि समाप्तानि ॥

१ B षष्ठि न प्रकल्पन्ते. २ A repeats सुबद्धं भवति.

चान्द्रपरिभाषासूत्राणि

४

१ अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ॥

२ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ॥

३ नामग्रहणे लिङ्गविशिष्टस्यापि ॥

४ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ॥

५ एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ॥

६ निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥

७ आगमा[1] गुणीभूतास्तद्ग्रहणेन[2] गृह्यन्ते ॥

८ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥

९ यस्मिन्विधिस्तदादावल्ग्रहणे ॥

१० सर्वत्र तदन्तविधिरन्यत्र छतुक्स्वरसंधेः ॥

११ ग्रहणवतान्ते न तदन्तविधिः ॥

१२ अन्यार्थे तद्गुणसंविज्ञानमपि ॥

१३ संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥

१४ उच्चरितप्रध्वंसिनोनुबन्धाः ॥

१५ एकदेशविकृतमनन्यवत् ॥

१६ एकदेशेन्यत्र न व्यपदेशोपि तत्कृतः तदभावेपि तद्व्यपदेशात् ॥

१७ व्यपदेशिवद्भाव एकस्मिन् ॥

१८ आद्यन्तवदेकोप्यच् ॥

१९ निर्दिश्यमानस्यादेशाः ॥

२० स्थानिवदादेशः ॥

२१ णौ कृतं च ॥

२२ स्थानेन्तरतमः ॥

२३ प्रत्यासत्तेः प्रकृतिवदनुकरणम् ॥

२४ पूर्वत्रासिद्धीयमद्विर्वचने ॥

२५ प्रत्येकं वाक्यपरिसमाप्तिः ॥

२६ समुदाये वाक्यपरिसमाप्तिः ॥

२७ सापेक्षमसमर्थम् ॥

२८ उक्तार्थानामप्रयोगः ॥

२९ अनिर्दिष्टार्था विधयः स्वार्थे रुहन्ति ॥

३० अनन्तरस्य विधिः प्रतिषेधो वा ॥

३१ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥

३२ असति संभवे बाधनं भवति ॥

३३ सत्यपि संभवे बाधे बाधा ॥

३४ अस्ति च संभवो यदुभयं स्यात् ॥

३५ पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते ॥

३६ मध्येपवादाः पूर्वान् विधीन् बाधन्ते न परान् ॥

३७ यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते ॥

३८ यस्य तु विधेर्निमित्तमेव नासौ बाध्यते ॥

३९ एकयोगनिर्दिष्टानामप्येकदेशोनुवर्तते न त्वेकविभक्तिनिर्दिष्टानाम् ॥

४० चानुकृष्टमुत्तरत्र नानुवर्तते ॥

४१ कार्यानुबन्धादधिकारानुवृत्तिः ॥

४२ भिन्नसंबन्धे प्रतियोगे प्रतिघाते चाधिकाराणां निवृत्तिः ॥

४३ इष्टे तदधिकाराणां प्रवृत्तिनिवृत्ती ॥

४४ भाव्यमानोत्[3] सवर्णं गृह्णाति ॥

४५ असिद्धं बहिरङ्गमन्तरङ्गे ॥

४६ अजानन्तर्ये[4] न बहिरङ्गपरिभाषा ॥

४७ अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलीयान् ॥

---

१ A आगमात् (for आगमाः). २ B ग्रहणेन (for ग्रहणे). ३ B (in the footnote) भाव्यमानोत् = भाव्यमानः उत्. ४ A अत्रानन्तर्ये.

४८ नामविधेरन्तङ्गात् सर्वतो लोपः ॥
४९ श्रुतानुमितयोः श्रौतो बलीयान् ॥
५० निरवकाशा विधयः सावकाशान् विधीन् बाधन्ते ॥
५१ सहचरितप्रत्यासत्तेः तदितरेतरयोगः ॥
५२ विशेषविधिः सामान्यात् ॥
५३ गौणमुख्ययोर्मुख्ये संप्रत्ययः ॥
५४ इतरेतरं कार्यमसद्वत् ॥
५५ व्यवस्थितविभाषया योगविभागाद्वेष्टसिद्धिः ॥
५६ वैलर्क्षण्यप्रवृत्त्या[1] शास्त्रे कार्यम् ॥
५७ गमकत्वे कार्ययोगः ॥
५८ गैमयति अधिकोर्थोऽधिकं कार्यम् ॥
५९ प्रकृतिप्रवृत्तेः पुनर्वृत्तौ अविधिर्निष्ठितस्य ॥
६० विप्रतिषेधेन यद् बाधितं तद् बाधितमेव ॥
६१ पुनःप्रसङ्गविज्ञानात् सिद्धम् ॥
६२ व्यवधानेऽप्युक्तिप्रामाण्यात् ॥
६३ निमित्तापाये नैमित्तिकस्याऽप्यभावः ॥
६४ संनियोगशिष्टयोरेकतराभावे उभयोरप्यभावः ॥
६५ नञिवयुक्ते सदृशसंप्रत्ययः ॥
६६ व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् ॥
६७ विवक्षाव्याप्तेरिष्टावसायः ॥
६८ विवक्षातः कारकावसायः ॥
६९ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥
७० सूत्रे लिङ्गवचनमप्रमाणं अविवक्षितत्वात् ॥
७१ वाच्यवल्लिङ्गवचने ॥
७२ अव्यक्ते गुणसंदेहे नपुंसकलिङ्गं प्रयुज्यते ॥
७३ लिङ्गमशिष्यं लोकाश्रयत्वात् ॥
७४ अर्थवशाद्विभक्तिवचनलिङ्गविपरिणामः ॥
७५ नानुबन्धकृतमनेकाल्त्वम् ॥
७६ कृताकृतप्रसङ्गी विधिर्नित्यः ॥
७७ ज्ञापकेर्थमनित्यम् ॥
७८ अनित्यमागमशासनम् ॥
७९ स्वार्थे णिज् नित्यम् ॥
८० प्रादीनां क्रियायोगित्वं विशेषद्योतित्वे स्वभावात् ॥
८१ अभिधानप्रत्ययाः सनादिसमासाः ॥
८२ भूतपूर्वगतिरत्रास्ति ॥
८३ अक्षराधिक्यादपि योगविभागो गरीयान् ॥
८४ अर्थापत्त्या शास्त्रे सिद्धिरुक्तिप्रामाण्यात् ॥
८५ सिद्धशब्दोपदेशात् नेतरेतराश्रयदोषः ॥
८६ स्वरविधौ व्यञ्जनमविद्यमानवत् ॥

इति चान्द्रपरिभाषासूत्राणि समाप्तानि ॥

---

१ B वत्सप्रवृत्त्या. २ A ······ गमयति; B गमयति अधिकोर्थे कार्याधिकम्.

दुर्गसिंहकृता

कातन्त्रपरिभाषासूत्रवृत्तिः

५

ओं श्रीजिनाय नमः ॥ प्रणम्य सदसद्वादध्वान्तविध्वंसभास्करम् । वाग्नार्थं परिभाषार्थं वक्ष्ये बालावबुद्धये ॥ इह हि

" सूत्रेष्वेव हि तत्सर्वं यद् वृत्तौ यच्च वार्तिके ।

सूत्रं योनिरिहार्थानां सर्वं सूत्रे प्रतिष्ठितम् "

इति केनचिद् व्याख्यातुकामेनावश्यमेवाभ्युपगन्तव्यम् । तथा चान्वर्थः । अर्थान् सूत्रयति सूते सूचयाति वा सूत्रम् । तत्र सूत्रकारयोः शर्ववर्मकात्यायनयोः सूत्राणां चतुःशत्यां पञ्चाशदधिकायां परिभाषा नोक्ताः । अथ च वृत्तिटीकयोस्तत्र तत्र प्रयुक्ताः कार्येषु दृश्यन्ते । अतस्तासां युक्तितः संसिद्धिरुच्यते । ताश्च द्विविधाः । लौकिक्यः शास्त्रीयाश्च । यास्तु शास्त्रीयास्ता द्विविधाः । लिङ्गवत्यो विध्यङ्गशेषभूताश्चेति । तत्र लिङ्गं विद्यते यासां ताः लिङ्गवत्यः । ताश्चैकत्र देशे गृहीतसंबन्धाः सत्यो लिङ्गापेक्षया प्रदीपवत् सर्वं शास्त्रमभिज्वलयन्तीति । यथा ' आगम उदनुबन्धः स्वरादन्त्यात्परः ' (२।१।६) ' युगपद्वचने परः पुरुषाणाम् ' (३।१।४) इत्यादयः । विध्यङ्गशेषभूता उच्यन्ते । नियमद्वारेण विधिसूत्रैः सह एकवाक्यतामापद्यमाना लाघवोक्तयो विध्यङ्गशेषभूतास्ताः प्रतिसूत्रमुपतिष्ठन्ति । यथा ' प्रत्ययः परः ' (३।२।१) ' कर्तरि कृतः ' (४।६।४६) इत्यादयः । परितः सर्वतो भाष्यन्तेऽर्था आभिरिति परिभाषाः ॥ ननु तर्हि युक्तिसिद्धानामपि टीकाकृता तत्र तत्र शास्त्रे प्रस्तावात्सयुक्तिकं प्रयोजनमुक्तमेव । किं यत्नेनेति । सत्यम् । एकत्र पिण्डीकृतानां संक्षेपेण क्रमशो विस्पष्टतया चार्थोऽभिधीयत इत्यास्ति यत्नफलमिति ॥

एकदेशविकृतमनन्यवत् ॥१॥

एकश्चासौ देशश्चैकदेशः । एकदेशविकृतं शब्दरूपमनन्यवद्भवति । किं तु तदेव भवतीत्यर्थः । यथा लोके छिन्नकर्णलाङ्गूलः श्वा श्वैव भण्यते न गौर्न चाश्व इति । एवमन्यासामपि परिभाषाणां लोकतः शास्त्रतश्च साधनमुन्नेतव्यम् ॥ लोकवच्छास्त्रे व्यवहार इति । को हि नाम मन्दधीर्लौकिकीं विवक्षामतिक्रम्य प्रवर्तत इति । इदानीं शास्त्रीयं प्रयोजनं ज्ञापकं चोच्यते । घातः अनडुद्भ्याम् एधीत्यादिषु घत्वदत्वादिलोपादयः फलमिति । अन्यथा हन्तेर्दीर्घत्वे घा त इति स्थिते रूपान्यत्वाद् घत्वं न स्यात । तथा दत्वे अनड्वाद् इति स्थिते ' अनडुहश्च ' (२।२।४२) इति उत्वं न स्यात । अस्तेः सस्यैत्वे अ ए

१ B. ओं नमो गणेशाय. २ A येन केनचिद्. ३ Before परिभाषाः, B. ins. षाः. ४ B. तथा (for अथ) ५ B. om. अतः. ६ A लौकिकाः. ७ After शास्त्रीयाः, B. ins. तत्र लौकिक्यो लोके तत्र प्रकटहेतुनोक्ताः.

इति स्थिते अस्तेरादेर्लोपो न स्यात् । ज्ञापकं च ‘ न संप्रसारणे संप्रसारणम्’ (३।४।१७) इति वचनम् । अन्यथा व्यक्तिपक्षेपि विध्यते विविधतुः इत्यादिषु संप्रसारणे कृते व्यधिरूपाभावादेव पुनः संप्रसारणं न प्राप्नोति, किं प्रतिषेधेनेति । तथा ‘निष्ठेटीनः’ (४।१।३६) इत्यत्र इटीति वचनम् । अन्यथा संज्ञपितः पशुरिति वेटामेकस्वरस्मरणेन इट् सिद्धः । पाचिक इत्यत्र नित्यत्वादिनो लोपे कृते पाचिरूपत्वात् ‘ पचिवचि० ’ (३।७।१८) इत्यादिना इट्प्रतिषेधो न स्यात् । तस्मादिटीति वचनात् परिभाषेयं साध्यते । तर्हि चित्रगुरित्यत्र ‘गोरौ घुटि’ (२।२।३३) इति कथं न स्यात् । परोऽत्र गोर्घुटोः क्रमभेदात् ओकारप्रश्लेषाच्चेति मन्यते तन्न वाच्यम् । गौणत्वादेव न भवति ॥ १ ॥

तर्हि द्यौर्यः स इत्यादिषु औत्वे अत्वे च अनन्यवत्वाद् व्यञ्जनाच्चेति सिलोपप्रसङ्ग इत्याशङ्कयोच्यते–

नास्वशब्दोक्तत्वात् ॥ २ ॥

स्वशब्देनोक्तो विशेषोक्तः न स्वशब्देनोक्तोऽस्वशब्दोक्तस्तस्मादस्वशब्दोक्तत्वात्सामान्योक्तत्वात् द्यौरित्यादिषु अनन्यवद्भावो न भवति । ‘ व्यञ्जनाच्च ’ (२।१।४९) इत्यत्र कादिहपर्यन्तानां सामान्येन ग्रहणम् । अस्याश्च ज्ञापकमकृतवद्ग्रहणम् (२।३।५०) । अन्यथा गोधुगित्यत्रानन्यत्वादेव कृते द्यादिचतुर्थत्वे ‘ दादेर्हस्य गः ’ (२।३।४७) इति गो भविष्यति । ‘ हचतुर्थान्तस्य धातोस्तृतीयादेरादिचतुर्थत्वम् ’ (२।३।५०) इति सिद्धेऽकृतवद्वचनात्सामान्योक्तेषु नान्यवद्भाव इति ॥ २ ॥

---

१ The text given here from सामान्योक्तेषु up to सर्वस्येति वक्तव्यम् on page 52 llne 17 has been adopted from Manuseript B, written in old Bengali Script. After सामान्योक्तेषु, A gives the text upto the Paribhāṣā निर्दिश्यमानानामादेशिनामादेशाः, which is quite irrelevant to the context. This text (given in A) may possibly have been taken from a part of some commentary work, misplaced for the appropriate folio of the present text. The irrelevant text is given below :

(सामान्योक्तेषु) वृक्षेभ्य इति नेदं परविधेरुदाहरणमिति । हे अग्ने हे वायो । अत्र संबुद्धौ चेति एदोतौ प्राप्तौ ह्रस्वाच्च सिलोपः प्राप्तः । तत्र परविधिसामर्थ्यात्पूर्वमेव सिलोपः । इतरथा एदोतोः कृतयोर्ह्रस्वाभावात् सिलोपो न स्यात् । तस्मादेतदुदाहरणद्वयं प्रयोजनं परविधेरिति । एतदयुक्तम् । तत्र ह्रस्वग्रहणात् । अन्यथा यदि हे अग्ने हे वायो इत्यत्र सिलोपो न भविष्यति तदा ‘ ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम् ’ (२।१।७१) अत्र सूत्रे ह्रस्वग्रहणेन किं प्रयोजनमिति । तस्माद् ह्रस्वग्रहणादेव सिलोपो न परविधिसामर्थ्यात् ॥ न च वक्तव्यं हे वृक्ष इत्यत्र अकारार्थं ह्रस्वग्रहणमिति । यद्येवमभिमतं स्यात्ततोऽकारग्रहणमेव कुर्यात् । यथा ‘ अनदीश्रद्धाभ्यः सिर्लोपम् ’ इति । तस्माद् ह्रस्वग्रहणमग्ने वायो अत्र निमित्तमिति । अथोत्तरार्थमिति चेत्तदपि न । तदोत्तरत्रैव कुर्यात् । ह्रस्वादाम्नि नुरिति । ततोऽग्ने वायो अत्र सिलोपार्थमेव ह्रस्वग्रहणमिति ॥

येन विधिस्तदन्तस्य ॥ ३ ॥

येन शब्देन येन वर्णेन वा विधिरारभ्यते तदन्तस्य तत् कार्यं भवति । यत् स वाऽन्तो यस्यासौ तदन्तः । अतिरि अतिनु कुलं वृक्षाभ्यां आभ्यां ग्रामण्यां नियां इत्येकस्मिन्वा तदन्तवद्भावात् । ज्ञापकं च ' पतिरसमासे ' (२।२।२) इति समासवचनम् । अन्यथा पतिशब्दस्याग्निकार्यप्रतिषेधे नरपतिशब्दस्य कः प्रसङ्ग । वर्णान्ते च ' ऋतोऽ वृङ्वृञः ' (३।७।१६) इति ज्ञापकम् । अन्यथा ऋञ् प्रापण इत्येवमादीनां वृङ्वृञोः कः प्रसङ्गः । तथा ' ओदन्ता अ इ उ आ निपाताः० (१।३।१) इति । ' अव्ययीभावादकारान्ताद्विभक्तीनाममपञ्चम्याः ' (२।४।१) इत्यादिषु अन्तग्रहणमपि ज्ञापयति ॥ ३ ॥

अर्थवद्ग्रहणे अनर्थकस्य ग्रहणं न भवति ॥ ४ ॥

मेषः करोति, दासः पतति । ' एषसपरो व्यञ्जने लोप्यः ' (१।५।१५) इति न भवति । ज्ञापकं च ' चकासकासप्रत्ययान्तेभ्यः० ' (३।२।१७) इत्यादौ चकासग्रहणम् । अन्यथा कासप्रत्ययान्त इति कृते कासान्ताच्चकासोपि ग्रहणं स्यात् । किं चकासग्रहणेनेति । यद्येवं तेजस्वीत्यादिषु ' इन्हन्पूषार्यम्णां शौ च ' (२।२।२१) इत्यर्थवत्त्वात्कथं दीर्घः प्राप्नोति । तथा चोक्तम्—यथोद्देशं संज्ञापरिभाषं स्यात्कार्यकालं वा संज्ञापरिभाषे स्याताम् । सत्यामेतासामनित्यत्वं सिद्धमेव ज्ञापकज्ञापितत्वात् । तदुक्तम् ' अनिनस्मन्ग्रहणानि अर्थवतानर्थकेन च तदन्तविधिं प्रयोजयन्ति ' इति ॥ ४ ॥

यद्येवमिदं द्वयमपि न परविधेः प्रयोजनमिति । हे नदि हे वधु । अत्र संबुद्धौ ह्रस्वः प्राप्तः ह्रस्वनदीश्रद्धाभ्यः सिर्लोपमिति सिलोपश्च । तत्र परविधिसामर्थ्यात् सिलोपे सति ह्रस्वः । अन्यथा पूर्वमेव ह्रस्वे कृते नदीसंज्ञाभावात्सिलोपो न स्यात् । तस्मादिदमुदाहरणद्वयं परिभाषाप्रयोजनमिति ॥ नैतदेवम् । नदीग्रहणात् । यदि हे नदि हे वधु अत्र नदीग्रहणेपि सिलोपो न भविष्यति तदा ह्रस्वश्रद्धाभ्यां सिर्लोपमिति सूत्रं ब्रूयात् । न नदीग्रहणं कुर्यात् । तस्मान्नदीग्रहणसामर्थ्यादेव सिलोपो न परविधेरिति ॥ उत्तरार्थमपि नैव । नद्याश्चामि नुरित्यकरणात् । अतो हे नदि हे वधु इत्यनयोः सिलोपार्थमेव नदीग्रहणमिति चेत्तर्हि हे श्रद्धे हे शाले अत्र संबुद्धौ चेत्येवं प्राप्तम् । ह्रस्वनदीत्यादिना सिलोपश्च । ह्रस्वश्च । तयोः परत्वात्सिलोपो भवति । अन्यथा यत्वे कृते श्रद्धाया अभावात्सिलोपो न स्यात् । तस्मादिदमुदाहरणं परविधेः प्रयोजनमिति ॥ नैवम् । श्रद्धाग्रहणात् । यदि हे श्रद्धे इत्यत्र सिलोपो न स्यात्ततो ह्रस्वनदीभ्यां सिलोपमिति विदध्यात् । अतः श्रद्धाग्रहणात्सिलोपो न परविधेरिति । अथोत्तरार्थमिति चेत्तदपि नैव । श्रद्धायाश्चामि नुरित्यविधानात् । अतः सिलोमार्थमेव श्रद्धाग्रहणमिति । अथ सुकर्तॄणि । अत्र ' धातोस्तृशब्दस्यार् ' (२।१।६८) प्राप्तः । ' धुट्स्वराद् घुटि नुश्च ' (२।२।११) । ततः (२।२।११) परत्वान्नुरेवेति चेन्नवम् । स्वरग्रहणात् । अन्यथा यदि नुक् स्यादेकवर्णोपि (सर्वस्येति वक्तव्यम्) ।

वर्णान्तस्य विधिः ॥ ५ ॥

अर्थवतां शब्दानामनर्थकानां च वर्णान्तस्य विधिर्भवति । महादेव इति तकारस्याकारः । मिमीते जिहीते इत्यभ्यासानामनर्थकानामप्यन्त्यस्य ई भवति (३।४।४४) ' भृञ्हाङ्माङामित् ' (३।३।२४) इति वचनात् । ज्ञापकं च ' इतो लोपोभ्यासस्य ' (३।३।३८) इत्यत्र पुनरभ्यासग्रहणम् । कथमन्यथा ' अभ्यासस्यादिव्यञ्जनमवशेष्यम् ' (३।३।९) इत्यतोऽभ्यासाधिकारे प्रवर्तमाने पुनरभ्यासग्रहणं समस्तलोपार्थमन्यत्र वर्णान्तस्य विधिं ज्ञापयति । तर्हि त्यावित्यत्रानन्त्यत्वाद्यत्वं प्राप्नोति इन टेत्यत्राकारस्येकार इति ॥ परोत्र वर्णग्रहणेन तदन्तस्य विधेरभावं मन्यते । '°ञान्तस्यापवर्गपरस्यासवर्णे ' (३।३।२७) इत्यत्रासवर्णग्रहणात् । तन्न वाच्यम् । उञ्छति इत्यत्र नकारस्य ञकारो न भवति । सकृत्प्रयोगे वर्णान्तस्य विधेरनित्यत्वाभ्युपगम एव येषां श्रेयस्कर इति ॥ ५ ॥

अनेकवर्णः सर्वस्य ॥ ६ ॥

न विद्यते एको वर्णो यस्य सोनेकवर्ण आदेशः सर्वस्य वेदितव्यः । जरसौ पिबति जिघ्रति वक्ता आस्ते भविता आख्याताः । ज्ञापकं च ' अस्थिदधिसक्थ्यक्ष्णामनन्तष्टादौ ' (२।२।१३) इत्यात्रान्तग्रहणम् । अन्यथा वर्णान्तत्वादिकारस्यैवानादेशः स्यात्किमन्तग्रहणेन । तर्हि इदंप्रभृतिषु कथं सर्वस्यादेशः । तस्मात्प्रथमानिर्दिष्टेष्वेकवर्णो विधिः सर्वस्येति वक्तव्यम् । इदम् ईकाररूपेण विपरिणमते इति प्रथमान्तत्वादेव व्याख्यातम् । यथा मृत्पिण्डो घटो भवति घटरूपेण विपरिणमते इत्यर्थः ॥ ६ ॥

ननु ऋदन्तस्य 'अर् डौ' (२।१।६६) 'आयिरिञ्यादन्तानाम्' (३।६।२०) ' ऋदन्तस्येर् अगुणे ' (३।५।४२) ' स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ ' (३।४।५५) इत्यादिषु सर्वस्यादेशः कथं न भवति । यतो बहुव्रीहिणा समुदाय उच्यते । यथा लम्बकर्णो घटः । लम्बः कर्णो यस्य घटस्य स स्फोटयितव्य इत्युक्ते सर्व एव स्फोट्यते न कर्णमात्रमित्याह–

निर्दिश्यमानानामादेशिनामादेशाः ॥ ७ ॥

निर्दिश्यमानानामादेशिनामादेशाः भवन्ति । यथा भग्नजङ्घस्य अस्थिसंधानाय घृतलेपः कर्तव्य इत्युक्ते जङ्घायामेव प्रलेपो विधीयते न तु सर्वाङ्गे इति । पितरि मातरि अशिश्रियत् अदायि नुवन्ति किरन्ति । कश्चित्कर्तरीति ज्ञापकं मन्यते । किमनेन ज्ञापकेन लौकिक एव न्यायः शोभन इति । तर्हि ' द्व्यन्तरुपसर्गेभ्योप ईः ' इत्यपो निर्दिष्टत्वात्कथमादेर्भवति । कथं द्वीपः अन्तरीपः समीप इति । तस्मात्परस्यादेरिति वक्तव्यम् । तन्न । संज्ञाशब्दत्वात्तद्धितानामिति ॥ ७ ॥

स्थानिवदादेशोऽवर्णविधौ ॥ ८ ॥

तिष्ठत्यस्मिञ्शब्द इति स्थानमर्थ उच्यते । स्थानमर्थोऽस्यास्तीति स्थानी । प्रसङ्गो वा स्थानमिदम् । लिङ्गधातुविभक्तीनामादेशः स्थानिवद् भवति न तु वर्णविधाने कर्तव्ये । भविता । अस्तेरर्थकृते प्रसङ्गे भूरुच्चार्यत इति । प्रसङ्गे विकारेपि स्थानमस्यास्तीति संबन्धो न विरुध्यते । तेन निवृत्तिवचनेपि न दोष इति । आभ्यां प्रवेता वृक्षाय । दीर्घगुणादयः स्युः । ज्ञापकं च । ' एत्वमस्थानिनि ' (२।३।१७) इत्यत्रास्थानिनीति वचनम् । अन्यथा विभक्त्यादेशस्य विभक्तित्वाभावात् युष्मानित्यादिषु एत्वं न प्राप्नोति । किं प्रतिषेधेनेति । वर्णविधौ तु क इष्टः, क उप्तः, इज्यते स्म, उप्यते स्म । संप्रसारणे यवयोर्वर्णविधौ स्थानित्वं नास्ति । अतो घोषवल्लक्षणमुत्वं न स्यात् । द्यौः ' व्यञ्जनाच्च ' (२।१।४९) इति [3]सिलोपो न स्यात् । व्यक्तेराश्रयणादिति ॥ ८ ॥

स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत् ॥ ९ ॥

[4]स्वरादेशः परनिमित्तकः पूर्ववर्णविधिं प्रति स्थानिवद्भवति । कथयति । गणयति । अस्य च लोपे स्थानिवत्त्वादु[6]पधादीर्घत्वं न स्यात् । निगाल्यते । इनः स्थानिवद्भावत्वात् ' वा स्वरे ' (३।६।९९) लत्वं स्यात् । परिष्वजेते । अनः स्थानिवद्भावात् अनुषङ्गलोपो भवति । ज्ञापकं च । ' सावौ सिलोपश्च ' (२।३।४०) इति सिद्धे ओकारे औत्वे यदौकारग्रहणं करोति अतोनुमीयत इति ॥ ९ ॥

न पदान्तद्विर्वचनवर्गान्तानुस्वारप्रथमतृतीयदीर्घलुग्विधिषु ॥ १० ॥

पदान्तश्च द्विर्वचनं च वर्गान्तश्च अनुस्वारश्च प्रथमश्च तृतीयश्च दीर्घश्च लुक् चेति द्वन्द्वः। विधिशब्दः प्रत्येकं संबध्यते । पदान्तादिविधिष्वादेशो न स्थानिवद्भवतीति । पदान्तविधौ तावत् । अग्नयः सन्ति । पटवः सन्ति । अस्तेरादिस्थानित्वं न भवति ॥ द्विर्वचने । इयेष उवोष । गुणस्यास्थानित्वाभावात् इयुवौ आदेशौ स्तः ॥ वर्गान्तविधौ । भुङ्क्ते भुञ्जते भुञ्जन्ति । विकरणस्यान्तलोपे सति अनुस्वारवर्गान्तः स्यात् ॥ अनुस्वारविधौ । विंशिषन्ति । पिंषन्ति । अकारस्य लुप्तत्वादनुस्वारो भवति ॥ प्रथमविधौ । जक्षतुः । दित्सति । घसेरुपधाया लोपे ददातेश्च सनीसादेशः । प्रथमः ॥ तृतीयविधौ । जग्धा । जग्धादेशे जग्धेर्धकारस्य स्थानित्वाभावात् । तृतीयः ॥ दीर्घविधौ । प्रतिदीव्नः प्रतिदीव्ना । अल्लुमवद्भावोप्यतिपूर्वत्वान्न भवति । अत्राप्येवमिति चेत्तर्हि प्रयोजनं चिन्त्यम् ॥ लुग्विधौ ।

---

१ After क उप्तः B ins इत्यत्र and om. इज्यते स्म......अतो. २ After उप्यते स्म A ins कः. ३ B सेर्लोपो. ४ B स्वरस्यादेशः स्वरादेशः । स्वरश्चासावादेशश्चेति वा । परं निमित्तं यस्यासौ परनिमित्तकः । पूर्वस्य वर्णस्य विधिं प्रति. ५ Before कथयति B ins. प्रथयति and om. गणयति. ६ उपधाया गुणदीर्घौ न भवतः स्थानिवत्त्वाद् दन्शिसन्जीत्यादिना अनुषङ्ग°.

पञ्च षट् । जश्शसोर्लुकि नलोपडत्वे स्तः ॥ ज्ञापकम् ‘ अवमसंयोगाद्०’ (२।२।५३) इति सूत्रे अलुप्तवद्ग्रहणम् । अन्यथा अलोपे स्वरादेशस्य स्थानिवत्त्वादेव राज्ञः दध्नेत्यादिषु डत्वतृतीयादयो न स्युरिति । तथा कुर्छुरोरिति कुरो दीर्घप्रतिषेधः । अन्यथा कुर्यात् गुणे कृते सति विकरणलोपे सति उकारस्य स्थानिवत्त्वान्नामिनो दीर्घो न स्यात् । तर्हि तृतीयदीर्घविधिरेव ज्ञापकम् । अन्येषां कथं ज्ञापकसिद्धिरिति चेत्सत्यम् । स्थालीपुलाकवत् इह ज्ञापकसिद्धिरिष्यते । यथा स्थाल्यामेकद्वित्रिपुलाकसिद्धिदर्शनेन सर्वपुलाकसिद्धिरनुमीयते तथेहापीत्यर्थः ॥ १० ॥

योनादिष्टात्स्वरात्पूर्वस्तं प्रति स्थानिवत् ॥११॥

अ[1]नादिष्टात्स्वराद्यः पूर्वस्तं प्रति स्वरादेशो न स्थानिवद् भवति । वैयाकरणः सौवश्विः। यत्ववत्वाभ्यां पश्चाद् वृद्ध्यागमे सति न स्थानिवदिति व्य[2]ञ्जनेन सह न सन्धिरिति। ज्ञापकं ‘न[3] य्वोः पदाद्योराय्वावू’ (२।६।५०) इति सिद्धे वृद्धिरागमग्रहणमादेशत्वमपि न स्यात् । उदनुबन्धत्वात्केचित् ‘अलोपे समानस्य सन्वल्लघुनीनि चण्परे’ (३।३।३५) इति वचनं ज्ञापकं ज्ञापयन्ति । तन्न ज्ञापकम् । असमानविषयत्वात् स्वरविधिद्विर्वचनप्राग्भावादिति ॥ ११ ॥

प्रकृतिग्रहणे चेक्रीयितलुगन्तस्यापि ग्रहणम् ॥१२॥

धा[4]तुप्रकृतीनां ग्रहणे चेक्रीयितलुगन्तस्यापि धातोर्ग्रहणं भवति । जङ्गमिष्यति । ‘ से गमः परस्मै ’ (३।७।६) इडागमः स्यात् । सरीसृष्टा । सृजिदृशोरित्यादिना अकारागमःस्यात् । अभिधानाद् भाषायामपि दृश्यते इत्यारम्भः । तथा[5] च भट्टिकाव्ये

‘ बोभवीति न संमोहः कृ[6]च्छ्रेष्वपि भवादृशाम् ।

किं न पश्यसि सर्वोयं जनस्त्वामवलम्बते ’ (भट्टिकाव्य १८।४१) इति ।

ज्ञापकं च । ‘ पञ्चमोपधाया धुटि चागुणे ’ (४।१।५५) इत्यत्र उपधाग्रहणम् । अन्यथा पञ्चमस्य स्थानित्वेपि न दीर्घत्वम् । दीर्घादीनां स्वरधर्मत्वात् । दंदांतः । तंतांतः इत्यभ्यासस्य दीर्घो मा भूदित्युपधाग्रहणम् । अन्यत्र प्रकृतिग्रहणे चेक्रीयितलुगन्तस्यापि ग्रहणमिति ॥ १२ ॥

न श्तिबनुबन्धगणसंख्यैकस्वरोक्तेषु ॥१३॥

श्तिप् अनुबन्ध गण संख्या एकस्वर एभिरुक्तेषु धातुषु प्रकृतिग्रहणे चेक्रीयितलुगन्तस्य ग्रहणं न भवति ॥ तिपोक्ते । सोषवाणि । तिपा निर्देशात् ‘सूतेः पञ्चम्याम्’ (३।५।१४) गुणप्रतिषेधो न स्यात् ॥ अनुबन्धोक्ते । शेशीते । शीङः सार्वधातुकेङानुबन्धानिर्देशाद् गुणो न भवति ॥ गणोक्ते । चोकोटिता । ‘ कुटादेरनिनिचट्सु ’ (३।५।२७) इति

---

१ A आदिष्टात्. २ B व्यञ्जने परे न संधिरिति. ३ The printed edition of the Katantra Grammar gives the Sutra as न य्वोः परायोर्वृद्धिरागमः (२।६।५०). ४ B धातोः प्रकृतीनां. ५ B तथा च भट्टी. ६ व्यसने स्म भवादृशाम् (Printed ed. of भट्टिकाव्य).

गुणप्रतिषेधो न भवति ॥ संख्योक्ते । रोरोत्ति । 'रुदादिः पञ्चको गणः' इति रुदादेः सार्वधातुके इट् न स्यात् ॥ ऐकस्वरोक्तौ । पापचिता । 'अनिडेकस्वरादातः' (३।७।१३) इत्यधिकारे पचिवचीत्यादिना इट्प्रतिषेधो न स्यात् । ज्ञापकं च वनतितनोत्यादिसूत्रे तिन्निर्देशः । अन्यथा वनतनादित्युक्तेपि का साध्यक्षतिरिति दंदांतः तंतांतः वनतितनोत्यादिप्रातीषिद्धेटामित्यादिना पञ्चमलोपोद्भावश्च न स्यात् । तेन तिपा प्रकृतिग्रहणे चेक्रीयितलुगन्तस्यापि न ग्रहणमिति प्रतिपाद्यते । अत्रापि स्थालीपुलाकन्यायेन ज्ञापकसिद्धिरिति । उक्तं च—

> तिबनुबन्धगणैरुक्ते संख्ययैकस्वरेण च ।
> चेक्रीयितलुगन्तानां नैतानि स्युः कदाचन ॥ इति ॥ १३ ॥

आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥१४॥

प्रकृतिप्रत्यययोरनुपघातेनागच्छन्तीत्यागमा यस्य गुणीभूताः प्रकृतेः प्रत्ययस्य वा तस्यैव ग्रहणेन गृह्यन्ते । यथा गङ्गायमुनाभाजो नद्यो गङ्गायमुनाग्रहणेनेति । अद्राक्षीत् । धातोरस्य च दीर्घः । संचस्करतुः । धातोः संयोगादेर्गुणः । कारयितेति । इटि कारितलोपाभावः । ज्ञापकं च । 'कृञोऽसुटः' (३।७।३७) इत्यसुड्ग्रहणम् । अन्यथा प्रत्यये कारितलोपे विधीयमाने इटि कः प्रसङ्ग इति ॥ १४ ॥

[४]यथासंख्यमनुदेशः समानाम् ॥ १५ ॥

संख्यानं संख्योच्चारणमित्यर्थः । अनुदिश्यते इत्यनुदेशः पश्चादुच्चारणम् । समानां तुल्यानामर्थानां शब्दानां वा अनुदेशः पश्चादुच्चारणं यथासंख्यम् । पूर्वस्योच्चारणस्यानतिक्रमे भवतीत्यर्थः । मालायै मालायाः मालायाम् । 'ङवन्ति यै यास् यास् याम्' (२।१।४२) । अर्थकृतम् । चखान । जुघोष । द्वितीयचतुर्थयोः प्रथमतृतीययोः शब्दकृतम् । ज्ञापकं च । 'ङवन्ति यैयास्यास्याम्' इति द्वियास्करणम् । अन्यथा यदि सर्वेषां सर्वे आदेशाः स्युस्तर्हि एकमेव यास्करणं ङसिङसोरपि स्यादिति ॥ १५ ॥

स्थानेन्तरतमः ॥१६॥

अन्तरतमो निकटतमः । आदेशिन्यादेशो भवति अन्तरतमः । तच्च आन्तरतम्यमानन्तर्यं स्थानतोर्थतो गुणतः प्रमाणतश्च संभवति । दण्डाग्रम् । कण्ठ्यस्याकारस्य कण्ठ्य एव दीर्घः । ईक्षामासे । कर्मणि विहितस्य परस्मैपदादेशो न भवति । नेता । नामिनस्तालव्यस्य तालव्यो गुणः स्यात् । अम् । दीर्घस्य दीर्घत्वमुत्वं माद्भवति । स्थानार्थगुणप्रमाणानां क्रमेणोदाहरणानि । ज्ञापकम् । 'अवर्णस्याकारः' (३।८।१८) इत्यत्र सूत्रे वर्णग्रहणम् । अन्यथा अस्याकार इति कर्तव्ये दीर्घस्य दीर्घत्वे किं फलं वर्णग्रहणस्य । अवर्णस्य सर्वमुखस्यानिल्वेपि एकदेशेन सर्वा वृद्धयो न प्राप्नुवन्ति यद्यन्तरतमपरिभाषा न स्यात्ततोनर्थकं वर्णग्रहणं स्यादिति । शषसाश्चाघोषा इत्यादिज्ञापकाद्वा ॥ १६ ॥

---

१ B एकस्वरोक्तेषु. २ A ज्ञापकमिति वनति. ३ B om. यमुना. ४ Before this, B gives an additional Paribhāṣā : यस्य स्थाने य आदेशास्ते तद्ग्रहणेन गृह्यन्ते.

लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥१७॥

'धातुविभक्तिवर्जमर्थवल्लिङ्गम्' (२।१।१) तस्योपादाने पुंस्त्रीनपुंसकाल्लिङ्गाद्विशिष्टस्यापि लिङ्गस्य ग्रहणं भवतीति । अतिद्यां पुरुषं पश्येति । दिवः पुंस्त्वेपि 'वाम्या' (२।२।२७) आ भवति । स्वाम्पीत्यपो नपुंसकत्वेपि 'अपश्च' (२।२।१९) इति दीर्घत्वं संभवति । ज्ञापकम् । 'वाम्या' इत्यत्र दीर्घोच्चारणम् । अन्यथा द्यामिति अत्र स्त्रियामादास्यात् । ह्रस्वेपि घुट्प्रकरणत्वात् । न षष्ठीबहुचनमिति । कथं अतिसखये सख्यां सख्यौ । अनित्यत्वात् । विभक्तिविषये अग्निप्रतिषेधो ङेरौत्वं घुट्यैप्रभृतयो न भवन्ति ॥

अनन्तरस्य विधिः प्रतिषेधो वा ॥१८॥

न विद्यतेन्तरं व्यवधानं यस्येति विधिर्भवन् प्रतिषेधो वा विधीयमानोऽनन्तरस्याव्यवहितस्यैव सूत्रस्य भवति । 'उवर्णे ओ' (१।२।३) । अनन्तरस्यावर्णस्य भवति । न समानस्येति । न संबुद्धौ । लिङ्गान्तनकारस्य लोपप्रतिषेधो न संयोगान्तस्येति 'न संयोगान्तौ०' (२।३।५८) इत्यादिना । नकारसंयोगान्तौ लुप्तावप्यलुप्तवद्भवतः । पूर्वविधौ । अत्र तु पूर्वविधिर्नास्ति इति नलोपप्रतिषेधः । हे राजन् । हे श्रेयन् । ज्ञापकं च 'घुटि चेति' पृथग्योगः । अन्यथा 'धातोस्तृशब्दस्यार्' (२।१।६८) इत्यत्र ङिघुटोरनुवर्तनं स्याद् । पृथग्योगो व्यर्थः । तस्माद् व्यवहितस्य ङेर्नानुवर्तनं पृथग्वचनादिति । तथा 'आ च न संबुद्धौ' (२।१।७०) इत्यत्राचग्रहणम् अन्यथा स्वस्रादीनामनन्तरत्वात् आर् एव प्रतिषिध्यते । तस्मादाच्ग्रहणं व्यवहितस्यापि ऋदन्तस्य ग्रहणार्थमन्यत्रानन्तरस्य विधेः प्रतिषेधं शास्तीति ॥ १८ ॥

विशेषातिदिष्टः प्रकृतं न बाधते ॥१९॥

विशेषेणातिदिष्टः कार्यी निमित्तं कार्यं वा प्रकृतं प्रस्तुतं सामान्यातिदिष्टं न बाधते । 'सुरामि सर्वतः' (२।१।२९) इत्यत्र सर्वनामग्रहणमनुवर्तते नानन्तरश्च पूर्वादिरेव । 'आ धातोरघुट्स्वरे' (२।२।५५) इति अघुट्स्वरग्रहणं संबन्धाधिकारनिवृत्त्यर्थम् । अन्यथा ईङ्योरेव निवृत्त्यर्थं स्यादिति । ज्ञापकं च । 'औरीम्' (२।२।९) इति दीर्घोच्चारणम् । अन्यथा अन्यादेरनन्तरत्वात् ह्रस्वस्याप्यैत्वे प्रयोजनाभाव इति ॥१९॥

आद्यन्तवदेकस्मिन् ॥२०॥

आदिः प्रथमः अन्तोवसानमेकस्मिन्वर्णे कार्यिण्याद्यन्ताविव भवतः । एता तनोति । नाम्यन्ताद् गुणः । ऐत् । अध्यैत । स्वरादित्वाद् वृद्धिः । अध्यापयति इति । आदन्तत्वात्पागमः । ज्ञापकम् । 'गमहनजनखनघसामुपधायाः०' (३।६।४३) इत्यादिसूत्रेऽनणीति वचनम् । अन्यथा स्वरादावित्युच्यमानेऽणोकारान्तस्यान्ताभावे स्वरादित्वाभावात् कुतः प्राप्तिः येन प्रतिषिध्यत इति । तथा 'इणश्च' (३।४।५९) इति वचनम् । अन्यथा यन्ति इवर्णान्तस्य इयादेश इति इकारस्याद्यन्ताभावादनन्तरत्वादियादेशाभावे संधिलक्षणमेव यत्वं स्यादिति ॥ २० ॥

सप्तम्या निर्दिष्टे पूर्वस्य ॥ २१ ॥

सप्तम्या विभक्त्या निर्दिष्टे निमित्ते पूर्वस्य कार्यं भवति। दण्डाग्रमित्यत्र अग्रशब्दाकारस्य दीर्घो न स्यात्। ज्ञापकं च । 'समानः सवर्णे '(१।२।१) इत्यादिसूत्रे परलोपवचनम्। अन्यथा यदि परस्यैव दीर्घः कुतः परलोपप्रसङ्ग इति ॥ २१ ॥

पञ्चम्या निर्दिष्टे परस्य ॥ २२ ॥

पञ्चम्या निर्दिष्टे परस्य कार्यं भवति । सर्वस्मै । स्मै सर्वनाम्नः परस्य ङेवचनस्येति । ज्ञापकं 'ऋदन्तात्सपूर्वः (२।१।६३) इति सपूर्वग्रहणम्। अन्यथा पूर्वस्यापीति सकारेण सहैवोकारः क्रियत इति ॥ २२ ॥

षष्ठ्या निर्दिष्टे स्वस्य ॥ २३ ॥

षष्ठ्या निर्दिष्टे स्वस्य आत्मनः कार्यं भवति । वृक्षान्। शसि शस्य च नः सकारस्यैव। ज्ञापकं 'न संयोगान्तावलुप्तवद्०' (२।३।५८) इति वचनम्। अन्यथा राजभ्यांभिन्नान्तनकारस्यालोपेऽ लुप्तवद्भावोऽनर्थकः स्यात् ॥ २३ ॥

प्रथमया च ॥ २४ ॥

प्रथमया च निर्दिष्टे स्वस्यैव कार्यं भवति । दण्डाग्रम्। समानः सवर्णे दीर्घीभवति। ज्ञापकं च । 'न विसर्जनीयलोपे पुनः संधिः ' (१।५।१६) संधिप्रतिषेधः। अन्यथा अपरो लोप्य इत्यादिषु प्रथमानिर्दिष्टत्वाद्विसर्जनीयस्य लोप एव नास्तीति किं प्रतिषेधेन ॥ २४ ॥

अर्थवशाद्विभक्तिविपरिणामः ॥ २५ ॥

र्थानां वशादधीनत्वाद्विभक्तीनामाधिकारे विपरिणामो भवति। 'भिस ऐस् वा ' (२।१।१९) इति अकारान्तात्पर इति । ज्ञापकं 'सावौ सिलोपश्च ' (२।३।४०) इति सिलोपवचनम्। अन्यथा शदन्तात्सेराकारादेशे कृते कुतो लोपप्रसङ्ग इति । तथा लोकेपि कश्चित्किंचिद्वदति । देवदत्तमाह्वयेति । स आह कीदृशो देवदत्तः। स कथयति यो लम्बकर्णो दीर्घबाहुरिति द्वितीयायां निर्दिष्टोपि प्रथमान्तः परिणमतीति ॥ २५ ॥

भाविनि भूतवदुपचारः ॥ २६ ॥

भाविनि भविष्यत्यर्थे भूतवदुपचारः कर्तव्य इति । 'वृद्धिरादौ सणे' (२।६।४९) इत्यादिषु वृद्धिसंज्ञायां सत्यामादेशाः । आदेशेष्वसति संज्ञेति नेतरेतराश्रयदोषः इति । ज्ञापकम् 'अथ परस्मैपदानि ' (३।१।१) इति वचनम्। अन्यथा त्यादीनां भावित्वात् कस्येयं संज्ञेति । लोकेपि यथा अस्य सूत्रस्य शाटकं वय । तथा अस्य मृत्पिण्डस्य घटं कुर्विति ॥ २६ ॥

निमित्ताभावे नैमित्तिकस्याप्यभावः ॥ २७ ॥

निमित्तं कारणम् । निमित्तेन कृतं नैमित्तिकम् । निमित्ताभावे नैमित्तिकस्याप्यभावो भवति । आरतुः । ऋकारस्य रत्वे पश्चान्नागमस्याप्यभावः । ज्ञापकं च स्यादोरिति निर्देशः । अन्यथा 'धात्वादेः षः सः' (३।८।२४) इति से कृते ठकारस्य कथं थकार इति । लोकेपि यथा स्फोटकाभावे तत्कृतव्यथाऽभाव इति । तर्हि पाचित इत्यादौ कारिताभावे इटोपि अभावः प्राप्नोति । तत्कृतानेकस्वरत्वाभावात् । सत्यम् । अनित्येयम् । अधुट्स्वरादिसूत्रे सेट्कग्रहणाद्वा । अभिधानाल्लोकोपचाराद्वेति शब्देन सूच्यते । यथा पितुरभावे पुत्रस्य स्थितिरस्ति ॥ २७ ॥

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ २८ ॥

शब्दस्य स्वं रूपं गृह्यते न चेत्तेनैव शब्देन संज्ञास्ति । 'दामागायतिपिबतिस्था०' (३।४।२९) इत्यादिषु दासंज्ञा । मागायतीत्यादीनां स्वरूपमेव गृह्यते । समानः सवर्णे इति संज्ञा । कर्मण्यणिति कर्मसंज्ञा । ज्ञापकं च । 'भृतौ कर्मशब्दे' (४।३।२४) इति कर्मग्रहणम् । अन्यथा कर्मणीत्यास्ताम् । अतः शब्दग्रहणात्संज्ञायामन्यत्र स्वरूपं गृह्यत इति साध्यते । कश्चित् 'तपरस्तत्कालस्य कारशब्दपरश्च' इति परिभाषां मन्यते । अस्यार्थः । तकारपरः कारशब्दपरश्च तत्कालस्य तन्मात्रस्यैव ग्राहको भवति । अतपरोऽकारशब्दपरश्च सामान्यग्राहक इति । तेन 'यदुगवादितः' (२।६।११) इति उवर्णग्रहणे वक्तव्य इति सिद्धम् । नैतच्छर्ववर्ममतम् । तत्र हि वर्णग्रहणे युक्तिरुक्तैव । किं च 'अस्य वमोर्दीर्घः' (३।८।११) इति प्रत्युदाहरणे दध्वः दध्मः इत्यत्र दीर्घे सति आलोपो न प्राप्नोति । कारशब्दोपि स्वस्य ग्रहणार्थ एव प्रयुज्यते वर्णेभ्योन्यथा तस्य कारशब्दस्यानर्थकत्वादिति ॥ २८ ॥

गणकृतमनित्यम् ॥ २९ ॥

गणेन कृतं कार्यमनित्यं भवति । प्रवहति विरमतीत्यात्मनेपदं न स्यात् । स च द्विविधः । धातुगणः सूत्रगणश्चेति । ज्ञापकं च 'न व्ययतेः परोक्षायाम्' (३।४।२१) अत्र परोक्षाग्रहणम् । अन्यथा अव्यलोरिति गुणिन्यवयुक्तमगुणे कृतात्वस्याकृतात्वस्य वा 'सपरस्वरायाः संप्रसारणे' (३।४।१) विशेषाभावः । तस्माद्यजादित्वात् अनित्यत्वेन क्वचित्संप्रसारणमेव नास्ति इति परोक्षाग्रहणेन सूच्यते । तेन संविव्ययतुः संविव्युः इति सिद्धं भवति ॥ २९ ॥

संज्ञापूर्वको विधिरनित्यः ॥ ३० ॥

संज्ञैव पूर्वा यस्य विधेः सोऽनित्यो भवति । सम्राट् सम्राजौ । अनुस्वारो न स्यात् । वृढः । 'ढे ढलोपे दीर्घश्चोपधायाः' (३।८।६) न स्यात् । ज्ञापकं च । तत्रैव सूत्रे उपधाग्रहणम् । अन्यथा ढे ढलोपे सति आन्तरतम्यादुपधाया एव दीर्घः स्यात् । अन्यस्याभावाच्चेति ॥ ३० ॥

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ३१ ॥

यं दृष्ट्वा यस्य उत्पत्तिः स संनिपातः । स विधिः तद्विघातस्य निमित्तं न भवति । हे भोः । उत्वे ह्रस्वत्वलक्षणः सिलोपो न स्यात् । अतिरिणा । रैः (२।३।१९) इत्यात्वं न स्यात् । ज्ञापकं च । ' नामिव्यञ्जनान्तादायेरादेः ' (३।६।४२) इत्यत्र नामिग्रहणम् । अन्यथा अग्नीयते इत्यादिषु यत्वादिके व्यञ्जनान्तलक्षणो लोपः स्यात् । अतो नैमित्तिकस्याप्यभाव इति पुनरिकारादिः क्रियते इति । तर्हि दाक्षिः पशव्यः सर्वेषाम् इत्यादिषु अकारलोप ओत्वं एत्वं च न स्यात् । संनिपातलक्षणस्यानिमित्तत्वादुच्यते ॥ ३१ ॥

वर्णग्रहणे निमित्तत्वात् ॥ ३२ ॥

वर्णग्रहणे सति संनिपातो विधिर्निमित्तं कारणं भवति । दाक्षिरित्यादिषु अकार-लोपादिप्रसङ्गः । नद्यै वध्वै । यत्ववत्वे स्तः । ज्ञापकं च । 'हेरकारादहन्तेः' इति अहन्तेर्वचनम् । अन्यथा जहि इत्यत्र हौ जकारादेशे कृते संनिपातलक्षणस्य विधेरनिमित्तत्वादेव हेर्लोपो न स्यात् । किं अहन्तेरित्यनेनेति ॥ ३२ ॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ३३ ॥

प्रकृतेः पूर्वमन्तरङ्गं प्रकृतेर्बहिर्बहिरङ्गमिति । अन्तरङ्गे कार्ये क्रियमाणे सति बहिरङ्गमसिद्धं भवति । अकृतमित्यर्थः । ग्रामणि कुलम् । वृत्रहभ्याम् । धात्वाश्रितस्तकारागमोऽन्तरङ्गो लिङ्गाश्रयत्वात् ह्रस्वनलोपौ बहिरङ्गाविति । तथा अल्पाश्रितमन्तरङ्गं बह्वाश्रितं बहिरङ्गमिति । संस्क्रियते । उभयपदाश्रयत्वात्सुट् बहिरङ्गो धातुमात्राश्रितत्वाच्चान्तरङ्गो गुण इति । ज्ञापकं च । ' वाहेर्वाशब्दस्यौ ' (२।२।४८) इत्यत्र औरिति वचनम् । अन्यथा प्रष्ठौह इत्यधिकारेणोत्वे कृते पश्चाद् गुणः । ओकारे औत्वं स्यात् । किमौकारवचनेनेति । तथा अस्तेः इति वचनम् । अन्यथा आस्तामित्यत्र अस्तेरादेर्लोपं बाधित्वा परत्वात् पश्चादवर्णस्याकारः स्यात् किमस्तेरिति वचनेनेति । बहिरङ्गं तु अवर्णस्य सामान्येन बह्वाश्रयत्वात्, लोपस्य चास्ति मात्राश्रयत्वात् अल्पाश्रयत्वमित्यन्तरङ्गत्वम् । संचस्करुरित्यादिष्वनित्यत्वं साधितमिति ॥ ३३ ॥

सर्वविधिभ्यो लोपविधिर्बलवान् ॥ ३४ ॥

सर्वे च ते विधयश्च लोपागमविकारादेशादयस्तेभ्यो लोपविधिर्बलवान् भवति । अधुग् अधुक्षाः । 'तृतीयादेः०' (२।३।५०) इत्यादिना सिच्यादिचतुर्थत्वे प्राप्ते सति सिचो लोप एव स्यात् । ज्ञापकम् । 'विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च' (२।३।४४) इत्यत्र विरामग्रहणम् । अन्यथा सेरपि व्यञ्जनादित्वात् उपानत् इत्यादिषु दत्वादिकं स्यात् । किं विरामग्रहणेनेति ॥ ३४ ॥

लोपस्वरादेशयोः स्वरादेशो विधिर्बलवान् ॥ ३५ ॥

लोपश्च स्वरादेशश्च तौ तयोः स्वरादेशो बलवानिति भवति । द्यौः । 'औ सौ' (२।२।२६) इति औकारे कृते व्यञ्जनाच्च सिलोपो न स्यात् । मित्रश्रीः । क्विप् । लोपाच्चागित्वमिति वकारस्य निमित्तत्वम् । ज्ञापकं 'सावौ सिलोपश्च' (३।३।४०) इति सिलोपवचनम् । अन्यथा 'व्यञ्जनाच्च' (२।१।४९) इति सिलोपे कृते सकारस्योत्वे सत्यसाविति सिद्धम् । अथ साक्षात्सेरभावात् 'सौ सः' (२।३।३२) इति दस्य सत्वमपि न प्राप्नोति इति चेन्नैवम् । वचनबलात् प्रागेव दस्य सत्वं क्रियत इति तेन सिलोपश्चेत्यनर्थकं स्यात् ॥ ३५ ॥

सकृद् बाधितो विधिर्बाधित एव ॥ ३६ ॥

सकृदेकवारं बाधितो यो विधिः स बाधित एव भवति । न पुनर्भवतीत्यर्थः । चेता नेता । 'इवर्णादश्विश्रिडीङ्शीङः' (३।७।१४) इति इवर्णावस्थायां बाधित इडागमो गुणे कृते इवर्णाभावेऽपि बाधित एव स्यात् । ज्ञापकं 'हनृदन्तात्स्ये' (३।७।७) इत्यत्र ऋदन्तग्रहणम् । अन्यथा करिष्यतीत्यादिषु गुणे कृते ऋदन्तत्वाभावादिट्प्रतिषेधो न स्यात् । तर्हि कर्ता हर्ता । इट् प्राप्नोति । अनृदन्तत्वात् । नैवम् । आगमशास्त्रस्यानित्यत्वादित्यास्ताम् । कः पुनः प्रतिषेधविषय इति चेद्यत्र गुणो न भवति । अकृत अहृतेत्यादिष्विति ॥ ३६ ॥

अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः ॥ ३७ ॥

सामान्योक्तो विधिरुत्सर्गः विशेषोक्तो विधिरपवादः । अपवादविषये क्वचिल्लक्ष्यानुरोधादुत्सर्गस्यापि समावेशः संनिवेशो भवति । विकत्थी विकत्थन इति घिनिण्येव प्राप्ते युरपि स्यात् । भासुरं भास्वरम् भासनम् इति घुरवरानप्राप्तौ युरपि स्यात् । ताच्छीलिकेषु वासरूपविधिर्नास्तीति उत्सर्गमपवादो बाधते इति उत्सर्गापवादयोरपवादो विधिर्बलवान् इत्यस्यानित्यत्वं दृश्यत इति वचनम् । ज्ञापकं 'न नामि दीर्घत्वम्' (२।३।२७) इति वचनम् । अन्यथा 'तौ रं स्वरे' (२।३।२६) इति विशेषोक्तेन बाधकबाधनार्थत्वात् रत्वे सत्युत्सर्गस्य न्वागमस्य चाभावे कुतो दीर्घप्रसङ्ग इति ॥ ३७ ॥

प्रधानान्वाचयशिष्टयोः प्रधानशिष्टस्तु नित्यः ॥ ३८ ॥

प्रधानान्वाचयशिष्टयोः प्रधानशिष्टस्तु नित्योऽवश्यंभावी भवति । अन्वाचयशिष्टस्तु यथासंभव इति । उच्चै रौति मयूरः । दीर्घस्याभावे रलोप एव स्यात् । गोचः । अत्रापि दीर्घाभावे अञ्चेरलोप एव स्यात् । अन्यथा संनियोगशिष्टानां एकाभावेन्यतरस्याप्यप्रवृत्तिरिति रेफाकारयोर्लोपोपि न स्यात् । अन्वाचयशिष्टत्वं च दीर्घस्य । तत्र चकारकरणयत्नादिति । ज्ञापकं 'समानः सवर्णे दीर्घी भवति परश्च लोपम्' (१।२।१) अत्र सूत्रे सवर्णग्रहणम् । अन्यथा अवर्णस्येवर्णादिष्वसवर्णेषु एत्वादिविषयत्वात् इवर्णादेश्च यत्वादिविषयत्वात् व्यञ्जने प्रतिषेधात् पारिशेष्यात् समानः सवर्णे एव दीर्घीभवति

किं सवर्णग्रहणेन । अथ निमित्तोपि दीर्घः स्यात् इति चेत्तन्न । परलोपामिति वचनात् । यदि निमित्तं नास्ति कुतः परलोपवचनामिति । तस्मादत्रानिमित्तदीर्घप्रतिषेधार्थेन सवर्णग्रहणेनान्यत्र प्रधानशिष्टस्तु नित्य इति ज्ञाप्यते । लोकेऽपि भो बटो भिक्षां अट गां चानयेति । भिक्षाटनं प्रधानं गवानयनमन्तरेणापि प्रवर्तते इति ॥ ३८ ॥

अन्त्याभावेन्त्यसदेशस्यापि ग्रहणम् ॥ ३९ ॥

अन्ते भवोन्त्यः । तस्याभावेन्त्यसदेशस्यान्त्यसमीपस्य वर्णस्य ग्रहणं भवति । कीर्तयति । ऋकारस्य इरादेशे आभिहिते मध्यस्थस्य कोवकाशः । तत्रान्त्याभाव इत्यस्याः सामर्थ्यादित्यन्त्यसदेशवार्तिनोऽपीरादेशः स्यात् । अमीभिः अमीभ्यः इत्यन्तस्यैत्वे दकारस्य अदसः अदे मो भवति । अलिक्षत् । 'सणनिटः०' (३।२।२५) इत्यत्रोपधाग्रहणं सुखार्थमिति व्याख्यातमस्मादेव वचनादिति । ज्ञापकम् ' एद् बहुत्वे त्वी ' (२।३।४२) इति वचनम् । अन्यथा अन्त्यस्याकारस्य मत्वे कुतः पुनरेकारः संभवति यस्यैकारस्य मात्परस्यैकारो भवतीति । बहुवचनममीति निर्देशो वा । केचिद् ' दोऽद्वेर्मः ' (२।३।३१) इति वचनं ज्ञापकं मन्यन्त इति ॥ ३९ ॥

आगमादेशयोरागमो विधिर्बलवान् ॥ ४० ॥

आगमश्च आदेशश्च तौ तयोरागमो विधिर्बलवान् भवति । भ्रमिष्यति, क्रमिष्यति, ग्रहीता, ईशिषे । अन्तरङ्गाण्यपि अनुस्वारढत्वषत्वादीनि इटा बाध्यन्त इति । ज्ञापकं ' इरन्यगुणे ' (३।४।७३) इत्यगुणग्रहणम् । अन्यथा गुणिनि अन्तरङ्गत्वाद् गुणे कृते ऋदन्ताभावात् कुतः पुनरिकारागमस्य प्रसङ्ग इति सामर्थ्यात् अगुण एव स्यात् ॥ ४० ॥

आगमात्सर्वादेशो विधिर्बलवान् ॥ ४१ ॥

आगमात्सर्वादेशो विधिर्बलवान् भवति । उवयिथ । यदि वय्यादेशात्प्रागिट्प्रतिषेधः स्यात्तदा कृतेपि वय्यादेशे सकृद् बाधितो विधिर्बाधित एव पुनरिट् न प्राप्नोत्येव । ज्ञापकं च । ' वसतिघसेः सात् ' (३।७।२९) इति घसिग्रहणम् । अन्यथा जिघत्सति अदेर्दातावस्थायां इट्प्रतिषेधे सकृद्बाधितन्यायाद् घस्लादेशेपि इट् न प्राप्नोति । किं घसिग्रहणेनेति ॥ ४१ ॥

औपदेशिकप्रायोगिकयोरौपदेशिकस्यापि ग्रहणम् ॥ ४२ ॥

उपदिश्यत इत्युपदेश इति । स च द्विविधः । सूत्रोपदेशो धातूपदेशश्चेति । प्रयुज्यत इति प्रयोगः सूत्रेण विधानम् । तयोर्भव इतीकण् । औपदेशिकप्रायोगिकयोः प्राप्तावौपदेशिकस्य ग्रहणं भवति । नद्यां वध्वां सुवाम् । अत्र आमः षष्ठीबहुवचनस्योपादिष्टत्वात् ङेरामि नुरागमो न स्यात् । तथा 'हनिङ्गमोरुपधायाः'(३।८।१३) इत्यत्र गमृ गतावित्यस्य औपदेशिकस्य ग्रहणं मा भूदितीङ्ग्रहणम् । ज्ञापकम् । 'ऋतस्य संयोगादेः' (३।६।१५) इति सिद्धे आदिग्रहणम् । अन्यथा संयोगात्पर इत्यपिनार्थभेद इति । तेन आदिग्रहणेन संचस्करुरिति प्रायोगिकस्यापि ग्रहणं अन्यत्रौपदेशिकस्यैव ग्रहणं साधयतीति ॥ ४२ ॥

संध्यक्षराणामिदुतौ ह्रस्वादेशे ॥ ४३ ॥

संध्यक्षरसंज्ञकानां ह्रस्वादेशे क्रियमाणे इदुतौ भवतः । चित्रगुः । अतिरि । अतिनु कुलम् । अन्यथा संध्यक्षराणीति अन्वर्थत्वात् पूर्वभागो अवर्ण इति ह्रस्वो भवन्नकारोपि प्राप्नोति । ज्ञापकं च 'दीर्घस्योपपदस्यानव्ययस्य खानुबन्धे' (४।१।२०) इत्यत्र दीर्घग्रहणम् । अन्यथा यदि संध्यक्षराणां ह्रस्वो न भवति किं दीर्घग्रहणेन संध्यक्षरनिवृत्त्यर्थेनेति । तर्हि अकारोपि कथं न भवति । नाप्यकारः । संध्यक्षराणां नामित्वान्नाम्येव ह्रस्वः क्रियत इति । तथा च 'वृद्धिरादौ सणे' (२।६।४९) इत्यादिषु इवर्णोवर्णयोरेव ऐऔ क्रियेते सत्यपि अवर्णभागे न त्ववर्णस्येति ॥ ४३ ॥

परनिमित्तादेशः पूर्वस्मिन् स एव ॥ ४४ ॥

परं निमित्तमस्येति सः । परनिमित्तश्चासौ आदेशश्चेति परनिमित्तादेशः पूर्वस्मिन् स एव भवति । पर एवेति । अग्नी एतौ । पटू इमौ । द्विवचननिमित्तत्वाल्लुप्तेपि द्विवचने निगृहीतिः स्यात् । अन्यथा पयसी अत्र दधिनी इहेति अत्रैव स्यात् । कश्चिज्जसादेशं दीर्घं पठित्वा सर्वे छत्र इत्यत्र पक्षे द्विर्भावसिद्धये परं च तन्निमित्तं चेति समासं मन्यते।नैतदस्मन्मतम् । तत्राप्यधिकारात्संध्यक्षरेभ्योपि वा द्विर्भावः । किंच तेऽत्र तयाहुरित्यादिषु अकारलोपे अयादेशप्रसङ्गश्च न स्यादिति । ज्ञापकं यात्याकारस्येति नकारग्रहणम् । अन्यथा ओकारस्य ये इति कृते उपोयते इत्यत्र संप्रसारणे अस्यौत्वे परलोपे च (१।२।३) धातोरोकारस्याभावादेव लोपो नास्ति ॥ ४४ ॥

निरनुबन्धग्रहणे सामान्यग्रहणम् ॥ ४५ ॥

निरनुबन्धग्रहणे सामान्यस्यैव ग्रहणं भवति।प्रखायते । चाखायते । प्रखाय । 'यवेति' अत्र यकारमात्रग्रहणे यवादेशयण्चेक्रीयितानां ग्रहणं भवति । दीप्तिः । वृद्धिः । क्तिक्तौ घोषवत्योश्च । कृतीट् प्रतिषेधः । ज्ञापकं च । 'ऋवर्णव्यञ्जनान्तात् घ्यण्' (४।२।३५) इत्यत्र घानुबन्धत्वेनेति । 'के यण्वच्च योक्तवर्जम्' (४।१।७) इत्यत्राख्यातिकयणोर्ग्रहणम् । गुणप्रतिषेधार्थत्वात् । गुणप्रतिषेधार्थत्वं च 'गुणी क्त्वा०' (४।१।९) इत्यादिवचनात् । घ्यण्यावशिक इत्यादिषु अनादवश्यकादावपि सजोः कगत्वं साध्यते प्रतिषेधबलात् ॥४५॥

उक्तार्थानामप्रयोगः ॥ ४६ ॥

उक्तोर्थो येषामिति उक्तार्थास्तेषां वचनानामप्रयोगोनुच्चारणं भवति । माता स्मर्यते । कटः क्रियते । आत्मनेपदेन कर्मणोऽभिहितत्वात् मातृकटशब्दाभ्यां कर्मणि षष्ठीद्वितीये न भवतः । तथा वाक्ये समासपक्षे नीलोत्पलादिषु तदादीनामप्रयोग इति । ज्ञापकम् । अन्यथैवंकथंमित्थंसु सिद्धाप्रयोगश्चेत(४।६।९)इति वचनम्। इतरथा अन्यथाकारं भुङ्क्ते इत्यादयो घमन्ता द्वितीयान्ताः सिद्धन्त्येव । अन्यथाकारं भुज्यते ओदन इति उक्तार्थत्वाद् द्वितीया न प्राप्नोति । इतिवचनमुक्तार्थानामप्रयोग इति न्यायं साधयति । तरां तमां च यथाभिधानमिति ॥ ४६ ॥

यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते ॥४७॥
यस्य तु विधेर्निमित्तमस्ति नासौ बाध्यते ॥ ४८ ॥

यं विधिं प्रति उपदेशोनर्थको भवति स विधिर्बाध्यते निमित्ताभावात्।यस्य तु विधेर्निमित्तं कारणमस्ति असौ विधिर्न बाध्यते। अग्निः। वायुः। सत्यपि लक्षणे नामि परो रं नाप्यते। सुपीः सुनूः। ईरूरादेशो निमित्तमिति रत्वविधिर्न बाध्यत एव॥ ज्ञापकम् 'इदुदग्निः' (२।१।८) इति। अग्निशब्दात्परस्य विसर्जनीयस्य रत्वान्निर्देशः। अन्यस्य च ज्ञापकं 'नामिपरो रम्' (१।५।१२) इति वचनम्। यदि सर्वत्रैवानर्थकोपदेशो विधिर्बाध्यते तदेतद्वचनमनर्थकमिति। लोकेपि यथा भुक्तवान्त विशेषं विना पुनर्भुङ्क्ष्वेति वचनं बाध्यते। विशेषभोजनं न बाध्यते ॥ ४७,४८ ॥

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥ ४९ ॥

नञ् च इवश्च नञिवौ। ताभ्यां युक्तं शब्दरूपं अन्यसदृशाधिकरणे वेदितव्यम्। तथा लोकेप्यर्थानां गतिर्भवति। अधिक्रियते नियुज्यते अभिधानाय शब्दो यस्मिन्निति अधिकरणमर्थ उच्यते। सदृशं च तदधिकरणं च, अन्यच्च तत्सदृशाधिकरणं चेति विग्रहः। अब्राह्मण इति ब्राह्मणसदृशः क्षत्रियादिः षाडिन्द्रिय एवोच्यते। न गवादिरिति। तथा ब्राह्मण इव जल्पतीत्यत्रापीति। प्रकृत्येति यपादेशनञ्वर्जनादन्यस्याव्ययस्यैव ग्रहणमिति। ज्ञापकम् 'धुड् व्यञ्जनमनन्तःस्थानुनासिकम्' (२।१।१३)इति व्यञ्जनग्रहणम्। अन्यथा यदि नञिवयुक्तं शब्दरूपं अन्यसदृशाधिकरणे न भवति तदान्तस्थानुनासिकसदृशानां वर्णानां कुतोन्यग्रहणमर्यादव्यञ्जनानामेवेति किं व्यञ्जनग्रहणेनेति। तस्माद् व्यञ्जनग्रहणमन्यत्र नञिवयुक्तमन्यसदृशाधिकरणं साधयति। लोकेपि यथा ब्राह्मणेन न गन्तव्यमिति क्षत्रियादिरुच्यते न गवादिरिति। तथा चोक्तम्।

नञ्युक्तमिवयुक्तं च यद्धि कार्यं प्रतीयते।
तुल्याधिकरणेन्यत्र लोकेप्यर्थगतिस्तथा ॥ ४९ ॥

भूतपूर्वस्तद्वदुपचारः ॥ ५० ॥

भूतं पूर्वं येन स भूतपूर्वः। तद्वदुपचारो यस्य सः। भूतपूर्वस्तद्वदुपचारो भवति। वृक्षाः वृक्षान्। जसादीनां लुप्तानुबन्धानामपि तद्वदुपचार इति दीर्घादिकं भवति। ज्ञापकं च। 'ङवंति यैयास्यास्याम्' (२।१।४२) इति ङकाराद्वंतुरन्यथा वा वार्तमानिको वंतुः भूतपूर्वकाणां ङ्यादीनां कथं भवतीति। भूतमतिक्रान्तं स्वरूपं येन प्रत्ययेन सः। तत्कथमिति वार्तमानिको वंतुर्भूतपूर्वाणां ङ्यादीनां भवतीति। लोकेपि यथा भूतपूर्वकः कुम्भकारोन्यामपि क्रियां कुर्वन् कुम्भकार एवोच्यते ॥ ५० ॥

अदर्शनं लोपः ॥ ५१ ॥

अदृष्टस्य वर्णस्य अदर्शनं लोपो भवति। तेऽत्र, पटोऽत्र। अकारस्यादृष्टत्वात् अयवादेशौ न भवतः। ज्ञापकम्। 'न विसर्जनीयलोपे पुनः संधिः' (१।५।१६)

इति पुनःसंधिप्रतिषेधः । अन्यथा विसर्जनीयस्य दृष्टत्वात्कथं संहिताप्राप्तिरिति । तथा चापिशलाः पाणिनीयाः पठन्ति ।

आगमोनुपघातेन विकारश्चोपमर्दनात् ।
आदेशस्तु प्रसङ्गेन लोपः सर्वापकर्षणात् ॥ इति ॥ ५१ ॥

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ ५२ ॥

प्रत्ययस्य लोपे कृते तस्मिन्नेव प्रत्यये यल्लक्षणं सूत्रं प्राप्नोति तत् प्रवर्तते । अतियुवाभिः अत्यावाभिः । लुप्तेपि द्विवचने युवावौ भवतः । अर्वद्गमनम् । लुप्तायामपि षष्ठयामर्वन्तिर्भवति । ज्ञापकम् । लुप्तो येन प्रत्ययकृतामिति वचनम् । अन्यथा पञ्च इत्यादिषु घुटो लुप्तत्वात् कुतो दीर्घप्रसङ्ग इति । यद्येवं उदवोढाम् अबुद्ध इत्यत्र सिचो लोपे तल्लक्षण आदिचतुर्थत्वं कथं न भवति । कश्चिदत्र ' न वर्णाश्रये प्रत्ययलोपलक्षणम् ' इति पठति । ' लोपे च दिस्योः ' (३।६।१०१) इति सिग्रहणबलादिति उत्तरं मन्यते । तत्र वाच्यम् । सकृत्प्रयोगे प्रत्ययलोपे प्रत्ययलक्षणमित्यस्यैवानित्यत्वमभ्युपेयामिति । किंच कण्डूः लोडूः पोपूः इत्यादिषु क्विब्लोपे ' य्वो व्यञ्जने ये ' इति सूत्रेण यलोपो न भवेत् ॥ ५२ ॥

सर्वापहारी लोपः प्रत्ययस्य ॥ ५३ ॥

सर्वमपहर्तुं शीलमस्येति सर्वापहारी प्रत्ययस्य लोपो भवति । अकारि । इचस्त-लोपः । दधि मधु । नपुंसकात्स्यमोर्लोपः । ज्ञापकम् । ' अम्शसोरादिर्लोपम् ' (२।१।४७) इत्यत्रादिग्रहणम् । अन्यथाऽव्यवहितत्वादम्शसोरादेरेव लोपः प्राप्नोति । किमादिग्रहणेन ॥ ५३ ॥

यावत्संभवस्तावद्विधिः ॥ ५४ ॥

यावत्संभवोस्येति तावद्विधिरस्येति विग्रहः । यावत्संभवस्तावद्विधिर्भवति । असुम् । अकारलोपे पुनरकारलोपः । भिन्द्धकि । साकोपि हेर्धित्वे पुनरक् स्यात् । ज्ञापकम् । न संप्रसारणे इति वचनम्।अन्यथा संप्रसारणे कृते पुनः संप्रसारणप्रसङ्गः कथं स्यात् ॥५४॥

उच्चरितप्रध्वंसिनो ह्यनुबन्धाः ॥ ५५ ॥

उच्चरिताश्च ते प्रध्वंसिनश्चेति उच्चरितप्रध्वंसिनो ह्यनुबन्धा भवन्ति । वारिणा वारिणे । टङकारयोः प्रध्वंसितत्वान्नामिनः स्वरे नुर्भवति । ज्ञापकं च । जसीति वचनम् । अन्यथा जकारः साधनकाले स्थितिमांश्चेत् ' अकारो दीर्घं घोषवति ' (२।१।१४) इत्यनेनैव दीर्घः स्यात् किं जसीत्यनेनेति । ' योनुबन्धोप्रयोगी ' (३।८।३१) इत्यनेन सहास्य को भेद इति चेत्सत्यम् । तेन विधानं प्रतिपाद्यते अनेन तत्संज्ञेति ॥ ५५ ॥

कार्यी निमित्तं कार्यमित्येष निर्देशक्रमः ॥ ५६ ॥

यस्मिन् कार्यमुत्पद्यते स कार्यी । कारणं निमित्तम् । साध्यं कार्यम् । प्रथमं कार्यी, ततो निमित्तं, ततः कार्यम् इत्येव सूत्राणां निर्देशक्रमो भवति । 'समानः सवर्णे दीर्घीभवति परश्च लोपम्' (१।२।१) इति । समानः कार्यी, सवर्णे निमित्तम्, दीर्घः कार्यमिति । तथा ' ओदन्ता अइउआ निपाताः स्वरे प्रकृत्या ' (१।३।१) अइउआः कार्यिणः, स्वरे

निमित्तम्, प्रकृतिः कार्यम् इति । अत एव सूत्रनिर्देशाः ज्ञापयन्तीति । यस्मादुपायिपूर्वक उपेयो भवति । लोकेपि यथा घटनिःपत्तौ आदौ मृत्पिण्डः कार्यी सलिलदण्डादि निमित्तं घटः कार्यमिति । को नाम क्रमं विहाय व्यतिक्रमेण प्रवर्तते इति ॥ ५६ ॥

तद्भेदे विधेर्भेदः ॥ ५७ ॥

तेषां कार्यिनिमित्तकार्याणां भेदे अतिक्रमे विधेर्विधानस्यापि भेदो विशेषो भवति। अतिजरसिना । 'टेन' इति कर्तव्ये 'इन टा' (२।१।२३) इति वचनं प्रकृत्यादेशात्प्राक् प्रत्ययादेशप्रतिपत्त्यर्थम् । वैदुष्यम् । 'इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च' (२।६।४४) इति व्यतिक्रमात् यप्रत्ययस्य कचिद्घुट्स्वरत्वमित्युक्तं भवति । अत्रापि पूर्ववत् सूत्रनिर्देशा एवं तद्भेदे विधेर्भेदः इतीमां ज्ञापयन्ति । अन्यथा क्रमभेदोऽसंगत एव स्यात् ॥ ५७ ॥

इकारोक्तः सविभक्तिरादेशोऽस्वरः ॥५८॥

इकारोक्तः सविभक्तिरादेशोऽस्वरो भवति । 'अर्वन्नर्वन्तिरसावनञ्' (२।३।२२)। अर्वन्तौ अर्वन्तः अर्वन्तम् अर्वन्तौ । ज्ञापकं मर्ज मार्जने इति गणकारवचनम् । अन्यथा मर्जो मार्जिरिति कृते यदीकारः स्थितिमान् तदा मार्जयते इति प्राप्नोति । कुतो मार्जयति । गणकारसूत्रकारयोश्च परस्परेण सापेक्षत्वादेकत्वं सिद्धमेवेति ॥ ५८ ॥

सिद्धे सत्यारम्भो नियमाय ॥ ५९ ॥

सिद्धकार्ये आरम्भः क्रियमाणो नियमाय भवति । सूत्रान्तरेण प्राप्तस्य कार्यस्य स्वविषये व्यावर्तको नियम उच्यते । सूत्रान्तरेण प्राप्तस्य कार्यस्य मध्ये इष्टं गृहीत्वा अन्यत्सर्वं व्यावर्तयतीत्यर्थः । वारिणी जतुनी दण्डिनौ वृत्रहणौ । घुटि दीर्घो न स्यात् । ज्ञापकं जस्शसोर्नपुंसके इति जस्ग्रहणम् । अन्यथा 'पञ्चादौ घुट्' (२।१।३) इत्यनेनैव घुटि संज्ञा सिद्धा किं जस्ग्रहणेनेति ॥ ५९ ॥

ज्ञापकज्ञापिता विधयो ह्यनित्याः ॥ ६० ॥

ज्ञापयतीति ज्ञापकम् । प्रतिपादकमित्यर्थः । ज्ञापकेन ज्ञापिता विधयो ह्यनित्या भवन्ति लक्ष्यानुसारेण सर्वत्र । कॄञ् हिंसायाम् । चिकरिषति चिकीर्षति । स्मिङ् पूङित्यादौ कृतो ज्ञापकस्यानित्यत्वात् । अन्येषामृदन्तानां विभाषेट् स्यात् । ज्ञापकम् । 'अवमसंयोगादनो लोपः' (२।२।५३) इत्यादौ लोपग्रहणम् । अन्यथा अलुप्तवचनाल्लोपः साध्यते किं लोपग्रहणेनेति ॥ ६० ॥

वक्तुर्विवक्षितपूर्विका शब्दार्थप्रतिपत्तिः ॥६१॥

वक्तुमिष्टं विवक्षितम् । तत् पूर्वं यस्याः सा विवक्षितपूर्विका वक्तुर्व्याख्यातृपुरुषस्य शब्दार्थप्रतिपत्तिर्भवति । वृक्षौ वृक्षौ । रूपाभेदे प्रथमाद्वितीयाद्विवचनस्य वा विवक्षातोऽवगतिः । विवक्षा च तिष्ठतः, पश्येत्यादिपदान्तरमेवेति । एवं वृक्षाभ्यां वृक्षाभ्यां वृक्षाभ्याम् तृतीयाचतुर्थीपञ्चमीद्विवचनस्यापीति ॥ ज्ञापकम् । 'ओसि च' (२।१।२०)

इत्यादिष्वेकवचनम् । अन्यथा षष्ठीसप्तमीद्विवचनयोर्ग्रहणे द्विवचनं युक्तम् । तस्मादविशिष्ट-प्रत्ययहेतुत्वेन व्याख्यानत्वात् सामान्यजातिर्विवक्षितेति ॥ ६१ ॥

पदयोः संधिर्विवक्षितो न समासान्तरङ्गयोः ॥ ६२ ॥

पदयोः संधिर्विवक्षितो भवति न तु समासेन्तरङ्गे चेति । संधिः संहिता संश्लेषः इति पर्यायाः । ऋति समानस्य वा ह्रस्वः प्रकृतिभावश्च । खट्वा ऋष्यः खट्व ऋष्यः खट्वर्ष्यः । नदी ऋष्यः नदि ऋष्यः नद्यृष्यः । तथा समानस्य नामिनोऽसवर्णे स्वरे वा प्रकृतिः ह्रस्वश्चासमास इति । दधि अत्र दध्यत्र । कुमारी अत्र, कुमारि अत्र । कुमार्यत्र । असमासे एव । समासे तु देवेन्द्रः खट्वेन्द्रः । अन्तरङ्गः । आधीयते व्युदस्यति दीर्घत्वयत्वे स्याताम् । नयनं नायकः । ज्ञापकं च । 'अवर्ण इवर्णे ए' (१।२।२) इत्यादीनां विसंधिनिर्देशः । अन्यथा एअय्प्रभृतयः प्राप्नुवन्ति ॥ ६२ ॥

उत्सर्गापवादयोरपवादविधिर्बलवान् ॥ ६३ ॥

उत्सर्गापवादयोः प्राप्तौ अपवादो विधिर्बलवान् भवति । गार्ग्यः कौञ्जायन्यः इत्यन् न स्यात् । अल्क्षित् । अशिश्रियत् । अपुषत् । सिज् न स्यात् । ज्ञापकं च । दीर्घोनागमस्येति अनागमस्येति वचनम् ॥

अभ्यासविकारेष्वपवादो नोत्सर्गान् बाधते ॥ ६४ ॥

अन्यत्र बाधत एवेत्यर्थः । यथा वासरूपोऽस्त्रियामिति वचनम् । अन्यथा यदि उत्सर्गापवादौ सर्वत्र सामान्येन प्राप्नुतः तदा वचनमिदमनर्थकं स्यात् ॥६४ ॥

व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् ॥ ६५ ॥

वक्तुर्विविधप्रकरणे आख्यातुः सूत्राणां सामान्यनिर्देशेपि विशेषप्रतिपत्तिर्भवति । न यस्म रसंदेहादलक्षणमिति । युवाभ्याम् । आवाभ्याम् । युवावाविति रूपाभेदे सत्यपि युवावयोरदन्तत्वम् । 'स्वरादेर्द्वितीयस्य' (३।३।२) इति स्वरादेरिति कर्मधारयात् पञ्चमी । द्वितीयग्रहणस्य प्रयोजनमुक्तमेव । स्वरादेश्चेति स्यादर्थस्य ग्रहणं, न स्यादुपशब्दस्येति । ज्ञापकम् रूढाणां यङ्लुगेऽस्त्रियामपत्यप्रत्ययस्येति अस्त्रियामिति वचनम् । अन्यथा पदान्त्याकारस्य लोपे संदेहेऽस्त्रियामिति निर्देशोऽनर्थकः स्यात् ॥ ६४ ॥

इति (दुर्गसिंहकृता) परिभाषावृत्तिः समाप्ता ॥

---

१ After this Paribhāṣā, the कातन्त्रपरिभाषापाठ named परिभाषासूत्रसंदोह gives the following additional Paribhāṣās : विप्रतिषेधे परं कार्यम् ॥ ६५ ॥ पूर्वोक्तपरोक्तयोः परोक्तो विधिर्बलवान् ॥ ६६ ॥ नित्यानित्ययोर्नित्यविधिर्बलवान् ॥ ६७ ॥ अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान् ॥ ६८ ॥ सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलवान् ॥ ६९ ॥ कृताकृतप्रसङ्गि यल्लक्षणं तन्नित्यम् ॥ ७० ॥ लक्षणसंनिपाते तदनुपरोध्य कार्यम् ॥ ७१ ॥

२ B इति दुर्गसिंहोक्ता परिभाषावृत्तिः समाप्ता ॥

भावमिश्रकृता

कातन्त्रपरिभाषासूत्रवृत्तिः

६

श्रीगुरुभ्यो नमः। अथ परिभाषासूत्राणि। प्रकीर्णके विद्यानन्देन कारिकयोक्तं 'संज्ञा च परिभाषा च विधिर्नियम एव च। प्रतिषेधोधिकारश्च षड्विधं सूत्रलक्षणम्' इति। भाष्यन्ते परितो यस्मात्परिभाषास्ततः स्मृताः। तासामर्थाः प्रयोगाश्च लिख्यन्ते भावशर्मणा—

अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ॥ १ ॥

मेघो मेघेण युध्यते। दासः करोति कर्माणि। 'एतसपरो व्यञ्जने लोप्यः' (१।५।१५) इति न भवति। अत्रैषसयोरनर्थकत्वात्। तर्हि आभ्यामित्यत्र दीर्घोऽस्तु। कथं वृक्षाभ्याम्। अत्रैषा परिभाषा अनित्या। पारिभाषिकमनित्यमिति वचनात्॥ १॥

गौणमुख्ययोर्मुख्यस्य कार्यं न तु गौणस्य ॥ २ ॥

तेन मुख्यस्य त्यदादिसर्वादिकार्यम्। सः तौ ते। गौणस्य तु अतितत्। अतितदौ अतितदः ॥ २ ॥

लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ ३ ॥

'धातुविभक्तिवर्जमर्थवल्लिङ्गम' (२।१।१) इत्येतल्लक्षणस्य लिङ्गस्य ग्रहणे पुंस्त्रीनपुंसकलिङ्गविशिष्टस्यापि लिङ्गस्य ग्रहणं स्यात्। अतिद्यौर्वैष्णवः। अथ स्त्रीलिङ्गस्य दिवलिङ्गस्य ग्रहणे पुंलिङ्गस्यापि दिवलिङ्गस्य 'ओ सौ' (२।२।२६) इति भवति। स्वाम्पि। अत्र स्त्रीलिङ्गस्याब्लिङ्गस्य ग्रहणे नपुंसकलिङ्गस्याप्यब्लिङ्गस्य 'अपश्च' (२।२।१९) इति दीर्घः ॥ ३ ॥

वर्णग्रहणे सवर्णस्यापि ग्रहणम् ॥ ४ ॥

उमेशः ॥ ४ ॥

वर्णान्तस्य विधिः ॥ ५ ॥

अनेकवर्णस्य कार्यिणो वर्णानामन्त्यस्य वर्णस्य विधिः स्यात्। अत्र। इकारस्य अकारः (२।६।२५,२७)। महादेवः। अत्र तकारस्याकारः (२।५।२१) ॥ ५ ॥

अन्त्याभावे अन्त्यसमीपस्यापि ग्रहणम् ॥ ६ ॥

अमी। 'अदसः पदे मः' (२।२।४५) इत्यनेन वर्णान्तस्य विधिरिति न्यायात सकारस्य मकारः प्राप्तः। तस्य 'विशेषातिदिष्टः प्रकृतं न बाधते' [५४] इति न्यायात्यदाषत्वेनान्त्याभावे अन्त्यसमीपस्य दस्य मो भवति। तथा च बहुवचनममीति निर्देशः ॥६॥

येन विधिस्तदन्तस्य ॥ ७ ॥

येन वर्णेन शब्देन यो विधिरुच्यते स विधिस्तदन्तस्यापि भवति । आभ्याम् । देवाभ्याम् । जरसः निर्जरसः ॥ ७ ॥

नैसर्गिकलाक्षणिकयोर्नैसर्गिकस्यैव ग्रहणं न तु लाक्षणिकस्य ॥ ८ ॥

नयां वध्वाम् स्वाम् युवाम् । अत्र न न्वागमः (२।१।७२) आमो लाक्षणिकत्वात् । कचिदेषा परिभाषा अनित्या । 'इणेधत्योर्न' (१।२।७ वा.) इति सूत्रे इण एकारे परे उपसर्गावर्णलोपस्य निषेधात् । उपैति । तेन इल प्रेरणे धातुः । परेल्यति । उख गतौ धातुः । प्रोखति ॥ ८ ॥

एकयोगनिर्दिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तिः ॥ ९ ॥

देवान् । 'शसि सस्य च नः' (२।१।१६) इति सूत्रेणाकारस्य दीर्घः। स च सस्य नश्च सहैव भवति ॥ दिवौकसः पूजय । अत्राकाराभावेन दीर्घाभावात्सस्य नश्च न भवति ॥ ९ ॥

प्रधानान्वाचयशिष्टयोः प्रधानशिष्टस्तु नित्यः ॥ १० ॥

मुख्यो विधिर्नित्यः स्याद् गौणो यथासंभवम् । उच्चै रौति मयूरः । अत्र चकारयोगेन गौणस्य दीर्घस्य अभावेपि 'रो रे लोपम०' (१।५।१७) इत्यादिसूत्रेण प्रधानरलोपः स्यादेव । गौणः संभवे स्यात् । पुना रात्रिः ॥ १० ॥

उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः ॥ ११ ॥

संहितस्य भावः । यणि कृते (२।६।१४) हि ते तते वा इति सूत्राद्विभाषानुवृत्तावपि यणि इति सूत्रेण समो मकारस्य नित्यं लुक् । साहित्यम् । सातत्यम् ॥ ११ ॥

यो यमाश्रित्योत्पद्यते स तं प्रति संनिपातः । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ १२ ॥

संनिपातलक्षणो यो विधिर्यमाश्रित्योत्पद्यते तस्य विघाताय हेतुर्न स्यात् । हे भोः । अत्र संबुद्धिमाश्रित्योत्पन्नमत्वं ह्रस्वत्वात्संबुद्धिं न नाशयति । तथा अतिरिणा अत्र नामिनमाश्रित्योत्पन्नो न्वागमो 'रैः' (२।३।१९) इत्यात्वेन नामि नकारं न शातयति। तर्हि सर्वेषाम् दाक्षिः पशव्यम् सुगः डप्रत्ययान्तः सुस्थः द्विपः कप्रत्ययान्तः एष्वियं परिभाषा अनित्येति समाधिः ॥ १२ ॥

अर्थवशाद्विभक्तिविपरिणामः ॥ १३ ॥

'अकारो दीर्घं घोषवति' (२।१।१४) इति सूत्रस्थोऽकारो इति प्रथमान्ते 'भिसैस्' (२।१।१८) इति सूत्रे अर्थवशात्पञ्चम्यन्तो भवति । तेन अकारात् परो भिस् ऐस् स्यादिति सूत्रार्थः ॥ १३ ॥

भाविनि भूतवदुपचारः ॥ १४ ॥

'अथ परस्मैपदानि' (३।१।१) । प्रथमसंज्ञी ततस्तस्य संज्ञाऽव्यवहारः । तत्र सूत्रे संज्ञीनि त्यादीनि निर्दिष्टान्येव न; केषां परस्मैपदसंज्ञा क्रियते । तत्र भाविनि भूतवदुप-

चारः इति न्यायाद् वक्ष्यमाणानि संज्ञीनि त्यादीनि निर्दिष्टान्येव न तेषां परस्मैपदसंज्ञा क्रियते इति सिद्धान्तः । एवं 'नव पराण्यात्मने' (३।१।२) इति सूत्रम् । तथा 'उपसर्गस्य धातोरेदोतोः' (१।२।७ वा.) अस्याग्रे 'इणेधत्योर्न' (१।२।७ वा.) इति सूत्रम् । ननु इणि परे उपसर्गवर्णलोपस्य प्राप्तिरेव नास्ति । निषिध्यते किम् । तत्राह । भाविनि भूतवदुपचारः इति न्यायादिणो भाविनमेकारं भूतवन्मत्वा तस्मिन्परे उपसर्गाद् वर्णलोपो निषिध्यते इति न दोषः ॥ १४ ॥

अनन्तरस्य विधिः प्रतिषेधो वा ॥ १५ ॥

अनन्तरस्याव्यवहितस्य सूत्रस्य विधिः प्रतिषेधो वा अग्रेप्यनुवर्तते । 'उवर्णे ओ' (१।२।३) । अत्र कार्यी अनन्तरतोऽवर्णः (१।२।२) एवानुवर्तते । नतु 'समान०' (१।२।१) इति । तस्यावर्ण इति विशेषेण व्यवहितत्वाद ॥ १५ ॥

एकदेशविकृतमनन्यवत् ॥ १६ ॥

एकस्मिन् भागेऽतथाभूतं शब्दरूपं यथास्थितवन्मन्तव्यम् । अनडुद्भ्याम् । अत्रान्तरङ्गत्वात्प्रथममुत्वे (२।२।४२) अनड्वाहरूपाभावेपि दत्वं भवति ॥ १६ ॥

न सामान्यशब्दोक्ते ॥ १७ ॥

सामान्यशब्दोक्ते कार्ये कर्तव्ये पूर्वोक्तविधिर्न स्यात् । द्यौः । अत्र वकारस्यौत्वे 'व्यञ्जनाच्च' (२।१।४९) इत्यनेन व्यञ्जनेति सामान्यशब्देनोक्ते सिलोपे कर्तव्ये नैकदेश-विकृतस्यानन्यवद्भावः ॥ १७ ॥

आद्यन्तवदेकस्मिन् ॥ १८ ॥

एकस्मिन् वर्णे आद्यन्तवद् व्यवहारः कर्तव्यः । ऐत् । स्वरादित्वाद् वृद्धिः । एता । नाम्यन्तत्वाद् गुणः ॥ १८ ॥

अन्तस्था रेफवर्जिताः सानुनासिका निरनुनासिकाश्च ॥ १९ ॥

महांल्लोकः । अत्रानुनासिकस्य नकारस्यान्ते तारतम्यात्सानुनासिको ल्कारः । सल्लिखति । अत्र निरनुनासिकस्य तकारस्य निरनुनासिको ल्कारः ॥ १९ ॥

प्रकृतिग्रहणे चेक्रीयितलुगन्तस्यापि ग्रहणम् ॥ २० ॥

धातुप्रकृतिग्रहणे चेक्रीयितलुगन्तस्यापि धातोर्ग्रहणं स्यात् । जङ्गमिष्यति । 'से गमः परस्मै' (३।७।६) इतीट् ॥ २० ॥

न श्तिबनुबन्धगणसंख्यैकस्वरोक्तेषु ॥ २१ ॥

श्तिप् अनुबन्ध गण संख्या एकस्वर एभिरुक्तेषु धातुषु चेक्रीयितलुगन्तस्य ग्रहणं न स्यात् । श्तिपोक्ते सोषवाणि । श्तिन्निर्देशबलात् 'सुतेः पञ्चम्याम्' (३।५।१४) इति गुणनिषेधो न भवति । गणोक्ते चोकोटिता । अत्र 'कुटादेरनितिचट्सु' (३।५।२७) इति गुणप्रतिषेधो न भवति । संख्योक्ते रोरोत्ति । रुदादिः पञ्चको गण इति रुदादेः सार्व-धातुके इड् न भवति । एकस्वरोक्ते पापचिता । 'अनिडेकस्वरादातः' (३।७।१३)

इत्येकस्वरादिकारे ‘पचिवचिसिचि०’ (३।७।१८) इत्यादिनोक्त इट्प्रतिषेधो न भवति ॥ २१ ॥

उक्तेऽर्थे तत्प्रत्ययाप्रयोगः ॥ २२ ॥

त्यादिकृत्तद्धितसमासैः उक्तेर्थे उचितस्य प्रत्ययस्य प्रयोगो न स्यात्। यथा घटः क्रियते कुलालेन। अत्रात्मनेपदेनोक्ते कर्मण्यर्थे द्वितीया न भवति। किं तु उक्तादर्थाल्लिङ्गार्थे प्रथमा भवति। तथा कुलालो घटं करोति। अत्र परस्मैपदेनोक्ते कर्तर्यर्थे तृतीया न भवति। अव्ययेनाप्यर्थस्योक्तिर्दृश्यते यथा—विषवृक्षोपि संवृध्य स्वयं छेत्तुमसांप्रतम्। असांप्रतम् अन्याय्यः ॥ २२ ॥

निमित्ताभावे नैमित्तिकस्याप्यभावः ॥ २३ ॥

पाञ्चालशब्दस्य जसि पञ्चालाः। अत्राणो लुकि कृते नैमित्तिक्या वृद्धेरप्यभावः। क्वचिदेषा परिभाषा अनित्या। ‘अघुट्स्वरादौ सेट्कस्यापि वन्सेर्वशब्दस्योत्वम्’ (२।२।३९) इति सूत्रे सेट्कस्यापीति वचनात्। तेन भावित इत्यादौ जकारे परे ‘अकारो दीर्घं घोषवति’ (२।१।१४) इत्यनेनैव दीर्घः स्यात्किं ‘जसि’ (२।१।१५) इति सूत्रेण। तथा वारिणा वारिणे वारिणः। अत्र टङकारयोरुच्चरितमात्रयोर्लोप्यानाम्यन्तात्स्वरस्य विहितत्वं ततो न्वागमः ॥ २३ ॥

लुप्तोऽनुबन्धः साध्यसिद्धिवशात् सद्वत् ॥ २४ ॥

लुप्तोनुबन्धो विद्यमानवद् बोद्धव्यः साध्यसिद्धिवशात्। देवाः। अत्रानुबन्धस्य उच्चरितमात्रस्य लोपेन जस्रूपाभावात्कथं जसीत्यनेन दीर्घः। उच्यते। अनयैव परिभाषया। लुप्ता अप्यनुबन्धाः ‘जसि’ (२।१।१५) ‘शसि सस्य च नः’ (२।१।१६) ‘इन टा’ (२।१।२३) ‘ङेर्यैः’ इत्यादिसूत्रैर्दीर्घादिषु कर्तव्येषु विद्यमाना इव मन्यन्ते इति न दोषः। (३।१।२४) साध्यसिद्धिवशादिति किम्। देवैः। अत्र लुप्तस्यैकारस्य न विद्यमानवद्भावः। तथा सति विसर्गासिद्धेः ॥ २४ ॥

प्रत्ययस्य सर्वापहारी लोपः स्यात् ॥ २५ ॥

परस्यादेरिति न्यायात् आदेरेव वर्णस्य लोपे प्राप्ते वचनमिदम्। अकारि। ‘यस्यानिनि’ (३।६।४८) ‘इचस्तलोपः’ (३।४।३२)। बोभवीति। ‘यङोचि च’ इत्यनेन लुक् ॥ २५ ॥

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ २६ ॥

प्रत्ययलोपे कृते तस्मिन् प्रत्यये परे यल्लक्षणं प्राप्तं तत्स्यादेव। युवां आवां अतिक्रान्तैः अतियुवाभिः अत्यावाभिः। अत्र द्विवचनलोपेपि द्विवचने प्राप्तौ युवावौ भवतः ॥२६॥

यावत्संभवस्तावद् विधिः स्यात् ॥ २७ ॥

अमुम्। अत्र ‘अकारे लोपम्’ (२।१।१७) इत्यनेन वारद्वयमकारस्य लोपः ॥ २७ ॥

कार्यी निमित्तं कार्यमित्येष निर्देशक्रमः ॥ २८ ॥

तद्भेदे विधेर्भेदः ॥ २९ ॥

क्रमो यथा ' समानः सवर्णे दीर्घीभवति० ' (१।२।१) इति । तथा ' अवर्ण इवर्णे ए ' (१।२।२) । एतद्भेदे विधेर्भेदः । यथा ' टेन ' इति निर्देशे प्राप्ते ' इन टा ' (२।१।२३) इति व्यतिक्रमेण निर्देशः । तस्मात्परत्वान्नित्यत्वादन्तरङ्गत्वाद्विशेषत्वाच्च प्रथमं प्राप्तादपि जरसादेशात्पूर्वमिनादेशः । तेनातिजरसिनेति । तथा ' अकारो दीर्घं घोषवति ' (२।१।१४) इति व्यतिक्रमेण निर्देशात् संनिपातलक्षणपरिभाषां बाधित्वा दीर्घो भवति । देवाय ॥ २८, २९ ॥

सिद्धे सत्यारम्भो नियमाय स्यात् ॥ ३० ॥

दण्डिनौ । अत्र ' घुटि चासंबुद्धौ ' (२।२।१७) इत्यनेन दीर्घे प्राप्ते ' इन्हन्पूषार्यम्णां शौ च ' (२।२।२१) इत्यत्र इनादीनां ग्रहणम् । शौ सावेवेति नियमार्थम् । ततो नात्र दीर्घः ॥ ३० ॥

यल्लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम् ॥ ३१ ॥

शकन्धुः । अत्र दीर्घः प्राप्तः सन्न भवति । किं तु पूर्वपदस्याकारलोपो निपातनात् ॥ ३१ ॥

आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ ३२ ॥

आगमा यस्याङ्गत्वेन जाताः प्रकृतेः प्रत्ययस्य वा तदङ्गत्वेनैव गृह्यन्ते । फलानि । अत्र प्रकृतेर्न्वागमः । तेन ' घुटि चासंबुद्धौ ' (२।२।१७) इति दीर्घः । देवानाम् । अत्र प्रत्ययस्य । तेन ' दीर्घमामि सनौ ' (२।२।१५) इति दीर्घः । अत एव ' अद्-व्यञ्जनेऽनक् (२।३।३५) इति सूत्रे अनगिति पदम् ॥ ३२ ॥

निर्दिश्यमानानामादेशिनामादेशाः स्युः ॥ ३३ ॥

इह । अत्र ' वर्णान्तस्य विधिः ' इति न्यायादिदमो मकारमात्रस्य इकारादेशे प्राप्ते आदेशित्वेन निर्दिश्यमानस्य इदमः शब्दस्य समस्तस्य इकारादेशो भवति ॥ ३३ ॥

यथासंख्यमनुदेशः समानाम् ॥ ३४ ॥

पूर्वोक्तानामनुदेशः पश्चादुक्तं यथासंख्यं स्यात् । ' ङवन्ति यै यास् यास् याम् ' (२।१।४२) गङ्गायै: गङ्गायाः गङ्गायाम् ॥ ३४ ॥

स्थानेन्तरतमः ॥ ३५ ॥

आदेशिनि सदृशतम आदेशः स्यात् तच्च सादृश्यं स्थानतोर्थात्प्रमाणतश्च संभवति । तेषां क्रमेणोदाहरणानि । गणाधिपः । अत्र कण्ठ्यस्याकारस्य कण्ठ्य एव दीर्घः । ईक्षामास । अत्र कर्तर्यर्थे विहितस्यात्मनेपदस्य कर्तर्यर्थभाविपरस्मैपदादेशो भवति । अमू । दीर्घस्य दीर्घमूत्वं भवति ॥ ३५ ॥

अनेकवर्णः सर्वस्य ॥ ३६ ॥

सर्वस्य अनेकवर्ण आदेशः । समस्तस्यादेशिनः स्यात् । जरसौ । अभूत् । अस्तेर्भूरादेशः ॥

[परस्यादेः]

कुतश्चित्परस्यादेशिनश्चादेरादेशः स्यात् । द्वीपः अन्तरीपः समीपः कूपः भूपः अनूपः । अत्र द्व्यन्तरुपसर्गेभ्योऽपोऽवर्णात् ह्रस्वनुम्यः अप ऊः एताभ्यां सूत्राभ्यामादेशित्वेन निर्दिश्यमानस्य अप्शब्दस्य समस्तस्य ईत्वमूत्वं च प्राप्तम् । तदनया परिभाषया आदेर्भवति ॥ ३६ ॥

नित्यं सन्ध्यक्षराणि दीर्घाणि ॥ ३७ ॥

रैच्छटा रैछटा गोछाया गोच्छाया ग्लौछाया ग्लौच्छाया एषु दीर्घात्पदान्ताद्वा (१।५।१८) इति सूत्रेण छस्य वा द्वित्वम् ॥ ३७ ॥

इकारोक्तः सविभक्तिरादेशोऽस्वरः ॥ ३८ ॥

इकारेण सहोक्तस्य विभक्तिरादेशोऽस्वरः स्यात् । अर्वतः अर्वता । ' अर्वन्नर्वन्ति-रसावनञ् ' (२।३।२२) । अवधीत् । ' हन्तेर्वधिः ' (३।४।८२) । मार्जनम् ' मर्जो मार्जिः ' (३।८।२३) ॥ ३८ ॥

स्थानिवदादेशो ह्यवर्णविधौ ॥ ३९ ॥

तिष्ठतीति स्थानः। युप्रकृतिभ्यो युवकर्तरि । स्थानस्यादेशोस्यास्तीति स्थानी आदेशो तद्वत् । लिङ्गधातुविभक्तीनामादेशः स्थानिवत् स्यात् । न तु वर्णानां विधौ कर्तव्ये । आभ्याम् । अत्र आदेशस्यानर्थकत्वेन लिङ्गत्वाभावाद् दीर्घत्वेऽप्राप्ते स्थानिवद्भावेन लिङ्गत्वाद्दीर्घः । वृक्षाय । अत्र ङेर्ये इति यकारस्य अत्यादित्वाद्दीर्घेऽप्राप्ते स्थानिवद्भावेन स्यादित्वाद्दीर्घः । लोकेप्यादेश उच्यते । निगाल्यते । निगार्यते । अत्र इल्लोपरूपस्यादेशस्य स्थानिवद्भावाद् ' वा स्वरे ' (३।६।९९) इति वा लत्वं भवति ॥ ३९ ॥

न पदान्तद्विर्वचनानुस्वारवर्गान्तप्रथमतृतीयदीर्घलुग्विधिषु ॥ ४० ॥

पदान्तादिविधिष्वादेशः स्थानिवन्न स्यात् । पदान्तविधौ । बह्वः प्रभवः सन्ति । 'लोपोप्यादेश उच्यते' इति वचनेन लोपस्याप्यादेशत्वाल्लुप्तस्यास्तेरादेः स्थानिवद्भावनिषेधादुत्वं न भवति । द्विर्वचने । इयेष उवोष । अत्र गुणस्य स्थानिवद्भावनिषेधादसवर्णे परे इयुवौ भवतः । अनुस्वारविधौ वर्गान्तविधौ च । भुङ्क्ते भुञ्जाते अत्र विकरणान्तलोपेऽनुस्वारे वर्गान्ते च कर्तव्ये लुप्तस्य विकरणान्तस्य न स्थानिवद्भावः । प्रथमविधौ । जक्षतुः । अत्र घसो घकारस्य प्रथमे कर्तव्ये लुप्ताया उपधाया न स्थानिवद्भावः । तृतीयविधौ । जग्धम् । अत्र जग्ध्यादेशे कृते तृतीये कर्तव्ये अदो न स्थानिवद्भावः। दीर्घविधौ । प्रतिदीव्नः । अत्र नामिनो र्वोर दुस दुरोर्व्यञ्जने दीर्घः इति दीर्घे कर्तव्ये अदो न स्थानिवद्भावः। नात्रालुप्तवद्भावोऽनिष्टत्वात् । उक्तं तु प्रत्ययलुप्तवद्भाव एव । लुग्विधौ । पञ्च षट् । अत्र लुका लुप्तयोर्जस्शसोः स्थानिवद्भावनिषेधाद्विरामे नकारलोपो डत्वं च भवति ॥ ४० ॥

स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत् ॥ ४१ ॥

कथयति गणयति । ' अस्य च लोपः ' (३।६।४९) इति लुप्ताकाररूपस्य स्वरादेशस्य स्थानिवद्भावादुपधाया दीर्घो न भवति । जनम् । अत्र ' अकारे लोपम् '

(२।१।१७) इत्यकारलोपे कृते दीर्घविधौ न पदान्तेत्यादिना स्थानिवद्भावनिषेधाद् 'धुटि चासंबुद्धौ' (२।२।१७) इत्यनेन दीर्घो न भवितुमर्हति । उच्यते । न पदान्तद्विर्वचनेत्यस्यापवादे 'स्वरादेशः परनिमित्तः०' इति न्यायेन लुप्तस्याकारस्य स्थानिवद्भावान्न दीर्घः ॥ ४१ ॥

परनिमित्तादेशः पूर्वस्मिन् स एव ॥ ४२ ॥

पूर्वस्मिन् वर्तमानः परो निमित्तं यस्य तादृगादेशः स एव पर इव मन्तव्यः ॥४२॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ४३ ॥

अन्तरङ्गे कर्तव्ये बहिरङ्गमसिद्धं स्यात् । प्रकृत्याश्रितमन्तरङ्गं प्रत्ययाश्रितं बहिरङ्गम् । तथा पूर्वं पूर्वं स्यादन्तरङ्गं परं परं स्याद् बहिरङ्गम् । अल्पाश्रितमन्तरङ्गं बह्वाश्रितं बहिरङ्गम् । बहुक्रोष्टा ग्रामः । अत्र कृदन्तायाः प्रकृतेराश्रयणात् कप्रत्ययोन्तरङ्गस्तुन्प्रत्ययाश्रयणात् तृजादेशो बहिरङ्गः । तेन कप्रत्ययो न भवति । तृजादेशस्यासिद्धवद्भावात् ॥ ४३ ॥

सर्वविधिभ्यो लोपविधिर्बलवान् ॥ ४४ ॥

अबुद्ध । अत्र तृतीयादेर्घढधभान्तस्य इत्यादिना परत्वादन्तरङ्गत्वाच्च सिच्यादिचतुर्थत्वे प्राप्ते सिचो लोप एव स्यात् ॥ ४४ ॥

लोपस्वरादेशयोः स्वरादेशो विधिर्बलवान् ॥ ४५ ॥

स्वरस्यादेशः स्वरादेश इति न । किं तु स्वरश्चासौ आदेशश्चेति स्वरादेशः । द्यौः । अत्र 'व्यञ्जनाच्च' (२।१।४९) इति सिलोपमतिक्रम्य वकारस्यौकारादेशः (२।१।५१) ॥ ४५ ॥

आगमादेशयोरागमविधिर्बलवान् ॥ ४६ ॥

गमिष्यति । अत्रान्तरङ्गत्वात्प्राप्तमनुस्वारादेशमतिक्रम्य इमागमो भवति ॥ ४६ ॥

आगमात्सर्वादेशो विधिर्बलवान् ॥ ४७ ॥

निर्जरसाम् । अत्रागमत्वात्प्रथमं प्राप्तं न्वागमं बाधित्वा सर्वादेशत्वाज्जरसादेशः ॥ ४७ ॥

पूर्वोक्तपरोक्तयोः परोक्तविधिर्बलवान् ॥ ४८ ॥

देवेभ्यः । अत्र 'अकारो दीर्घं घोषवति' (२।१।१४) इति न दीर्घः । 'धुटि बहुत्वे त्वे' (२।१।१९) इत्यस्य परत्वात् ॥ ४८ ॥

नित्यानित्ययोर्मध्ये नित्यो विधिर्बलवान् ॥ ४९ ॥

कृताकृतप्रसङ्गी यो विधिः स नित्यः । निर्जरसः । अत्र नित्यत्वाज्जरसादेशो नैत्विनादेशः । भाष्यकारस्याप्येतदेव संमतम् ॥ ४९ ॥

अन्तरङ्गबहिरङ्गयोर्मध्ये अन्तरङ्गो विधिर्बलवान् ॥ ५० ॥

एधि । अत्र धातोर्हिप्रत्यये ‘ अस्तेरादेः ’ (३।४।४१) इत्यकारलोपः । ततो ‘ दास्त्योरेऽभ्यासलोपश्च ’(३।४।५०) इत्यनेन सकारस्य एत्वं प्राप्तं ‘ हुधुड्भ्यां हेर्धिः ’ (३।५।३५) इति हेर्धिः प्राप्तः । तत्र किं स्यात् तत्राह । प्रकृत्याश्रयत्वेन एत्वस्यान्तरङ्गत्वात्प्रत्ययाश्रयत्वेन धेर्बहिरङ्गत्वात् प्रथममेत्वम् । अत एव विधिविधानार्थं ‘ अस्तेः ’ (३।५।३६) इति सूत्रम् । अन्यथा हुधुड्भ्यामित्यनेनैव हेर्धिरभविष्यत् ॥ ५० ॥

पराश्नित्यं नित्यादन्तरङ्गमन्तरङ्गाद्यानवकाशं बलीयः ॥ ५१ ॥

देवैः । अत्र परत्वात्प्रकृत्याश्रितत्वेनान्तरङ्गत्वाच्च प्रथमं ‘ धुटि बहुत्वे त्वे ’ (२।१।१९) अनेनाकारस्यैत्वं भविष्यति । ततो अकारान्तत्वाभावात्कथं भिस ऐस् । सत्यम् । अनवकाशत्वात्प्रथमं भिस ऐस् भविष्यति न तु बहुत्वे त्वे ॥ ५१ ॥

उत्सर्गापवादयोरपवादविधिर्बलवान् ॥ ५२ ॥

सामान्योक्तो विधिरुत्सर्गो विशेषोक्तो विधिरपवादः ॥ ५३ ॥

अयं गार्ग्यः । अत्र ‘ वाणपत्ये ’ (२।६।१) इत्यनेन अण्प्रत्यय उत्सर्गः एव । ‘ ण्य गर्गादेः (२।६।२) इत्यनेन ण्यप्रत्ययोपवादः ॥ ५२, ५३ ॥

विशेषातिदिष्टः प्रकृतं न बाधते ॥ ५४ ॥

‘ सुरामि सर्वतः ’ (२।१।२९) इति सूत्रे अन तरितं विशेषातिदिष्टं ‘पूर्वादेः’ (२।१।२८) इति प्रकृतां सर्वनामानुवृत्तिं न बाधते । तेन सर्वेषाम् ॥ ५४ ॥

अपवादविषयं परिहृत्योत्सर्गः प्रवर्तते ॥ ५५ ॥

यथा शकन्धुः कर्कन्धुः । अत्र शकन्ध्वादिविषये ‘समानः सवर्णे०’ (१।२।१) इति न दीर्घः ॥ ५५ ॥

अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः स्यात् ॥ ५६ ॥

नन्दनः नन्दकः नन्दयिता । अत्र योरपवादस्य विषये सामान्यौ वुण्तृचावपि (४।२।४७) भवतः ॥ ५६ ॥

सकृद्बाधितो विधिर्बाधित एव ॥ ५७ ॥

स पुनर्न स्यात् । स कर्ता । अत्र प्रकृत्याश्रितत्वेन गुणोन्तरङ्गः प्रत्ययाश्रितत्वेन इड् बहिरङ्गः । तथा सति अन्तरङ्गबहिरङ्गयोरन्तरङ्गविधिर्बलवानिति प्रथमं गुणो भविष्यति । गुणे सति ऋदन्तत्वाभावात्कथमनिट् । सत्यम् । ऋदन्तावस्थायां ‘ ऋतोऽवृङ्वृञः ’ (३।७।१६) इत्यनेनेड् बाधितः स गुणेपि कृते अनया परिभाषया बाधित एवेति न दोषः । एवं भेत्ता वेत्तेत्यादि ॥ ५७ ॥

पारिभाषिकं क्वचिदनित्यं स्यात् ॥ ५८ ॥

देवाय । अत्र संनिपातलक्षणा परिभाषा अनित्या । ततो दीर्घः । वृक्षाभ्याम् । अत्रार्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति परिभाषा अनित्या। ततो अनर्थकस्याप्यकारस्य दीर्घः ॥ ५८ ॥

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ ५९ ॥

महेश्वरं नमस्कृत्य । अत्र नम इत्युपपदयोगे प्राप्तां चतुर्थीं बाधित्वा कर्मणि कारके द्वितीया भवति ॥ ५९ ॥

गुणबाधिका वृद्धिर्भवति ॥ ६० ॥

अजैषीत् । अश्रौषीत् । अत्र प्राप्तं गुणं बाधित्वा वृद्धिर्भवति । अनुवीत् । अधुवीत् । अत्र कुटादित्वाद् गुणेऽकृते गुणं विना वृद्धिरपि न भवति ॥ ६० ॥

सूत्रे काललिङ्गवचनान्यतन्त्राणि ॥ ६१ ॥

अतन्त्राणि अप्रधानानि । तेन 'तदस्यास्तीति मन्त्वन्त्वीन्' (२।६।१५) अत्र सूत्रे अस्तीति वर्तमानः कालोऽतन्त्रः । तस्मादतीते भविष्यति च काले मन्तुप्रभृतयः प्रत्यया भवन्ति । सगरो बहुपुत्रवान् । आयुष्मन्तः सुताः सप्त भविष्यन्ति तव प्रभो । 'जरा जरस् स्वरे वा' (२।३।२४) । अत्र तदन्तविधिरिष्टत्वान्निर्जरशब्दस्यापि जरस् भवति । ननु जराशब्दस्य स्त्रीलिङ्गत्वात्तदन्तविधावपि निर्जराशब्दस्य जरस् भवितुमर्हति । सत्यम् । अत्र जराशब्दस्य स्त्रीलिङ्गमतन्त्रम् । तेनास्य लिङ्गान्तरेपि जरस् भवति । 'नाम्नां समासो युक्तार्थः' (२।५।१) । अत्र सूत्रे नाम्नामिति बहुवचनमतन्त्रम् । तेन चन्द्रशेखरः ॥ ६१ ॥

प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते ॥ ६२ ॥

प्रधानशक्त्यभिधाने प्रधानशक्त्या मुख्यक्रियया अभिधाने कर्मणः कथने गुणशक्तिः गौणी क्रिया अभिहितवत् उक्तार्थैव प्रकाशते । मुख्यक्रियया कर्मण्युक्ते गुणक्रियया कर्माप्युक्तं स्यात्तेन न तस्मिन् कर्मणि द्वितीयेत्यर्थः । मुख्यक्रियया कर्मण्यनुक्ते गुणक्रियाकर्मणि द्वितीया स्यादेव । यथा

आघ्याय पूज्यतां विष्णुर्विप्रान् संपूज्य भुज्यताम् ।
अर्थः संगृह्यतां दातुं यततां सेवितुं हरिम् ॥ ६२ ॥

इति परिभाषाः ॥

प्रमादादत्र दुष्टं चेत् किंचिल्लिखितवानहम् ।
संशोध्य स्थापनीयं तद् धर्मार्थं साधुभिर्बुधैः ॥

॥ इति श्रीभावमिश्रकृता परिभाषावृत्तिः ॥

॥ अथ परिभाषासूत्रम् ॥

१ एकदेशविकृतमनन्यवत् ॥

२ नास्वशब्दोक्तत्वात् ॥

३ येन विधिस्तदन्तस्य ॥

४ अर्थवद्ग्रहणे नानर्थकस्य ॥

५ वर्णान्तस्य विधिः ॥

६ एकवर्णो विधिरन्ते प्रवर्तते ॥

७ अनेकवर्णः सर्वस्य ॥

८ निर्दिश्यमानानामादेशिनामादेशाः ॥

९ स्थानिवदादेशा अवर्णविधौ ॥

१० स्वरादेशः स्वरनिमित्तकः पूर्वविधि प्रति स्थानिवत् ॥

११ न पदान्तद्विर्वचनवर्गान्तानुस्वारप्रथमतृतीयदीर्घलुग्विधिषु ॥

१२ योऽनादिष्टात् स्वरात् पूर्वस्तं प्रति स्थानिवत् ॥

१३ प्रकृतिग्रहणे चेक्रीयितलुगन्तस्यापि ग्रहणम् ॥

१४ न श्तिबनुबन्धगणसंख्यैकस्वरोक्तेषु ॥

१५ आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते ॥

१६ यथासंख्यमनुदेशः समानाम् ॥

१७ स्थानेन्तरतमः ॥

१८ लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥

१९ अनन्तरस्य विधिः प्रतिषेधो वा ॥

२० विशेषातिदिष्टः प्रकृतं न बाधते ॥

२१ आद्यन्तवदेकस्मिन् ॥

२२ चानुकृष्टं नोत्तरत्र ॥

२३ सप्तम्या निर्दिष्टे पूर्वस्य ॥

२४ पञ्चम्या निर्दिष्टे परस्य ॥

२५ षष्ठ्या निर्दिष्टे स्वस्य ॥

२६ प्रथमया च ॥

२७ अर्थवशाद् विभक्तिविपरिणामः ॥

२८ भाविनि भूतवदुपचारः ॥

२९ निमित्ताभावे नैमित्तिकस्याप्यभावः ॥

३० स्वं रूपं शब्दस्याशब्दसंज्ञा ॥

३१ गणकृतमनित्यम् ॥

३२ संज्ञापूर्वको विधिरनित्यः ॥

३३ यं दृष्ट्वा यस्य संभवः स तस्य संनिपातः, संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥

३४ वर्णग्रहणे निमित्तम् ॥

३५ असिद्धं बहिरङ्गमन्तरङ्गे ॥

३६ सर्वविधिभ्यो लोपविधिर्बलवान् ॥

३७ लोपस्वरादेशयोः स्वरादेशविधिर्बलवान् ॥

३८ सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ॥

३९ अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः ॥

४० प्रधानान्वाचयशिष्टयोः प्रधानशिष्टस्तु नित्यः ॥

४१ नित्योऽवश्यंभावी भवति ॥

४२ अन्त्याभावे अन्त्यसदेशस्यापि ग्रहणम् ॥

४३ आगमादेशयोरागमो विधिर्बलवान् ॥

४४ आगमात्सर्वादेशो विधिर्बलवान् ॥

४५ औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥

४६ संध्यक्षराणामिदुतौ ह्रस्वादेशे ॥

४७ परनिमित्तादेशः पूर्वस्मिन् स एव ॥

४८ निरनुबन्धग्रहणे न सानुबन्धस्य ग्रहणम् ॥

४९ उक्तार्थानामप्रयोगः ॥

५० यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमस्ति नासौ बाध्यते ॥

५१ नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥

५२ भूतपूर्ववदुपचारः ॥

५३ अदर्शनं लोपः ॥

५४ प्रत्ययलोपे प्रत्ययलक्षणम् ॥

५५ प्रत्ययस्य सर्वापहारी लोपः ॥

५६ प्रकृतेरन्तापहारी लोपः ॥

५७ यावत्संभवस्तावद्विधिः ॥

५८ उच्चरितप्रध्वंसिनो ह्यनुबन्धाः ॥

५९ कार्यी निमित्तं कार्यमित्येष निर्देशक्रमः ॥

६० तद्भेदाद्विधेर्भेदः ॥

६१ इकारोक्तः सविभक्तिरादेशोऽस्वरः ॥

६२ सिद्धे सत्यारम्भो विधिर्नियमाय ज्ञापकाय विकल्पाय वा ॥

६३ ज्ञापकज्ञापिता विधयो ह्यनित्याः ॥

६४ वक्तुर्विवक्षितपूर्विका हि शब्दप्रवृत्तिः ॥

६५ पदयोः संधिर्विवक्षितो न समासान्तरङ्गयोः ॥

६६ उत्सर्गापवादयोरपवादविधिर्बलवान् ॥

६७ व्याख्यानतो विशेषार्थप्रतिपत्तिर्नहि संदेहादलक्षणम् ॥

॥ इति परिभाषासूत्रम् ॥

॥ अथ बलाबलसूत्रम् ॥

६८ यत्र द्वौ प्रसङ्गावन्यार्थावेकस्मिन् विषये युगपत् प्राप्तः स तुल्यबलविरोधो विप्रतिषेधः ॥

६९ विप्रतिषेधे परं कार्यम् ॥

७० पूर्वपरयोः परविधिर्बलवान् ॥

७१ प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गम् ॥

७२ प्रकृत्याश्रितमन्तरङ्गम् ॥

७३ प्रत्ययाश्रितं बहिरङ्गम् ॥

७४ उपपदसिद्धेः कारकसिद्धिर्बलीयसी ॥

७५ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ॥

७६ सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलवान् ॥

७७ अन्तरङ्गबहिरङ्गयोरन्तरङ्गविधिर्बलवान् ॥

७८ आगमादेशयोरागमविधिर्बलवान् ॥

७९ अन्तरङ्गाच्चानवकाशं बलीयः ॥

८० वार्णो विधिरन्तरङ्गम् ॥

८१ वार्णात् प्राकृतं बलीयः ॥

८२ कृताकृतप्रसङ्गी यो विधिः स नित्यः ॥

८३ नित्यानित्ययोर्नित्यविधिर्बलवान् ॥

८४ विधिनियमसंभवे विधिरेव ज्यायान् ॥

८५ एकाश्रितमन्तरङ्गम् ॥

८६ बह्वाश्रितं बहिरङ्गम् ॥

८७ सामान्यविधिरुत्सर्गः विशेषविधिरपवादः ॥

८८ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययो न तु गौणे ॥

८९ स्थितानामन्वाख्यानं हि व्याकरणम् ॥

९० यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्य ॥

९१ यस्य स्थाने य आदेशास्ते तद्ग्रहणेन गृह्यन्ते ॥

९२ श्रुतानुमितयोः श्रौतसंबन्धविधिर्बलवान् ॥

९३ नित्यादन्तरङ्गं बलीयः ॥

९४ विधिप्रतिषेधयोः प्रतिषेधो विधिर्बलवान् ॥

९५ प्रत्यक्षानुमितयोः प्रत्यक्षो विधिर्बलवान् ॥

९६ उत्सर्गापवादयोरपवादविधिर्बलवान् ॥

॥ इति बलाबलसूत्रम् ॥

कालापपरिभाषासूत्रम्

८

१ असति बाधे ॥
२ सविशेषणे विधिनिषेधौ विशेषणमुपसंक्रामतो विशेष्ये बाधिते सति ॥
३ एकदेशविकृतमनन्यवत् ॥
४ नास्वशब्दोक्तत्वात् ॥
५ येन विधिस्तदन्तस्य ॥
६ न संज्ञाविधौ ॥
७ अर्थवद्ग्रहणे नानर्थकस्य ॥
८ विशेषनिषिद्धानां सामान्यनिषेधवत्त्वम् ।
९ वर्णान्तस्य विधिः ॥
१० अनेकवर्णः सर्वस्य ॥
११ निर्दिश्यमानानामादेशिनामादेशाः ॥
१२ स्थानिवदादेशो ह्यवर्णविधौ ॥
१३ क्वचिन्नादेशस्य ॥
१४ ऊकारोक्तः सविभक्तिरादेशोऽस्वरः ॥
१५ स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत् ॥
१६ न पदान्तद्विर्वचनवर्गान्तानुस्वारप्रथमतृतीयदीर्घलुग्विधिषु ॥
१७ योनादिष्टात् स्वरात्पूर्वस्तं प्रति स्थानिवत् ॥
१८ परनिमित्तादेशः पूर्वस्मिन्स एव ॥
१९ प्रकृतिग्रहणे चक्रीयितलुगन्तस्यापि ग्रहणम् ॥
२० न श्तिवनुबन्धगणशवेकाजुक्तेषु ॥
२१ आगमशासनमनित्यम् ॥
२२ आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते ॥
२३ यथासंख्यमनुदेशः समानाम् ॥
२४ स्थानेऽन्तरतमः ॥
२५ लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥
२६ क्वचिदर्थवतोऽपि ॥
२७ अनन्तरस्य विधिः प्रतिषेधो वा ॥
२८ विशेषातिदिष्टः प्रकृतं न बाधते ॥
२९ आद्यन्तवदेकम् ॥
३० सप्तम्या निर्दिष्टे पूर्वस्य ॥
३१ पञ्चम्या निर्दिष्टे परस्य ॥
३२ षष्ठया निर्दिष्टे स्वस्य ॥
३३ अर्थवशाद्विभक्तिविपरिणामः ॥
३४ निमित्तस्याभावे नैमित्तिकस्याप्यभावः ॥
३५ स्वं रूपं शब्दस्याशब्दसंज्ञा ॥
३६ गणकृतमनित्यम् ॥
३७ नञा निर्दिष्टमनित्यम् ॥
३८ संज्ञापूर्वको विधिरनित्यः ॥
३९ समासान्तश्च ॥
४० संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥
४१ वर्णग्रहणे निमित्तत्वात् ॥
४२ असिद्धं बहिरङ्गमन्तरङ्गे ॥
४३ सर्वविधिभ्यो लोपविधिर्बलवान् ॥
४४ लोपस्वरादेशयोः स्वरादेशविधिर्बलवान्
४५ आगमादेशयोरागमविधिर्बलवान् ॥
४६ आगमात्सर्वादेशविधिर्बलवान् ॥
४७ अन्यकार्यात् परा द्विरुक्तिः परोक्षालिङादिषु ॥
४८ उत्सर्गापवादयोरपवादविधिर्बलवान् ॥
४९ अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः ॥
५० पूर्वपरयोः परो विधिर्बलवान् ॥

५१ पराऩ्नित्यम् ॥
५२ नित्यादन्तरङ्गं बलवत् ॥
५३ कृताकृतप्रसङ्गी यो विधिः स नित्यः॥
५४ नित्यानित्ययोर्नित्यः ॥
५५ अनन्यपूर्वा ह्यादेशाः ॥
५६ बहुषु च शितः ॥
५७ सकृद् बाधितं यत्तद् बाधितमेव ॥
५८ प्रधानान्वाचयशिष्टयोः प्रधानशिष्टस्तु नित्यः ॥
५९ औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥
६० एच इण् ह्रस्वत्वे ॥
६१ निरनुबन्धग्रहणे सामान्यग्रहणम् ॥
६२ उक्तार्थानामप्रयोगः ॥
६३ यं विधिं प्रति उपदेशो निरर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमस्ति नासौ बाध्यते ॥
६४ नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥
६५ भाविनि भूतवदुपचारः ॥
६६ अदर्शनं लोपः ॥
६७ प्रत्ययलोपे तल्लक्षणम् ॥
६८ प्रत्ययस्य सर्वापहारी लोपः ॥
६९ प्रकृतेरन्तापहारी लोपः ॥
७० यावत्संभवस्तावद्विधिः ॥
७१ उच्चारितप्रध्वंसिनो ह्यनुबन्धाः ॥
७२ कार्यी निमित्तं कार्यमित्येष निर्देशक्रमः ॥
७३ तद्भेदे विधेर्भेदः ॥
७४ लक्षणविधौ लिखनप्रक्रमाद् विधिः ॥
७५ येन निर्दिष्टं तस्यैव ॥
७६ चानुकृष्टं नोत्तरत्र ॥
७७ सिद्धे सत्यारभ्यो विधिर्नियमाय विकल्पाय ज्ञापकाय वा ॥
७८ उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः ॥
७९ अप्राप्तिपूर्विका हि विभाषा तदुद्देश आदौ ॥
८० सूत्रे लिङ्गवचनमतन्त्रम् ॥
८१ द्वित्वबहुत्वयोरेकत्वं बहुत्वार्थं स्वरूपार्थं वा ॥
८२ ज्ञापकज्ञापिता विधयो ह्यनित्याः ॥
८३ वक्तुर्विवक्षापूर्विका हि शब्दप्रवृत्तिः ॥
८४ पदयोः संधिर्विवक्षितो न समासान्तरङ्गयोः ॥
८५ आख्यातानाख्यातयोराख्यातं बलीयः।
८६ अव्यक्तं प्रधानगामि ॥
८७ गौणमुख्ययोर्मुख्ये कार्यसंप्रतिपत्तिः ॥
८८ व्याख्यानतो विशेषार्थप्रतिपत्तिर्नहि संदेहादलक्षणम् ॥
८९ अनुशिष्टाननुशिष्टयोरनुशिष्टं प्रमाणम्॥
९० स्वगुरूपलक्षणोक्तं च ॥
९१ परोक्तमविरोधि चेत् ॥
९२ एकवर्णो विधिरन्ते प्रवर्तते ॥
९३ अन्त्याभावे अन्त्यसदेशस्य ग्रहणम् ॥
९४ आगमादेशयोरागमो विधिर्बलवान् ॥
९५ संध्यक्षराणामिदुतौ ह्रस्वादेशे ॥
९६ यत्र द्वौ प्रसङ्गावन्यार्थावेकस्मिन् युगपत् प्राप्नुतः स तुल्यबलविरोधो विप्रतिषेधः ॥
९७ विप्रतिषेधे परं कार्यम् ॥
९८ प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गम् ॥
९९ प्रकृत्याश्रितमन्तरङ्गम् ॥
१०० प्रत्ययाश्रितं बहिरङ्गम् ॥
१०१ उपपदासिद्धेः कारकसिद्धिर्बलीयसी ॥
१०२ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥

१०३ सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलवान् ॥

१०४ अन्तरङ्गबहिरङ्गयोरन्तरङ्गविधिर्बलवान् ॥

१०५ अन्तरङ्गाच्चानवकाशं बलीयः ॥

१०६ वार्णो विधिरन्तरङ्गम् ॥

१०७ वार्णात् प्राकृतं बलीयः ॥

१०८ विधिनियमसंभवे विधिरेव ज्यायान् ॥

१०९ एकाश्रितमन्तरङ्गम् ॥

११० बह्वाश्रितं बहिरङ्गम् ॥

१११ सामान्यविधिरुत्सर्गो विशेषविधिरपवादः ॥

११२ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययो न तु गौणे ॥

११३ स्थितानामन्वाख्यानं हि व्याकरणम् ॥

११४ यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्य ॥

११५ यस्य स्थाने य आदेशास्ते तद्ग्रहणेन गृह्यन्ते ॥

११६ श्रुतानुमितयोः श्रुतसंबन्धो बलवान् ॥

११७ नित्यादन्तरङ्गं बलीयः

११८ विधिप्रतिषेधयोः प्रतिषेधविधिर्बलवान् ॥

॥ इति कालापपरिभाषापाठः ॥

An independent collection of Kātantra Paribhāṣās, in manuscript form, under the name Paribhāṣāsūtrasaṁdoha gives the Paribhāṣās (in collections 5, 7 and 8) in a much similar way. The order of the Paribhāṣās is the same as in collection 7. The additions, omissions and alterations can be noticed from what is given below :—

ओं पार्श्वाय नमः ॥ एकदेशविकृतमनन्यवत् ॥ १ ॥ नास्वशब्दोक्तत्वात् ॥२॥ येन विधिस्तदन्तस्य ॥ ३ ॥ अर्थवद्ग्रहणे नानर्थकस्य ॥४॥ वर्णान्तस्य विधिः ॥५॥ अनेकवर्णः सर्वस्य ॥६॥ निर्दिश्यमानानामादेशिनामादेशाः ॥७॥ स्थानिवदादेशोऽवर्णविधौ ॥८॥ ....आद्यन्तवदेकस्मिन् ॥ सप्तम्या निर्दिष्टे [पूर्वस्य ॥२२॥ पञ्चम्यां निर्दिष्टे परस्य ॥२३॥ षष्ठ्या निर्दिष्टे] स्वस्य ॥२४॥ ...भूतपूर्वकस्तद्वदुपचारः ॥५०॥...तद्भेदे विधिभेदः ॥५७॥ °अपवादो विधिर्बलवान् ॥६३॥ व्याख्यानतो ... दलक्षणम् ॥६४॥ विप्रतिषेधे परं कार्यम् ॥६५॥ पूर्वोक्तपरोक्तयोः परोक्तो विधिर्बलवान् ॥ ६६ ॥ नित्यानित्ययोर्नित्यविधिर्बलवान् ॥ ६७ ॥ अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान् ॥६८॥ सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलवान् ॥६९॥ कृताकृतप्रसङ्गि यल्लक्षणं तन्नित्यम् ॥ ७० ॥ लक्षणसंनिपाते तदनुपरोप्य कार्यम् ॥ ७१ ॥

इति कातन्त्रे परिभाषासूत्रसंदोहः समाप्तः ॥ श्रीरस्तु ॥

अभयंकरोपाह्वकाशिनाथकृता

जैनेन्द्रपरिभाषावृत्तिः*

१

प्रणम्य परमात्मानं गुरून् मान्यांश्च भक्तितः ।
जैनेन्द्रपरिभाषाणां कुर्वे पाठं सवृत्तिकम् ॥

सिद्धे सत्यारम्भो नियमार्थः ॥ १ ॥

ग्रन्थारम्भे सिद्धशब्दो मङ्गलार्थः प्रयुज्यते ।
शब्दासिद्धिर्व्याकरणात् पञ्चपाठात्मकं तु तत् ॥ १ ॥
आदौ पाठस्तु सूत्राणां वार्तिकानामनन्तरम् ।
गणपाठो धातुपाठः परिभाषाः स्युरन्ततः ॥ २ ॥

तत्र पूज्यपाददेवनन्दिभिर्विरचितः सूत्रपाठो वार्तिकैर्गणपाठेन धातुपाठेन च महावृत्तौ समन्वित उपलभ्यते । अभयनन्दिप्रभृतिभिर्विरचिताः सूत्रवृत्तयोऽप्युपलभ्यन्ते । अभयनन्दिप्रणीतायां महावृत्तौ सूत्रार्थनिर्णयोपयुक्तासु परिदृश्यमानास्वपि स्थले स्थले कासुचित्

---

* The present short gloss on the Paribhāṣās in the Jainendra System of Grammar is written with a view to supplying the long felt need of a Paribhāṣā work in the system, in which neither a list of Paribhāṣās nor any independent work on them is extant as in the Pāṇini, Cāndra, Kātantra and Śākaṭāyana Systems. The gloss is based on the Mahāvṛtti, a commentary of outstanding merit and scholarship written by Ācārya Abhayanandin in the ninth century on the original grammar work composed by Pūjyapāda Devanandin in the sixth century A.D., which is known by the name Jainendra Vyākaraṇa. This grammar closely follows Pāṇini's grammar not only in respect of the order of the Sūtras but in the wording also. It entirely omits rules regarding Vedic words, and accents and supplies its own short terms for Pāṇini's technical terms. The Mahāvṛtti of Abhayanandin bears a very close similarity to the Kāśikā, the scholarly commentary by Jayāditya and Vāmana on the rules of Pāṇini from which many times lines of explanation and illustrations are taken. A list of some of the important technical terms in the Jainendra system is given at the end with corresponding technical terms of Pāṇini to facilitate the understanding of the text of the Paribhāṣās.

परिभाषासु न कुत्रापि परिभाषासूत्रपाठ उपलभ्यते न वा कापि परिभाषावृत्तिः। अतस्तद्विरचनाय तामेव महावृत्तिमवलम्ब्य यथामति प्रयत्यते। इह हि लक्ष्यलक्षणस्वरूपे व्याकरणशास्त्रे विधिरूपैर्लक्षणैः शब्दसिद्धिः क्रियते। प्रमाणभूता आचार्या महता यत्नेन सूत्राणि प्रणिन्युः। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनः सूत्रेण। अतः कस्मिन्नपि विधिसूत्रे आपाततः शब्दवैयर्थ्यं समुपलभ्येत चेत्तत्र सूत्रकर्तुस्तच्छब्दप्रयोगे केनाप्यभिप्रायेण भवितव्यम्। स चाभिप्रायो बहुषु स्थलेषु इतरत्राप्रवृत्तिस्वरूपनियमनरूपो भवति। तथा च परिभाषा ज्ञापिता भवति–'सिद्धे सत्यारम्भो नियमार्थः' इति। नियमश्च प्रतिषेधफलः। 'अधु मृत्' (१।१।५) इत्यनेनैव कृदन्ततद्धितान्तसमासानां प्रातिपदिकसंज्ञासिद्धौ सत्यां 'कृत्तद्धितसमासाः' (१।१।६) इति सूत्रं नियमार्थं भवति—प्रत्ययान्तानामर्थवतां यदि मृत्संज्ञा (प्रातिपदिकसंज्ञा) भवेत्तर्हि कृत्तद्धितान्तानां तथा समासानामेव सा भवेन्न तिङ्प्रत्ययान्तानां सुप्प्रत्ययान्तानां वा। एवमेव 'ङित्' (१।१।५०) 'आतः' (२।४।९०) 'वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः' (५।४।८८) 'स्यादेशेन चस्य' (५।४।४४) 'नखं सुप्विधि०' (५।३।२८) 'रात्सः' (५।३।४२) 'समुदः' (५।३।७१) इत्यादीनि सूत्राणि नियमार्थं द्रष्टव्यानि ॥ १ ॥

कार्यकालं संज्ञापरिभाषम् ॥ २ ॥

कार्यस्य विधेः विधिसूत्रस्य वा कालो नाम पाठः। प्रदेश इति यावत्। संज्ञापरिभाषाविषये कार्यस्य प्रदेश एव तासां प्रदेशो भवति तमेव चावलम्ब्य तासामितरैर्विधिसूत्रैः सह पौर्वापर्यं व्याख्यायते। तथा च 'रात्सः' (५।३।४२) 'स्फान्तस्य खम्' (५।३।४१) 'झलो झलि' (५।३।४४) इत्यादयो ये पञ्चमीषष्ठीसप्तमीनिर्देशास्तेषाम् 'ईश्केत्यव्यवाये पूर्वपरयोः' (१।१।६०) 'ता स्थाने' (१।१।४६) इति च नियमे कर्तव्ये नासिद्धत्वम् ॥ २ ॥

अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ॥ ३ ॥

सूत्रेषु अर्थयुक्तस्य शब्दस्वरूपस्य लाभे अनर्थकं शब्दस्वरूपं न ग्राह्यम्। तथा च 'आनि' (५।४।१०३) इति सूत्रे अर्थवतो लोडुत्तमस्य आनिप्रत्ययस्य लाभे अनर्थकस्य 'प्रवपानि मांसानि' इत्यादिषु परिदृश्यमानस्य 'आनि' इति शब्दस्य न ग्रहणम्। अत एव 'अहं प्रापयाणि', 'अहं प्रवपाणि' इत्यादौ णत्वं भवति। 'प्रवपानि मांसानि' इत्यत्र न भवति ॥ ३ ॥

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन ॥ ४ ॥

अर्थवद्ग्रहणपरिभाषाया अनित्यत्वेनैषा सिध्यति। सूत्रकारैः अन्, इन्, अस्, मन् इति प्रत्यया विहिताः। ते हि अर्थवन्तः। केषुचित्सूत्रेषु सूत्रकारैः अन् अस् इत्यादिशब्दस्वरूपमुच्चार्य कार्याणि विहितानि यानि अन्नन्तेन्नन्तशब्दस्वरूपमेव केवलमपेक्षन्ते। अर्थवद्ग्रहणपरिभाषया तु अर्थवतामेव अनिनस्मनां प्रत्ययानां ग्रहणं स्यात्। अतः अर्थ-

वदुग्रहणपरिभाषाया अनित्यत्वं वाच्यम् । तेन सीमे सीमानौ सुप्रथिमे सुप्रथिमानौ इत्यादिसिद्धिः । अत्र 'मनो डाप् च' (३।१।९) इत्यनेन डाप् भवति ॥ ४ ॥

गौणमुख्ययोर्मुख्ये च ॥ ५ ॥

लक्षणया गौणार्थेन प्रवृत्तः शब्दो गौणस्तद्विरुद्धो मुख्यार्थे प्रवर्तमानो मुख्यः । उभयोर्मध्ये मुख्यार्थे प्रवृत्तस्यैव शब्दस्य ग्रहणं शास्त्रे भवति । तथा च देवतारूपमुख्यार्थे प्रवर्तमाने अग्नीषोमौ इति शब्दे 'सोमवरुणेऽग्नेरीः' (४।२।१४०) इति सूत्रेणेत्वं 'स्तुत्स्तोमौ चाग्नेः' (५।४।६५) इति सूत्रेण षत्वं च भवतः, न तु 'अग्निसोमौ माणवकौ' इत्यत्र । गौणार्थत्वादग्निसोमशब्दयोः ॥ ५ ॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ॥ ६ ॥

लक्षणशब्दो लाक्षणिकार्थे वर्तते । लाक्षणिकशब्देन अनैसर्गिकत्वमुच्यते । प्रतिपदोक्तशब्देन च सूत्रोच्चारितत्वं सूत्रसाधितत्वं नैसर्गिकत्वं वा । संधिकार्येणोत्पन्नतया संनिधिवर्तमानतया वा यदापाततया शब्दस्वरूपं दृश्यते तदपेक्षया प्रतिपदोक्तं नैसर्गिकं शब्दस्वरूपं ग्राह्यमिति परिभाषार्थः । गौणमुख्यपरिभाषायामर्थवतः शब्दस्य विचारः, इह त्वनर्थकस्यापि शब्दस्वरूपस्येति भेदः । तथा च माषवापाणीत्यत्र नुमः प्रातिपदिकान्तत्वस्य लाक्षणिकत्वान्न प्रातिपदिकतया णत्वविकल्पः किं तु नुमो नकारतया । इयमनित्या । तेन ज्ञापयति ग्लापयति अध्यापयतीत्यादौ पुगागमः सिद्धो भवति । वरीवृश्च्यते बरीभृज्ज्यते इत्यत्र च रीगागमो भवति ॥ ६ ॥

गामादाग्रहणेष्वविशेषः ॥ ७ ॥

प्रतिपदोक्तपरिभाषाया अनित्यत्वेनैषा साध्यते । गामादाशब्दाः प्रतिपदोक्ता लाक्षणिकाश्च गृह्यन्ते । तथा च गा इत्यविशिष्टग्रहणेन यथा गीयते इत्यस्य सिद्धिस्तथा जेगीयते अध्यगीष्ट इत्याद्यपि सिद्धं भवति । तथा मितः मितवानित्यत्र मामाङ्मेङां ग्रहणम् ॥ ७ ॥

मृद्ग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ ८ ॥

मृदो नाम प्रातिपदिकस्य प्रतिपादनं सूत्रे यत्र कार्यार्थितया वर्तते तत्र तत् प्रातिपदिकं लिङ्गप्रत्ययविशिष्टमपि गृह्यते । तेन यथा भवच्छब्दाद् 'भवतष्ठण्छसौ' (३।२।९१) इत्यनेन सूत्रेण ठण् छस् इत्येतौ प्रत्ययौ भवतः ततश्च भावत्कम् भवदीयम् इति च रूपे सिध्यतस्तथैव भवतीशब्दादपि ते एव प्रत्यये भवतः पुंवद्भावेन भावत्कम् भवदीयम् इत्येव च रूपे भवतः । यस्त्यदादिषु न पठ्यते शत्रन्तो भवच्छब्दः तस्मादणि भावतमिति रूपं भवति । तथैव युवतिर्जरती युवजरती, युवतेर्भावो यौवनमित्यादिसिद्धिः । अनित्या चेयम् । तेन गोमतीति उगिल्लक्षणो नुम् न भवति, युवतीः पश्येति संप्रसारणं न भवति, सख्यौ सख्यः इत्यत्र 'सख्युरङौ' (५।१।६९) इत्यनेन च णिद्वद्भावो न भवति ॥ ८ ॥

परिमाणग्रहणे न कालपरिमाणं गृह्यते ॥ ९ ॥

'संख्यायाः संख्यासंवत्सरस्य' (५।२।२०) इति सूत्रे संवत्सरग्रहणमस्या ज्ञापकम्। तेन द्वे समे अधीष्टो द्वैसमिकः इत्यत्र उत्तरपदस्य वृद्धिर्न भवति । तथा द्विवर्षा माणविका इत्यत्र 'परिमाणाद् हृदुपि' (३।१।२६) इत्यनेन ङीप् न भवति ॥ ९ ॥

उभयगतिरिह भवति ॥ १० ॥

इह शास्त्रे संज्ञानां कृत्रिमा तथा अकृत्रिमा इति उभयथापि गतिर्दृश्यते। तेन एकविभक्तित्वादप्रधानत्वाच्च शास्त्रीयं लौकिकं च उभयविधमुपपदत्वं गृह्यते । 'स्त्रीगोर्नीचः' (१।१।८) इत्यत्र स्वरितचिह्नितस्त्रीशब्दस्य निर्देशादियं ज्ञाप्यते। तथा च निष्कौशाम्बिः निर्मथुरः इत्यत्र ह्रस्वादेशो भवति ॥ १० ॥

एकदेशविकृतमनन्यवत् ॥ ११ ॥

शब्दस्वरूपस्य एकदेशे विकृतेपि तच्छब्दस्वरूपमविकृतवद् गृह्यते । लौकिकन्यायसिद्धेयम्। छिन्नपुच्छे शुनि श्वत्वव्यवहारो भवति । तेन अतिजरांसि तपांसि, अतिजरसं कुलमित्यत्र 'जराया वाऽसङ्' (५।१।१६०) इत्यनेन असङ् सिध्यति। त्रये त्रयः इत्यत्र जसि विकल्पेन सर्वनामसंज्ञा सिद्धा । अमावास्यकः इत्यत्र च कः सिद्धः। अयमनन्यवद्भावः षष्ठीनिर्दिष्टस्यैव शब्दस्य भवति। तेन राजकीयम् इत्यत्र 'अनोऽस्वम' (४।४।१२०) इत्यनेन अनो लोपो न भवति । यतो नेह अनः षष्ठीनिर्देशः किं तर्हि राजशब्दस्य ॥ ११ ॥

प्रकृतिवदनुकरणं भवति ॥ १२ ॥

अनुकरणशब्दानां प्रकृतिवत्कार्याणि भवन्ति । यानि प्रकृतेः कार्याणि तानि भवन्तीत्यर्थः । 'परिव्यवक्रियः' (१।२।१२) इत्यनेन सूचितैषा। तत्र 'क्री' इति धातोरनुकरणशब्दः क्री इति प्रातिपदिकम्। तस्य प्रकृतिरूपधातुवद्भावेन इयङ् भवति 'क्रियः' इति च रूपं भवति । प्रकृतिवदिति वत्करणात् केषुचित्स्थलेषु इयं न प्रवर्तते। यथा 'विपराजेः' (१।२।१३) इत्यत्र ॥ १२ ॥

अनुकरणशब्दा अनुकार्यशब्दैरर्थवन्तः ॥ १३ ॥

प्रकृतिवदनुकरणमित्यस्या अयं प्रपञ्चः। अनुकरणशब्दानां केवलं शब्दस्वरूपधारित्वादनर्थकतया कथं प्रातिपदिकत्वं कथं च सुबाद्युत्पत्तिरिति शङ्काया निरासार्थमेषा परिभाषा । अनुकार्यशब्दस्य नाम प्रकृतेर्योऽर्थः सोनुकरणस्य भवति । तेन अस्यवामशब्दोऽस्मिन्नस्तीत्यर्थे अस्यवामीयामिति शब्दः प्रयुज्यते । कयाशुभीयशब्दोपि तथैव। अस्यवामकयाशुभशब्दयोरर्थवत्त्वेन 'सूक्तसाम्नोश्छः' (४।१।६३) इत्यनेन छः सिद्धः ॥ १३ ॥

व्यपदेशिवदेकास्मिन् ॥ १४ ॥

व्यपदेशो मुख्यव्यवहारः । सोस्यास्तीति व्यपदेशी । तद्वत्केवलस्य कार्याणि भवन्ति । अकारान्तस्य अङ्गस्य कार्याणि 'अ' इति शब्दस्वरूपस्य भवन्ति । अयं व्यपदेशिवद्भावो यत्र सूत्रेषु प्रातिपदिकग्रहणं तत्र न भवति । 'पूर्वात्' (४।१।२०) इत्यनेन विहित इन् तदन्तविधिना सपूर्वात्पूर्वशब्दाद्भविष्यति । व्यपदेशिवद्भावेन केवलाच्च भविष्यति । एवं सत्यपि 'सपूर्वात्' (४।१।२१) इति योगान्तरं ज्ञापयति 'मृद्ग्रहणे (प्रातिपदिकग्रहणे) न तदन्तविधिः'। तथा च 'व्यपदेशिवद्भावो न मृदा'। व्यपदेशिवद्भावो न प्रातिपदिकेनेत्यर्थः ॥ १४ ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ १५ ॥

प्रत्ययागमादिरूपेण प्रकृतिमध्ये प्रविष्टस्य प्रकृतिग्रहणेन ग्रहणं क्रियते । तन्मध्यपतितन्यायः इति नाम्ना प्रसिद्धोयं न्यायः । 'हल्येतत्तदोरनञ्सेऽकोः सुखम्' (४।३।१०९) इति सूत्रे अकोरित्यस्य ग्रहणमस्या ज्ञापकम् । एतेन तन्मध्यपतितन्यायेन पचतकि पठतकि इत्यादीनां तिङन्तत्वम् ॥ १५ ॥

सुबसुपोरेकादेशः सुब्वद्भवति ॥ १६ ॥

विभक्तिप्रत्ययावयवस्य प्रातिपदिकावयवस्य च स्थाने यदा एक आदेशो भवति तदा द्वयोर्विद्यमानयोर्यत्कार्यं तत् कृतेप्येकादेशे यथा स्यात् । यत्पूर्वमवयवमाश्रित्य कार्यं क्रियते यच्च परं तत्कृतेप्येकादेशे भवति । परावयवे प्रयोजनम् । देवावित्यत्रौकारः सुप् असुश्कारः । सुब्सुपोरेकादेशः सुब्वद्भवति यथा शक्येत कर्तुम् 'सुप्तिङन्तं पदम्' (१।२।१०३) इति । अन्यथा साधुः पूज्य इत्यादावेव पदसंज्ञा स्यात् ॥ १६ ॥

एवमेव

मृदमृदोरेकादेशो मृद्वद्भवति ॥ १७ ॥

तेन 'वामोरु' इति प्रातिपदिकस्य 'ऊ' इत्यप्रातिपदिकस्य च एकादेशे वामोरू इत्यस्य प्रातिपदिकसंज्ञा भवति । अनन्तरं सुबुत्पत्त्या वामोरूरिति रूपं सिद्धं भवति । अन्यथा वृक्षः प्लक्षः इत्यादावेव प्रातिपदिकसंज्ञा स्यात् ॥ १७ ॥

त्यात्यसंभवे त्यस्य ग्रहणम् ॥ १८ ॥

त्यो नाम प्रत्ययः । प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम् । तेन 'ऋचः शे' (४।३।१६६) इति सूत्रे शस्प्रत्ययस्यैव ग्रहणात् 'पच्छो गायत्रीं शंसति' इत्यत्र पादशब्दस्य पदादेशः न तु 'पादशंसी गायत्र्याः' इत्यत्र ॥ १८ ॥

धुग्रहणे ध्वादेः समुदायस्य ग्रहणम् ॥ १९ ॥

धातोर्ग्रहणे धात्वादेः समुदायस्य ग्रहणं भवति । 'विष्वग्देवयोश्च टेरद्र्यञ्चौ क्वौ' (४।३।१९८) इति सूत्रे क्विग्रहणमस्या ज्ञापकम् । क्वावेव अञ्चतिः केवलो धुर्भवति ।

क्विपदं व्यर्थं भवति । तज्ज्ञापयति धातोर्ग्रहणे तदादेः कार्यविज्ञानम् । तेन 'कृकमि०' (५।४।३४) इत्यादिसूत्रेण अयस्कृतम्, अयस्कारः इत्यादौ सत्वं सिद्धम् । अन्यथा अयस्कृत् इत्यादावेव तत् स्यात् ॥ १९ ॥

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ २० ॥

'श्रा हौ' (४।४।३५) इति सूत्रे हौ परतः शानिर्देशोऽस्या ज्ञापकः । तेन धात्तः धात्यः इत्यादिसिद्धिः । 'ग्रहोऽलिटि दीः' (५।१।८५) इति दीर्घस्तु जरीगृहिता इत्यत्र न भवति । तत्र सूत्रे ग्रहेर्यो विहित इट् तस्य दीर्घो भवति इति विहितविशेषणात् ॥ 'एकाचोऽनुदात्तात्' (५।१।११५) इति सूत्रे सिंहावलोकनेनैकाज्ग्रहणं संबध्यते । तेनैवा साध्यते । ग्रहेरेकाचः कार्यं यङ्लुगन्तस्य न भवतीति ॥ २० ॥

वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते ॥ २१ ॥

'अधिकृत्य कृते ग्रन्थे' (३।३।६१) इति सूत्रे कृते इत्यत्र ऋकारात्परस्य तकारस्य नत्वाभावोऽस्या ज्ञापकः । अन्यथा ऋकारैकदेशस्य रेफस्य स्वतन्त्रवर्णग्रहणे सति तकारस्य 'द्रात्तस्य तो नः पूर्वस्य दः' (५।३।५९) इति सूत्रेण दकारः स्यात् । अस्याः परिभाषाया ज्ञापनेन हृतं कृतमित्यादि सिद्धम् । कृतस्यापत्यं कार्तिरित्यत्र बहिरङ्गरेफस्यासिद्धत्वान्न नत्वम् ॥ २१ ॥

एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ॥ २२ ॥

टाप् डाप् इत्यत्र द्वयोरपि द्व्यनुबन्धकरणत्वात् तथा च क्यच्क्यङ्क्यषां त्रयाणामपि द्व्यनुबन्धकरणादेवा ज्ञाप्यते । तत्र यदि आप् डाप् तथा यच्, क्यङ्, क्यष् इत्युक्तं स्यात्तर्हि आप् इति सामान्यग्रहणेन टाब्डापोस्तथा 'नः क्ये' (१।२।१०४) इति सूत्रे क्य इति सामान्यग्रहणेन क्यच्क्यङ्क्यषां सामान्यग्रहणं न स्यात् ॥ २२ ॥

निरनुबन्धकस्य ग्रहणे न सानुबन्धकस्य ॥ २३ ॥

अनुबन्धरहितस्थले चारितार्थ्यात्सानुबन्धस्थलग्रहणस्य मानाभावोऽस्या बीजम् । तन अक्षद्युभ्यामित्यत्र 'दिवेर्डिव्' इत्यनेन सिद्धस्य प्रातिपदिकस्य दिव्शब्दस्य 'दिव उत्' (४।३।१०८) इत्यनेन उत्वं, न दिवु इत्युकारानुबन्धसहितस्य धातोः क्विबन्तस्य । 'ईघे' (४।४।६४) इति सूत्रेण विहित ईकारादेशो देयम् धेयम् इत्यत्र भवति, न तु ग्लायते म्लायते इत्यत्र ॥ २३ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ २४ ॥

सूत्रे स्थानित्वेन प्रतिपदोक्ततया यन्निर्दिष्टं तस्यैव शब्दस्वरूपस्य शब्दभागस्य वा आदेशो भवति न तदधिकस्य । निर्देशसामर्थ्यात् । एतेन कुर्युरित्यत्र 'झेर्जुस्' (२।४।८८) इति जुसादेशः झेरित्यस्य भवति न यासुटः । तथैव नियौ नियः लुवौ लुवः इत्यत्र निर्दिश्यमानयोरिवर्णोवर्णयोरियुवौ । पादः पत् इति पाच्छब्दस्य पदादेशो न पादन्तस्य । वत्स्यति इत्यत्र सकारान्तस्याङ्गस्य तकार आदेशः सकारस्य भवति ॥२४॥

तदागमास्तद्ग्रहणेन गृह्यन्ते ॥ २५ ॥

आगमः प्रकृतेरवयवाधिक्यरूपेण वर्तमानः प्रकृतेर्गुणीभूतो भवन् प्रकृतिग्रहणेन गृह्यते इति न्यायोऽस्या बीजम् । अत एव ' तद्गुणीभूताः ' इत्यधिकं पठ्यते अस्यां परिभाषायां वैयाकरणैः । चिनुयुः सुनुयुः इत्यत्र या इत्यागमेन सहितं युस् इति शब्दरूपं उस्ग्रहणेन गृह्यते । तथा च उसीति पररूपे कृते अनया परिभाषया श्नोः गुणः प्राप्नोति । परंतु या-सुडाश्रयं ङित्त्वं गुणं बाधते । चिनुयुः सुनुयुः इत्यादीनि च रूपाणि सिध्यन्ति ॥ २५ ॥

तदादेशास्तद्ग्रहणेन गृह्यन्ते ॥ २६ ॥

स्थानिवद्भावस्यायं प्रपञ्चः । यथा आगमाः प्रकृतिगुणीभूताः प्रकृतिग्रहणेन गृह्यन्ते तथा आदेशाः प्रकृतेः स्थाने वर्तमानाः प्रकृतिग्रहणेन गृह्यन्ते । तेन आदिथ इत्यत्र यथा इड्विकल्पो न भवति तथैव जघसिथ इत्यत्रापि इड्विकल्पो न भवति ॥ २६ ॥

अनन्त्यविकारे अन्त्यसदेशस्य ॥ २७ ॥

यदा अनन्त्यस्य कस्यापि स्वरस्य वर्णस्य वा विकारो विधीयते तदा अनन्त्ययोर्द्वयोरनेकेषां वा स विकारो भवितुं शक्यः । तथापि अन्त्यसदेशस्यैव स विकारो भवति न अन्त्याद् दूरे स्थितस्य । तेन अकुरुतामित्यत्र अटः उकारादेशो न भवति । यूनः पश्येत्यत्र यकारस्य संप्रसारणं न भवति, यवीयानित्यत्र च यकारस्य न लोपो भवति । इयमनित्या । तत एकेनापि योगेन यावन्तो यणस्तेषां सर्वेषां संप्रसारणप्राप्तिर्भवति, ' न जौ जिः ' (४।३।३१) इति संप्रसारणे परतः पूर्वस्य यणः संप्रसारणं न भवति इति निषेधश्च सिद्धो भवति ॥ २७ ॥

अन्त्याभावे अन्त्यसदेशस्य कार्यम् ॥ २८ ॥

यदा अन्त्यस्य विधीयमानं कार्यमन्त्यस्य न शक्यते कर्तुं तदा तदन्त्यसदेशस्य भवति न तु दूरे स्थितस्य । तेन अशाम्यत् इत्यत्र ' श्रमो मे ' (५।२।७४) इत्यनेन विधीयमानं दीर्घत्वं स्वरधर्मतया मकारे व्यञ्जने अशक्यं रेफोत्तरवर्तिनः अकारस्य भवति न तु अडागमस्य ॥ २८ ॥

निमित्तिकार्यं न निमित्तस्य ॥ २९ ॥

'त्यः' (प्रत्ययः) इत्यधिकारसूत्रम् (२।१।१) आ कपो निर्दिष्टानां संज्ञाकरणार्थम् । तत्र उत्तरं प्रवृत्तेषु प्रकृत्युपपदविशेषणविकारागमयुतेषु प्रत्ययविधिसूत्रेषु आपाततो न ज्ञायते कस्य शब्दस्येयं संज्ञेति । तत्र प्रकृतेरुपपदस्य विशेषणानां च प्रत्ययत्वेन ग्रहणाभावः तेषां निमित्तभूतत्वेन ज्ञायते । निमित्तस्य प्रकृतेरुपपदस्य वा न निमित्तकार्यं नाम प्रत्ययत्वम् । विकारागमयोस्तु ' प्रत्ययः परो भवति ' इति विधिना निरासः । तथा च तत्र तत्र सूत्रेषु प्रकृत्युपपदविशेषणविकारागमवर्जं यद्वर्तते तत्प्रत्ययसंज्ञं भवतीति ' त्यः ' (२।१।१) इत्याधिकारसूत्रस्यार्थः संपद्यते ॥ २९ ॥

उभयत आश्रयणे न तद्वद्भावः ॥ ३० ॥

'आद्यन्तवदेकस्मिन्' (४।३।७३) इति सूत्रेण विहितस्य तद्वद्भावस्य नाम आदिभावस्य अन्तभावस्य चापवादभूतेयं परिभाषा । एकस्मिन्नेव लक्ष्ये आदिमत्त्वमन्तवत्त्वं च नाश्रीयते इत्यर्थः । 'शीम्योरात' (५।१।५८) इति सूत्रेण अवर्णान्तादङ्गात्परस्य शतृप्रत्ययस्य विकल्पेन नुम्विधौ तुदती तुदन्ती याती यान्ती इत्यत्र तुद या इत्याद्यङ्गं गृह्यते तर्हि अती इति प्रत्ययत्वेन न ग्रहणम् । यदि अती इति प्रत्ययस्तर्हि तुद या इत्यादीन्यकारान्तानि नाङ्गानि भवन्ति । भूतपूर्वगत्या तुद इत्यस्याङ्गत्वं, अती इत्यस्य प्रत्ययत्वं च गृहीत्वा नुम्विकल्पः साध्यते । तथा च प्रोद्यते इत्यत्रैकादेशे कृते व्यपवर्गाभावान्न ह्रस्वो भवति । अन्तादिवद्भावेन व्यपवर्गो इति चेदुभयत आश्रये नान्तादिवद्भावः इति उपसर्गात्परत्वं नास्ति ॥ ३० ॥

धोः स्वरूपग्रहणे तत्त्यविज्ञानम् ॥ ३१ ॥

धातोः स्वरूपग्रहणे सति तत्प्रत्यये कार्यविज्ञानं भवति । धातुं स्वरूपत उच्चार्य विहितं कार्यं धातोर्विहिते प्रत्यये परे एव भवति न प्रातिपदिकाद्विहिते । तेन ' वार्त्रघ्नम् ' इत्यत्र सत्यपि णि ति अण्प्रत्यये अण्प्रत्ययस्य ' वृत्रहन् ' इति प्रातिपदिकाद्विहितत्वात् ' हनस्तोऽञ्चिण्णलोः ' (५।२।३६) इत्यनेन नकारस्य तकारादेशो न भवति ॥ ३१ ॥

येन नाव्यवधानं तेन व्यवहितेपि ॥ ३२ ॥

यस्मिन्विधौ कर्तव्ये वर्णस्य अक्षरस्य वा व्यवधानमवश्यंभावि तत्र तस्मिन्व्यवधाने सति कार्यं भवति । तेन ' अतोऽनादेर्हे: ' (५।१।८३) इत्यनेन सूत्रेण हलादेर्हलन्ताद् ह्रस्वाकारवतो धातोः सिचि परे विहिता वृद्धिः सिच्प्रत्यये परे अकारस्य भवति सत्यपि व्यञ्जनेन व्यवधानं । एतेन अराणात् इत्यत्र सत्यपि णकारेण व्यवधाने भवति वृद्धिः । हला व्यवधानेपि भवन्ती वृद्धिर्हल्समुदायेन व्यवधाने न भवति । अतक्षीत् ॥३२॥

भाविनि भूतवदुपचारः ॥ ३३ ॥

कचिल्लक्ष्ये निमित्तं विना विधेरप्राप्तिः, विधौ कृते एवेष्टनिमित्तस्य सद्भावः । एतादृशेषु स्थलेषु भूतवदुपचारो भवति । त्यद्, तद् इत्यादिसर्वनाम्नां सकाशात्स्या सा इत्यादिरूपसिद्धौ विभक्तिप्रत्ययं विना ' त्यदादेरः ' (५।१।१६१) इत्यत्वं न भवति अत्वं च विना न टाप्सिद्धिरिति अन्योन्याश्रयः । अतस्त्यदादिषु स्त्रीत्वविवक्षायां ' भाविनि भूतवदुपचारात ' इति विभक्तिमपेक्ष्यात्वे कृते टाप् । तेन स्या सेत्यादि सिद्धम ॥ ३३ ॥

अर्थवशाद्विभक्तिपरिणामः ॥ ३४ ॥

पूर्वसूत्रादनुवृत्तस्य पदस्योत्तरसूत्रे विभक्तिविपरिणामेन विना यदि अन्वयो न भवेत्तर्हि अर्थवशाद्विभक्तिपरिणामः कर्तव्यः । ' हलि खम् ' (५।१।१७१) इति सूत्रे ' अनाप्यकः ' (५।१।१७०) इति पूर्वसूत्रादनः इति प्रथमान्तं पदमनुवर्तते । तस्य

विभक्तिविपरिणामेन षष्ठीं प्रकल्प्य अलोन्त्यपरिभाषया उपस्थितस्य अलः इति षष्ठयन्तेन पदेन सहान्वयं कृत्वा ‘ इदमः स्थाने जातस्य अनः अन्त्यस्याल्लो लोपो भवति हलादौ विभक्तौ परतः ’ इति ‘ हलि खम् ’ इत्यस्य वाक्यार्थः कर्तव्यः ॥ ३४ ॥

नानुबन्धकृतं हलन्तत्वम् ॥ ३५ ॥

‘ माङो व्यतिहारे ’ (२।४।५) इत्यत्र मेङः कृतात्वस्य निर्देशः अस्या ज्ञापकः । तेन ‘ एचोऽशित्याः ’ (४।३।३८) इति सूत्रेण आत्वं सिध्यति ॥ ३५ ॥

एकानुबन्धकृतमनित्यम् ॥ ३६ ॥

कचित्स्थलेषु विधिसूत्रैर्विधीयमानं कार्यं प्रसिद्धकविकृतिषु अकृततयोपलभ्यते । तत्र विधिसूत्रस्यानित्यतयैव समाधानं कर्तुं शक्यते । सा चानित्यता ज्ञापकैः केषामपि विधिसूत्राणां प्रदर्श्यते । तत्रानुबन्धयुक्तानिमित्तकं कार्यमनित्यम् । तेन दंष्ट्रा इत्यत्र षित्वादङ् भवति टित्वान्ङीप् तु न भवति । अनुबन्धकृतं यङ्लुकि न दृश्यते ॥ ३६ ॥

अनित्यमागमशासनम् ॥ ३७ ॥

कचित्स्थलेषु आगमानित्यत्वकल्पनयेष्टरूपासिद्धिः । ‘ समः समि ’ (४।३।१९९) इति सूत्रे इक् इत्यागमेन सिद्धौ सत्यां समिरिति वचनं क्रियते तज्ज्ञापयति—अनित्यमागमशासनम् । तेन वान्तः, एकतरम् इत्यादि सिद्धम् ॥ ३७ ॥

नानर्थकेन्तेऽलोन्त्यविधिः ॥ ३८ ॥

‘ अन्तेऽलः ’ (१।१।४१) इति परिभाषासूत्रस्यापवादभूतेयं परिभाषा । षष्ठी-निर्दिष्टस्य कार्यमन्तस्य भवति परंतु यच्छष्ठीनिर्दिष्टं शब्दरूपं तद् अर्थरहितं चेदन्तेऽलः इति सूत्रं न प्रवर्तते । तेन पटत् इति इत्यत्र ‘ डाजर्हस्येतावतः ’ (४।३।८५) इति सूत्रेण अत् इत्यस्य पररूपत्वेन इकारो भवति पटिति इति च सिध्यति । तथैव ‘ हलि खम् ’ (५।१।१७१) इत्यत्र इदमः इद्रूपस्य लोपो भवति ॥ ३८ ॥

सांनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ३९ ॥

लोकन्यायसिद्धैषा । संनिपातो द्वयोः संबन्धः । तल्लक्षणो विधिः तस्य सांनिपातस्य विघातार्थे न निमित्तं भवति । तेन निकुचितः इत्यत्र कुन्चु इत्यस्य नकारलोपे कृते ‘ वौदुङो भावारम्भयोः शपः ’ (१।१।९४) इत्युदुङो विकल्पो न भवति ॥ ३९ ॥

शपा तिपानुबन्धेन निर्दिष्टं यद् गणेन च ।
यच्चैकाज्ग्रहणं किंचित् पञ्चैतानि न यङ्लुपि ॥ ४० ॥

जैनेन्द्रव्याकरणमहावृत्तावभयनन्दिभिर्वार्तिकरूपेण पठितैषा ‘ प्रकृतिग्रहणे यङ्वन्त-स्यापि ग्रहणम् ’ इत्यस्या अपवादभूता । शप्तिबनुबन्धगणैकाज्भिर्यत्र धातोर्ग्रहणं क्रियते तत्र धातोर्मूलस्वरूपं परिदृश्यते न तु द्वित्वागमगुणवृद्ध्यादिभिर्विकृतम् । यङ्लुपि द्विरुच्य-

मानस्य धातोरुत्तरखण्डं मूलस्वरूपमिव दृश्यते, तथा च धातोर्विहितानि कार्याणि प्रवर्तन्ते। अतः मूलस्वरूपं यत्र स्पष्टमुपलभ्यते तत्र पञ्चप्रकाराणि शबादिनिर्देशैर्विधीयमानानि कार्याणि न कर्तव्यानीति परिभाषार्थः । तेन तनोतेस्तथा वनतेस्तिपा निर्देशान्नलोपाभावे तंतान्तः वंवान्तः इति रूपे भवतः । एकाचोनुदात्तादित्यस्माद् ‘ ग्रहोऽलिटि दीः ’ (५।१।८५) इत्यत्रैकाज्ग्रहणं संबध्यते । तेन जरीग्रहिता, जरीग्रहितुम् इत्यत्र दीर्घो न भवति। ‘क्षुद्रसतेरिट्’ (५।१।१००) इति तिपा निर्देशाद् ‘वावस्तः’ इत्यत्र इडागमो न भवति। ‘ह्वाकः क्वि’ (५।२।१४७) इति अनुबन्धेन निर्देशाद् ह्विः आदेशो न भवति। गणेन निर्देशाद् ‘ रुद्भयोऽड्वाऽजक्षेः ’ (५।२।९४) इत्यनेन अडागम ईडागमश्च न भवतः ॥ ४० ॥

गुकार्ये निवृत्ते पुनर्न तन्निमित्तम् ॥ ४१ ॥

अङ्गकार्ये कृते सति तस्मिन्नेव लक्ष्ये पुनर्नाङ्गकार्यं भवति । एकस्मिन्नङ्गकार्ये कृते पुनरपि द्वितीये कृते सति इष्टरूपासिद्धौ सत्यामाचार्यैः ‘ ञ्णित्यचः ’ (५।२।३) इति ‘ ज्यादेयसः ’ (४।४।१५२) इति च स्वतन्त्रसूत्रकरणात्तथैव ‘रीङृतः’ (५।२।१३६) इत्यनेन सहैव रिङादेशमकृत्वा उत्तरसूत्रे रिङादेशकरणाज्ज्ञापितैषा भवति। अनित्या चेयम्। तेन ‘ ईवे ’ (४।४।६४) इति सूत्रेण देयम् इत्यत्र अङ्गस्य ईत्वे कृते गुणो भवति। ‘ देयमृणे ’ (३।३।२२) इति सूत्रे देयमिति निर्देशोस्या अनित्यत्वस्य ज्ञापकः ॥ ४१ ॥

संनियोगशिष्टानामन्यतरापाये उभयोरप्यभावः ॥ ४२ ॥

लोकन्यायासिद्धेयम् । शास्त्रेपि संनियोगशिष्टयोः संनियोगशिष्टानां वा कार्याणामेकतरस्य कार्यस्य अपाये नाशे सति इतरस्याप्यभावो भवति । यथा पञ्च इन्द्राण्यो देवता अस्य पञ्चेन्द्रः । अत्र ‘ हृदर्थयुसमाहारे ’ (१।३।४६) इत्यनेन द्विगुसमासे कृते ‘ रस्योपनपत्ये ’ (६।१।७४) इत्यनेन अणो लोपो भवति । तदनन्तरं ‘ हृदुप्युप् ’ (१।१।९) इत्यनेन इन्द्राणीत्यत्र स्त्रीप्रत्ययस्य यदा लोपो भवति तेन सह ‘वरुणभवशर्वरुद्रेन्द्रहिमारण्य०’ (३।१।४२) इति सूत्रेण संनियोगशिष्टत्वादानुगागमस्यापि लोपो भवति पञ्चेन्द्र इति च रूपं भवति । तथैव सहयुध्वा स्त्री इत्यत्र ‘ राज्ञि युधि कृञः ’, ‘ सह ’ (२।२।८२–८३) इति सूत्राभ्यां क्वनिप्प्रत्यये कृते हशन्ताद्विहितस्य वनोऽभावात् ‘ वनोऽहशो रश्च ’ (३।१।१७) इति सूत्रेण रेफान्तादेशो न भवति तत्संनियोगेन पूर्वेण सूत्रेणापि (३।१।६) शिष्टो ङीश्च न भवति । सहयुध्वा (स्त्री) इत्येव रूपं भवति । एवं त्रिकः इत्यत्रापि तीये निवृत्ते प्रकृत्यादेशः ‘ तृ–रूपोपि निवर्तते ‘ त्रिकः ’ इति रूपं भवति ॥ ४२ ॥

अवयवनाशिनामतः खं न भवति ॥ ४३)

यस्य धातोरवयवो लुप्तस्तस्य लुप्तावयवात्पूर्वं वर्तमानोकारः न लुप्यते। ‘नखं सुब्विधिकृत्तुकि’ (५।३।२८) इति सूत्रे कृत्तुकीति वचनमस्या ज्ञापकम् । अन्यथा तुकः प्राप्तिरत्र नास्ति । नलोपे अतो लोपे च कृते ह्रस्वान्तत्वाभावात् । एवं च सुपम इति सिद्धम्

पय गतौ इति पयतेर्मानि कृते ' वशि ' (५।१।११४) इति इटि प्रतिषिद्धे ' वलि व्योः खम् ' (४।३।५५) इति यलोपे कृते अतो लोपो न भवति ॥ ४३ ॥

णेष्यण्कृतं भवति ॥ ४४ ॥

णप्रत्यये कृतेपि अणो यत्कार्यं तद्भवति । तेन स्त्रीत्वविवक्षायां ङीब् भवति । कर्मन्निति शब्दात ' छत्रादेर्णः ' (३।३।१८०) इत्यनेन णप्रत्यये कृते ' नोऽपुंसो इति ' (४।४।१३०) इत्यनेन टिलोपे ' कार्मः ' इत्यस्य सिद्धौ सत्यां ' कार्मः शीले ' (४।४।१६३) इति सूत्रं व्यर्थं भवति । तेन एषा परिभाषा ज्ञापिता भवति । तेन चुराशीला इत्यर्थे ' चौरी ' इति रूपं भवति ॥ ४४ ॥

वर्णाश्रये नास्ति त्याश्रयम् ॥ ४५ ॥

' त्यत्ये त्याश्रयम ' (१।१।६३) इति सूत्रेण प्रत्यये लुप्तेपि तदाश्रयं कार्यं भवति । इदं 'प्रत्ययलक्षण'-रूपकार्यं वर्णाश्रयं चेत्तन्न भवतीत्यनया परिभाषया प्रतिपाद्यते । तेन अबुद, अबुद्धाः इत्यत्र ' झलो झलि ' (५।३।४४) इति सलोपे कृते ' त्यत्ये त्याश्रयम ' इत्यनेन सकाराश्रितं ' एकाचो वशो भष् झषः स्ध्वोः ' (५।३।५४) इति भष्भावरूपं कार्यं न भवति । तस्य सकाररूपवर्णाश्रितत्वात् । अत एव ' गमः क्वौ ' (४।४।४१) तथा च ' शास इन् ' (४।४।३३) इत्याभ्यां सूत्राभ्यां मलोपेदादेशौ सिद्धौ भवतः । तयोर्वर्णाश्रयत्वाभावात् । इयं परिभाषा अनित्या । अत एव क्वचिद्वर्णाश्रये त्याश्रयं भवति । तेन कण्डूयतेः कण्डूः, वोभूयतेर्वोभूः इत्यत्र धातोः क्विपि परतः अतो लोपे कृते ' वलि व्योः खम् (४।३।५५) इत्यनेन वल्रूपवर्णाश्रयो वकारस्य लोपो भवति ॥ ४५ ॥

द्वित्वे कर्तव्ये णौ कृतं स्थानिवद्भवति ॥ ४६ ॥

' ओः पुयण्ज्ये ' (५।२।१७८) इति सूत्रे ओरिति वचनमस्या ज्ञापकम् । तेन पिपावयिषति बिभावयिषति इत्यादिसिद्धिः । यदि पिपविषते यियविषति इत्यादि प्रयोजनं स्यात्तर्हि पकारयकारग्रहणमेव क्रियेत । पवर्गयण्जकारग्रहणमनर्थकं स्यात् ॥ ४६ ॥

क्वौ नष्टं न स्थानिवत् ॥ ४७ ॥

क्विप्रत्यये कृते प्रकृतेर्यल्लुप्तं तस्य न स्थानिवद्भावः । तेन लवमाचष्टे लवयतीत्यतः क्विपि णेर्लोपे अतो लोपे, वकारस्य ऊठि च कृते लौरिति रूपं सिध्यति । अत्र ' परेऽचः पूर्वविधौ ' (१।१।५७) इत्यनेन स्थानिवद्भावे अकारेण व्यवधानं भवेदूठ् च न स्यात् । अनया परिभाषया स्थानिवद्भावनिषेधे तु प्रत्ययलक्षणेन क्विपि परतः ऊठ् सिध्यति लौः इति च रूपं सिध्यति । अत्र ' विधिं प्रति ' इत्यधिकं पठित्वा ' क्वौ विधिं प्रति नष्टं न स्थानिवत् ' इति परिभाषापाठे स्वीकृते ' पन्थानमिच्छन् ' इत्यस्मिन्नर्थे क्यजन्तात् क्विपि पथीः इत्यत्र ' एर्वे ' (५।१।६३) इत्यनेन ईकारस्य प्राप्तमात्वं ' परेऽचः पूर्वविधौ ' (१।१।५७) इत्यनेन स्थानिवद्भावादकारेण व्यवधानान्न भवति ॥ ४७ ॥

पूर्वत्रासिद्धे न स्थानिवत् ॥ ४८ ॥

'स्थानीवादेशोऽनल्विधौ', 'परेचः पूर्वविधौ,' 'द्विर्वचनेऽचि' (१।१।५६, ५७, ५९) इति त्रिभिः सूत्रैर्विहितस्य स्थानिवद्भावस्यायं प्रतिषेधः । पूर्वत्रासिद्धीये कार्ये कर्तव्ये स्थानिवद्भावो न भवति । तेन राज्ञे इत्यत्र चुत्वं, पिपठीः इत्यत्र रित्वं, चिकीः जिहीः इत्यत्र सलोपः इत्यादीनि कार्याणि सिध्यन्ति ॥ ४८ ॥

स्फादिखलत्वणत्वेषु नास्ति ॥ ४९ ॥

पूर्वत्रासिद्धे न स्थानिवदिति स्थानिवद्भावप्रतिषेधस्यायं प्रतिषेधः । तेन संयोगादिलोपलत्वणत्वकार्येषु कर्तव्येषु स्थानिवद्भावो भवति । तेन आचष्टे मुनिर्धर्मम्, वास्यर्थः, शक्यर्थः इत्यत्र अजादेशस्य स्थानिवद्भावान्न सकारस्य ककारस्य वा संयोगादिलम् । तथा च 'स्फादेः स्कोन्ते च' (५।३।४६) इति सूत्रेण न सकारस्य ककारस्य वा लोपः ॥ ४९ ॥

इष्टतोधिकाराणां प्रवृत्तिनिवृत्ती ॥ ५० ॥

अधिकारसूत्राणि अग्रतः अनन्तरेषु सूत्रेष्वनुवर्तन्ते परंतु बहुषु स्थलेषु अनुवर्तनस्यावधिर्न निर्दिष्टो भवति । तत्र इष्टरूपाणां सिद्धये अधिकारप्रवृत्तिनिवृत्ती निश्चीयेते । तेन 'स्वरतिसूङ्धूञ्सूत्यूदितः' (५।१।९२) इत्यत्र 'लिङ्स्योर्दे' (५।१।९०) इति निवृत्तम् । वेत्येतदनुवर्तत एव । तेन स्वर्ता, स्वरिता, सोता, सविता, विगाहिता, विगाढा इत्यादीनि सिध्यन्ति । परिभाषायामस्यां अधिकारपदे यस्मात्सूत्रात्तत्रस्थस्य पदस्याग्रे अनुवृत्तिर्भवति तस्य सूत्रस्य समावेशो भवति ॥ ५० ॥

द्विर्बद्धं सुबद्धं भवति ॥ ५१ ॥

अनित्यमागमशासनम्, अनुबन्धकृतमनित्यम् इत्यादिपरिभाषाभिरिष्टोदाहरणसिद्ध्यर्थं विध्यनित्यत्वं प्रतिपादितम् । सत्यप्येतद्विधे अनित्यत्वे यदि कस्मिंश्चित्कार्ये द्वितयो विधिर्द्वितयो वा निषेधो दृश्यते तदा तस्य विधेर्निषेधस्य वा नित्यमेव प्रवृत्तिर्भवति । तेन ज्योतींष्यधिकृत्य कृतो ग्रन्थो ज्योतिषः इत्यत्र सकृदुक्ता वृद्धिर्न भवति ॥ ५१ ॥

इति जैनेन्द्रपरिभाषावृत्तौ विधिव्याख्यानप्रकरणं समाप्तम् ॥

त्यग्रहणे यस्मात्स तदादेर्ग्रहणम् ॥ ५२ ॥

सूत्रे प्रत्ययग्रहणे कृते स प्रत्ययो यस्माद्विहितस्तदादेस्तदन्तस्य ग्रहणं भवति । 'यत्ये तदादि गुः' (१।२।१०२) इत्यङ्गसंज्ञाविधायकस्य सूत्रस्यायं प्रपञ्चः । गुरिति अङ्गसंज्ञा । प्रत्यये परे यथा तदादितदन्तस्याङ्गस्य कार्यं भवति तथैव प्रत्ययग्रहणेपि स्यात् । कृत्तद्धितादिप्रत्ययविधानेषु पूर्वशब्दस्वरूपमुक्त्वा तदनन्तरं प्रत्ययो विधीयते तत्र उक्तायाः प्रकृतेः सकाशादेव प्रत्ययोत्पत्तिः स्यात्, न उक्तशब्दान्तायाः प्रकृतेरिति भावः । तथा च गर्गशब्दादेव प्रत्ययो न परमगर्गात् । 'एकस्य ते मे'

(५।३।१८) इति सूत्रेण च एकवचनप्रत्ययान्तस्य युष्मच्छब्दस्य तथैवास्मच्छब्दस्यैकवचनप्रत्ययान्तस्य यथासंख्यं ते मे इत्यादेशौ भवतः । ज्ञानं ते दीयते, शीलं मे दीयते ॥ अयं तदन्तविधिर्न सार्वत्रिकः । तस्यानेकान्यपवादस्थलानि, तत्र कानिचिन्निदर्श्यन्ते ॥ ५२ ॥

संज्ञाविधौ त्यग्रहणे तदन्तविधिर्नास्ति ॥ ५३ ॥

यत्र संज्ञाया विधानं तत्र निर्दिश्यमानशब्दरूपस्यैव सा संज्ञा, न तदन्तस्य । तथा च 'ईदूदेद्द्विर्दिः' (१।१।२०) इति सूत्रेण द्विवचनस्य विहिता दिसंज्ञा नाम प्रगृह्यसंज्ञा शुक्ली आस्तां वस्त्रे इत्यत्र न भवति, शुक्ल्यास्तामिति च संधिकार्यं भवति । 'सुमिङन्तं पदम्' (१।२।१०३) इत्यत्र अन्तग्रहणेनैषा ज्ञापिता । 'कृद्धृत्साः' (१।१।६) इत्ययं न संज्ञाविधिः, किं तु नियमविधिः । अत एव तत्र कृदन्ततद्धितान्तमित्याद्यर्थो लभ्यते ॥ ५३ ॥

मृद्ग्रहणे न तदन्तविधिः ॥ ५४ ॥

'पूर्वात्', 'सपूर्वात्' (४।१।२०, २१) इत्यनयोः सपूर्वादिति सूत्रं, तथा च 'वे वे स्थानान्तात्' (४।२।१९) इति सूत्रे अन्तग्रहणमस्याः परिभाषाया ज्ञापकम् । प्रातिपदिकग्रहणे तदन्तविधिर्नास्ति । तेन प्रातिपदिकमुच्चार्य स्त्रीप्रत्यये तद्धितप्रत्यये वा विधीयमाने विशेषणादिशब्दपूर्वात् प्रातिपदिकात्स न भवति ॥ ५४ ॥

सत्यविधौ न तदन्तविधिः ॥ ५५ ॥

'येनाल्विधिस्तदन्तावोः' (१।१।६७) इति सूत्रे वार्तिकरूपेण पठितैषा महावृत्तौ । समासविधौ प्रत्ययविधौ च तदन्तविधिर्न भवति । तेन कष्टं परमाश्रितः इत्यत्र कष्टशब्देन सह परमश्रितः इति श्रितान्तस्य द्वितीयातत्पुरुषो न भवति । तथैव सौत्रनाडिः इत्यत्र 'नडादेः फण्' (३।१।८८) इत्यनेन सूत्रनडशब्दात्फण् प्रत्ययो न भवति ॥ ५५ ॥

अस्य तदन्तविधिनिषेधस्य प्रतिप्रसवरूपेण तदन्तविधायिका परिभाषा वार्तिकरूपेण महावृत्तौ पठ्यते—

उगित्कार्यं वर्णकार्यं च तदन्तादपि भवति ॥ ५६ ॥

तेन भवती अतिभवती इत्यादिसिद्धिः ॥ ५६ ॥

सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ॥ ५७ ॥

इयमपि सत्यविधाविति निषेधस्य प्रतिप्रसवरूपेण पठ्यते । तेन सुमागधकः, सर्वमागधकः अर्धमागधकः, पूर्वमागधकः, सुमद्रकः सर्वमद्रकः इत्यादिषु कप्रत्ययसिद्धिः । सुपाञ्चालकः, सर्वपाञ्चालकः इत्यादिषु च 'सुसर्वार्धाद्राष्ट्रस्य' (५।२।१७) इत्यनेन वुञ्सिद्धिः ॥ ५७ ॥

प्राग्वतः संख्यापूर्वपदानां तदन्तग्रहणमनुपि ॥ ५८ ॥

‘ त्यग्रहणे यस्मात्स० ’ [परि. ४५] इत्यनया परिभाषया षष्ठ्यादीनामेव ग्रहणेन एकषष्ठ्यादीनां व्यावृत्तौ सत्यामपि ‘ तेरसंख्यादेः ’ (४।१।९) इत्यत्र असंख्यादेरिति प्रतिषेधोस्या ज्ञापकः । तेन संख्यापूर्वपदानामपि प्रातिपदिकानां ग्रहणं प्राग्वतः प्रत्ययविधायकेषु सूत्रेषु भवति प्रत्ययो न लुप्तश्चेत् । तथा च ‘ राद् ’ (३।४।७९) इति सूत्रं ‘ राद् भूतबले: ’ (३।४।८२) इत्यत्र च राद्ग्रहणं आवश्यकं भवति ॥ ५८ ॥

त्यग्रहणे चाकायः ॥ ५९ ॥

प्रत्ययग्रहणपरिभाषया प्राप्तस्य तदन्तविधेः प्रतिषेधोयम् । प्रत्ययग्रहणे काद्वाचकात्परौ शतनौ स्वरूपेण गृह्येते न तदन्तविधिना । झ इति तरतमौ गृह्येते ॥ ५९॥

ग्रावित्यधिकारे त्यग्रहणं स्वरूपग्रहणमेव ॥ ६० ॥

इयमपि तदन्तविधेरपवादभूता परिभाषा । ‘ हृदयस्य हृल्लेखयाण्लासेषु ’ (४।३।१६१) इत्यत्र अण्ग्रहणेन सिद्धे लेखेत्यण्णन्तग्रहणमस्या ज्ञापकम् । उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तविधिरिति भावः । द्य्वधिकारे त्यग्रहणे स्वरूपग्रहणं न तदन्तविधिरित्यपि पाठो दृश्यते ॥ ग्रुरिति उपपदस्य संज्ञा ॥ ६० ॥

स्त्रीत्यग्रहणान्नेष्यते ॥ ६१ ॥

प्रत्ययग्रहणपरिभाषाया अपवादभूतेयं परिभाषा । ‘ त्यग्रहणे यस्मात्स तदादेः ’ [४५] इतीयं परिभाषा स्त्रीप्रत्ययग्रहणान्नेष्यते । तेन अतिराजकुमारिः चित्रगुः श्वेतगुः इत्यत्र ‘ स्त्रीगोर्नीचः ’ (१।१।८) इति ह्रस्वो भवति ॥ ६१ ॥

भवति स्त्रीत्यप्रकरणे तदन्तविधिः ॥ ६२ ॥

‘ मृद्ग्रहणे न तदन्तविधिः ’ [परि. ५४] इत्यस्या अपवादभूतेयं स्त्रीप्रत्ययविधायकसूत्रेषु प्रातिपदिकग्रहणे तदन्तविधिं प्रतिपादयति । ‘अनीचः’ (३।१।१७) इति सूत्रमस्या ज्ञापकम् । तथाहि प्रधानभूते स्त्रीप्रत्यये भवति तदन्तविधिः । यथा कुम्भकारी, देवदत्तकुक्कुटी । उपसर्जनभूते तु स्त्रीप्रत्यये न तदन्तविधिः । तेन बहुकुरुचरेत्यादीनां सिद्धिः ॥ ६२ ॥

गोरधिकारे तदन्तस्य च ॥ ६३ ॥

इयमपि ‘ मृद्ग्रहणे न तदन्तविधिः ’ [परि. ५४] इत्यस्या अपवादभूता तदन्तविधिं प्रतिपादयति । अङ्गाधिकारे विहिते प्रत्ययग्रहणे प्रातिपदिकात्प्रातिपदिकान्ताच्च शब्दात्तत्कार्यं भवति । तेन यथा अष्टौ तथा परमाष्टौ इत्यपि सिद्धं भवति तथैव ‘ प्रेल्वाष्चतुरो नुट् ’ (५।१।३६) इत्यनेन विहितो नुडागमः परमपञ्चानाम्, परमषण्णाम् इत्यत्रापि सिद्धो भवति ॥ ६३ ॥

धोरधिकारे तदन्तविधिरप्यस्ति ॥ ६४ ॥

'धातोः' (२।१।१९) इत्याधिकारे ये प्रत्यया विहितास्तेषां ग्रहणे तदन्तविधिर्भवति । 'युजेरसे' (५।१।५०) इति सूत्रे असेग्रहणमस्या ज्ञापकम् । तेन युङ् युञ्जौ, युञ्जः, इत्यत्र क्विन्प्रत्ययान्तस्य 'युज्' शब्दस्य यथा नुम् भवति तथैव अश्वयुज् इत्यत्रापि भवेद् । स मास्तु इत्यर्थं 'युजेरसे' इत्यत्र असेग्रहणं कृतम् । तस्मादश्वयुज् इति समस्तपदान्न नुम् भवति । अश्वयुक् अश्वयुजौ अश्वयुजः इत्यादिरूपाणि च भवन्ति ॥६४॥

कृद्ग्रहणे तिकारकपूर्वस्यापि ग्रहणम् ॥ ६५ ॥

'त्यग्रहणे' [४५] इत्यस्या अपवादभूतत्वेनेयं पठ्यते । बहुशः समासविधायकसूत्रेष्वस्या उपयुक्तता प्रामुख्येन दृश्यते । यत्र कृद्ग्रहणं वर्तते तत्र प्रत्ययग्रहणपरिभाषया यस्माद्धातोः कृत्प्रत्ययो विहितस्तस्यैव ग्रहणं भवेत् । गतिपूर्वकस्य तथा कारकपूर्वस्यापि क्तान्तस्य ग्रहणमिष्यते । तथा च कृत्प्रत्ययस्य ग्रहणे न केवलं कृदन्तं गृह्यते किंतु गतिपूर्वकं कृदन्तं कारकपूर्वकं च कृदन्तम् । तथा च अवतप्तेनकुलस्थितं त एतत्, उदकेविशीर्णं त एतत् इत्यादिषु 'षे कृति बहुलम्' (४।३।१३२) इति सूत्रेण सप्तम्या अलुग् भवति । सांराविणम् इत्यत्र 'ञिनोण्' (४।२।२१) इत्यण् भवति । स्वयंविलीनमाज्यम् इत्यत्र 'स्वयं क्तेन' (१।३।२२) इति सूत्रेण गतिपूर्वकक्तान्तेन समासो भवति ॥६५॥

इति जैनेन्द्रपरिभाषावृत्तौ तदन्तविधिप्रकरणं समाप्तम् ॥

अतुल्यबलयोः स्पर्धो न भवति ॥ ६६ ॥

'स्पर्धे परम्' (१।२।९०) इत्यनेन सूत्रेण 'विप्रतिषेधे परं कार्यम्' इति वैयाकरणानां साधारणः समयः प्रतिपाद्यते । स्पर्धशब्देन विप्रतिषेध उच्यते । स च विप्रतिषेधः अन्यार्थयोर्नाम पृथक्समाधिगतचारितार्थ्ययोरत एव तुल्यबलयोर्विरोधे भवति । अतः परनित्ययोर्नित्यान्तरङ्गयोस्तथान्तरङ्गापवादयोश्च स्पर्धाभावेन न परत्वापरत्वविचारेण निर्णयः । तथा चोक्तम्—

> उत्सर्गादपवादः परनित्यविचारणे भवेन्नित्यम् ।
> नित्यात्तथान्तरङ्गः तस्मादप्यनवकाशं यत् ॥

एकार्थयोरपि नास्ति विरोधः । धातोर्विहितास्तव्यादयः पर्यायेण भवन्ति ॥६६॥

पूर्वत्रासिद्धे नास्ति स्पर्धोऽसत्त्वादुत्तरस्य ॥ ६७ ॥

पूर्वत्रासिद्धीयप्रकरणे (५।३।२७–५।४।१४०) स्पर्धो नाम विप्रतिषेधो न वर्तते । येन उत्तरसूत्रेण सह स्पर्धा तस्य उत्तरस्य असिद्धत्वात् । तेन विस्फोर्यम् अवगोर्यम् इत्यत्र गुणं बाधित्वा परत्वेन 'हल्यभकुर्छुरः' (५।३।८६) इति दीर्घो न भवति ॥ ६७ ॥

न योगे योगोऽसिद्धोऽपि तु प्रकरणे प्रकरणमसिद्धं भवति ॥ ६८ ॥

'पूर्वत्रासिद्धम्' (५।३।२७) इत्यस्यायं प्रपञ्चः । तत्र पूर्वान्सूत्रान्प्रति 'पूर्वत्रासिद्धम्' (५।३।२७) इत्यस्मात् पराणि सर्वाणि सूत्राण्यसिद्धानि । तथैव 'पूर्वत्रासिद्धीय'-प्रकरणे पूर्वं सूत्रं प्रति परमसिद्धमित्युक्तम् । तत्र परं सूत्रमसिद्धमित्युक्ते केचन दोषाः प्रादुर्भवन्ति । तन्निवारणार्थमिदमुच्यते न योगे योगोऽसिद्धः इत्यादि । 'गेरसेऽपि विकृतेः' (५।४।९८) इति सूत्रे अपिग्रहणमस्या ज्ञापकम् । तेन निष्कृतम् दुष्कृतमित्यत्र 'इणः षः' (५।४।२७) इति षत्वे क्रियमाणे 'इदुदुङः' (५।४।२८) इति सत्वं नासिद्धम् ॥ ६८ ॥

आभाच्छास्त्रस्य क्वचित्सिद्धता ॥ ६९ ॥

'असिद्धवदत्राभात्' (४।४।२१) इति सूत्रेण इष्टकार्यसिद्ध्यर्थं असिद्धवदित्यारभ्य प्रस्तुते आभीयेति नाम्ना निर्दिष्टे प्रकरणे एकं जातं कार्यं द्वितीयं जायमानं प्रति असिद्धत्वेन परिकल्पितम् । तथा च 'एधि' इत्यत्र नित्यत्वादसः एत्वलोपयोः कृतयोः झल्लक्षणं धित्वं न प्राप्नोति, आभीयशास्त्रसंपन्नयोरेत्वलोपयोरसिद्धत्वेन तु धित्वं भवति । क्वचित्त आभीयशास्त्रस्य सिद्धता वक्तव्या भवति । सा च 'गेऽत उत्' (४।४।१००) इत्यत्र अतः इति तपरकरणेन ज्ञापिता भवति । तेन देभतुः देभुरित्यत्र नलोपस्य सिद्धत्वादेत्वाभ्यासलोपौ भवतः ॥ ६९ ॥

पूर्वत्रासिद्धीयमद्वित्वे ॥ ७० ॥

'पूर्वत्रासिद्धम्' (५।३।२७–५।४।१४०) इत्यापादपरिसमाप्तेः प्रवर्तमाने अधिकारे पूर्वं योगं प्रति परो योगः असिद्धो भवति । तथैव 'पूर्वत्रासिद्धम्' (५।३।२७) इत्यस्माद्योगात्पूर्वे ये सर्वे योगास्तान्प्राति पूर्वत्रासिद्धाधिकारस्थयोगा असिद्धा भवन्ति । परमिदमसिद्धत्वं 'सर्वस्य द्वे' (५।३।१–२६) इत्यादिद्वित्वविधायकप्रकरणे न प्रवर्तते । तथा च ऊढमाख्यत् औजिढत् इत्यत्र 'द्वित्वेचि' (१।१।५२) इति स्थानिवद्भावात्सणेर्द्वित्वे कृते दत्वस्य पूर्वत्रासिद्धमित्यनेन असिद्धत्वाद् हतिकारयोर्द्वित्वम् । तथैव 'सर्वस्य द्वे' इत्यधिकारस्थद्वित्वे गृह्यमाणे गलो गलः इति लत्वं सिद्धम् । सुगीरित्यत्र विसर्जनीयस्यासिद्धत्वात् 'इको दीर्वोरुङः' (५।३।८५) इति दीर्घो भवति । पक्वमित्यत्र वत्वस्यासिद्धत्वाद् झलि चोः कुत्वं भवति । आशीःषु इत्यत्र च 'रेश्च सुपि' (५।४।२४) इति सत्वस्यासिद्धत्वात् 'इको दीर्वोरुङः' (५।३।८५) इति दीर्घो भवति । तथैव उचिच्छिषतीत्यत्र उच्छेरन्तरङ्गत्वात्तुकि चुत्वे च कृते चुत्वस्यासिद्धत्वात् सतकारस्य छस्य द्वित्वे उतिच्छिषतीति प्राप्तम् । परंतु पूर्वत्रासिद्धीयमद्वित्वे इत्यनेन द्वित्वे कर्तव्ये चुत्वस्य सिद्धत्वात् उचिच्छिषतीति सिध्यति ॥ ७० ॥

स्वविधिर्बलवान् ॥ ७१ ॥

सर्वेभ्यो विधिभ्यः स्वविधिर्नाम लोपविधिर्बलवान्भवति । अत एव लुम् लविता

इत्यत्र प्रागेव धातुसंज्ञायाः अनुबन्धस्य नाशो भवति। तथा च धातुसंज्ञायाः प्रागेव अनुबन्धस्य नाशे 'न धुखेऽगे' (१।१।१८) इति गुणनिषेधो न भवति ॥ ७१ ॥

वार्णाद् गावं बलीयः ॥ ७२ ॥

गावं नाम गोसंबन्धि कार्यम्। अङ्गकार्यमिति यावत्। वर्णकार्यादङ्गकार्यं बलवत्तरमित्यर्थः। तेन पचेयुः इत्यत्र 'उसि' (४।३।८३) इति पररूपं बाधित्वा 'अतो येय्' (५।१।१३९) इतीय् आदेशो भवति। तथैव प्रश्नः विश्नः इत्यत्र तुकं बाधित्वा 'छ्वोः शूड् ङे च' (४।४।१७) इत्यनेन शकारादेशः ॥ ७२ ॥

सकृद्गते परनिर्णये बाधितो बाधित एव ॥ ७३ ॥

'स्पर्धे परम्' (१।२।९०) इत्यनेन पूर्वसूत्रविहितं विधिं बाधित्वा परविधौ सति बाधितः पूर्वविधिः बाधित एव वर्तते। न पुनः प्रवर्तते इति यावत्। स्पर्धे परमिति सूत्रस्य नियमार्थकत्वमस्याः परिभाषाया बीजम्। जाग्रति कुलानि इत्यत्र 'नपोऽझलः' (५।१।५१) इति नुम् विकल्पितः। उगिल्लक्षणस्तु सकृद्गते परनिर्णये बाधितो बाधित एव ॥ ७३ ॥

पुनः प्रसङ्गविज्ञानाद् विधिः ॥ ७४ ॥

'स्पर्धे परम्' (१।२।९०) इति सूत्रं विधिपरं व्याख्यायेत चेत् तर्हि बाधितस्य पूर्वकार्यस्य परकार्यविधेरनन्तरं प्राप्तिर्यदा भवति तदा तद्विधीयत एव। तद्यथा। वेभिद्यते इत्यत्र द्वित्वस्यावकाशः। विचाति इत्यत्र संप्रसारणस्यावकाशः। वेविच्यत्ते इत्यत्र परत्वात्संप्रसारणे कृते पुनःप्रसङ्गविज्ञानाद् द्वित्वं भवति ॥ ७४ ॥

चविकारेष्वपवादा उत्सर्गान्न बाधन्ते ॥ ७५ ॥

अभ्यासविकारेषु कर्तव्येषु अपवादा उत्सर्गान्न बाधन्ते। अपवादपदमतन्त्रम्। अभ्यासविकारेषु बाध्यबाधकभावो नास्तीति तात्पर्यम्। यंयम्यते यंयमीति इत्यत्र परत्वात्तुकि कृते अनजन्तत्वात् दीर्घस्य प्राप्तिरेव नास्ति। तस्माद् 'दीराकितः' (५।२।१८१) इत्यत्र अकितः इति वचनं व्यर्थं भवति एतां च परिभाषां ज्ञापयति। तेन मीमांसते इत्यादावीत्वं दीर्घेण न बाध्यते। डोढौक्यते इत्यत्र दीर्घेण ह्रस्वादेशस्य न बाधा। अचीकरत् इत्यत्र दीर्घेण 'सन्यतः' (५।२।१७७) इति इत्वं न बाध्यते। अजीगणत् इत्यत्र च 'ईच्च गणः' (५।२।११४) इत्यनेन "हलोऽनादेः" (५।२।१६१) इति लोपस्य न बाधा ॥ ७५ ॥

शीलादिषु ण्व्यादयो न भवन्ति ॥ ७६ ॥

'आ केः शीलधर्मसाधुत्वे' (२।२।११२) इत्यनेन शीलाद्यर्थविशेषेषु विहितेषु प्रत्ययेषु 'प्राक्तेर्वाऽसमः' (२।१।८१) इत्यनेन विहितः असरूपप्रत्ययविकल्पो न भवति। 'निन्दहिंस....वुञ्' (२।२।१२७) इति सूत्रे ण्वुना सिद्धे वुञ्ग्रहण-

मस्या ज्ञापकम् । तेन निन्दहिंसेत्येतेभ्यः सकाशादन्येभ्यो धातुभ्यः शीलादिष्वर्थेषु ' भञ्जो ण्विः ' (२।२।६५) इत्यादिसूत्रैर्विहिता ण्यादयः प्रत्यया न भवन्ति ॥ ७६ ॥

परनित्यविचारणे भवेन्नित्यम् ॥ ७७ ॥

' स्पर्धे परम् ' (१।२।९०) इत्यत्र वचनत्वेन निर्दिष्टायाः ' अतुल्यबलयोः स्पर्धो न भवति ' (परि. ६४) इत्यस्याः परिभाषाया अयं प्रपञ्चः । तत्र हि नित्यान्तरङ्गानवकाशा विषयः अतुल्यबला निदर्शिताः । परविधेरपि नित्यविधिर्बलीयस्त्वेन गृह्यते ॥ ७७ ॥

तत्र नित्यत्वं व्याख्यायते—

कृताकृतप्रसङ्गि नित्यम् ॥ ७८ ॥

यत्कार्यमन्यस्मिन्नकृते प्राप्नोति कृतेऽपि प्राप्नोति तत्तस्यान्यस्यापेक्षया नित्यम् । यथा तत्कुलमित्यत्र त्यदाद्यत्वं बाधित्वा कृताकृतप्रसङ्गित्वेन नित्यत्वाल्लोपः ॥ ७८ ॥

यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् ॥ ७९ ॥

तत्कुलमित्यत्र नित्यो लोप इत्युच्यते कृताकृतप्रसङ्गित्वात् । नन्वत्र अत्वे कृते लक्षणान्तरेण अम्भावे सति अनित्यो लोपः । नैवम् । यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् । अतः नानित्यो लोपः । किं तु नित्य एव ॥ ७९ ॥

नित्यात्तथान्तरङ्गम् ॥ ८० ॥

इयमपि परिभाषा ' अतुल्यबलयोः स्पर्धो न भवति ' (परि. ६४) इत्यस्याः प्रपञ्चभूता एव । नित्यादपि अन्तरङ्गं बलीयो भवतीत्यर्थः । अन्तर्भूतानि नाम अन्तर्वर्तीनि निमित्तानि यस्य तद्बहिर्भूतनिमित्तककार्यापेक्षया अन्तरङ्गं, बहिर्भूतनिमित्तकं बहिरङ्गम् । आसन्, आयन् इत्यत्र लावस्थायामडागमे कृते अन् इति प्रत्ययं निमित्तीकृत्य प्राप्तं आसन्नित्यत्र अस् इत्यस्य अकारलोपं आयन्नित्यत्र च धातोरिकारस्य यणादेशं बाधित्वा अन्तरङ्गत्वाद् वृद्धिर्भवति ॥ ८० ॥

अन्तरङ्गत्वस्य कानिचिल्लक्षणानि कथ्यन्ते—

अल्पाश्रयमन्तरङ्गं बह्वाश्रयं बहिरङ्गम् ॥ ८१ ॥

यस्याल्पानि निमित्तानि स विधिरन्तरङ्गः, यस्य च बहूनि स बहिरङ्गः । बहिरङ्गं विधिं अन्तरङ्गो बाधते । तेन जहति इत्यत्र हा अति इति स्थिते अल्पाश्रयत्वेनान्तरङ्गत्वात्प्रागेव द्वित्वम् ॥ ८१ ॥

एकपदाश्रयत्वेनान्तरङ्गत्वम् ॥ ८२ ॥

उपसर्गधातुगतानि समासगतानि द्वयादिपदान्याश्रित्य प्रवर्तमानानि कार्याणि बहिरङ्गाणि । तदपेक्षयैकपदाश्रयाणि कार्याण्यन्तरङ्गाणि । अन्तरङ्गकार्याणि बहिरङ्गकार्याणि बाधित्वा प्रवर्तन्ते । अत एव तिङन्तं धातुरूपं प्रसाध्य पूर्वेणोपसर्गकार्येण सह संधिकार्याणि भवन्ति ॥ ८२ ॥

क्वचिद्बहिरङ्गेणाप्यन्तरङ्गस्य बाधः । तथाहि—

एकपदाश्रयत्वेनान्तरङ्गानपि जग्ध्यादिविधीन् बहिरङ्गः प्यादेशो बाधते ॥ ८३ ॥

'तिकित्येऽदो जग्धिः' (१।४।११०) इत्यत्रादौ जग्धिविधिरस्या ज्ञापकः । तेन प्रधाय इत्यत्र तकारादौ किति परे प्रवर्तमानं 'धाञो हि' (५।२।१४६) इति हित्वं न भवति । प्रखन्येति 'जनसनखनाम्' (४।४।४३) इति निरयमात्वं न भवति । प्रदायेति 'दो दद् घोः' (५।२।१४८) इति दत्वं नास्ति । प्रस्थायेति 'द्यतिस्यतिमास्थां ति किती्त्' (५।२।१४४) इत्यादिना इत्वं नास्ति । प्रशम्येत्यत्र 'ह्रस्य किझलोः' इति दीर्घो नास्ति । प्रपृच्छ्य प्रदीव्येत्यत्र च शूठौ न भवतः ॥ ८३ ॥

पूर्वोत्तरपदयोः कार्यमन्तरङ्गमप्येकादेशं बाधते ॥ ८४ ॥

'नेन्द्रस्य' (५।२।२७) इति वृद्धिनिषेधकं सूत्रमस्या ज्ञापकम् । अन्यथा इन्द्रस्योत्तरपदस्य एकादेशे कृते 'यस्य ङ्यां च' (४।४।१३६) इति अलोपे च आदेरचो नाशाद् वृद्धेः प्राप्तिरेव नास्ति । तेन पूर्वेषुकामशमादयः सिद्धा भवन्ति ॥८४॥

अन्तरङ्गानपि विधीन् बहिरङ्ग उब् बाधते ॥ ८५ ॥

नानापदाश्रयत्वाद् बहिरङ्गो विभक्तिलुप् । एकपदाश्रयत्वादन्तरङ्गास्त्वमादेशाः । अतस्त्वमादेशौ यदि पूर्वं कृतौ स्यातां तर्हि 'त्यदोश्च' (५।१।१५७) इति सूत्रमनर्थकं स्यात् । ततः 'त्यदोश्च' इति सूत्रमेव ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते । तेन यूयं पुत्रा यस्य स युष्मत्पुत्रः इत्यत्र यूयादेशाभावः सिध्यति । तथा गोमान् प्रियो यस्य गोमत्प्रियः इत्यादौ नुमादीनां चाभावः सिध्यति ॥ ८५ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गः प्यादेशो बाधते ॥ ८६ ॥

'न प्ये' (४।४।६८), इति घुमास्थागापाजहातिसामीकारादेशस्य प्रतिषेधः अस्या ज्ञापकः । तेन प्रदाय, प्रधाय, अवहाय, अवसाय इत्यादीनां सिद्धिः ॥८६ ॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ८७ ॥

'नित्यादन्तरङ्गं बलीयः' [परि० ८०] इत्युक्तमेव । तदन्तरङ्गबहिरङ्गयोः समकालत्वे युज्यते । यत्र बहिरङ्गान्तरङ्गयोर्न समकालता किंतु कृते बहिरङ्गे अन्तरङ्ग-कार्यस्य प्राप्तिर्भवति तत्र अन्तरङ्गे कार्ये कर्तव्ये जातस्य बहिरङ्गस्यासिद्धत्वमनया परिभाषया प्रतिपाद्यते । समकालत्वेपि कुत्राचिद् बहिरङ्गस्य असिद्धत्वं प्रतिपाद्य अन्तरङ्गस्य प्रवृत्तिः प्रतिपाद्यते । इदमसिद्धत्वं कल्पितम् । तेन बहिरङ्गकार्यात्पूर्वं यच्छब्दरूपं तद्गृहीत्वान्तरङ्गकार्यं विधीयते । तेन दध्यत्र मध्वत्र भर्त्रर्थः, लाकृतिः इत्यादिषु बहिरङ्गस्य जातस्य यणः संयोगान्तत्वेन लोपो न भवति । इयमनित्या । तेन दासेरः पचेत इत्यत्र बहिरङ्गे इयादेशे एयादेशे च सति तयोर्नासिद्धत्वम् । तेन यकारस्य लोपो भवति । तथैव 'अक्षयूः' इत्यत्र बहिरङ्गस्य ऊठः यणादेशे नासिद्धत्वम् । तथैव 'एषा', 'द्वे' इत्यत्र अन्तरङ्गे टापि कर्तव्ये बहिरङ्गं त्यदाद्यत्वं सिद्धम् ॥ ८७ ॥

अकृतवद्व्यूहेन सिद्धिः ॥ ८८ ॥

अकृतवद्व्यूहो नाम अन्तरङ्गपरिभाषाया अव्यापारः । तेन शेवलेन्द्रदत्तात् सु-

पर्याशीर्दत्ताश्च ' शेवलसुपरिविशालवरुणार्यमादेस्तृतीयात् ' (४।१।१४०) इत्यनेन तृतीयादचः परस्य लोपो भवति तदा शेवले सुपर्या इति कृतसंधिकार्ययोः शेवलेन्द्रदत्त-सुपर्याशीर्दत्तशब्दयोस्त्रीण्यक्षराणि गृहीत्वा ए आ इति तृतीयावचौ न कल्प्येते, किंतु व्यूहरूपं संधिकार्यमकृतं परिकल्प्य शेवल सुपरि इति त्रीण्यक्षराणि गृहीत्वा अ इ इति तृतीयाभ्यां परस्य इन्द्रदत्तेत्यत्रेकारस्य आशीर्दत्तेत्यत्रा च आकारस्य चतुर्थस्य अचः तदुत्तरस्य च शब्दरूपस्य लोपो भवति । तथा च शेवलयिकः सुपर्यिकः इत्यादीनि रूपाणि न भवन्ति । शेवलिकः सुपरिकः इत्यादीन्येव भवन्ति ॥ ८८ ॥

तस्माद्प्यनवकाशं यत् ॥ ८९ ॥

तस्मादन्तरङ्गादपि यदनवकाशं तद् बलीयो भवतीत्यर्थः । इयमपि परिभाषा ' स्पर्धे परम् ' (१।२।९०) इत्यस्य प्रपञ्चभूता । तत्र हि परान्नित्यं बलीयः, नित्यादन्तरङ्गम्, अनन्तरङ्गाच्चानवकाशमित्युक्तम् । अनवकाशशब्देन सूत्रान्तरव्याप्तप्रदेशत्वमुच्यते । तथा च यत्र सूत्रस्य स्वतन्त्रतया नाम विरोधिकार्यान्तरप्राप्तिं विना उदाहरणं न लभ्यते तदनवकाशम् । अनवकाशत्वमेव परनित्यान्तरङ्गेभ्यो बलीयस्त्वस्य हेतुः । अपवादविधेरपि परनित्यान्तरङ्गेभ्यो बलीयस्त्वमुच्यते । तथापि अनवकाशकार्यानन्तरं यदि परनित्यान्तरङ्गाणां यस्य कस्यापि प्राप्तिर्भवेत्तर्हि तद्भवत्येव । परंतु परनित्यान्तरङ्गाणामन्यतमस्य सामान्यविधेरनन्तरं विशिष्टतया कथितेन अपवादशास्त्रेण बाधितो विधिर्नैव पुनः प्रवर्तते इत्यनवकाशापवादयोर्भेदः ॥ ८९ ॥

उत्सर्गादपवादः ॥ ९० ॥

सामान्यविधिरुत्सर्गः विशेषविधिरपवादः । तक्रकौण्डिन्यन्यायेन हि अपवादशास्त्र-मुत्सर्गशास्त्रस्य बाधकं भवति । अतः अपवादशास्त्रेण बाधितमुत्सर्गशास्त्रं न पुनः प्रवर्तते । ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्युक्ते तक्रदानेन कौण्डिन्यविषये दधिदानस्य बाध एव भवति ॥ ९० ॥

प्रकल्प्य वाऽपवादविषयं तत उत्सर्गोभिनिविशते ॥ ९१ ॥

कथमुत्सर्गशास्त्रं प्रवर्त्यतामित्यनेन कथ्यते । सूत्रपाठक्रमेण उत्सर्गशास्त्रं पूर्वं वा भवेत्परं वा भवेत्, अपवादस्थलानि पर्यालोच्य तानि परिहृत्य उत्सर्गशास्त्रं प्रवर्तनीयम् । तेन अध्यापयितुमिच्छति अधिजिगापयिषतीत्यत्र गाङादेशपक्षे ' क्रिङ्जेर्णौ ' (४।३।४१) इत्यात्वं न भवति ॥ परिहृत्यापवादविषयमित्यपि पाठः ॥ ९१ ॥

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥ ९२ ॥

स्वाभाविकमेतत् । अनेकेभ्यः साधारणसूत्रेभ्यः प्रागुपदिष्टः विशेषविधिः अनन्तरमेव वर्तमानं विधिं बाधेत नेतरान् । तस्य तत्र लब्धावकाशत्वात् । तथथा । आश्लेपि । पुरस्तादपवादा इत्यनया परिभाषया ' श्लिषः ' (२।१।४१) इति सूत्रेण अङः (२।१।४८) एव बाधा, न ' कर्मण्यात्मनि ' (२।१।५३) इत्यनेन विहितस्य क्सेः । तथा च प्रैधते । उपैति । ' इत्येधत्यूठ्सु ' (४।३।७७) इत्ययं पुरस्तादपवादो-

न्तरस्य ' एङि पररूपम् ' (४।३।८१) इत्यस्य बाधको नोत्तरस्य ' ओमाङोः ' (४।३।८२) इत्यस्य ॥ ९२ ॥

मध्येपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ ९३ ॥

मध्ये स्थितोपवादविधिः पूर्वं सामान्यविधिं बाधित्वा लब्धावकाशः नोत्तरं विधिं बाधितुं प्रवर्तते । तथाहि—'टिदादिः' (१।१।५३) इत्यनेन 'ता स्थाने' (१।१।४६) इत्यस्यैव बाधः, न तु प्रत्ययपरत्वस्य । तथैव कुब्धलेरः इत्यत्र ' लिम्पविन्द० ' (२।१।१११) इत्यनेन विहितः शः ' ज्ञाकृप्रीगुङः कः ' (२।१।१०८) इत्यस्यैव बाधकः, न तु अणः । तथैव व्यतीक्षा व्यतीहा इत्यत्र ' कर्मव्यतिहारे ञः ' (२।३।७६) इत्ययं ' स्त्रियां क्तिः ' (३।३।७५) इत्यस्यैव बाधको, न तु ' सरोर्हलः ' (२।३।८५) इत्यस्य । अनित्येयं परिभाषा ' तृणह इम् ' (५।२।९०) इति निर्देशात् । तथा च ' ता स्थाने ' (१।१।४६) ' त्यः परः ' (२।१।१-२) इति पूर्वं परं च बाधित्वा ' परोचो मित् ' (१।१।५५) इत्यस्य प्रवर्तनाद् रुणद्धीत्यादिसिद्धिः ॥ ९३ ॥

इति जैनेन्द्रपरिभाषावृत्तौ बाधप्रकरणं समाप्तम् ॥

गुणप्रधानभावेन प्रकृतिस्त्यश्च त्यार्थं सह ब्रूतः ॥ ९४ ॥

वृत्तौ स्वभावत एव एकार्थीभावः । तत्र प्रकृत्यर्थो विशेषणभूतोऽप्रधानम् । प्रत्ययार्थस्य सामान्येन प्रवृत्तस्य विशेषे अवस्थापनात् प्रत्ययार्थः प्रधानम् । तत्र गुणप्रधानभावेन प्रकृतिः प्रत्ययश्च प्रत्ययार्थं सह ब्रूतः ॥ ९४ ॥

स्वार्थिकाः प्रकृतिलिङ्गसंख्ये अनुवर्तन्ते ॥ ९५ ॥

प्रत्ययानां स्वार्थे विहितत्वमेवास्याः परिभाषाया मूलम् । अत एव नदीशब्दात् कुत्सार्थविवक्षायाम् ' एवाल्कः ' (४।१।१२९) इत्यनेन स्वार्थे कप्रत्यये विहिते अनया परिभाषया लिङ्गसंख्यानुवर्तनाट्टाब्भवति । नदिका । एवं कुमारिका, वामोरुका । एवमेव व्यावक्रोशी व्यात्युक्षी व्यावचर्ची इत्यत्र ' कर्मव्यतिहारे ञः (२।३।७६) इत्यनेन स्त्रियां ञे विहिते ततः ' आत्स्त्रियाम् ' (४।२।२२) इति अणि कृते अण्णन्तत्वात्स्त्रियां ङीब्भवति ॥ ९५ ॥

अस्मिन्नेव ' आत् स्त्रियाम् ' (४।२।२२) इति सूत्रे स्त्रीग्रहणं व्यर्थम् । स्वार्थिकप्रत्ययत्वेन ञान्तादणि कृते स्त्रीत्वे ङीब्भवेदेव । अतः स्त्रीग्रहणं ज्ञापयति—

क्वचित्स्वार्थिकाः प्रकृतिलिङ्गसंख्ये अतिवर्तन्तेपि ॥ ९६ ॥

तेन कुटी इति ङ्यन्तात्कुटीरः इति सिद्धम् । तथैव देवः इत्यस्माद्देवता गुडशब्दाद् गुडकल्पा (द्राक्षा) इत्यादि सिध्यति ॥ ९६ ॥

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥ ९७ ॥

' नञ् ' (१।३।६८) इति नञ्तत्पुरुषसमासे पूर्वपदार्थप्रधाना वृत्तिश्चेल्लिङ्गसंख्यत्वप्रसङ्गः । अन्यपदार्थप्राधान्ये अवर्षा हेमन्त इत्यत्र ह्रस्वः प्राप्नोति । अस्वर-

पदार्थप्रधानेयं वृत्तिः । यद्येवमगामानय इत्युक्ते अगोमात्रस्यानयनं स्यात् । अथ स्वयमेव निवृत्तिपदार्थको गोशब्दः स नञा केवलं द्योत्यते । एवं सति न कस्यचिदानयनं स्यात् । नायं दोषः । द्वाविह गोशब्दौ प्रवृत्तपदार्थको निवृत्तपदार्थकश्च । सारूप्यात्तयोर्भेदापरिज्ञाने निवृत्तपदार्थकस्य द्योतनार्थं नञः प्रयोगः । प्रतिषेधे सति उत्तरपदार्थसदृशो वृत्त्यर्थो ज्ञायते । तदेवोक्तम्—नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः । 'अकर्तरि' (२।३।१८) इत्यत्र अकर्तरि इत्यस्य 'कर्तुरन्यस्मिन् कारके' घञ् भवतीत्यर्थः । तथा चोक्तम्—

'नञ्युक्तमिवयुक्तं वा यत्कार्यं संप्रतीयते ।
तुल्याधिकरणेन्यस्मिन् लोकेऽप्यर्थगतिस्तथा' इति ॥ ९७ ॥

पूर्वं धुर्गिना युज्यते पश्चात् साधनवाचिना प्रत्ययेन ॥ ९८ ॥

पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनवाचिना प्रत्ययेन । तेन संचस्करुः इत्यत्र द्विपदाश्रयोपि सुट् पूर्वमुपसर्गयोगः कर्तव्यः इति वचनादन्तरङ्गत्वेन कल्पितः प्रथमं भवति । ततश्च 'ऋतः स्फादेरेप्' (५।२।१२२) इत्यनेन गुणो भवति । अत एव 'स्फादतोऽसुटः' (५।१।९१) तथा च 'स्फाघर्त्योरस्कुरेप्' (५।२।१३८) इति प्रतिषेध उपपन्नो भवति । संस्क्रियते इति च सिद्धं भवति । अस्मिन्सूत्रे 'अस्कुः' इति निषेधोप्यस्या ज्ञापकः ॥ ९८ ॥

यत्क्रियायुक्तस्तं प्रति गितिसंज्ञको भवति ॥ ९९ ॥

प्रादय उपसर्गा यत्क्रियायुक्तास्तं प्रति उपसर्गसंज्ञका गतिसंज्ञकाश्च भवन्ति नान्यं शब्दं प्रति । अत एव 'अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि । सुदत्तमनुदत्तं च निदत्तमिति चेष्यते' अस्मिन्वचने तादेशं विना कृताः अवदत्तादयः प्रयोगा युज्यन्ते । अवादीनां गम्यमानक्रियान्तरविषयत्वेन ददातिं प्रति अगतित्वात् ॥ ९९ ॥

तिवाक्कारकाणां प्राक् सुबुत्पत्तेः कृद्भिः सविधिः ॥ १०० ॥

गत्युपपदकारकाणां सुबुत्पत्तेः प्राक् कृदन्तेन सह समासो भवति । कुम्भं करोति इति कुम्भकारः इत्यत्र 'वागमिङ्' (१।३।८२) इत्यनेन उपपदस्य अतिङन्तेन सह नित्यं समास उक्तः । तत्र अमिङ् इति प्रतिषेधवचनं ज्ञापकमस्मिन् योगे 'सुप् सुपा' (१।३।३) इति नाभिसंबध्यते । एवञ्चैतल्लब्धम्—तिवाक्कारकाणां प्राक्सुबुत्पत्तेः कृद्भिः सविधिः । तेन व्रीहिवापिणी स्त्री इत्यत्र णत्वं सिद्धम् । अश्वक्रीती वस्त्रक्रीती वसनक्रीती इत्यादीनि च प्रयोजनानि । अत्र करणवाचिशब्दस्य क्रीतशब्देन सह समासः पश्चादकारान्तलक्षणो ङीब्विधिः । 'तिरश्च्यपवर्गे' (२।४।४५) इत्यत्र तिरश्ची इति निर्देशादियमनित्या । अभ्रविलिप्तीत्येवमादौ विषये अस्या व्यापारो न सर्वत्र ॥ १०० ॥

प्रधानस्य सापेक्षस्यापि वृत्तिः ॥ १०१ ॥

सापेक्षशब्दस्य वृत्तिर्न भवतीति शास्त्रविदां संकेतः । तथापि प्रधानपदं सापेक्षं चेत्तस्य वृत्तिर्नाम समासो भवति । 'व्याघ्रेरुपमेयोऽतद्योगे' (१।३।५१) इति सूत्रे अतद्योगे इति प्रतिषेधवचनमस्या ज्ञापकम् । तेन राजपुरुषो दर्शनीयः, राजपुरुषः पण्डितः इत्येवमादि सिद्धम् ॥ १०१ ॥

सापेक्षस्यापि नञः सविधिर्भवति ॥ १०२ ॥

सापेक्षत्वेपि नञः नञ्समासो भवति । 'सुडनपः' (१।१।३२) इत्यत्र अनपः इति निर्देशोस्या ज्ञापकः । तेन अश्राद्धभोजी अलवणभोजी असूर्यंपश्याः इत्यादयः सिद्धाः ॥ १०२ ॥

सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः ॥ १०३ ॥

सर्वनामशब्दस्य वृत्तौ कृतायामेव पुंवद्भावो भवति। स्त्रीप्रत्ययस्य च लोपो भवति। तेन 'दक्षिणोत्तराभ्यामतस्' (४।१।९४) इति दक्षिणाशब्दादतस्प्रत्ययो भवति पुंवद्भावेन च दक्षिणतः इति रूपं भवति । एवमेव भवतीशब्दस्यापि ठण्छप्रत्ययाभ्यां भावत्कः भवदीयः इति रूपे सिध्यतः ॥ १०३ ॥

वाग्विभक्तेः कारकविभक्तिर्बलीयसी ॥ १०४ ॥

उपपदविभक्तेः कारकविभक्तिर्बलीयसी भवति । तेन कन्यामलंकुरुते, वाग्देवतां नमस्कृत्य इत्यत्र 'कर्मणीप्' (१।४।२) इत्यनेन द्वितीया भवति ॥ १०४ ॥

लिङ्गमशिष्यं लोकाश्रयत्वात् ॥ १०५ ॥

लोकसिद्धप्रयोगतो लिङ्गं द्रष्टव्यम् । न तद्विधातव्यम् । तेन द्वाविंशतित्रयस्त्रिंशद्गणितेत्येवमादिषु समाहारेपि नपुंसकत्वाभावः । तथैव 'कुटीशमीशुण्डाभ्यो रः' (४।१।१४३) इति रप्रत्यये विहिते कुटीरः शमीरः शुण्डारः इत्यत्र लोकाश्रयत्वाल्लिङ्गस्येति पुँल्लिङ्गता । अर्धनावी इत्यर्थे अर्धनावमित्यपि भवति ॥ १०५ ॥

विशेष्यवल्लिङ्गवचनानि भवन्ति विशेषणानाम् ॥ १०६ ॥

तेन तत्पुरुषसमासे लिङ्गातिदेशो न वक्तव्यो भवति । उत्तरपदार्थस्य तु विशेष्यत्वात्प्राधान्यम् । तद्वत्तु लिङ्गवचनानि भवेयुरेव ॥ १०६ ॥

डलयोः समानविषयत्वं स्मर्यते ॥ १०७ ॥

'संज्ञाछन्दसोः पूर्वो विधिः' इत्युक्तत्वेन 'विभाषाचि' (५।३।३९) इत्यनेन विभाषया विहितं लत्वं संज्ञाविषये छन्दोविषये च पूर्वेण 'प्रो यङि' इति योगेन नित्यं भवति । डल्योः समानविषयत्वेन लकारस्य डकारो भवति । तेन व्याडः व्यालः इति रूपे भवतः । न व्यारः इति ॥ १०७ ॥

अर्थवच्छब्दरूपमनेकान्तात् सिध्यति ॥ १०८ ॥

'सिद्धिरनेकान्तात्' (१।१।१) इत्यस्यायं प्रपञ्चः । शब्दार्थसंबन्धः स्यान्नित्यः स्यादनित्यः । स सर्वथा नित्योऽनित्यो वा न भवितुमर्हति । तथा हि । विभक्त्यन्तस्य शब्दस्य प्रयोगादर्थे ज्ञानमुत्पद्यते इति संघाता अर्थवन्तो दृष्टाः । तदवयवानामङ्गविभक्तिरूपाणामपि अन्वयव्यतिरेकाभ्यामर्थवत्ता ज्ञायते । वृक्षावित्यत्र विसर्जनीयाभावादेकत्वार्थो निवृत्तः । औकारभावाद् द्वित्वं जातम् । अकारान्तवृक्षशब्दान्वयाज्जातिरन्वयिनी प्रतीयते । अन्वयव्यतिरेकौ चैकान्तवादे न स्तः । अतोन्वयव्यतिरेकाभ्यामर्थवच्छब्दरूपमनेकान्तात्सिध्यतीति शम् ॥१०८॥

इति जैनेन्द्रपरिभाषावृत्तौ संकीर्णप्रकरणं समाप्तम् ॥

ग्रन्थं नागेशभट्टानां परिभाषेन्दुशेखरम् ।
संपादयितुकामेन नानाव्याकरणस्थिताः ॥ १ ॥
वृत्तयः परिभाषाणां तथा पाठा विलोकिताः ।
तासां च संग्रहं कुर्वन् जैनेन्द्रे नोपलब्धवान् ॥ २ ॥
पाठं वा परिभाषाणां वृत्तिं वा संग्रहं तथा ।
काश्चित्तत्र मया दृष्टा वृत्तावभयनन्दिनाम् ॥ ३ ॥
उपयुक्तास्तत्र तत्र सूत्रार्थप्रतिपादने ।
तासां तु संग्रहं कृत्वाऽलेखि पाठः सवृत्तिकः ॥ ४ ॥
खदिग्दिग्भू- (१८८०) मिते शाके वत्सरे रचितो मया।
माघे कृष्णे पुण्यपुर्यां प्रारब्धः प्रतिपत्तिथौ ॥ ५ ॥
दशम्यां सुसमाप्तोयं ग्रन्थः प्रत्यर्पितो मया ।
गुरुभ्यः ख्यातनामभ्यः प्रणतिप्रतिपूर्वकम् ॥ ६ ॥

इति श्रीमदभ्यंकरोपाह्व–महामहोपाध्यायकाशिनाथशास्त्रिविरचिता
जैनेन्द्रपरिभाषावृत्तिः समाप्ता ॥

जैनेन्द्र–संज्ञासूची

अप्=चतुर्थी.
इप्=द्वितीया.
ईप्=सप्तमी.
उङ्=उपधा.
उप्=लुक्.
उस्=लुप्.
एप्=गुण.
ऐप्=वृद्धि.
का=पञ्चमी.
कि=संबुद्धि.
ख=लोप.
खु=संज्ञा.
गि=उपसर्ग.
गु=अङ्ग.
घि=लघु.
ङ=अनुनासिक.
च=अभ्यास.
जि=संप्रसारण.
झि=अव्यय.
त=निष्ठा.
ता=षष्ठी.
ति=गति.
त्य=प्रत्यय.
थ=अभ्यस्त.
द=आत्मनेपद.
दि=प्रगृह्य.
दी=दीर्घ.
दु=द्वन्द्व.
धु=उत्तरपद.
ध=सर्वनामस्थान.
धु=धातु.
नि=निपात.
न्यक्=उपसर्जन.
प्र=ह्रस्व.
ब=बहुव्रीहि.
भा=तृतीया.
भु=घु.
म=परस्मैपद.
मृत्=प्रातिपदिक.
य=कर्मधारय.
र=द्विगु.
रु=गुरु.
वा=प्रथमा.
वाक्=उपपद.
ष=तत्पुरुष.
स=समास.
स्फ=संयोग.
स्व=सवर्ण.
ह=अव्ययीभाव.
हृत्=तद्धित.

श्रीभोजदेवकृतपरिभाषासूत्राणि

१०

१ स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ १-२-१८ ॥
२ येन विधिस्तदन्तस्य ॥ १-२-१९ ॥
३ सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ॥ १-२-२० ॥
४ ऋतोर्वृद्धिमद्विधाववयवेभ्यः ॥ १-२-२१ ॥
५ प्रकृत्यधिकारे महदादिभिः ॥ १-२-२२ ॥
६ पदाधिकारेऽह्नादीभिः॥१-२-२३॥
७ प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरपञ्चम्याः ॥ १-२-२४ ॥
८ कृद्ग्रहणे गतिकारकपूर्वस्यापि ॥ १-२-२५ ॥
९ न प्रातिपदिकेन ॥ १-२-२६ ॥
१० यस्मिन्विधिस्तदादावल्ग्रहणे ॥ १-२-२७ ॥
११ सप्तम्या निर्दिष्टे पूर्वस्य ॥१-२-२८॥
१२ पञ्चम्या परस्य ॥ १-२-२९ ॥
१३ षष्ठ्यान्तस्य ॥ १-२-३० ॥
१४ ङित ॥ १-२-३१ ॥
१५ अन्त्याभावेऽन्त्यसदेशस्य ॥ १-२-३२ ॥
१६ परस्यादेः ॥ १-२-३३ ॥
१७ शिदनेकाल् सर्वस्य ॥ १-२-३४ ॥
१८ टकितावाद्यन्तौ ॥ १-२-३५ ॥
१९ मिदचोन्त्यात्परः ॥ १-२-३६ ॥
२० ऋकोऽणो रलौ ॥ १-२-३७ ॥

२१ निर्दिश्यमानस्यादेशाः ॥ १-२-३८ ॥
२२ स्थानेन्तरतमः ॥ १-२-३९ ॥
२३ एच इग् ह्रस्वादेशे ॥ १-२-४० ॥
२४ इको गुणवृद्धी ॥ १-२-४१ ॥
२५ अचो ह्रस्वदीर्घप्लुताः ॥ १-२-४२ ॥
२६ स्थानिवदादेशोऽनल्विधौ ॥ १-२-४३ ॥
२७ अचः परस्मिन् पूर्वविधौ ॥ १-२-४४ ॥
२८ न पदान्तद्विर्वचनसवर्णानुस्वारजश्चविधिषु ॥ १-२-४५ ॥
२९ स्वरदीर्घयलोपेषु लोपः ॥१-२-४६॥
३० वरकिलुकिरवोपधात्वेषु ॥१-२-४७॥
३१ पूर्वत्रासिद्धे चासंयोगादिलोपलक्षणत्वेषु ॥ १-२-४८ ॥
३२ आदिष्टादचः पूर्वस्य ॥ १-२-४९ ॥
३३ द्विर्वचनेऽचि ॥ १-२-५० ॥
३४ णिच्यनित् ॥ १-२-५१ ॥
३५ आद्यन्तवदेकस्मिन् ॥ १-२-५२ ॥
३६ प्रकृतिवदनुकरणम् ॥ १-२-५३ ॥
३७ एकदेशविकृतमनन्यवत् ॥१-२-५४॥
३८ भूतपूर्वकत्वात्तद्वदुपचारः॥१-२-५५॥
३९ भाविनि भूतवदुपचारः॥१-२-५६॥
४० अवयवेप्यवयविवदुपचारः॥१-२-५७॥
४१ प्रत्ययलोपे प्रत्ययलक्षणम् ॥ १-२-५८ ॥
४२ न लुमता प्रकृतेः ॥ १-२-५९ ॥
४३ णियकोः ॥ १-२-६० ॥

४४ उत्तरपदत्वे चापदादिविधौ
॥ १-२-६१ ॥

४५ यथासंख्यमनुदेशः समनाम्
॥ १-२-६२ ॥

४६ विवक्षातः कारकाणि ॥ १-२-६३ ॥

४७ सूत्रे लिङ्गवचनाद्यप्रामाण्यमविवक्षातः
॥ १-२-६४ ॥

४८ अपेक्षातोऽधिकारः ॥ १-२-६५ ॥

४९ एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १-२-६६ ॥

५० एकयोगनिर्दिष्टानामप्येकदेशोनुवर्तते
॥ १-२-६७ ॥

५१ चानुकृष्टमुत्तरत्र नानुवर्तते
॥ १-२-६८ ॥

५२ क्वचिदनुवर्तते ॥ १-२-६९ ॥

५३ अनन्तरस्य विधिः प्रतिषेधो वा भवति
॥ १-२-७० ॥

५४ विशेषातिदिष्टः प्रकृतं न बाधते
॥ १-२-७१ ॥

५५ अर्थवशाद्विभक्तिविपरिणामः
॥ १-२-७२ ॥

५६ समर्थः पदविधिः ॥ १-२-७३ ॥

५७ अर्थवद्ग्रहणे नानर्थकस्य
॥ १-२-७४ ॥

५८ न वर्णानिनास्मन्ग्रहणेषु ॥ १-२-७५ ॥

५९ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ १-२-७६ ॥

६० प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि
॥ १-२-७७ ॥

६१ प्रकृतिग्रहणे यङ्लुगन्तस्यापि
॥ १-२-७८ ॥

६२ न तिबनुबन्धगणैकाचां ग्रहणेषु
॥ १-२-७९ ॥

६३ आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते
॥ १-२-८० ॥

६४ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते
॥ १-२-८१ ॥

६५ संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ १-२-८२ ॥

६६ न वर्णाश्रयप्रत्ययास्वपुगल्वेड्ह्रस्वानि वर्णविचाल्पुग्ह्रस्वटाबाल्लोपसंबुद्धिलोपानाम् ॥ १-२-८३ ॥

६७ मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य
॥ १-२-८४ ॥

६८ असिद्धं बहिरङ्गमन्तरङ्गे ॥ १-२-८५ ॥

६९ नाजानन्तर्ये ॥ १-२-८६ ॥

७० गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः
॥ १-२-८७ ॥

७१ प्रसिद्धे सहचरिते च ॥ १-२-८८ ॥

७२ कृतिमाकृत्रिमयोः कृत्रिमे ॥ १-२-८९ ॥

७३ क्वचिदुभयगतिः ॥ १-२-९० ॥

७४ सिद्धे सत्यारम्भो नियमार्थः
॥ १-२-९१ ॥

७५ धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् ॥ १-२-९२ ॥

७६ नञ्युक्तस्य तत्सदृशे ॥ १-२-९३ ॥

७७ उक्तार्थानामप्रयोगः ॥ १-२-९४ ॥

७८ निमित्ताभावे नैमित्तिकस्याप्यभावः
॥ १-२-९५ ॥

७९ संनियोगशिष्टानामेकापायेऽन्यतरस्याप्यपायः ॥ १-२-९६ ॥

८० नान्वाचीयमाननिवृत्तौ प्रधानस्य
॥ १-२-९७ ॥

८१ निरनुबन्धकग्रहणे न सानुबन्धकस्य
॥ १-२-९८ ॥

८२ एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य
॥ १-२-९९ ॥

८३ नानुबन्धकृतान्यसारूप्यानेजन्तत्वाने-
कालत्वानि ॥ १-२-१०० ॥
८४ समासान्तागमसंज्ञाज्ञापकगणनञ्निर्दि-
ष्टान्यानेत्यानि ॥ १-२-१०१ ॥
८५ उत्सर्गापवादयोरपवादो विधिर्बलवान्
॥ १-२-१०२ ॥
८६ अपवादविषये क्वचिदुत्सर्गस्यापि समा-
वेशः ॥ १-२-१०३ ॥
८७ पुरस्तादपवादा अनन्तरान् विधीन्
बाधन्ते ॥ १-२-१०४ ॥
८८ मध्येऽपवादाः पूर्वान् ॥१-२-१०५॥
८९ कृद्वाऽसरूपोऽस्त्रियाम् ।१-२-१०६॥
९० यं विधिं प्रत्युपदेशोनर्थकः स विधिः
बाध्यते। यस्य तु विधेर्निमित्तमेव नासौ
बाध्यते ॥ १-२-१०७ ॥
९१ यन नाप्राप्ते यो विधिरारभ्यते स तस्य
बाधकः ॥ १-२-१०८ ॥
९२ बलवन्नित्यमनित्यात् ॥१-२-१०९॥
९३ अन्तरङ्गं बहिरङ्गात ॥१-२-११०॥
९४ निरवकाशं सावकाशात्
॥ १-२-१११ ॥
९५ वार्णात् प्राकृतम् ॥ १-२-११२ ॥
९६ संप्रसारणं संप्रसारणाश्रयं च
॥ १-२-११३ ॥
९७ उपपदविभक्तेः कारकविभक्तिः
॥ १-२-११४ ॥
९८ लुगन्तरङ्गेभ्यः ॥ १-२-११५ ॥
९९ सर्वेभ्यो लोपः ॥ १-२-११६ ॥
१०० लोपादजादेशः ॥ १-२-११७ ॥
१०१ आदेशादागमः ॥ १-२-११८ ॥
१०२ आगमात्सर्वादेशः ॥१-२-११९॥
१०३ विप्रतिषेधे परं कार्यम्
॥ १-२-१२० ॥
१०४ सकृद्गतौ विप्रतिषेधे यद् बाधितं तद्
बाधितमेव ॥ १-२-१२१ ॥
१०५ पुनःप्रसङ्गविज्ञानात सिद्धम्
॥ १-२-१२२ ॥
१०६ क्वचित् पूर्वम् ॥ १-२-१२३ ॥
१०७ नानिष्टार्था शास्त्रप्रवृत्तिः
॥ १-२-१२४ ॥
१०८ प्रकृतिवृत्ते पुनर्वृत्तावविधिः निष्ठितस्य
॥ १-२-१२५ ॥
१०९ यावत्संभवस्तावद्विधिः
॥ १-२-१२६ ॥
११० पर्जन्यवल्लक्षणप्रवृत्तिः
॥ १-२-१२७ ॥
१११ अकृतकारि खल्वपि शास्त्रम्
॥ १-२-१२८ ॥
११२ कार्यकालं संज्ञापरिभाषम्
॥ १-२-१२९ ॥
११३ यथोद्देशं संज्ञापरिभाषं प्रवर्तते
॥ १-२-१३० ॥
११४ प्रत्येकं वाक्यपरिसमाप्तिः
॥ १-२-१३१ ॥
११५ समुदाये वाक्यपरिसमाप्तिः
॥ १-२-१३२ ॥
११६ व्याख्यानतो विशेषप्रतिपत्तिः
॥ १-२-१३३ ॥
११७ अभिधानलक्षणाः कृत्तद्धितसमासाः
॥ १-२-१३४ ॥
११८ प्रत्ययः परः ॥ १-२-१३५ ॥

इति श्रीभोजदेवकृतपरिभाषासूत्राणि समाप्तानि । समाप्तश्च श्रीसरस्वती-
कण्ठाभरणनाम्नि व्याकरणे प्रथमस्याध्यायस्य द्वितीयः पादः ॥

हेमहंसगणिसंगृहीतः श्रीसिद्धहेमचन्द्रव्याकरणस्य

न्यायसंग्रहः ॥

११

ॐरूपाय नमः श्रीमद्धेमव्याकरणाय च ।

श्रीसोमसुन्दरगुरूत्तंसाय च नमो नमः ॥

अथ ये तु शास्त्रे सूचिता लोकप्रसिद्धाश्च न्यायाः तदर्थं यत्नः क्रियते ।

१ स्वं रूपं शब्दस्याशब्दसंज्ञा ॥
२ सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य ॥
३ ऋतोर्वृद्धिमद्विधाववयवेभ्यः ॥
४ स्वरस्य ह्रस्वदीर्घप्लुताः ॥
५ आद्यन्तवदेकस्मिन् ॥
६ प्रकृतिवदनुकरणम् ॥
७ एकदेशविकृतमनन्यवत् ॥
८ भूतपूर्वकस्तद्वदुपचारः ॥
९ भाविनि भूतवदुपचारः ॥
१० यथासंख्यमनुदेशः समानाम् ॥
११ विवक्षातः कारकाणि ॥
१२ अपेक्षातोऽधिकारः ॥
१३ अर्थवशाद्विभक्तिविपरिणामः ॥
१४ अर्थवद्ग्रहणे नानर्थकस्य ॥
१५ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥
१६ नामग्रहणे लिङ्गविशिष्टस्यापि ॥
१७ प्रकृतिग्रहणे यङ्लुबन्तस्यापि ॥
१८ तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च । एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि ॥
१९ संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥
२० असिद्धं बहिरङ्गमन्तरङ्गे ॥
२१ न स्वरानन्तर्ये ॥
२२ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥
२३ कृत्रिमाकृत्रिमयोः कृत्रिमे ॥
२४ क्वचिदुभयगतिः ॥
२५ सिद्धे सत्यारम्भो नियमार्थः ॥
२६ धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् ॥
२७ नञ्युक्तं तत्सदृशे ॥
२८ उक्तार्थानामप्रयोगः ॥
२९ निमित्ताभावे नैमित्तिकस्याप्यभावः ॥
३० संनियोगशिष्टानामेकापायेऽन्यतरस्याप्यपायः ॥
३१ नान्वाचीयमाननिवृत्तौ प्रधानस्य ॥
३२ निरनुबन्धग्रहणे न सानुबन्धकस्य ॥
३३ एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ॥
३४ नानुबन्धकृतानि असारूप्यानेकस्वरत्वानेकवर्णत्वानि ॥
३५ समासान्तागमसंज्ञाज्ञापकगणनञ्निर्दिष्टानि अनित्यानि ॥
३६ पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥

३७ मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥

३८ यं विधिं प्रति उपदेशोऽनर्थकः स विधिर्बाध्यते ॥

३९ यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्बाध्यते ॥

४० येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः ॥

४१ बलवन्नित्यमनित्यात् ॥

४२ अन्तरङ्गं बहिरङ्गात् ॥

४३ निरवकाशं सावकाशात् ॥

४४ वार्णात्प्राकृतम् ॥

४५ य्वृद् य्वृदाश्रयं च ॥

४६ उपपदविभक्तेः कारकविभक्तिः ॥

४७ लुबन्तरङ्गेभ्यः ॥

४८ सर्वेभ्यो लोपः ॥

४९ लोपात् स्वरादेशः ॥

५० आदेशादागमः ॥

५१ आगमात् सर्वादेशः ॥

५२ परान्नित्यम् ॥

५३ नित्यादन्तरङ्गम् ॥

५४ अन्तरङ्गाच्चानवकाशम् ॥

५५ उत्सर्गादपवादः ॥

५६ अपवादात् कचिदुत्सर्गोऽपि ॥

५७ नानिष्टार्था शास्त्रप्रवृत्तिः ॥

एते न्यायाः प्रभुश्रीहेमचन्द्राचार्यैः स्वोपज्ञसंस्कृतशब्दानुशासनबृहद्वृत्तिप्रान्ते समुच्चिताः ॥

असमुच्चितास्त्वेते—

५८ प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानामपि ग्रहणम् ॥

५९ प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ॥

६० अदाद्यनदाद्योरनदादेरेव ॥

६१ प्राकरणिकाप्राकरणिकयोः प्राकरणिकस्यैव ॥

६२ निरनुबन्धग्रहणे सामान्येन ॥

६३ साहचर्यात्सदृशस्यैव ॥

६४ वर्णग्रहणे जातिग्रहणम् ॥

६५ वर्णैकदेशोऽपि वर्णग्रहणेन गृह्यते ॥

६६ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥

६७ आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते।

६८ स्वाङ्गमव्यवधायि ॥

६९ उपसर्गो न व्यवधायी ॥

७० येन नाव्यवधानं तेन व्यवहितेऽपि स्यात् ॥

७१ ऋकारापदिष्टं कार्यं लृकारस्यापि ॥

७२ सकारापदिष्टं कार्यं तदादेशस्य शकारस्यापि ॥

७३ ह्रस्वदीर्घापदिष्टं कार्यं न प्लुतस्य ॥

७४ संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं न तदन्तस्य ॥

७५ ग्रहणवता नाम्ना न तदन्तविधिः ॥

७६ अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥

७७ गामादाग्रहणेष्वविशेषः ॥

७८ श्रुतानुमितयोः श्रौतो विधिर्बलीयान् ॥

७९ अन्तरङ्गानपि विधीन् बहिरङ्गो यबादेशो बाधते ॥

८० संकृद्गते स्पर्द्धे यद् बाधितं तद् बाधितमेव ॥

८१ द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधकः ॥

८२ कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये पश्चाद् वृद्धिस्तद्बाध्योऽट् च ॥

८३ पूर्वं पूर्वोत्तरपदयोः कार्यं कार्यं पश्चात् संधिकार्यम् ॥

८४ संज्ञा न संज्ञान्तरबाधिका ॥

८५ सापेक्षमसमर्थम् ॥

८६ प्रधानस्य तु सापेक्षत्वेपि समासः ॥

८७ तद्धितीयो भावप्रत्ययः सापेक्षादपि ॥

८८ गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समासः ॥

८९ समासतद्धितानां वृत्तिर्विकल्पेन, वृत्तिविषये च नित्यैवापवादवृत्तिः ॥

९० आ दशभ्यः संख्या संख्येये वर्तते न संख्याने ॥

९१ एकशब्दस्यासंख्यात्वं क्वचित् ॥

९२ णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद् भवति ॥

९३ द्विर्बद्धं सुबद्धं भवति ॥

९४ आत्मनेपदमनित्यम् ॥

९५ क्विपि व्यञ्जनकार्यमनित्यम् ॥

९६ स्थानिवद्भावपुंवद्भावैकशेषद्वन्द्वैकत्वदीर्घत्वान्यनित्यानि ॥

९७ अनित्यो णिच् चुरादीनाम् ॥

९८ णिलोपोऽप्यनित्यः ॥

९९ णिच्संनियोगे एव चुरादीनामदन्तता ॥

१०० धातवोनेकार्थाः ॥

१०१ गत्यर्था ज्ञानार्थाः ॥

१०२ नाम्नां व्युत्पत्तिरव्यवस्थिता ॥

१०३ उणादयोऽव्युत्पन्नानि नामानि ॥

१०४ शुद्धधातूनामकृत्रिमं रूपम् ॥

१०५ क्विबन्ता धातुत्वं नोज्झन्ति शब्दत्वं च प्रतिपद्यन्ते ॥

१०६ उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभाक् ॥

१०७ अवयवे कृतं लिङ्गं समुदायमपि विशिनष्टि चेत्तं समुदायं सोऽवयवो न व्यभिचरति ॥

१०८ येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञाः ॥

१०९ यत्रोपसर्गत्वं न संभवति तत्रोपसर्गशब्देन प्रादयो लक्ष्यन्ते न तु संभवत्युपसर्गत्वे ॥

११० शीलादिप्रत्ययेषु नासरूपोत्सर्गविधिः ॥

१११ त्यादिष्वन्योन्यं नासरूपोत्सर्गविधिः ॥

११२ क्तीक्तलना अलो बाधकाः क्तियाः क्तलनौ ॥

११३ यावत्संभवस्तावद्विधिः ॥

११४ संभवे व्यभिचारे च विशेषणमर्थवत् ॥

११५ सर्वं वाक्यं सावधारणम् ॥

११६ परार्थे प्रयुज्यमानः शब्दो वतमन्तरेणापि वदर्थं गमयति ॥

११७ द्वौ नञौ प्रकृतमर्थं गमयतः ॥

११८ चकारो यस्मात्परस्तत्सजातीयमेव समुच्चिनोति ॥

११९ चानुकृष्टं नानुवर्तते ॥

१२० चानुकृष्टेन न यथासंख्यम् ॥

१२१ व्याख्यातो विशेषार्थप्रतिपत्तिः ॥

१२२ यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते ॥

इत्येते पञ्चषष्टिः पूर्वैः सह द्वाविंशं शतं न्याया व्यापका ज्ञापकादियताश्च ॥
अतः परं तु ये वक्ष्यन्ते ते केचिदव्यापकाः प्रायः सर्वे ज्ञापकादिरहिताश्च ।

१२३ यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः॥
१२४ यस्य येनाभिसंबन्धो दूरस्थस्यापि तेन सः ॥
१२५ येन विना यन्न भवति तत्तस्यानिमित्तस्यापि निमित्तम् ॥
१२६ नामग्रहणे प्रायेणोपसर्गस्य न ग्रहणम्॥
१२७ सामान्यातिदेशे विशेषस्य नातिदेशः॥
१२८ सर्वत्रापि विशेषेण सामान्यं बाध्यते नतु सामान्येन विशेषः ॥
१२९ क्त्विन कित्त्वं बाध्यते ॥
१३० परादन्तरङ्गं बलीयः ॥
१३१ प्रत्ययलोपेपि प्रत्ययलक्षणं कार्यं विज्ञायते ॥
१३२ विधिनियमयोर्विधिरेव ज्यायान् ॥
१३३ अनन्तरस्यैव विधिर्निषेधो वा ॥
१३४ पर्जन्यवल्लक्षणप्रवृत्तिः ॥
१३५ न केवला प्रकृतिः प्रयोक्तव्या ॥
१३६ क्विबर्थं प्रकृतिरेवाह ॥
१३७ द्वन्द्वात्परः प्रत्येकमभिसंबध्यते ॥
१३८ विचित्राः शब्दशक्तयः ॥
१३९ किं हि वचनान्न भवति ॥
१४० न्यायाः स्थविरयष्टिप्रायाः ॥

एतेऽष्टादश न्यायाः पूर्वैः सर्वैः सह चत्वारिंशं शतं स्तोकस्तोकवक्तव्याः ॥

एकस्त्वयं बहुवक्तव्यः —

१७१ शिष्टनामनिष्पत्तिप्रयोगधातूनां सौत्रत्वाल्लक्ष्यानुरोधाद्वा सिद्धिः ॥

इति हेमहंसगणिसंगृहीतः श्रीसिद्धहेमचन्द्रव्याकरणस्थन्यायसंग्रहः ॥

श्रीपुरुषोत्तमदेवकृता लघुपरिभाषावृत्तिः ।

१२

ओं नमः

अथातः परिभाषाणां वचनानां च तादृशाम् ।
संक्षिप्य ललितां वृत्तिं प्रस्तौति पुरुषोत्तमः ॥

अर्थवद्ग्रहणे नानर्थकस्य ॥ १ ॥

अर्थवदनर्थकग्रहणविचारे अर्थवत एव ग्रहणं नान्यस्य । तद्यथा । 'दाधा घ्वदाप्' (१।१।२०) इत्यत्र अर्थवतोरेव दा धा इति धात्वोर्ग्रहणम् । नतु दाप् दाने धाबु गतिशुद्ध्योरिति धात्वेकदेशयोः । 'शे' (१।१।१३) इति प्रगृह्यसंज्ञायां सुपामादेशस्य ग्रहणं न तु काशे कुशे इति पदैकदेशस्यानर्थकस्य ॥ स्वरूपविधिविषया चेयम् । 'अर्थवद्०' (१।२।४५) इत्यादावर्थवद्ग्रहणात् । तेन प्रलम्बत इत्यनर्थकादप्यव्ययाल्लुक् सिद्धो भवति॥

इह च काश्चित् परिभाषा न्यायमूलाः । यथेयमेवार्थवद्ग्रहणे इति । अर्थप्रतिपादनाय खलु शब्दान्वाख्यानमित्यनर्थकोपादानस्यायुक्तत्वात् । काश्चित्तु वचनमूलाः । यथा लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति । उभयीनामासां परिभाषाणां पाणिनिसूत्राणामिव यद्यपि पृथगेव प्रामाण्यमिष्यते विधिनिग्रहाविष्टाः सूत्रसूत्रैकदेशान्यथानुपपत्तिलक्षणेन ज्ञापकेनैताः प्रमाणयन्ति । तत्रास्याः प्रामाण्ये 'स्वं रूपम०' (१।१।६८) इति स्वरूपग्रहणं ज्ञापकम् । तत्र ह्युक्तं शब्दप्रतीतानुपदेशानपेक्षत्वादसाधारणत्वान्नियसंबन्धित्वाच्च स्वरूपमेव प्रत्यासन्नं नार्थो विपर्ययात् । अतः स्वग्रहणादेव रूपपरिग्रहे सिद्धे व्याकरणे रूपवदर्थोऽप्यङ्गीक्रियत इति रूपग्रहणमिति । रूपवदर्थोऽप्यङ्गीक्रियत इति अर्थवान् शब्दो गृह्यते इति अर्थवद्ग्रहणपरिभाषाया एवायमर्थः संपद्यते ॥

अथवा व्रश्चादि-(८।२।३६) सूत्रे भ्राजग्रहणमस्याः सत्त्वज्ञापकम् । यदि हि निरर्थकस्यापि हि ग्रहणं भवति तदा तत्र राजग्रहणेनैव भ्राजैकदेशस्यापि राजशब्दस्य ग्रहणं सिद्धं भवति । 'यजराजभ्राज०' इति भ्राजग्रहणं पृथग्न कुर्यात् । कृतं तु । अतो ज्ञापकम्—अर्थवत एव ग्रहणं नान्यस्येति ॥

अथेयं परिभाषा लिङ्गवती विध्यङ्गशेषभूता वा । तत्र न लिङ्गवती । 'इको गुणवृद्धी' (१।१।३) इतिवत् लिङ्गानिर्देशात् । विध्यङ्गानां विधिसूत्राणां शेषभूता एकदेशत्वं प्राप्ता स्वियम् । तथाहि । 'शे' (१।१।१३) इत्यनेनानया सह संहत्यार्थवतः शेशब्दस्य ग्रहणेन प्रगृह्यसंज्ञा विधीयते । एवमन्यत्रापि परिभाषाणां विध्यङ्गभाव उन्नेयः ॥ १ ॥

---

१ P ज्ञापकेनैव ताः. २ P इति for भवति.

न वर्णग्रहणेषु ॥ २ ॥

पूर्वापवादोयम्। वर्णा अकारेकारादयः तद्ग्रहणे[१] अर्थवद्[२]ग्रहणपरिभाषा नोपतिष्ठते। यथा 'अस्य च्वौ' (७।४।३२) इतीत्वमनर्थकस्याप्यकारस्य भवति। शुक्लीकरोति[३]। अन्यथा ह्यर्थवत एव विधौ कृष्ण[४]वाचिनः अकारस्य स्यात्। तथा 'इको यणचि' (६।१।७७) इति इक् अज्मात्रे यण् भवति। दध्यत्र देव्यमुत्र[५]। एवं 'यस्येति च' (६।४।१४८) इति लोप इकाराकारमात्रयोर्भवति[६] नार्थवतोरेव। अत्र ज्ञापकं—'भक्ष्येण मिश्रीकरणम्' (२।१।३५) 'आगस्त्यकौण्डिन्ययोः०' (२।४।७०) 'काश्यपकौशिकाभ्यामृषिभ्याम्०' (४।३।१०२) इत्यादिनिर्देशाः। 'तितिस्थि[७]०' (३।४।७८) इति सूत्रे ल्टिटष्टकारं प्रत्याचक्षाणेन न्यासकृता वर्णग्रहणेपि अर्थवद्ग्रहणपरिभाषोक्ता प्रौढिवादेन ॥ २ ॥

लक्षणप्रतिपदोक्तयोः प्रतिप्रदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ॥ ३ ॥

लक्षणं लाक्षणिकमुपचारात्। प्रतिपदोक्तं विशेषेण प्रतिपादितम्। प्रतिपदशब्दस्य विशेषार्थत्वात्। अनयोः संप्रधारणायां प्रतिपदोक्तस्यैव ग्रहणं भवति न तु लाक्षणिकस्य खण्डशो व्युत्पादितस्य। ईङो[८] णिचि 'क्रीङ्जीनां णौ' (६।१।४८) इत्यात्वे कृते पुकि च आप्–रूपे संपन्नेपि लाक्षणिकत्वात् 'विभाषापः' (६।४।५७) इति णेरयादेशो न भवति अध्याप्य गत इति। प्रतिपदोक्तत्वात्[९] आप्लृधातोर्भवति प्राप्य प्राप्येति। तथा 'विभाषा दिक्समासे०' (१।१।२८) इति सर्वनामसंज्ञाविधाने 'दिङ्नामान्यन्तराले' (२।२।२६) इति प्रतिपदोक्तस्यैव ग्रहणं बहुव्रीहेर्भवति दक्षिणपूर्वस्यै इति। न तु या पूर्वा सोत्तरा यस्योन्मुग्धस्य स पूर्वोत्तरस्तस्मै पूर्वोत्तराय देहीति ॥

ज्ञापकं चास्याः 'कर्तरि भुवः खिष्णुच्खुकञौ' (३।२।५७) इति खिष्णुच इकारादित्वम्। तद्धि न रूपसिद्ध्यर्थम्[१०]। भुव उदात्तत्वादिटि सति आढ्यंभविष्णुरित्यस्य सिद्धत्वात्। किं तर्हि नञः[११] 'कृत्योकेष्णुच्चार्वादयश्च' (६।२।१६०) इति कृदजादित्वात्स्वरविधौ प्रतिपदोक्तग्रहणं यथा स्यात्तेनानाढ्यंभविष्णुरित्यत्र नञ उत्तरस्येष्णुजन्तस्यान्तोदात्तत्वं यथा स्यादिति। इटि तु कृते इष्णुचो[१२]स्य लाक्षणिकत्वान्नात्र ग्रहणं स्यादिति।

---

१ P तद्ग्रहणेषु for तद्ग्रहणे. २ M अर्थग्रहण०. ३ P ins. इति after शुक्लीकरोति. ४ P विष्णु for कृष्ण. ५ P मध्वत्र for देव्यमुत्र. ६ After भवति, P. ins. तेनाग्नेयो दाक्षिरित्यादावपि स्यात्। न स्वर्थवतोरेव। अन्यथा हि 'अत इञ्' (४।१।९५) अस्यापत्यं इः। एरपत्यं 'यञिञोश्च' (४।१।१०१) इति फक् आयन इहैव स्यात्। ७ M. om. तितस्थि (३।४।७८) इति सूत्रे...प्रौढिवादेन। ८ Before इङो णिचि P. ins. तथा। ९ P. प्रतिपदोक्तस्य तु आप्लृधातोः १० इति रूपसिद्धेः। ११ M. om. नञः...इति. १२ P इष्णुजुत्पत्तावस्य.

ख्ष्णुच इकारादित्वमस्याः परिभाषाया ज्ञापकम् । अनित्यत्वं चास्याः ' यावत्पुरानिपातयोर्लट् ' (३।३।४) इति निपातयोरिति विशेषणेन ज्ञापितम् । यदि हीयं नित्या स्याद् प्रतिपदोक्तत्वादेव यावत्पुरानिपातयोर्भवति न लाक्षणिकयोर्वत्वन्ततृतीयान्तयोरिति किं निपातयोरित्यनेन । कृतं चैतत् । तेनास्यानित्यत्वं सिध्यति । तेन धाग्रहणे धेटोपि ग्रहणं सिद्ध्यति ॥ ३ ॥

औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ ४ ॥

उपदेशे भव औपदेशिकः । प्रयोगे भवः प्रायोगिकः । तयोर्मध्ये औपदेशिकस्यैव ग्रहणं भवति । तथथा । 'तरप्तमपौ घः' (१।१।२२) इति घसंज्ञायां तरपः प्रत्ययस्यै-वौपदेशिकस्य ग्रहणं भवति न तु नदीतर इति तरतेरप्प्रत्यये कृते प्रयोगस्यस्य । यदि हि स्याद् ' घरूप० ' (६।३।४३) इत्यादिना ङ्यो ह्रस्वः स्यात् ॥

ज्ञापकं चात्र 'श्वीदितो निष्ठायाम्' (७।२।१४) इति इण्निषेधार्थं श्विग्रहणम् । यदि हि प्रायोगिकस्यापीह शास्त्रे ग्रहणं अभविष्यत् संप्रसारणे कृते पूर्वरूपत्वे च कृते शूनः शूनवानित्यत्रोगन्तत्वाच् ' श्र्युकः ' किति (७।२।११) इति निषेधे सिद्धे पृथक् श्विग्रहणं नाकरिष्यत् । अत्र चोदयन्ति । यद्यनेनैव ज्ञापकसिद्धेन परिभाषार्थेन प्रायोगिकस्य ग्रहणं निरस्तं तत्किमर्थं क्वचिन्निषेधार्थं ' उपदेशेऽजनुनासिक इत् ' (१।३।२) 'स्यसिच्सीयुट्०' (६।४।६२) इत्यादौ चोपदेशग्रहणं क्रियते । तदत्र ज्ञापकादिना प्रतिपत्तिर्गरीयसी इति प्रतिपत्तिगौरवपरिहारार्थं तत्रतत्रोपदेशग्रहणं कृतामिति सिद्धान्तः ॥ ४ ॥

गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ ५ ॥

शब्दश्रुतिमात्रेण प्रतीयमानोर्थो मुख्यः । प्रयत्नोपपादितश्च गौणः । तयोर्मध्ये भवति कार्ययोगित्वं मुख्य एव । तथथा । आग्नेय इति । 'अग्नेर्ढक्' (४।२।३३) इत्यत्राग्निशब्दादग्न्यर्थाड्ढक् । न पुनरग्निर्माणवक इत्यादेरुपचरितार्थवृत्तेर्गौणात् । न्यायमूला चेयं परिभाषा। तदुक्तं लौकिक एवायं न्यायः । लोके हि 'गौरनुबध्यताम् ' इति न वाहीके कार्यसंप्रत्ययः॥

ज्ञापकं चात्र द्यावापृथिव्यादि–(४।२।३२) सूत्रे अग्नीषोम इति षत्वार्थं निपातनम्। षत्वं ह्यत्र ' अग्नेः स्तुत्स्तोमसोमाः ' (८।३।८२) इति ह्रस्वेकारान्तान्मुख्यादग्निशब्दस्य परस्य सोमशब्दस्योच्यमानम् 'ईदग्नेः सोमवरुणयोः' (६।३।२७) इति ईत्त्वे[8] कृते एकदेशविकृतद्वारेण स एवायमिति संप्रत्यये गौणत्वान्न प्राप्नोति । अतः षत्वार्थमग्नीषोम इति निपातनं ज्ञापकमेवेति । न च ' अग्नेः स्तुत्स्तोमसोमाः' (८।३।८२) इति वचन-

---

१ M. om. कृतं...सिध्यति । २ Before तयोर्मध्ये, P. ins. अध्यात्मादित्वाद् ठञ् । ३ P. कृते यः प्रयोगस्तस्य. ४ After संप्रसारणे, P. ins. बलवति. ५ After गौरव, P. ins. दोष. ६ M. उपचारार्थात् for उपचरितार्थवृत्तेः. ७ After सूत्रे, P. ins. भागुरिप्रणीतं. ८ M. दीर्घत्वे for ईत्वे. ९ M. गौणः for सः.

सामर्थ्यात् पैत्वमाशङ्कनीयम् । अग्नीषोमाख्यौ कौचिदित्यत्रादेवताद्वन्द्वे वचनस्य चरितार्थत्वसंभवादिति । लक्ष्यवशात् कचिद्गौणोप्यर्थः स्वीक्रियते । यथा 'शीतोष्णाभ्यां कारिणि' (५।२।७२) इति कन्विधौ शीतकोलसः उष्णको दक्ष इति । इह च 'गोतो णित्' (७।१।९०) इति गोशब्दप्रधानत्वान्निर्देशस्यार्थाश्रययोर्गौणमुख्यत्वयोर्न विचार इति गौर्वाहीकः गां वाहीकमानय इति वृद्धयात्वे भवतः ॥ ५ ॥

बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ६ ॥

गुणो विशेषणमुपलक्षणं च चित्रगुत्वादिः । स गुणो यस्यासौ तद्गुणः । बहुव्रीहौ समासे तद्गुणस्य विशेषणसहितस्यार्थस्य संविज्ञानं संप्रत्ययः कार्यः । तद्यथा । 'सर्वादीनि सर्वनामानि' (१।१।२७) इत्यत्र सर्वशब्दस्यापि संज्ञा भवति । 'तसौ मत्वर्थे' (१।४।१९) इति उपलक्षणभूते मतुप्यपि भसंज्ञा भवति । सूत्रे अपिशब्दादतद्गुणसंविज्ञानमपि कचिद् बोद्धव्यम् । तदुक्तं भाष्ये—सिद्धं तु तद्गुणातद्गुणाभ्यां पाणिनेर्यथा लोके । लोके हि तद्गुणश्चातद्गुणश्च बहुव्रीहिर्दृश्यते । लम्बकर्णमानय चित्रगुमानयेति । तद्गुणग्रहणे चात्र 'आढ्यसुभगस्थूल०' (३।२।५६) इति सूत्रे च्व्यर्थेष्विर्त्युक्तत्वादच्वाविति ज्ञापकम् । यदि ह्यतद्गुण एव बहुव्रीहिः स्यात्तदा च्विरर्थो येषामिति उपलक्षणत्वादेव च्व्यन्तस्य न भविष्यति । किमच्वाविध्यनेन । कृतं च । ततो ज्ञापयति ॥ ६ ॥

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः ॥ ७ ॥

पारिभाषिकं कृत्रिमम् । ततोन्यदकृत्रिमम् । तयोर्मध्ये कृत्रिम एव कार्यसंप्रत्ययः कार्यपरिज्ञानं भवति । यथा 'कर्मणि द्वितीया' (२।३।२) इति पारिभाषिकं कर्तुरीप्सिततमं कर्म (१।४।४९) गृह्यते न लौकिकं क्रियाकर्म । 'एको गोत्रे' (४।१।९३) इति पारिभाषिकं पौत्रप्रभृति अपत्यं गोत्रं (४।१।१६२) नापत्यमात्रम् । न्यायमूलैव चेयं कृत्रिमाकृत्रिमपरिभाषा । यथा लोके नीलंवृषमुत्सृजेदिति न कृष्णो वृष उत्सृज्यते । किं तर्हि–

" लोहितो यस्तु वर्णेन पुच्छाग्रेण तु पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते "

इति स्मृत्या परिभावितः ॥

आरभ्यमाणा पुनरियं कचिदेवाश्रीयते । यदाह भाष्यकृत्–उभयगतिरिह शास्त्रे कृत्रिमाकृत्रिमग्रहणमिति । तथाहि । 'कर्मणि द्वितीया' (२।३।२) इति कृत्रिमस्य कर्मणो ग्रहणम् । 'कर्तरि कर्मव्यतिहारे' (१।३।१४) इति तु अकृत्रिमस्य । एवं

---

१ M. मुख्यत्वं for पत्वं. २ P. ततो हि for इति. ३ M. om. कार्यः. ४ P. इत्युक्त्वा अच्वाविति प्रतिषेधो ज्ञापकः. ५ P. 'नीलं वा वृषमुत्सृजेत्' इति. ६ P. शास्त्रे कचित्कृत्रिमग्रहणं कचिदकृत्रिमस्येति ।

'कर्तृकरणयोस्तृतीया' (२।३।१८) इति कृत्रिमस्य करणस्य ग्रहणम्। 'काम्मेभ्यः करणे' (३।१।१७) इत्यत्राकृत्रिमस्य। 'सप्तम्यधिकरणे च' (२।३।३६) इति कृत्रिमस्याधिकरणस्य 'विप्रतिषिद्धं चानधिकरणवाचि' (२।४।१३) इत्यत्राकृत्रिमस्य। तदिहोभयगतिरिति ॥

भाष्यवचनस्याचार्यसंमतौ ज्ञापकमाह–'संख्याया अतिशदन्तायाः कन्' (५।१।२२) इति प्रतिषेधं करोति। नहि कृत्रिमा संख्या शदन्ता संभवति। तथा यदयं 'ष्णान्ता षट्' (१।१।२४) इति ष्णान्तेन संख्याया विशेषणं करोति। न हि कृत्रिमा संख्या ष्णान्तास्तीति ॥ अथ किमिदं परस्परविरोधि वाक्यद्वयं प्रमाणमिति। यदि कृत्रिमग्रहणं कथमुभयगतिः, अथ उभयगतिः, कथमकृत्रिमग्रहणम्। उच्यते। 'न हिंस्यात्सर्वभूतानि' 'यागार्थं पशवः सृष्टाः' इतिवदाचार्यवचनप्रामाण्यादुभयम्। यदाह मिहिरः–

मुनिवचनविरोधे युक्तता केन चिन्त्या।

अथवा सामान्यविशेषद्वारेण वचनद्वयमिदं योजनीयमिति। एवमन्यत्रापि विरोधाभाव उह्यः ॥ ७ ॥

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥ ८ ॥

प्रागुच्यमाना अपवादा निकटानेवोत्सर्गान् बाधन्ते न व्यवहितान्। व्यवहितार्थोत्रोत्तरशब्दः। तद्यथा। 'ह्वावामश्च' (३।२।२) इति अपवादो निकटमेव 'आतोनुपसर्गे कः' (३।२।३) इति कं बाधते। न तु व्यवहितं ताच्छीलिकं णिनिं स्वर्गह्वायी धान्यमायी। बाध्यविशेषचिन्तायां त्वेषा प्रवर्तते न समुदायमात्रापेक्षायामिति 'इको झल्' (१।२।९) इत्यत्र न्यासकृतोक्तम्। ज्ञापकं चास्याः 'परिमाणाख्यायां सर्वेभ्यः' (३।३।२०) इति सर्वग्रहणम्। तद्धि द्वौ सकारौ त्रयः सकाराः इत्यत्रापो बाधनार्थं क्रियते। अन्यथा पुरस्तादपवादन्यायेन निकटस्य 'एरच्' (३।३।५६) इत्यस्यैव बाधनं स्यादिति। ननु चायमर्थोनन्तरस्य विधिर्वा भवति प्रतिषेधो वेत्यनेनैव सिध्यति। सत्यम्। तर्हि प्रपञ्चार्थोस्तु ॥ ८ ॥

मध्येपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ ९ ॥

तद्यथा। 'इणो यण्' (६।४।८१) इति मध्येपवादः पूर्वमियङ्विधिं बाधते यन्ति ईयतुः ईयुरिति। न परौ वृद्धिगुणौ अयनम् आयकः। एवं कृञो हेत्वादौ टविधिः (३।२।२०) पूर्वमणं बाधते न परं ताच्छीलिकणिनिं श्राद्धकारीति। ज्ञापकं चात्र 'बहुली-

१ After अकृत्रिमस्य, P. ins. B. क्रियाकर्मणः. २ Before प्रतिषेधं, M. ins. यत्. ३ M. om अथ उभयगतिः. ४ P. मा for न. ५ After धान्यमायी P. ins. इति. ६ P कारौ and काराः for सकारौ and सकाराः.

हेरूधसो ङीष्' (४।१।२५) इत्यत्र ङीषः स्वरितत्वासञ्जनं सूत्रकारेण [1]वृत्तिकारप्रतिपादितम्। तद्धि अनुवृत्तिसामर्थ्यात् 'अन उपधालोपिनोन्यतरस्याम्' (४।१।२८) इति भविष्यतोपि ङीपो बाधनार्थम्। घटोघ्नीति। अन्य[2]था ह्ययमनन्तरत्वात्पूर्वयोर्ङीप्प्रतिषेधयोरेव बाधकः। ङीप्ङीषोश्च स्वरे विशेषः। न्यायमूलत्वमस्याः 'इणो यण्' (६।४।८१) इत्यत्र न्या[3]सकृतोक्तम्॥ ९॥

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य॥ १०॥

आनन्तर्यलक्षणो विधिस्तद्विघातस्य निमित्तं न भवति। यदा[4]नन्तर्ये यो विधिस्तदानन्तर्यमसौ न विरुणद्धीत्यर्थः। 'कृन्मेजन्तः' (१।१।३९) इत्यत्र इयं परिभाषा भाष्यकारेण पठिता। तद्यथा। शतानीति विभक्तिसंनिपातजे नुमि कृते तस्य विभक्तिलुकं प्रत्यनिमित्तत्वात् 'ष्णान्ता[5] षट्' (१।१।२४) इति षट्संज्ञा न[6] भवति। यदि हि स्यात् 'षड्भ्यो लुक्' (७।१।२२) इति विभक्तेर्लुक् स्यात्। एवं कटौ पद्धताविलत्रात्वे कृते अतः (७।१।४) इति टाप् न भवति। इयेष उवोष गुणे कृते 'इजादेश्च गुरुमतोनृच्छः' (३।१।३६) इत्याम् न। मथितं पण्यमस्य माथितिकः इति ठस्य इगनिमित्तत्वेन यस्येतिलोपेन तान्त[7]तायामुपजातायां 'इसुसुक्तान्तात्कः' (७।३।५१) इति का[8]देशो न भवति।

ज्ञापकं चात्र 'न तिसृचतसृ' (६।४।४) इति नामि दीर्घप्रतिषेधवचनम्। तद्धि सत्यामस्यां परिभाषायां विभक्तिनिमित्तयोः 'त्रिचतुरोः स्त्रियां तिसृचतसृ' (७।२।९९) इति ऋकारान्तयोर्विभक्तिव्यवधानकारिणं ङीपं प्रत्यनिमित्तत्वाद्दीर्घप्राप्तौ प्रतिषेधवचनमुपपद्यते। अपरथा तु ङीपा व्यवधानात् 'नामि' (६।४।३) इति दीर्घाप्राप्तौ ङीपश्च दीर्घादीर्घाभ्यामविशेषात् तत्प्रतिषेधवचनमनर्थकं स्यात्। अव्यापिका चेयं परिभाषा। यदि हि नित्या स्याद् दाक्षिः प्लाक्षिरित्यत्राकारसंनिपातकृतोत इञ् (४।१।९५) इत्ययं लोपस्यानिमित्तं स्यात्। क्नो[9]पयति आत्वं पुको निमित्तं न भवेत्। अदीदिपदिति पुकि च ह्रस्वो न स्यात्। यासामिति विभक्तिनिमित्तस्त्यदाद्यकारः टाब्विधेरनिमित्तं स्यात्। पपिवान् तस्थिवान् इतीड्विधिराकारलोपस्यानिमित्तं स्या[10]त्। तेन हे नदि हे कुमारि इति नदीह्रस्वत्वं संबुद्धिलोपस्यानिमित्तं स्यात्। तच्चानित्यत्वमस्याः 'कष्टाय क्रमणे' (३।१।१४) इति निर्देशेऽकारान्तत्वनिमित्ते 'ङेर्यः' (७।१।१३) इति

---

[1] Siradeva reads वृत्तिन्यासप्रतिपादितम्। [2] P. अन्यथा ह्ययं ङीप् मध्येऽपवादत्वात् पूर्वयोर्ङीप्प्रतिषेधयोरेव बाधकः स्यात् for अन्यथा......बाधकः। [3] P. अनुन्यास for न्यास. [4] P यस्यानन्तर्येण. [5] P ष्णान्ताः for ष्णान्ता. [6] M. om. न. [7] M. तान्तायां. [8] M. om. कादेशो. [9] After क्नोपयति, P. ins. इत्यत्र. [10] P. निमित्तं न स्यात् for अनिमित्तं स्यात्.

यकारे यञि ' सुपि च ' (७।३।१०२) इति अकारस्य दीर्घकरणादवसीयते ॥ १० ॥

नानुबन्धकृतमनेकाल्त्वम् ॥ ११ ॥

अनुबन्धकृतमनेकाल्त्वं नाश्रीयते । तेन द्यौः द्युभ्यामिति दिव औदुतौ सर्वादेशौ न भवतः इति । ज्ञापकं चात्रानेकाल्त्वात्सर्वादेशत्वसिद्धेः शित्करणम् । यदि ह्यनुबन्धकृतमनेकाल्त्वं स्याद् व्यतिषभूवे इत्यादौ एशादेः शित्त्वेप्यनेकाल्त्वात्सर्वादेशत्वसिद्धेः शित्करणं पृथङ्न कुर्यात् । एवं च सति डाणलोः सर्वादेशत्वं समाधेयम् ॥ ११ ॥

नानुबन्धकृतमसारूप्यम् ॥ १२ ॥

अनुबन्धकृतमसारूप्यं नाश्रीयते । तेन गोदः इति कविषये वासरूपविधिना 'कर्मण्यण्' (३।२।१) न भवति । ज्ञापकं चात्र ' विभाषा कृवृषोः ' (३।१।१२०)। इति ण्यतो विषये विकल्पेन क्यब्विधानम् । यदि ह्यनुबन्धकृतमसारूप्यं स्याद् तदा वासरूपविधिनैव कृत्यं कार्यं वृष्यं वर्ष्यमिति क्यब्ण्यतौ सिध्यतः ॥ १२ ॥

नानुबन्धकृतमनेजन्तत्वम् ॥ १३ ॥

अनुबन्धकृतमनेजन्तत्वं नाश्रीयते । तेन दाप इव दैपोपि अदाप् (१।१।२०) इति घुसंज्ञाप्रतिषेधे अवदातं मुखमिति भवति । ज्ञापकं चात्र ' उदीचां माङो व्यतिहारे ' (३।४।१९) इति व्यतिहारवृत्तेर्मेङः कृतात्वस्य निर्देशः । अनेजन्तत्वे हि सति स न स्याद् ॥ १३ ॥

एकदेशविकृतमनन्यवत् ॥ १४ ॥

नटपटघटादीनामादिवर्णानामन्यथात्वेन व्यवहारदर्शनात् अतिदेशोयम् । तेन अतिजरसैरिति जरसादेशः सिध्यति। एकदेशेन अवयवेन विकृतेन विकृतमनन्यवद् भवति। तेन प्रहिणोमि प्रमिणीते इति 'हिनुमीना' (८।४।१५) इति णत्वं सिध्यति । तथा कारिषीयास्तामिति अवकाशे सति कारिषीष्टेत्यत्र सीशब्दस्य सिच्सीयुड्ग्रहणेन ग्रहणं सिध्यति । प्रक्रियादशायां ' प्राग्दीव्यतोण् ' (४।१।८३) इत्यत्र दीव्यत इत्यस्य सिद्धये भाष्यकारेण पठिता परिभाषा । नित्यशब्दाभ्युपगमे त्वेकदेशविकारो नास्त्येव अखण्डत्वात्पदानाम् । ज्ञापकं चास्याः ' आढ्यादि० ' (३।२।५६) सूत्रेऽच्वाविति प्रतिषेधः । तथा तस्मै तस्माद् तस्मिन् इति आचार्यानिर्देशेषु त्यदाद्यत्वेनैकदेशविकृते तस्मै तस्मादित्यादौ सर्वनामसंज्ञाकार्यकरणमिति ॥ १४ ॥

---

१ P. दीर्घकरणेन आचार्येण ज्ञापितम् for दीर्घकरणादवसीयते । २ P. ' अनेकाल्शित्सर्वस्य ' (१।१।५५) इति शित्करणम् । ३ P. माङः for मेङः. ४ P. भट for पट. ५ P. भेद for व्यवहार. ६ P. om. अतिजरसैः ......सिध्यति. here and ins. it after णत्वं सिध्यति below. ७ P. ins. इयं before पठिता and om. परिभाषा. ८ P. प्रतिषेधवचनम् । तद्धि आढ्यीभवितेत्यत्र मा भूदित्येवमर्थम्.

सांप्रतिकाभावे भूतपूर्वगतिः ॥ १५ ॥

वर्तमानाभावे भूतपूर्वस्याश्रयणं भवति । यथा वृक्षैरित्यत्र ‘ बहुवचने झल्येत् ’ (७।३।१०३) इत्येत्वे कृतेपि ‘ अतो भिस ऐस् ’ (७।१।९) इत्युच्यमाने यदुक्तं एत्वे कृते भौतपूर्व्यादिति । तथा पञ्चभिखपुभिः क्रीतेन पञ्चत्रपुणा इत्यादौ ‘ इगन्तकाल-कपालभगालशरावेषु द्विगौ ’ (६।२।२९) इति इगन्ते उत्तरपदे पूर्वपदप्रकृतिस्वरो नुमि कृतेऽनिगन्तत्वेपि भूतपूर्वगत्या भवति । ‘ स्वरविधौ व्यञ्जनमविद्यमानवत् ’ (परि. ३२) इत्यनया व्यवस्था तु न । यत इयं हल्स्वरप्राप्ताविति भाष्ये विशेषिता । सांप्रतिकाभावग्रहणात् हे गौरित्यत्र भूतपूर्वङ्‍न्तादेङ्‍ह्रस्वात्संबुद्धि–(६।१।६९) लोपो न भवति । हे बटो इत्यत्र सांप्रतिकस्य विद्यमानत्वात् । ज्ञापकं चात्र भूतपूर्वगत्याश्रयणे ‘ अचो यत् ’ (३।१।९१) इत्यग्रहणम् । तद्धि हलन्तात् ण्यतं वक्ष्यतीति पारिशेष्यादजन्तादेव यति लब्धे दित्स्यं धित्स्यं इत्यत्रार्धधातुक इति विषयसप्तम्यामतो लोपे कृतेऽजन्तपूर्वभूतपूर्वस्यापि यथा स्यादित्येवमर्थं क्रियते । एतदर्थता कथं स्याद्यदि भूतपूर्वगतिरिह न स्यादिति ॥ १५ ॥

वर्त्स्यत्प्रवृत्त्येह कार्याणि क्रियन्ते ॥ १६ ॥

सांप्रतिकाभाव इत्येव । इह शास्त्रे सांप्रतिकाभावे भविष्यन्तीं प्रवृत्तिमाश्रित्य कार्याणि क्रियन्ते । यथा निन्यतुर्निन्युरिति । वर्त्स्यतीमनेकाच्त्वां समाश्रित्य प्रागेव द्विर्वचनात् ‘ एरने-काचः०’ (६।४।८२) इति यणादेशः । अपरथाह्यीयङ् स्यात् । यणादेशस्यानुपजात-निमित्तत्वात् । एवं ‘शदेः शितः’ (१।३।६०) इति भाविनीं शिदन्ततामाश्रित्य शीयते इत्यात्मनेपदम् । तथा च ‘ अन उपधालोपिनोऽन्यतरस्याम् ’ (४।१।२८ । इति ङीपि कृते भाव्युपधालोपित्वं ङीपो निमित्तत्वेनाश्रीयते सुसाम्नीति । ज्ञापकं चात्र ‘ वस्वेकाजाद्-घसाम् ’ (७।२।६७) इति एकाज्ग्रहणम् । तद्धि लिटि द्विर्वचनस्यावश्यंभावान्न कश्चिदेकाजस्तीति भविष्यदेत्वाभ्यासलोपप्रवृत्युत्तरकालभावी य एकाच् तदर्थंकृतम् । तदर्थकता च तदा स्याद्यदि वर्त्स्यत्प्रवृत्त्या शास्त्रे कार्याणि स्युः । सांप्रतिकाभावात्सूत्रानु-पपत्तौ अनुपपत्त्याभ्युपगमे तत्प्रमाणं ज्ञापकमुखेनोपवर्ण्यते ॥ १६ ॥

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ॥ १७ ॥

विधिर्वा भवति प्रतिषेधो वानन्तरस्यैव भवति । यथा ‘ सुपि स्थः ’ (३।२।४) इति विधिरनन्तरस्य कस्यैव न व्यवहितस्याणः । ‘ सुडनपुंसकस्य ’ (१।१।४३) इति च नपुंसकप्रतिषेधोऽनन्तराया एव सुडितिप्राप्तेः न ‘ शि सर्वनामस्थानम् ’ (१।१।४२) इत्यस्याः । तेन कुण्डानीति क्लीबेपि सर्वनामस्थाने दीर्घः सिध्यति । तथा ‘ नेटि ’ (७।२।४) इति वृद्धिप्रतिषेधोऽप्यनन्तराया एव हलन्तलक्षणाया वृद्धेर्न व्यवहितायाः

---

१ M. भविष्यतिवृत्तेरिह. २ P. अवश्यंभावार्थः कश्चित्°. ३ P. सूत्रसंगत्यन्यथानुप-पत्त्यास्थानमेव चैतत्प्रमाणं.

सिचिवृद्धेः अलावीदिति । अयं चार्थः प्रत्यासत्तिन्यायसिद्ध एव । अनुवृत्तेः स्वरितत्व-निमित्तमनपेक्ष्य परिभाषितः । स्वरितत्वबलेन हि व्यवहितस्यापि विधिनिषेधौ भवतः । तद्यथा 'करणे यजः' (३।२।८५) इति खशा व्यवहितस्य णिनेर्विधिः । 'न षट्स्वस्रादिभ्यः' (४।१।१०) इति च व्यवहितस्य ङीपो निषेधः । तत्र अनन्तरस्यैव विधिरत्रार्थे 'अपवर्गे तृतीया' (२।३।६) इति तृतीयापदं ज्ञापकम् । तद्धि अनन्तर-सूत्रयोर्द्वितीयाविधानेन अन्तरिता तृतीयेति पुनः क्रियते । प्रतिषेधोपि अनन्तरस्यैव इलस्यापि । तत्र ज्ञापकं 'न क्तिचि दीर्घश्च' (६।४।३९) इति दीर्घग्रहणम् । तद्धि अनया परिभाषया यन्तिः तन्तिः इत्यत्र 'अनुदात्तोपदेशवनतितनोत्यादीनाम्०' (६।४।३७) इत्यनुनासिकस्यैव निषेधः स्यात्, न व्यवहितस्य 'अनुनासिकस्य क्विझलोः' क्ङिति (६।४।१५) इत्यस्य दीर्घस्य इत्येवमर्थं क्रियते ॥ १७ ॥

आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ १८ ॥

तत्र टित्कितोरागमयोराद्यन्तावयवत्वमतिदिष्टम् । मितोपि 'मिदचोन्त्यात् परः' (१।१।४७) इत्यत्रान्तग्रहणानुवृत्त्या अन्तावयवत्वम् । तत्र कुण्डेत्यत्र नुमो धातुग्रहणेन ग्रहणाद् 'गुरोश्च हलः' (३।३।१०३) इति अकारप्रत्ययो भवति । सर्वेषामित्यत्र च सुटः सुब्ग्रहणेन ग्रहणाज् झलादौ सुपीत्येत्वं (७।३।१०२-३) सिध्यति । अवयवस्या-वयविग्रहणेन ग्रहणमिति यद्यपि न्यायसिद्ध एवायमर्थस्तथाप्यत्र 'न क्त्वा सेट्' (१।२।१८) इति कित्वप्रतिषेधं ज्ञापकमाहुः । यदि हि इट् क्त्वाग्रहणेन गृह्यते तदा इटा व्यवधानादेव 'क्ङिति च' (१।१।५) इति गुणप्रतिषेधो नास्तीति किं प्रतिषेधेन । अपरे तु क्ङितीति निमित्तसप्तमीत्वाज् ज्ञापकमिदं दुर्बलं मन्यमाना न्यायसिद्धत्वमेवेच्छन्ति । 'तद्भक्तस्तद्ग्रहणेन गृह्यते' इत्यस्यार्थः पठ्यते न तु परिभाषान्तरम् ॥ १८ ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ १९ ॥

यो यस्य मध्यपाती स तद्ग्रहणेन गृह्यते । तद्यथा । भिनत्तीत्यत्र श्नमो धातुग्रहणेन ग्रहणाद् धातुरन्तोदात्तो भवतीति मध्योदात्तता सिध्यति । अभिनत् इत्यत्र सश्नम्कस्याङ्ग-संज्ञायामडागमः । सर्वके विश्वके इत्यत्र साकच्कस्यापि सर्वनामत्वाज्जसः शीभावः । तन्मध्यपतितस्य तद्व्यपदेशोयं छत्रिणो यान्तीति लौकिकव्यवहारसिद्ध एव । ज्ञापकमप्यत्र 'नेदमदसोरकोः' (७।१।११) इत्यकोरिति पदम् । 'येन विधिः०' (१।१।७२) इति सूत्रे भाष्ये उक्तम् इदमदसोः कार्यमुच्यमानं कः प्रसङ्गो यच्छब्दान्तरयोरिमकामुकयोः

१ M. om. तत्र अनन्तरस्यैव......इलस्यापि. २ M. om. च इति. ३ P. अस्याश्रयन्ति for इच्छन्ति. ४ P. त्वस्यैवार्थः for अस्यार्थः. ५ M. om. यो......गृह्यते. ६ Before मध्योदात्तता, P. ins. न. हि.

स्यादिति किमकोरित्यनेन प्रतिषेधेन । तज्ज्ञापयति—अस्तीयं परिभाषेति । ननु यचकोरित्यस्य ज्ञापकतोक्ता भाष्यकारेण तत्कथं ' नेदमदसोरकोः ' (७।१।११) इत्यत्रेदमदसोः कादेवेति नियमेन सिद्धिं व्याख्याय निषेधद्वयं प्रत्याख्यातवान् । सत्यम् । एवं तु मन्यते स[1] भगवान् मा भूदिदमकोरिति ज्ञापकम् । एतत्तदोरित्यत्र (६।१।१३२) त्वकोरिति पदं ज्ञापकं भवति[2] ॥ १९ ॥

अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन् बाधन्ते ॥ २० ॥

अभ्यासाश्रयेषु कार्येषु बाधका बाध्यान् विधीन् न बाधन्ते । उत्सर्गापवादशब्दयोरिह बाध्यबाधकोपलक्षणतया अन्तरङ्गत्वात्परत्वादपवादत्वाद्वा यद्बाधकं प्राप्नोति सर्वं तदभ्यासविकारे न बाधकमिति मन्तव्यम् । तेन डोढौक्यते इत्यत्राचकाङ्क्षादित्यादौ सावकाशमभ्यासह्रस्वत्वं परत्वाद् ' दीर्घोकितः ' (७।४।८३) इत्यनेन बाध्यते । दीर्घो ह्यत्रौकारस्य ह्रस्वबाधनार्थमौकार एव स्यात् । एवमचीकृतदित्यादौ अचिकणदित्यत्र सावकाशं सन्वदित्वं ' दीर्घो लघोः ' (७।४।६४) इत्यनेन न बाध्यते । तथा मीमांसते इति 'मान्बधदान्०' (३।१।६) इति दीर्घेण 'सन्यतः' (७।४।७९) इत्वं न[3] बाध्यते । ज्ञापकं चात्र 'दीर्घोकितः' (७।४।८३) इत्यकिद्ग्रहणम् । तद्धि जंगम्यते इत्यादौ दीर्घो मा भूदित्येवमर्थम् । यदि चाभ्यासविकारेषु अपवादो बाधकः स्यान्नुकि कृते अनजन्तत्वादेव दीर्घो न भविष्यति किमकिद्ग्रहणेन । तत् कृतमस्यार्थस्य[4] ज्ञापकमिति ॥ २० ॥

असति संभवे बाधनं भवति । अस्ति च संभवो यदुभयं स्यात् ॥ २१,२२ ॥

शास्त्रे कार्ययोर्विरोधादसति समावेशसंभवे बलवतैव केनाप्यपरस्य बाधनं भवति । यदि त्वस्ति संभवस्तदुभयं[5] स्यात् । यच्छब्दोत्र यद्यर्थे वर्तते । चकारो भिन्नक्रमस्तुशब्दस्यार्थे[6] तदाध्याहार्य इति । तद्यथा । तथाजातीय इत्यत्र प्रकारवचने थाल्न्तात् प्रकारवचने जातीयर् अपि भवति विरोधाभावात् । ' प्रकारवचने थाल् ' (५।३।२३) प्रकारवति तु जातीयर् । यथा[7] सामेत्यत्र नलोपार्थं प्रत्ययादर्शनस्य लोपसंज्ञा विरोधाभावात् । यत्र त्वस्ति विरोधस्तत्रैकमेव स्यात् । यथा वृक्षैरित्यत्र । अत्र ह्यैत्वेनाप्यदन्तता विहन्यते दीर्घत्वेनापीति विरोधः । इह चाविरोधेपि अजादेर्द्वितीयस्यैकाचो द्विर्वचनं[8] (६।१।२) प्रथमैकाचो द्विर्वचनं (६।१।१) बाधते । तद्धि बाधनमनभ्यासस्य (६।१।८) इति वचनादेकस्य द्विर्वचने कृते द्वितीयस्याप्राप्तेरिति ॥ ज्ञापकं चात्र ' नित्यं कौटिल्ये गतौ ' (३।१।२३) इति नित्यग्रहणम् । तद्धि गत्यर्थेभ्यः कौटिल्ययङो[9] क्रियासमभिहारयोर्विरोधाभावात् सति संभवे प्रसक्तस्य समभिहारयङो बाधनार्थं क्रियते[10] । तदेवमर्थं क्रियमाणं अन्यत्र यथास्वमुभयं प्रमाणं ज्ञापयति ॥ २१,२२ ॥

१ P. समवान्. २ P. भविष्यतीति. ३ P. om. न. ४ M. किल्वं for कृतं । ५ P. तदा for तत्. ६ After तदा, P. ins. शब्दश्च. ७ P. तथा for यथा. ८ P. द्विर्वचनेन for द्विर्वचनं. ९ P. कौटिल्ययञा M. om. कौटिल्ययङा. १० M. om. क्रियते । तदेवमर्थं.

सत्यपि संभवे बाधनं भवति ॥ २३ ॥

क्वचिदिति शेषः । तद्यथा वर्तमानक्तेन भूतक्तस्य शैषिकढका अपत्यढकः स्मे ल्टा लडिति वर्तमानलटः सामान्यविशेषभावमात्रेण बाधनं भवति । लौकिकश्चायम्[१] । ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति सामान्योक्तस्य विशेषेण बाधनं नाम । ज्ञापकं चात्र 'विभाषा सुपो बहुच् पुरस्तात्' (५।३।६८) इति विभाषाग्रहणम् । तद्धि कल्पबादीनां बहुचा समावेशार्थम् । यदि च कल्पब्बहुचोर्भिन्नदेशत्वादविरोधान्नास्ति बाध्यबाधकभावस्तर्हि किमुभयोः समावेशार्थेन[२] विभाषाग्रहणेन । तत् कृतं ज्ञापयति[३] अविरोधेऽपि कार्ययोः सामान्यविशेषमात्रेण बाधनमिति ॥ २३ ॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ २४ ॥

एकवाक्यनिर्दिष्टानां पदानां प्रवृत्तिर्वा निवृत्तिर्वा एकदैव स्यान्न तु एकस्य प्रवृत्तिरन्यस्य निवृत्तिरिति । तद्यथा । 'अतो ल्रान्तस्य' (७।२।२) इति । अत्र 'सिचि वृद्धिः परस्मैपदेषु' (७।२।१) इति सर्वमनुवर्तते । 'भावे' (३।३।१८) इत्यत्र 'सृ स्थिरे' (३।३।१७) इति सर्वमनुवर्तते[४] । ज्ञापकं चात्र 'हनः सिच्' (१।२।१४) इति कित्त्वविधौ सिज्ग्रहणम् । यदि त्वेकसूत्रनिर्दिष्टयोरपि एकोनुवर्तते नापर इति स्यात्तदा 'लिङ्सिचावात्मनेपदेषु' (१।२।११) इत्यतो लिङ्ग्रहणं नानुवर्तिष्यते सिजेवानुवर्तिष्यते इति सिज्ग्रहणमनर्थकं स्यात् । अनित्या चेयं परिभाषा । तेन 'र ऋतो हलादेर्लघोः' (६।४।१६१) इत्यत्र 'तुरिष्ठेमेयस्सु' (६।४।१५४) इत्यतः इष्ठेमेयस्सु इत्येवानुवर्तते न तु तुरिति ॥ २४ ॥

क्वचिदेकदेशोप्यनुवर्तते ॥ २५ ॥

पूर्वोक्तस्यायमपवादः । क्वचिल्लक्ष्यानुरोधात् सूत्रैकदेशः पदैकदेशो वाप्यनुवर्तते । तद्यथा 'ब्रुवः पञ्चानाम्०' (३।४।८४) इत्यत्र 'विदो लटो वा' (३।४।८३) इत्यतो लट एवानुवर्तते नापरं विद इति । 'अजाद्यतष्टाप्' (४।१।४) इत्यत्रापि 'ङ्याप्प्रातिपदिकात्' (४।१।१) इत्यतः प्रातिपदिकादित्यनुवर्तते न ङ्यापौ । 'दामहायनान्ताच्च' (४।१।२७) इत्यत्र 'संख्याव्ययादेः०' (४।१।२६) इत्यतः संख्याग्रहणमनुवर्तते नाव्ययादि । 'झोन्तः' (७।१।३) इत्यत्रापि 'फढखछघां प्रत्ययादीनाम्' (७।१।२) इत्यत आदिग्रहणनिवृत्तावपि प्रत्ययग्रहणम् । 'येषां च विरोधः०' (२।४।९) इत्यत्र 'क्षुद्रजन्तवः' (२।४।८) इत्यतो जन्तुग्रहणमनुवर्तत इति । ज्ञापकं चात्र 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१।१।६६) इति इतौ प्रकृते पुनरितिकरणं[५] 'तस्मादित्युत्तरस्य' (१।१।६७)

---

१ After अयं P. ins. न्यायः । यथा. २ M. किं असमावेशार्थेन. ३ M. ज्ञापकं. ४ After सर्वं P. ins. एव. ५ P. करणं for करणः.

इति । यदि हि सहैव पदानामनुवृत्तिर्भवति तदा निर्दिष्टग्रहणवदितिकरणोऽपि पूर्वसूत्रादेवानुवर्तिष्यत इति किमितिकरणेन । तत्कुर्वन्नाचार्यो ज्ञापयति क्वचिदेकदेशोऽप्यनुवर्तत एव । तेन निर्दिष्टग्रहणमेव केवलमनुवर्तते नेतिकरणम् ॥ २५ ॥

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ २६ ॥

स्वरूपेण वा संज्ञया वा यत्र प्रातिपदिकमुपादीयते तत्र तस्य लिङ्गविशिष्टस्य लिङ्गाधिकस्यापि ग्रहणं भवति । लिङ्गग्रहणेनात्र लिङ्गाभिव्यक्तिहेतवष्टाबादयो द्रष्टव्याः । अभिधानेऽभिधेयोपचारात् । तथथा ' सर्वनाम्नस्तृतीया च ' (२।३।२७) इति यथेह भवति भवता हेतुना तथेहापि भवति भवत्या हेतुनेति । ' कुसूलकूपकुम्भशालं बिले ' (६।२।१०२) इति पूर्वपदान्तोदात्तस्वरो यथेह भवति कुसूलबिलं तथेहापि कुसूलीबिलमिति । ' पूर्वसदृश० ' (२।१।३१) इति तत्पुरुषसमासो यथेह भवति दाससदृशः तथेहापि दासीसदृशी इति । तृजन्तेन समासनिषेधो यथेह अपां स्रष्टा तथेहापि अपां स्रष्ट्रीति । 'अचित्तहस्तिधेनोष्ठक्' (४।२।४७) इति यथेह भवति हस्तिनां समूहो हास्तिकं तथेहापि हस्तिनीनां समूहो हास्तिकमिति । 'नेन्सिद्धबध्नातिषु च' (६।३।१९) इति सप्तम्या अलुग्निषेधो यथेह भवति स्थण्डिलशायीति तथेहापि स्थण्डिलशायिनीति । 'शयवासवासिष्वकालात्' (६।३।१८) इति अलुग् यथेह भवति ग्रामेवासी तथेहापि ग्रामेवासिनीति । ' प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच ' (चुरादिगण-गणसूत्र) इति णिच् यथेह भवति कुमारमाचष्टे कुमारयति तथेहापि कुमारीमाचष्टे कुमारयति । ईयसश्च (५।४।१५६) इति समासान्तनिषेधो यथेह भवति बहुश्रेयान् तथेहापि बहुश्रेयसीति ॥

इयं च परिभाषा कात्यायनेन ' प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ' (४।१।१ वा. ४) इति ' सर्वनामस्वरसमासतद्धितविधिलुगलुगर्थम् ' (४।१।१ वा. ५) इत्यपूर्ववचनरूपेण पठितेत्येतावतैव प्रमाणम् । भाष्यकारेण तु सौकर्याद् ' युवाखलति० ' (२।१।६७) इत्यत्र युवशब्दस्य स्वरूपस्य जरतीशब्देन सामानाधिकरण्यान्यथानुपपत्त्या ज्ञापिता । नैतस्याश्च स्वरूपविधिविषयतां केचिन्मन्यन्ते । तैश्च कुमारमाचष्टे कुमारयतीत्यादिसिद्धये यत्नान्तरमास्थेयम् । अनित्यत्वं चास्याः परिभाषाया महतीप्रिय इत्यादौ ' आन्महतः० ' (६।३।४६) इति आत्वाभावो भाष्ये दर्शितः । दैतेय इति च दितीतिशब्दस्य 'कृदिकारादक्तिनः' (४।१।४६ वा. १) इत्यादिना ङीषन्तस्य दितिग्रहणेन ग्रहणाभावे 'दित्यदिति०' (४।१।८५) इत्यादिना ण्यप्रत्ययाभावे 'स्त्रीभ्यो ढक्' (४।१।१२०) इति ढक् सिध्यति । तच्चानित्यत्वं ग्रहेरज्विधौ घटघटीग्रहणाभ्यां (३।२।९ वा. १) ज्ञापितम् । एवं च द्विषतीतापः इति 'द्विषत्परयोस्तापेः' (३।२।३९) इति न खच् । मद्रराज्ञीति ' राजाहःसखिभ्यष्टच् ' (५।४।९१) इति टच् प्रत्ययो न भवति ॥ २६ ॥

---

१ M. समासतद्धितालुगर्थम्, P. समासनिषेधतद्धितालुगर्थसमासान्तनिषेधार्थमित्यपूर्वं. M. om. कुमारमाचष्टे and reads तेन for तैश्च.

विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ २७ ॥

यदेतदनन्तरमुक्तं लिङ्गविशिष्टस्यापि ग्रहणं भवतीति [1]तद् विभक्त्याश्रयेषु कार्येषु न प्रवर्तते । तेन शुना शुन इत्यत्र 'न गोश्वन्०' (६।१।१८२) इत्यादिना [2]श्वन्-शब्दात् तृतीयाविभक्तेरुदात्तप्रतिषेध उच्यमानो गौरादिङीपि शुन्या शुन्यै इत्यत्र न भवति । 'उदात्तयणो हल्पूर्वात्' (६।१।१७४) इति विभक्तेरुदात्ततैव भवति । एवं यूना यून इत्यत्र 'श्वयुवमघोनामतद्धिते' (६।४।१३३) इति च संप्रसारणमुक्तं युवतीः पश्य युवत्येत्यादौ न भवति । [3]गोमानिति उगिदचां नुम् गोमतीत्यत्र न भवति । सुपन्थाः इत्यत्र पथिमथोरात्वं ङीपि भस्य टेर्लोपे सुपथीत्यत्र न भवति । सुपुमानित्यादौ 'पुंसोऽसुङ्' (७।१।८९) इति असुङ् उगित्त्वात् ङीपि सुपुंसीत्यत्र न भवति । सखा सखायाविति 'सख्युरसंबुद्धौ' 'अनङ् सौ' (७।१।९२,९३) इति णित्वानङौ सखी सख्यावित्यत्र न भवतः । हे भोः, हे भगोरिति 'विभाषा भवद्भगवदघवतामोच्चावस्य' (८।३।१ वा. २) इति ओकारो हे भवति हे भगवति इत्यत्र न भवति । इयं च[4] परिभाषा 'युवोरनाकौ' (७।१।१) इत्यत्र भाष्ये पठिता । 'मतुवसोरु०' (८।३।१) इत्यत्र च न्यासकारेणाभ्युपगतेत्येतावतैव प्रमाणम् इति ॥ २७ ॥

ताच्छीलिकेषु च वासरूपविधिर्नास्ति ॥ २८ ॥

ताच्छील्किाधिकारभवेषु प्रत्ययविधिषु भिन्नार्थाः भिन्नजातीयाः समानार्थाः समानजातीया वा प्रत्यया वासरूपविधिना न भवन्ति । तद्यथा 'अलंकृञ्०' (३।२।१३६) इति इष्णुचि अलंकरिष्णुरित्येव भवति वासरूपविधिना न ण्वुल् अलंकारक इति । 'स्थेशभास०' (३।२।१७५) इति वरज्विधौ च भास्वर इत्येव भवति न वासरूपेण अनुदात्तलक्षणेन युचि (३।२।१४९) भासनमिति भवति । ज्ञापकं चात्र तृज्बाधनार्थं 'निन्दहिंस०' (३।२।१४६) इति वुञ्विधानम् । यदि वासरूपेण भिन्नजातीयास्तृजादयस्ताच्छीलिकेषु भवेयुः तृन्ण्वुल्भ्यां निन्दिता निन्दक इति रूपद्वयेन अवश्यं भाव्यमिति किं वुञ्विधानेन । तदेतज् ज्ञापयति ताच्छीलिकेषु भिन्नजातीयाः प्रत्ययास्तृजादयो वासरूपेण न भवन्तीति । तथा 'लषपतपद०' (३।२।१५४) इति उकञ्समावेशार्थं 'जुचङ्क्रम्य०' (३।२।१५०) इति पदेर्धातोर्युज्विधानं ज्ञापकम् । यदि ताच्छीलिकेषु समानजातीयः प्रत्ययो बाधको वासरूपेण स्यात् लषपतपदेति उकञ्विषयेपि पद्यतेर्वासरूपेण अनुदात्तेल्लक्षणो युजपि सिद्ध इति किं पुनर्जुचङ्क्रम्येति युज्विधानेन । तज् ज्ञापयति ताच्छीलिकेषु समानजातीयेषु वासरूपविधिर्नास्तीति । अनित्या चेयं परिभाषा । तदानित्यत्वमस्या 'सूददीपदीक्षश्च' (३।२।१५३) इति दीपो युच्प्रतिषेधेन ज्ञापितम् ।

---

१ M. om. तद्....प्रवर्तते । २ M. om. श्वन्-शब्दात् . ३ M. om. गोमानिति... न भवति. ४ P. om. च.

यदि ताच्छीलिके वासरूपविधिर्नास्तीति तदा 'नमिकम्पि०' (३।२।१६७) इति दीपो रप्रत्ययेनैव विशेषविहितेन युज् बाधित इति किं तन्निषेधेन। तत् कुर्वाणो ज्ञापयति क्वचिदस्ति समावेश इति। तेन कम्रा कमना युवतिरिति रयुचोः समावेशः सिध्यति। गन्ता गामुक इति तृन्नुकञोः विकत्थी विकत्थन इति युज्घिनुणोः समावेशः सिद्ध इति॥ २८॥

प्रत्येकं वाक्यपरिसमाप्तिर्ज्ञेया॥ २९॥

इह शास्त्रे वाक्यानि विशेष्यविशेषणानि प्रत्येकं परिसमाप्यन्ते। यथा वृद्धिसंज्ञा प्रत्येकमादैचां गुणसंज्ञा च प्रत्येकमदेङाम्। 'नलोपः सुप्स्वर०' (८।२।२) इति अत्र विधिशब्दः प्रत्येकं सुबादिभिः संबध्यते। लौकिक एवायं न्यायो भाष्ये प्रदर्शितः। यदुक्तं देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्युक्ते न पुनरुच्यन्ते प्रत्येकमिति। अथ च प्रत्येकं भोज्यन्त इति। ज्ञापकं चात्र 'णलुत्तमो वा' (७।१।९१) इति उत्तमपदं णल्विशेषणम्। यदि हि प्रत्येकं संबन्धो न स्यात् उत्तमसंज्ञायास्त्रयाणां समुदायेन संबन्धेन णलिति विशेषणं न स्यादिति॥ २९॥

क्वचित् समुदायेन वाक्यपरिसमाप्तिः॥ ३०॥

तद्यथा 'हलोऽनन्तराः संयोगः' (१।१।७) इति समुदायस्य संज्ञासंबन्धः। एषोऽपि लौकिक एव न्याय इति भाष्ये दर्शितः। तथाहि। गर्गाः शतं दण्ड्यन्ताम्। अर्थिनो राजानो हिरण्येन भवन्ति। न च ते प्रत्येकं दण्डयन्तीति। ज्ञापकं चात्र 'प्रथमयोः पूर्वसवर्णः' (६।१।१०२) इत्यत्र प्रथमाद्वितीययोः वचनषट्करूपयोरस्मिन्नर्थे प्रयुक्तं प्रथमयोरिति पदम्। प्रथमाशब्दो हि यदि सुपां त्रिकस्य सु औ जसित्यस्य समुदायस्य संज्ञा स्यात्सामीप्याच्च अमौट्शस् इति त्रिके प्रवर्तते तदा प्रथमयोरिति निर्देशः साधीयान् स्यात्। यदि तु प्रत्येकं प्रथमाशब्दः स्यात्तदा सोरेक[4]वचनस्य प्रथमाशब्देन ग्रहणं सामीप्याच्च अम इति लाघवार्थं स्वमोरित्येव निर्देशं कुर्यात्। तस्मात्प्रथमयोरिति निर्देशेन समुदाये वाक्यपरिसमाप्तिं बोधयति। यथेष्टं च पक्षयोरनयोराश्रयणम्। यत्पुनरुच्यते उभयथा वाक्यपरिसमाप्तिः इति। स चानयोरेवार्थः पठ्यते। न परिभाषान्तरम्। तत्र[5] लौकिको लोकतिद्धक्षायमर्थः पठ्यते। यथा गर्गैः सह न भोक्तव्यम् इति। न प्रत्येकं सह भुज्यते समुदितैश्च इति। केचित्तूभयथा वाक्यपरिसमाप्तिरित्यपि परिभाषान्तरमित्याहुः। तेन स्वादिविधिवाक्यस्य 'बहुषु बहुवचनम्' (१।४।२१) इत्यादिना 'कर्मणि द्वितीया' (२।३।२) इत्यादिना च शास्त्रेणैकवाक्यताने[6]कवाक्यतापक्षौ तत्र तत्राभिधीयमानौ उपपन्नौ भवत इति॥ ३०॥

---

१ P. om. शेषा. २ M. om. इह....परिसमाप्यन्ते. ३ P. दण्डयन्त इति.
४ P. सोरित्येकस्य. ५ P. om. तत्र लौकिकः. ६ M. om. अनेक...इति.

भाव्यमानोण् सवर्णान्न गृह्णाति ॥३१॥

[1]विधीयमानोण् सवर्णान्न गृह्णाति । 'अणुदित्सवर्णस्य०' (१।१।६९) इति सवर्णग्रहणं प्राप्नोति । तेन इहेत्यत्र इदम इश् (५।३।३) इति [2]स्थानिनि आन्तर्यात् द्विमात्रो न भवति सवर्ण इति । 'भुवो वुक्' (६।४।८८) सानुनासिको न भवति । 'अम् संबुद्धौ' (७।१।९९) हे अनड्वन् इति दीर्घो न भवति । ज्ञापकं चात्र 'ई हल्यघोः' (६।४।११३) इति दीर्घेकारविधानम् । यदि हि विधीयमानोण् सवर्णानां ग्राहकः स्यात्तदा 'श्नाभ्यस्तयोरातः' (६।४।११२) इत्यनुवृत्तेराकारस्य स्थाने ह्रस्वेकारमेव विदध्यात् इ हल्यघोरिति । आन्तरतम्यात्त्वयं दीर्घो भविष्यति इति दीर्घत्वविधानमस्यार्थस्य ज्ञापकमेवेति । केचित् पुनरिमां ज्ञापकसिद्धां पृथक् परिभाषां नेच्छन्ति । यतः 'अणुदित्सवर्णस्य चाप्रत्ययः' (१।१।६९) इत्यस्याप्रत्ययशब्दस्यैवायमर्थः परिभाषारूपेण पठ्यते । तथाहि । प्रतीयते भाव्यते विधीयत इति प्रत्ययो न प्रत्ययोऽप्रत्ययः अभाव्यमान इत्यर्थः । अप्रत्ययोऽण् सवर्णान् गृह्णातीति व्यवस्थिते सूत्रार्थे भाव्यमानोण् सवर्णान्न गृह्णातीति व्यक्तमेवावतिष्ठते । कचित्पुनर्भाव्यमानोण् सवर्णान् गृह्णाति । तेन 'अदसोसेर्दादु दो मः' (८।२।८०) इति उकारो विधीयमानोपि अमूभ्यामित्यादौ स्थानिनि आन्तर्याद्दीर्घो भविष्यति । ज्ञापकं चात्रार्थे 'दिव उत्' (६।१।१३१) इति तपरकरणम् । यदि हि भाव्यमानः सर्वथैव सवर्णान्न गृह्णाति द्युभ्यामित्यादौ सिद्धा दीर्घनिवृत्तिः । किं तपरकरणेन । तत् कृतं कचिद् भाव्यमानोप्यण् सवर्णान् गृह्णातीति ज्ञापयति । 'शास इदङ्हलोः' (६।४।३४) इति वा तपरकरणमस्यार्थस्य ज्ञापकं भविष्यति ॥३१॥

स्वरविधौ व्यञ्जनमविद्यमानवत् ॥३२॥

उदात्तादिस्वरविधाने व्यञ्जनमविद्यमानवत् स्यात् । तेन तव्यप्रत्ययादेस्तकारस्याविद्यमानत्वात् प्रत्ययादेरकारस्योदात्तत्वं भवति । राजदृषदित्यत्र हलन्तेपि 'समासस्य' (६।१।२२३) इत्यन्तोदात्तत्वं भवति । ज्ञापकं चात्र अनुदात्तादेरञ्साधनार्थं 'बिल्वादिभ्योण्' (४।३।१३६) इति वचनम् । यदि हि व्यञ्जनमविद्यमानवन्न स्यात्तदा न बिल्वादयोनुदात्तादय इति तद् व्यर्थं स्यात् । अनुदात्तादेरञ्धर्मत्वाद्बिल्वादीनां तु हलादित्वादिति । कृतं तु ज्ञापकमुक्तार्थस्य । इह यदि स्वरविषये व्यञ्जनमविद्यमानवत् एवं सति उदश्वित्वानिति 'ह्रस्वनुड्भ्यां मतुप्' (६।१।१७६) इति मतुबुदात्तः स्यादिति चोदयित्वा 'समासस्य' (६।१।१२३) इत्यत्र भाष्ये अस्तु तर्हि हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद् इत्युक्तम् । कथं हि हलो नाम स्वरप्राप्तिरिति चेत् । अत्राप्युक्तम् 'उच्चैरुदात्तः' (१।२।२९) इत्यादौ षष्ठीनिर्दिष्टमज्ग्रहणं निवृत्तमिति । चोद्यान्तराणि च तत्रैव परिहृतानीति ॥ ३२ ॥

---

१ M. om. विधीयमानोण्...प्राप्नोति. २ Before स्थानिनः, M. ins. त्रिमात्रस्य.
३ M. प्रत्याख्यते.

णौ कृतं स्थानिवद् भवति ॥ ३३ ॥

णौ परतो वृद्ध्यादिकं कार्यं स्थानिवत् स्यात् । तेन जुहावयिषतीत्यादौ अभ्यासस्योवर्णान्तत्वं सिध्यति । ज्ञापकं चात्र 'ओः पुयण्ज्यपरे' (७।४।८०) इति अभ्यासस्य विशे[1]षणमोरिति पदम् । तेन हि पवर्गे यणि जकारे चावर्णपरे अभ्यासस्योकारस्य इत्वं विधीयते । बिभावयिषति रिरावयिषति जिजावयिषतीत्यादौ । यदि च णौ कृतं वृद्ध्यादेशलक्षणं कार्यं स्थानिवन्न स्यात् कुतोऽभ्यासस्योकारो यस्येत्वं विधीयते इति । तुल्यजातीयस्य च ज्ञापकविषयत्वात् अवर्णपराणां पुयण्जां सदृशा अन्ये अवर्णपरा एव स्थानिवद्भावं भजन्ते[2] । तेनाचिकीर्तदित्यत्र न स्थानिवद्भावः । तथा शुशावयिषतीत्यादौ 'णौ च संश्चङोः' (६।१।३१) इति वकारस्य संप्रसारणं णौ कृतमपि द्विर्वचने कर्तव्ये न स्थानिवद्भवति । 'द्विर्वचनेऽचि' (१।१।५९) इत्यत्र भाष्ये अजादेशस्यैव णौ कृतस्य स्थानिवत्त्वप्रतिपादनात् । ज्ञापकसिद्धं न सर्वत्र इति च अधिजिगापयिषतीत्यत्र णाविङो गाङादेशो द्विर्वचने न स्थानिवदिति ॥ ३३ ॥

यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः ॥ ३४ ॥

इह 'अचः परस्मिन् पूर्वविधौ' (१।१।५७) इत्यत्र पूर्वशब्दस्य संबन्धिशब्दत्वात् अजपेक्षं पूर्वत्वमादेशापेक्षं पूर्वत्वं निमित्तापेक्षं वा पूर्वत्वमित्युक्तम् । तत्र यदा लक्ष्यानुरोधादजपेक्षं पूर्वत्वमाश्रीयते तदायं सूत्रार्थ एव परिभाषारूपेण पठ्यते । तद्यथा अजादेशः परनिमित्तकः पूर्वस्य विधौ स्थानिवद्भवति । कुतः[3] । पूर्वस्मादनादिष्टादकृतादेशादचः इति । तेन पट्यतीत्यत्र कृते लोपे पटुशब्दोकारादनादिष्टादचः पूर्वं इति पटुशब्दाकारो भवतीति तस्योपधावृद्धिविधिं प्रति टिलोपः स्थानिवद् भवति । तथा आयन् आसन् इति प्रकृतयोः इणोयण्श्नसोरल्लोपयोः (६।४।८१;१११) अनादिष्टादचः पूर्वं 'आडजादीनाम्' (६।४।७२) इत्याट् प्राप्त[4] इति । तस्य विधानं प्रति परत्वात्प्रवृत्तौ यण्लोपौ स्थानिवत् भवतः । यत्र[5] त्वादिष्टादचः पूर्वस्तस्य विधिं प्रति न स्थानिवद्भावः वैयाकरणः सौवश्व इति । अत्र हि अचः पूर्वयोरैचोः संभव एव नास्तीति स्वाभ्यां पूर्वयोस्तयोर्विधानात् । अत ऐचो विधानं प्रति य्वौ स्थानिवन्न भवतः । ज्ञापकं चात्रार्थे 'अभ्यासस्यासवर्णे' (६।४।७८) इति असवर्णग्रहणं रक्षितोपवर्णितम् । यद्येवं तन्वतीत्यत्र यणादेशे कृते आदिष्टादचः पूर्वस्य वलादेरिटो विधानं प्रति अजादेशस्य स्थानिवद्भावो न प्राप्नोति । नैवम् । लक्ष्यानुरोधादिहादेशापेक्षमेव पूर्वत्वं विज्ञातव्यमिति ॥ ३४ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ ३५ ॥

'अयमपि षष्ठी स्थानेयोगा' (१।१।४९) इत्यस्यार्थः[6] परिभाषारूपेण पठ्यते । तथा हि तत्र भाष्ये उक्तम् । स्थाने योगो यस्याः सा स्थानेयोगा । निपातनात्सप्तम्यौ[7] अलुक् । षष्ठ्येव स्थानेयोगा नान्या श्रुतिः । षष्ठ्यन्तं स्थानेयोगेन प्रयुज्यते यत उच्चारिता

---

१ M. उरिति विशेषणं for विशेषणं...पदम्. २ M. भजन्ति. ३ M. om. कुतः. ४ P. प्रसक्तः for प्राप्त इति. ५ M. यत्रादिष्टः पूर्वस्य विधिः तत्र न. ६ P. इत्यस्यैवार्थः. ७ M. om. सप्तम्याः.

षष्ठी तत्कार्ययोगिनी भवतीति निर्दिश्यमानस्यादेशा भवन्तीत्यर्थः । तथथा 'पादः पत्' (६।४।१३०) इति षष्ठ्यन्तं पाद इति आदेशेन युज्यते । न तदन्तमङ्गम् । परिभाषयानया तदन्तविधेर्व्यवच्छेदः क्रियते । तथा 'ष्यङः संप्रसारणम्०' (६।१।१३) इति ष्यङन्तस्य पूर्वपदस्य यण इमिति वाराहीपुत्र इत्यत्र वकारस्य संप्रसारणं स्यात् । षष्ठी स्थानेयोगा (१।१।४९) इति ष्यङ एव भवति । तथा क्रियास्तां क्रियास्तमिति सयासुट्कस्य नामादयो न भवन्ति ॥ ३५ ॥

निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ ३६ ॥

एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ॥ ३७ ॥

तथथा 'सद्व्ययतव्य०' (२।२।११) इति षष्ठीसमासनिषेधे निरनुबन्धकतव्योपादाने तव्यतो ग्रहणं न भवति । 'यतोऽनावः' (६।१।२१३) इत्येकानुबन्धकस्य यतो ग्रहणे ण्यतो ग्रहणं न भवति । ज्ञापकं चानयोः 'वामदेवाड् ड्यड्ड्यौ' (४।२।९) इति ड्यड्ड्ययोर्डित्करणम् । तद्धि न कर्तव्यम् । 'यस्येति च' (६।४।१४८) इति लोपेनैव वामदेव्यशब्दस्य सिद्धत्वात् । तत् क्रियते 'ययतोश्चातदर्थे' (६।२।१५६) इत्यनेन नञ उत्तरपदस्यान्तोदात्तविधौ अवामदेव्यमित्यत्र निरनुबन्धकैकानुबन्धकपरिभाषाबलादनयोर्ययतोर्ग्रहणं मा भूदिति । तदेतद् डित्वमनयोः परिभाषयोरस्तित्वे ज्ञापकम् । इह निरनुबन्धकपरिभाषा प्रत्ययविषये ज्ञापितत्वाद् वर्णग्रहणे न प्रवर्तते इत्याहुः । यदि हि स्यात्तदा यू इति नदीसंज्ञा निरनुबन्धकयोरेव स्यात् लक्ष्मीः चमूरिति । न सानुबन्धकयोः कुमारी ब्रह्मबन्धू एतयोरिति ॥ ३६ ॥ ३७ ॥

तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥ ३८ ॥

सोनुबन्धो यस्य स तदनुबन्धकः । तद्ग्रहणे न तच्छून्यस्य ग्रहणं भवति । तेन 'चङि' (६।१।११) इति चकारानुबन्धे द्विर्वचनं क्रियमाणं तच्छून्ये अपुपदित्यत्राङि न प्रवर्तते अनुबन्धोच्चारणसामर्थ्यात् । न्यायमूला चेयम् । इह च स एवानुबन्धो यस्येति अवधारणगर्भस्य बहुव्रीहेराश्रयणात् 'वसोः संप्रसारणम्' (६।४।१३१) इति सूत्रे न्यासे वसुग्रहणेन क्वसुनिरास आशङ्कितः शत्रादेशवसोरुकारोच्चारणसामर्थ्यात् सामान्यग्रहणं प्रतिपादितम् ॥ ३८ ॥

सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ॥ ३९ ॥

पुनःप्रसङ्गविज्ञानात् सिद्धम् ॥ ४० ॥

वचनद्वयमिदं विप्रतिषेधसूत्रे (१।४।२) जातिव्यक्तिपक्षयोः फलभूतं परिभाषारूपेण पठ्यते । तथा हि । व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणस्य व्यापारात् पर्यायेण द्वावपि विधी प्राप्तौ । द्वयोरपि तत्र 'विप्रतिषेधे परं कार्यम्' (१।४।२) इत्यनेन नियमः क्रियते परमेव न पूर्वमिति । तदिदमुच्यते सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव । तेन अक्षी ते कृष्णपिङ्गले कपेः इत्यत्र 'ई च द्विवचने' (७।१।७७) इत्यनेन

१ M. om. न. २ M. तद्ग्रहणे तच्छून्यमन्यस्पदं न गृह्यते. ३ P. अक्षी ते इन्द्रपिङ्गले कपेरित्यत्र.

परत्वाद् बाधित 'इकोचि विभक्तौ' (७।१।७३) इति नुम् पुनर्न प्रवर्तते । स्तादित्यादौ च तातङः स्थानिवद्भावे धिभावो न भवति । जातौ तु पदार्थे सकृदेव लक्ष्ये लक्षणं प्रवर्तते विषयान्तरे चोभयं चरितार्थमिति विप्रतिषेधविषयेऽप्रवृत्तिरेवोभयोः प्राप्ता । तत्र परं कार्यमित्यस्य परविधौ व्यापारात् पूर्वनिवृत्तावव्यापार इति सति संभवे पूर्वमपि भवति । तदिदमुच्यते पुनःप्रसङ्गविज्ञानात्सिद्धमिति । तेन भिदेर्लोटि हौ भिन्धकीत्यत्र[1] अज्ञातार्थविवक्षायामकच्धिभावयोः प्राप्तयोः परत्वाद् धिभावे कृते पुनरकज्भवति । ईजं-तुरीजुरित्यत्र[2] परत्वात्संप्रसारणे कृते द्विर्वचनं भवति । यत्र च पूर्वं[3] प्रवर्तमानं परविधिज्ञानं न बाधते तत्रैतद्भवति पुनःप्रसङ्गविज्ञानादिति । यत्र तु परविधिबाधाशङ्का तत्र च पर-विधानसामर्थ्यान्नैतत् प्रवर्तते इत्याहुः ॥ ३९–४० ॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ४१ ॥

अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गमसिद्धं स्यात्[4] । तेन पचावेदमित्यादौ बहिरङ्गस्या-द्गुणस्य असिद्धत्वाल्लोट 'एत ऐ' (३।४।९३) न भवति । ज्ञापकं चास्याः 'वाह ऊठ्' (६।४।१३२) इति वहेश्छन्दसि ण्विप्रत्ययान्तस्य ऊठादेशविधानम् । तत्र हि उच्यते । प्रकृत-मेव संप्रसारणं[5] विधीयमानं परेण पूर्वरूपत्वं ततो ण्विप्रत्ययस्य प्रत्ययलक्षणेन उकारस्य गुण ओकारस्ततो ' वृद्धिरेचि ' (६।१।८८) इति सिद्धं प्रष्ठौहः इत्यादि । अन-कारान्ते चोपपदे[6] वहेर्ण्विप्रत्ययो न दृश्यते । तत् किमूठ्वचनेनेति । यदा त्वस्येतद-सिद्धं बहिरङ्गमन्तरङ्गे इति ण्वौ धातुप्रत्यये विधीयमानत्वादन्तरङ्गे गुणे कर्तव्ये भसंज्ञा-निमित्तप्रत्ययाश्रितं बहिरङ्गं संप्रसारणं नास्तीति कस्य स्थाने गुणः स्यादिति । तत् कृतमूठ्वचनं परिभाषाया अस्तित्वे ज्ञापकमिति । अनित्यत्वं चास्याः ' नलोपः सुप्स्वर-संज्ञातुग्विधिषु कृति ' (८।२।२) इति तुग्विधौ नलोपस्यासिद्धत्ववचनेन ज्ञापितम् । यदि ह्ययं नित्या स्यादनयैव वृत्रहभ्यामित्यत्रान्तरङ्गे तुकि कर्तव्ये[7] बहिरङ्गस्य नलोपस्या-सिद्धत्वादेव सिद्धमिति[8] । अनित्यत्वे चास्या अमू इत्यत्र एकदेशस्य बहिरङ्गस्यान्तरङ्गे उत्वमत्वे कर्तव्ये असिद्धत्वं न भवति । अनित्या चेयं[9] परिभाषा यदयं ' धातोस्तन्निमित्तस्यैव ' (६।१।८०) इति निमित्तग्रहणं करोति तज्ज्ञापयत्याचार्यः । तद्धि पौयमानिरित्यत्रातन्नि-मित्तस्य वान्तादेशो मा भूदित्येवमर्थं क्रियते । तदेवमर्थं चेत्तदा न कर्तव्यमिति अनयैव परिभाषया न भविष्यति । बाह्यप्रत्ययमाश्रित्य वृद्धेः प्रवर्तमानत्वाद् बहिरङ्गत्वम् । अतस्तन्निमित्तग्रहणं भवति तत्त्वे ज्ञापकमेव ॥ ४१ ॥

---

१ After भिन्धकीत्यत्र, P. ins. ' तिङश्च ' (५।३।५६) इत्यनेन. २ P. ईयतु-रीयुरित्यत्र. ३ After पूर्वं P. ins. कार्यं. ४ P. भवति for स्यात्. ५ P. संप्रसारणं वका-रस्य विधीयताम् । ततः परपूर्वत्वम् । ततोण्विप्रत्ययान्तस्य प्रत्ययलोपलक्षणेन. ६ After उप-पदे P. ins. छन्दसि. ७ M. om. कर्तव्ये. ८ P. असिद्धत्वं सिद्धमेवेति. ९ P. om. अनित्या चेयं.....ज्ञापकमेव ।

नाजानन्तर्ये बहिरङ्गप्रक्लृप्तिः ॥ ४२ ॥

पूर्वापवादोयम् । अचोरानन्तर्ये यत्कार्यमन्तरङ्गं बहिरङ्गं वा क्रियते तत्र बहिरङ्गप्रकल्पना नास्ति । तेनाक्षद्यूरित्यादौ क्विपमाश्रित्य प्रवृत्तस्य ऊठो बहिरङ्गलक्षणत्वे अन्तरङ्गो यणादेशः प्रवर्तत एव । ज्ञापकं चात्र 'षत्वतुकोरसिद्धः' (६।१।८६) इत्येकादेशस्यासिद्धवचनम् । यदि ह्यजानन्तर्येपि बहिरङ्गासिद्धत्वं स्यात्तदा कोस्य योस्येत्यादौ इणः सस्य षत्वेन्तरङ्गे कर्तव्ये पदद्वयाश्रयस्य 'एङः पदान्तादति' (६।१।१०९) इति एकादेशस्य असिद्धं बहिरङ्गमन्तरङ्गे इत्येवासिद्धत्वादसिद्धवचनमिदमनर्थकं स्यात् । पदान्तपदाद्योरेकादेशोऽसिद्धो भवति । कथम् । 'पदान्ताद्वा' (६।१।७६) इत्यतः पदान्तादित्यनुवर्तते । 'इको यणचि' (६।१।७७) इत्यतोऽचीति । 'एकः पूर्वपरयोः' (६।१।८४) । तेनायमर्थः पर्यवस्यति । पदान्तादुत्तरो योच् तत्पूर्वो यः पदादिः तयोर्य एकादेशः स तुकि षत्वे च कर्तव्ये असिद्धो भवति । ततोयमर्थः पर्यवस्यति । पदान्तादचि परे पूर्वपरयोरेकादेशोऽसिद्धो भवति । पदान्तपदाद्योरेकादेशोऽसिद्धो भवति न तु यदा एतद्वचनेन स्वीक्रियते किंतु 'संप्रसारणङीट्सु प्रतिषेधो वक्तव्यः' (६।१।८६ वा.) इत्यनेन साध्यते । यद्वा । कथं 'जसः शीः' (७।१।१७) इत्यत्र दीर्घोच्चारणस्य परार्थता यावता तत्रैव प्रयोजनं भासते । सर्वे छात्रिणो गच्छन्ति इत्यत्र तुग्विकल्पो यथा स्यात् । अन्यथा सिद्धत्वाद् ह्रस्वलक्षणो नित्यलुक् स्यात् । तस्मात्स्वस्थाने प्रयोजनोपलम्भात् कथमुत्तरार्थता । अत्रोच्यते । तथाहि वक्तव्यमिति । तस्यार्थः । संप्रसारणे ङौ इकारे इटि च यत्रैकादेशस्तस्यासिद्धत्वप्रतिषेधो वक्तव्य इति इकारोत्र प्रश्लिष्टो द्रष्टव्यः । यस्तु न्यासकृता वक्तव्यार्थो व्याख्यातः संप्रसारणे ङौ इटि चेति (न्यास भाग २ पृ. २५५) तदुपलक्षणतया बोद्धव्यमिति सुस्थम् ॥ ४२ ॥

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवत् ॥ ४३ ॥

विप्रतिषेधसूत्रे (१।४।२) इयं परिभाषा भाष्यकारेण पठिता । धौकामिः सौर्थितिः वैक्षमाणिः इत्यादौ प्रविभज्यान्वाख्याने वृद्धेर्बहिरङ्गाया दुर्बलत्वात् अन्तरङ्गौ दीर्घयणौ एकादेशौ यथा स्याताम् । यत्र यत्र अन्तरङ्गबहिरङ्गयोर्युगपत्प्राप्तिस्तत्रेयमुपतिष्ठते । यत्र तु प्रवृत्त एव बहिरङ्गे अन्तरङ्गप्राप्तिस्तत्रासिद्धं बहिरङ्गमन्तरङ्गे इति प्रवर्तते । यत्र च

---

१ After इत्यादौ P. ins. सत्यपि. २ P. बहिरङ्गत्वे. ३ M. om. इणः. ४ M. om. कर्तव्ये. ५ P. om. the whole passage here from पदान्तपदाद्योरेकादेशः... इति सुस्थम् and substitutes for it संहिताप्रकरणकार्ये एवायमसिद्धं बहिरङ्गमिति परिभाषाया अजानन्तर्ये निषेध इति 'धातोस्तन्निमित्तस्यैव' (६।१।८०) इत्यत्र न्यासकृतोक्तम् । तेन पचावेदम् इत्यत्र 'एत ऐ' (३।४।९३) इत्यस्मिन् प्रकरणान्तरकार्ये बहिरङ्गासिद्धत्वादाद्गुणो भवतीति ॥ ६ M. P. सौस्थितिः.

संहिताप्रकरणे ‘ षत्वतुकोरसिद्धः ’ (६।१।८६) इति असिद्धवचनाज्ज्ञापकात् ‘ असिद्धं बहिरङ्गमन्तरङ्गे ’ इति परिभाषा निषिध्यते तत्राप्यन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवत् इतीयं परिभाषा प्रवर्तत एव । एतेन वृक्ष इ इन्द्र ते इ इन्द्राः अपच इ इन्द्रम् इति ङि जसः शी लड उत्तमैकवचनेषु आद्गुणात् परमपि सवर्णदीर्घत्वं बहिरङ्गत्वान्न भवति । पुनश्च प्रत्याख्यातेयं भाष्यकृतैव अन्तरङ्गबलीयस्त्वस्य लोकसिद्धत्वात् । तदुक्तं सा चाप्येषा लोकतः सिद्धा इति ॥ ४३ ॥

प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ॥ ४४ ॥

प्रत्यये गृह्यमाणे यस्मादसौ विहितस्तदादेरेव भागस्य तत्प्रत्ययान्तस्य ग्रहणं भवति । प्रयोजनं धातुप्रातिपदिकप्रत्ययसमासताद्धितविधिस्वराः । सनाद्यन्ता धातवः (३।१।३२)। यस्मात्सन्[1] विहितस्तदादेरेव तदन्तस्य च धातुसंज्ञा । चिकीर्षति । न संघातस्य विप्रः चिकीर्षकः इति । कृत्तद्धितान्तस्य प्रातिपदिकत्वे यतस्तौ विहितौ तदादेस्तदन्तस्तैव संज्ञा । कारको गार्ग्य इति । न संघातस्य विप्रः[2] कारको विप्रो गार्ग्य इति । सुप आत्मनःक्यच्प्रत्ययो यतः सुप् तदादेरेव पुत्रीयतीति । न संघातस्य महान्तं पुत्रमिच्छतीति । सुप्सुपेति समासः यतः सुप् तदादेरेव राजपुरुषः । न संघातस्य ऋद्धस्य[3] राज्ञः पुरुषः इति । ‘ यञिञोश्च ’ (४।१।१०१) इति फक् यतो यञिञौ विहितौ तदादेरेव गार्ग्यायणः[4] दाक्षायणः । न संघातात् । विप्रो गार्ग्यायणः, विप्रो दाक्षायणः इति । ‘ ञ्नित्यादिर्नित्यम् ’ (६।१।१९७) इत्याद्युदात्तत्वं ञ्नितौ विहितौ तदादेरेव गार्ग्यः । न संघातात् । विप्रो गार्ग्यः, विप्रस्य कृतिरिति । स चायमर्थो ‘यस्मात्प्रत्ययविधिस्तदादिप्रत्ययः’ (१।४।१३) इति योगविभागेन साधितः । प्रत्ययो[5] विधीयमानो यस्माद् विधिस्तदादेरेव भागस्य गृह्यते । न तत्प्रत्ययान्तः संघात इति ॥ ४४ ॥

स्त्रीप्रत्ययेनानुपसर्जनेन ॥ ४५ ॥

पूर्वापवादोयम् । येयं प्रत्ययग्रहणपरिभाषा सा हि स्त्रीप्रत्ययेनानुपसर्जनेन ग्राहिका न भवति । अतः स्त्र्यधिकारविहिते प्रत्यये संघातोपि[6] गृह्यते न तु यतः स्त्रीप्रत्ययस्तदादेरेव इति वाक्यार्थः । तेन ‘ स्त्रीभ्यो ढक् ’ (४।१।१२०) इति यतोणन्तात्कारशब्दाद् ङीप् न तदादेर्ढक् प्रत्ययः किं तु समुदायादेव कुम्भकारशब्दात् । कौम्भकारेयः । नागरकारेयः इति । अन्यथा हि अत्रान्तावयवस्य कार[7]शब्दस्य वृद्धिस्वरौ स्याताम् । तथा ष्यङः संप्रसारणम् (६।१।१३) इत्यत्र ष्याङिति स्त्र्यधिकारविहितप्रत्ययस्य ग्रहणम् । तेन प्रत्ययग्रहणपरिभाषानिषेधात् ष्यङ्मात्रस्य संप्रसारणं भवति

१ M. सन्ते विधिस्तदादेस्तदन्तस्यैव धातुसंज्ञा. २ M. विप्रकारको. ३ M. P. कुद्धस्य. ४ M. om. गार्ग्यायणः. ५ M. प्रत्यये गृह्यमाणे यस्मात्स विहितस्तदादेव गृह्यते । ६ M. संघातो ग्राह्यः न तु. ७ M. om. कारशब्दस्य.

परमकारीषगन्धीपुत्र इति । अनुपसर्जनेनेति वचनात् उपसर्जन स्त्री[1]प्रत्ययान्तस्य प्रत्ययग्रहणपरिभाषैव प्रवर्तते आतिकारीषगन्ध्यपुत्रः अतिकारीषगन्ध्यपतिरिति । हल्ङ्यादिसूत्रे दीर्घग्रहणात्तु कचिदुपसर्जनस्त्रीप्रत्ययान्तेपि प्रत्ययग्रहणपरिभाषा नापेक्ष्यते तेनार्धपिप्पली इत्यत्र हल्[2]ङ्यादिना सुलोपः सिध्यति । परिभाषा चेयं ' ष्यङः संप्रसारणम्० ' (६।१।१३) इत्यत्र भाष्यकारोपगमादेव प्रमाणमिति ॥ ४५ ॥

कृद्ग्रहणेन गतिकारकपूर्वस्यापि ग्रहणम् ॥ ४६ ॥

इयमपि प्रत्ययग्रहणपरिभाषाया अपवादः । यत्र कृतो ग्रहणं तत्र गतिपूर्वं कारकपूर्वमपि कृदन्तं गृह्यते । न तु यतः कृत्प्रत्ययस्तदाद्येव । तद्यथा ' क्षेपे ' (२।१।४७) इति क्तान्तेन समास[3]विधिः सगतिना सकारकेण च भवति । उदकेविशीर्णम् अवतप्तेनकुलस्थितमिति । तथा ' अणिनुणः ' (५।४।१५) इति इनुणन्तादण् सगतेरपि भवति । सांराविणमिति सगतेरेवाङ्गस्यादिवृद्धिः । ज्ञापकं चास्याः ' गतिरनन्तरः ' (६।२।४९) इत्यनन्तरग्रहणम् । तेन हि कृदन्तेन क्तान्ते उत्तरपदे पूर्वपदस्यानन्तरस्य गतिस्वरो विधीयते । उद्धृतम् अवधृतम् इति । न व्यवहितस्य अभ्युद्धृतमिति । तत्र यदीयं कृद्ग्रहणपरिभाषा नाभविष्यत्तदा प्रत्ययग्रहणपरिभाषयैव अप्रत्युद्धृतमिति व्यवहितशब्दसंघाते क्तान्ते प्राप्तिरेव नास्तीति तन्निवृत्त्यर्थमनन्तरग्रहणं नाक[4]रिष्यत् । तत् कृतमस्यार्थस्य ज्ञापकमिति लिङ्ग[5]मात्रं च । अस्याः सूत्रकारोपगमादेव साधुत्वम् । यतः कारकपूर्वस्यापि ग्रहणे न ज्ञापकं तस्मात् कात्यायनपठितत्वादेवैषा प्रमाणमिति । लक्ष्यवशात् कचिदियं नाश्रीयतेपि । तेन प्रज्ञासुकरः कटः इत्यत्र खलि ' खित्यनव्ययस्य ' (६।३।६६) इति ह्रस्वः ' अरुर्द्विषदजन्तस्य ' (६।३।६७) इति नुम् न भवति । तथा मूलकेनोपदंशं भुङ्क्ते इत्यत्र ' तृतीयाप्रभृतीन्यन्यतरस्याम् ' (२।२।२१) इति समासाभावपक्षे सगतिकारकसमुदायस्य कृदन्तस्य प्रातिपदिकसंज्ञा न भवति । यदि हि स्यात् ' सुपो धातु० ' (२।४।७१) इत्यादिना प्रातिपदिकावयवविभक्तेस्तृतीयाया लुक् स्यादिति ॥ ४६ ॥

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ॥ ४७ ॥

प्रागेवेति वक्तव्यम् । सुप् सुपा (२।१।२,४) इत्यधिकारेपि ' कुगतिप्रादयः ' (२।२।१८) 'कर्तृकरणे कृता बहुलम्' (२।१।३२) 'उपपदम[6]तिङ्' (२।२।१९) इति च यद्गतीनां कारकाणामुपपदानां च कृदन्तेन समासवचनं तत्सुबुत्पत्तेः प्रागेव ज्ञातव्यम् । तेन प्रशब्दस्य गतेः स्थशब्देन कप्रत्ययान्तेनासुबन्तेनैव समासो भवति प्रष्ठीति । चर्मभ्रशब्दयोश्च कारकयोः ' कर्तृकरणे कृता बहुलम् ' (२।१।३२) इति क्तान्तेनासुबन्तेनैव समासः चर्मक्रीती अभ्रविलिप्तीति । कच्छशब्दस्य च कप्रत्ययान्तेन पशब्देन चर्मशब्दस्य चाण्प्रत्ययान्तेन कारशब्देनासुबन्तेनैव समासः कच्छपी चर्मकारीति । असुबन्तेन च समासस्य प्रयोज-

१ M. स्त्रीप्रत्ययान्ते. २ M. हलङ्यादिलोपः. ३ M. om. विधिः. ४ After नाकरिष्यत् M. ins. किमेतन्निवृत्त्यर्थेन. ५ M. om. लिङ्गमात्रं च...प्रमाणमिति. ६ अतिङ् इति यद्गत्युपपदानां कारकोपपदानां च नित्यसमासवचनं.

नम्, अंकारान्तत्वे सति समासप्रातिपदिकस्य अत इत्यधिकारात् प्रेष्ठीति पुंयोगे ङीप् भवति। चर्मक्रीतीति ' क्रीतात्करणपूर्वात् ' (४।१।५०) इति अभ्रलिप्तीति ' क्तादल्पाख्यायाम् ' (४।१।५१) इति ङीप्। कच्छपीति च ' जातेः० ' (४।१।६३) इति ङीष्। चर्मकारीति च ' टिड्ढाणञ्० ' (४।१।१५) इति ङीप् भवति। यदि हि पुनरत्र सुबन्तेन सह समासः स्यात् ततोऽन्तरङ्गत्वाट्टाप् भवति ततः सुप् ततः समास इति आकारान्तं समासप्रातिपदिकं जातमिति अत इत्यधिकारविहित ईकारो न स्यात्। एवं माषान् वपति ब्राह्मणी इति माषशब्दस्य ' बहुलमाभीक्ष्ण्ये ' (३।२।८१) इति णिन्यन्तेन वापिन्शब्देन असुबन्तेनैव समासः। तत् प्रातिपदिकस्यैवान्तो नकार इति ' प्रातिपदिकान्त० ' (८।४।११) इत्यादिना णत्वं सिध्यति। तस्यासिद्धत्वाद् ' ऋन्नेभ्यो ङीप् ' (४।१।५) इति ङीपि[3] माषवापिणी व्रीहिवापिणीति। इह च यद्यपि प्राक्सुबुत्पत्तेरिति सामान्येनोक्तं तथापि गतिकारकोपपदानां सुबन्तानामेव कृद्भिरसुबन्तैरिति बोद्धव्यम्। तथा च चर्मक्रीती, चर्मकारीति सुबन्तत्वात् पूर्वपदस्य नलोपः। वैयाकरण इति परत्वादैजागमः, निष्णातमिति च षत्वम्, निर्यायेति रुत्वम्। ' क्रीतात्करणपूर्वात '(४।१।५०) इत्यत्र च मनसाक्रीतीति भाष्ये उदाहृतम्। तत्र च ' मनसः संज्ञायाम् ' (६।३।४) इत्यत्रालुक्समासे पूर्वपदस्य तृतीया श्रूयते। अर्थवत्सूत्रे (१।२।४५) च ' अस्ति हि सुबन्तानामसुबन्तेनैव समासः गतिकारकोपपदानां कृद्भिः ' इति भर्तृहरिणोक्तम् ॥

ज्ञापिता चेयं परिभाषा सूत्रकारेण ' उपपदमतिङ् ' (२।२।१९) इत्यनेन। तदुक्तम्—सुप्सुपेत्यधिकारात् तिङन्तेन समासस्य प्रसङ्ग एव नास्ति इति किमतिङ्ग्रहणेन। ज्ञापनार्थं च नैतयोर्योगयोः सुप्सुपा इति संबध्यते। तेन गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति उपपन्नं भवति। ज्ञापकं चात्र सुप्सुपेति न संबध्यते इति यदुक्तं तन्मिलितं न संबध्यते इति बोद्धव्यम्। पूर्वपदस्य सुबन्तस्यैवेष्यमाणत्वात्। ज्ञापकमप्येतदनैकान्तिकम्। तथा च कात्यायनेनातिङ्ग्रहणस्य प्रयोजनमेवं दर्शितम्। अतिङिति क्रियानिषेधोपलक्षणम्। क्रियोपपदस्य मा भूत्। कारकस्य गतिः कारकस्य व्रज्या इति ' तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम् ' (३।३।१०) इति ण्वुल्। कर्तरि षष्ठीसमासे चात्र उपपदस्य पूर्वनिपाते व्रज्याकारक इत्यनिष्टं स्यात्। ' ण्वुल्तृचौ ' (३।१।१३३) इति ण्वुलन्तस्य तु भवत्येव षष्ठीसमासः कारकगतिः कारकव्रज्या इति। तस्मात् ' पुंयोगादाख्यायाम् ' (४।१।४८) इत्यत्र कात्यायनोपगमादेवास्त्येषा परिभाषेति अस्याश्च परिभाषायाः ' तिङि चोदात्तवति ' इत्यत्र स्वरसूत्रे न्यासकारेणार्थान्तरमपि व्याख्यातम्। तथा गतिकारकोपपदानां कृदन्तेनैव समास इति प्रपचातितराम् इत्यत्र च तरबन्तस्य समासाभाव इति ॥ ४७ ॥

---

१ M. आकारान्तत्वे. २ M om. प्रष्ठीति. ३ M. om. ङीपि. ४ M. om. सुबन्तानाम्. ५ M. om. निर्यायेति रुत्वम्. ६ M. आश्रीयते for श्रूयते. ७ M. तस्मिन्नविद् for तन्मिलितं. ८ P. पूर्वपदे. ९ P. एवं for एव.

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ ४८ ॥

तेन नमस्करोति देवान् इति ' नमःस्वस्ति० ' (२।३।१६) इत्यादिना नमोयोगे चतुर्थीं बाधित्वा द्वितीया भवति कारकविभक्तिरिति । चतुर्थी तु नमोस्तु देवेभ्यः इति कारकादन्यत्र शेषे चरितार्था । एवं ' हा पितः क्वासि हे सुभ्रु ' इत्यत्र हाशब्दयोगे द्वितीयां बाधित्वा प्रथमा भवति कारकविभक्तिरिति । अन्तरा त्वां च मां च कमण्डलुः इति अन्तरायुक्तस्य कमण्डलोः प्रथमैव भवति । न्यायमूला चेयं परिभाषा । तथा हि उपपदविभक्तीनां सर्वासां षष्ठ्यपवादत्वात् संबन्धः प्रवृत्तिनिमित्तम् । कारकसंबन्धस्य कारककृतस्य विवक्षाकाले संबन्ध एव नास्तीति कुतस्तद्द्योतिका विभक्त्य इति दुर्बलत्वमुपपदविभक्तीनाम् । बहिरङ्गाश्चोपपदविभक्तयोपि द्विपदाश्रयणात् ॥ ४८ ॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ ४९ ॥

तेन ' पञ्चम्यपाङ्परिभिः ' (२।३।१०) इत्यत्रापेन साहचर्यात् परेर्वर्जनार्थस्यैव ग्रहणमुपपन्नं भवति । लौकिक एवायं न्यायः । लोके हि गोर्द्वितीयेनार्थे इत्युक्ते गौरेव द्वितीय उपादीयते साहचर्यात् । नाश्वो नापि गर्दभ इति । अनित्या चेयं परिभाषा शास्त्रे । तथानित्यत्वमस्याः ' द्वित्रिश्चतुरिति कृत्वोर्थे ' (८।३।४३) इत्यत्र चतुरो विशेषणेन कृत्वोर्थग्रहणेन ज्ञापितम् । यदि हीयं नित्या स्याद् द्वित्रिःशब्दयोः सुच्प्रत्ययान्तयोः साहचर्यादेव कृत्वोर्थवृत्तेरित्येव चतुरोपि विशेषणं स्यादिति किं चतुरो विशेषणेन कृत्वोर्थग्रहणेन । तेनास्या अनित्यत्वामिति ' दीधीवेवीटाम् ' (१।१।६) इत्यत्र दीधीवेव्योः साहचर्याद् इटकिट्कटी गताविति इटो धातोर्ग्रहणं न भवति किं तर्हि आगमस्येति ॥४९॥

सर्वो द्वन्द्वो विभाषैकवद् भवति ॥ ५० ॥

इह समाहारात्मकासमाहारात्मकविषयो द्वन्द्वः सर्वो विभाषैकवद् भवति । सर्वत्र समाहारप्राप्तमेकवचनं विकल्प्यते । इतरेतरे चाप्राप्तमेव पक्षे विधीयते । बाभ्रव्यशालङ्कायनाः, बाभ्रव्यशालङ्कायनमित्युदाहरणम् । न्यायसिद्ध एवायमर्थः । तथा हि इतरेतरयोगे तावदवयवार्थावगमात् द्विवचनबहुवचने सिद्धे । समाहारे संहतिप्राधान्यादेकवचनमेकवद्भावकरणम् । एतयोरेव व्यवस्थार्थं दधिपयआदीनामितरेतर एव । प्राण्यङ्गादीनां समाहार एव । वृक्षमृगादीनामुभयश्चेति । ये इदानीमपरिगणिता बाभ्रव्यशालङ्कायनादयः तेषामविशेषेण उभयत्रापि द्वन्द्वो यथाविधानमर्थात्सुगम इति । इह च वृक्षमृगतृणादीनां बाभ्रव्यशालङ्कायनादिवत् सर्वो द्वन्द्वो विभाषैकवद् भवति इत्येव विकल्पे सिद्धे

---

१ M. om. शेषे. २ P. कारकभावस्य च विवक्षाकाले. ३ P. तद्द्योतिकाः. ४ P. द्विपदाश्रयत्वात्. ५ M. इत्यत्रापिसाहचर्यात्. ६ M. om. अर्थे. ७ P. कृत्वोर्थचतुर्शब्दस्य ग्रहणं स्यादिति. ८ P. इह इतरेतरसमाहारात्मकश्च समासविषयो. ९ P. इतरेतरस्य प्राप्तमेव. १० P. संघातप्राधान्यात्.

प्लक्षन्यग्रोधं रुरुपृषतमित्यादिसजातीयैरेवामीषां द्वन्द्व एकवद्यथा स्यान्न विजातीयैरिति व्यतिकरनिरासार्थं विभाषयैकत्वविधानम् । तेन पश्वादीनां विजातीयैर्द्वन्द्वो नैकवद्भवति । इतरेतरयोगं एवासौ द्वन्द्वो भवतीति । यथा भट्टौ ' नरवानररक्षसाम् ' (९।१२३) इति । ज्ञापकं चास्याः ' तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे० ' (१।२।६३) इत्यत्र बहुवचनग्रहणम् । तेन हि बहुवचनप्रसङ्गे द्विवचनं विधीयते । उदितौ तिष्यपुनर्वसू इति तत्रोक्तम् । तिष्य एकः पुनर्वसू द्वौ इति बहुवचनं द्वन्द्वस्यैकवचनप्रसङ्गो नास्त्येवेति बहुवचनप्रसङ्ग एवैतद् द्विवचनं भविष्यतीति किं बहुवचनस्येत्यनेन । तत्कृतं ज्ञापयति— ' सर्वो द्वन्द्वो विभाषा एकवद्भवति ' इति ॥ ५० ॥

उभयत आश्रये नान्तादिवत् ॥ ५१ ॥

इह ' एकः पूर्वपरयोः ' (६।१।८४) इत्यतः पूर्वग्रहणे अनुवर्तमाने ' अन्तादिवच्च ' (६।१।८५) इत्यनेन एकादेशः पूर्वं कार्यं प्रत्यन्तवत् परं कार्यं प्रत्यादिवत् क्रियते यथा शक्येत विधिः कर्तुमिति । कथं च विरोधेन शक्यते विधिः संपादयितुम् । यत्र पूर्वमेवाश्रीयते तत्र पूर्वस्यान्तवत्त्वं क्रियते । यथा ' बह्वच्पूर्वपदाट्ठच् ' (४।४।६४) इति द्वादशान्यिक इति पूर्वोत्तरपदयोरत्रैकादेशः पूर्वं प्रत्यन्तवत् । यथा च ' वाह ऊठ् ' (६।४।१३२) भारौहः । पूर्वोत्तरयोरत्रैकादेशः पूर्ववद्भवति । यत्र परमेवाश्रीयते तत्र तस्यादिवद्भवति । यथा ' ईदूदेद्द्विवचनं प्रगृह्यम् ' (१।१।११) इति । अग्नी इति द्विवचनाद्द्विवचनयोरत्रैकादेशः परस्यादिवद् भवति । यत्र पुनरेकादेशेनोभयमाश्रयते पूर्वं परं च तत्रोभयत आश्रये उभयोराश्रणे नान्तवद्भावो नाप्यादिवद्भाव इति वाक्यार्थः । तद्यथा प्रोह्यत इत्यत्र ' उपसर्गाद् ह्रस्व ऊहतेः ' (७।४।२३) इति ह्रस्वविधौ । अत्राप्येकादेश उभयमाश्रयते । तत्र पूर्वस्याश्रयणे प्रशब्दस्य उपसर्गव्यपदेशः । परस्याश्रयणे च ऊहतिव्यपदेश इत्ययमेकादेश उभयत आश्रये नान्तादिवद्भवति । तेन समुह्यत इति ह्रस्वो भवति प्रोह्यत इति न भवति । लोकसिद्ध एवायमर्थः । तथा हि । द्वयोस्तुल्यबलयोरेकः प्रेष्योऽविरोधार्थी द्वयोरपि कार्ये न प्रवर्तते ॥ ५१ ॥

वर्णाश्रये प्रत्ययलोपलक्षणतिषेधः ॥ ५२ ॥

वर्णाश्रयविधौ प्रत्ययलक्षणं कार्यं न भवति । तद्यथा गवे हितं गोहितं रायः कुलं रैकुलमिति सुब्लुकि प्रत्ययलक्षणेन आचि (६।१।७७) इति वर्णाश्रयविधौ अवायादेशौ न भवतः । तथा श्रवणा रात्रिरित्यत्र ' संज्ञायां श्रवणाश्वत्थाभ्याम् ' (४।२।५)

१ P. विभाषा एकवत् द्वन्द्वविधानम्. २ M. om. योग. ३ P. बह्वर्थत्वाद् द्वन्द्वैकवचन. ४ P. पूर्वपरग्रहणे. ५ M. om. यथा...प्रत्यन्तवत्. ६ P. एकादेशोसौ द्वयमाश्रयते. ७ M. नान्तादिवदिति वाक्यार्थः. ८ P. इतिवद् ह्रस्वत्वे प्रुह्यत इति न. ९ P. वर्णाश्रये प्रत्ययलक्षणं नास्ति.

इत्यणो लुपि लवणा यवागूरित्यत्र च लवणाल्लुकि (४।४।२४) प्रत्ययलक्षणेन[1] अण्-न्तात् ‘ टिड्ढाणञ्० ’ (४।१।१५) इति ङीप् प्राप्नोति । तत्र[2] च प्राप्त्यभावः । यतो ङीप् प्रत्ययो न वर्णाश्रयः । नैतत् । स च टिड्ढादिभिः षष्ठ्यन्तैरकारविशेषणाद्वर्णाश्रय इति ङीब् न भवति । अयं चार्थः ‘ प्रत्ययलोपे प्रत्ययलक्षणम् ’ (१।१।६२) इत्यत्र द्वितीयप्रत्यय[3]ग्रहेण साधितः । तथा हि तत्रोक्तम् । तल्लक्षणमिति वाच्ये प्रत्ययग्रहणं प्रत्यय-स्वरूपाश्रितमेव कार्यं प्रत्ययलक्षणेन यथा स्यात् । यथा ‘ सुप्तिङन्तं पदम् ’ (१।४।१४) इति अचीत्यादि वर्णाश्रितं मा भूदिति । ज्ञापकं चात्रार्थे ‘ श्रवणा-कार्तिकीचैत्रीभ्यः ’ (४।२।२३) इत्यत्र श्रवणेति टाबन्तनिर्देशः [4]श्रवणाशब्द इति । प्रायिकं चैतत् । तेन क्वचिद्वर्णाश्रयेपि प्रत्ययलोपलक्षणं भवति । यथा अतृणेट् इत्यत्र लुप्तेपि प्रत्यये अपृक्ते हलि ‘ तृणह इम् ’ (७।३।९२) इति इमागमः । ‘ शास इदङ्हलोः ’ (६।४।३४) इत्यत्र न्यासकृता (भाग २ पृ. ५३१) उक्तम् ॥ ५२ ॥

विकरणेभ्यो नियमो बलीयान् ॥ ५३ ॥

विकरणात्पूर्वमात्मनेपदपरस्मैपदनियमस्तावत्प्रवर्तते ततो विकरणानीत्यर्थः । तेन एधि-ष्यते एधितासे ऐधिष्ट करिष्यतीत्यादि सिध्यति । अन्यथा हि परत्वान्नित्यत्वाच्च विकरणेषु स्यादिषु कृतेषु तैर्व्यवधानादत्रानुदात्तङित[5] आत्मनेपदं शेषादेव परस्मैपदमिति व्यवस्था न स्यात् । सामान्येनैव तिबादयः स्युः । नियमस्य लुग्विकरणेभ्यः श्लुविकरणेभ्यः आस्ते शेते अत्ति भिनत्ति इत्यादौ चरितार्थत्वम् । अयं चार्थो ‘ वृद्भ्यः स्यसनोः ’ (१।३।९२) इत्यात्मनेपदविकल्पेन ज्ञापितः । अन्यथा हि वृतु वर्तने इत्येवमादीना-मनुदात्तेतां विकरणेन स्येन व्यवधानादनुदात्तङित एवात्मनेपदमिति नियमो नास्तीति सामान्यविहितेषु तिबादिषु कृतेषु सिद्धमुभयं वर्त्स्यति वर्तिष्यते इति किमनेन विकल्पेन । तत् कृतमुक्तार्थस्य ज्ञापकमिति । प्रायिकं चैतादिति कृत्वा ऋच्छेरनादेशस्य ग्रहणम् । अर्त्यादेशस्य त्वर्तेरित्येव सिद्धमिति ‘ समो गमि० ’ (१।३।२९) इत्यादिसूत्रे वृत्तिः । न हि विकरणेभ्यो नियमो बलीयानिति विकरणे विधीयमाने ऋच्छादेशः प्रागात्मनेपदाद संभवति ॥ ५३ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते ॥ ५४ ॥

समासे [6]समासाश्रयत्वाद् बहिरङ्गो ल्यप् अन्तरङ्गान् विधीन् बाधते । प्रयोजनं [7]हित्वतत्वआत्वइत्वदीर्घत्वशूठइटः । प्रधायेत्यत्र ‘ दधातेर्हिः ’ (७।२।४२) इति हित्वं न भवति । प्रदायेति ‘ अच उपसर्गात्तः ’ (७।४।४७) इति तत्वं न भवति ।

---

१ After प्रत्ययलक्षणेन M. ins. प्रत्ययस्य ग्रहणेन. २ M. om. तत्र च... नैतत् । ३ M. P. °ग्रहेन. ४ P. om. श्रवणाशब्द इति. ५ After ङितः P. ins. एव. ६ P. द्विपदाश्रयत्वात्. ७ M. हित्वतत्वात्वदीर्घत्वइत्वऊठः.

प्रखन्य प्रजन्य इति 'जनसनखनाम्०' (६।४।४२) इति आत्वं न भवति। प्रस्थायेति 'द्यतिस्यतिमास्थाम्०' (७।४।४०) इति इत्वं न भवति। प्रधायेति 'घुमास्थागा०' (६।४।६६) इति ईत्वं न भवति। प्रक्रम्येति 'क्रमश्च क्त्वि' (६।४।१८) इति क्विझ्लोः क्ङिति न दीर्घः। प्रपृच्छ्य इति 'च्छ्वोः शूडनुनासिके च' (६।४।१९) इति शकारो न भवति। प्रतिदीव्येत्यत्र 'च्छ्वोः शूठ्०' (६।४।१९) इति ऊठ् न स्यात्। प्रगृह्येति वलादेरितीट् न भवति। ज्ञापकं चात्र 'अदो जग्धिर्ल्यप् ति किति' (२।४।३६) इति ल्यब्ग्रहणम्। अन्यथा प्रजग्ध्येत्यत्र अन्तरङ्गत्वादेव क्त्वावस्थायां तकारादौ कितीत्येव जग्धौ सिद्धे ल्यपीति पृथक् न कृतं स्यात् ॥ ५४ ॥

धातोः स्वरूपग्रहणे तत्प्रत्यय एव कार्यसंविज्ञानम् ॥ ५५ ॥

अनेन 'सृजिदृशोर्झल्यमकिति' (६।१।५८) इति अमे धात्वधिकारीयप्रत्यये भवति स्रष्टा द्रष्टेति। इह न भवति शुदृग्भ्यां सुदृग्भिः। क्विन्तानां धातुत्वेपि भ्यांभिसोः प्रातिपदिकप्रत्ययत्वात्। एवं 'मस्जिनशोर्झलि' (७।१।६०) इति नुम् नेह भवति उदकमग्भ्यां प्राणनग्भ्याम् इति। 'हनस्तोऽचिण्णलोः' (७।३।३२) इति तत्वं नेह भवति वार्त्रघ्नः इति। 'अचि विभाषा' (८।२।२१) इति लत्वं नेह भवति देवगिरौ देवगिरः इति। तदुक्तं प्रयोजनं सृजिदृशिमस्जिनशिहनिगिरयः। इह च स्वरूपग्रहणे इति वचनात् प्रसृड्भ्यां प्रसृड्भिः इत्यत्र 'अनुदात्तस्य चर्दुपधस्य०' (६।१।५९) इति अम्प्राप्तिदोषमुद्भाव्य 'मृजेर्वृद्धिः' (७।२।११४) इत्यत्र भाष्ये परिभाषान्तरमाश्रितम्। 'धातोः कार्यमुच्यमानं तत्प्रत्यये एव भवति' इति। अयं चार्थः भ्रूणघ्नो भावः इति क्विन्तात् भ्रौणहत्यः इत्यत्र 'दाण्डिनायन०' (६।४।१७४) इत्यादिना तकारनिपातनेन ज्ञाप्यते। यदि धातोः कार्यमधातुप्रत्ययेपि स्यात्तदा 'हनस्तोऽचिण्णलोः' (७।३।३२) इत्यनेन टिलोपं बाधित्वा तकारः सिद्धः स्यात्। किं निपातनेन। 'हो हन्तेः०' (७।३।५४) इति कुत्वनिषेधार्थमिदं निपातनं न ज्ञापकम्' इति न वाच्यम्। कुत्वनिषेधार्थस्य 'न क्वादेः' (७।३।५९) इत्यत्र नेति योगविभागेन साधितत्वादिति भाष्ये। इह तु नियौ नियः भुवौ भुवः इत्यत्र 'श्रियः' (६।४।५९) इति निर्देशाज्ज्ञापकादधातुप्रत्ययेष्वपि इयङुवङाविति ॥ ५५ ॥

सर्वे विधयश्छन्दसि विकल्प्यन्ते ॥ ५६ ॥

अनेन धुरि दक्षिणस्यामिति सप्तम्या विकल्पितत्वात् तदर्थे शेषषष्ठी धुरि दक्षिणस्याः इति भवति। तक्षन्तीति बहुवचनस्य विकल्पितत्वादेकवचनमुत्सर्गः। ये यूपाय तक्षति मधु इति। क्लीबे नुमो विकल्पितत्वात् 'मधोस्तृप्ता इवासते' इत्येवमादि बोद्धव्यम्। अयं

१. M. om. क्विझ्लोः क्ङिति. २. M. प्रोह्येति. ३. M. ल्यपि कथनं न स्यात्. ४. M. om. अम्. ५. P. वज्रसृड्भ्यां देवदृग्भिः for सुदृग्भ्यां सुदृग्भिः. ६. M. om. धातोः...भवति इति. ७. P. हनस्तिचिण्णलोः. ८. M. mo. न.

चार्थः ‘ षष्ठीयुक्तश्छन्दसि वा ’ (१।४।९) इति योगविभागेन साधितः । ‘ व्यत्ययो बहुलम् ’ (३।१।८५) इति व्यत्ययेनापि एतान्युदाहरणानि सिध्यन्तीति ॥ ५६ ॥

अभेदका इह शास्त्रे गुणाः ॥ ५७ ॥

उदात्तादयो गुणा उच्चारणे शब्दं न भेदयन्तीत्यर्थः । लोके हि गुणा भेदकाः दृश्यन्ते । यथैकमुदकमिदं शीतमुष्णमिति गुणभेदाद् भिद्यते । अभेदकाश्च यथा देवदत्तो मुण्डयपि जटयपि शिख्यपि स्वामाख्यां न जहाति तथा बालो युवा वृद्ध इति । एवं शास्त्रेपि उभयग्रहणे प्राप्ते नियमोयमभेदका गुणाः स्युरिति । तेन ‘वृद्धिरादैच्’ (१।१।१) इत्यत्र उदात्तादिभेदभिन्नानामप्यादैचां सामान्येन ग्रहणं सिध्यति । अयं चार्थो ‘ लुङ्लङ्लृङ्क्ष्वडुदात्तः ’ (६।४।७१) इत्यत्र उदात्तवचनेन ज्ञाप्यते । यदि भेदका गुणाः स्युस्तदा उदात्तगुण एवाकारः उच्चारितः स्यात् किमुदात्तवचनेनेति । यद्येवमभेदका गुणाः ‘ अनुदात्तादेरञ् ’ (४।२।४४) उच्यमान उदात्तादेरपि प्राप्नोति । नैतदस्ति । आश्रीयमाणो हि गुणो भेदको भवति । यथा ‘ छागमालभेत ’ इत्युक्ते शुक्लः कृष्णो वा आलभ्यते । ‘ श्वेतमालभेत ’ इत्युक्ते शुक्ल एवालभ्यते ॥ ५७ ॥

स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेपि ॥ ५८ ॥

स्वार्थिकाः कल्पबादयः प्रकृतेर्लिङ्गवचनं चातिक्रामन्ति । तेन गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना इति लिङ्गव्यतिक्रमः पचतोरूपम्, पचन्तिरूपम् इति वचनातिक्रमः सिद्धो भवति । लिङ्गं त्वत्र तिङन्तस्य क्रियाप्रधानत्वेनासत्त्ववाचित्वात्सामान्येन नपुंसकत्वं युक्तमेव । अपिशब्दाल्लिङ्गवचनान्यनुवर्तन्तेपि स्वार्थिकाः । कुत्सितोऽश्वोऽश्वकः । प्रशस्तो वैयाकरणो वैयाकरणरूप इति । ज्ञापकं चात्र स्वार्थिकानां लिङ्गवचनानामतिक्रमणे ‘ णचः स्त्रियामञ् ’ (५।४।१४) इत्यत्र स्त्रियामिति पदम् । तत्र ह्युक्तं ‘ कर्मव्यतिहारे णच् स्त्रियाम् ’ (३।३।४३) इति णच् विहितः । तदन्तादयं स्वार्थिकोऽञ् इति प्रकृतिगतेनैव लिङ्गेन सिद्धं भविष्यति । किं स्त्रियामित्यनेन । तत् कृतं स्वार्थिकाः प्रकृतिगतं लिङ्गमतिवर्तन्तेपि इत्यस्यार्थस्य ज्ञापकमेव भविष्यति ॥ ५८ ॥

भवति हि क्रियाविशेषणानां कर्मत्वं नपुंसकत्वं च ॥ ५९ ॥

तद्यथा मृदु पचति शोभनं पचतीति । यौक्त एवायमर्थः । क्रिया हि साध्यत्वात् कर्मेति तद्विशेषणमपि कर्म । क्रियायाश्चासत्त्वभूतत्वात्तद्विशेषणं सामान्यलिङ्गेनैव नपुंसकेन निर्देष्टुं युज्यते । ननु क्रियानिमित्तस्य कर्मत्वमुक्तम् । निमित्तं च सिद्धस्वभावं साध्यस्वभावा च क्रियेति कथं कर्म स्यात् । एवं तर्हि ‘ तत्प्रत्यनुपूर्वमीपलोमकूलम् ’ (४।४।२८) इति क्रियाविशेषणकर्मद्वितीयान्ताट्ठग्विधानं ज्ञापयति—साध्यस्वभावापि क्रिया प्रार्थनाध्यवसानादिभिः क्रियां प्रति साधनत्वेनाश्रीयते इति ॥ ५९ ॥

---

१. P. उदात्तादयो धर्मा उच्चारणेन शब्दं न भिन्दन्तीत्यर्थः. २. M. om. एकं. ३. M. om. सिद्धो भवति. ४. M. स्त्रियामिति णचः स्वार्थिकस्य प्रकृतेन लिङ्गेन स्त्रियां भविष्यति. ५. M. क्रियोक्त एवार्थः. ६. M. ननु क्रियायुक्तस्य कर्मत्वं सिद्धं साध्यस्वभावा च क्रियेति. ७ M. प्रार्थनाध्यवसानादिक्रियाप्रधानत्वेन.

अव्यक्ते गुणसंदेहे नपुंसकलिङ्गं प्रयोजयेत् ॥ ६० ॥

अव्यक्तेषु पुंस्त्वादिषु धर्मेषु नपुंसकलिङ्गं प्रयोजयेत् । यथा किं तस्या गर्भे जातमिति । इदमपि युक्तमेव नपुंसकलिङ्गस्य सर्वनामतुल्यत्वात् ॥ ६० ॥

संदेहे बहुवचनं प्रयोक्तव्यम् ॥ ६१ ॥

यथा कति भवतः पुत्रा इति । [1]यौक्तमेव चेदं भवति व्याप्तिन्यायेन बहुवचननिर्देशे सर्ववचनानामनुग्रहणादिति ॥ ६१ ॥

व्यवस्थितवि[2]भाषयापि कार्याणि क्रियन्ते ॥ ६२ ॥

जातिपक्षाश्रयणस्यायमर्थः प[3]ठ्यते । जातौ हि पदार्थे सकृदेव लक्ष्ये लक्षणं प्रवर्तते । भावाभावौ च विकल्पः । तत्र लक्ष्यजातिमभिसमीक्ष्य एकत्र लक्ष्ये भावः कृतः सर्वत्र कृतो भवति । जातेरेकत्वात् । [4]एकत्रैव अभावः कृतः सर्वत्र कृतो भवति । एतावतैव च विकल्पस्य चरितार्थत्वाद्विशिष्टे विषये व्यवस्थिता विभाषा विकल्पो व्यवस्थितविभाषेत्युच्यते । तेन 'अचि विभाषा' (८।२।२१) इति लत्वं प्राण्यङ्गे नित्यं विधीयते गल इति विषे तु न विधीयते गर इति । जातिव्यक्तिपक्षावाचार्येण यथेष्टमाश्रितावेव । तत्र जातिपक्षाश्रयणे 'जात्याख्यायामेकस्मिन्०' (१।२।५८) इति सूत्रं लिङ्गम् । व्यक्तिपक्षाश्रयणे च 'सरूपाणामेकशेष०' (१।२।६४) इति ॥ ६२ ॥

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ ६३ ॥

यत्र सप्तम्यर्थनिर्देशस्तत्र पूर्वस्य कार्यं भवति । यथा 'इको यणचि' (६।१।७७) इति द[5]ध्युदकमिति । पञ्चम्यर्थनिर्देशे तु परस्य कार्यं भवति । यथा 'तिङ्ङतिङः' (८।१।२८) इति अतिङन्तात्परस्य तिङन्तस्य निघात इति । यत्रेदानीमुभयनिर्देशस्तत्र पञ्चमीनिर्देशो बलीयान् प्रवर्तते । तेन 'तस्मान्नुडचि' (६।३।७४) इति तस्मादित्यनया पञ्चम्या अचीत्यस्याः सप्तम्याः षष्ठ्यां [6]प्रकल्पितायामजादेरेव नुट् भवतीति अनजोऽनश्व इति । अच इति षष्ठीनिर्देश एवात्र न क्रियते यस्मिन्विधिस्तदादावल्ग्रहणे (परि० ७५) इत्यस्या उपस्थानमेव । तथा 'आमि सर्वनाम्नः सुट्' (७।१।५२) इत्यत्र आत् इत्यनुवृत्तौ अकारान्तात्सर्वनाम्नः इत्यनया पञ्चम्या आमीत्यस्याः सप्तम्याः षष्ठ्यां प्रकल्पितायामाम एव सुडागमो भवति । अयं च 'विप्रतिषेधे परं कार्यम्' (१।४।२) इत्य[7]स्यैवार्थः परिभाषारूपेण पठ्यते । तथाहि 'तस्मान्नुडचि' (६।३।७४) इत्यत्र पञ्चमीसप्तम्योरनवकाशत्वाद्विरोधे सति 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१।१।६६) इत्यतः 'तस्मादित्युत्तरस्य' (१।१।६७) इति परत्वाद् 'विप्रतिषेधे परम्०' (१।४।२) इति प[8]ञ्चम्यर्थनिर्देश एव कार्यभाग्भवति । 'आमि सर्वनाम्नः सुट्'

---

१. P. यौक्तं. २. P. विभाषयापीह कार्याणि. ३. M. om. पठ्यते ४. M. om. एकत्रैव...भवति. ५. M. दध्यत्रेति. ६ P. परिकल्पितायाम्. ७. P. इत्यस्योदाहरणार्थमेव. ८. P. पञ्चमीनिर्देश एव.

(७।१।५२) इत्यत्र आदिति पञ्चमी 'आज्जसेरसुक्' (७।१।५०) इति असुग्विधौ चरितार्था । आमीति सप्तमी चोत्तरार्था । 'त्रेस्त्रयः' (७।१।५३) इति उभयोः सावकाशयोर्विरोधे परत्वात् पञ्चमी सप्तम्याः षष्ठीत्वं प्रकल्पयति ॥ ६३ ॥

सामान्यातिदेशे विशेषस्यानतिदेशः ॥६४॥

तद्यथा 'गाङ्कुटादिभ्यः०' (१।२।१) इत्यादौ गाङ्कुटादिभ्यः परस्याञ्णित्प्रत्ययस्य ङित् सामान्यम् । तेन 'क्ङिति च' (१।१।५) इति गुणप्रतिषेधादिके अतिदिश्यमाने ङिद्विशेषस्य यङादेर्यत्कार्यं द्विर्वचनादिकं तन्नातिदिश्यते । लोकसिद्ध एवायमर्थः । तथाहि लोके ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यम् इति ब्राह्मणत्वसामान्यकार्यमेव पादवन्दनादिकमातिदिश्यते । न तु माठरादिप्रयुक्तं तक्रभक्षणादि विशेषकार्यम् इति ॥ ६४ ॥

संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः॥६५॥

तद्यथा धीवरीत्यादौ ङीप्संनियोगशिष्टो 'वनो र च' (४।१।७) इति रेफः पञ्चधीवेत्यादौ पञ्चधीवरीभिः क्रीतः इत्यार्हीयठकः 'अध्यर्ध०' (५।१।२८) इत्यादिना लुकि 'लुक् तद्धितलुकि' (१।२।४९) इति ङीपि निवृत्ते रेफस्याप्यपायः। एवं च पञ्चेन्द्राण्यो देवताऽस्येति पञ्चेन्द्रः पञ्चाग्नेय्यो देवता अस्येति पञ्चाग्निः देवताणो 'द्विगोर्लुगनपत्ये' (४।१।८८) इति लुकि ङीप्रत्ययनिवृत्तावानुगैकारयोरपि निवृत्तिर्भवति । असत्यामस्यां परिभाषायामनयोरेकतरविनाशे नावश्यमन्यस्याप्यपायो निमित्ताभावात्।[1] 'बिल्वकादिभ्यश्छस्य लुक्' (६।४।१५३) इत्यत्र छग्रहणेन इयं परिभाषा भाष्ये ज्ञापिता । तत्र लुक्तं[2] बिल्वकादिभ्यः इति कुका निर्देशः । कुक् चायं 'नडादीनां कुक् च' (४।२।९१) इति छप्रत्ययसंनियुक्तस्ततश्च बिल्वकादिभ्यः परः छप्रत्यय एव संभवतीति बिल्वकादिभ्यो लुक् इत्येवमप्युच्यमाने भसंज्ञानिमित्तप्रत्यये छप्रत्ययस्यैव लुग्भविष्यति इति किमिह छग्रहणेन । तत् क्रियते छस्यैव केवलस्य लुग्यथा स्यात् । अन्यथा संनियोगशिष्टानामेकस्याप्यपाये उभयोरप्यपाय इति कुको निवृत्तिः स्यादित्येवायमर्थः[3] । एवं च तदस्याः परिभाषाया अस्तित्वे ज्ञापकमिति । अनित्यत्वं चास्याः 'भस्याढे तद्धिते' (६।३।३५वा.) इति अढे इति पुंवद्भावनिषेधेन[4] ज्ञापितम् । अत्र हि 'अढे इति किं श्यैनेयो रौहिणेयः' इति प्रत्युदाहृतम् । यदि चेयं नित्या स्यात्तदा 'यस्येति च' (६।४।१४८) इति लोपे कृते नकारोपि निवृत्तः इति श्यैतेयो रौहितेयः इति स्यात् । ततः पुंवद्भावरूपेणाविशेषादढ[5] इति निर्देशोनर्थकः स्यादिति ॥ ६५ ॥

---

१. M. om. एवं च...निमित्ताभावात्. २. M. परस्याप्यपायः. ३. M. स्यादित्येवमर्थम्. ४. M. om. पुंवद्भावनिषेधेन. ५. M. रूपेणादोषादढ इति प्रतिषेधोनर्थकः स्यात्.

ताच्छीलिके णेप्यण्कृतानि कार्याणि भवन्ति ॥ ६६ ॥

तेन चुरा शीलमस्यास्तपःशीलमस्या इति छत्रादिभ्यो णः। णान्तादप्यणन्तवत् 'टिड्ढाणञ्०' (४।१।१५) इति ङीप् भवति। चौरी तापसीति। ताच्छीलिकेष्विति किं 'तदस्यां प्रहरणमिति क्रीडायां णः' (४।२।५७) दाण्डा क्रीडा। 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५।२।१०१) प्राज्ञा स्त्रीति अण्कृतमत्र कार्यं न भवति। 'कार्मस्ताच्छील्ये' (६।४।१७२) इत्यत्र भाष्ये[1] ज्ञापितो ह्ययमर्थः। अत्र हि कर्मशब्दात्ताच्छीलिके छत्रादित्वाण्णप्रत्यये टिलोपो निपात्यते। तत्रोक्तम्—अणि 'अन्' (६।४।१६७) इति प्रकृतिवद्भाव उक्तः। णे तु 'नस्तद्धिते' (६।४।१४४) इति टिलोपः सिद्ध एव। किं निपातनेन। तदिदं ज्ञापयति ताच्छीलिके णेप्यण्कृतं कार्यं भवतीति। अणन्तणान्तस्यापि प्राप्नोतीति निपातनम् ॥ ६६ ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणं भवति ॥ ६७ ॥

तेन 'गापोष्टक्' (३।२।८) इति पिबतेरेव ग्रहणं भवति न पा रक्षणे इत्यस्य लुग्विकरणस्य। अस्याश्च 'स्वरतिसूति०' (७।२।४४) इत्यत्र सूत्रे सूतिसूयत्योर्विकरणनिर्देशो ज्ञापकः। तत्र ह्युक्तं सूङिति सामान्यनिर्देशोस्तु एतेनैवादादिकदैवादिकयोरेव सूङोर्ग्रहणं भविष्यति। षू प्रेरणे इत्यस्यापि निरनुबन्धकस्य निवृत्तिर्भविष्यति। किं विकरणनिर्देशेन। एवं तर्हि ज्ञापयति सूङ्ग्रहणात् लुग्विकरणपरिभाषया दैवादिकस्यैव ग्रहणं भविष्यति नादादिकस्येति विकरणनिर्देशः क्रियमाणोस्या ज्ञापको भवति ॥ ६७ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते ॥ ६८ ॥

तेन गोमान् प्रियोस्येति गोमत्प्रियः इति गोमानिवाचरति गोमत्यते इत्यादौ अन्तरङ्गानपि नुमादीन् बाधित्वा बहिरङ्गो लुगेव भवति। 'प्रत्ययोत्तरपदयोश्च' (७।२।९८) इत्यत्र भाष्ये ज्ञापितोयमर्थः। तत्र ह्युक्तं तवायं त्वदीयः इत्यादौ प्रत्यये तव पुत्रः त्वत्पुत्रो मम पुत्रो मत्पुत्र इत्यादावुत्तरपदे च विभक्तिमात्राश्रयत्वात् पूर्वेणैव त्वमौ भविष्यतः। समासोत्तरकालभावी विभक्तिलुक् बहिरङ्गः पश्चाद् भविष्यति। न च विभक्तिलुकि कृते निमित्ताभावात् प्रवृत्ताभ्यामपि त्वमाभ्यां निवर्तितव्यं यतो बहिरङ्गस्य लुकोऽसिद्धत्वाद् दृश्यत एव विभक्तिः। ये चापि स्वार्थिकास्तरबादयस्तेपि च असत्यपि समर्थाधिकारे अन्तरङ्गत्वात्कृतायामेव विभक्तौ सुबन्तादेव विधीयन्ते इति त्वत्तरो मत्तर इत्यादौ च 'त्वमावेकवचने' (७।२।९७) इत्येव त्वमौ सिद्धावेव किं 'प्रत्ययोत्तरपदयोश्च' (७।२।९८) इत्यनेन। तदेतज्ज्ञापयति अस्तीयं परिभाषा अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते इति। तेन त्वमौ बाधित्वा लुकि कृते विभक्त्यभावात्पूर्वेण त्वमौ न प्राप्नुत इति

---

१. P. णेप्यण्कृतं कार्यं भवति. २. P. श्रुतपालेन for भाष्ये. ३. M. om. अणन्त… निपातनम्. ४. P. om. भवति. ५. P. ग्रहणे. ६. M. गोमत्यति for गोमत्यते. ७. M. त्वमयोः पूर्वं for त्वमौ बाधित्वा.

वचनमिदमर्थवद् भवति । यस्तु मन्यते प्रकर्षप्रत्ययोन्तरङ्गस्तथा च ‘ नित्यवीप्सयोः ’ (८।१।४) इत्यत्र ङ्याप्प्रातिपदिकादातिशायिको भवतीति न्यासः (भा. २.पृ. ४९७) तन्मते अत्रोत्तरपदमेव ज्ञापकम् । त्वत्तरादौ त्वादेशविधानार्थत्वात्प्रत्ययग्रहणस्य । अत्र चोदयन्ति । किमनेन ज्ञापितेन । गोमत्प्रियादौ हि कृताकृतप्रसङ्गित्वेन नुमादिभ्यो नित्यत्वादेव लुग्भविष्यतीति चेन्न । नित्यपरिभाषाया हि अन्तरङ्गपरिभाषापवादकत्वेन नित्यादप्यन्तरङ्गं बलीय इति न्यायाल्लुकं बाधित्वा नुमादिरेव स्यादिति ज्ञापनीयमेतत् । अनेनैव च ग्रामण्यः कुलं ग्रामणीकुलं गवे हितं गोहितं रायः कुलं रैकुलं नावः कुलं नौकुलं वृकाद् भयं वृकभयमिति कृता अन्तरङ्गत्वाद् यणादयो निवर्तन्ते । एतदेव ज्ञापकं पठ्यते । लुक् यणयवायाव इत्यादेशेभ्यो बलीयानिति । तत्र च निर्देशे अन्तरङ्गानपीत्यत्र नित्यानां परेषां च बाधनार्थः । तद् ब्राह्मणकुलम् इत्यत्र त्यदाद्यत्वं ‘स्वमोर्नपुंसकात्’ (७।१।२३) लुका बाध्यत इत्याहुः । ततश्चायमर्थः पठ्यते—सर्वविधिभ्यो लोपविधिर्बलीयानिति ॥ ६८ ॥

गामादाग्रहणेष्वविशेषः ॥६९॥

नानापरिभाषाणामयमपवादः। ‘ घुमास्थागापाजहातिo’ (६।४।६६) इत्यादौ ‘दाधाघ्वदाप्’ (१।१।२०) इत्यादौ गामादाग्रहणेष्वाविशेषेण सर्वेषामेव गामादारूपाणां ग्रहणं भवति । न विशेषभूतः परिभाषान्तरन्यायेनाश्रीयते । युक्त एवायमर्थः । तथाहि । गाग्रहणे यदि निरनुबन्धकपरिभाषया व्यवस्था स्यात्तदा कै गै शब्दे गा स्तुतौ ‘इणो गा लुङि’ (२।४।४५) इत्यमीषामेव ग्रहणं स्यान्न गाङ् गताविस्यस्यापि । अथ लक्षणप्रतिपदोक्तपरिभाषया व्यवस्था तदा कै गै शब्दे इत्यस्य ग्रहणं न स्यात् । अथवा लुग्विकरणपरिभाषया व्यवस्था तदा ‘इणो गा लुङि’ (२।४।४९) इति ‘इण्वदिकः’ (२।४।४५वा.१) इत्यनयोर्ग्रहणं न स्यात् । एवं माग्रहणेपि यदि निरनुबन्धकपरिभाषया व्यवस्था स्यात्तदा मा माने इत्येतस्यैव ग्रहणं स्यात । न माङ्मेङोः । अथ लक्षणप्रतिपदोक्तपरिभाषया तदा मामाङोरेव ग्रहणं स्यान्न मेङः। लुग्विकरणपरिभाषया च माङ्मेङोरेव ग्रहणं स्यान्न मा माने इत्यस्य । तथा दाग्रहणेपि यदि निरनुबन्धकपरिभाषया व्यवस्था स्यात्तदा दोऽवखण्डने इत्यस्यैव ग्रहणं स्यान्नान्येषाम् । अथ एकानुबन्धकपरिभाषया तदा दान्-देङोर्ग्रहणं स्यात न तु डुदाञ् । अथ लक्षणप्रतिपदोक्तपरिभाषया तदा दान्-डुदाञोरेव ग्रहणं स्यान्न दादेङोरिति । तत्रैवं गामादाग्रहणेषु परिभाषाणां विरोधे सति द्वयं संभवति । अप्रवृत्तिः स्यात्पर्यायप्रवृत्तिर्वा । तत्र यदाऽप्रवृत्तिः सिद्धमविशेषेण ग्रहणम् । अथ पर्यायेण प्रवृत्तिस्तथापि सर्वेषां ग्रहणे गामादाग्रहणेष्वविशेष इति सिद्धो भवति ॥ ६९ ॥

---

१. P. उत्तरपदग्रहणमेव केवलं ज्ञापकम्. २. M. त्वत्तरादौ पक्षे त्वमादेश० ३. P. अन्तरङ्गानपि विधीनित्यपिशब्दो नित्यानां. ४. M. न्यायो नाश्रीयते. ५. M. गामादाग्रहणे. ६. M. प्रवृत्तावपि. ७. M. om. इति.

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ ७० ॥

'अतः कृकमिकंस०' (८।३।४६) इत्यत्र सत्वविधौ कमिग्रहणं कृतम्। तेन 'कमेः सः' (उणादि० ३।६२) इति अत्रापि कमेः सग्रहणं कृत्वा उणादौ व्युत्पादितः कंसशब्दोपि गृहीत एव। अत्र पुनः कंसग्रहणाज्ज्ञापयति। अस्तीयं परिभाषा 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति। तेन जिव्रिः किर्योः गिर्योः इत्यादौ 'हलि च' (८।२।७७) इति दीर्घो न भवति। अन्यथा हि जृधातोः 'जीर्यतेः क्रिन् रश्च वः' (उणा. ५।४९) इति क्रिन्प्रत्यये इत्वे रपरत्वे रेफस्य च वकारे कृते वकारान्तो धातुरिति दीर्घः स्यात्। कॄगॄभ्यां च 'कॄगॄकुटिभिदिछिदिभ्यश्च' (उणादि ४।१४३) इकारप्रत्ययान्तयोरेव किरिगिरिशब्दयोरोसि इकारस्य यणादेशे दीर्घः स्यात् ॥७०॥

अङ्गवृत्तेः पुनरङ्गवृत्तावविधिर्निष्ठितस्य ॥७१॥

अङ्गस्य कार्यस्य वृत्तिः प्रवृत्तिरङ्गवृत्तिः। ततो हेतोर्निष्ठितस्य प्रयोगार्हस्याङ्गस्य पुनरङ्गवृत्तावङ्गकार्यस्य प्रवृत्तौ अविधिरविधानम्। अङ्गवृत्ताविति षष्ठ्यर्थे सप्तमी। पुनरङ्गकार्यवृत्तेरविधिरप्रवृत्तिरित्यर्थः। तद्यथा। क्रियते इत्यत्र रिङादेशे अङ्गकार्ये प्रवृत्ते अकृत्सार्वधातुकयोर्दीर्घत्वमपरमङ्गकार्यं न भवति। पिबतीत्यत्रापि पिबादेशे कृते गुणो न भवति। निष्ठितत्वं चाङ्गकार्यापेक्षयैव न सामान्येनेति व्याचक्षते। ज्ञापकं चात्र 'ज्ञाजनोर्जा' (७।३।७९) इत्यत्र ज इति कर्तव्ये जाशब्दादेशकरणम्। यदि ह्येकस्मिन्नङ्गकार्येऽप्यपरमङ्गकार्यं स्यात् जकारादेशेपि पुनः 'अतो दीर्घो यञि' (७।३।१०१) इति दीर्घे सति जायते इत्यादि सिध्यत्येव। एवं 'रीङ् ऋतः' (७।४।२७) इत्यत्र च दीर्घोच्चारणमत्रार्थं ज्ञापकम्। मात्रीयतीत्यादावपि हि 'अकृत्सार्वधातुकयोः०' (७।४।२५) इति दीर्घत्वसिद्धिः। निर्देशे अङ्गवृत्तेर्हेतोरिति श्रुतपाठेन पञ्चम्यन्तं व्याख्यातम्। न्यासादौ त्वङ्गवृत्त इति सप्तम्यन्तं दृश्यते ॥ ७१ ॥

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ ७२ ॥

तेन 'विदो लटो वा' (३।४।८३) इति णलादिविकल्पो यङ्लुगन्तस्यापि भवति। वेवेद वेविदतुः वेविदुः। वेवेत्ति वेविदीति वेवित्तः वेविदति इति। ज्ञापकं चात्र 'ऊदुपधाया गोहः' (६।४।८९) इत्युपधाग्रहणम्। ऊद् गोह इति लाघवार्थे वक्तव्ये यदुपधाग्रहणं तद् यङ्लुगन्ते जोगूह इत्यभ्यासीकारे मा भूदित्येवमर्थम्। एतदर्थता च तदा स्याद् यदि प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणं भवेदिति। 'निष्ठा शीङ्०' (१।२।१९) इत्यत्र पुनरनुन्यासकृता न्यायसिद्धत्वमेवास्या दर्शितम्। तथा हि स्थानेद्विर्वचनपक्षे स्थानिवद्भावात् प्रकृतिव्यपदेशः द्विष्प्रयोगपक्षे च स एव शब्दो द्विरावर्तेत इति युक्तं प्रकृति-

१. M. om. कॄगॄभ्यां च. २. M. इकारान्तस्य. ३. M. तथा च वक्ष्यते for व्याचक्षते. ४. After अङ्गकार्ये, P. ins. प्रवृत्ते. ५. After स्यात्, P. ins. तदा. ६. P. इति सिद्ध एवेति. ७. P. दीर्घ सिद्ध एवेति. ८ P. om. वेविदीति. ९. M. om. उपधाग्रहणम्. १०. P. लाघवार्थं कर्तव्ये. ११. P. om. स्थाने.

ग्रहणे० इत्यादि। तथा 'भुवो वुग्लुङ्लिटोः' (६।४।८८) इत्यत्र वोभाव योभव इति यङ्लुगन्ताद् वुग्निवृत्यर्थः 'ओः सुपि' (६।४।८३) इत्यतः ओकारोनुवर्तत इति। श्तिपा निर्देशे चैषा परिभाषा न प्रवर्तते। तदुच्यते—

"श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च।
यत्रैकाज्ग्रहणं किंचित् पञ्चैतानि न यङ्लुकि" इति॥

तत्र श्तिपा निर्देशो यथा 'स्वरत्यतीति' (७।२।४४, ७।४।७७)। शपा यथा 'भरज्ञपिसनाम्' (७।२।४९) इत्यत्र भर इति शबन्तानुकरणम्। अनुबन्धेन यथा 'शीङो रुट्' (७।१।६) इति। गणेन यथा–'वनतितनोत्यादीनाम्' (६।४।३७) इति। एकाज्ग्रहणं यथा। एकाच इत्यनुवृत्तौ 'श्युकः किति' (७।२।११) इति इट्प्रतिषेधः। अथ श्तिपा निर्देशः आत्मनेपदादिकं प्रकृतिग्रहणाद् यङ्लुगन्तस्य न भवति॥ ७२॥

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्॥ ७३॥

तेन[1] निषावयति परिषावयतीति 'उपसर्गात्सुनोति०' (८।३।६५) इति षत्वं भवति। 'न भाभूपूकमिगमिप्यायीवेपाम्' (८।४।३४) इत्यत्र[2] सूत्रे प्रभावनादिसिद्धये ण्यन्तानां भ्वादीनामुपसंख्यानं[3] न कर्तव्यं भवति। ज्ञापकं चात्र 'हेरचङि' (७।३।५६) इति प्रतिषेधवचनम्। तयो[4] हि केवलाद् हिनोतेश्चङ् नास्ति। तत्र यदि प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम् इति परिभाषा न स्यात् तदा अभ्यासनिमित्ते प्रत्यये हिनोतेरङ्गस्य कुत्वमुच्यमानं कः प्रसङ्गो ण्यधिकस्य चङि स्याद् यदर्थमचङीति प्रतिषेधः क्रियते॥ ७३॥

वार्णादाङ्गं बलीयः॥ ७४॥

वार्णाद्वर्णकार्यात् आङ्गमङ्गकार्यं बलीयस्त्वेन[5] प्रवर्तते इत्यर्थः। तद्यथा। भवतीत्यत्र यणादेशाद् बलीयस्त्वेन[6] गुणो भवति। यत्र वर्णाङ्गयोरेकं[7] निमित्तं सोस्याः प्रवृत्तिविषयः। तद्यथा इयायेत्यत्र वृद्धियणोरकारो निमित्तम्। यत्र तु भिन्नाश्रयः तत्रान्तरङ्गपरिभाषयैव व्यवस्था स्यात्। तेन सिवेरौणादिकनप्रत्यये स्योन इति। अत्र सि ऊन इति स्थिते लघूपधगुणात्पूर्वं यण् भवति। ज्ञापिता चेयं परिभाषा 'दाश्वान्०' (६।१।१२) इत्यत्र सूत्रे भाष्यकृता। 'अभ्यासस्यासवर्णे' (६।४।७८) इत्यत्रासवर्णग्रहणे सति वार्णादाङ्गस्य बलीयस्त्वे इयाय उवोषेत्यादौ वृद्धिगुणयोरसवर्णपरोभ्यासः संभवतीति असवर्णग्रहणमर्थवद्भवतीति। अन्यथा हि गुणवृद्ध्योर्बहिरङ्गत्वात् प्रागेव न भवितव्यमिति निर्विषयमसवर्णग्रहणं स्यात्। यदि चान्यार्थः स्यात इयृयात् इत्यादौ तदार्तेरभ्यासस्यैव ब्रूयात्। नैकमुदाहरणं प्रति योगमारभ्यतीति। तदेतदुक्तमसवर्णग्रहणं वार्णादाङ्गं बलीय इत्यस्याः परिभाषाया

---

१. P. तेन अभिषावयतीति. २. P. इत्यत्र णत्वप्रतिषेधे प्रभावनादि. ३ P. भादीनां. ४. M om.. तथा हि....नास्ति. ५. P. बलीयस्त्वात्. ६. P. बलीयान्. ७ M. वर्णान्तरङ्गयोः.

लिङ्गम् । सा चेयं समानाश्रया एव इति व्याश्रये न प्रवर्तते इति । तत्र 'च्छ्वोः शूठ्०' (६।४।१९) इति सतुकस्य छकारस्योपादानं लिङ्गम् । यदि हि वार्णादाङ्गं बलीय इति व्याश्रयेपि प्रवर्तते तदा छकारनिमित्तकं वार्णं तुकं बाधित्वा विश्नः इत्यादावनुनासिकनिमित्तोङ्गस्य छकारस्य शकारः स्यात् । तत्र च कृते निमित्ताभावात् तच्छकारानाश्रयत्वेन च स्थानिवत्त्वाभावात् नास्ति तुगिति किं सतुक्छकारोपादानेन । तेत्कृतमुक्तार्थस्य ज्ञापकं संपद्यते । न्यासकारेण तु 'सार्वधातुकमपित्' (१।२।४) इत्यत्र व्याश्रयेपीयमभ्युपगता । यदाह च्यवन्ते प्लवन्ते इत्यत्र वार्णादाङ्गं बलीयः इति एकादेशात्प्रागेव गुण इति । तत्रास्याः कचिद्व्याश्रयेपि प्रवृत्तिरित्यत्रार्थे 'यजयाचयतविच्छप्रच्छरक्षो नङ्' (३।३।९०) इति नङो ङित्करणं गुणनिषेधार्थं क्रियमाणं ज्ञापकं भविष्यति । अन्यथा हि विच्छेरन्तरङ्गत्वात्तुकि छकारनिमित्ते सति कः प्रसङ्गो बाह्यसार्वधातुकप्रत्ययाश्रयस्य गुणस्य । न च प्रच्छेः संप्रसारणार्थम् । 'प्रश्ने चासन्नकाले' (३।२।११७) इति निर्देशात् ॥ ७४ ॥

यस्मिन् विधिस्तदादावल्ग्रहणे ॥ ७५ ॥

'येन विधिः०' (१।१।७२) इत्यत्र सूत्रे तदन्तविधेरपवादोयं तदादिविधिरुपसंख्यातः । यस्मिन्निति सप्तमीनिर्देशे अल्ग्रहणे सति तदादौ समुदाये कार्यं भवतीति । तेन 'अचि' (६।४।७७) इति इयङुवङौ अजादौ भवतः । लुलुवतुरिति । श्रियौ भ्रुवावित्यत्रापि व्यपदेशिवद्भावादिति । 'गुणोऽपृक्ते' (७।३।९१) इत्यत्र तु वामनेनापृक्तग्रहणात् परिभाषेयमिति व्याख्यातम् । यदुक्तम्—'उतो वृद्धिर्लुकि हलि' (७।३।८९) इत्यतो हलीत्यनुवर्तते एव किमपृक्तग्रहणेन । एवं तर्हि ज्ञापयति भवत्येषा परिभाषा 'यस्मिन् विधि.०' इत्यादि । ततश्च हलीत्यनुवृत्तौ हलादौ स्यात् । अपृक्तग्रहणाद्वर्णमात्रे भवति प्रौर्णोत् इति ॥ ७५ ॥

क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ॥ ७६ ॥

'वाऽसरूपोऽस्त्रियाम्' (३।१।९४) इत्यस्यैवायमर्थः परिभाषारूपेण पठ्यते । तथा ह्यस्त्रियामिति स्त्र्यधिकारात्प्राक् योऽसरूपोपवादः स विकल्पेनोत्सर्गं बाधते इति । तत्रायमर्थः । क्तादीनां तु स्त्र्यधिकारात्परेणावस्थानात् न तत्रास्य सूत्रस्य व्यापारः । तेन नपुंसके भावे क्तप्रत्ययापवादो ल्युट् भावे घञं नित्यमेव बाधते हसितं हसनमिति । हास

१ After इति, P. ins आहुः. २ M. स्थानिवद्भावात्. ३ M. om. तत् कृतं... संपद्यते. ४ M. om. अन्तरङ्गत्वात् and बाह्यसार्वधातुकप्रत्ययाश्रयस्य, and ins. स्यादिति After गुणस्य. ५ After उपसंख्यातः, P. ins. परिभाषारूपेण पठ्यते. ६ M. यस्मिन् सप्तमीनिर्दिष्टे अल्ग्रहणविषये विधिः स तदादौ समुदाये भवतीति वेदितव्यम्. ७ M. तथा हि स्त्रियामित्यधिकारात्प्राक्. ८ P. क्तप्रत्ययो लुट् च भावे घञं. ९ M. om. हास इति न भवति.

इति न भवति । तथा 'समानकर्तृकेषु तुमुन्' (३।३।१५८) 'इच्छार्थेषूपपदेषु लिङ्लोटौ' (३।३।१५७) नित्यमेव बाधते इच्छति भोक्तुमिति । तथा 'आतो युच्' (३।३।१२८) इति 'ईषद्दुःसुषु' (३।३।१२६) इति खलं नित्यमेव बाधते ईषत्पानः सोमो भवतेति । यत्र त्वेते क्तादय एवोत्सर्गा अन्यस्तु क्त्यधिकारात् प्राग्भूतः 'एरच्' (३।३।५६) अपवादः तत्र वासरूपविधिर्भवत्येव । तेन 'अज्विधौ भयादीनामुपसंख्यानम्' (३।३।५६ वा. १) इत्यज्विधौ ल्युडपि भवति भयनं भीरिति न्यासः । 'अपात्रे वर्षणं यथ' इति कामन्दकप्रयोगश्चोपपद्यते । एवम् 'आशिते भुवः करणभावयोः' (३।२।४५) इत्यत्र न्यासकारेण यदुक्तं घञं सारूप्याद् बाधते खच् ल्युट् पुनर्वासरूपविधिना भवत्येव आशितभवन ओदन इति तदप्युपपद्यते । जयादित्येन तु क्तादिविषये वासरूपविधेरभावः 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' (३।३।१६३) इत्यत्र लोटा समावेशार्थेन कृत्यग्रहणेन साधितः । यदुक्तं क्त्याधिकारात्परेण वासरूपविधिरनित्य इति । नित्ये हि तेनैव समावेशसिद्धेः । न्यासकारेण तु 'ण्यासश्रन्थो युच्' (३।३।१०७) इत्यत्र आस्या आसना इति ण्यता सह युचः समावेशमिच्छताऽस्त्रियामिति वासरूपनिषेधोयं स्त्रीप्रकरणे येऽपवादास्ते स्वप्रकरणस्थानुत्सर्गान् बाधन्ते नान्यप्रकरणस्थानिति दर्शितम् । ततश्च घञजपः क्तिन्विषयेपि प्राप्नुवन्ति । तन्निवृत्त्यर्थं च बहुवचनमाश्रयणीयमिति ॥ ७६ ॥

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन तदन्तविधिं प्रयोजयन्ति ॥ ७७ ॥

लक्ष्यस्थित्या [1]व्याप्तिन्यायाश्रयेण च सूचकं कात्यायनवचनमेतत् परिभाषारूपेण पठ्यते । अर्थवत्परिभाषाया अनित्यत्वमस्या मूलम् । तच्च 'अप्तृन्'० (६।४।११) इत्यादिसूत्रे [2] 'तुरिष्ठेमेयःसु' (६।४।१५४) इतिवत् तृ इति सामान्यग्रहणेन सिद्धे 'अर्वणस्त्रसौ०' (६।४।१२७) इति अर्वादेशतृशब्दपरिहारार्थं कृतेन तृन्तृचोर्भेदेनोपादानेन ज्ञापितम् । यदि हि अर्थवत्परिभाषा नित्या स्यात्तदा तयैवार्वादेशतृशब्दनिरासे [3]कृते तदर्थं तृन्तृचोर्भेदेनोपादानमनर्थकं स्यादिति । अत्रान्ग्रहणं तावदर्थवदन[4]र्थके तदन्तविधिप्रयोजकम् । यथा राज्ञा साम्ना । उभयत्रापि 'अल्लोपोऽनः' (६।४।१३४) इति भवति । इन् यथा दण्डी वाग्मी । उभयत्रापि 'इन्हन्पूषार्यम्णाम्०' (६।४।१२) इत्यनुवृत्तौ 'सौ च' (६।४।१३) इति दीर्घः । असन्तं यथा सुपयाः सु[5]स्रोताः । सर्वत्र 'अत्वसन्तस्य०' (६।४।१४) इति दीर्घः । मनन्तं यथा सुपामा सुप्रथिमा । सार्थके च निरर्थके च मनि 'मनः' (४।१।११) इति ङीप्प्रत्ययनिषेधः ॥ ७७ ॥

---

१ P. व्याप्तिन्यायाश्रयमूलकं. २ P. अप्त्रादिसूत्रे. ३ P. सिद्धे for कृते. ४ P. अनर्थकं च तदन्तविधिं प्रयोजयति. ५ P. सुश्रोताः.

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ ७८ ॥

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ७९ ॥

ग्रहणवता उच्चारणवता प्रातिपदिकेन तदन्तविधिर्निषिध्यत इति । तेन सूत्रनडस्यापत्यं सौत्रनाडिरित्यत्र तदन्तविधिना 'नडादिभ्यः फक्' (४।१।९९) न भवति । व्यपदेशिवद्भावश्च प्रातिपदिकग्रहणे नास्तीति । तेन 'सूत्रान्ताट्ठक्' (४।२।६०) इति इहैव भवति संग्रहसूत्रमधीते सांग्रहसूत्रिकः । व्यपदेशिवद्भावेन केवलान्न भवति सूत्रमधीते सौत्र इति । ज्ञापिते चैते परिभाषे 'येन विधिः०' (१।१।७२) इति सूत्रे भाष्यकृता 'पूर्वादिनिः' (५।२।८६) इत्यनन्तरं सूत्रं 'सपूर्वाच्च' (५।२।८७) इत्यनेन योगेन । यदुक्तम् । किमर्थं सपूर्वादिनिर्विधीयते । पूर्वशब्देन प्रातिपदिकेन विशेषिते तदन्तविधिना सपूर्वाद्भविष्यति । केवलाच्च व्यपदेशिवद्भावेनेति नार्थोऽनेन । एवं तर्ह्येतज् ज्ञापयति—एते स्तः परिभाषे ग्रहणवतेत्यादी इति । अत एव च प्रत्ययविधौ ज्ञापनाद् ग्रहणवतेत्यादिपरिभाषां प्रत्ययविधिविषयामाख्याय तेन 'गोस्त्रियोरुपसर्जनस्य' (१।२।४८) इत्यत्र गोशब्दान्तमाचक्षते । पुनश्चानयोः परिभाषयोः प्रत्याख्यानमुक्तम् । तत्राद्यायास्तावत् सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वादिति विशेषणेन हि तदन्तविधिर्न विशेष्येण । यत्रेष्यते तत्र तदन्तविधिर्यथा 'गोस्त्रियोरुपसर्जनस्य' (१।२।४८) इति । अत्र उपसर्जनगोशब्दान्तस्य प्रातिपदिकस्य ह्रस्वः चित्रगुः । 'अत इञ्' (४।१।९५) दाक्षिरित्यादौ । तत्र प्रकृतं प्रातिपदिकमुच्चार्यमाणेन विशिष्यते । यत्र तु नेष्यते 'नडादिभ्यः फक्' (४।१।९९) इत्यादौ तत्र गृह्यमाणमेव नडादि प्रकृतेन प्रातिपदिकेन विशिष्यते । 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्यस्याश्च प्रयोजनाभावादनुपगमः । 'उगितश्च' (४।१।६) इति ङीप् अतिभवती भवतीति । अततेर्डः अः । 'तस्यापत्यम्,', 'अत इञ्' (४।१।९५) इः इति निष्पन्नम् । तथा उपपदं प्रकृतं भयग्रहणेनाढ्यादिभिश्च विशिष्यते । ततस्तदन्तविधौ अभयङ्करो भयङ्करः अनाढ्यंकरणः आढ्यंकरणः । स्वस्रादिभिर्बिस्तादिभिश्च प्रातिपदिकं विशिष्यते । परमस्वसा स्वसा द्विबिस्ता बिस्ता । 'रोण्या अण्' (४।२।७८) आजकरोणः रौणः । रथसीताहलेभ्यश्च यद्विधौ प्रातिपदिकं विशिष्यते । परमरथ्या रथ्या इत्यादौ केवलस्यापि व्यपदेशिवद्भावदर्शनात् 'क्रतूक्थादिसूत्रान्ताट् ठक्' (४।२।६०) इत्यत्र चान्तग्रहणं केवलनिवृत्त्यर्थमिति ॥ ७८-७९ ॥

---

१ P. येनविधिसूत्रे. २ M. तदन्तादपि for तदन्तविधिना. ३ P. आचक्षते.

समासप्रत्ययविधौ तदन्तविधिप्रतिषेधः उगिद्वर्णग्रहणवर्जम् ॥ ८० ॥

तेन श्रितादीनां सुबन्तविशेषणत्वेपि तदन्तविधिनिषेधात् [1]परमकष्टश्रितः इति न भवति । फगादिप्रत्ययविधौ नडादीनां प्रातिपदिकविशेषणत्वेपि तदन्तविधिनिषेधात् सूत्रनाडायन इति न भवति । उगिद्वर्णग्रहणवर्जमिति वचनाच्च इह तदन्तविधिर्भवत्येव अतिभवती भवती दाक्षिरिति । इयं च परिभाषा प्रमादात् परिभाषासु दृश्यते । येन विधिसूत्रे (१।१।७२) वार्तिकमिदं तत्रैव प्रत्याख्यातं भाष्ये । यदुक्तम् । ' सिद्धं तु विशेषणयोर्यथेष्टत्वात् ' (१।१।७२ वा. २) इति । तत्र समासविधौ तावत् । सुपैव श्रितादयो विशिष्येरन् न श्रितादिभिः सुबन्तैरिति सिद्धस्तदन्तविध्यभावः । तथा प्रत्ययविधौ प्रातिपदिकेनैव नडादयो विशेषणीयाः । न च नडादीनां प्रातिपदिकमवयवोन्तः संभवतीति सिद्धो नडादेरेव फक् न तु तदन्तादिति ॥ ८० ॥

संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति ॥ ८१ ॥

अनेन ' तरप्तमपौ घः ' (१।१।२२) इति प्रत्ययमात्रस्यैव घसंज्ञायां 'घरूपकल्प०' (६।३।४३) इति घपरतो ह्रस्व उच्यमानो घान्ते न भवति गौरीब्राह्मणितरेति । ज्ञापकं चास्यार्थस्य ' सुप्तिङन्तं पदम् ' (१।४।१४) इत्यत्रान्तग्रहणम् । अन्यथा हि सुप्तिङोः प्रत्ययत्वादेव 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य' (परि० ४४) इत्यनेनैव तदन्तत्वे लब्धे अन्तग्रहणमिदमनर्थकं स्यादिति ॥ ८१ ॥

समासान्तो विधिरनित्यः ॥ ८२ ॥

तेन बह्वाम्पीति ' ऋक्पूरब्धूःपथामानक्षे ' (५।४।७४) इति अकारो न भवति । ज्ञापिता चेयं भाष्यकृता ' द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ' (६।२।१९७) इत्यत्र स्वरसूत्रे अकृतसमासान्तमूर्धशब्दस्योपादानेन । नित्ये हि समासान्ते यथा पादिति ददिति च ' पादस्यलोपोऽहस्त्यादिभ्यः ' (५।४।१३८) इति 'वयसि दन्तस्य दतृ' (५।४।१४१) इति कृतसमासान्तौ निर्दिष्टौ मूर्धशब्दोपि तथा निर्दिष्टः स्यात् । ततश्च मूर्धेषु इति निर्दिष्टः[2] स्यात् । [3]मूर्धसु इति चाकृतसमासान्तो निर्देशः समासान्तविधेरनित्यत्वं ज्ञापयति । तेन द्विमूर्धा त्रिमूर्धा द्विमूर्धः त्रिमूर्धः इत्युभयत्राप्यन्तोदात्तो भवति । [4]एतश्चेयं ज्ञापिता भाष्यकृता ततो यदुक्तं यस्मात्प्रत्ययविधिसूत्रे (१।४।१३) भागवृत्तिकृता समासान्तो विधिरनित्य इति नैषा परिभाषा भाष्ये ज्ञापकाभावादिति तदसमीक्षिताभिधानम् ॥८२॥

---

१ M. om. परमकष्टश्रितः......तदन्तविधिनिषेधात्. २ P. निर्देशः for निर्दिष्टः. ३ P. तस्मादकृतसमासान्तो मूर्धसु इति निर्देशो ज्ञापयति अस्तीयं परिभाषेति for मूर्धसु... ज्ञापयति. ४ P. ततश्च ज्ञापिता चेयं परिभाषा भाष्यकारेण । अतो यदुक्तं.

संज्ञापूर्वको विधिरनित्यः ॥ ८३ ॥

संज्ञापूर्वकः संज्ञाहेतुको गुणवृद्ध्यादिरनित्यो भवति । तेन 'ज्योतिषम्' इत्यत्र 'अधिकृत्य कृते ग्रन्थे' (४।३।८७) इति अणि वृद्धिर्न भवति । पञ्चबाणः क्षिणोति इत्यत्र गुणो न भवति । अयं चार्थः 'ओर्गुणः' (६।४।१४६) इत्यत्र गुणग्रहणेन ज्ञापितः । ओरोदिति वक्तव्ये गुणग्रहणं संज्ञापूर्वकत्वेनानित्यत्वमस्य यथा स्यादित्येवमर्थम् । तेन 'धाम स्वायंभुवं ययुः' (कुमार० २।१) इति ओर्गुणाभावादुवङ् सिध्यति ॥ ८३ ॥

अनित्यमागमशासनम् ॥ ८४ ॥

आगमविधायकं शासनं शास्त्रमनित्यम् । तेन 'अपि शाकं पचानस्य' इति आने मुक्' (७।२।८२) इति मुग् न भवति । 'सागरं तर्तुमिच्छति' इति च इट् न भवति । ज्ञापितश्चायमर्थः 'स्तोः श्चुना श्चुः' (८।४।४०) इत्यत्र नुममकृत्वा स्तोरिति निर्देशेन । अन्यथा हि तत्र स् च तुश्चेति समाहारद्वन्द्वे ङसि नुमि स्तुनः इति निर्देशः स्यात् ॥ ८४ ॥

अङ्गाधिकारे तस्य तदुत्तरपदस्य च ॥ ८५ ॥

कार्यं भवतीति शेषः । तेन 'अस्थिदधि०' (७।१।७५) इति अनङ् प्रियास्थ्ना प्रियसक्थ्ना इत्येवमादावपि सिध्यति । ग्रहणवतेति तदन्तविधिनिषेधो न भवति । ज्ञापकं चात्र 'युजेरसमासे' (७।१।७१) इत्यत्र असमासग्रहणम् । तद्धि अश्वयुक् इत्यत्र नुम् मा भूदित्येवमर्थम् । यदि चाङ्गाधिकारे तस्य तदुत्तरपदस्य ग्रहणं नाभविष्यत्तदा युजेर्नुमोऽश्वयुगित्यत्र कः प्रसङ्गो यन्निषेधार्थमसमासग्रहणं स्यात् ॥ ८५ ॥

पर्जन्यवल्लक्षणप्रवृत्तिः[1] ॥ ८६ ॥

इह शास्त्रे पर्जन्यवन्मेघवल्लक्षणं प्रवर्तते । तदुक्तं भाष्ये (६।१।१२७) कृतकारि खल्विदं शास्त्रं मेघवन्नाकृतकारि दहनवत् । यदि ह्यकृतकारि स्यात् दीर्घस्य दीर्घो न भवति दहनोऽपि दग्धं न दहति । यदा तु कृतकारि तदा कृतमपि कारयति । यथा खट्वाढकादौ दीर्घस्यापि दीर्घः सिध्यति । मेघो हि जले स्थले च प्रवर्षति । ज्ञापकमत्र 'प्रवाहणस्य ढे' (७।३।२८) इत्यनेन प्रवाहणस्यापत्यं प्रावाहणेयः इति शुभ्रादित्वाड्ढकि उभयपदवृद्धिविधानम् । तत्र च पूर्वपदस्य प्रशब्दस्य विभाषोत्तरपदस्य तु वाहणशब्दस्यापि नित्यं वृद्धिः । न च प्रवाहणेयीभार्यः इति 'वृद्धिनिमित्तस्य च तद्धितस्य०' (६।३।३९) इति पुंवद्भावप्रतिषेधार्थमिदं वृद्धिविधानं स्यात् । 'जातेश्च' (६।३।४१) इत्यनेनैव प्रतिषेधस्य सिद्धत्वात् । 'गोत्रं च चरणैः सह' (महाभाष्य ४।१।६३) इति जातित्वमत्र । तस्माज्ज्ञापकमेव वृद्धिविधानमिति ॥ ८६ ॥

---

१ P. पर्जन्यवदिह लक्षणप्रवृत्तिः.

चानुकृष्टमुत्तरत्र नाभिसंबध्यते ॥ ८७ ॥

तेन 'वदः सुपि क्यप् च' (३।१।१०६) इत्यत्र चकारेणानुकृष्टस्य यतो 'भुवो भावे' (३।१।१०७) इत्यत्रानुवृत्तिर्न भवति । क्यबेव तु भवति ब्रह्मभूयमिति । स्वरितत्वाप्रतिज्ञानलभ्यमेवैतद्वचनरूपेण पठ्यते । ज्ञापकं चात्र 'अव्यये यथाभिप्रेताख्याने कृञः क्त्वाणमुलौ' (३।४।५९) इति णमुलधिकारे णमुल्वचनम् । तद्धि उत्तरार्थम् । यदि चानुकृष्टमपि उत्तरत्रानुवर्तेत तदा लाघवार्थं क्त्वा चेत्येवावक्ष्यत् । अनित्या चेयं परिभाषा । अनित्यत्वमस्या 'नुम्विभक्तिषु च' (८।४।११) इति चानुकृष्टमपि विकल्पं निवर्तयितुं 'एकाजुत्तरपदे णः' (८।४।१२) इति पुनर्णग्रहणादवसीयते ॥ ८७ ॥

अर्थाद्विभक्तिविपरिणामः ॥ ८८ ॥

लोकत एव सिद्धोयमर्थः पठ्यते । तथाहि 'उच्चानि गृहाणि अस्य देवदत्तस्य आमन्त्रयस्वैनम्' इत्युक्ते षष्ठीं द्वितीयया विपरिणम्यैनं देवदत्तमिति संबन्धः क्रियते । एवं शास्त्रेपि । 'आङो नाऽस्त्रियाम्' (७।३।१२०) इत्यत्र घेरिति षष्ठ्यन्तमनुवर्तमानमर्थं पर्यालोच्य पञ्चम्या विपरिणम्यते । तेनायमर्थो भवति । घेरुत्तरपदस्य आङोशब्दस्य नाभाव इति । एवम् 'अतो येयः' (७।२।८०) इत्यत्र पञ्चम्यन्तस्यात इत्यस्य प्रकृतस्य 'आने मुक्' (७।२।८२) इत्यत्र षष्ठ्यन्ततया विपरिणामः । आने परतोकारस्य मुगिति । तेन पचमानादि सिध्यति ॥ ८८ ॥

उदित् सवर्णं गृह्णाति न सवर्णमात्रम् ॥ ८९ ॥

उदिद्वर्णः 'अणुदित्सवर्णस्य०' (१।१।६९) इति स्थानप्रयत्नाभ्यां विशिष्टमेव सवर्णं गृह्णाति न सवर्णमात्रम् । तेन 'चोः कुः' (८।२।३०) इति कुग्रहणे हकारग्रहणं न भवति । ज्ञापकं चात्र 'न विभक्तौ तुस्माः' (१।३।४) इत्यत्र तुग्रहणं कृत्वापि पृथक् सकारकरणमिति ॥ ८९ ॥

सर्वविधिभ्य इड्विधिर्बलीयान् ॥ ९० ॥

अनया श्वयित्वेत्यत्र संप्रसारणात्पूर्वमिडेव भवति । ततो 'न क्त्वा सेट्' (१।२।१८) इति कित्त्वप्रतिषेधात्संप्रसारणाभावः सिध्यति । ज्ञापकं चात्र यदयं 'सनि ग्रहगुहोश्च' (७।२।१२) इत्युगनुकर्षणार्थं चकारं करोति । अन्यथा हि रुरूषति इत्यादौ 'इको झल्' (१।२।९) इति सनः कित्वे 'श्र्युकः किति' (७।२।११) इत्येव प्रतिषेधः सिद्ध इति किमुकोनुकर्षणेन । पश्यति त्वाचार्यः 'इड्विधिर्बलवान्' इति तस्मिन्पूर्वं कृते झलादित्वाभावात् कित्वं नास्तीति । ततश्चकारेणोगनुकर्षणं करोति ॥ ९० ॥

सर्वविधिभ्यो लोपविधिर्बलवान् ॥ ९१ ॥

अनया परिभाषया तानि सन्तीति अस्तेर्यणादेशात्पूर्वं लोपः सिद्धो भवति ।

---

१ P. om. एनम्, २ P. षष्ठी for षष्ठीं.

ज्ञापकं चास्याः सत्त्वे ' प्रत्ययलोपे प्रत्ययलक्षणम् ' (१।१।६२) इति सूत्रम् । यदि हीयं नाभविष्यत्तदा प्रागेव प्रत्ययकार्यं कृत्वा पश्चात्प्रत्ययलोपादिष्टसिद्धौ सूत्रमिदमनर्थकं स्यादिति । भाष्ये त्वियं परिभाषा नोपगता प्रयोजनाभावात् । यथोक्तोदाहरणस्य[1] प्रकारान्तरेण साधितत्वाद्वार्णादाङ्गं बलीय इति ॥ ९१ ॥

प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् ॥ ९२ ॥

इयमपि नोपगतैव । अर्थवत्परिभाषयैव तदर्थस्यावगतत्वात् । तथा च ' अपृक्त एकाल् प्रत्ययः ' (१।२।४१) इत्यत्र प्रत्ययग्रहणं कृतम् । न्यासकारेण तु ' विज इट् ' (१।२।२) इति सूत्रे यदियमुपन्यस्ता तथानुन्यासकारेणापि ' वलः० ' (६।३।११८) इति सूत्रे प्रत्ययस्यैव केवलस्य ग्रहणं कृतं तद् ' व्याख्यानाद्वचनमेव लघु ' इति सौकर्यार्थम् ॥ ९२ ॥

नानर्थकेऽलोन्त्यविधिः ॥ ९३ ॥

इयमपि भाष्ये नोपगता । एतत्प्रयोजनानां प्रकारान्तरेण सिद्धत्वात् । तथा ह्यस्याः प्रयोजनम्–' अव्यक्तानुकरणस्यात इतौ ' (६।१।९८) इति अच्छब्दस्य पररूपे, तथा हलि लोपः (७।२।११३) इद्रूपस्य लोपे, ' घ्वसोरेद्धावभ्यासलोपश्च ' (६।४।११९) इत्यभ्यासलोपे, ' अत्र लोपोभ्यासस्य ' (७।४।५८) इति अभ्यासलोपे च अलोन्त्यविधानं मा भूदिति । अत्र च यथाक्रमं " नाम्रेडितस्यान्त्यस्य तु वा ' (६।१।९९) इति ज्ञापकाद् अनादेशे कृते अन्त्यलोपात् द्विशकारनिर्देशेनाभ्यास-लोपस्य सिद्धत्वादत्रग्रहणसामर्थ्याच्च सर्वादेशविज्ञानं भविष्यतीति किमनया । अत एव च ' तस्य लोपः ' (१।३।९) इति सूत्रे तस्यग्रहणं सूत्रकारेण सर्वलोपार्थं कृतमिति । येपि चैतामुपगच्छन्ति तेप्यनभ्यासविकारेष्विति शेषमस्याः पठन्ति । तेनाजीगणदित्यत्र ' ई च गणः ' (७।४।९७) इति ' अलोन्त्यस्य ' (१।१।५२) इति ईकारः सिध्यति ॥ ९३ ॥

निमित्तिकार्यं न तन्निमित्तस्य ॥ ९४ ॥

निमित्तित्वेन कार्यं निमित्तिकार्यम् । तत् निमित्तस्य निमित्तत्वेनोपात्तस्य न भवति यथा ' अचो रहाभ्यां द्वे ' (८।४।४६) इति ' अनचि च ' (८।४।४७) इति यरो द्विर्वचनं यरन्तर्भावे सति रहोर्न भवति । रहाभ्यामिति निमित्तत्वेनोपादानात् । ज्ञापकं चात्र ' ग्रामहृदोत्तरपदात् ' (४।२।१४२) ' स्पर्धायामाङः ' (१।३।३१) इति यथाक्रमम् ' अचो रहाभ्यां द्वे ' इति ' अनचि च ' इति द्विर्वचनाकरणमिति । श्रुतानुमितपरिभाषाया एवायं प्रपञ्चः ॥ ९४ ॥

न हि कार्यी निमित्तत्वेनाश्रीयते ॥ ९५ ॥

कार्यभाक् यत् तत् कार्यं प्रति निमित्तं न भवति ' इत्यर्थः । तेन शयिता शायकः इत्यत्र शीङः[2] (१।१।५) ' क्ङिति च ' इतिगुणवृद्धिप्रतिषेधो न भवति । अरिरिषतीत्यत्र च ' द्विर्वचनेचि ' (१।१।५९) इति स्थानिवद्भावो न भवति । यदि हि स्यात् इषो

१ M. om. यथोक्तोदाहरणस्य...बलीय इति. २ After शीङः, P. ins. क्ङित्वे सति.

द्विरुक्तौ अदीधतीति स्यात् । ज्ञापकं चात्र 'दीधीवेवीटाम्' (१।१।६) इति ङिक्तोरपि दीधीङ्वेवीङोर्गुणप्रतिषेधवचनम् । यदा च क्ङिति चेति ऐनिग्लक्षणाया[1] अपि वृद्धेर्निषेध इति पक्षस्तदेदं ज्ञापकम् । अन्यथा तु दीधीवेवीग्रहणमिग्लक्षणवृद्धिप्रतिषेधार्थमेव स्यान्न ज्ञापकम् । आदीध्यकः । आवेव्यकः[2] । तत्र 'अधिकरणे शेतेः' (३।२।१५) इति शीङः श्तिपि कृते गुणनिर्देशो ज्ञापकः कार्यः । प्रायिकं चैतत्—'न हि कार्यी निमित्तत्वेनाश्रीयते' इति । अन्यथा हि 'द्विर्वचनेऽचि' (१।१।५९) इत्यत्र अचीति किमित्युक्त्वा जेघ्रीयते देध्मीयते इति यत्प्रत्युदाहृतं तद्विरुध्यते । अङ्गद्वयवैकल्यात् । यथा ह्यत्र यङजादिर्न भवति तथा द्विर्वचननिमित्तमपि न भवति । यङन्तस्य द्विर्वचनकार्यभ्यु-पगमात् कार्यिणश्च निमित्तत्वाभावात् । किंच 'ओः पुयण्ज्यपरे' (७।४।८०) इति सूत्रे पूङ् पवने पिपविषते इत्यत्र सनि 'स्मिपूङ्०' (७।२।७४) इति इटि गुणावादे-शयोः 'द्विर्वचनेऽचि' (१।१।५९) इति स्थानिवत्त्वमुक्तं न्यासकृता कथं घटते द्विर्वचन-विधौ सनः कार्यित्वात् । तथाहि प्रायिकत्वादेवास्य वचनस्य शाधि इत्यत्र 'शा हौ' (६।४।३५) इति शादेशस्य धिभावं प्रति समानाश्रये हौ इति धत्वमुक्तम् । यदि हि धिभावस्य स्थानी हिशब्दो निमित्तं न भवेत् समाननिमित्ताभावादभिमतं न स्यादिति ॥९५॥

इतरेतराश्रयाण्यपि हि कार्याणि प्रकल्पन्ते ॥ ९६ ॥

इतरेतराश्रयाणि हि कार्याणि विरोधात् न प्रवर्तन्ते इति न्यायः । तदुक्तम्– 'इतरेतराश्रयस्यासिद्धिः[3]' इति । तदपवादोयमारभ्यते । अपिशब्दः क्वाचिदर्थे । अयं चात्र भावः । यत्र विरोधो नास्ति तत्र[4] इतरेतराश्रयाण्यपि प्रवर्तन्ते इत्यर्थः । यथा लोके वनसिंहयोः परस्परापेक्षापि रक्षार्थं प्रकल्पते तथा शास्त्रे ऐतिकायनः औपगवः इति वृद्धिसंज्ञाभावितस्यैकारौकारस्य वृद्धिसंज्ञाप्रक्लृप्तिः । अन्यथा हि शालारै-नौ-प्रभृतिषु सावकाशा वृद्धिसंज्ञा अत इतरेतराश्रयो न स्यात् । ज्ञापकं चात्र 'इग्यणः संप्रसारणम्' (१।१।४५) इति । अत्र हि संप्रसारणेन यणः स्थाने इको भाव्यन्ते, यणः स्थानिनां च इकां संप्रसारणसंज्ञेति इतरेतराश्रयत्वमिति । कथमेतदन्यथा प्रकल्पेत यदि हीतरेतरा-श्रयमपि क्वचिन्न स्यादिति ॥ ९६ ॥

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थः ॥ ९७ ॥

भिन्नार्थत्वादन्यदपि शब्दरूपं नञा इवेन च यदा युक्तं भवति तदा सदृशाधिकरणे[5] प्रयुज्यते । तेन 'अञ्चेश्छन्दस्यसर्वनामस्थानम्' (६।१।१७०) इति सर्व-नामस्थानसदृशमसर्वनामस्थानं विभक्तिर्गृह्यते । तथा ह्यर्थ इति । तथाहि तादृश एवार्थः प्रतीयत इत्यर्थः । अनेन चास्य वाक्यार्थस्य प्रतीतिसिद्धत्वं दर्शयति । प्रतीतिश्च मानस-[6]प्रत्यक्षं प्रमाणम् । तथया ब्राह्मणशब्दः क्षत्रियाद्भिन्नार्थोऽपि यदा नञा इवेन वा युज्यते तदा

१ M. अग्लक्षणाया वृद्धेः. २ M. om. आदीध्यकः आवेव्यकः ३ P. इतरेतरा-श्रयत्वादप्रसिद्धिः. ४ After तत्र, P. ins. कचित्. ५ After सदृशाधिकरणे, P. ins. सदृशे पदार्थे. ६ P मानसं प्रत्यक्षं प्रमाणम्.

सादृश्यात् क्षत्रियार्थमाह अब्राह्मणो ब्राह्मण इवायमिति । इह नञा[1] युक्तं सदृशबोधकमिति वचनेन पर्युदासो नञर्थ आख्यातः । प्रायिकत्वं चास्याः 'अकर्तरि च कारके०' (३।३।१९) इति निर्देशेन ज्ञापितम् । नित्ये ह्येतस्मिन्नञ्युक्तकर्तृसादृश्यादेव कारकप्रतीतिः स्यात् । प्रायिकत्वेन चास्य प्रसज्यप्रतिषेधो नञर्थोऽस्तीति अपुनरुक्तम् अपुनर्गेयम् इत्यादीनां सिद्धिः । अनित्यत्वमस्याः 'ओषधेश्च विभक्तावप्रथमायाम्' (६।३।१३२) इत्यत्र विभक्तिग्रहणाद् विज्ञायते । यदि हि सा नित्या स्यात् प्रथमायाः प्रतिषेधादन्यत्र विभक्तावेव भविष्यतीति विभक्तिग्रहणं न कुर्यात् । कृतं च तज्ज्ञापयति अनित्यैषा परिभाषेति ॥ ९७ ॥

प्रतिपदविधानाद् योगविभागो बलीयान्[2] ॥ ९८ ॥

प्रतिपदविधानाच्छब्दमुच्चार्य विधानाद्योगविभागो बलीयान् । अतो योगविभागे लाघवेनैव सिद्धे किमर्थं ग्रन्थगौरवकारि प्रतिपदविधानमिति न चोदनीयमित्यर्थः । गरीयस्त्वं च योगविभागस्य यौक्तमेव[3] । तथा ह्येकयोगे ग्रन्थगौरवेऽप्येकैव वाक्यार्थप्रतीतिरुपादीयते । योगविभागे तु प्रतियोगं भिन्नबुद्ध्युदयाद्व्यक्तं प्रतिपत्तिगरीयस्त्वम् । एतेन[4] 'जभोऽचि', 'रधेः', 'नेट्यलिटि' (७।१।६१–६२) इति सूत्रत्रयेण सिद्धौ किमर्थं द्विः रधिग्रहणमिति न वाच्यम् ॥ ९८ ॥

अबाधकान्यपि निपातनानि भवन्ति ॥ ९९ ॥

नेयं परिभाषा, नापि भाष्यवचनम् । बाधकान्येव निपातनानि इति भाष्ये व्यवस्थापनात् । जयादित्येन[5] त्वियं लक्ष्यस्थित्यनुरोधाद्दर्शिता अबाधकान्यपि निपातनानीति । तेन 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (४।३।१०५) इति निपातनस्याबाधकत्वात् 'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यः०' (४।३।२३) इति पुराशब्दाट्ट्युट्युलोस्तुडागमो भवति । तेन 'दधतः पुरातनमुनेर्मुनिताम्' (किरात० ६।१९) इति भारवेः 'पुरातनीर्नदीः' (शिशु० १२।६०) इति माघकाव्यस्य प्रयोग उपपन्नो भवति । ज्ञापकं चात्र वृत्तिकारदर्शनप्रद्वाविष्टा दर्शयन्ति त्रयाणामित्यस्य सिद्धये 'त्रेस्त्रयः' (७।१।५३) इति सूत्रम् । यदि बाधकान्येव निपातनानि भवन्ति तदा त्रीणामिति प्राप्ते तद्बाधकरूपेण 'निजां त्रयाणां गुणः श्लौ' (७।४।७५) इत्यत्र त्रयाणामिति निपातनेनैव सिद्धिः स्यात्[6] । यदा त्वबाधकान्यपि निपातनानि भवन्ति तदा त्रीणामिति प्रसक्तस्याप्रयोगाय 'त्रेस्त्रयः' (७।१।५३) इति सूत्रमर्थवद् भवति ॥ ९९ ॥

१ Before नञा M. ins. इवेन. २ P. गरीयान्. ३ M. उक्तमेव. ४ For एतेन ...न वाच्यम्, M. reads अत एव 'रधिजभोरचि', नेट्यलिटीति सूत्रद्वये 'रधि' इति योगविभागेन सिद्धौ किमर्थं रधेरिति तृतीयसूत्रमिति न चोदनीयम. ५ For जयादित्येन ... ब्राह्मणकल्पेषु इति, M. reads जयादित्येन तु इदमाश्रितमिति. ६ For सिद्धिः स्यात्. P. reads सिद्धत्वात् तत्सूत्रं नारभेत.

योगविभागादिष्टसिद्धिः ॥ १०० ॥

योगविभागादिष्टसिद्धेरेव[1] नातिव्याप्तिः शङ्कनीयेति भावः । तेन 'इद् गोण्याः' (१।२।५०) इत्यत्र इद् इति योगविभागेन पञ्चसूचिः दशसूचिः इत्येव सिध्यति । युक्तं चैतत् । यस्माद् योगविभागो गरीयान् प्रयत्नः, लघीयसा चोपायेन[2] सिद्धौ गरीयसो यत्नस्याश्रयणसामर्थ्यादवश्यमिष्टोपायतास्य कल्पनीयेति ॥ १०० ॥

अवयवसिद्धेः[3] समुदायसिद्धि[4]र्बलीयसी ॥ १०१ ॥

युक्तिसिद्धं चैतत् । समुदायस्य सर्वानुग्राहित्वेन प्राधान्यात् । तेनावयवाश्रयात्समुदायाश्रयमेव कार्यं प्रवर्तते । तद्यथा 'दीधीवेवीटाम्' (१।१।६) इत्यत्र दीङ् क्षये, धीङ् आधारे, वेञ् तन्तुसन्ताने, वी गत्यादौ इत्येतेषां ग्रहणं न भवति ॥ १०१ ॥

श्रुतानुमितयोः श्रौतः संबन्धो[5] बलीयान् ॥ १०२ ॥

न्यायसिद्ध एवायमर्थः । तथाहि लोके ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम् इति माठरकौण्डिन्ययोः साक्षात् श्रुतेन परिवेषणेन ब्राह्मणत्वादनुमितं भोजनं बाध्यते । एवं शास्त्रेपि 'अचो रहाभ्यां द्वे' (८।४।४६) इत्यत्र रहाभ्याम् इति साक्षात् श्रुतेन निमित्तभावेन यरन्तर्भावादनुमितं कार्यित्वं रहोर्बाध्यते । तेन ब्रह्मह्रदो मद्रह्रद इति रेफस्य द्विर्वचनं न भवति ॥ १०२ ॥

संप्रसारणं संप्रसारणाश्रयं च कार्यं[6] बलवत् ॥ १०३ ॥

तेन शुशावयिषति अशूशवत् इति 'विभाषा श्वेः' (६।१।३०) 'णौ च संश्चङोः' (६।१।३१) इति संप्रसारणपूर्वरूपत्वाभ्यामन्तरङ्गमपि वृद्ध्यादिकं बाध्यते । ज्ञापकं चात्र 'सहिवहोरोदवर्णस्य' (६।३।११२) इति अवर्णग्रहणं न्यासकृतोक्तं सं[7]प्रसारणपूर्वरूपत्वे कृते ऊढ इत्युकारस्य मा भूदित्येवमर्थम् । एतच्चाप्रयोजनं संप्रसारणात्प्रागेव परत्वात् 'न मु ने' (८।२।३) इति योगविभागेन सिद्धेषु ऊढ इत्यादौ ढत्वधत्वष्टुत्वढलोपेषु ततः संप्रसारणपूर्वरूपत्वाभ्यां परत्वादोत्वे कृते संप्रसारणं पूर्वरूपत्वं च विधास्याम इति न किंचिदनिष्टं नाम । तदेतदवर्णग्रहणं संप्रसारणतदाश्रयपूर्वरूपत्वयोर्बलीयस्त्वस्य ज्ञापकमिति । क्वचिदिति [8]सविशेषा चेयं परिभाषा । तेन ब्रह्म जिनातीति ब्रह्मज्यः इति 'आतोनुपसर्गे कः' (३।२।३) इति, आह्वः प्रह्वः इत्यत्र 'आतश्चोपसर्गे' (३।१।१३६) इति कप्रत्यये संप्रसारणं पूर्वरूपत्वं च बाधित्वा आकारलोपः । तस्यासिद्धत्वादियङुवङौ न भवतः । अन्यथा ब्रह्मजियः आहुवः प्रहुवः इति स्यादित्याहुः । भाष्यकारेण त्वियं परिभाषा 'लिट्यभ्यासस्योभयेषाम्' (६।१।१७) इत्यत्र पठिता । तथा च तत्रोक्तम् । इहाभ्याससंप्रसारणस्यावकाशः इयाज उवाच । हलादिशेषस्यावकाशः चिच्छिदतुः बिभिदुः । विव्याध वव्रश्चेत्यत्र परत्वाद्धलादिशेषः प्राप्नोति । तत्र कृते वकारस्य

---

१ P. इत्यमेव सिध्यति । न चाति०. २ P. उपादानेन for उपायेन. ३ P. प्रसिद्धेः and प्रसिद्धिः for सिद्धेः and सिद्धिः. ४ P. गरीयान् for बलीयान्. ५ M. अयमपि न्याय एव. ६ P. वलीयः. ७ M. om संप्रसारणपूर्वरूपत्वे...एतच्चाप्रयोजनं. ८ P. सशेषा for सविशेषा.

संप्रसारणप्रसङ्गः । तस्मात्तन्निवृत्त्यर्थं हलादिशेषादभ्याससंप्रसारणं पूर्वविप्रतिषेधेनेति वक्तव्यम् 'न वा संप्रसारणबलीयस्त्वादन्यत्रापि' (६।१।१७ वा. २) । संप्रसारणं संप्रसारणाश्रयं च कार्यं बलीयो भवतीति वक्तव्यम् । किं प्रयोजनम् । रमाल्लोपेयड्वङ्यणः । भृष्टं भृष्टवान् । रमः संप्रसारणं बलीयस्त्वात् । आल्लोपः । जुहुवतुः जुहुवुः । आल्लोपात्संप्रसारणपूर्वरूपत्वे बलीयस्त्वात् । इयङ् शुशुवतुः । इयङः संप्रसारणं बलीयस्त्वात् । तत्र कृते यणादेशः प्राप्नोति तस्माच्च पूर्वरूपत्वं संप्रसारणस्य बलीयस्त्वादिति । यद्यपि पुनर्नैतानि संप्रति प्रयोजनानि इत्यादिना ग्रन्थेन भाष्ये एव प्रत्याख्यायन्ते तथापि प्रत्याख्यानाद् व्याख्यानगौरवद्वारेण परिभाषावचनमेतल्लघीयः इति ॥ १०३ ॥

अकृतव्यूहाः पाणिनीयाः प्रवर्तितमपि[1] शास्त्रं व्यावर्तयन्ति[2] ॥ १०४ ॥

विशेषेण[3] ऊहो निश्चयो व्यूहः । विशेषेण अकृतनिश्चयाः पाणिनीयाः प्रवर्तितमपि लक्षणं व्यावर्तयन्तीत्यर्थः । इयं परिभाषा भाष्ये धौकामिः सौत्थितिः वैक्षमाणिः इत्यादौ वृद्धियणादेशयोर्युगपत्प्राप्तिं दर्शयितुमुपन्यस्ता । अनयैव च पपुषः पश्येत्यपि सिध्यति । तथाहि । यद्यपि पपिवस्शब्दाच् शस् विहितः तथापि अकृतव्यूहाः इति वचनात् पपावस् शस् इति स्थिते संप्रसारणबलीयस्त्वात् प्राक् संप्रसारणं ततो वलादित्वाभावादिण् न भवति । अल्लोपस्तु[4] भवतीति । लिङ्गं चास्याः 'गोरतद्धितलुकि' (५।४।९२) इति अतद्धितग्रहणम् । तद्धि सुब्लुकि निषेधो मा भूदित्येवमर्थं क्रियते । राजगवीयतीति । अत्र च पूर्वमेव निष्पन्नष्टच् । उत्तरकालं क्यचि कृते सुब्लुकि यदा वृत्तोपि टच् निवर्तते तदैतदर्थवद्भवतीति । न[5] हि प्रवृत्तं वचनशतेनापि निवर्तते इति न्यायस्यायमपवादः लक्ष्यस्थित्या क्वचिदेवाश्रीयते । अन्यथा ह्यानुपूर्व्या सिद्धत्वमिति वचनमिदं अनर्थकं स्यादित्याहुः ॥ १०४ ॥

यथोद्देशं[6] संज्ञापरिभाषम् ॥ १०५ ॥ कार्यकालं संज्ञापरिभाषम् ॥ १०६ ॥

संज्ञा च परिभाषा च यथोद्दिष्टं यथोद्देशस्थमेव व्याक्रियेते[7] । संज्ञा[8] च परिभाषा च समाहारद्वन्द्वः । तत् कार्यकाले व्याप्रियते कार्यदेशस्थं व्याप्रियते इत्यर्थः । व्युत्पन्नाव्युत्पन्नप्रतिपत्तृभेदाच्चेमौ कार्यकालयथोद्देशपक्षौ । यथेष्टं च भाष्यकारेणानयोः परिभाषयोस्तत्र तत्राश्रयणादेव प्रामाण्यमिति । तथाहि । यथोद्देशपक्षमाश्रित्य जीवताद्भवान् इत्यत्र परत्वात् 'ङिच्च' (१।१।५३) इत्यस्माद् 'अनेकाल्शित्सर्वस्य' (१।१।५५) इति सर्वादेशः तातङ् उक्तः । तथा कार्यकालपक्षे 'संयोगान्तस्य लोपः' (८।२।२३), 'झलो झलि' (८।२।२६) 'ह्रस्वादङ्गात्' (८।२।२७) इति षष्ठीसप्तमीपञ्चमीनिर्देशानां 'षष्ठी स्थानेयोगा' (१।१।४९) 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१।१।६६) 'तस्मादित्युत्तरस्य' (१।१।६७) इति परिभाषासु कर्तव्यासु असिद्धत्वाभावो दर्शितः ॥ १०५–१०६ ॥

---

१ P. कृतं for प्रवर्तितं. २ P. निवर्तयन्ति for व्यावर्तयन्ति. ३ M. विशिष्टः for विशेषेण. ४ M. om. अल्लोपस्तु भवतीति. ५ M. om. नहि......सिद्धत्वमिति. ६ P. यथोद्दिष्टं. ७ P. व्याप्रियते. ८ M. om संज्ञा च . इत्यर्थः.

अनन्त्यविकारोऽन्त्यसदेशस्य ॥ १०७॥

अनन्त्यस्य यो विकारः सः अन्त्यसमानदेशस्यान्त्यनिकटवर्तिनो भवति । तद्यथा। विद्धमिति संप्रसारणं यकारस्य भवति न वकारस्य। पयांसीति 'सान्तमहतः०'(६।४।१०) इति दीर्घः यशब्दाकारस्य न भवति । तक्ष्णा तक्ष्णि इत्यत्र 'अल्लोपोनः' (६।४।१३४) इत्यकारलोपस्तकाराकारस्य न भवति । इह न्यमार्ट् इति मिमार्जिषति इति 'मृजेर्वृद्धिः' (७।२।११४) अडागमाभ्यासेकारयोर्न भवतीति । विदुषः इति 'वसोः संप्रसारणम्' (६।४।१३१) विदेर्यकारस्य न भवतीति । इयं च परिभाषा 'ष्यङः संप्रसारणं०' (६।१।१३) इत्यत्र भाष्यकारेण पठिता । तत्रैव 'धात्वादेः षः सः' (६।१।६४), 'णो नः' (६।१।६५) इतीहैव स्यात् सोता नेता, सिञ्चति नमतीत्यादौ च न स्यात् इति अतिप्रसङ्गमुद्भाव्य पुनः प्रत्याख्याता । उक्तप्रयोजनानि च प्रकारान्तरेण साधितानि। यदुक्तं विद्धमिति वकारस्य संप्रसारणं न भवति 'न संप्रसारणे संप्रसारणम्' (६।१।३७) इति वचनात् । यशांसीति यशब्दाकारस्य दीर्घो न भवति 'नोपधायाः' (६।४।७) इत्यनुवृत्तेरिति। किंतु प्रत्याख्यानात् वरं वचनमेवैतत्साधीय इति। अतिप्रसङ्गश्च लक्ष्यानुरोधादगत्या खलु परिभाषाश्रयणमिति वचनान्न भवति। दृश्यते चानया व्यवहारः । तथाहि—

> अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् ।
> केचिदन्त्यसदेशस्य केचिदिच्छन्ति नोभयोः ॥

इति ॥ १०७ ॥

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन ॥ १०८ ॥

तेन मधूनामिति नुटि कृते अजादित्वाभावात् 'इकोचि विभक्तौ' (७।१।७३) इति नुम् न भवति । चतसृणामिति 'अचि र ऋतः' (७।२।१००) इति रत्वं न भवति । क्रोष्टूनामिति 'विभाषा तृतीयादिष्वचि' (७।१।९७) इति तृज्वन्न भवति। पूर्वविप्रतिषेधश्च नाम अयं 'विप्रतिषेधे परम्०' (१।४।२) इत्यत्र परशब्दस्य इष्टवाचित्वाल्लब्धः सूत्रार्थो वचनरूपेण पठ्यते ॥ १०८ ॥

गणकार्यमनित्यम् ॥ १०९॥

अयमर्थः क्षमूष् सहने इत्यस्य भिदादित्वादेवाङि सिद्धे षित्करणेन ज्ञापितः। तेन अदादित्वाच्छब्लुकोभावात् 'न विश्वसेत् पूर्वविरोधितस्य', 'मण्डपे शयानि तत्परम्' इत्यादि सिध्यति । शयामीति परस्मैपदं तु 'अनुदात्तङित:०' (१।३।१२) इति ङिल्लक्षणमात्मनेपदं व्यभिचरतीति अस्यार्थस्य सूचितत्वात् ॥ १०९ ॥

---

१ P. ये विकारास्ते...भवन्ति. २ P. यशांसि for पयांसि. ३ M. om. केचिदिच्छन्ति नोभयोः. ४. M. षदादित्वादेव मित्वे सिद्धे.

पूर्वत्रासिद्धीयमद्वित्वे ॥ ११० ॥

'सर्वस्य द्वे' (८।१।१) इति सूत्रे कात्यायनवचनमेतत् परिभाषारूपेण पठ्यते । द्विर्वचने कर्तव्ये पूर्वत्रासिद्धत्वं नास्ति । तेन द्रोढा द्रोढा द्रोग्धा द्रोग्धा इति द्रुहेस्तृचि कृते ढत्वकुत्वयोः 'सर्वस्य द्वे' (८।१।१) इति द्विर्वचनं भवति । अन्यथा ढत्वकुत्वयोः पूर्वत्रासिद्धत्वात्प्रथमं द्विर्वचनं ततो 'वा द्रुह०' (८।२।३३) इति घत्वविकल्पः । तत्रैतन्न लभ्यते । यदा प्रकृतेर्घत्वं तदा अभ्यासस्यापीति नियमाभावात् ढत्वमपि कदाचित्स्यात् । ततश्च द्रोढा द्रोग्धेति अनिष्टमपि स्यादिति । इह यथा राजाराजेति पदमात्राश्रयो नलोपस्ततो वीप्साद्यपेक्षं बहिरङ्गं द्विर्वचनं पश्चाद् भविष्यति तथा द्रोढाद्रोढेत्यादौ विभाषिता ढत्वादयोन्तरङ्गाः प्रथमं भविष्यन्ति ततो द्विर्वचनमित्येवं सिद्धिर्न वाच्या । यस्मादन्तरङ्गा अपि पूर्वस्मिन् बहिरङ्गे असिद्धा भवन्त्येव । औजढत् इत्यत्र अन्तरङ्गस्यापि ढत्वादेरसिद्धत्वात् हृतशब्दो द्विरुच्यते इति असिद्धसूत्रे (८।२।१) उक्तम्[1] । यद्येवमौजढदित्यत्र द्विर्वचने कर्तव्ये कथमसिद्धं ढत्वादेः पूर्वत्रासिद्धीयमद्विर्वचने इति न्यायात् । उच्यते । अनित्यं चैतद्वचनम् ' उभौ साभ्यासस्य ' (८।४।२१) इति सूत्रकरणात् । नित्ये ह्यस्मिन् ' अनितेः ' (८।४।१९) इति णत्वं कृत्वा कृतणत्वस्य द्विर्वचने सिद्धं प्राणिणिषतीति किम् ' उभौ साभ्यासस्य ' (८।४।२१) इत्यनेन ॥ ११० ॥

विधिविधानविधिभाजां त्रयाणां संनिधाने तदन्तविधिर्भवति ॥१११॥

तेन ' एचोयवायावः ' (६।१।७८) इति एच इति विधानमस्ति । विधीयते अनेनेति कृत्वा अयादिशब्दे विधिरप्यस्ति । विधीयतेऽसौ इति कृत्वा विधिभाग्नास्तीति तदन्तविधेरभावादेज्मात्रस्यैव स्थानित्वं[2] भवति । एजन्तस्य स्थानित्वे[2] तु चयनं चायकः इत्यादावनेकाल्त्वात्सर्वादेशोऽयादयः स्युः । अयं च येनविधिसूत्रस्यैव सामर्थ्यलब्धोर्थः परिभाषारूपेण पठ्यते । तथा हि तत्र येनेति साधकतमं करणं निर्दिश्यते । न चाकर्तृकं करणमस्तीति कृत्वा सामर्थ्यात् कर्ताप्याश्रितः[3] । स पुनरन्तशब्देनावयववाचिना समुदायरूपः प्रकाशितः । स च त्रिभिः प्रकारैः संनिहितो भवति । कचिन्निर्देशात् यथा ' ईदूदेद्द्विवचनम्०' (१।१।११) इति द्विवचनं कर्तृभूतं निर्दिष्टम् । तथाहि । ईदादिभिः करणैः प्रगृह्यसंज्ञां विदधाति । कचित् प्रकरणात् । यथा ' एरच् ' (३।३।५६) इति । अत्र धातोरित्यधिकारात् धातुः प्रकरणात् कर्ता संनिहितः इकारेण करणेनाचं विदधाति । कचित्सामर्थ्यात् । यथा ' इको झल् ' (१।२।९) इति । तत्र धातोरेव सन् विधीयते इति सामर्थ्याद्धातुः कर्ता संनिहितः इका करणेन सनः कित्त्वं विदधाति । तदेवम् ' ईदूदेद्द्विवचनम्० ' (१।१।११) इत्यादौ प्रगृह्यसंज्ञादेर्विधीयमानस्य विधेरीदूदेदादेश्च करणस्य विधानस्य द्विवचनादेः कर्तुश्च विधिभाजः संभवाद् ' येन विधिस्तदन्तस्य ' (१।१।७२) इति तदन्तविधिः प्रवर्तते । ' एचोयवायावः ' (६।१।७८) इत्यादौ

१ P. न्यासः for उक्तम्. २ P. स्थानिवत्त्वं and स्थानिवत्त्वे for स्थानित्वं and स्थानित्वे. ३ P. अर्जितः for आश्रितः.

त न प्रवर्वते । विधिभाजोऽसंभवात् । तस्मादेतत्सूत्रार्थोयं विधिविधानविधिभाजां त्रयाणां संनिधाने तदन्तविधिरिति ॥ १११ ॥

पूर्वत्रासिद्धीये न स्थानिवत् ॥ ११२ ॥

अनेन पाक्तिः याष्टिः इत्यत्र पूर्वत्रासिद्धाधिकारीये कुत्वे षत्वे च कर्तव्ये णिलोपस्य स्थानिवत्त्वाद् झलि परतः कुत्वं षत्वं च सिध्यति । एतच्च 'नाग्लोपिशास्वृदिताम्' (७।४।२) इत्यत्र भाष्ये ज्ञापितम् । तथा हि तत्र भाष्ये अममाल्त् इत्यादौ अजादेशस्य स्थानिवत्त्वादेव णौ चङ्परे ह्रस्वो न भविष्यति किमग्लोपिनामिति प्रतिषेधेन । तत्रोक्तं यत्र स्थानिवद्भावो नास्ति तदर्थम् अत्वरराजत् इति । न ह्यत्र टिलोपोजादेशः । किं तर्हि । हल्चोरादेशः । ततः पुनरुक्तं तर्हि अग्लोपिना नेति प्रतिषेधोप्यत्र न प्राप्नोति । न ह्यत्र अगेव लुप्यते । किं तर्हि । अन्योपि । अथ योत्र अग् लुप्यते तदाश्रयो निषेधः । एवं तर्हि योत्राग्लुप्यते तदाश्रयः स्थानिवद्भावो न भविष्यतीत्युक्त्वा उपसंहृतम् । एव तर्हि सिद्धे सति अग्लोपिनां नेति यत्प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः इत आरभ्य उत्तरत्र स्थानिवद्भावो न भवतीति । तेन पूर्वत्रासिद्धीये न[1] स्थानिवदिति उपपन्नं भवतीति । अनित्या चेयं परिभाषा 'न पदान्त०' (१।१।५८) इति सूत्रे द्विर्वचनग्रहणात् । तेन वेतस्वान् इत्यत्र अकारलोपस्य स्थानिवत्त्वात् सकारान्तं पदं न भवतीति रुत्वाभावः । भाव्यर्थं वाय्वर्थम् इति यणादेशस्य स्थानिवत्त्वात् च्योरिति न लोपः । प्रहिणोति प्रमिणीते इति गुणेत्त्वयोः स्थानिवत्त्वाद् 'हिनु मीना' (८।४।१५) इति णत्वमिति ॥ ११२ ॥

निमित्तापाये नैमित्तिकस्याप्यपायः ॥ ११३ ॥

हेतोरपाये तत्कार्यमप्यपैति वि[2]नैश्यतीत्यर्थः । निमित्तेन निर्वृत्तं नैमित्तिकम् । 'वुञ्छणादौ' (४।२।८०) कुमुदादित्वाट्ठक् । अनेन राजागमनमाचष्टे राजानमागमयति इति 'आख्यानात् कृदन्ताद् णिचि कृल्लुक्' (३।१।२६ वा. ६) इति कृतो निवृत्तौ तन्निमित्ता षष्ठीसमासनिवृत्तिः । तया विभक्तिनिमित्तं पदत्वं निवृत्तम् । ततश्च तन्निमित्तनलोपाभावात् 'प्रकृतिवच्च कारकम्' (३।१।२६ वा. ६) इति प्र[3]कृतिवत् कारकातिदेशाद् नकारान्तादेव राजन्-शब्दाद् द्वितीया भवति । ज्ञापकं चास्यार्थस्य 'उदः स्थास्तम्भोः पूर्वस्य' (८।४।६१) इत्यादौ षकारनिवृत्तौ तन्निमित्तठकारस्य थकारोच्चारणमिति निर्देशः । अपिशब्दात् क्वचित्कारणापाये कार्यं नापैति । यथा 'तदस्यास्ति०' (५।२।९४) इति वर्तमानकालविवक्षायां कृतो मतुप् 'पुत्रवान् भविष्यति' इति भविष्यत्कालविवक्षायां वर्तमाननिवृत्तावपि न निवर्तते । तदुच्यते । प्र[4]वृत्तं वचनशतेनापि न[5] निवर्तते इति । पठ्यते च लोके हि जपाकुसुमसंनिधौ स्फटिके रागस्तन्निवृत्तौ निवर्तत एव ॥ ११३ ॥

---

१ M. न स्थानिवदित्युक्तं तत्र वक्तव्यं भवतीति. २ M. om. विनश्यतीत्यर्थः. ३ P. om. प्रकृतिवत्. ४ M. om. प्रवृत्तं...इति. ५ P. वर्तते for न निवर्तते.

प्रकृतिवदनुकरणं भवति ॥११४॥

तेन कश्चिदाह द्विः पठति । तमन्योनुकरोति द्विः पठतीत्याह इति । अत्र [1]प्रकृतिवद्भावात् पदत्वे 'तिङ्ङतिङः' (८।१।२८) इति निघातः सिध्यति । एकपदत्वे स न स्यात् । ज्ञापकं चात्रार्थे 'परिव्यवेभ्यः क्रियः' (१।३।१८) इत्यादौ निर्देशे क्रीत्यादेरनुकरणशब्दस्य विभक्त्युत्पत्त्यर्थं प्रातिपदिकत्वाभ्युपगमेपि धातुत्वाश्रयमियङादेशकरणमिति । न चात्र प्रकृतिवद्भावात् 'अधातुः०' (१।२।४५) इति प्रातिपदिकसंज्ञानिषेधः शङ्कनीयः । [2]यतोऽधातुरिति न प्रसज्यप्रतिषेधः 'धातुः न भवति' इति, किं तर्हि पर्युदासः 'धातोरन्यत् प्रातिपदिकम्' इति । क्रीप्रभृतयश्च शब्दा अनुकरणे न धातवः [3]प्रकृतिवत्तया च धातवः इति धातुत्वाधातुत्वाभ्यां धातोरन्ये भवन्ति । तथा च 'क्षियो दीर्घात्' (८।२।४६) इत्यत्र सूत्रे 'क्षियः' इति पर्युदासाश्रयात् [4]धात्वाश्रया प्रातिपदिकसंज्ञा भविष्यतीति न्यासः (भाग २ पृ. ९९६)। 'विपराभ्यां जेः' (१।३।१९) इत्यादौ प्रकृतिभावादियङ्प्राप्तिः सौत्रत्वात्परिहरणीया ॥ ११४ ॥

क्वचिदपवादविषयेपि उत्सर्गोभिनिविशते ॥ ११५ ॥

तेन 'प्रदीयतां दाशरथाय मैथिली' इति 'अत इञ्'–(४।१।९५) विषये 'प्राग्दीव्यतोण्' (४।१।८३) सिध्यति । युक्तिसिद्धमेवैतत् । उत्सर्गलक्षणं हि सामान्यम् । सामान्यस्य सर्वविषये प्रवृत्तिरविरुद्धा इति । ज्ञापकं चात्र कटं कारको व्रजतीति द्वितीयार्थम् 'अकेनोर्भविष्यदाधमर्ण्ययोः' (२।३।७०) इति षष्ठीनिषेधवचनम् । तद्धि भविष्यति 'अण् कर्मणि च' (३।३।१२) इति अपवादविषये ण्वुलि सति उपपद्यते नान्यथा । क्वचिद्ग्रहणेन च 'परिहृत्यापवादविषयमुत्सर्गोभिनिविशते' इति व्यवस्था सूच्यते । तेन निन्यतुः निन्युः इत्यादौ प्रागुपजातनिमित्तोपीयङ् कृते द्विर्वचने न भवितव्यमत्रापवादार्थत्वादनया 'एरनेकाचः' (६।४।८२) इति यणिति प्रवर्तते ॥११५॥

गर्भवट्टाबादयो भवन्ति ॥ ११६ ॥

यथा गर्भो मध्येवतिष्ठते तथा टाबादयः स्त्रीप्रत्ययाः प्रातिपदिकस्वाद्योर्मध्ये भवन्तीत्यर्थः । मध्ये प्रथमं स्त्रीप्रत्ययास्ततः स्वादयः ततः तरबादयो वा इति यावत् । तेन ङ्याब्ग्रहणप्रत्याख्यानप्रस्तावे ङ्याप्सूत्रे (४।१।१) यदुक्तं कालितरेत्यादौ प्रकर्षप्रत्ययेपि कृते गर्भवन्मध्य एव स्त्रीप्रत्ययो भविष्यतीति तदुपपन्नं भवति । ज्ञापकं चास्यार्थस्य 'न यासयोः' (७।३।४५) इति इत्वप्रतिषेधवचनम् । यदि गर्भवत् टाप् न स्यात् तदा त्यदाद्यत्वादौ कृते सुपः परेण स्यात् । यका सकेत्यत्र 'प्रत्ययस्थात्०' (७।३।४४) इति इत्वप्राप्तिरेव नास्ति सुपः परत्वादापः । तत्किं निषेधेन । तदेतन्निषेधवचनमस्यार्थस्य ज्ञापकमिति ॥ ११६ ॥

सूत्रे लिङ्गवचनमतन्त्रम् ॥ ११७ ॥

औचित्यादेवैतदुच्यते । सूत्रं हि लक्ष्यपराधीनं सूचकमात्रं वस्तु संज्ञावत् उपलक्षण-

---

१ M. प्रकृतिभावात् for प्रकृतिवद्भावात्. २ M. om. यतोऽधातुरिति...किं तर्हि.
३ P. प्रकृतिवत्त्वया. ४ P. om. धात्वाश्रया.

मित्युच्यते । न चावश्यं लक्षणे लक्ष्यं प्रवर्तते । तस्य लक्ष्यपरत्वाल्लिङ्गलक्षणं वचनलक्षणं च सूत्रेष्वकिंचित्करं न प्रवर्तते । ततो येन केनचिल्लिङ्गेन येन केनचिद्वचनेन च निर्देशः कर्तव्यः न तस्य तन्त्रतावसेया । यथा 'बन्धुनि बहुव्रीहौ' (६।१।१४) इति नपुंसकलिङ्गेन निर्देशोऽतन्त्रः । 'ग्रीवाभ्योण् च' (४।३।५७) इति बहुवचननिर्देशोतन्त्रः। ज्ञापकमप्यत्रार्थे 'अर्धं नपुंसकम्' (२।२।२) इति नपुंसकग्रहणम्, 'आ कडारादेका संज्ञा' (१।४।१) इति एकाग्रहणम् ॥ ११७ ॥

ज्ञापकसिद्धं न सर्वत्र ॥ ११८ ॥

इदमप्युचितमेव । ज्ञापकं हि नाम न वाचकं किं तर्हि इङ्गितेन सूचकं क्वचिदेव इष्टसिद्धावाश्रीयते न सर्वत्रेति युज्यते ज्ञापकसिद्धं न सार्वत्रिकम् इति । तेन ज्ञापकसाधितमात्मनेपदानित्यत्वादि न सर्वत्र प्रयोज्यम् । किंतु विशिष्टप्रयोगदर्शनात् क्वचिदेव ॥११८॥

अगत्या तु परिभाषाश्रीयते ॥ ११९ ॥

इदमपि यौक्तमेवोच्यते । परिभाषा हि न पाणिनीयानि वचनानि । किं तर्हि नानाचार्याणाम् । तत्र पाणिनीये शब्दानुशासने यत्रैव क्वचिदिष्टविषये मुख्यलक्षणेनासिद्धिः तत्रैवैता गत्यन्तरमपश्यद्भिराश्रीयन्ते । न तु यत्रैतासां समाश्रयणे दोष एव प्रत्युपपद्यते तत्रैताः समाश्रीयन्ते । एतेन परिभाषासञ्जनेन नानिष्टमित्युक्तं भवति । तेन 'राज्ञः क च' (४।२।१४०) राजकीयम् इत्यत्र 'एकदेशविकृतमनन्यवद् भवति' (परि०१४) इति परिभाषया 'अल्लोपोऽनः' (६।४।१३४) इति न प्रवर्तते ॥ ११९ ॥

भवति व्याख्यानतो विशेषप्रतिपत्तिर्न संदेहादलक्षणम् ॥ १२० ॥

व्याख्यानादाचार्यपरंपरोपदेशात् संदेहेपि विशेषोवगतो भवति यतः तस्मान्नेह संदेहं प्राप्य अलक्षणं लक्षणाप्रवृत्तिः । उपदेशात्संदेहमपास्य लक्षणं प्रवर्तनीयम् इत्यर्थः । इयं च परिभाषा 'लण्' (शिवसूत्र ६) इत्यत्र सूत्रकारेण भाष्यकारेण च ज्ञापिता । यदुक्तम् । किमर्थं पुनरयं वर्णोच्छिन्नावपि णकारः संदेहहेतुरनुबद्धोपि पुनरनुबध्यते । यस्मादनेन अण्ग्रहणेषु इण्ग्रहणेषु च संदेहः किं पूर्वेण णकारेण तत् परेण वेति । एवं तर्हि एतज्ज्ञापयत्याचार्यः अस्त्येषा परिभाषा व्याख्यानतो विशेषप्रतिपत्तिरिति । तेन अण्ग्रहणानि सर्वाणि पूर्वेण णकारेण 'अणुदित्सवर्णस्य०' '१।१।६९) इत्येकं परेण । इण्ग्रहणानि तु परेणैवेति[1] निश्चीयते ॥ १२० ॥

इति तावज्ज्ञापकसिद्धा वचनसिद्धा न्यायसिद्धाश्च काश्चन परिभाषाः, वचनानि च कानिचिद् यथाबोधमस्माभिर्विवृतानि । एवमनया दिशा अन्यान्यपि शब्दक्रियोपयोगन्यायवाक्यानि लिङ्गोदाहरणाभ्यां समनुगन्तव्यानि संनिहितानि[2] शक्तिशः । तद्यथा । सापेक्षमसमर्थं भवति । नित्यसापेक्षं प्रधानसापेक्षमस्ति । सामर्थ्यान्निरवकाशा हि विधयः॥

इति[3] श्रीपाणिनीयाचार्यविरचितानां परिभाषाणां लघुवृत्तिः संपूर्णा ॥

---

१ P. खलु for तु. २ P. om संनिहितानि...विधयः. ३ P. इति वैयाकरणगजज्ञाननश्रीपुरुषोत्तमदेवविरचिता ललिताख्या परिभाषावृत्तिः समाप्ता ॥

श्रीपुरुषोत्तमदेवकृतः परिभाषापाठः ।

[N. B. — Figures given into brackets are according to the Paribhāṣenduśekhara.]

१ व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥ (१)

२ यथोद्देशं संज्ञापरिभाषम् ॥ (२)

३ कार्यकालं संज्ञापरिभाषम् ॥ (३)

४ अनेकान्ता अनुबन्धाः ॥ (४)

५ एकान्ताः ॥ (५)

६ नानुबन्धकृतमनेकाल्त्वम् ॥ (६)

७ नानुबन्धकृतमनेजन्तत्वम् ॥ (७)

८ नानुबन्धकृतमसारूप्यम् ॥ (८)

९ कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः॥

१० उभयगतिरिह भवति ॥ (९)

११ कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते ॥ (१०)

१२ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ (११)

१३ निर्दिश्यमानस्यादेशा भवन्ति ॥ (१२)

१४ यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ॥ (१३)

१५ अर्थवद्ग्रहणे नानर्थकस्य ॥ (१४)

१६ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः॥ १५

१७ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ (१६)

१८ एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ (१७)

१९ एकयोगनिर्दिष्टानां क्वचिदेकदेशोऽप्यनुवर्तते ॥ (१८)

२० भाव्यमानेन सवर्णानां ग्रहणं न॥ (१९)

२१ भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति ॥ (२०)

२२ वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥(२१)

२३ उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ (२२)

२४ प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ (२३)

२५ प्रत्ययग्रहणे चापञ्चम्याः ॥ (२४)

२६ उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम् ॥ (२५)

२७ स्त्रीप्रत्यये चानुपसर्जने न ॥ (२६)

२८ संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ (२७)

२९ कृद्ग्रहणेन गतिपूर्वस्यापि ग्रहणम्॥ २८

३० पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ (२९)

३१ व्यपदेशिवदेकस्मिन् ॥ (३०)

३२ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ (३१)

३३ व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥(३२)

३४ यस्मिन्विधिस्तदादावल्ग्रहणे ॥ (३३)

३५ सर्वे विधयश्छन्दसि विकल्पन्ते॥ (३५)

३६ सर्वो द्वन्द्वो विभाषैकवद् भवति॥(३४)

३७ प्रकृतिवदनुकरणं भवति ॥ (३६)

३८ एकदेशविकृतमनन्यवत् ॥ (३७)

३९ पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ॥ (३८)

४० सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ॥ (४०)

४१ पुनःप्रसङ्गविज्ञानात् सिद्धम् ॥ (३९)

४२ विकरणेभ्यो नियमो बलीयान्॥(४१)

४३ कृताकृतप्रसङ्गि नित्यम् ॥

४४ शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति ॥ (४३)

४५ असिद्धं बहिरङ्गमन्तरङ्गे ॥ (५०)

४६ नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ (५१)

४७ अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते ॥ (५४)

४८ अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते ॥ (५२)

४९ वार्णादाङ्गं बलीयः ॥ (५५)

५० अकृतव्यूहाः पाणिनीयाः ॥ (५६)
५१ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥ (५७)
५२ क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ॥ (५८)
५३ पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥ (५९)
५४ मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ (६०)
५५ अनन्तरस्य विधिर्वा प्रतिषेधो वा ॥(६१)
५६ पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः ॥ (६२)
५७ ताच्छीलिकेषु वासरूपविधिर्नास्ति॥ ६७
५८ क्त्ल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ॥ (६८)
५९ लादेशेषु वासरूपविधिर्नास्ति ॥ (६९)
६० उभयनिर्देशे पञ्चमीनिर्देशो ॥ बलीयान् ॥ (७०)
६१ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ (७१)
६२ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ॥(७५)
६३ सांप्रतिकाभावे भूतपूर्वगतिः ॥ (७६)
६४ बहुव्रीहौ तद्गुणसंविज्ञानमपि॥ (७७)
६५ चानुकृष्टं नोत्तरत्र ॥ (७८)
६६ स्वरविधौ व्यञ्जनमविद्यमानवत्॥(७९)
६७ निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ (८१)
६८ क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ (८३)
६९ समासान्तविधिरनित्यः ॥ (८४)
७० संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ (८५)
७१ संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ॥ (८६)
७२ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते॥(८९)
७३ लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ॥ (९०)
७४ अन्नवृत्ते पुनर्वृत्तावविधिः ॥ (९२)
७५ संज्ञापूर्वको विधिरनित्यः ॥ (९३-१)
७६ आगमशास्त्रमनित्यम् ॥ (९३-२)
७७ गणकार्यमनित्यम् ॥ (९३-३)
७८ अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ॥ (९३-४)
७९ सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् ॥ (९३-७,८)
८० प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ (९३-९)
८१ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ (९४)
८२ अनन्त्यविकारे अन्त्यसदेशस्य॥ (९५)
८३ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे॥ (९६)
८४ विधिनियमसंभवे विधिरेव ज्यायान् ॥ (१००)
८५सामान्यातिदेशे विशेषानतिदेशः॥१०१
८६ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ (१०५)
८७ गामादाग्रहणेष्वविशेषः ॥ (१०६)
८८ पर्जन्यवल्लक्षणप्रवृत्तिः ॥ (१११)
८९ लक्ष्ये लक्षणं सकृदेव प्रवर्तते ॥
९० अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति ॥ (११३)
९१ ज्ञापकसिद्धं न सर्वत्र ॥ (११६)
९२ पूर्वत्रासिद्धीयमद्वित्वे ॥ (११७)
९३ क्वचिद् विकृतिः प्रकृतिं गृह्णाति ॥ (१२०-१)
९४ श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च । यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥ (१२०-३)
९५ अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः (१२२) इति ॥

इति श्रीपुरुषोत्तमदेवकृतः परिभाषापाठः समाप्तः ॥

श्रीसीरदेवकृता

बृहत्परिभाषावृत्तिः ।

१३

प्रथमाध्यायस्य प्रथमः पादः ।

स्फुरदभिनवरागा भास्कराभा प्रगल्भा
प्रसभशमितदोषा स्फीतसल्लोकचक्रा ।
विहितहितविचारा जाड्यजातोपशान्त्यै
प्रभवतु परिभाषावृत्तिरासेवितैषा ॥ १ ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ॥ १ ॥

व्याख्यानादाचार्यपारम्पर्योपदेशात्सन्देहेऽपि विशेषावगमो भवति। न तु लक्षणाभाव इति[1]। तेन 'षष्ठी स्थानेयोगा' (१।१।४९) इत्यस्य प्रत्याख्याने षष्ठीनिर्देशेष्वनेकसंबन्धसंभवेऽपि स्थानेयोगैव[2] भवति। तदुक्तं "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति। स्थानेयोगेति व्याख्यास्यामः" (महाभाष्य १।१।४९ वा. ४) इति॥ तथा चत्वार्यण्ग्रहणानि पूर्वेण णकारेण। "अणुदित्सवर्णस्य चाप्रत्ययः" (१।१।६९) इत्येकं परेण। इण्ग्रहणानि तु परेणैवेति॥

अत्र युक्तयोऽपि यथासंभवमभिधीयन्ते। तत्र "केऽणः" (७।४।१३) "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (६।३।१११) इत्यत्राण्ग्रहणसामर्थ्यादवसीयते पूर्वेणेति। यदि परेण स्यात् अचामेव ह्रस्वदीर्घाभ्यां भाव्यम्। एतच्च "अचश्च" (१।२।२८) इति परिभाषयैव सिद्धं तत्किमण्ग्रहणेनेति॥ सैषा युक्तिः शक्यते व्यभिचारयितुम्। अचश्चेत्येव सिद्धयोर्ह्रस्वदीर्घयोर्यदण्ग्रहणं[3] करोति तस्यैतदेव प्रयोजनमनचोऽप्यणो दीर्घह्रस्वौ यथा स्याताम्। अगीष्कः अधूष्कः श्वलिट्कः मधुलिट्कः वर्ढा वर्ढुमिति। एवं च क्वणित्यत्र यन्न्यासकृतोक्तं "के परे हलामणामसंभवात्" (न्यास पृ.२६, प.११) इत्यादि तथा "दीर्घश्रुत्याऽचश्चेति संनिधापितेऽच एव दीर्घत्वेन भवितव्यम्" (न्यास पृ. २६, प.७) इत्यादि तच्चिन्त्यम्॥

अत्र केचिच्चिन्तयन्ति। अगीष्क इत्यादौ विसर्जनीयादिषु कृतेषु हकारोऽण् रेफश्च नास्ति। न चास्त्यसिद्धत्वम्। "न मु ने" (८।२।३) इति योगविभागेन प्रतिषिद्धत्वात्। अनभिधानं तु न वक्तव्यम्। "रोः सुपि" (८।३।१६) इत्यत्र गीष्कादीनां न्यासे व्याख्यातत्वात्॥ दीर्घविधौ च वर्ढा वर्ढुमित्यादौ परेण णकारेण प्रत्याहारग्रह-

१ A. om. इति. २ A. C. स्थानेयोगैव. ३ A. सिद्धे योयं ह्रस्वदीर्घयोः॰ C. इत्येव सिद्धयोर्ह्रस्वदीर्घयोः.

णादनचोऽपि रेफस्य यद्दीर्घत्वमुक्तं तन्न । यद्येतत्प्रयोजनं स्यात् तदा हयवरट्टकारेण प्रत्याहारं कुर्यात् । ढ्रलोपे पूर्वस्य दीर्घोऽट इति । अथ वाऽस्तु वर्ढा वर्ढुमित्यादौ दीर्घ एव ॠकारः । तथापि कृते तस्मिन्नाद्गुणः (६।१।८७) इत्यकारॠकारयोर्गुणेनाकारे रेफपरत्वे[1] च कृते तदेव रूपं वर्ढा वर्ढुमिति । अतः "अचश्च" (१।२।२८) इति सिद्धे यदण्ग्रहणं तत्पूर्वेण णकारेण प्रत्याहारार्थम्[2] ॥

न च परेण णकारेण प्रत्याहारग्रहणे रेफस्य दीर्घवैयर्थ्यात्पुनराद्गुणबाधः कल्पनीयः । एवं हि सामर्थ्यद्वयं स्यात् । सवर्णविधौ परेण णकारेण प्रत्याहारग्रहणे "उॠत्" (७।४।७) इति तपरकरणं ज्ञापकम् । यदि तत्रापि पूर्वेण स्यात् एवं च सूत्रोपात्तस्य मात्रिकस्य स्थाने सूत्रोपात्ते ऋकारे विधीयमाने सावर्ण्याभावाद् द्विमात्रिकस्य प्राप्तिरेव नास्तीति तपरकरणमनर्थकं स्यात् । यत्तु लणित्यत्र[3] न्यासकृतोक्तं " दीर्घस्यापि स्थानिनो यथाश्रुतेन ह्रस्वेनैव भवितव्यमिति तपरकरणमनर्थकं स्याद् व्यावर्त्याभावात् " (न्यास पृ. २७ प. ७।८) इति तत्र[4] द्विमात्रिकस्य स्थानित्वं यदुक्तं तदसङ्गतम् । आदेशवत्स्थानिनोऽपि द्विमात्रस्याभावात् । अथ जातौ द्विमात्रस्य स्थानित्वमिति चेन्न । एवमादेशेऽपि द्विमात्रत्वप्रसङ्गः । अथ स्थानिनं प्रति जातिरादेशं प्रति व्यक्तिरेतच्च न हृदयग्राहि । एवं तर्हि ऋकारॠकारयोः समाहारद्वन्द्वैकत्वेन नपुंसकह्रस्वत्वेन च " उॠत् " (७।४।७) इति निर्देशे दीर्घस्यापि स्थानित्वम् । नुमभावस्त्वागमशासनस्यानित्यत्वात् । इदमप्ययुक्तम् । व्यक्तिरेकेऽण्प्रत्याहारे ॠकारस्यानन्तर्भावात् सावर्ण्येन ऋकारेण ॠकारस्याग्रहणाद् ॠकारस्याच्त्वं नास्ति । अतोऽचो ह्रस्वत्वं विधीयमानमॄकारस्य कथं स्यात् । उच्यते । "ह्रस्वो नपुंसके प्रातिपदिकस्य " (१।२।४७) इत्यनेनाचो ह्रस्वत्वं विधीयते । अच्प्रत्याहारे च ऋकारोऽस्ति तत्र ऋकारेण ऋत्वजातेराश्रयणाद् द्विमात्रिकस्यापि ॠकारस्य ह्रस्वत्वेन भाव्यमेवेति युक्तं दीर्घस्यापि स्थानिन इत्यादि ॥

इयं परिभाषा "लण्" (माहेश्वरसूत्र ६) इत्यत्र भाष्यकारेण ज्ञापिता । तदुक्तम् । किं पुनरयं वर्णोत्सत्ताविव[5] णकारः सन्देहहेतुरनुबद्धोऽपि पुनरनुबध्यते[6] यस्मादनेनाण्ग्रहणेष्विण्ग्रहणेषु च संदेहः किं पूर्वेण परेण वेति । एवं तर्हि ज्ञापयत्याचार्यो भवत्येषा परिभाषा 'व्याख्यानतः०' इत्यादि (व्या. म. भा. १ पृ. ३५ प. १५,१६) ॥

कथं[7] पुनः विशेषप्रतिपत्तिरित्यत्र षष्ठीसमासः । यावता " कर्मणि च " (२।२।१४) इति प्रतिषेधेन भाव्यम् । न च " कृद्योगलक्षणा षष्ठी समस्यते " (२।२।८ वा.१) इत्यनेन समासः शक्यते कर्तुम् । तद्विषये एव " कर्मणि च " (२।२।१४)

---

१ A. रपरे च. B. रेफपरत्वे च. २ After प्रत्याहारार्थम्, A. adds न च भाव्यमानत्वात्सवर्णग्रहणाप्रसक्तेस्तद्वैयर्थ्यम् । तपरत्वाभावे आदेशान्तरनिवर्तकत्वेन स्वरूपाभ्यनुज्ञानार्थत्वेन अपूर्वबोधकत्वाभावेन च अविधेयत्वात् । कृते तु तपरत्वे भाव्यमानतापीत्यन्यदेतत् । ३ A B यच्च लण् इत्यत्र. ४ A तत्र हि. ५ A B C वर्णोच्छ्रित्ताविव. ६ A णकारो द्विरनुबध्यते । एवं तर्हि. ७ AC अथ कथं for कथं पुनः

इत्यस्यारम्भात् । उच्यते । "कर्माणि च" (२।२।१४) इत्यनेन "उभयप्राप्तौ कर्मणि च" (२।३।६६) इत्यनेन नियमेन या षष्ठी तस्या एव समासप्रतिषेधो विधीयेते[1] । अत्र चार्थे "कर्तरि च" (२।२।१६) इति सूत्रं प्रमाणम् । अन्यथा अपां स्रष्टा ओदनस्य भोजकः इत्यादौ "कर्माणि च" (२।२।१४) इत्यनेनैव प्रतिषेधस्य सिद्धत्वात् कर्तरि चेत्यनर्थकं स्यात् । न च प्रैष्यस्य हारयिता प्रैष्यस्य कारयिता इत्यत्र "हृक्रोरन्यतरस्याम्" (१।४।५३) इति कर्तरि षष्ठीसमासप्रतिषेधार्थमिदमिति[2] । "तृजकाभ्यां कर्तरि" (२।२।१५) इत्यनेनैव तत्सिद्धेः । यत्तु तृजकाभ्यां कर्तरीत्यत्र वृत्तावुक्तं तृज्ग्रहणमुत्तरार्थमिति तत्कर्तरि चेति सूत्रे स्थिते इति । अण्यन्तापेक्षयोक्तमुत्तरार्थमित्येके । उभयप्राप्ताविति नियमेन च षष्ठी "षष्ठी हेतुप्रयोगे" (२।३।२६) इत्यतः प्रयोगग्रहणानुवृत्तेर्यत्र सामर्थ्यप्राप्तं कर्तृकर्मणोरुभयोरुपादानं तत्रैव यथा स्यात् । यथा आश्चर्यो गवां दोहोऽगोपालकेनेति[3] । तथा ह्यत्राश्चर्यं प्रतिपाद्यं तच्च दुर्दोहानां गवां कर्मणामसुशिक्षितस्यागोपालकस्य च कर्तुः सामर्थ्यप्राप्ते उपादाने षष्ठी भवति नान्यथा । विशेषप्रतिपत्तिरित्यत्र तु शिष्यादेः कर्तुरकिंचित्करत्वान्न सामर्थ्यप्राप्तं कर्तुरुपादानम् । एवं च सति "अन्तर्धौ येनादर्शनमिच्छति" (१।४।२८) इत्यत्र येनेति तृतीया न युक्ता । "कर्तृकर्मणोः कृति" (२।३।६५) इति कर्तरि षष्ठीविधानात् । उच्यते । निर्देशादेव तृतीयेत्यदोषः ॥ अन्यस्त्वाचष्टे । गम्यमानेऽपि कर्मणि उभयप्राप्ताविति नियमो भवत्येव । तथा[4] च "अन्तर्धौ येनादर्शनमिच्छति" (१।४।२८) इत्यत्र न्यासकृता (न्यास पृ.२८३ प. ११) "उभयप्राप्तौ कर्मणि" (२।३।६६) इत्यत्र रक्षितेन च गम्यमानेऽपि कर्मणि नियमात्षष्ठ्यभावेन अन्तर्धौ येनेति निर्देशसिद्धिरुक्ता ॥

किं त्वेवमइउणित्यत्र तस्य ग्रहणं भवत्येकेनेति तत्र तस्येति कर्त्तरि षष्ठीति न्यासे यदुक्तं तन्न शोभनम् । तथा ह्यत्रापि गम्यमाने ग्राह्ये कर्मणि उभयप्राप्ताविति नियमात्षष्ठ्या न भवितव्यम् । एतच्च शब्दानुशासनप्रस्तावे न्यासकृता व्याख्यातम् । यत्तु तत्र स्वमतिमहिमप्रागल्भ्यादनुन्यासकारो व्याजहार । यत्र सामर्थ्यप्राप्तमुभयोरुपादानं स उभयप्राप्तौ कर्मणीत्यस्य विषयः । अन्यथा कर्तृकर्मणोः कृतीत्यस्य विधेरुभयप्राप्तावित्यादेश्च विषयविभागो न स्यात् । न चाकर्तृकं कर्मास्तीति न्यायादिति । तदयुक्तम् । पुरां भेत्ता देवदत्त इत्यादौ अभिहिते कर्तरि नियमाप्रसङ्गात् । अत्रोच्यते । "षष्ठी[5] हेतुप्रयोगे" (२।३।२६) इत्यतोऽनुवर्त्तमानमपि प्रयोगग्रहणमनङ्गीकृत्य यथा युष्माभिर्गम्यमाने कर्मणि उभयप्राप्ताविति नियम उच्यते तथाऽस्माभिरप्यनभिहिताधिकारमनङ्गीकृत्य विभागाभाव उक्तः । एतच्चायुक्तम् । "अकाकारयोः प्रतिषेधो वक्तव्यः" (२।३।६६ वा. १) इत्यनेन यत्र नियमो बाध्यते तत्र विधेः कृतार्थत्वात् । चिकीर्षा रवैराघोकानामिति । तथा कार्यः कटो देवदत्तस्येत्यत्राभिहिते कर्मणि षष्ठीप्रसङ्गाच्च ।

---

१ A B विज्ञायते. २ B प्रतिषेधार्थमिदमिति वाच्यम् C प्रतिषेधार्थं तत्. ३ A दोहोऽगोपेनेति C दोहोऽगोपकेन. ४ A यथा for तथा च. ५ A कृत्वोऽर्थप्रयोगे for षष्ठी हेतुप्रयोगे.

उच्यते । कर्तृकर्मणोः कृतीत्यस्य विधेरुभयप्राप्तावित्यादेश्च विधेरिति नैते समानाधिकरण-षष्ठ्यौ किं तर्हि वैयधिकरण्ये । तदयमर्थः । कर्तृकर्मणोः कृतीत्यस्य संबन्धी यो विधिः "कर्तरि च" (२।२।१६) इति, तयोभयप्राप्तौ कर्मणीत्यस्य यो विधिः "कर्मणि च" (२।२।१४) इति एतयोर्विषयविभागो न स्यादित्ययमभिप्रायः । यदि गम्यमानेऽपि कर्तरि उभयप्राप्ताविति कर्मणि नियमः स्यात् तदा इध्मव्रश्चन इत्यादावपि करणे ल्युटि कर्मणि चेति निषेधः स्यात । कर्तृल्युट्यपि इध्मप्रव्रश्चनो देवदत्तः इत्यत्रापि आत्मना देव-दत्तेनेत्यस्य कर्तुर्गम्यमानत्वादुभयप्राप्तिरव्याहतैव । एवं च कर्मणि या का चित्षष्ठी तस्या एव सर्वस्याः "कर्मणि च" (२।२।१४) इत्यनेन समासप्रतिषेधे[1] सिद्धे "कर्तरि च" (२।२।१६) इत्यनारम्भणीयं स्यात । आरब्धं च। अतो युक्तमुक्तं विषयविभागो न स्यादिति । एतच्च न । आत्मनेत्यस्य कर्तुर्गम्यमानत्वे प्रमाणाभावात । एवं तर्हि पुरां भेत्ता देवदत्तः इत्यादौ यथा कर्तुरभिहितत्वान्नियमो न भवति तथा शब्दानुशासनमित्यत्रापि कर्तुरप्रयोगात् । तत्र यथा कर्तृषष्ठीप्राप्त्या विनापि गम्यमाने कर्तरि नियम उच्यते तथाभिहितेऽपि कर्तरि नियममुक्त्वा विषयविभाग उक्तः । एवं च विधिनियमवाक्ययोरेव विषयविभागाभावः । एतच्चाकाकारयोः प्रयोगे विधेः कृतार्थत्वानाश्रयणेनोच्यते ॥ १ ॥

न हि कार्यी निमित्तत्वेनाश्रीयते ॥ २ ॥

यत्कार्यभाक् तत्कार्यं प्रति निमित्तं न भवतीत्यर्थः । तेनाध्येता अध्यायकः शयिता शायक इत्यत्र इक्ङीङोर्ङित्वात्[2] "क्ङिति च" (१।१।५) इति गुणवृद्धि-प्रतिषेधो न भवति । तथाऽरिरिषतीत्यत्र "द्विर्वचनेऽचि" (१।१।५९) इति स्थानिवद्भावो न भवति । यदि स्यात् इशो द्विर्वचने कृतेऽरीषतीति स्यात् ॥

ज्ञापकं चात्र "दीधीवेवीटाम्" (१।१।६) इत्यत्र ङितोरपि दीधीङ्वेवी-ङोर्गुणवृद्धिप्रतिषेधार्थमुपादानम् । न च "क्ङिति च (१।१।५) इत्यनेन इग्लक्षणाया एव वृद्धेः प्रतिषेधः क्रियते, अतोऽञ्लक्षणाया[3] अपि वृद्धेः प्रतिषेधार्थं दीधीवेव्योरुभयो-रुपादानं स्यादिति वाच्यम् । "इन्धिभवतिभ्यां च" (१।२।६) इत्यत्र भवतिग्र-हणेनाजल्लक्षणाया अपि वृद्धेः प्रतिषेधो भवतीत्यस्यार्थस्य ज्ञापितत्वात । ननु च भाष्ये वुको नित्यत्वादिन्धेश्छान्दसत्वादिन्धिभवतिभ्यां चेति सूत्रं प्रत्याख्यातं तथा दीधीवेवीटामि-त्यपि । यदाह दीधीवेव्योर्ग्रहणमनर्थकं अनयोश्छान्दसत्वात् । अदीधेत्[4] अदीधेतां अदीधयु-रित्यत्र गुणदर्शनाच्च । इटश्चापि ग्रहणमनर्थकं "नेड्वशि कृति" (७।२।८) इत्यत इड्ग्रह-णानुवृत्तौ "आर्द्धधातुकस्येड्वलादेः" (७।२।३५) इत्यत्र यदिड्ग्रहणं तदिटो विकारा-भावार्थम् । ततो लघूपधगुणाभावात् सिद्धं कणिता श्वो रणिता श्व इति । न चैवं पिपठीरपाठीदित्यादावपि दीर्घत्वं न स्यादिति वक्तव्यम । यतः समानजातीयतयाङ्गकार्यमेव व्यावर्त्यति । ग्रहीतेत्यत्र तु "ग्रहोऽलिटि॰" (७।२।३७) इत्यादिसूत्रारम्भाद् दीर्घत्वम् ।

१ A निषेधे for प्रतिषेधे. २ A इक्शीङोः ङित्वात् P. इक्शीङोर्ङित्वात्. ३ A अनिग्लक्षणायाः ४ B P. आदीधेत् आदीधयुः इत्यत्र.

तर्हि विपठीषि ब्राह्मणकुलानीत्यत्र "सान्तमहतः संयोगस्य" (६।४।१०) इति दीर्घत्वं न स्यादिति चेन्न। नुमेवात्र नास्ति नुमि कर्तव्येऽल्लोपस्य स्थानिवत्त्वेनाझलन्तत्वात्। न च कौ लुप्ते न स्थानिवदित्यस्ति। कौ विधिं प्रति न स्थानिवदितीदं वार्तिकमिति कैयटेन व्याख्यातम्। एवं च कौ नात्र नुम् अपि तु सर्वनामस्थाने। वामनस्तु कौ लुप्त इत्येव मन्यते। तथा च "मपर्यन्तस्य" (७।२।९१) इत्यत्र तेन परिग्रहणं वर्जनीयार्थमित्युक्तम्। तेन यत्रैव वर्जनीयमस्ति तत्रैवादेश इति। तेन युष्मदस्मदोर्णिचि टिलोपः। युष्मयतेः क्विप् ततः स्वादयः। अत्र वर्जनीयाभावादादेशा न भवन्ति। न चास्ति णिलोपस्य स्थानिवत्त्वम्। कौ लुप्ते न स्थानिवदिति वचनात्। तदेवं स्थितमेतत्। भा[1]ष्यमते न हि कार्यीत्यस्या लिङ्गं नास्ति। "स्थण्डिलाच्छयितरि०" (४।२।१५) इत्यत्र शयितरीति निर्देशोऽस्या लिङ्गं कुटादिषु कुङ् शब्दे इत्यस्य पाठो वा ॥

अन्ये तु व्याचक्षते। इग्लक्षणवृद्धिप्रतिषेधस्तावत् क्ङित्प्रत्ययनिमित्तक एव संभवति न तु क्ङिद्धातुनिमित्तकः। अतो मृष्टः मृष्टवान् न्यनुवीत् न्यधुवीत् इत्यादौ क्ङिन्निमित्तकप्रत्यय एव परतो वृद्धिप्रतिषेधस्तत्साहचर्याद् गुणप्रतिषेधोऽपि भूयते बोभूयते इत्यादौ क्ङिन्निमित्तकप्रत्यय एव कर्तव्यः। अत एवाध्येता शयितेत्यत्र क्ङिद्धातुनिमित्तकेन प्रतिषेधेन न भवितव्यम्। अरिरिषतीत्यत्रापि "द्विर्वचनेचि" (१।१।५९) इत्यजादेशं प्रति निमित्तभावोऽकार्यित्वेनैव नियतः। तदेवमजादेशसंबन्धेऽचीत्यस्याकार्यित्वं तत्साहचर्याद् द्विर्वचनविधानेऽपि य[2]द्यकार्यित्वमेवाचीत्यस्य तदा स्थानिवत्त्वं यथा चक्रतुरिति। अरिरिषतीत्यत्र तु द्वितीयस्यैकाचो द्विर्वचनादिकारस्य द्विर्वचनभाक्त्वमिति द्विर्वचनविधानेऽचीत्यस्य कार्यित्वं न पुनरकार्यित्वमिति। तस्मात्परिभाषा प्रयोजनाभावान्न स्वीकर्तव्या। युक्तं चैतत्। अन्यथा अस्यां सत्यां प्रोर्णुनविषतीत्यत्र गुणावादेशयोः कृतयोर्द्विर्वचनेऽचीति स्थानिवत्त्वं न स्यात्। सन्नन्तस्य कार्यित्वात्। तथा द्विर्वचनेऽचीत्यत्राचीति किमित्युक्त्वा जेघ्रीयते देध्मीयते इति यत्प्रत्युदाहृतं तन्नोपपद्यते। दृष्टान्तवैकल्यात्। यथैव यङ् अजादिर्न भवति तथा द्विर्वचननिमित्तमपीति। तत्र तर्हीदं वक्तव्यम्। कार्यमनुभवन्नेव का[3]र्यं निमित्तत्वेन नाश्रीयते। जेघ्रीयत इत्यत्र का[4]र्यमननुभवन् निमित्तत्वेनाश्रीयते। अन्यस्तु ना[5]श्रीयत एव। तथा हि। अरिरिषतीत्यत्र स्थानिवत्त्वेन इसो द्विर्वचनप्रसङ्गादजादेरेव सनः कार्यित्वं निमित्तत्वं च। प्रोर्णुनविषतीत्यत्र तु अजादेः सनो निमित्तत्वं, कार्यित्वं च धातोर्नुश[6]ब्दस्यैव। तस्यैव द्विर्वचनविधानात्। अतोऽत्र सनः साक्षात् कार्यित्वं नास्तीति युक्तमेव निमित्तत्वेनाश्रयणमिति। एवमपि शाधीत्यत्र "शा हौ" (६।४।३५) इत्यस्य शादेशस्य धिभावं प्रति समानाश्रये ह्यावसिद्धत्वं न स्यादिति। धिभावस्य स्थानिनो हिशब्दस्यानिमित्तत्वेन समाननिमित्तत्वाभावात्। तत्र वक्तव्यं, प्रायिकमेतत्। लक्ष्यवशात् क्वचिदाश्रीयते ॥ २ ॥

---

१ A भाष्यमतेन हि कार्यनिमित्तत्वेनाश्रीयते इत्यस्या लिङ्गं नास्ति। २ A यद्यपि कार्यित्वमेवाचीत्यस्य. ३ A कार्यनिमित्तत्वेनाश्रीयते. ४ A कार्यमनुभवन्. ५ P. नाश्रित एव ६ A नुशब्दस्य तस्यैव द्विर्वचन०.

इतरेतराश्रयाण्यपि कार्याणि शास्त्रे प्रकल्पन्ते ॥ ३ ॥

इतरेतराश्रयाणि कार्याणि विरोधान्न प्रवर्त्तन्त इति न्यायः। यदुक्तमितरेतराश्रयत्वादप्रसिद्धिरिति । तदपवादोऽयमारभ्यते । अपिशब्दः कचिदर्थे । तदयमर्थः । कचिदितरेतराश्रयाणि प्रवर्तन्त इति । यथा वनसिंहयोः परस्पराश्रयापि रक्षा प्रवर्तते तथा शास्त्रे गार्गीय इत्यादौ वृद्धिसंज्ञया भावितस्यापि वृद्धिसंज्ञाप्रक्लृप्तिः अन्यथा शालाैनौप्रभृतिषु सावकाशा वृद्धिसंज्ञा इतरेतराश्रयत्वान्न स्यात ॥

ज्ञापकं चात्र " इग्यणः संप्रसारणम् " (१।१।४५) इत्यत्र संप्रसारणेन यणः स्थाने इको भाष्यन्ते । यण्स्थानिकानां चेकां संप्रसारणसंज्ञेति इतरेतराश्रयत्वम् । कथमेतदन्यथा प्रकल्पते । यदीतरेतराश्रयत्वं कचिन्न स्यादिति । भागवृत्तिकारस्त्वाह । नित्यशब्दानामन्वाख्यानमात्रमिदमिति ततो नेतरेतराश्रयदोषः। यदुक्तं सर्वाणीतरेतराश्रयाणि भाष्ये परिहृतानि सिद्धं तु नित्यशब्दत्वादितीति । अथैतत्स्यात् यणः स्थाने इग्विधीयते स्थान्यादेशभावश्च पौरुषेयः तत्कुतो नित्यत्वमिति । नैष दोषः । लोके हि इष्टं यष्टेत्यादयो नित्याः । तत्र यजेरर्थे इजिर्विशिष्टविषये साधुरित्येतावति पुरुषाश्रयत्वम् । स्वभावत एव यजेः स्थाने इजिसिद्धिः ॥ ३ ॥

आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ ४ ॥

" आद्यन्तौ टकितौ " (१।१।४६) इत्यत्राद्यन्तशब्दयोरवयववचनत्वात् टित्कितोरागमयोराद्यन्तावयवत्वमतिदिष्टम् । "मिदचोऽन्त्यात्परः" (१।१।४७) इत्यत्रापि अन्तग्रहणानुवृत्त्या मितोऽप्यन्तावयवत्वम् । अवयवाश्चावयविग्रहणेन गृह्यन्ते इत्युक्तम् । अतः सिद्धेयं परिभाषा आगमास्तद्गुणीभूता इति ॥

सुखप्रतिपत्त्यर्थं च ज्ञापकमपि केचिदाहुः । " णेरनिटि " (६।४।५१) इत्यत्रानिटीति प्रतिषेधः । यद्यागमिग्रहणेनागमो न गृह्येत तदा कारयितव्यमित्यादौ इटा व्यवहितत्वादेव णिलोपो न प्राप्नोतीति किमनिटीत्यनेनेति ज्ञापकम् । तेन सर्वेषामित्यत्र सुटः सुप्ग्रहणेन ग्रहणाज्झलादौ सुपि एत्वं सिध्यति ॥

ननु अस्यां सत्यां चिच्छिदतुः चिच्छिदुः इत्यादौ हलादिःशेषेण तुको निवृत्तिः प्राप्नोति । उच्यते । " हलादिः शेषः " (७।४।६०) इत्यत्राटतुराटुरित्यादिसिद्ध्यर्थं जातिपक्ष आश्रितः । तत्र चैकमेवेदं लक्षणं सकृदेव पपाठेत्यादौ अनादेर्हलो निवृत्तिं करोति। तदेवं चिच्छिदतुरित्यादौ हलादिःशेषानन्तरं यस्तुक् तस्य निवृत्तिर्न प्राप्नोति । लक्षणाभावात् । अवश्यं चैतत् । अन्यथाऽजादेर्द्वितीयस्येत्यत्र भाष्यकारेण च मैत्रेयेण च यदुदाहृतम् ' ओणेरुवोणिषतीति स्यादिति सावकाशमेव द्वितीयद्विर्वचनम् ' इति तदसङ्गतं स्यात । हलादिःशेषेण वकारलोपप्रसङ्गात् । यद्येवं ववृते इत्यादौ उरत्वे रपरत्वे च कृते

---

१ D प्रवर्तन्ते. २ A गार्ङ्गीयः for गार्गीयः. ३ A प्रकल्प्यते. ४ D यदागमाः. ५ A ज्ञापकमस्ति । केचिदाहुः णेरानिटि० ६ A तस्यानिवृत्तिः ७ A उरदत्वे.

रेफस्य लोपो न स्यात । उच्यते ।"हलादिः शेषः" (७।४।६०) इत्यत्र "उरत्"(७।४।६६) इत्यनुवार्तिष्यते । तेन उरादिति कृते रेफस्य निवृत्तिर्भविष्यति । एवं तर्हि उच्छेरौच्चिच्छदित्यत्र तुकि कृते हलादिःशेषेण तस्य निवृत्तिः स्यादेव । उच्यते । "छे च" (६।१।७३) इत्यत्र ह्रस्वग्रहणेऽनुवर्तमाने पुनर्यच्चकारेण तस्यानुवर्त्तनं तत्सामर्थ्यात् ह्रस्व आगमी स्वीक्रियते न तु ह्रस्वान्तः समुदायः । एवं चाभ्यासावयवस्यैव भक्तस्तुक् क्रियते । तत्सामर्थ्यादिह्यावयवावयवोऽपि अवयविग्रहणेन न गृह्यते । अन्यत्र तु गृह्यत एव । अत एव शेरत इत्यत्रावयवावयवः समुदायावयवो भवतीत्युक्त्वा "शीङो रुट्" (७।१।६) इत्यत्र "शीङः सार्वधातुके" (७।४।२१) गुण उक्तः । एवं तु शोभनच्छाय इत्यत्र तुका उत्तरपदस्य व्यवधानात्पुंवद्भावो न स्यादिति दूषणम् । उच्यते । ह्रस्वं प्रतीदं ज्ञापकं " पदान्ताद्वा " (६।१।७६) इत्यत्र तु नास्ति । दधि च्छादयतीत्यत्र स्वरविधौ व्यञ्जनमविद्यमानवदिति " तिङ्ङतिङः " (८।१।२८) इति निघातः शक्यते कर्तुम् । अस्यां सत्यां " प्रातिपदिकान्तनुम्विभक्तिषु च " (८।४।११) इत्यत्र नुम्ग्रहणस्य प्रयोजनं न दृश्यते । भर्तृहरिणा तूक्तम्—यः प्रातिपदिकान्तो नकारो न भवति तदर्थं नुम्ग्रहणं प्राहिण्वदिति । अत्र हि हिवेर्लङि नुमो णत्वमिति । तत्र च पूर्वपदाधिकारः । समासे च पूर्वोत्तरपदव्यवहारः । तत्कथमिह णत्वमिति न व्यक्तीकृतमिति भागवृत्तिकृतोक्तम् । यद्येवं प्राहिण्वन्नित्येतदर्थं तर्हि नुम्ग्रहणं स्यात् । उच्यते । अल्पाच्तरमित्यनेन "प्रातिपदिकान्त०" इत्यादौ नुमः पूर्वनिपाते कर्तव्ये यत्प्रातिपदिकविभक्तिमध्यस्थं नुम्ग्रहणं करोति तदेवं बोधयति योऽनयोरेव मध्यस्थो नुम्नकारस्तस्य णत्वं भवतीति । " अट्कुप्वाङ्नुम्व्यवायेपि " (८।४।२) इत्यत्र भागवृत्तिकृता प्रतिपादितं नुमः पूर्वनिपातलक्षणव्यभिचारचिह्नात् प्रेन्वनमित्यत्र णत्वाभावः क्षुभ्नादित्वाद्वा तेन सह समानम् । ननु मित्वान्नुमः पूर्वान्तत्वे निष्कौशाम्बिनी कुले इत्यत्र परत्वान्नुमि कृते नपुंसकह्रस्वत्वं न प्राप्नोति अजन्तत्वाभावात् । यथा सुवाक् ब्राह्मणकुलमिति । नैष दोषः । विभक्त्याश्रयणाद् बहिरङ्गो नुम् ह्रस्वत्वमन्तरङ्गं विभक्त्यनाश्रयत्वात् तत्प्रथमं भविष्यति । तदुक्तम् । न वा बहिरङ्गलक्षणत्वादिति ॥ ४ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ ५ ॥

षष्ठ्या निर्दिष्टस्य समुदायस्य तदेकदेशस्य वाऽऽदेशा भवन्ति । तद्यथा । " पादः पत् " (६।४। १३०) इति षष्ठ्या निर्दिष्टस्यैव पादः स्थाने पद्भवति द्विपदः पश्येति नाङ्गाधिकारपरिभाषया तदन्तस्य । तथा भवेतामित्यत्र तसः स्थाने तामादेशो भवति न सपासुटः । तदेकदेशस्य यथा । " उदः स्थास्तम्भोः पूर्वस्य " (८।४।६१) इति तिष्ठतेरादेशस्य पूर्वसवर्णो विधीयमान उदस्थादित्यत्राटो न भवति । तथा " ष्यङः सम्प्रसारणम् " (६।१।१३) इति ष्यङेकदेशस्य सम्प्रसारणे वाराहीपुत्र इत्यत्रानया रैफवकारयोः सम्प्रसारणाभावो व्याख्यातः ॥

---

१ A हलादिशेषेण. २ A om. न. ३ A युवादित्वात् for क्षुभ्नादित्वात्. ४ A द्विपादः for द्विपदः ५ P. तिष्ठतेरादिदेशस्य.

इयं परिभाषा "षष्ठी स्थानेयोगा" (१।१।४९) इत्यस्यार्थे पठ्यते। तथा हि तत्र [1]भाष्यम्। यद्यप्येकशतं षष्ठ्यर्थाः यावन्तस्ते तावन्तः षष्ठ्यामुच्चारितायां सर्वे प्राप्नुवन्ति अर्थाः। ये पुनः समीपान्तरविकाराद्याः। शब्दस्य तु कोऽन्यो भवितुमर्हति अन्यदतः स्थानात्। ननु शब्दस्याप्य[2]नन्तरादयः सम्बन्धाः सम्भवन्ति। अस्तेर्भूर्भवतीति सन्देहः किं स्थाने समीपे वा। तत्र समीपे न भविष्यति द्वयोरेकार्थयोरेकत्र प्रयोगानुपपत्तेः। किं च [3]सन्देहमात्रमेतत्। सर्वसन्देहेष्विदमुपतिष्ठते भवति हि व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति स्थाने इति व्याख्यास्यामः। न तर्हीदानीमयं योगो वक्तव्यः। वक्तव्यः। किं प्रयोजनम्। षष्ठ्यन्तं स्थाने यथा प्रसज्येत। यतः षष्ठी उच्चारिता तदेव [4]कार्योपयोगि यथा स्यात्। तदेतेनैतत्प्रतिपादितं निर्दिश्यमानस्यादेशा भवन्तीति। अस्यां सत्यां "शीङो रुट्" (७।१।६) इत्यत्र यन्न्यासकृतोक्तं यदि रुडागमो झकारस्यैव स्यात् तदाऽदादेशो झकारस्य न स्यात्। तस्यैव रुटः स्यात् आदेः परस्येति वचनात्। तथा "मपर्यन्तस्य" (७।२।९१) इत्यत्र यदुदाहृतं युवकामिति साकच्कस्य स्यादिति। एतदनपेक्ष्य तत्समाधेयम् ॥ ५ ॥

नानुबन्धकृतमनेकाल्त्वम् ॥ ६ ॥

अनुबन्धकृतमनेकाल्त्वं नाश्रीयते। तेन "अर्वणस्त्रसावनञः" (६।४।१२७) इति अर्वन्तौ अर्वन्त इत्यत्र त्रादेशोऽन्त्यस्यैव भवति न सर्वस्य। केचित्तु द्युभ्यां द्युभिरित्युदाहरन्ति। तन्न शोभनम्। "दिव उत्" (६।१।१३१) इत्यनेन उकारस्यैव विधानात्। तथा हि "तपरस्तत्कालस्य" (१।१।७०) इति उदित्येषा संज्ञा उकारमात्रस्यैव विधीयते। एवं च दिव उदित्यनेन उकार एव केवलो विधीयते न तूच्छब्दः। अवश्यं चैतत्। अन्यथा "अतो भिस ऐस्" (७।१।९) इत्यत्र का गतिः स्यात्। न ह्यत्रात आदेशो विधीयते किं तर्हि अत्संज्ञया अकारः संज्ञी निर्दिश्यते ॥

यत्तु "स्थाघ्वोरिच्च" (१।२।१७) इत्यत्रोक्तं "इच्च कस्य तकारेत्त्वम्" इति तत्प्रातिपादकैकदेशानां प्रतिपाद्यैकदेशत्वमभ्युपगम्य। तन्मतेनैव "तित्स्वरितम्" (६।१।१८५) इत्यत्र तिदिति प्रत्ययग्रहणमिति भाष्ये उक्तम्। "तपरस्तत्कालस्य" (१।१।७०) इत्यत्र तु वर्ण एव संज्ञीत्युक्तं न पुनस्तपरः समुदायः। युक्तं चैतत्। अन्यथा तपरस्तत्कालस्येत्यत्र स्वंग्रहणानुवृत्त्या भवद्भिरित्यत्राप्यैस् स्यात्। इयं च परिभाषा अनुबन्धा अवयवा इत्यत्र पक्षे ॥

ज्ञापकं चात्र "अनेकाल्शित्सर्वस्य" (१।१।५५) इत्यत्र शिद्ग्रहणम्। यद्यनुबन्धेनाप्यनेकाल्त्वं स्यात् तदा [5]सैर्वे इत्यादौ शीभावस्यानेकाल्त्वादेव सर्वादेशे जसः सिद्धे शिद्ग्रहणमनर्थकं स्यात। ननु "ध्वसोरेद्धावभ्यासलोपश्च" (६।४।११९) इति

---

१ A महाभाष्यम् for भाष्यम्. २ A अन्तरादयः शब्दाः संभवन्ति. ३ A संदेहमात्रपरमेतत्. ४ A कार्ययोगि. ५ A सर्वके इत्यादौ.

"लोपः शिद्वक्तव्यः" इति यः शिदभ्युपगम्यते तत्र सर्वादेशार्थं शिद्ग्रहणं स्यात् देहि धेहीति सर्वस्यैव लोपो भवति । उच्यते । यदेतल्लोपस्य शित्त्वमाश्रितं तत्सामर्थ्यादेव सर्वादेशो भविष्यति । अथ वा "लोपः शिद्वक्तव्यः" इति नाश्रयणीयम् । नानर्थकेऽलोन्त्यविधिरिति सर्वस्यैव लोपो भविष्यति । यत्तूच्यते तत्रानभ्यासविकारेष्विति तल्लक्ष्यस्थित्या न सर्वत्रेति॥

ननु यदि इयं परिभाषाऽस्ति णल् तर्हि सर्वादेशो न प्राप्नोति । उच्यते । आनुपूर्व्यात् सिद्धमिदम् । तथा हि । सर्वादेशे सति णलो णकारस्योपदेशे प्रत्ययादित्वमिति ततः "चुटू" (१।३।७) इतीत्संज्ञा ततस्तस्यानुबन्धत्वम्‌। तदेवं सर्वादेशपूर्वकमनुबन्धत्वं सर्वादिशतां विहन्तुं न क्षमते सर्वादेशतायाः पूर्वमेव निष्पन्नत्वात् ॥ ६ ॥

वै[1]र्णाश्रये प्रत्ययलक्षणं नास्ति ॥ ७ ॥

वर्णाश्रये विधौ प्रत्ययलक्षणं न भवति । तेन गवे हितं गोहितं, रायः कुलं रैकुलमित्यत्र प्रत्ययलक्षणेनाचीति अवायादेशौ न भवतः । लवणा यवागूरित्यत्र "लवणाल्लुक्" (४।४।२४) इति ठको लुकि कृते प्रत्ययलक्षणेन ठँ[2]गन्तात् "टिड्ढाणञ्०" (४।१।१५) इति ङीब् नै[3] भवति । ङीपो वै[4]र्णाश्रयत्वं यथा स्यादित्येवमर्थमकारस्तत्रानुवृत्तष्टिदादिभिर्विशेष्यते न त्वकारेण टिदादयः । अत एव करप्ल्युनामिति षष्ठ्या निर्देशः कृतः ॥ अयं चार्थः "प्रत्ययलोपे प्रत्ययलक्षणम्" (१।१।६२) इत्यत्र द्वितीयेन प्रत्ययग्रहणेन साधितः । तथाहि तत्रोक्तम् । तल्लक्षणमिति वक्तव्ये प्रत्ययलक्षणमित्यत्र यत्पुनः प्रत्ययग्रहणं प्रत्ययाश्रितमेव कार्यं प्रत्ययलक्षणेन यथा स्यात् । यथा "सुप्तिङन्तं पदम्" (१।४।१४) इति, अँ[5]चीत्येतद्वर्णमात्राश्रितं मा भूदिति । ज्ञापकं चात्र "०श्रवणाकार्तिकीचैत्रीभ्यः" (४।२।२३) इति श्रवणेति टाबन्तो निर्देशः ॥

ननु यदि वर्णाश्रये प्रत्ययलक्षणं नास्ति तर्हि अतृणेट् इत्यत्र "तृणह इम्" (७।३।९२) इति इम् न प्राप्नोति इमागमस्य हल्वर्णाश्रयत्वात् । उच्यते । नायं वर्णाश्रयोऽपि त्वङ्गाधिकारेण प्रत्ययाक्षेपाद्धलादिप्रत्ययाश्रयः ॥ एँ[6]तेनैतदुक्तं भवति–प्रत्यये द्विविधं कार्यं प्रत्ययानिमित्तमप्रत्ययानिमित्तं च । तत्र प्रत्यय-निमित्तं यत्तदेव प्रत्ययलोपलक्षणेन यथा स्यादितरन्मा भूदित्येवमर्थं प्रत्ययलोपे प्रत्ययलक्षणमित्यत्र द्वितीयं प्रत्ययग्रहणम् । तेन 'एचोऽयवायावः' (६।१।७८) इँ[7]त्यवादेर्वर्णाश्रयत्वात्परिभाषया खण्ड्यते इमागमस्तु प्रत्ययनिमित्त एव । अङ्गाधिकारेण प्रत्ययाक्षेपात्तद्भवने को विरोधः । न चैवं श्रियै इदं श्र्यर्थमित्यत्राजादिप्रत्यये इयङ्ङाशङ्कनीयः । "न धातुलोप आर्धधातुके" ... "इग्लक्षणा" —

"न ङमताङ्गस्य" (१।१।६३) इति प्रतिषेधात् । यत्तु "शास इदङ्हलोः" (६।४।३४) इत्यत्रास्याः प्रायिकत्वमुक्त्वा न्यासकारेणातृणेट् इत्यत्र वर्णाश्रयेऽपीमागमो भवतीत्युक्तं तँ[8]दुपायान्तरम् ॥

---

१ D वर्णाश्रये नास्ति प्रत्ययलक्षणम्. २ B अङ्गत्वात् for ठगन्तात्. ३ B om. न. ४ P वर्णमात्राश्रयत्वं. ५ B अशीत्यादि वर्णाश्रितं C अचीत्यादि. ६ A तदुक्तं भवति P एतदुक्तं भवति. ७ B इत्येवं for इत्यवादेः. ८ B om. तदुपायान्तरम्.

ननु[1] गोहितमित्यादौ लुको विधानं न तु लोपस्य । तदेवं प्रत्ययलक्षणस्य प्रसङ्ग एव नास्ति तत्किं परिभाषाश्रयणेन । उच्यते । लुक्यपि प्रत्ययलक्षणं भवति लोपस्यादर्शनार्थत्वात् । प्रमाणं[2] चात्र न लुमताङ्गस्येति प्रतिषेधः ॥ ७ ॥

क्वचिदेकदेशोऽप्यनुवर्तते ॥ ८ ॥

स्वरितत्वबलेन क्वचित्सूत्रैकदेशः पदैकदेशोऽप्यनुवर्तते । तेन " दामहायनान्ताच्च " (४।१।२७) इत्यत्र " संख्याव्ययादेः " इत्यतः संख्यादिग्रहणमात्रमनुवर्तते । तथा " झोन्तः " (७।१।३) इत्यत्रायन्नादिसूत्रादादिग्रहणनिवृत्तावपि प्रत्ययग्रहणमनुवर्तते ॥

ज्ञापकं चात्र "तस्मिन्निति निर्दिष्टे पूर्वस्य" (१।१।६६) इत्यत इतिशब्दे प्रकृते "तस्मादित्युत्तरस्य" (१।१।६७) इति पुनरितिशब्दः । यदि हि सहैव पदानामनुवृत्तिः स्यात् तदा निर्दिष्टग्रहणवदितिशब्दोऽप्यनुवर्त्तिष्यते पूर्वसूत्रात् । तत्किमितिकरणेन । तत्कुर्वन्नाचार्यो ज्ञापयति क्वचिदेकदेशोऽप्यनुवर्तत इति । एवं हि सति निर्दिष्टग्रहणमेव केवलमनुवर्तते नेतिकरणमिति ॥ ८ ॥

अर्थवद्ग्रहणे नानर्थकस्य ॥ ९ ॥[3]

अर्थवदनर्थकविचारे अर्थवत एव शब्दस्य ग्रहणं नानर्थकस्य । तेन " वनो र च " (४।१।७) इत्यनेन क्वनिब्वनिपोः कर्तृरूपेणार्थेन[4] सार्थकयोरेव वनो रेफादेशो भवति धीवरी पीवरीति । न निरर्थकस्य अतिशुनी अतियूनीति । तथा "इन्हन्पूषार्यम्णाम्०" (६।४।१२) इत्यादौ क्विबन्तस्यैवार्थवतो हन्तेर्ग्रहणम् । तेन प्लीहानौ प्लीहान इत्यत्रापि नियमेन दीर्घव्यावृत्तिर्न भवति । ननु कथमतिशुनीत्यादौ वन्[5]शब्दस्यानर्थकत्वमुक्तं यावता स्वरूपेणार्थेनार्थवत्ताऽस्त्येव । यथा " वृद्धिरादैच् " (१।१।१) इत्यत्रोक्तम् । संज्ञासंज्ञिसम्बन्धारप्राग्वृद्धिशब्दस्य स्वरूपेणार्थेनार्थवत्त्वात् प्रातिपदिकत्वम् । तथा चाहुः ।

" यस्मिन्नुच्चारिते[6] शब्दे यदा[7] योऽर्थः प्रतीयते ।
तमाहुरर्थं शब्दस्य नान्यदर्थस्य लक्षणम् ॥ "

इति । यो हि स्वरूपपरः प्रयुज्यते तस्य स्वरूपमेवार्थः तत्परत्वात्तस्य । न चातिशुनीत्यादौ वनादयो वर्णसमुदायाः स्वरूपपराः । अतिशुन्यादिसमुदायसंपादनाय तेषामुच्चारणात् । अत एव " अर्थवत्० " (१।२।४५) सूत्रे वनं धनमित्यत्र नान्तस्यावधेरनर्थकत्वमुक्तम् । यदा त्वतिशुन्यादौ वनादयो वर्णसमुदायाः स्वरूपपरा भवन्ति तदा तेषां भवत्येवार्थवत्त्वमिति । " आतो लोप इटि च " (६।४।६४) इत्यत्र तु द्वयोरपि निरर्थकस्यागमस्य सार्थकस्य च प्रत्ययस्येटो ग्रहणम् । "इटोऽत्" (३।४।१०६) इत्यत्र विशेषणार्थे टकारादौ कर्त्तव्ये यदिटष्टकारः कृतस्तस्यैतत्प्रयोजनमातो लोप इटि चेत्यत्र सामान्यग्रहणं यथा स्यादिति । एतच्च " आतो लोप इटि च " (६।४।६४) इत्यत्र " टित आत्मनेपदानां टेरे" (४।३।७९) इत्यत्र च भाष्ये व्याख्यातम् । रक्षितेनोक्तम् । किं त्वेवम्

---

१ C om. ननु. २ B om. प्रमाणं चात्र; A om. अत्र. ३ D अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम. ४ B स्वरूपेण for कर्तृरूपेण. ५ B C वनादिशब्दस्य. ६ B C उच्चरिते. ७ B पदार्थोर्थः for यदा योर्थः.

"श्नोऽत्" (३।४।१०६) इत्यत्रापि द्वयोरागमप्रत्यययोर्ग्रहणं प्राप्नोति । तथेड्डिमहिडित्यत्र प्रत्याहारार्थं वर्णान्तरे कर्तव्ये ङकारकरणं ङित्कार्यार्थमपि स्यात्, एवं च सस्रंसिमह इत्यत्र "अनिदितां हलः०" (६।४।२४) इत्यनुनासिकलोपः प्रसज्येत । तदेतत्समाधेयम् ॥

पुरुषोत्तमदेवेन तु "दाधा घ्वदाप्" (१।१।२०) इत्यत्र दाङ्धावुधात्वेकदेशयोर्दाधाशब्दयोरनर्थकयोरग्रहणमुक्तम् । तथा "शे" (१।१।१३) इत्यत्र सूत्रे काशे कुशे इति पदैकदेशस्यानर्थकस्य । एतदन्ये न क्षमन्ते । तथा हि प्रनिदाशति प्रनिधावतीत्यत्र सत्यामपि घुसंज्ञायां " नेर्गदादि "–(८।४।१७) सूत्रेण णत्वं नास्ति दाधाशब्दौ प्रति नेरुपसर्गसंज्ञाया अभावात् । तथा च भाष्यम् । न चैतौ दाधौ प्रति क्रियायोग इति । "सनि मीमाघु०" (७।४।५४) इत्यादौ चाङ्गस्य घोर्ग्रहणादसकारादित्वाच्च दिदाशिषतीत्यादौ न दोषः । काशेकुशेशेशब्दस्य लाक्षणिकत्वात् प्रगृह्यसंज्ञाया अभावो न्यासकृतैव " शे " (१।१।१३) इत्यत्र व्याख्यातः ।

स्वरूपविधिविषया चेयं परिभाषा । " अर्थवदधातुः० " (१।२।४५) इत्यत्रार्थवद्ग्रहणात् । तेन प्रलम्बत इत्यत्रानर्थकादपि प्रशब्दात् " अव्ययादाप्सुपः " (२।४।८२) इति सुब्लुक् सिद्धो भवति । अनर्थकस्याव्ययत्वमुपसर्गत्वं प्रातिपदिकत्वं च "निपातानामनर्थकानामर्थवत्कृतानि कार्याणि भवन्ति" (महाभाष्य १।२।४५ वा. १२) इति वचनात् । ज्ञापकं चात्र "अधिपरी अनर्थकौ" (१।४।९३) इत्याधिपर्योरनर्थकयोरुपसर्गसंज्ञानिवृत्त्यर्थं निपातसंज्ञाधिकारे कर्मप्रवचनीयसंज्ञाविधानम् । अत एव निपातस्य चानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्येति भाष्ये प्रत्याख्यातम् । यद्येवं निपातत्वाद् यदव्ययत्वं तत्सामर्थ्यादेव सुब्लुक् सिद्धः । नैतत् । निपातत्वस्य स्वरार्थत्वमात्रेणोपपन्नत्वात् । अनर्थकत्वं तु प्रशब्दस्य प्रकर्षार्थस्य प्रकरणादिनावगतत्वात् । इहानर्थकत्वाद्विभक्त्यभावो न पूर्वपक्ष्यते प्रातिपदिकार्थेत्यत्र प्रातिपदिकग्रहणात् तस्य ह्येतत्प्रयोजनमनर्थकादपि प्रातिपदिकमात्रात्प्रथमा यथा स्यादिति ॥

इयं च परिभाषा "स्वं रूपम्" (१।१।६८) इत्यत्र भाष्ये ज्ञापिता । तत्र ह्युक्तम् । रूपग्रहणं न कर्त्तव्यम् । स्वं शब्दस्येत्युच्यमाने यद्यपि शब्दस्य रूपमर्थश्च संभवति तथापि रूपमेव ग्राह्यं नार्थः । यतः शब्दोच्चारणे रूपप्रतिपत्तिरादौ ततोऽर्थप्रतिपत्तिः । तथा शब्दोऽनुकरणकालेऽर्थं जहाति न रूपम् । तदेवम्प्रत्यासन्नबुद्धित्वादहेयत्वेन नित्यसम्बन्धित्वाच्च शब्दस्य रूपमेव ग्राह्यं नार्थो विपर्ययात् । अतः स्वंग्रहणादेव रूपग्रहणे सिद्धे व्याकरणशास्त्रे रूपवदर्थोऽप्यङ्गीक्रियत इति लभ्यते ॥

अथ वा भ्रस्जादि-(८।२।३६) सूत्रे भ्राजग्रहणमस्यास्तित्वे ज्ञापकम् । यदि ह्यनर्थकस्यापि ग्रहणं स्यात्तदा राजग्रहणेनैव भ्राजैकदेशस्यापि ग्रहणे सिद्धे राजभ्राजेति भ्राजग्रहणं न कुर्यात् । कृतं चातो ज्ञापकमर्थवत एव ग्रहणं नानर्थकस्येति[5] ॥ ९ ॥

१ A B काशेकुशेशब्दस्य. २ B om. अत्र. ३ A B निपातस्य स्वरार्थत्वे अव्ययत्वमात्रेणोप०. ४ P स्वं भवति. ५ After नानर्थकस्येति, B. adds यथा ज्ञापकमिदं तथा गणकार्यमित्यत्र व्याख्येयम्.

न वर्णग्रहणेषु ॥ १० ॥

पूर्वापवादोयम् । वर्णा अकारादयः । तद्ग्रहणेऽर्थवत्परिभाषा नास्ति । यथा "इको यणचि" (६।१।७७) इति निरर्थकस्यापीको निरर्थकेऽचि यण् भवति भवत्यत्र भवत्विति । अन्यथा ङीबादिसंबन्धिन एव सार्थकस्येकः सार्थके एवाचि यण् स्यात् कुमार्यौ श्वश्र्वाविति । तथा "अस्य च्वौ" (७।४।३२) इति निरर्थकस्यापि भवति । शुक्लीकरोतीति । अन्यथाऽर्थवत एव विष्णुवाचकाकारस्य स्यात् । "इको झल्" (१।२।९) इत्यत्रेगिति योयं वर्णसमुदायः स किं सार्थकः प्रत्याहारो गृह्यतां निरर्थको वा धातुरिति विचारे युक्तमेव रक्षितेनार्थवत्परिभाषया प्रत्याहारग्रहणमुक्तम् । यतः प्रत्याहारे व्यवस्थिते उत्तरकालं वर्णग्रहणं न तु प्रथमत एव ॥

ननु यदि वर्णग्रहणेऽर्थवत्परिभाषा नास्ति कथं तर्हि "विज इट्" (१।२।२) इत्यत्रार्थवत इटो ग्रहणं न्यासकृता शङ्क्यते । तथा "इटोत्" (३।४।१०६) इत्यत्र सार्थकस्येटो ग्रहणमभिधीयते । कथं वा सीयुडागमे कृते केवलस्येटः सार्थकत्वम् । ससीयुट्कस्यैवार्थवत्त्वात् । यथा भिन्धुरित्यत्रोसः आनर्थक्यमुक्तम् । कथमिड्ग्रहणेऽर्थवत्परिभाषाभिधीयते यावता 'आतो लोप इटि च' (६।४।६४) इत्यत्रोक्तमिड्वह्निमाहिडित्यत्र टे कर्तव्ये टित्करणमागमप्रत्यययोरुभयोरपि ग्रहणार्थमिति । तदेवं सामान्यग्रहणेनैव भवितव्यम् । उच्यते । यत्तावदुक्तं वर्णग्रहणमिदम् । तन्न । यतो यत्रानुबन्धमुच्चार्य कार्यं विधीयते तत्र वर्णाश्रितः प्रतिषेधो न भवति । अत्र च "ग्रहोऽलिटि दीर्घः" (७।२।३७) इत्यत्रेडपवादे ईटि कर्तव्येऽग्रहीदित्यत्र स्थानिवद्भावेन "इट ईटि" (८।२।२८) इति सिचो लोपार्थं यदेतत्कृतं दीर्घग्रहणं तदेतत्सामान्यज्ञापकम् । तेन यत्रानुबन्धोपादानं तत्र 'न वर्णग्रहणेषु' इति न प्रवर्तते ।

यद्येवम् "इको यणचि" (६।१।१७) इत्यत्राप्यनुबन्धोपादानादनया नोपस्थातव्यम् । नैतदस्ति । ककारादीनां समुदायानुबन्धत्वादिगिति नेकारादीनां सानुबन्धानामुपादानम् । समुदायानुबन्धानामवयवानुबन्धता न स्वीक्रियते । "कमेर्णिङ्" (३।१।३०) इति ङकारेण 'ऋङ्' इति प्रत्याहारं कृत्वा सङन्ता धातव इति कर्तव्ये "सनाद्यन्ता धातवः" (३।१।३२) इति ज्ञापकात् । ततो न सस्रंसिमेह इत्यत्रानुनासिकलोपो भवति । कुरुत इत्यत्र तु ञित्वादात्मनेपदं गन्धनादिसूत्रादनन्तरं 'नानुपराभ्याम्' इति कर्तव्ये "अनुपराभ्यां कृञः" (१।३।७९) इति यत्कृतं तत् "स्वरितञितः०" (१।३।७२) इत्यस्यापि प्रतिषेधो भवतीति ज्ञापनार्थम् । तदेवं कृञो ञकारस्य समुदायानुबन्धत्वेऽप्यवयवानुबन्धत्वमिति । यत्तु

१ B transp. भवति and शुक्लीकरोतीति. २ B अनर्थक परिभाषा नास्ति. ३ B उसश्च. ४ B om. नैतदस्ति and adds इकारादीनां सानुबन्धत्वात् । नैतदस्ति । ककारादी. ५ B repeals सस्रंसिमेह. ६ B om. ञकारस्य.

स्वादि- (४।१।२) सूत्रे ' औङस् ' इति कृते ङित्वाट्टिलोपो दोष उक्तः सः "अनुदात्तङित आत्मनेपदम्" ... "अनुप्रराभ्यां कृञः" (१।३।७९) इत्यस्य सामान्यज्ञापकत्वमभ्युपगम्य बोद्धव्यः। यदप्युक्तं सागमकस्यैवार्थवत्त्वमिण्मात्रं त्वनर्थकमिति । तदपि न । प्रक्रियाक्रमेणागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते इत्याश्रयणात् । भिन्धुःप्रस्तावे त्वनागमकानां सागमका आदेशा भवन्तीत्याश्रितम् । यथाप्युक्तं टे कर्तव्ये टित्वात्सामान्यग्रहणमित्यादि तदपि न । सति प्रयोजने ज्ञापकात् प्रत्ययागमयोर्ग्रहणमुच्यते। "विज इट्" (१।२।२) इत्यत्र न किंचिदागमस्य ङित्वे प्रयोजनम्। अतन्निमित्तत्वाद् गुणस्य । " इटोत् " (३।४।१०६) इत्यत्र च प्राकरणिकस्येटोऽदादेशविधानात्कुत आगमप्रसङ्गाशङ्केति ॥

ज्ञापकं चात्र " ऊञः " (१।१।१७) इति सूत्रम् । यद्यर्थवत्परिभाषा वर्णग्रहणेपि स्यात्तदा उ इतीत्यत्रेतिशब्दे कारेऽनर्थकेऽर्थवत्परिभाषयैव यणादेशाप्रसङ्गः सिद्ध इत्युञ इति प्रगृह्यसंज्ञा न कृता स्यात् । कृता चातो ज्ञापकम् ॥

अथ वा " भक्ष्येण मिश्रीकरणम् " (२।१।३५) इति निर्देशो ज्ञापकः ॥१०॥

भाव्यमानोऽण् सवर्णान्न गृह्णाति ॥ ११ ॥

विधीयमानोऽण् सवर्णानां ग्राहको न भवति । तेन 'इह' इति " इदम इश् " (५।३।३) इति त्रिमात्रस्य स्थानिन आन्तरतस्यात् त्रिमात्र आदेशो न भवति । तथा 'हे अनड्वन्' इत्यत्र "अम्संबुद्धौ" (७।१।९७) इति दीर्घो न भवति । 'लविता लवितुम्' इत्यत्र[1] " वृतो वा " (७।२।३८) इतीटो विकल्पेन दीर्घविधानादिटो न सवर्णग्रहणमित्याहुः ॥

इयं च परिभाषा " अणुदित्सवर्णस्य चाप्रत्ययः " (१।१।६९) इत्यत्राप्रत्यय इत्यस्यैवार्थः पठ्यते । तथा हि । प्रत्याय्यते विधीयते भाव्यते इति प्रत्ययः न प्रत्ययोऽप्रत्ययः, अभाव्यमान इत्यर्थः । अप्रत्ययोऽण् सवर्णान् गृह्णातीत्यस्मिन्नर्थे भाव्यमानोण् सवर्णान्न गृह्णातीति व्यक्तमवतिष्ठते ॥

सुखप्रतिपत्त्यर्थं ज्ञापकमपि केचिदाहुः " ई हल्यघोः " (६।४।११३) इति दीर्घेकारविधानम् । अन्यथा दीर्घस्य स्थाने सावर्ण्याद्दीर्घ एव स्यात् ॥

अनित्या चेयं [2]परिभाषा । तेनाम् इत्यत्र द्विमात्रस्यौकारस्य द्विमात्र एव ऊकारो भवति । अत्र चार्थे " दिव उत् " (६।१।१३१) इति तपरकरणं ज्ञापकम् । यदि भाव्यमानोऽण् सर्वथैव सवर्णान्न गृह्णाति तदा द्युभ्यामित्यत्र " च्छ्वोः शूडनुनासिके च " (६।४।१९) इत्यूठ्य[3]पि कृते दीर्घस्य स्थाने ह्रस्वः सिद्धः स्यात् किं तपरकरणेन । तत्कृतं ज्ञापयति क्वचिद्भाव्यमानोऽण् [4]सवर्णान् गृह्णातीति । "शास इदङ्हलोः" (६।४।३४) इति तपरकरणं वा ज्ञापकमिति ॥ ११ ॥

---

१ After इत्यत्र, A B add तु. २ B C om. परिभाषा. ३ B उठि कृते. ४ B सवर्णान्न गृह्णाति.

यस्मिन्विधिस्तदादावल्ग्रहणे ॥ १२ ॥

यस्मिन्निति सप्तमीनिर्दिष्टे अल्ग्रहणे, वर्णग्रहणे यो विधिः स तदादौ समुदाये भवति न तदन्ते । तेन पिश्तेरेशि पपे इत्यत्र पाघ्रादि–(७।३।७३) सूत्रेण पिबादेशो न भवति । तथाऽचीति इयङुवङावजादौ भवतः, श्रियो ऌलुवतुरिति । श्रियौ ऌलुव इत्यत्रापि व्यपदेशिवद्भावात् । यदि ह्यत्र तदन्तविधिः स्यात् श्रियो ऌलुवतुरित्यत्र न स्यात् हलन्तत्वात् । अयं चार्थो येनविधि–(१।१।७२) सूत्रे तदन्तविध्यपवादस्तदादिविधिरुपसंख्यातः परिभाषारूपेण पठ्यत इति ॥

वामनेन तु “ गुणोऽपृक्ते ” (७।३।९१) इत्यत्रापृक्तग्रहणादियं वर्णिता । तदुक्तम् । उतो वृद्धिर्लुकि हलीत्यनुवर्तमाने हलादौ गुणे प्राप्तेऽपृक्तग्रहणं हल्मात्र एव यथा स्याद्धलादौ मा भूदित्येवमर्थं क्रियमाणं ज्ञापयत्यस्तीयं परिभाषा यस्मिन्विधिरित्यादि । तेन हलीत्यनुवृत्तौ हलादौ स्यात् । अपृक्तग्रहणे तु वर्णमात्र एव भवति प्रौर्णोदिति । यद्येवं क्ङिति संप्रसारणं कृङादावेव स्याद् गृहीतो गृहीतिरिति । यगादौ न स्याद् गृह्यत इति । उच्यते । क्ङितीति नेदं वर्णग्रहणमिति । कृङावितौ यस्येति बहुव्रीहिणा वर्णसमुदायस्य परिग्रहात् ॥ १२ ॥

विधिविधानविधिभाजां त्रयाणां संनिधाने तदन्तविधिर्भवति ॥ १३ ॥

तेन “ एरच् ” (३।३।५६) इतीवर्णान्तादच् प्रत्ययो भवति । इयं परिभाषा येनविधि–(१।१।७२) सूत्रस्यैव सामर्थ्यल्लभ्योऽर्थः पठ्यते । तथाहि । येनेति करणे तृतीया, न चाकर्तृकं करणमस्तीति कर्ताप्याश्रितः । स पुनरिह संबन्धिशब्दत्वादन्तशब्देनावयववाचिना संनिधापितः समुदायो विज्ञायते । स च कर्ता त्रिभिः प्रकारैः संनिहितो[४] भवति । क्वचिन्निर्देशात् । यथा “ ईदूदेद्द्विवचनम् ” (१।१।११) इति द्विवचनं कर्तृभूतं निर्दिष्टं सैत्तदीदादिभिः करणैः प्रगृह्यसंज्ञां विदधाति । क्वचित्प्रकरणात् । यथा ‘ एरच् ’ (३।३।५६) इत्यत्र धातोरित्यधिकारात् प्रकरणाद्धातुः कर्ता संनिधापितः स इकारेण करणेनाचं विदधाति । क्वचित्सामर्थ्यात् । यथा “ इको झल् ” (१।२।९) इत्यत्र धातोरेव च सन् विधीयते इति सामर्थ्याद्धातुः कर्ता संनिधापित इका करणेन सनः कित्त्वं विदधाति । तदेवमीदूदेद्द्विवचनमित्यादौ प्रगृह्यसंज्ञाया विधीयमानस्य[६] विधेरीदूदेतः करणस्य विधानस्य द्विवचनस्य च कर्तुर्विधिभाजः संभवाद् “ येन विधिस्तदन्तस्य ” (१।१।७२) इति तदन्तविधिर्विधीयते । तदेवं “ येन विधिः ” (१।१।७२) इत्यस्य सूत्रस्यार्थ एवायमेवंविधो विधिविधानविधिभाजां त्रयाणां संनिधाने तदन्तविधिर्भवति । “ एचोऽयवायावः ” (६।१।७८) इत्यादौ विधिभाजोऽसंभवान्न प्रवर्तते । ननु शब्दानुशासनप्रस्तावाच्छब्दरूपं कर्तृ विधिभाक् स्यात् तत्कथं कर्तुरभावोऽभिधीयते । उच्यते । शब्दरूपं कर्तृत्वेन नाश्रीयते अतिप्रसङ्गादिति “ सुप्तिङन्तं पदम् ”

---

१ After ऌलुवतुः, P. ins. ऌलुवुः. २ B श्रियौ ऌलुवौ इत्यादौ तु व्यप०. ३ B °ग्रहणेन वर्णितम् । यदुक्तं क्ङावितौ A C °ग्रहणम् । क्ङावितौ. ४ A C संनिधापितो भवति. ५ A C P यत्तद्. ६ After विधीयमानस्य A. ins. विधेः कर्मणो विधेः.

(१।४।१४) इत्यत्र रक्षितेन व्याख्यातम् । तेन "एचोऽयवायावः" (६।१।७८) इत्यादौ शब्दरूपस्यास्वीकारादेऋमात्रस्यैव स्थानित्वमऋमात्रस्य परत्वं नैजन्तस्याजादावेति । तस्य स्थानित्वे वृक्षावत्रेत्यादावावादयोऽनेकाल्त्वात्सर्वादेशाः स्युः । ननु निर्दिश्यमानस्यादेशा भवन्तीत्येच एव स्थाने आदेशेन भवितव्यं नैजन्तस्य । सत्यमेतद्व्यक्तौ । जातौ तु दोषः । अन्यस्त्वाह । वर्णविधित्वमल्विधीनां न स्यात् । तथा च येनविधि-(१।१।७२) सूत्रे भागवृत्तिकृतोक्तम् । "इको यणचि" (६।१।७७) इतीका अचावयवेनावयविनः समुदायस्य संनिधापितत्वादिगन्तस्याजादौ यणादेश इति वर्णविधिरेव न स्यात् तिष्ठतु दध्यशान त्वं शाकेनेति । किं तु सत्यपीगन्तस्याजादौ यणादेशे पदविधित्वं न भवत्येव । पदस्य पदात् सुप्सुपेत्याद्यनुच्चारणेन यणादेशादिकार्याणां विधानादिति ॥ १३ ॥

इति महामहोपाध्यायश्रीसीरदेवकृताया परिभाषावृत्तौ वृद्धिपादो नाम प्रथमः पादः ॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १४ ॥

एकयोगनिर्दिष्टानां पदानां प्रवृत्तिर्वा निवृत्तिर्वा सहैव स्यात् । न त्वेकस्य प्रवृत्तिरपरस्य निवृत्तिः । तेन "उश्च" (१।२।१२) इत्यत्र "लिङ्सिचावात्मनेपदेषु" इत्येतत्सर्वमनुवर्तते । तदयमर्थः । ऋवर्णान्ताद्धातोः परौ लिङ्सिचावात्मनेपदेषु कितौ भवत इति । तत्र हि ऋ इति ऋवर्णान्तो धातुर्गृह्यते 'न ऋ गतौ इति' । अत्र न्यासकारः कारणमाह । शैलीयमाचार्यस्य यत्रास्य धातोर्ग्रहणमिच्छति तत्रावश्यं श्तिपा निर्देशं करोति । यथा "अर्तिपिपर्त्योश्च" (७।४।७७) "सर्तिशास्त्यर्तिभ्यश्च" (३।१।५६) इति । अत्र च न्यासे सन्देहविच्छेदायेत्यप्याहार्यम् । तेनायमर्थः । यत्रास्य धातोर्ग्रहणमिच्छति तत्र सन्देहविच्छेदायावश्यं श्तिपा निर्देशं करोति । यच न सन्देहस्तत्र करोति न करोति च । एवं च "स्मिपूङ्रञ्ज्वशां सनि" (७।२।७४) इत्यत्र 'ऋ गतौ'इत्यस्य ग्रहणेऽपि न श्तिपा निर्देशः । तत्र हि "किरश्च पञ्चभ्य" (७।२।७५) इत्यत्र दृङ्धृङोर्ग्रहणान्न सन्देहः । अन्यथा दिदरिषते दिधरिषते इत्यत्र "स्मिपूङ्रञ्ज्वशां सनि" (७।२।७४) इत्येवेटः सिद्धत्वाद्दृङ्धृङोर्ग्रहणमनर्थकं स्यात् । यत्तु तत्र रक्षितेनोक्तम् । संदेहविच्छेदायेत्येवाप्याहार्यम् । ततश्च "स्मिपूङ्रञ्ज्वशां सनि" (७।२।७४) इत्यत्राविरोधः । "किरश्च पञ्चभ्यः" (७।२।७५) इत्यत्र दृङ्स्वीकार एव विच्छेदहेतुरिति । तदयुक्तम् । यतो "वृतो वा" (७।२।३८) इत्यनुवृत्तौ "इट् सनि वा" (७।२।४१) इति विकल्पेनेटि प्राप्ते नित्यमिटो विधानार्थं दृङ्ग्रहणं स्यात् । उच्यते । यदि नित्यमिटो विधानार्थं दृङ्ग्रहणं स्यात् तदा "किरश्च पञ्चभ्यः" (७।२।७५) इति

---

१ A अन्यस्त्वाह वर्ण०. २ A भागवृत्तिकृतोक्तम्. ३ A C om. एव.

सूत्रमकृत्वा स्मिपूङ्रञ्ज्वशूकॄग्रप्रच्छां सनीत्येवं कुर्यात् । न चोत्तरत्र " रुदादिभ्यः सार्वधातुके " (७।२।७६) इत्यत्र पञ्चभ्य इत्यस्य प्रयोजनमस्तीति वाच्यम् । रुदादिपञ्चधातुपरिग्रहार्थं तत्र वृत्करणं कर्तव्यं तत एव व्यवस्था भविष्यति । अथ वा कॄग्रस्वीकार इति बहुव्रीहिरयं कॄग्रोः स्वीकारो यस्मिन्निति कॄग्रस्वीकारः ' किरश्च पञ्चभ्यः ' (७।२।७५) इति योगस्तस्मिन्कॄग्रस्वीकारे " किरश्च पञ्चभ्यः " (७।२।७५) इति सूत्र एवान्तर्भूतयोर्दृङ्धृङोर्ग्रहणं विच्छेदहेतुरित्यर्थः । अथ वा " स्मिपूङ्रञ्ज्वशां सनि " (७।२।७४) इत्यत्र ऋग्रहणं ह्रस्वान्तार्थं तावन्न भवति दृङ्धृङ्ग्रहणात् । दीर्घान्तादपि यदि " इट् सनि वा " (७।२।४१) इति विकल्पः स्याद् दीर्घार्थमपि न स्यान्नित्यविकल्पयोर्विरोधात् । एवं च ऋग्रहणमनर्थकम् । तस्मात् " इट् सनि वा " (७।२।४१) इत्यत्र ऋग्रहणं नानुवर्तते वृङ्वृञावेवानुवर्तेते वृङ्वृञोरेवेड्विकल्पः । ऋतां तु "स्मिपूङ्रञ्ज्वशां सनि" (७।२।७४) इत्यनेनैव नित्यमिट् सिद्ध इति कॄग्रग्रहणमेवं विच्छेदहेतुरिति ॥

ज्ञापकं चात्र " हनः सिच् " (१।२।१४) इति सिज्ग्रहणम् । यथैकसूत्रनिर्दिष्टयोरपि पदयोरेकमनुवर्तते नापरमिति तदा " लिङ्सिचावात्मनेपदेषु " (१।२।११) इत्यतो लिङ्ग्रहणं नानुवर्तिष्यते सिज्ग्रहणमेवानुवर्तिष्यते इति सिज्ग्रहणमनर्थकं स्यात् । अयं च स्वरितत्वलभ्योऽर्थः परिभाषारूपेण पठ्यते । अत एव " उपदेशेऽजनुनासिक इत् " (१।३।२) इत्यतो "लशक्वतद्धिते" (१।२।८) इत्यत्र इद्ग्रहणानुवृत्तावपि अनुनासिकग्रहणं नानुवर्तते । उपदेशग्रहणानुवर्तनं प्रति रक्षितानुन्यासयोर्विवाद एव । तथाहि । "गाङ्कुटादि०" (१।२।१) सूत्रेऽनुन्यासकारेणोक्तमादेशपक्षे इद्ग्रहणमनर्थकमादेर्हि भवतो "लशक्वतद्धिते" (१।३।८) इत्यनेनैवेत्संज्ञायाः सिद्धत्वादित्यादि । रक्षितेन तूक्तमादिभूतो ङकारो "लशक्वतद्धिते" (१।३।८) इत्यत्रोपदेशग्रहणानुवृत्तेरसतीदित्येतास्मिन्नित्संज्ञक इति न ज्ञापकमिदित्वं तदादेशाभावस्येति । तत्रायं रक्षिताभिप्रायः । "लशक्वतद्धिते" (१।३।८) इत्यत्रासत्युपदेशाधिकारे निश्शब्दात्सप्तमीबहुवचने निक्ष्वित्यत्र शकारस्येत्संज्ञा स्यात् । न चेत्संज्ञायां कर्तव्यायामसिद्धत्वमस्ति । "ससजुषो रुः" (८।२।६६) इत्यत्र रोरुकारस्यानुनासिक्यप्रतिज्ञानसामर्थ्यात् । " रिङ्शयग्लिङ्क्षु " (७।४।२८) इति निर्देशाच्च सामान्येनेत्सञ्ज्ञायां कर्तव्यायामसिद्धत्वाप्रवर्तनस्य ज्ञापितत्वात् । तथा ' भियः क्रुक्लुकनौ ' (३।२।१७४) इति भीलुक इत्यत्र क्लुकनः ककारे लुप्ते लकारस्येत्संज्ञा स्यात् । नैतदस्ति । प्रयोजनाभावादेवेत्संज्ञाया अप्रवृत्तेः । स्वरस्तु न प्रयोजनम् । नित्वादेव तस्य सिद्धत्वात् । एवं तर्हि यङ्लुकि बेभीलुक इत्यत्र स्वरः प्रयोजनम् । तथाहि । नित्वादेकार उदात्तो भवति लित्वादीकारः स्यादिति ॥

---

१ A C कॄग्रस्वीकारं किरश्च पञ्चभ्य इति सूत्रं. २ A ह्रस्वान्तार्थं B ह्रस्वार्थं तावन्न भवति. ३ A om. एव. ४ A B· om. इत्यादि. ५ A B om. तु. ६ B P. ज्ञापकमिदित्वे तदादेशाभावज्ञापकमिदित्येतदादेशा न स्येति भविष्यन्ति.

अनुन्यासकारस्यायमभिप्राय:[1] । निच्श्विस्यत्रेत्संज्ञा[2] न भविष्यत्यसिद्धत्वात् । यत्तूक्तं रोरुकारस्यानुनासिक्यप्रतिज्ञानसामर्थ्याल्लिङ्श्विति निर्देशाच्चासिद्धत्वं न भवतीति तत् " उपदेशेऽजनुनासिक इत् ", " हलन्त्यम् " (१।३।२,३) इत्येतत्सूत्रद्वयकर्तव्यतायामेवासिद्धत्वं न भवति तत्रैव प्रमाणसम्भवात् । अन्यत्र त्वसिद्धत्वमेव । बेभीलुक इत्यत्र यङ्लुकश्छान्दसत्वादित्संज्ञा न भविष्यतीति । यदि वा लकारस्येत्संज्ञायां यणादेशे[3] कृते बेभ्युक इत्येक एवाजिति क लित्स्वरः स्यात् । निच्श्विति जश्त्वेन शकारस्य जकार: । श्चुत्वेन सकारस्य शकार: । " खरि च " (८।४।५५) इति चर्त्वं जकारस्य चकार: । ननु ' स्तोः श्चुना श्चुः ' (८।४।४०) इत्यत्र रक्षितेनोक्तं " झलां जश् झशि " (८।४।५३) इति निर्देशात् शकारस्य जश्त्वं नास्ति । अत एव " मस्जिनशोर्झलि " (७।१।६०) इत्यत्र मज्जतिसिद्धये जश्त्वेन सकारस्य दकारस्तस्य "०भृज्जति०" (६।१।१६) इति निर्देशादसिद्धत्वाभावात् श्चुत्वेन जकारो न्यासे उक्त: । अन्यथा श्चुत्वेन सकारस्य शकारे कृते जश्त्वेन जकारे सिद्धे "०मज्जति०" (६।१।१६) इति निर्देशादसिद्धत्वाभावप्रवर्तनमयुक्तम् । एवं च कथमत्र जश्त्वेन शकारस्य जकार: । उच्यते । " झलां जश् झशि " (८।४।५३) इत्यत्र चवर्गपरस्य शकारस्य जश्त्वाभावादन्यत्रापि चवर्गपरस्यैव जश्त्वाभावस्तुल्यजातीयत्वादिति यथाकथंचित् । ज्ञापकसिद्धं न सर्वत्रेति वा ॥ १४ ॥

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ १५ ॥

अयं चार्थोऽर्थवत्-(१।२।४५) सूत्रप्रणयनादस्तीत्याहुः । अन्यथा सर्वेषामुणादीनां धातुजत्वेन कृदन्तत्वात् प्रातिपदिकसंज्ञासिद्धौ तन्न कुर्यात् । अन्ये तु "अतः कृकमि०" (८।३।४६) इत्यत्र कमिग्रहणं कृत्वा कंसग्रहणादेतामाहुः । तेन ' कृगृशृपृकुटिभिदिछिदिभ्यश्च इः कित् ' (उणा. ४।१४२) इतीकारप्रत्ययान्तयोः किरिगिरिशब्दयोरोसि यणादेशे कृते धातुत्वाभावात् " हलि च " (८।२।७७) इति [4]दीर्घत्वं न भवति किर्योः गिर्योरिति । एतच्च न सम्यक् । " अचः परस्मिन्० " (१।१।५७) इति स्थानिवत्त्वाद्दीर्घत्वाप्रसङ्गात् । न चास्ति दीर्घविधिं प्रति न स्थानिवदिति । स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवदिति वचनात् । यथा प्रतिदीव्नेति । एवं तर्हि जीर्यतेर्धातोः ' जीर्यतेः क्रिन् रश्च वः ' (उणा. ५।४९) इति क्रिन् प्रत्यये इत्त्वे रपरत्वे च रेफस्य वकारे कृते जिव्रिरिति धातुत्वाभावाद्दीर्घो न भवतीति ॥ १५ ॥

सर्वो द्वन्द्वो विभाषयैकवद्भवति ॥ १६ ॥

तेन बाभ्रवाश्च शालङ्कायनाश्च बाभ्रवशालङ्कायनं बाभ्रवशालङ्कायना इत्येकवचनं बहुवचनं चोपपन्नं भवति । यथेवं समाहारद्वन्द्वेपि वाक्त्वचं श्रीस्रजम् इत्यत्रापि द्विवचनं

१ A आशयः for अभिप्रायः. C समभिप्रायः for अभिप्रायः. २ C निट्स्स्वेत्यत्र. ३ A यणादौ च कृते. ४ A दीर्घः for दीर्घत्वं.

प्राप्नोति पक्षे। तथेतरेतरयोगद्वन्द्वेऽपि पक्षे एकवचनं स्यात् । उच्यते । सर्वो द्वन्द्व इत्यनेन समाहारद्वन्द्वस्तथेतरेतरयोगद्वन्द्वश्च नापूर्वतया विभाषैकवत् क्रियते किं तर्हि न्यायसिद्धोऽनूद्यते । तथाहि । " चार्थे द्वन्द्वः " (२।२।२९) इत्यनेन चार्थे द्वन्द्वः क्रियते चार्थश्चेतरेतरयोगः स एव यदोद्रिक्तावयवभेदो भवति तदावयवभेदानुगमाद् द्विवचनबहुवचने सिद्धे एव । यदा तु तिरोहितावयवविवक्षा संहतिः प्रधानमिति यावत् तदा समाहार इति तत्र संहतिप्रधानत्वादेकवचनमिति। तदेवं चार्थे एव सर्वो द्वन्द्वो विभाषयैकवद्भवतीति परिभाषारूपेण पठ्यते ॥

ननु चार्थः समुच्चयो नेतरेतरयोगः । चशब्दप्रयोगे समुच्चयस्यैव प्रतीतेः। सत्यमेतत् । किं तु तत्प्रभेद एवेतरेतरयोगो न तु समुच्चयादन्यः । तथाहि । समुच्चय एव यदा युगपदर्थाभिधायिनां परस्परोपक्षाणां पदानां भवति तदा द्वन्द्वः क्रियते । एतावतैवेतरेतरयोगश्चार्थ एवेत्युच्यते । ननु यदि चार्थ एवायं सर्वो द्वन्द्व इति किमर्थं तर्हि "तिष्यपुनर्वस्वोः०" (१।२।६३) इत्यत्रास्यां बहुवचनग्रहणं ज्ञापनार्थं न्यासकृताभिधीयते। तिष्य एकः पुनर्वसू च द्वौ इति बहुत्वाद्बहुवचनं सिद्धमेव । एकवचनस्य प्रसङ्ग एव नास्ति। बहुवचनप्रसङ्गे एव द्विवचनं भविष्यति किं बहुवचनस्येत्यनेन । तत्कृतं ज्ञापयति । अस्तीयं परिभाषा सर्वो द्वन्द्व इत्यादि । उच्यते । ज्ञापयति बोधयतीति ज्ञापकं बोधकम् । कस्य बोधकम् । अभिमतस्य नियमस्येति । काभिमतनियमः । " द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् " (२।४।२) इत्यत्र समाहारे एव प्राण्यङ्गादीनामिति । प्राण्यङ्गादीनामेव समाहारे नान्येषामिति विपरीतनियमे हि तिष्यपुनर्वसूनां सर्वदा इतरेतरयोग एव द्वन्द्वः स्यान्न समाहारे । एवं च बहुवचनप्रसङ्ग एव द्विवचनमिति बहुवचनग्रहणमनर्थकं स्यात् । एतच्च "द्वन्द्वश्च प्राणितूर्य०" (२।४।२) इत्यत्र प्राण्यङ्गादीनामेव समाहार इत्येवं विपरीतनियमो नाश्रीयते "तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य०" (१।२।६३) इति बहुवचनग्रहणादित्यादिना ग्रन्थेन रक्षितेन व्याख्यातम् ॥

नन्वेवं " द्वन्द्वश्च प्राणितूर्य०" (२।४।२) इति सूत्रमनर्थकं स्यादिति । तेन हि समाहारे एवैकवद्भावो विधीयते । तत्र समाहारद्वन्द्वैकत्वादेकत्वादेकवचनं सिद्धमेव । उच्यते । प्राण्यङ्गादीनां समाहार एव द्वन्द्वो यथा स्यादितरेतरयोगो मा भूदिति सूत्रप्रयोजनम् । ननु किमर्थं समाहार एकवत्त्वं क्रियते नेतरेतरयोग एवैकवद्भावः क्रियताम्। एवं च समाहारद्वन्द्वग्रहणं प्रयत्नप्रतिपाद्यं न भवति । कार्यं च विधिमुखेनैव प्रवर्तते । उच्यते । इतरेतरयोग एकवद्भावे सत्यस्थित्वचमित्यत्र समाहारद्वन्द्वलक्षणो "द्वन्द्वाच्चुदषहान्तात्समाहारे" (५।४।१६०) इति टच् स्यात् । नन्वेवमपि पूर्वोक्तप्रकारेण समाहार एकवद् भवति । समाहारश्चैक एव । एवं चैकवदिति वतिर्नोपपद्यते । न ह्येक एवैकवद् भवति । उच्यते । बुद्ध्यानेकत्वमारोप्य वतिर्भविष्यति । उक्तं च । बुद्धिर्हि भगवत्यभेदेऽपि

---

१ A om. तथाहि. २ A यदोक्तावयवभेदः. ३ A परस्पराकाङ्क्षाणां. ४ B अस्य for अस्याः. ५ A C om. बहुवचनं सिद्धमेव. ६ A B om. एकत्वात्. ७ A om. समाहार एकवद्भवति; P समाहार एवैकवद्वचनं भवति.

भेदं जनयति। यथा राहोः शिर इति। अथ वा नायं वतिः, किं तर्हि वदोर्विजन्तोऽयमेकवदिति। ननु च तथाप्यशेषद्वन्द्व एकत्वाविधानात् सर्वशब्दार्थोऽघटमानः स्यात्। उच्यते। सर्वो द्वन्द्व इति कोर्थः। इतरेतरयोगसमाहारात्मक इत्यर्थः। नन्वेवमपि "विभाषा वृक्षमृग०"–(२।४।१२) सूत्रमनर्थकम्। अनयैव परिभाषया बाभ्रवशालङ्कायनं बाभ्रवशालङ्कायना इतिवत् प्लक्षन्यग्रोधं प्लक्षन्यग्रोधा इत्येवमादीनां सिद्धत्वात्। उच्यते। सिद्धे परिभाषयैकत्वे वृक्षादीनां सजातीयैरेव द्वन्द्व एकवद्यथा स्यात्, न विजातीयैरिति व्यतिकरनिरासार्थं विभाषयैकवद्विधानमिति। तेन पश्वादीनां विजातीयैर्द्वन्द्व एकवन्न भवतीतीतरेतरयोगोऽसौ द्वन्द्वो भवति। तथा च भट्टिः 'नरवानररक्षसाम्' इति ॥१६॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ गाङ्कुटादिपादो नाम द्वितीयः पादः ॥

उदित्सवर्णं गृह्णाति न सवर्णमात्रम् ॥ १७ ॥

उदिद्वर्णः "अणुदित्सवर्णस्य०" (१।१।६९) इति स्थानप्रयत्नाभ्यां विशिष्टमेव सवर्णं गृह्णाति न सवर्णमात्रम्। तेन "चोः कुः" (८।२।३०) इति कुग्रहणे हकारस्य ग्रहणं न भवति। ज्ञापकं चात्र "न विभक्तौ तुस्माः" (१।२।४) इत्यत्र तुग्रहणं कृत्वा सकारग्रहणमिति। अयं च न्यायसिद्ध एवार्थः सुखप्रतिपत्त्यर्थं ज्ञापकेनोक्तः। तथाहि। स्थानप्रयत्नाभ्यां सदृशस्य सवर्णसंज्ञाविधानात् तकारसकारयोः स्पर्शोष्मणोः प्रयत्नभेदादेव सावर्ण्यं नास्तीति कुतो ज्ञापकम्। यत एव स्थानप्रयत्नाभ्यां सादृश्यात् सावर्ण्यमत एवाइउणिति सूत्रे वृत्तिकृतोक्तम्। ह्रस्वमवर्णं प्रयोगे संवृतम्। दीर्घप्लुतयोस्तु विवृतत्वम्। तेषां सावर्ण्यप्रसिद्ध्यर्थमकार इह शास्त्रे विवृतः प्रतिज्ञायत इति। तत्रैव न्यासकारेणोक्तम्। विवृततरः प्रतिज्ञायत इति द्रष्टव्यम्। अनुन्यासकारेण तु विवृततमः प्रतिज्ञायत इति द्रष्टव्यमित्युक्तम्। अन्यथा आकारस्य विवृततमत्वात्सत्यपि अकारस्य विवृततरत्वप्रतिज्ञाने सावर्ण्यं न स्यात्। न्यूनाधिकप्रयत्नत्वात्। न्यूनाधिकप्रयत्नानां च सावर्ण्यं नास्त्येव। तथा च "नाज्झलौ" (१।१।१०) इति सूत्रे शकारस्य सावर्ण्येनाच्त्वाभावार्थं भाष्यकारेणोक्तम्। स्पृष्टं करणं स्पर्शानाम्, ईषत्स्पृष्टमन्तस्थानाम्, विवृतं करणमूष्मणाम् ईषदित्यनुवर्तते, स्वराणां च विवृतमित्यनुवर्तते ईषदिति निवृत्तमिति। एतेनेकारशकारयोर्विवृतेषद्विवृतयोः सावर्ण्याभाव उक्तो भवति। एवं च "नाऽज्झलौ" (१।१।१०) इत्यस्यापि प्रयोजनं न दृश्यते। दधि शीतं मधु भाजनमित्यादौ न्यूनाधिकगुणत्वादेव सावर्ण्याभावात्। न्यूनाधिकगुणानां च सावर्ण्याभावोऽवश्यमेवाङ्गीकर्तव्यः। अन्यथा "एङः पदान्तादति" (६।१।१०६)

---

१ A om. योग C योगः. २ A वर्णमात्रम् for सवर्णमात्रम्. ३ A om. च. ४ B om. सादृश्यात्सावर्ण्यं. ५ A एवं for एव. ६ A B om. मधु भाजनं.

इत्यादौ एकारौकाराभ्यां सावर्ण्यादैकारौकारयोरपि ग्रहणं स्यात् । रक्षितेन तु " एङः०" (६।१।१०६) इत्यत्र एओङ्ङ्कारेण प्रत्याहारग्रहणसामर्थ्यात् सावर्ण्याभाव उक्तः । अन्यथा एङिति ऐकारौकारयोरपि ग्रहणे एच इति चकारेण प्रत्याहारग्रहणं कुर्यात् । किं त्वेवं यत्र स्वरूपेणैकार उपादीयते तत्र सावर्ण्यं स्यात् । "ईदूदेद्द्विवचनम्०" (१।१।११) इति । अत्र एकारेण ऐकारस्य ग्रहणे सावर्ण्यभावात्करवावहै इति इत्यत्रापि प्रगृह्यसंज्ञा स्यात् । न चात्र तपरकरणात्सावर्ण्याभावो वाच्यः । तपरकरणस्य प्रयोजनाभावाद् । वृत्तिन्यासयोर्निर्देशार्थत्वेन व्याख्यातत्वात् । यद्येवं " इण्कोः " (८।३।५७) इत्यत्र कथं न्यासकारेण दास्यतीत्यत्र आकारहकारयोर्न्यूनाधिकगुणयोः सावर्ण्यात् षत्वप्राप्तिमुक्त्वा " वयस्यासु० " (४।४।१२७) इति निर्देशाद् व्यवस्थोक्ता । तथाहि । हकारस्य विवृतत्वम् । आकारस्य विवृततमत्वम् । यदाह शिक्षाकारः । विवृतं करणमूष्मणां स्वराणां च । तेभ्य एङौ विवृततरौ । ताभ्यामप्यैऔ । ताभ्यामप्याकार इति ॥

अत्राहुः । विवृतं करणमूष्मस्वराणामित्येकपदे कर्तव्ये यद्विवृतं करणमूष्मणां स्वराणां चेति पृथक् पदं कृतं ततः स्वराणामित्यस्यैवोत्तरत्र सूत्रे सम्बन्ध इति । तेन स्वरापेक्षमेवाकारस्य विवृततमत्वं नोष्मापेक्षमत आकारहकारयोस्तुल्यप्रयत्नत्वाद् दास्यतीत्यत्र निर्देशात् षत्वाभावो युक्त एवाभिहितः । रक्षितेन तु " इण्कोः " (८।३।५७) इत्यत्र न्यूनाधिकगुणस्यापि सावर्ण्यमुक्तम् । ननु दास्यतीत्यादावाकारहकारयोरज्झल्त्वात् " नाज्झलौ " (१।१।१०) इति सावर्ण्यप्रतिषेधादेव मूर्द्धन्यो नास्ति तत्किमिति निर्देशेन व्यवस्थोच्यते । उच्यते । "नाज्झलौ" (१।१।११०) इत्यगृहीतसवर्णानां प्रतिषेधो वक्तव्य इति वचनात् । आकारस्तु गृहीतसवर्णः । तत्कुतोऽत्र प्रतिषेधः । ननु किमर्थमगृहीतसवर्णानां प्रतिषेध उच्यते, न सामान्येनैव प्रतिषेधोऽस्तु । तेन दास्यतीत्यादौ सावर्ण्याभावो " नाज्झलौ " (१।१।१०) इति निषेधादेव सिध्यति । तथा खट्वा हस्तः कुमारी शेते इत्यादावकः सवर्णे- (६।१।१०१) दीर्घत्वाभावार्थमचीत्यनुवर्तनीयं न भवति । उच्यते । यदि गृहीतसवर्णानामपि " नाज्झलौ " (१।१।१०) इति प्रतिषेधः स्यात् तदा निंस्से इत्यत्र " झरो झरि सवर्णे " (८।४।६४) इति पक्षे सकारलोपो न स्यात् । ऌकारेणाचा सवर्णस्य सकारस्य ग्रहणात् तस्याच्त्वं हल्युपदेशाद्धल्त्वमज्झलोः "नाज्झलौ" (१।१।१०) इति प्रतिषेधात् । न च ऌकारसकारयोः " नाज्झलौ " (१।१।१०) इति सवर्णसंज्ञानिषेधः शक्यते कर्तुम् । स्वात्मनि क्रियाविरोधात् । तथाहि । ऌकारसकारयोः " नाज्झलौ " (१।१।१०) इति प्रतिषेधेन सकारस्याच्त्वाभावात् ऌकारसकारयोः " नाज्झलौ " (१।१।१०) इति निषेधो नोपपद्यते । एवं चात्मन एव आत्मना प्रतिषेधः कृतः स्यादिति । अगृहीतसवर्णानां प्रतिषेधश्च " नाज्झलौ " (१।१।१०) इत्यत्र सवर्णसंज्ञाप्रतिषेधवाक्ये सवर्णसंज्ञाया अनभिनिर्वृत्तत्वेन ग्रहणकशास्त्रस्यानभिनिर्वृत्तत्वात् । एवं ह्युक्तं ' पूर्वं ह्यपवादाः प्रवर्तन्ते पश्चादुत्सर्गाः ' इति ॥ १७ ॥

---

१ A सावर्ण्यत्वमुक्त्वा. २ A om. न. ३ A खहस्तः. ४ A om. न. ५ B निंसेत्यत्र. ६ A B आत्मनि. ७ A निवृत्त for निर्वृत्त.

प्रकृतिवदनुकरणं भवति ॥ १८ ॥

तेन कश्चिदाह द्विः पठतीति । तमन्योऽनुकरोति द्विः पठतीत्याहेति । तत्र प्रकृतिवद्भावात्पदत्वे "तिङ्ङतिङः" (८।१।२८) इति निघातः सिद्धो भवति । पदत्वाभावे हि स न स्यात् । तथा "वृषण्वस्वश्वयोः" (१।४।१८ वा.४) इत्यत्र नलोपाभावणत्वे भवतः । ज्ञापकं चात्र " परिव्यवेभ्यः क्रियः " (१।३।१८) इत्यादौ निर्देशे क्रीत्यादेरनुकरण-शब्दस्य विभक्त्युत्पत्त्यर्थं प्रातिपदिकसंज्ञाभ्युपगमेऽपि धातुत्वाश्रयस्येयङादेशस्य करणम् । यद्येवं कथं " विपराभ्यां जेः " (१।२।१९) इत्यादिनिर्देशः । न चात्र विद्यमानोऽपीयङादेशः परत्वाद् " घेर्ङिति " (७।३।१११) इति गुणेन बाध्यते इति शक्यते वक्तुम् । " क्षियः " (८।२।४६) इति निर्देशात्परमपि गुणं बाधित्वा इयङेव भवति पूर्वविप्रतिषेधेनेति रक्षितेन व्याख्यातत्वात् । एवं च "क्षियो दीर्घात्" (८।२।४६) इत्यत्र दीर्घग्रहणमुपपद्यते । अन्यथा हि "क्षियः" (८।२।४६) इतीयङा निर्देशादेव दीर्घ-परिग्रहे सिद्धे दीर्घग्रहणमनर्थकं स्यात् । उच्यते । द्विविधमनुकरणम् । सार्थकस्य निरर्थकस्य च शब्दमात्रस्य[2] । तदेवं " क्रियः " (१।३।१८) इत्यादौ सार्थकस्यैव लब्धधातुव्यपदेशस्य क्रीत्यस्यानुकरणम्[1] । तत्र धातुकार्यस्येयङो विद्यमानत्वादनुकरणेऽपि तद्भवति । "विपराभ्यां जेः" (१।३।१९) इत्यादौ निरर्थकस्य वर्णसमुदायमात्रस्यानुकरणम् । तत्र च क्रियारूपस्या-र्थस्याभावाद्धातुसंज्ञैव नास्ति । एवं चानुकार्ये एव धातुसंज्ञाया अभावादियङादेशो नास्ति । तदनुकरणे का पुनः कथा । तदेवं द्विविधमनुकरणमियङः करणाकरणाभ्यामवधार्यते । अत एव पठन्ति । सार्थकानुकरणे प्रकृतिवदनुकरणं भवतीति ॥

ननु यदि जेरिति निरर्थकस्यानुकरणं कथं तर्हि जयतेर्धातोरात्मनेपदं बोध्यते । उच्यते । सामान्यस्य विशेषग्राहितया धातोरपि प्रतिपादनात् । ननु यदि प्रकृतिवद्भावाद् धातुकार्यमियङ्[3] तदाऽधातुरिति प्रातिपदिकसंज्ञाप्रतिषेधः प्राप्नोति । उच्यते । अधातुरिति नायं प्रसज्यप्रतिषेधो धातोर्न भवतीति । किं तर्हि । पर्युदासः । धातोरन्यत्र भवतीति । क्रीप्रभृतयश्च शब्दा अनुकरणत्वेनाधातवः प्रकृतिवत्तया च धातव इति धात्वधातुत्वाद्धा-तोरन्य एव भवन्ति । तथा च " क्षियो दीर्घात् " (८।२।४९) इत्यत्र क्षियः स्वाश्रया प्रातिपदिकसंज्ञा भविष्यतीति न्यासे व्याख्यातम् । अथवा पर्युदासेऽधातुरिति नेदं शास्त्रीयं कार्यमतस्तत्कर्तव्यतायां न प्रकृतिवदित्यतिदेशः । 'पर्युदासे नञ्' इत्येतच्च " अर्थवदधातुरप्रत्ययः प्रातिपदिकम् " (१।२।४५) इत्यत्र " क्षियो दीर्घात् " (८।२।४६) इत्यत्र च रक्षितेनोक्तम् ।

नन्वेवमप्यनर्थकत्वादनुकरणशब्दस्य प्रातिपदिकसंज्ञा न प्राप्नोति । न चानुकार्य एवार्थः । भेदाभावात् । भेदे हि सति वाच्यवाचकसंबन्धः । न चानुकरणशब्दस्या-

---

१ A क्री इत्यनुकरण. २ A शब्दस्य for शब्दमात्रस्य. ३ Before इयङ्, A ins. इष्टो.

नुकार्यशब्दात्कोऽपि भेदोऽवधार्यते । अथापि बौद्धो[1] भेदः स्यात् । एवमपि अनुकार्यस्य वाच्यस्य शब्दात्मकत्वादनुकरणस्य वाचकस्य न तदभिधेयत्वमुपपद्यते । न हि शब्दस्य शब्दान्तरं वाच्यं । किं तर्ह्यर्थ एव । नैतदस्ति । शब्दोऽपि शब्दस्य वाच्यो दृश्यते । यथा भूवादिशब्दो धातुशब्दस्येति । ननु युक्तं तत् । आचार्येण संज्ञाविधानात् । एवं तर्हि अनुकरणमप्यनुकार्यस्य वाचकं युक्तम् । आचार्यस्य तथा व्यवहारात् । वाच्यवाचकभावे व्यवहार एव हि निबन्धनम् । नन्वेवमपि सत्यप्यर्थवत्त्वेऽनुकरणाद्विभक्तिर्न प्राप्नोति । संख्यायां सा विधीयते । न चानुकार्येषु शब्देषु द्रव्यसमवायिनी संख्या संभवति । तेषां शब्दात्मकत्वेनाम्बरगुणत्वे सत्यद्रव्यत्वात् । संख्यापि गुण एवेति न तत्रासावस्ति । निर्गुणा गुणा इति वचनात् । उच्यते । शब्दस्येदं तदिति सर्वनामपरामर्शयोग्यत्वाद् द्रव्यत्वमिष्यते । तस्मात्सिद्धानुकरणशब्दाद्विभक्तिः ॥ १८ ॥

विकरणेभ्यो नियमो बलीयान् ॥ १९ ॥

शबादिविकरणात् प्राक् "अनुदात्तङित आत्मनेपदम्" (१।३।१२) इत्यादीनि नियमशास्त्राणि तावद्भवन्ति । ततो विकरणाः । तेन "नेर्विशः" (१।३।१७) इत्यादौ वृत्तौ यदुक्तमडागमस्तद्भक्तस्तद्ग्रहणेन गृह्यत इति तदुपपन्नं भवति । तथाहि । विकरणान्नित्यात् परस्मादपि नियमः कर्तव्यः । नियमकाले च तदैवाडागमः प्राप्नोति । नासावडागमो नियमेनापसार्यते । विकरणादेव नियमस्य बलीयस्त्वात् । नापि विकरणेनापसारयितुं शक्यते । नियमप्रवृत्तिकाले तस्याविद्यमानत्वात् । तदेवं नियमाडागमयोर्युगपत्प्राप्तौ परत्वादडागमस्ततो युक्तमुक्तमडागमस्तद्भक्तस्तद्ग्रहणेन गृह्यत इति ॥

ननु च नियमेन प्रवर्तमानेन विकरणो बाध्येत । तद्बाधकाडागमप्रवृत्तिकाले विकरणो नित्योऽडागमात् प्राक् कस्मान्न भवति । उच्यते । यदि विकरणोऽडागमं बाधेत ततो निष्प्रतिद्वन्द्वी किमिति नियमो विकरणं न बाधेतेति । तथा एधिष्यते ऐधिष्टेत्यत्र अनुदात्तङितः आत्मनेपदम् (१।३।१२) एव भवति न परस्मैपदमिति । अन्यथा परत्वान्नित्यत्वाच्च विकरणेषु कृतेषु स्यादिषु तैर्व्यवधानात् 'अदनुदात्तङिद्भ्य एवात्मनेपदं शेषादेव परस्मैपदम्' इति नियमो न स्यात् । एवं च सामान्येन तिबादयः स्युः । नियमस्त्वास्ते शेते इत्यादिषु कृतार्थः ॥ यद्येवं स्यादीनां लावस्थायामुत्पत्तिर्न प्राप्नोति । लादेशे तु कृते एधिष्यते इत्यत्र द्वयं प्राप्नोति यक्प्रत्ययः स्यप्रत्ययश्च । तत्र परत्वाद्यकैव भाव्यम् । उच्यते । कर्तृवाचिनि सार्वधातुके शपि प्राप्ते भावकर्मणोस्तु यकि स्यादयो विधीयमानाः सामान्येन सर्वेषामपवादत्वाद्बाधका भवन्ति ॥

अयं चार्थो "वृद्भ्यः स्यसनोः" (१।३।९२) इत्यत्र परस्मैपदविधानेन ज्ञापितः । अन्यथा 'वृतु वर्तने' इत्येवमादीनां स्येन व्यवधानात् "अनुदात्तङित आत्मनेपदम्"

---

[1] A बौधः for बौद्धः.

(१।३।१२) इति नियमो नास्तीति सामान्यविहितेषु तिबादिषु सिद्धमुभयं वर्त्स्यति वर्त्तिष्यते इति किमनेन विधानेन । तत्कृतमस्यार्थस्य ज्ञापकम् । अन्ये त्वस्माज् ज्ञापकात 'कृतेऽपि विकरणे नियमः प्रवर्तते ' इति परिभाषामाहुः । अस्मिन् दर्शने एधिष्यत इत्यत्र लावस्थायामेवान्तरङ्गत्वात्स्यप्रत्ययेन भवितव्यम् । तथाऽस्मिन्नेव दर्शने औप्यत औब्जत इत्यत्राजादित्वात् " आडजादीनाम् " (६।४।७२) इत्याड् भवति । अन्यथा हि विकरणान्नियमस्य बलीयस्त्वे नियमाडागमयोः संप्रधारणायां परत्वाद-डागमेन भवितव्यम् । न चाडागमप्रवृत्तिकाले निरयो विकरणः शक्यते प्रवर्तयितुम् । पूर्वमेव नियमेनापसारितत्वात् । आडागमस्तु नियमेन नापसार्यत इति परत्वादसौ बाधकः प्राप्नोत्येव । तदेवं हलादित्वादडागमे कृते "आटश्च" (६।१।९०) इति वृद्ध्यभावादौब्जत इत्येवमादि न सिध्यति । तथाऽस्मिन्नेव दर्शने ऋच्छेरनादेशस्य ग्रहणम् । अर्त्यादेशस्य चर्तात्येव सिद्धेरिति "समो गम्यादि०"-(१।३।२९) सूत्रे वृत्तिग्रन्थ उपपद्यते । न हि विकरणान्नियमबलीयस्त्वे शिति विकरणे विधीयमान ऋच्छादेश आत्मनेपदात्प्रागेव भवति । तथाऽस्मिन्नेव दर्शने " नेर्गदादि० "-(८।४।१७) सूत्रे विकरणान्तस्याडागम उक्तः । अन्यथा विकरणान्नियमबलीयस्त्वे ततोऽपि परत्वादडागमे कृते कथं विकरणान्तस्याडागम उपपद्यते ॥

अथ विकरणेभ्य इत्यत्र निर्देशे भ्यसः सकारस्य रुत्वे कृते रोरुकारस्य "उपदेशेऽजनुनासिक इत् " (१।३।२) इति इत्संज्ञा न प्राप्नोति " पूर्वत्रासिद्धम् " (८।२।१) इत्यसिद्धत्वात । उच्यते । रोरुकारस्यानुनासिकप्रतिज्ञानसामर्थ्यादसिद्धत्वं न भवति । तथा च " उपदेशेऽजनुनासिक० " (१।३।२) इत्यत्र रक्षितः । इत्संज्ञायामासिद्धत्वं नास्ति " ससजुषो रुः " (८।२।६६) इत्यत्रोकारस्येत्संज्ञार्थमनुनासिकत्वप्रतिज्ञानसामर्थ्यादिति ॥

अत्रोच्यते " हशि च " (६।१।११४) इत्यत्रानुनासिकविशिष्टस्य रोर्ग्रहणं यथा स्यादित्येवमर्थं रोरुकारस्यानुनासिकत्वप्रतिज्ञानं स्यात् । तेन तरुवनमित्यत्र "हशि च" (६।१।११४) इत्युत्वं न भवति । तत्कुतस्तत्सामर्थ्यादित्संज्ञाऽभिधीयते । न च वाच्यं कृत्रिमाकृत्रिमन्यायेन " ससजुषो रुः " (८।२।६६) इत्यस्यैवोत्वेन भवितव्यम् । न तरुवनादौ । कृत्रिमाकृत्रिमयोरुभयोर्हि संभवे कृत्रिमपरिभाषाप्रवृत्तेः । तथाहि । उत्वशास्त्रे " ससजुषो रुः " (८।२।६६) इत्यस्यासिद्धत्वात्तरुवनस्यैव सम्भवो नेतरस्य । एवं तर्हि रेफस्यैवानुनासिकत्वं प्रतिज्ञायतां स्वरितत्वप्रतिज्ञानवत् । तथा चोत्वविधावनुनासिकविशिष्टस्य रेफस्योत्वे विधीयमाने पुनर्भवादौ कथमुत्वप्राप्तिः । तदेवं रेफस्यानुनासिकत्वे प्रतिज्ञातव्ये यदुकारस्य प्रतिज्ञानं तत्सामर्थ्यादित्संज्ञा भविष्यति । एतदपि न । एवं स्थित एव शास्त्रे रोरुकारमकृत्वैव पुनरनन्तरोक्तप्रकारेणेष्टसिद्धेरुकारोऽनुबन्धो व्यर्थः स्यात । एवं तर्हि व्यक्तिपदार्थाश्रयणेन सामर्थ्यम् । एतच्च " ससजुषो रुः " (८।२।६६) इत्यत्रोकारस्येत्संज्ञार्थमनुनासिकत्वं प्रतिज्ञातमिति वदता मैत्रेयेण प्रतिपादितम् । अन्यः पुनराह । अनु-

---

१ B C नियमबलीयस्त्वे. २ A तथा च रुत्वविधौ. ३ A इत्संज्ञा न भविष्यति.

नासिकविशिष्टस्य यद्गोरुत्वं तदप्यसिद्धबाधनमन्तरेण न सम्भवति । तयेरसंज्ञापि । तत्र यथाऽसिद्धत्वं बाधित्वानुनासिकप्रतिज्ञानमुत्वं प्रवर्तयति तयेरसंज्ञामपि प्रवर्तयति । न चोत्वमाश्रयात्सिद्धमिति वचनात्प्रवर्तते । विपक्षे प्रमाणाभावात् ॥ १९ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ भूपादो नाम तृतीयः पादः ॥

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥ २० ॥

पुनःप्रसङ्गविज्ञानात्सिद्धम् ॥ २१ ॥

वचनद्वयमिदं विप्रतिषेधसूत्रे (१।४।२) व्यक्तिजातिपक्षयोः फलभूतं परिभाषारूपेण पठ्यते । तथाहि । व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणस्य व्यापारभेदात्पर्यायेण द्वावपि विधी प्राप्तौ । यथा देवदत्तयज्ञदत्ताभ्यामेकत्र भाजने क्रमेण भुज्यते । तत्र " विप्रतिषेधे परम्०" (१।४।२) इत्यनेन विप्रतिषेधविषयो नियम्यते । विप्रतिषेधे परमेव न पूर्वमिति । न[1] चैतेन पूर्ववाक्यानर्थक्यम्[2] । विप्रतिषेधसूत्रेण (१।४।२) तस्यासत्त्वख्यापनात् । तदिदमुच्यते । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति । तस्यायमर्थः । सकृदेकवारं यद्बाधितं तद्बाधितमेवेति । गतौ विप्रतिषेधे । तेन " आज्जसेरसुक् " (७।१।५०) इत्यनेन परत्वादसुकि कृते पुनः शीभावो न भवति ये पूर्वास इति । तथा स्तात् स्तमित्यत्र तातङः स्थानिवत्त्वाद्द्विभावो न भवति " घ्वसोरेद्धावभ्यासलोपश्च " (६।४।११९) इति सस्यैत्वं च । एतच्च स्थानिवत्- (१।१।५६) सूत्रे भाष्ये व्याख्यातम् ॥

जातौ तु पदार्थे सकृदेकवारं लक्षणं प्रवर्तते । विषयान्तरे चोभयं चरितार्थमिति विप्रतिषेधविषयेऽप्रवृत्तिरेवोभयोः प्राप्नोति । यथोभयोस्तुल्यबलयोरेकः प्रैष्यो विरोधादेकस्यापि कार्ये न प्रवर्तते । तत्र "विप्रतिषेधे परं कार्यम् " (१।४।२) इत्यस्य परविधौ व्यापारात्पूर्वनिवृत्तावव्यापार इति ॥

ननु पूर्ववाक्यस्य प्रागेवोक्ता निवृत्तिस्तत्कथमिदानीं तद्विधानम्[3] । उच्यते । युगपद्विरोधादप्रवृत्तिरित्युक्तम् । परत्वात्परविधौ कृते विरोधाभावाद्युक्त एव पूर्वविधिः । तदिदमुच्यते । पुनःप्रसङ्गविज्ञानात्सिद्धमिति । तेन भिन्द्धकीत्यत्र परत्वाद्द्विभावे कृते पुनरकच् क्रियते । ईजतुरित्यत्र परत्वात्संप्रसारणे कृते पुनर्द्विर्वचनम् । यत्र पूर्वेण प्रवर्तमानेन परस्य बाधा तत्र सकृद्गतिपरिभाषा । यत्र तु पूर्वं प्रवर्तमानं परं न बाधते तत्र पुनःप्रसङ्गविज्ञानात्सिद्धमिति केषांचिन्मतम् । तदयुक्तम् । एवं ह्यक्षी इत्यत्र परत्वात् " ई च द्विवचने " (७।१।७७) इतीकारे कृते पुनर्नुम् स्यादेव । तस्माल्लक्ष्यस्थित्यैव ह्येतयोर्व्यवस्थेति ॥

---

१ B om. न. २ B C वाक्यस्यानर्थक्यम्. ३ B तद्विज्ञानम्.

अथ पुनःप्रसङ्गविज्ञानो[1]दित्यत्र निर्देशे पुनःशब्दे पद[2]त्वाश्रयः कथं विसर्जनीयः। यावतैकवाक्यतायां कर्मादीनामेकत्वादौ स्वादिभिर्भवितव्यम्। पुनःशब्दश्चाव्ययम्। अव्ययानि च[3] लिङ्गसंख्यारहितानि। उच्यते। पञ्चकपक्षे सामान्येन स्वादिविधानम्। ततो "बहुषु बहुवचनम्" (१।४।२१) इत्यनेन बहुष्वर्थेषु बहुवचनमेवेत्यर्थनियमेन प्रत्ययस्या[4]नियतत्वादव्ययेभ्यः स्वादयो विधन्त एव। यथापि बहुष्वर्थेष्वेव बहुवचनमिति प्रत्ययनियमः तथापि तुल्यजातीयापेक्षया नियमस्य यत्र संख्यास्ति संख्यान्तरं च व्यावर्त्य तत्रैव नियमेन भवितव्यम्। एवं च संख्याशब्देभ्यो देवदत्तयज्ञदत्ताविति द्वन्द्वसमासाच्च तथा वनस्याग्रेऽग्रेवणं प्राचीनं ग्रामादाम्रा इत्यत्रानभिधानात् सै[5]र्वस्वाद्यभावो वाच्यः। अत एव हि त्रिकपक्षेऽप्यनेकवाक्यतां स्वादिसूत्रे (४।१।२) वक्ष्यति न्यासकारः। "बहुषु बहुवचनम्" (१।४।२१) इत्यनेनानेकवाक्यतापीहाख्यायत इति। अथ यदा त्रिक एकवाक्यतापक्षस्तदा कथं स्वादयः। कथं च न सुः। एकत्वाद्यभावात्। यद्येवं वृक्षादिभ्योऽपि न प्राप्नुवन्ति। तत्र यथा वृक्षादिभ्यो "बहुषु बहुवचनम्[6]" (१।४।३१) इत्यादिना स्वादिभिरविधमाना एव संख्यादयोऽभिधीयन्ते। तथाऽव्ययेभ्योऽप्यभिधास्यन्ते। नैतत्। प्रत्यासत्त्या प्रातिपदिकार्थ एव यत्र संख्यादयः प्रातिपदिकेनानुक्तास्तत्र स्वादिभिः संख्यादयोऽभिधीयन्ते नान्यत्र। यथा "अजाद्यतष्टाप्" (४।१।४) इति स्त्रियामभिधेयायां विधीयमानष्टाब् वृक्षादिभ्यो न भवति। एवं तर्हि "अव्ययादाप्सुपः" (२।४।८२) इति ज्ञापकात्संख्याकर्मादिरहितेभ्योऽव्ययेभ्योऽपि[7] स्वादयो भवन्ति। तथा "बहुषु बहुवचनम्" (१।४।२१) इत्यत्र न्यासकृतोक्तम्। "अव्ययादाप्सुपः" (२।४।८२) इति ज्ञापकादव्ययेभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विधन्त एवेति ॥

तत्र रक्षितेनोक्तम्। "अव्ययादाप्सुपः" (२।४।८२) इति ज्ञापकं व्यक्तौ। अस्त्येव हि तस्य विषयः प्रलम्बते स्वरित्यादिरवकाशः। प्रलम्बते स्वरित्यत्र हि प्रलम्बनक्रियापेक्षया स्वःशब्दादवश्यमेवापादाने पञ्चम्या भवितव्यमतस्तस्या लुगर्थं सज् ज्ञापकं कथं स्यात्। तर्हि व्यक्तावलिङ्गमसंख्यं यदव्ययं नीचैरित्यादि तदर्थं यत्कृतं तज्ज्ञापकम्[8]। नन्वत्रापि "प्रादिपदिकार्थ०" (२।३।४६) इत्यादिना प्रातिपदिकार्थमात्रे विहितायाः प्रथमाया लुगर्थं स्यात् तत्कथं ज्ञापकम्। उच्यते। द्वितीयाद्यर्थं यत् कृतं तज्ज्ञापकम्। एतच्चासम्यक्। अव्ययाद् द्वितीयादिविधानस्य न किंचित्प्रयोजनम्। "सपूर्वायाः प्रथमाया विभाषा" (८।१।२६) इति विकल्पिततेमयादिविध्यभावः प्रयोजनमिति चेत्। ने[9]। प्रथमाविधानपक्षे तेषामवश्यंभावात्। एवं तर्हि द्वितीयाद्यन्तानां द्वितीयादिसमासः

---

१ A B विज्ञानात्सिद्धमिति निर्देशे. २ B transp. पदत्वाश्रयः and कथं विसर्जनीयः. ३ B om. च. ४ B अनित्यत्वात्. ५ P. सर्वसुबाद्यभावः. ६ B ins. विहितं after बहुवचनं. ७ B om. अपि. ८ After ज्ञापकं, P. ins. स्यात्. ९ A B om. न. C तन्न for न.

प्रयोजनमिति चेत् । एतदपि न । यतः प्रत्यासत्त्या तत्र श्रितादिनिमित्ता द्वितीया समस्यते । एवं षष्ठीत्यादावपि सुप्सुपेत्यधिकारात्तन्निमित्ता विभक्तिर्ग्रहीतव्या । उच्यते । प्रातिपदिकार्थ-(२।३।४६) सूत्रे अर्थग्रहणमनभिसंधाय ज्ञापकमिदम् । तदभिसंधाने हि ज्ञापकस्य प्रयोजनं नास्ति । अर्थग्रहणादेवाव्ययेभ्यः प्रथमायाः सिद्धत्वात् । अत एव प्रातिपदिकार्थ-(२।३।४६) सूत्रे रक्षितः । अर्थग्रहणमलिङ्गार्थम् । तच्चाव्ययम् । अत एव संख्यारहितेभ्योपि प्रथमा सिद्धेति " अव्ययादाप्सुपः " (२।४।८२) इति सूत्रं ज्ञापकं प्रपञ्चतयोक्तम् ॥ २१ ॥

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवत् ॥ २२ ॥

इयं परिभाषा विप्रतिषेध-(१।४।२) सूत्रे भाष्ये न्यासे च पठिता । तेन धौकामिः सौत्थितिरित्यादौ प्रविभज्यान्वाख्यानपक्षे बहिरङ्गाया वृद्धेर्द्विकल्पा-दन्तरङ्गौ यणेकादेशौ भवतः । तदेतदुदाहरणं दिङ्मात्रम् । " समर्थानां प्रथमाद्वा " (४।१।८२) इत्यत्र समर्थग्रहणात्समार्थितसर्वकार्यात्तद्धितेन भवितव्यमित्येवं यणेकादेशयोः सिद्धत्वात् । इदं तूदाहरणं वृक्ष इ इहेत्यादौ बहिरङ्गादकः सवर्णदीर्घादन्तरङ्गो गुणः । न चैतदसिद्धं बहिरङ्गमन्तरङ्ग इत्यनया परिभाषया सिध्यति । अचोरानन्तर्ये नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिरिति तस्याः प्रतिषिद्धत्वात् । नन्वेवं कृतेऽप्यत्र सवर्णदीर्घत्वे " अचः परस्मिन्पूर्वविधौ " (१।१।५७) इति स्थानिवद्भावादाद्गुणेन सिद्धं वृक्ष इहेति । नैतदस्ति । एकादेशस्य पूर्वग्रहणेन ग्रहणात् पदान्तविधित्वेन स्थानिवत्त्वप्रतिषेधात् । परादिग्रहणं तु न वाच्यम् । परादित्वेन न पदान्तादि-(१।१।५८) सूत्रव्यापारस्यायुक्तत्वात् । नन्वन्तर-ङ्गपरिभाषापि न प्राप्नोति । ' नाजानन्तर्ये ' इति प्रतिषेधादेव । तथाहि । यथा असिद्ध-परिभाषया " षत्वतुकोरसिद्धः" (६।१।८६) इत्यस्यानर्थकत्वं तथान्तरङ्गपरिभाषयापि । उच्यते । नैवान्तरङ्गपरिभाषया " षत्वतुकोरसिद्धः " (६।१।८६) इत्यस्यानर्थक्यम् । यतस्तुकोऽन्तरङ्गत्वात्प्राप्तिः । दीर्घस्य नित्यत्वात् । तत्र परत्वाद्दीर्घ एव प्राप्नोति ॥ यत्तूच्यते नित्यादप्यन्तरङ्गं बलीय इति तत्परत्वफलं न त्वपूर्वमिति । अथ वाऽस्त्वन्त-रङ्गत्वात्तुक् । दीर्घत्वे कृते निमित्तापायपरिभाषया तन्निवृत्तिः स्यादेव । तदेवं बहिरङ्गपरि-भाषयैवानर्थक्यं "षत्वतुकोरसिद्धः" (६।१।८६) इत्यस्य । अतस्तस्या एव 'नाजानन्तर्ये' इति प्रतिषेधः । किं च यद्यत्रान्तरङ्गपरिभाषायाः प्रतिषेधः स्यात्तदान्तरङ्गपरिभाषा निर्विषया स्यात् ॥

इयं च परिभाषा बहिरङ्गपरिभाषयैव सर्वकार्यस्य सिद्धत्वाद् भागवृत्तिकृता नाभ्युपगम्यते । तन्मते वृक्ष इहेत्यादावचोरानन्तर्ये यद्यपि बहिरङ्गपरिभाषा नास्ति तथापि पदसंस्कारपक्षे दोषप्रतिक्षेपो व्याख्येयः । यदाहुः—

---

१ C. प्रातिपदिकग्रहणमनाभिसंधाय. २ B om. नाजा......प्रक्लृप्तिरिति. ३ B च for इ. ४ P. निषेधादेव. ५ A om. एव.

" सुविचार्य पदस्यार्थं वाक्यं गृह्णन्ति सूरयः " इति ।

युक्तं चैतत् । अन्यथा वाक्यसंस्कारे वृक्ष इ इहेत्यादौ शब्दपरविप्रतिषेधेनान्तरङ्गमाद्गुणं बाधित्वा सवर्णदीर्घत्वमेव स्यात् । तथाहि " दिव उत् " (६।१।१३१) इत्यत्र दिवौकसो देवाः इत्यत्र उकारस्य यणादेशो रक्षितेनोक्तः । न चान्तरङ्गपरिभाषासामर्थ्याद् वृक्ष इ इहेत्यादावाद्गुणेनैव भवितव्यम् । एवं हि दिवौकस इत्यत्रापि इकारस्य यणादेशः स्यात् ।

अथास्या उदाहरणान्तरं कश्चिदाह । ऋत्विय इति । अत्र घैस्य इयादेशे कृते " सिति च " (१।४।१६) इति पदसंज्ञा अन्तरङ्गत्वादजादौ विधीयमानां बहिरङ्गां "यचि भम्" (१।४।१८) इति भसंज्ञां बाधते । समावेशस्तु नास्ति । एकसंज्ञाधिकारात् । एतच्चायुक्तम् । "सिति च" (१।४।१६) इति सूत्रारम्भादेव भसंज्ञाबाधकत्वस्य सिद्धत्वात् । अत एवैतदर्थता एकसंज्ञाधिकारस्य न घटते । तथाहि । स्वादिष्विति पदसंज्ञया " यचि भम् " (१।४।१८) इति भसंज्ञायाः समावेशे सिद्धे " सिति च " (१।४।१६) इति कृते यदि पुनः समावेशः स्यात्तदा " सिति च " (१।४।१६) इत्यनर्थकमेव स्यात् । अथैतत्स्यात् " यचि भम् " (१।४।१८) इत्यत्रैकसंज्ञाधिकाराभ्युपगमाद् भपदसंज्ञयोः समावेशो नास्ति । एवं च " सिति च " (१।४।१६) इत्यत्रासत्येकसंज्ञाधिकारे ऋत्विय इत्यत्र भपदसंज्ञयोः समावेशः स्यादेव । नन्वेवमपि " सिति च " (१।४।१६) इत्यनर्थकम् । तस्य ह्येतत्प्रयोजनम् । ऋत्वियः इत्यत्र सित्त्वात्पदत्वेन ओर्गुणो मा भूदिति । भसंज्ञासमावेशे तु स्यादेव " ओर्गुणः " (६।४।१४६) इति । एवं च " आकडारात्० " (१।४।१) इत्यत्र यदेतदनुन्यासकारेणोक्तम् ' अनवकाशायास्त्विदमुच्यते अयं ते योनिर्ऋत्विय इत्यत्र पदसंज्ञा भसंज्ञां बाधते ' इति तदयुक्तम् । नायुक्तम् । पदत्वस्यावग्रहार्थत्वात् ॥ २२ ॥

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ २३ ॥

यत्र पञ्चमीनिर्देशोऽस्ति सप्तमीनिर्देशश्चोपात्तोऽनुवृत्तो वा तत्र पञ्चमीनिर्देशस्य बलीयस्त्वात् " तस्मादित्युत्तरस्य " (१।१।६७) इति प्रवर्तते । तेन " आमि सर्वनाम्नः सुट् " (७।१।५२) इत्यत्रात इत्यनुवृत्तौ अदन्तात्सर्वनाम्न इत्यनया पञ्चम्या आमीत्यस्याः सप्तम्याः षष्ठ्यां परिकल्पितायामाम एव सुडागमो भवति ।

अयं च " विप्रतिषेधे परं कार्यम् " (१।४।२) इत्यस्यार्थः परिभाषारूपेण पठ्यते । तथाहि । " तस्मिन्निति निर्दिष्टे पूर्वस्य " (१।१।६६) इति सप्तमीनिर्देशः " इको यणचि " (६।१।७७) इति दध्यत्र मध्वत्रेत्यत्र सावकाशः । " तस्मादि-

१ A दिवौकसो इत्यत्र. २ A इकारस्य. ३ P. घस् तस्य. ४ A C. बाधस्य. ५ A om. न. ६ A C. इको यणचीत्यत्र कृतार्थो दध्यत्रेति.

त्युत्तरस्य " (१।१।६७) इति पञ्चमीनिर्देशो " रषाभ्यां नो णः० " (८।४।१) इत्यत्र कृतार्थः आस्तर्णिमिति । यत्र तु सप्तमीनिर्देशः पञ्चमीनिर्देशश्चोभयं कृतार्थं तत्रोभयप्राप्तौ परत्वात् " तस्मादित्युत्तरस्य " (१।१।६७) इति प्रवर्त्तते । तथाहि । " आमि सर्वनाम्नः सुट् " (७।१।५२) इत्यत्रात इति पञ्चमी "आज्जसेरसुक्" (७।१।५०) इत्यत्रासुग्विधौ कृतार्था । आमीति सप्तमी " त्रेस्त्रयः " (७।१।५३) इत्यत्र कृतार्था। उभयोस्तुल्यबलयोर्विरोधे परत्वात्पञ्चमी सप्तम्याः षष्ठीत्वं कल्पयाति । यत्र त्वनवकाशा सप्तमी तत्र सप्तमीनिर्देश एव पञ्चम्याः षष्ठीत्वं कल्पयति । यथा " आने मुक् " (७।२।८२) इत्यत्र आने इति सप्तमी निरवकाशा " अतो येयः " (७।२।८०) इत्यत्र अत इति कृतार्थायाः पञ्चम्याः षष्ठीत्वं कल्पयति । ततश्चाने परतोऽकारान्तस्यैवाङ्गस्य[1] मुग् भवति ॥

यद्येवं " ङः सि धुट् " (८।३।२९) इत्यत्र कथमनया सकारादेः परस्य धुडागमः । न हि सि इत्यस्याः सप्तम्याः कापि कृतार्थत्वम् । उच्यते । यथा सि इत्यस्याः सप्तम्या अनवकाशत्वं तथा ङः इत्यस्या अपि पञ्चम्याः । एवं चोभयोरनवकाशयोर्युक्तमेव परत्वम् । न च युगपदन्योन्यषष्ठीकल्पना शङ्क्या, नापि क्रमेण । " एकः पूर्वपरयोः " (६।१।८४) इत्यत्र पूर्वपरग्रहणात् । तदुक्तम् । न च युगपदुभये प्रकल्पिके पूर्वपरग्रहणादिति । न चैवं सप्तमीनिर्देशस्यानर्थक्यम् । लाघवार्थत्वात् । स[2] इति निर्देशे गौरवं स्यात् । एतच्च " ङः सि धुट् " (८।३।१९) इत्यत्र न्यासे उक्तम् । इह तु " दीर्घात्पदान्ताद्वा " (६।१।७६) इत्यत्र यद्यपि छ इति सप्तमी कृतार्था, तथापि तस्याः स्वरितासङ्गादिहानुवृत्ताया निरवकाशत्वाद्दीर्घादित्यस्याः पञ्चम्याः षष्ठीत्वं कल्पयति[3] । पञ्चमी तु पौर्वापर्यं प्रकल्प्य सावकाशा निवर्त्तते । तेनायमर्थो भवति । दीर्घादुत्तरो यश्छकारस्तस्मिन्परतः पूर्वस्यैव दीर्घस्य तुग्भवति तत्रास्या न व्यापार इति " तस्मादित्युत्तरस्य " (१।१।६७) इत्यत्र[4] न्यासः । " दीर्घात् " (६।१।७५) इत्यत्र तु न्यासकृता " तस्मादित्युत्तरस्य " (१।१।७७) इत्यत्र तस्मादिति योगविभागः कर्तव्यः । पूर्वसूत्रात्पूर्वस्येत्यनुवर्त्तते । तेन " दीर्घात् " (६।१।७५) इत्यादौ सत्यपि पञ्चमीनिर्देशे पूर्वस्यैव कार्यं भवति इत्युक्तम् ॥ २३ ॥

सर्वे विधयश्छन्दसि विकल्प्यन्ते ॥ २४ ॥

तेन ' धुरि दक्षिणायाम् ' इत्यत्रार्थे सप्तम्या विकल्पितत्वाच्छेषषष्ठीविधानाद्धुरि दक्षिणाया इति सिध्यति । तथा ' ये यूपाय तक्षति ' इत्यत्र तक्षतीति बहुत्वे एकवचनम् । अयं चार्थः " षष्ठीयुक्तश्छन्दसि वा " (१।४।९) इत्यत्र योगविभागेन साधितः । इयं च परिभाषा व्यत्ययो बहुलमित्यस्यैव प्रपञ्चः ॥ २४ ॥

१ A C om. अङ्गस्य. २ B स इति कृते गौरवं स्यात् । ३ B C P प्रकल्पयति.
४ A इति सूत्रे न्यासः.

प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ २५ ॥

प्रत्यये गृह्यमाणे यस्मादसौ विहितस्तदादेरेव भागस्य तत्प्रत्ययान्तस्य च ग्रहणं भवति। प्रयोजनं धातुप्रत्ययप्रातिपदिकतद्धितादयः। "सनाद्यन्ता धातवः (३।१।३२) इति यस्मात्सन् विहितस्तदादेस्तदन्तस्यैव धातुसंज्ञा चिकीर्षतीति। न संघातस्य प्राचिकीर्षदिति। "कृत्तद्धितसमासाश्च" (१।२।४६) इति कृत्तद्धितान्तस्य प्रातिपदिकसंज्ञा तदादेस्तदन्तस्यैव कारको गार्ग्य इति। न संघातस्य विप्रः कारको विप्रो गार्ग्य इति। "सुप आत्मनः क्यच्" (३।१।८) पुत्रमिच्छति पुत्रीयति। संघातान्न भवति महान्तं पुत्रमिच्छतीति। तद्धितविधौ "यञिञोश्च" (४।१।१०१) इति प्रत्यययोर्ग्रहणम्। यतस्तौ विहितौ तदादेरेव फक् प्रत्ययो भवति गार्ग्यायण इति। संघातान्न भवति विप्रो गार्ग्यायण[1] इति। "सुप्सुपा[2]" (२।१।४) इति समासो न संघातस्य। ऋद्धस्य राज्ञः पुरुष इति। स चायमर्थो यस्मात्प्रत्ययविधि-(१।४।१३) सूत्रे योगविभागेन साधितः। तथाहि। 'यस्मात्प्रत्ययविधिस्तदादि प्रत्यये' इति विगृह्यते। गृह्यमाणे इति चाध्याहर्त्तव्यम्। प्रत्यये गृह्यमाणे यस्मात्स विहितस्तदादिरेव गृह्यते न तु प्रत्ययान्तः संघात इति। अत एवाङ्गपादे यस्मादादि-(१।४।१३) सूत्रं कृत्वा "अङ्गस्य" (६।४।१) इति सूत्रं न खण्ड्यते॥

ननु तत्रापि योगविभागेन परिभाषा सिध्यति। सत्यं सिध्यति। किं तु "न स्त्रीप्रत्यये चानुपसर्जने" इति द्वितीया न सिध्यति। तथाहि। अत्र कृते "नेयङुवङ्स्थानावस्त्री" (१।४।४) इत्यतोऽस्त्रीग्रहणमनुवर्त्तते। तत्रानुवृत्तिसामर्थ्यात्स्त्रीप्रत्ययस्य ग्रहणम्। प्रधाने च कार्यसंप्रत्ययात् 'न स्त्रीप्रत्यये चानुपसर्जने' इति लभ्यते। तर्हि प्रकरणमेवेदमङ्गपादे क्रियताम्। नचैवमततक्षादित्यत्र लघुसंज्ञागुरुसंज्ञयोः समावेशः स्यादिति वाच्यम्। लघुसंज्ञाप्रणयनवैयर्थ्यप्रसङ्गात्। अन्यथा लघुप्रदेशे ह्रस्वग्रहणमेव कुर्यात्। उच्यते। यस्मादादिसू[3]त्रात्तदादिग्रहणं 'सुप्तिङन्तं पदम्' (१।४।१४) इत्यत्रानुवर्त्तते। तदर्थमिह प्रकरणम्। तेन द्विःप्रयोगो द्विर्वचनमिति पक्षे तदादिग्रहणात् पचसिपचासि इति समुदायस्य 'सुप्तिङन्तं पदम्' (१।४।१४) इति पदसंज्ञा सिध्यति। तथाहि। अर्थरूपयोः साम्यात् स एव पच्शब्दः स एव तिङ्। यः पूर्वस्माद्विहितः स एव परस्मादपि विहितः। यः परस्मादपि विहितः स पूर्वस्मादपीति तदादिग्रहणात् समुदायस्य पदत्वम्। तस्य च पदत्वे 'ओंपचसिपचासि देवदत्ता३' इत्यत्र "आम एकान्तरमामन्त्रितमनन्तिके" (८।१।५५) इत्येकान्तरता सिद्धा भवति। एतच्च 'सर्वस्य द्वे' (८।१।१) इत्यत्र भाष्यव्याख्याने रक्षितेनोक्तम्॥

---

१ After गार्ग्यायण इति, A ins. एवं विप्रो दाक्षायणः. २ C om. सुप्सुपा… पुरुष इति. ३ A om. सूत्रात्तदादि.

अत्रोच्यते । नन्वेकैकस्मादप्यत्र तिङ् विहितस्ततोनेकं पदम् । उच्यते । समुदायेन वाक्यपरिसमाप्तिरिति समुदायस्य पदत्वम् । यथा समुदायस्यावयवानां चैकत्वे समुदायस्य द्विर्वचनं भवति नावयवानां पपाचेति तथेहापि समुदायस्य पदत्वम् । एवं हि[1] समुदायशास्त्रमनुगृहीतं भवति । अवयवयोस्तु पदसंज्ञायां समुदायस्य त्यागात्तद्विषयं शास्त्रं हीनं स्यात् । तदादिग्रहणानुवृत्तिरप्यपार्था स्यात । अत्र तु पक्षे अन्धोऽन्धो दुःखीत्यादौ प्रत्येकं पदत्वाभावे पदकार्यं न स्यात । तदर्थं प्रत्येकं वाक्यपरिसमाप्त्या तत्र पदत्वे पदकार्यमनुसन्धेयम् ॥

अन्यस्त्वाह—गौरीभ्यामित्यत्र गुरुसंज्ञायां "गुरोरनृतः०" (८।२।८६) इति प्लुतः स्यात् । स्थिते त्वेकसंज्ञाधिकारे नदीसंज्ञैवापवादत्वान्न गुरुसंज्ञेति । ननु स्थितेप्येकसंज्ञाधिकारे गुरुसंज्ञानदीसंज्ञयोर्बाध्यबाधकभावो नास्ति । भिन्नविषयत्वात् । तथाहि । गुरुसंज्ञा वर्णमात्रस्य नदीसंज्ञा त्वीकारान्तस्य । उच्यते । वर्णमात्रस्यैव केषांचिन्मते नदीसंज्ञा । न चास्मिन् पक्षे लक्ष्मीप्रभृतिषु स्त्रीत्वाभावान्नदीसंज्ञा न प्राप्नोतीति वाच्यम् । यत्समुदायगतं स्त्रीत्वमवयवे समारोप्य नदीसंज्ञाविधानात् । ज्ञापकं चात्र "नेयङुवङ्स्थानावस्त्री" (१।४।४) इति प्रतिषेधः । तथा च "आच्छीनद्योर्नुम्" (७।१।८०) इत्यत्र शीनद्योः परतः इति वृत्तावुक्तम् । तदेवं वर्णपक्षे दोषः । तस्माद्यथान्यासमेवास्तु । एतत्त्वनागमम् ॥ २५ ॥

न स्त्रीप्रत्यये चानुपसर्जने ॥ २६ ॥

येयं प्रत्ययग्रहणपरिभाषा सा स्त्रीप्रत्यये ऽनुपसर्जने ग्राहिका न भवति । तेन स्त्र्यधिकारप्रत्ययग्रहणे संघातोऽपि गृह्यते । न तु यतः स्त्रीप्रत्ययस्तदादिरेवेति वाक्यार्थः । तेन "स्त्रीभ्यो ढक्" (४।१।१२०) इति यतोऽण् तदन्तात्कारशब्दान् ङीप् । नै[3] तदादेस्तदन्तादेव ढक् प्रत्ययः । अपि तु समुदायादेव कौम्भकारेय इति । अन्यथा हि अवयवस्य वृद्धिस्वरौ स्याताम् ॥ नन्वणन्तान् ङीप् विधीयमानः कृद्ग्रहणपरिभाषया कुम्भकारशब्दादेव भविष्यति । उच्यते । "टिड्ढाणञ्०" (४।१।१५) इत्यत्राण्णिति[4] न कृद्ग्रहणम् । अपि तु कृदकृद्ग्रहणम् ॥ ननु[5] प्रत्ययग्रहणपरिभाषाया अभावाद्यथा स्त्रीप्रत्ययान्ताड् ढग्विधीयमानः कुम्भकारीत्यस्मात्समुदायशब्दाद्भवति तथा कारशब्दादपि[6] कचित्स्यात् । नैतत् । प्राधान्यात्समुदायादेव प्रवृत्तेः ॥ तथा "ष्यङः संप्रसारणम्०" (६।१।१३) इत्यत्र[7] ष्यङः स्त्र्यधिकारे विधानात् स्त्रीत्वं, स्थानिवद्भावेन प्रत्ययत्वम् । अतस्तद्ग्रहणे प्रत्ययग्रहणपरिभाषाया निषेधात् ष्यङ्मात्रस्य संप्रसारणं परमकारीषगन्धीपुत्र इति ॥ अनुपसर्जन इति प्रतिषेधादुपसर्जने स्त्रीप्रत्यये प्रत्ययग्रहणपरिभाषा प्रवर्त्तत एव । तेनातिकारीषगन्ध्यपुत्रोऽतिकारीषगन्ध्यपतिरित्यत्र संप्रसारणं न भवति ॥ नन्वेवमपि प्रधाने कार्यसंप्रत्यया-

१ A om. हि. २ A om. अपि. ३ B. न तदादेरेव ढक्; C न तदन्तादेव ढक्. ४ A om. अत्र अण्. ५ A om. ननु. ६ A कुम्भाकार शब्दात्. ७ A om. अत्र ष्यङः.

प्रधानप्रत्ययग्रहण एव प्रत्ययग्रहणपरिभाषया भवितव्यम् । एवं चातिकारीषगन्ध्यपुत्र इत्यत्र संप्रसारणं स्यादेव । उच्यते । यद्यत्र संप्रसारणं स्यात्तदानुपसर्जन इति प्रतिषेधोऽनर्थकः स्यात् ॥

नन्वेवमप्यर्धपिप्पलीत्यत्रापि प्रत्ययग्रहणपरिभाषया हल्ङ्यादिना (६।१।६८) सुलोपो न प्राप्नोति । स्त्रीप्रत्ययान्तस्योपसर्जनत्वात् । उच्यते । "एकविभक्ति चापूर्वनिपाते" [१, २, ४४] इत्यत्रानुवृत्तविभाषाग्रहणस्य व्यवस्थितविभाषाविज्ञानादुपसर्जनसंज्ञाया अभावः कृतः । अतो 'न स्त्रीप्रत्यये०' इति तदादितदन्तनियमनिषेधो भवत्येव । ननु शास्त्रीयोपसर्जनसंज्ञा मा भूत् । लौकिकं यदुपसर्जनं तस्मिन्सति न स्त्रीप्रत्यय इति प्रवर्त्तितुं नोत्सहते अनुपसर्जन इति प्रतिषेधात् । ततश्च प्रत्ययग्रहणपरिभाषया तदादिनियमेन भवितव्यमेव । उपसर्जग्रहणेन लौकिकमुपसर्जनं गृह्यत एव । तथाहि । पञ्चखट्वीत्यत्र समुदायिभ्योऽन्यः समुदायः इत्येतस्मिन्दर्शने शास्त्रीयोपसर्जनसंज्ञाभावेऽपि लौकिकमुपसर्जनमाश्रित्य "गोस्त्रियोरुपसर्जनस्य" (१।२।४८) इति ह्रस्वमुक्त्वा "द्विगोः" (४।१।२१) इति ङीबुक्तः ॥ उच्यते । "एकविभक्ति चापूर्वनिपाते" (१।२।४८) इत्यत्रानुवृत्तविभाषाग्रहणस्य व्यवस्थितविभाषाविज्ञानाद् यथार्धपिप्पलीत्यत्र शास्त्रीयोपसर्जनाभावेन लौकिकोपसर्जनाश्रयं ह्रस्वत्वं न भवति तथानुपसर्जन इति प्रतिषेधोऽपि न भवति ॥

अथ वा हल्ङ्यादि–(६।१।६८) सूत्रे दीर्घग्रहणात् क्वचिदुपसर्जनस्त्रीप्रत्ययेऽपि 'न स्त्रीप्रत्यये०' इत्येवात्र वर्त्तत इत्याहुः । तेनार्धपिप्पलीत्यत्र हल्ङ्यादि–(३।१।६८) लोपः सिध्यति । ननु कथं ज्ञापकम् । यावता विपक्षे 'हे अम्ब' 'हे नदि' इत्यत्र सुलोपो मा भूदित्येवमर्थं दीर्घग्रहणं कर्त्तव्यम् । नन्वत्र भवितव्यमेव "एङ्ह्रस्वात्संबुद्धेः" (६।१।६९) इति सुलोपेन । न च दीर्घग्रहणात्तेनापि न भवितव्यमिति वाच्यम् । अन्यथा हि हल्ङ्यादि–(६।१।६८) सूत्रे दीर्घग्रहणं "एङ्ह्रस्वात्०" (६।१।६९) इति सूत्रं चाकृत्वा 'ह्रस्वङ्योरड्यापः संबुद्धेः' इति कुर्यात् । अत एवेह 'हे अम्ब' 'हे नदि' इत्यादौ सुलोपो न भविष्यतीति । नन्वेवमपि बदर्याः फलं विकार इति "तस्य विकारः" (४।३।१३४) इत्यर्थे "अनुदात्तादेश्च०" (४।३।१४०) इत्यञः "फले लुक्" (४।३।१६३) इति लुकि "लुक् तद्धितलुकि" (१।२।४९) इति ङीपोऽपि लुकि कृतेऽसति दीर्घग्रहणे प्रत्ययग्रहणेन बदरमित्यत्र सुलोपः स्याद् स मा भूदिति सार्थकं दीर्घग्रहणम् । उच्यते । परत्वादिह नपुंसकादमा सुलोपो बाधनीयः । व्यक्तिपदार्थाश्रयणादुक्तमिति वा ॥ २६ ॥

---

१ A अनुपसर्जनप्रतिषेधः. २ A एवं for एवमपि. ३ A हल्ङ्यादिलोपो न प्राप्नोति. ४ A om. इति तस्य विकारः.

संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति ॥ २७ ॥

तेन " तरप्तमपौ घः " (१।१।२२) इति [1]तरप्मात्रस्य घसंज्ञायां " घरूप-कल्प० " (६।३।४३) इति घे ह्रस्व उच्यमानस्तरपि भवति । न तु तरबन्ते गौरी ब्राह्मणितरेति । तथा "क्तक्तवतू निष्ठा" (१।१।२६) इति क्तक्तवत्वोरेव निष्ठासंज्ञा । न तु तदन्तयोः । तेन दृषत्तीर्णेत्यत्र दृषदो दकारात्परस्य नत्वाभावो दकारस्य च पूर्वस्येति ॥

ननु संज्ञाविधौ प्रत्ययग्रहणपरिभाषा मा भूत् । ह्रस्वविधौ तु घान्ते एवोत्तरपदे ह्रस्वत्वेन भाव्यम् । उच्यते । " हृदयस्य हृल्लेखयदण्लासेषु " (६।३।५०) इत्यत्राण्ग्रहणं कृत्वा लेखग्रहणाद्ध्रस्वविधावपि न तदन्तविधिः । "रदाभ्याम्०" (८।२।४२) इति नत्वविधावपि संज्ञाविधौ तदन्तविधिप्रतिषेधसामर्थ्यादेव न तदन्तविज्ञानम् ॥ ननु ह्रस्वविधौ तदन्तविधिनिषेधस्य कृतार्थत्वात् सामर्थ्यमयुक्तम् । उच्यते । यदि संज्ञाविधौ तदन्तविधिप्रतिषेधस्य तरप्तमब्विधावेव प्रयोजनं तदा " सुप्तिङन्तं पदम् " (१।४।१४) इत्यत्रान्तग्रहणमकृत्वा संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्तीत्यपज्ञापयित्वा ' तरप्तमपौ पितौ घः 'इति क्रियताम् । अयं चार्थः–'पितौ तरप्तमपौ घसंज्ञौ भवतः' इति । अन्तग्रहणात्तु संज्ञाविधाव[2]इत्यादेरन्योऽपि विषय इति । अथ वाऽत्रत्यविधौ प्रत्ययग्रहणपरिभाषा नास्ति निष्ठाशब्दस्य [3]तकारस्य विशेषणत्वेनोपादानात् ॥

" कृत्तद्धितसमासाश्च " (१।२।४३) इत्यत्र कृत्तद्धितग्रहणेन तदन्तस्यैव संज्ञा । न तत्रेयमुपतिष्ठते । यतोऽप्रत्यय इति प्रतिषेधे प्राप्ते कृत्तद्धितयोः संज्ञाऽऽरभ्यते । अप्रत्यय इति च प्रत्ययान्तस्य प्रतिषेध इत्युक्तम् । तेन तदन्तस्य प्रतिषेधे प्राप्ते संज्ञाऽऽरभ्यमाणा तदन्तस्यैव भवति । " सात्पदाद्योः (८।३।१११) इत्यत्र साद्ग्रहणाच्च । यदि केवलस्य तद्धितस्य संज्ञा स्यान्न तदन्तस्य ततः [4]सातेः प्रातिपदिकत्वात् ततः सुपि पदादित्वात् षत्वप्रतिषेधे सिद्धे साद्ग्रहणमनर्थकं स्यात् । " सुपि स्थः " (३।२।४) इत्यादौ तु सुब्ग्रहणे तदन्तस्यो[5]पपदसंज्ञार्थो यत्नः कर्त्तव्यः ॥

ज्ञापकं त्वस्याः सुप्तिङन्तं पदमित्यत्रान्तग्रहणम् । सुप्तिङोः प्रत्ययत्वात् प्रत्ययग्रहणपरिभाषयैव तदन्तत्वे सिद्धे अन्तग्रहणमिहानर्थकं स्यात् ॥ २७ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ का[6]रकपादो नाम प्रथमाध्यायस्य चतुर्थः पादः ॥

इति प्रथमोऽध्यायः ॥

---

१ A तरम्मात्रस्य. २ A इत्यस्यान्यो विष. ३ A तकारविशेषणत्वेन. ४ A om. सातेः प्रातिपदिकत्वात्ततः सुपि. ५ A उपपदसंज्ञाया. ६ D कद्धारपादो नाम.

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ २८ ॥

यत्र प्रातिपदिकं गृह्यते तत्र लिङ्गविशिष्टस्य ङ्याबन्तस्यापि ग्रहणं भवति । लिङ्गग्रहणेनात्र लिङ्गाभिव्यक्तिहेतवष्टाबादयो गृह्यन्ते । अभिधाने अभिधेयोपचारात् । तेन यथेह भवति "लोहितादिडाज्भ्यः क्यष्" (३।१।१३) लोहितायते तथेहापि लोहिनीयते । तथा "सर्वनाम्नस्तृतीया च" (२।३।७२) इति यथेह भवति भवता हेतुना । तथेहापि भवत्या हेतुनेति ॥

केचित्तु "अचित्तहस्तिधेनोष्ठक्" (४।२।४७) इति यथा हस्तिनां समूहो हास्तिकमिति भवति तथा हस्तिनीनां समूहो हास्तिकमित्याहुः । तदशोभनम् । ठगुत्पत्तेः प्रागेव "भस्याढे तद्धिते" (६।३।३५ वा. ११) इति पुंवद्भावात् । न च "जातेश्च" (६।३।४१) इति पुंवद्भावप्रतिषेधोऽस्ति । यत औपसंख्यानिकस्य तेन प्रतिषेधो न क्रियते । एतच्च प्रवाहणेयीभार्यः इत्यत्र "जातेश्च" (६।३।४१) इति पुंवद्भावप्रतिषेधे सिद्धे "वृद्धिनिमित्तस्य०" (६।३।३९) इति पुनः पुंवद्भावप्रतिषेधार्थं "प्रवाहणस्य ढे" (७।३।८) इति यदुत्तरपदवृद्धिविधानं कृतं तेन "जातेश्च" (६।३।४१) इत्यस्यानित्यत्वं ज्ञापितम् । तेन "जातेश्च" (६।३।४१) इत्यौपसंख्यानिकस्य प्रतिषेधो न भवतीति तत्र न्यासे व्याख्यातम् । अवश्यं चैतत् । अन्यथा स्थितेऽपि हास्तिकमित्यत्र "भस्याढे०" (६।३।३५ वा. ११) इत्यस्य "जातेश्च" (६।३।४१) इति प्रतिषेधात् पुंवद्भावो न स्यात् । अथ "भस्याढे०" (६।३।३५ वा. ११) इत्यत्र तद्धिते इति परसप्तमी न विषयसप्तमीति चेन्न । "भिक्षादिभ्योऽण्" (४।२।३८) इत्यत्र विषयसप्तम्या व्याख्यातत्वात् । तत्र ह्युक्तं युवतिशब्दस्य पाठो "भस्याढे तद्धिते" (६।३।३५ वा. ११) इति पुंवद्भावप्रतिषेधार्थः यौवतमिति । अन्यथा हि तिप्रत्ययान्तस्य युवतिशब्दस्यानुदात्तादित्वात् "अनुदात्तादेरञ्" (४।२।४४) इत्यञ्बाधनार्थः स्यात् । तथा "अणिञोरनार्षयोः०" (४।१।७८) इत्यत्र विषयसप्तमीत्वमस्या रक्षितेनोक्तम् । उच्यते । ये परसप्तमीमाश्रित्य "अनुदात्तादेश्च" (४।२।१४) इत्यञ्बाधनार्थमेव "भिक्षादिभ्योण्" (४।२।३८) इत्यत्र युवतिशब्दस्य पाठमिच्छन्ति तन्मतेन द्रष्टव्यमिदम् । अत एव भागवृत्तिकारो युवतीनां समूहो यौवनमित्याह । दृश्यते च ।

'रूपलावण्यसंपन्नं कलाकुशलयौवनम् ।
यस्य पुण्यकृतः प्रेष्यं सफलं तस्य जीवितम्' इति ॥

एतस्मिन्नेव दर्शने ङ्याप्–(४।१।१) सूत्रे रक्षितेनास्याः परिभाषाया हस्तिनीनां समूहो हास्तिकमित्युदाहरणमुक्तम् ॥

---

१ A लोहिनायते. २ A अतः for यतः. ३ A अनुदात्तादेरञ्बाधनार्थः. ४ AC अनुदात्तादेरञित्यस्यैव बाधकं भिक्षादिभ्योण्°.

ज्ञापकं चास्या भाष्यकारेण ' युवा खलतिपलितवलिनजरतीभिः ' (२।१।६७) इत्यत्र समानाधिकरणाधिकारे युवजरत्योः समासविधानमुक्तम् । अन्यथा यद्येषा न स्यात्तदाऽनयोः सामानाधिकरण्यानुपपत्तेः समासोऽघटमानः स्यात् । अत्रोच्यते । ननु सत्यपि परिभाषाया अस्तित्वे युवतिजरत्योर्भिन्नार्थत्वादनुपपन्न एव समासः । तथाहि । युवतिर्द्वितीयवयाः । जरती तु वृद्धाभिधीयते । उच्यते । युवतिर्जरतीव चाञ्चल्यविरहात् जरती वा युवतिरिव चाञ्चल्यादिति युवतिजरत्योः सामानाधिकरण्यमस्ति । यथैवं युवा जरतीव उच्छूनस्तनत्वात् श्मश्रुशून्यत्वाच्चेति । तथा युवेव जरती प्रागल्भ्यात् । ततश्चात्रापि सामानाधिकरण्यमस्ति तत्कथं परिभाषा ज्ञाप्यते । उच्यते । युवजरतीत्यत्र यूनो जरत्या सह समासे कृते तथोपचरितं सामानाधिकरण्यं न प्रतीयते स्वभावात् यथा पञ्चभिर्भुक्तमस्येत्यस्यार्थः पञ्चभुक्तशब्देन । एतच्च भाष्यकारादिवर्णितलिङ्गविशिष्टपरिभाषाया अन्यथानुपपत्त्यानुमीयते ॥

ननु यदि सामानाधिकरण्यानुपपत्तेः परिभाषाज्ञापनं तर्हि विपरितोऽर्थः किमिति न ज्ञाप्यते । लिङ्गविशिष्टग्रहणे प्रातिपदिकस्यापि ग्रहणमिति । प्रयोजनं चापि "रेवतीजगतीहविष्याभ्यः प्रशस्ये " (४।४।१२२) इत्यत्र जगतीग्रहणेन जगतोऽपि ग्रहणमिति । तथैव " एण्या ढञ् " (४।३।१५९) इत्यत्र एणीग्रहणेन एणस्यापि ग्रहणमिति । उच्यते । यदि विपरीतोऽर्थो ज्ञापितः स्यात्तदा " कुमारः श्रमणादिभिः " (२।१।७०) इत्यत्र श्रमणादीनां स्त्रीलिङ्गानां निर्देशोऽनर्थकः स्यात् । नन्वेवमपि जरत्या समास उच्यमानो जरता न प्राप्नोति युवजरन्निति । नैतदस्ति । वृत्त्यन्तरे जरद्भिरिति पठ्यते । उभयथा ह्याचार्येण शिष्याः प्रतिपादिता इत्युभयं सिध्यतीति युवखलतीत्यत्र न्यासः ॥

स्वरूपविधिविषयेऽस्वरूपविधिविषये च सामान्येन परिभाषेयम् । ज्ञापकमप्याहुः । " रोणी " (४।२।७८) इति । कुत्सितोऽयं निर्देशः प्रथमान्तत्वात् । प्रत्ययविधौ पञ्चमी न्याय्या । तत्र यथा प्राकरणिकी पञ्चम्यतिक्रम्यते तथा ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीत्येतदपि वचनम् । तेन यथा रौण इत्यत्राण् भवति तथाऽऽजकरौण इत्यत्रापि । ननु ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति तदन्तविधिर्निषिध्यते । न चेदं रोणीति प्रातिपदिकं स्त्रीप्रत्ययान्तत्वात् । एवं तर्हि तज् ज्ञापयत्यस्वरूपविधिविषये परिभाषा प्रवर्तत इति । तेन कुमारीमाचष्टे कुमारयतीत्यस्य सिद्ध्यै बहुलवचनं नातिक्रियते ॥

अनित्या चेयम् । तच्चानित्यत्वं " शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटी० " (३।२।९ वा. १) इत्यत्र घटीग्रहणेन ज्ञापितम् । तेन " आन्महतः० " (६।३।४६) इत्यादिना महतीप्रिय इत्यत्रात्त्वं न भवति । " द्विषत्परयोस्तापेः " (३।२।३९) इत्यत्र तु द्विषतीं तापयतीत्यत्र द्वितकारकनिर्देशात् खच्प्रत्ययाभावो वृत्तिकृता व्याख्यातः ।

१ A C परिभाषास्तित्वे. २ A om. ननु यदि....न ज्ञाप्यते. ३ A C ग्राहिताः. ४ A प्राकरणिका. ५ A अरूपविधि°. C स्वरूपविधि°.

"राजाहःसखिभ्यष्टच्" (५।४।९१) इत्यत्रापि राजशब्दस्यापि पूर्वनिपातकरणान्महाराज्ञीत्यत्र टच्प्रत्ययाभावो वृत्तावुक्तः ॥

प्रातिपदिकग्रहणे इत्यत्र षष्ठीसमासः । स च "समर्थः पदविधिः" (२।१।१) इत्येतत्परिभाषोपस्थानाद् भवति । तस्याः परिभाषाया अयमर्थः । पदानां विधिः समर्थो भवतीति । विधिशब्दश्चात्र कर्मसाधनः । विधीयते इति विधिः । न भावसाधनो विधानं विधिः । नाप्याधिकरणसाधनः पदानि विधीयन्तेऽस्मिन्निति पदविधिः । "कर्मण्यधिकरणे च" (३।३।९३) इति ल्युडपवादः किप्रत्ययः । तत्र कर्मसाधनग्रहणे "तत्रोपपदं सप्तमीस्थम्" (३।१।९२) इत्यत्रोपपदमिति महत्याः संज्ञायाः करणं ज्ञापकम् । तथाहि । अन्वर्थसंज्ञेयं महती उपपदामिति तेन समर्थपरिभाषोपस्थानात् महान्तं कुम्भं करोतीत्यत्र सापेक्षत्वेनासामर्थ्यात्कर्मण्यण्प्रत्ययो न भवति । एतच्च प्रयोजनमेवमुपपद्यते यद्यत्र कर्मसाधनस्य विधिशब्दस्य ग्रहणं नान्यथेति ॥

यत्तु तत्र मैत्रेयेणोक्तम् "विधीयते विधिः । एतेन कर्मणि किप्रत्ययान्ततामाचष्टे । करणाधिकरणयोर्हि ल्युटा किप्रत्ययो बाध्यते । न च तत्र वासरूप–(३।१।९४) विधिरस्ति । 'क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति' (परि. ३६) इति वचनात् संप्रदानापादाने[1] च निरवतारो[2] विपूर्वस्य धात्रः करोत्यर्थत्वात् । भावसाधनस्तु संभवन्नपि न्यासकारेण निरस्तः" इति । तत्राधिकरणे किप्रत्ययो नास्तीति यदुक्तम् तदयुक्तम् । यस्मात् पदशब्दे कर्मण्युपपदे "कर्मण्यधिकरणे च" (३।३।९३) इति ल्युडपवादः किप्रत्ययोऽस्त्येव । उच्यते । यथा केवलं विधिशब्दमुपक्रम्य न्यासकृतोक्तं मैत्रेयेणापि तथाभिधानाददोषः । तथाहि । तत्र कर्मोपपदत्वाभावात् "कर्मण्याधिकरणे च" (३।३।९३) इत्यस्य न प्राप्तिः । ननु तथाप्युत्तरकालं पदशब्दस्य कर्मणोऽभिसंबन्धात किप्रत्ययविषयोऽयमिति 'परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते' इति ल्युट्[4] प्रवर्त्तितुं नोत्सहते । उच्यते । पदसंस्कारपक्षेऽन्तरङ्गत्वात्प्रवर्त्तितो ल्युट् किप्रत्ययेन बाधितुं न शक्यते श्वः करिष्यतीत्यत्र यथा लुटा लृट् प्रत्ययः । एतच्चासम्यक् । श्वः करिष्यतीत्यत्र युक्ता लृटा लुटो बाधा । लुट्प्रत्ययस्योपपदसंबन्धेनाविधानात । किप्रत्ययस्य तु कर्मोपपदसंबन्धेन विधानात[3] सर्वदा वाक्यसंस्कार एव युक्त इत्याहुः ॥ २८ ॥

विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ २९ ॥

विभक्त्याश्रयेषु कार्येषु लिङ्गविशिष्टपरिभाषा न प्रवर्त्तते । तेन गोमतीत्यत्र "उगिदचाम्०" (७।१।७०) इति नुम्न भवति । तथा सुपुंसीत्यत्र "पुंसोऽसुङ्" (७।१।८९) नेति । युवतीः पश्येत्यत्र "श्वयुवमघोनामतद्धिते" (६।४।१३३) इति संप्रसारणं न भवति । अन्ये त्वाहुः "अल्लोपोऽनः" (६।४।१३४) इत्यत्रान इति योगविभागादन्ग्रहणाभिसंबन्धादन्नन्तानां श्वयुवमघोनां संप्रसारणम् । युक्तं चैतत् ।

---

१ C om. अपादाने च. २ P. निरवतारे. ३ P. तथा विधानात्. ४ A om. ल्युट्......प्रवर्तितो.

अन्यथा यथनया परिभाषया संप्रसारणाभावो विज्ञायते तदा युवतिशब्दात् "कृदिकारादक्तिनः" (४।१।४५ गणसूत्र.) इति ङीषि कृते युवतीत्यत्र संप्रसारणं स्यादेव। इयं च परिभाषा "युवोरनाकौ" (७।१।१) इत्यत्र भाष्ये पठिता। मतुवसोरित्यत्र न्यासकारेण व्याख्याता। एतावतैव प्रमाणम्॥ २९॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ समर्थपादो नाम द्वितीयाध्यायस्य प्रथमः पादः॥

सूत्रे लिङ्गवचनमतन्त्रम्॥ ३०॥

तेन "कर्मणा यमभिप्रैति०" (१।४।३२) इत्यत्र यामिति पुल्लिङ्गेनैकवचनेन च निर्देशस्यातन्त्रत्वात् लिङ्गान्तरे वचनान्तरे च संज्ञा भवति। ब्राह्मण्यै ददाति ब्राह्मणेभ्यो ददाति। न्यायसिद्धोऽयमर्थः। सूत्रे धान्यपलालन्यायेन[1] लिङ्गवचनयोरुपादानात्। ज्ञापकं चात्रार्थे "आ कडारादेका संज्ञा" (१।४।१) इत्यत्रैकाग्रहणम्। "अर्धं नपुंसकम्" (२।२।२) इत्यत्र नपुंसकग्रहणं च। "द्युद्भ्यो लुङि" (१।३।९१) इत्यत्र ह्येकवचनेन निर्देशे कर्तव्ये यद्बहुवचनं तत्सामर्थ्यान्नेयं प्रवर्त्तते॥ ३०॥

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थः॥ ३१॥

तेन "अचश्छन्दस्यसर्वनामस्थानम्" (६।१।१७०) इति सर्वनामस्थानसदृशमसर्वनामस्थानं विभक्तिर्गृह्यते। अस्या भाष्येऽर्थो व्याख्यातः। नञिवयुक्तमन्यस्मिन्सदृशाधिकरणे[2] वर्त्तते इति। एवं चान्यादिति प्रथमान्तप्रतिरूपको निपातोऽन्यस्मिन्नित्यर्थे वर्त्तत इति विज्ञेयम्॥

अन्यः पुनराह। नञिवयुक्तं शब्दरूपं सदृशाधिकरणे वर्त्तते। कुतः। यस्मादन्यच्छब्दरूपं मुख्यार्थवाचिशब्दरूपादित्यर्थः। तदेवं नञिवशब्दाभ्यां मुख्यादर्थाद् व्यवच्छिद्य गौणेऽर्थे शब्दो व्यवस्थाप्यते। तथा ह्यर्थ इति। तादृश एवार्थः प्रतीयत इत्यर्थः[3]। एतेनास्यार्थस्य प्रतीतिसिद्धत्वं दर्शयति। सा चैषा प्रतीतिर्नञ्समासं कुर्वता आचार्येण व्यक्तीकृता। तथाहि। क्षत्रियार्थे उपचरितो[5] यो ब्राह्मणशब्दस्तेन सह नञ् समस्यते न ब्राह्मणोऽब्राह्मण इति। अत एव तत्र नञा मुख्यादर्थाद्व्यविच्छिद्य गौणेऽर्थे व्यवस्थाप्यते। यथा नीलं च तदुत्पलं चेति नीलोत्पलमिति[6] नीलगुणेतरगुणेभ्यो व्यवच्छिद्य नीलगुणे उत्पलं व्यवस्थाप्यते। इयांस्तु विशेषः। केवलः प्रयुक्तोऽयं ब्राह्मणशब्दो मुख्यमेवार्थं गमयति। प्रसिद्धिवशात्। गौणं तु नञ्संनिकर्षात्। तत्रोपचरितस्य क्षत्रियार्थस्याभिधानात्। तदेवं पर्युदासे नञ् आख्यातो[7] भवति। एवं चात्र ह्मण इत्यस्य तत्पुरुषस्योत्तरपदार्थप्रधानतोपपद्यते। तस्यां च सत्यामनेकमित्यत्रैकवचनान्तता सिध्यति। तथाहि। भ्रमवशाद् द्वित्वादावर्थे लोक एकार्थस्योच्चरितस्य नञ्संनिधौ गम्यमानत्वं दृश्यते। तथा चारोपितैकत्वस्यार्थस्याभिधाने एकशब्द उपात्तः स्वसंख्य एव। यथा सांकाश्यं चत्वारि योजना-

---

१ A सूत्रे पलालन्यायेन. २ D अन्यसदृश°. ३ A अर्थगतिः. ४ A om. वर्तत इति ५ A उपचारितो. ६ P नीलमुत्पलं. ७ A P व्याख्यातो भवति.

तोलुपचारे एकवचनमुपपद्यते । यदा तु यत्र द्वित्वादावर्थे द्वित्वमारोपितं तद्भेदश्चाश्रीयते तदा तद्वचनभेदः । यथा "द्युद्भ्यो लुङि" (१।३।९१) "वृद्भ्यः स्यसनोः" (१।३।९२) इति । एवं च कृत्वा अनेकेषामित्यादयः प्रयोगाः सिध्यन्ति ॥

योऽयमत्रोत्तरपदार्थप्राधान्ये नञुक्तस्तस्य प्रायिकत्वमाहुः । "अकर्तरि च कारके॰" (३।३।१९) इत्यत्र कारकग्रहणात् । नित्ये ह्यस्मिन्नञ्युक्तकर्तृसादृश्यादेव कारकप्रतीतिः स्यात् । तेन प्रसज्यप्रतिषेधे नञ्सिद्धो भवति । असूर्यंपश्या राजदाराः इति । तथा-ऽभिधानसामर्थ्यादधर्मादयो नञ्समासा विरुद्धादावर्थे दृश्यन्ते इति ॥

ननु नञ्समासविधौ अकारो न कर्त्तव्यो न ह्यन्यो नशब्दोऽस्ति यद्व्यवच्छेदाय ञकारोपादानमिति । अत्र पूर्वपक्षे राक्षितेन व्याख्यातम् । अत्रापीदमस्ति प्रयोजनं नेर्युक्ते निषेधसूत्रमेतन्मा भूदिति । नैतत् । विधिवाक्यानर्थक्यप्रसङ्गात् । न च विधिप्रतिषेधयोः पर्यायः कल्पनीयः । महाविभाषया विकल्पस्य सिद्धत्वात् । असति वा नञो ञकारे स्वरूपनिर्देशादनव्ययत्वे विभक्तिश्रुतिरेव प्रतिषेधवाक्यतां निरस्यति । न चैवमस्मदादेशस्य षष्ठीबहुवचनस्य ग्रहणप्रसङ्गः । षष्ठ्यन्तस्य षष्ठीत्यनेनैव समासस्य सिद्धत्वादिति । अत्राहुः । ननु कथं षष्ठ्यन्तस्य नस्शब्दस्य "षष्ठी" (२।२।८) इत्यनेनैव समासोऽभिधीयते । यावता प्राप्तो नः स्वमित्यत्र "अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते" (परि. ८५) इति वचनान्नसादेशात्प्राक् समासेन भाव्यम् । समासे विभक्तेर्लुकि च कृते षष्ठ्यन्तत्वाभावान्नसा-देशो न प्राप्नोति । न चास्ति प्रत्ययलक्षणेन षष्ठ्यन्तकार्यम् । 'सामान्यातिदेशे विशेषान-तिदेशः' (परि. १०६) इति षष्ठ्यन्तविशेषकार्यातिदेशाभावात् । अथाप्यनल्विधावित्यत्र विधिग्रहणाद्विशेषोऽप्यतिदिश्यत एवमपि तत्र श्रूयमाणविभक्त्यर्थस्य ग्रहणाद्विभक्त्यभावे नसादेशो नास्त्येव । न इति तु समासार्थे सूत्रे कृते 'अन्तरङ्गान्॰' (परि. ८५) इति परिभाषा नैवास्ति । नसादेशस्य समासशास्त्रनिमित्तत्वात् । तस्माच्चिन्त्योऽयं रक्षितः ॥

अत्र केचिच्चिन्तयन्ति । यादृशोऽत्र पूर्वपक्षस्तादृश एव सिद्धान्तः । तथा हि । अन्तरङ्गानपीति वचनात् षष्ठीबहुवचनस्य नस्शब्दस्य शङ्कैव नास्ति । अत्र यथान्तरङ्गा-नित्यनभ्युपगम्य षष्ठीबहुवचनस्य नस्शब्दस्य ग्रहणं शङ्कितं त्वया तथा मयाऽपि षष्ठ्यन्तस्य "षष्ठी" (२।२।८) इत्यनेनैव समासः सिद्ध इत्युक्तम् ॥ ३१ ॥

गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः ॥ ३२ ॥

"सुप्सुपा" (२।१।२४) इत्यधिकारेऽपि "कुगतिप्रादयः" (२।२।१८) "कर्तृकरणे कृता बहुलम्" (२।१।३२) "उपपदमतिङ्" (२।२।१९) इति च गतीनां कारकाणामुपपदानां च योऽयं समासः स सुबुत्पत्तेः प्रागेव वेदितव्यः । तेन प्रष्ठीत्यत्र प्रशब्दस्य गतिसंज्ञकस्य स्थशब्देनासुबन्तेनैव "आतश्चोपसर्गे" (३।३।१०६)

१ AP °प्रतिषेधेऽपि. २ A C om. नेर्युक्ते. ३ B P om. समासेन भाव्यं. ४ A न प्राप्नोति for नास्त्येव. ५ P नास्तीति. ६ A C प्रशब्दस्य स्थशब्देन सुपिस्थ-कप्रत्ययान्तेनैव.

इति कप्रत्ययान्तेन " कुगतिप्रादयः " (२।२।१८) इति समासो भवति । यदि तु सुबन्तेन समासः स्यात्तदा सुपः प्रागन्तरङ्गत्वाट्टाप्स्यात् । एवं चादन्तत्वाभावात् " पुंयोगादाख्यायाम् " (४।१।४८) इति ङीप् न स्यात् । तथाऽश्वधनशब्दयोश्च कृत्यकरणव्यपदेशयोः कृदन्तेनैव[1] क्रीतशब्देन " कर्तृकरणे कृता बहुलम् " (२।१।३२) इति समासः । तथा चाश्वक्रीतधनक्रीतशब्दयोरदन्तत्वात् " क्रीतात्करणपूर्वात् " (४।१।५०) इति ङीप् भवति । तथा कच्छशब्दस्य कप्रत्ययान्तेन पशब्देन "उपपदमतिङ्" (२।२।१९) इति समासः । तथा च कच्छपशब्दस्यादन्तत्वात् कच्छपीति " जातेः० " (४।१।६३) इति ङीप् भवति[2] । अन्यान्यपि बहूनि प्रयोजनानि भाष्ये प्रतिपादितानि ॥

ननु कृदन्तैः समासं कृत्वा स्त्रीप्रत्ययः किमर्थं प्रतिपाद्यते यावता कृत्प्रत्ययोत्पत्त्यनन्तरकाल एव समासात्तन्निमित्तभूताच्च सुपस्ततोऽप्यन्तरङ्गत्वात् स्त्रीप्रत्ययाच्च प्राग्वे " पुंयोगादाख्यायाम् " (४।१।४८) इत्यादिवाक्यैः स्त्रीप्रत्यये क्रियमाणे प्रष्ठी अश्वक्रीतीत्यादि सिध्यति । मैवम्[3] । एवं हि प्रष्ठादिसमुदायस्याकृदन्तत्वेन प्रातिपदिकत्वाभावात्तत्समुदायात् स्त्रीप्रत्ययो न शक्यते कर्तुम् । अत्रोच्यते । " कृत्तद्धितसमासाश्च " (१।२।४६) इत्यत्र कृद्ग्रहणेन ' कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ' (परि. ६२) इति कृद्ग्रहणपरिभाषया समुदायस्य प्रातिपदिकत्वमस्त्येव । मैवम् । " अर्थवदधातुरप्रत्ययः प्रातिपदिकम् " (१।२।४५) इत्यत्राप्रत्यय इति प्रत्ययग्रहणपरिभाषया प्रत्ययान्तस्य प्रातिपदिकसंज्ञा न प्राप्नोति । अत एव तद्विषये कृद्ग्रहणेन कृदन्तस्य संज्ञा न तु कृद्ग्रहणपरिभाषया गतिकारकपूर्वस्यापि । यदि स्यात्तदा मूलकेनोपदंशं भुङ्क्ते इति " तृतीयाप्रभृतीन्यन्यतरस्याम् " (२।२।२१) इति समासाभावपक्षेऽपि तृतीयाया लुक् स्यात् । न च वाच्यमेवं हि विकल्पेन समासवचनमनर्थकं स्यात् । स्वरार्थत्वात् "गतिकारकोपपदात्कृत्" (६।२।१९) इत्येष तत्पुरुषाश्रयः स्वरो मा भूदिति । किं च । यदि समासात् प्राक् स्त्रीप्रत्ययः स्यात् तदा प्रभाविनी प्रभाविणीत्यत्र ङ्यन्तस्योत्तरपदस्यान्तो नकारो न भवतीति " प्रातिपदिकान्तनुम्विभक्तिषु च " (८।४।११) इति पक्षे णत्वं न स्यात् ॥

इह यद्यपि प्राक् सुबुत्पत्तेरिति सामान्येनोक्तं तथापि गतिकारकोपपदानां सुबन्तानामेव समासो भवति । तेन चर्मक्रीती[4] चर्मकारीत्यत्र सुबन्तत्वात्पदनिबन्धनो नलोपः सिध्यति । वैयाकरण इत्यत्र च पदत्वादैजागमः । प्रमाणं चात्र " तत्पुरुषे कृति बहुलम् " (६।३।१४) इति सप्तम्या अलुग्विधानम् । अत्र च पक्षेऽभिप्रयणादेः शकन्ध्वादित्वात्समासस्तेन[5] साधुत्वम् ॥

ननु यद्युत्तरपदे विभक्तिर्न[6] भवति तर्हि तस्य पदत्वं न स्यात् । ततश्चोत्तरपदव्यपदेशाभावादुत्तरपदे परतो विधीयमानोऽलुक् सरसिजमित्यत्र न स्यात् । उच्यते । समासावयवस्य हि परस्य भागस्य रूढ्योत्तरपदव्यपदेशः स्वीक्रियते । एतच्चोत्तरपदाधिकारादवसीयते ।

१ A C त्वान्तेन for कृदन्तेनैव. २ A C om. भवति. ३ A C नैवं for मैवं. ४ A चर्मकारक इत्यत्र. ५ A C om. समासस्तेन. ६ विभक्तिर्भवति.

अकार्यं चैतत् । अन्यथा सत्यपि सुबन्तानां समासे ‘ उत्तरपदत्वे चापदादिविधौ ’ (१।१।६३ वा. ६) इति वचनात् काप्युत्तरपदत्वं न स्यात् ॥

ज्ञापिता चेयं परिभाषा भाष्यकारेण “ उपपदमतिङ् ” (२।२।१९) इत्यतिङ्ग्रहणेन । तदुक्तम् । “ सुसुपा ” (२।१।२,४) इत्यधिकारात्तिङन्तेन समाससंभव एव नास्ति किमतिङ्ग्रहणेन । कृतं च तज् ज्ञापयत्येतयोर्योगयोः “सुप्सुपा” (२।१।२,४) इति नाभिसम्बध्यते । तेन ‘गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः’ इत्युक्तं भवति । ननु यदि गत्यादीनां सुपः प्रागसुबन्तेन शब्दान्तरेण समासस्तदा धातूपसर्गसमुदायस्यापि स्यात् । एवं च धातूपसर्गसमुदायाद्विभक्तिः स्यात् । उच्यते । पूर्वं धातुः साधनेन युज्यत इत्येतस्मिन्दर्शन इदं समाधेयम् ॥

एतस्याश्च द्वावर्थौ “ गतिकारकोपपदात्कृत् ” (६।२।१३६) इत्यत्र न्यासकृता व्याख्यातौ । गतिकारकोपपदानां कृद्भिरेव समासो भवति स च प्राक् सुबुत्पत्तेरित्येकोर्थः । गतिकारकोपपदानामविशेषेण समासो भवति कृद्भिस्तु प्राक् सुबुत्पत्तेरिति द्वितीयः । तत्र द्वितीयेऽर्थे प्रपचतितरामित्यत्रापि समासः ॥

केचित्तु सुबन्तेनैव गत्यादीनां कृद्भिः कचित्समासमाहुः । तथा च “उपपदमतिङ्” (२।२।१९) इत्यत्र रक्षितेनोक्तम् । यथा धनक्रीतेत्यत्र सुबन्तेन समासस्तथोरस्केत्यत्रापि । तेन “ सोऽपदादौ ” (८।३।३८) इति सत्वं न भवति । उरस्शब्दस्य सुबन्तेन कप्रत्ययान्तेन समासे कृते ककारस्य पदादित्वात् “सोऽपदादौ” (८।३।३८) इति विसर्जनीयस्य सत्वं न भवतीति । तदेतदयुक्तम् । तथाहि । यद्यपि सुबन्तेन समासस्तथापि सत्वेन भवितव्यम् । ‘ उत्तरपदत्वे चापदादिविधौ ’ (१।१।६३ वा. ६) इति प्रत्ययलक्षणप्रतिषेधात् । कशब्दस्यासुबन्तत्वेन पदत्वाभावात् । उच्यते । ‘उत्तरपदत्वे चापदादिविधौ ’ (१।१।६३ वा. ६) इति योऽयं प्रत्ययलक्षणप्रतिषेधः स “सोऽपदादौ” (८।३।३८) इति प्रतिषेधे कर्तव्ये न प्रवर्तते ॥

गतिकारकोपपदानामित्यस्य प्रायिकत्वं “ सोऽपदादौ ” (८।३।३८) इत्यत्र प्रत्ययलक्षणप्रतिषेधाप्रवर्तनं च भास्कारान्तेत्यत्र सत्वनिपातनादवसितम् । तथाहि । गतिकारकोपपदानामिति कृत्वा यदि सुपः प्राक् समासः तदा भास्कर इत्यत्र उत्तरपदत्वाभावादेव “ सोऽपदादौ ” (८।३।३८) इति सत्वं सिद्धम् । अथास्याः परिभाषायाः प्रायिकत्वाद्भास्कर इत्यत्र सुबन्तयोरेव समासस्तथापि ‘ उत्तरपदत्वे चापदादिविधौ ’ (१।१।६३ वा.६) इति प्रत्ययलक्षणप्रतिषेधेन पदत्वाभावात् “सोपदादौ” (८।३।३८) इति सत्वं सिद्धं स्यात् । तत्कृतमुक्तार्थस्य ज्ञापकमिति । ज्ञापकस्य प्रयोजनम् । उरःकेणोपादौ सोऽपदादौ” (८।३।३८) इति सत्वाभावः । नन्वेवं यदा सुपः प्राक् समासस्तदा ककारस्यापदादित्वादयःक्रीतीत्यत्र “ सोऽपदादौ ” (८।३।३८) इति सत्वं स्यात् । उच्यते । भवितव्यमेवात्र सत्वेनेति मन्यते । अथ वा “ सोऽपदादौ ” (८।३।३८)

१ A om. कृद्भिः कचित्. २ A om. सोपदादौ...न भवतीति. ३ P यदापि. ४ P यदापि. ५ A om. गतिकारकोप...भास्करेत्यत्र.

इत्यत्र ' ' पाशकल्पककाम्येषु ' परिगणनान्न भवति । यद्येवं पाशकल्पककाम्येष्विति परिगणनं नै क्रियताम् । भास्कारान्तेत्यत्र (३।२।२१) यरसत्त्वनिपातनं तत्सामर्थ्यादुत्तरपदे सत्त्वं न भवतीत्येवास्तु । तत एवायःक्रीतीत्यादौ सत्वाभावः सिद्धः इति पाशकल्पककाम्येषु इति परिगणनमनर्थकमेवेति ॥ ३२ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ पूर्वापरपादो नाम द्वितीयाध्यायस्य द्वितीयः पादः ॥

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ॥ ३३ ॥

तेन काञ्चनी वासयष्टिरिति " नित्यं वृद्धशरादिभ्यः " (४।३।१४४) इति मयटो विषये " अनुदात्तादेश्च " (४।३।१४०) इत्यञ् भवति । तथा 'प्रदीयतां दाशरथाय मैथिली ' इत्यत्र "अत इञ् (४।१।९५) इत्यस्य विषये " प्राग्दीव्यतोऽण् " (४।१।८३) इत्यण् भवति ॥

अन्यस्त्वाह । " समर्थानां प्रथमाद्वा " (४।१।८२) इत्यतो वानुवृत्तेरिञोऽभावपक्षे " तस्यापत्यम् " (४।१।९२) इत्यणा दाशरथायेति सिद्धम् । एतच्चायुक्तम्। यत्रोत्सर्गो विभाषाऽपवादोऽपि तत्रापवादेन [4]विनिर्मुक्ते विषय उत्सर्गो न प्रवर्तते । "पीलाया वा " (४।१।११८) इति ज्ञापकात् । वाग्रहणं तु वाक्यार्थम् । दशरथापत्यमित्यादिसमासार्थं " दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् " (४।१।८१) इत्यतो द्वितीयान्यतरस्यांग्रहणाऽनुवृत्तिरुक्तौ ॥

ज्ञापकं चात्र कटं कारको व्रजतीत्यत्र "अकेनोर्भविष्यदाधमर्ण्ययोः" (२।३।७०) इति भविष्यदकप्रयोगे कर्मणि षष्ठीनिषेधविधानम् । तद्धि यदि " अण् कर्मणि च " (३।३।१२) इत्यपवादविषये " तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् " (३।३।१०) इत्युत्सर्गः प्रवर्तते तदोपपद्यते । नान्यथा । ननु वासरूपविधिना " अण् कर्मणि च " (३।३।१२) इत्यपवादविषये ण्वुलपि सिद्ध एव । तत्कुतो ज्ञापकम् । उच्यते । क्रियायां क्रियार्थायामुपपदे वाऽसरूपविधिर्न भवति । " ण्वुल्तृचौ " (३।१।१३३) इति ण्वुलि सिद्धे पुनः " तुमुन्ण्वुलौ क्रियायाम्० " (३।३।१०) इति "लृट् शेषे च " (३।३।१३) इति विषये ण्वुलो विधानादवगम्यते । अन्यथा वाऽसरूपविधिनैव लृड्विषये ण्वुलः सिद्धत्वात्पुनस्तन्न कुर्यात् । कृतं च । अतोऽवसीयतेऽस्मिन्विषये वासरूपविधिना तृजादयो न भवन्तीति । नन्वसति प्रयोजने ज्ञापकम् । अस्ति

---

१ A न क्रियते. २ A C अपरपादः. ३ A om. एतच्चायुक्तम्. ४ विमुक्ते. ५ After उक्ता P ins. न्यासकृता.

च " तुमुन्ण्वुलौ क्रियायाम्० " (३।३।१०) इत्यस्य प्रयोजनं भविष्यत्काले[1] ण्वुल् यथा स्यात् । तेन " अकेनोर्भविष्यदाधमर्ण्ययोः " (२।३।७०) इत्यत्र भविष्यदधिकारविहितस्याकस्य ग्रहणाद् वर्षशतस्य[2] पूरकः पुत्रपौत्राणां दर्शकः इत्यत्र षष्ठीनिषेधो न भवति ॥ उच्यते । भाविष्यत्काले विहितस्याकस्य तत्र ग्रहणादिह दोषो नास्तीति ज्ञापकवादिनोऽभिप्रायः । तथाहि । वर्षशतस्य पूरकः इत्यत्र पूरकः इति पदं न भविष्यत्काले । प्रकरणादेव भविष्यतोऽवगमात् । क्वचिदिति वचनान्न सर्वत्रापवादविषये उत्सर्गाः प्रवर्तन्ते । अत एव " गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि " (२।३।१२) इत्यत्र द्वितीयाग्रहणं क्रियते । अन्यथा ' चतुर्थी च ' इत्येवोच्येत । चकारकरणसामर्थ्यात्कृद्योगलक्षणा षष्ठी न भविष्यति ग्रामं गन्ता ग्रामाय गन्ता ॥

भाष्ये तु[3] सूत्रमेव प्रत्याख्यातम् । तदुक्तम् । किमर्थमिदमुच्यते । चतुर्थी यथा स्यात् । द्वितीया तु सिद्धा कर्मणीत्येव । चतुर्थ्यपि सिद्धा संप्रदान इत्येव । न सिध्यति । " कर्मणा यमभिप्रैति स संप्रदानम् " (१।४।३२) इत्युच्यते । न च कर्मणात्र ग्राममभिप्रैति । किं तर्हि क्रियया । कया क्रियया । गतिक्रियया । क्रियाग्रहणं च तत्रातिदिश्यत इति ॥

तत्रैतस्मिन्भाष्ये रक्षितेनोक्तम् । यथा भाष्ये सूत्रं प्रत्याख्यातं तथा शोभनं ग्रामं गच्छतीति क्रियाविशेषणस्य कर्मत्वं न स्यात् । ग्रामाय गम्यत इति चाकर्मकत्वाद्भावे लकारः स्यात् । अत्रोच्यते । ननु केयं वाचोयुक्तिः । गत्यर्थादि–(२।३।१२) सूत्रे सति क्रियाविशेषणस्य कर्मत्वात् शोभनं ग्रामं गच्छतीति सिध्यति । तदेव च भावे लकाराभावाद् ग्रामाय गम्यत इति न भवति । ग्रामो गम्यत इत्येव भवतीति ॥ उच्यते । गत्यर्थादि–(२।३।१२) सूत्रे सति प्रार्थनाध्यवसानादिक्रियाभेदेन कर्मभूताया गतिक्रियाया विशेषणत्वाच्छोभनस्य कर्मत्वेन[4] 'क्रियाग्रहणं कर्तव्यम्' इत्यस्यासर्वविषयत्वाच्छोभनं ग्रामं गच्छतीति भवति । तथा गमिक्रियाव्याप्यत्वाद् ग्रामस्य कर्मत्वेन कर्मणि लकारेण कर्मणोऽभिहितत्वाद् ग्रामो गम्यत इत्येव भवति । नाकर्मकत्वाद्भावे लकारेण ग्रामाय गम्यत इति । गत्यर्थादि–(२।३।१२) सूत्राभावे तु ग्रामाय गच्छतीति सिद्धये ' क्रियाग्रहणं कर्तव्यम्' इत्यनेन संप्रदानत्वं वक्तव्यम् । अस्य चार्थः । क्रियया कर्मणा यमभिप्रैति स[5] संप्रदानं भवतीति । अत्र ग्रामाय गच्छतीत्यत्र या गतिक्रिया तस्याः प्रार्थनाध्यवसानादिक्रियाव्याप्यत्वात्कर्मत्वम् । तथाहि । कश्चित्फलेप्सुः फलं पश्यत्येतस्या एतत्फलमिति । दृष्ट्वा प्रार्थयते । ततस्तां कर्तुमध्यवस्यति । गम्यमाना च क्रिया कारकाणां निमित्तमिति गम्यमानयापि प्रार्थनाध्यवसानादिक्रियया गतिक्रियायाः कर्मत्वम्[6] । तथा च कर्मभूतया गतिक्रियया ग्रामस्याभिसम्बन्धात्संप्रदानत्वम् । अत एवात्र पक्षे रक्षितेन ग्रामाय गम्यत इति

१ भविष्यति काले. २ A om. वर्षशतस्य पूरकः....ग्रहणात्. ३ A om. तु. ४ A कर्मत्वेन. for कर्मत्वे. ५ A C तत् for सः. ६ A कर्मकत्वम् for कर्मत्वम्.

चाकर्मकत्वाद्भावे लकारः स्यादित्युक्तम्। एवं च शोभनं ग्रामं गच्छतीत्यत्र कर्मणि द्वितीयानुरोधेन प्रार्थनादिक्रियाभेदाभावो व्याख्येयः। ततश्च गतीक्रियायाः कर्मत्वाभावात्तद्विशेषणस्य कुतः कर्मत्वमिति युक्तमुक्तं क्रियाविशेषणस्य कर्मत्वं न स्याच्छोभनं ग्रामं गच्छतीत्यत्र। ननु प्रार्थनादिक्रियाभेदविवक्षायामपि ग्रामस्य गतिक्रियाव्याप्तत्वात् "कर्तुरीप्सिततमं कर्म" (१।४।४९) इति कर्मत्वं प्राप्नोति। क्रियाग्रहणं च कर्तव्यमिति संप्रदानत्वं च। तत्र परत्वात्कर्मसंज्ञया सिद्धं शोभनं ग्रामं गच्छतीति। धातोरपि सकर्मकत्वे भावे लकारो न भविष्यति। उच्यते। एवं हि शोभनं ग्रामाय गच्छतीत्यत्रापि कर्मत्वेन संप्रदानस्य बाधनाच्चतुर्थी न स्यात्। कथं तर्हि भाष्ये सूत्रं प्रत्याख्यातम्। उच्यते। ग्रामाय गच्छतीत्यत्र पूर्वविप्रतिषेधेन संप्रदानसंज्ञैव। तथा ग्रामो गम्यत इति कर्मणि लकारार्थं प्रार्थनादिक्रियाभेदाभावाच्छोभनं ग्रामं गच्छतीत्यत्र शोभनमित्यस्य कर्मत्वार्थं भेद एव व्याख्येयः ग्राममित्यस्य त्वभेद एवेति भाष्यकाराभिप्रायः ॥ ३३ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ अनभिहितपादो नाम द्वितीयाध्यायस्य तृतीयः पादः ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते ॥ ३४ ॥

समासस्य द्विपदाश्रयत्वाद् बहिरङ्गो ल्यबन्तरङ्गान्विधीन् बाधते। तेन प्रधायेत्यत्र "द्धातेर्हिः" (७।४।४२) इति ह्यादेशो न भवति। प्रदायेत्यत्र च "अच उपसर्गात्तः (७।४।४७) इति ॥ ज्ञापकं चात्र "अदो जग्धिर्ल्यप्ति किति" (२।४।३६) इत्यत्र ल्यब्ग्रहणम्। अन्यथा हि प्रजग्ध्येत्यत्रान्तरङ्गत्वात् क्त्वावस्थायां तकारादौ कितीत्येव जग्धौ सिद्धे ल्यपीति न कुर्यात्। तदुक्तम्—

'जग्धौ सिद्धेऽन्तरङ्गत्वात्ति कितीति ल्यबुच्यते।
ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम्' इति ॥

ननु यथा जग्ध्यादेशस्यान्तरङ्गत्वं तथा ल्यबादेशस्यापि नित्यत्वम्। कृताकृतप्रसङ्गित्वात्। तदेवं नित्यान्तरङ्गयोः परत्वाल्ल्यपा भवितव्यम्। ततो ल्यपि जग्ध्यादेशो यथा स्यादित्येवमर्थं ल्यब्ग्रहणं तत्कुतो ज्ञापकम्। उच्यते। जग्ध्यादेशस्यापि नित्यत्वम्। ल्यबादेशे कृतेऽसिद्धपरिभाषया तस्य प्राप्तेः ॥

अथ प्रजग्ध्येत्यत्र कथं ल्यपो लकारस्येत्संज्ञा यावता ल्यबादेशस्य प्रत्ययाधिकारेऽविधानात् प्रत्ययत्वं नास्ति। प्रत्ययस्येत्यनुवृत्तौ प्रत्ययादेरित्संज्ञा। अन्यथा शीङः शकारस्येत्संज्ञायां "शीङः सार्वधातुके०" (७।४।२१) इत्यत्र विशेषणार्थता स्यात्। ईङः इति हि कृते ईङ् गतावित्यस्यापि ग्रहणं स्यात्। ङी गताविति दिवादौ पठिते शीङो

---

१ A स्यादेवेत्युक्तम्. २ P भेदो for भेदाभावः. ३ A कर्मकत्वाभावात्. ४ A परत्वाभावात् for परत्वात्. ५ A इति for अपि. ६ A om. समासस्य ...... बाधते। D gives समासस्य...बाधते as an independent परिभाषा. C समासस्य for समासे.

ङकारोपदेशवैयर्थ्यादित्संज्ञा तर्हि शासेः शकारस्येत्संज्ञायां "शास इदङ्हलोः" (६।४।३४) इत्यत्र विशेषणमर्थः स्यात् । एतदपि नास्ति । अङा साहचर्यादास उपवेशन इत्यस्याग्रहणात् । स्थित एव यथा आङः शासु इच्छायामित्यस्याग्रहणम् । डुङ् शब्द इत्यत्र तर्हि आदेर्डकारस्येत्संज्ञा स्यात् । एतदपि न । अन्तरङ्गत्वादन्त्यङकारस्येत्संज्ञायामिष्टसिद्धेः । यदि वा ङकारद्वयमादौ कृत्वा डुङ् शब्द इति पठिते ङ्वते इत्यत्र न दूषणम् । "शा हौ" (६।४।३५) इत्यत्र तर्हि शादेशे शकारस्येत्संज्ञायां सर्वादेशार्थः स्यात् । परमखण्डः परमम्खङ्ग इत्यादौ प्रातिपदिकखकारस्येत्संज्ञायां "खित्यनव्ययस्य" (६।३।६६) इति मुम् स्यात् । उच्यते । स्थानिवत्त्वेनास्य प्रत्ययत्वादित्संज्ञा भवति । यथैवं "द्विगुरेकवचनम्" (२।४।१) इत्यत्र यदुक्तं रक्षितेन पारिभाषिकैकवचनग्रहणे प्रत्ययाधिकारेऽस्याविधानादसति प्रत्ययत्वे पञ्चम्याद्येकवचनङकारस्येत्संज्ञा नै स्यात् इति तदयुक्तम् । तथाहि । पञ्चपूलीशब्दादनन्वयपक्षे बह्वर्थत्वात् भ्यसादिषु कृतेषु तेषां स्थाने पञ्चम्याद्येकवचनेषु कृतेषु तत्र पूर्ववत्स्थानिवत्त्वमस्त्येवेतीत्संज्ञाप्राप्तेः । उच्यते । यथा क्त्वाप्रत्ययस्थाने ल्यप् विधीयते न तथा भ्यसादिषु कृतेषु ङस्यादयो विधीयन्ते । किं तर्हि बहुषु बहुवचने प्राप्ते एकवचनं ङस्यादि विधीयते । कुतोऽत्र स्थान्यादेशभावः ॥

ननु तथापि रक्षितोक्तिरसङ्गता । ङस्यादिङकारवच्चतुर्थीङकारस्यापीत्संज्ञाप्राप्तेः । उच्यते । पञ्चम्यादिर्यस्य स पञ्चम्यादिः पञ्चम्यौ आदिः पञ्चम्यादिरिति च पञ्चम्यादिशब्दस्य बहुव्रीहितत्पुरुषयोरेकशेषेण चतुर्थ्याः साक्षादेव ग्रहणमाख्यातम् । नन्वेवमपि टाटकारस्ये "चुटू" (१।३।७) इतीत्संज्ञा न स्यात् । एवं तर्हि पञ्चम्यादेरित्यादिशब्दः प्रकारे । यथैवं ङकारस्य न स्यादित्ययुक्तम् । टकारस्यापि न स्यादिति वक्तव्यम् । उच्यते । ङकारस्येति दोषोपलक्षणमिदम् । तेन प्रत्ययत्वाभावे परदेशे नियमेन प्रयोगो न स्यादित्यपि द्रष्टव्यम् । ननु तथापि लब्धप्रत्ययैकवचनसंज्ञकस्य ङस्यादेर्विधानादस्त्येवेत्संज्ञा । किं चैकवचनादिसंज्ञानुबन्धरहितस्यैव विधीयते न सानुबन्धकस्य । एकवचनादिसंज्ञायाः प्रागेवेत्संज्ञकत्वाल्लोपप्रवृत्तेः । उच्यते । एकवचनादिसंज्ञा स्वादि-(४।१।२) सूत्र एव विधीयते । अत्र प्रत्ययत्वाभावादित्संज्ञा नास्ति । अतः सानुबन्धकस्यैवैकवचनादिसंज्ञा । न च स्वादि-(४।१।२) सूत्र एव प्रत्ययसंज्ञा शक्यते कर्तुम् । अर्थवत्त्वाभावात् । प्रयोग एवार्थवत्त्वात् प्रत्ययसंज्ञा । न चात्र प्रत्ययाधिकारो नास्तीति वाच्यम् । यतोऽर्थवतः प्रत्ययसंज्ञाविधानसामर्थ्यात् शास्त्रद्वारेण प्रयोग एव प्रत्ययसंज्ञा प्रवर्तते । यत्तु द्विगु-(२।१।५१) सूत्रे भागवृत्तिकारेणोक्तम् । समाहरणं समाहार इति भावे घञ् इति स्थिते यदुक्तं कर्मसाधने पञ्च कुमार्यः समाहृताः पञ्चकुमारि इति "गोस्त्रियोरुपसर्जनस्य"

---

१ A तदपि for यदपि. २ A स्थानिवत्त्वेस्य. ३ A om. न. ४ A अनपन्वयपक्षे; C अनन्वपक्षे. ५ A पञ्चमीत्यादिः; C पञ्चमी आदिर्येषां ते पञ्चम्यादयः. ६ A पञ्चम्या आदिः. ७ A om आख्यातम्. ८ A जकारस्य for टकारस्य.

(१।२।४८) इति न प्राप्नोति । एवं तर्हि भावसाधन इति । तदयुक्तम् । यतो " गोस्त्रियोरुपसर्जनस्य " (१।२।४८) इत्यस्याभावे " ह्रस्वो नपुंसके प्रातिपदिकस्य " (१।२।४८) इति विषत एव । नपुंसकत्वं तु " स नपुंसकम् " (२।४।१७) इत्यनेन । अत एव " स्वमोर्नपुंसकात् " (७।१।२३) इति लुका न विभक्तिश्रुतिः ॥ ३४॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ द्विगुपादो नाम द्वितीयाध्यायस्य चतुर्थः पादः ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

---

[1]असति संभवे बाधनं भवति । अस्ति च संभवो यदुभयं स्यात् ॥ ३५ ॥

कार्ययोर्विरोधादसति समावेशसद्भावे बलवतैकेनापरस्य[2] बाधनं भवति । तद्यथा । गोद इति कप्रत्ययेनाण्प्रत्ययस्य बाधनं भवति[3] । यथा वृक्षेभ्य इत्यत्रैत्वेन दीर्घस्य । यदि त्वस्ति सम्भवस्तदोभयमपि भवति । यच्छब्दो यद्यर्थे तदाशब्दश्चाध्याहार्यः । यथा " केकयमित्रयुप्रलयानां यादेरियः " (७।३।२) इत्यत्रेयादेशेऽपि कृते वृद्धिः । कैकेयः । प्रालेयः । तथा यथाजातीयस्तथाजातीय इत्यत्र " प्रकारवचने जातीयर् " (५।३।६९) इत्यनेन स्वभावात् प्रकारवति विधीयमानेन जातीयरा " प्रकारवचने थाल् " (५।३।२३) इत्ययं[4] स्वभावात् प्रकारमात्रे विधीयमानस्थाल्प्रत्ययो न बाध्यते । तथा चोरयति धारयति चिकीर्षयतीत्यादावार्द्धधातुकसंज्ञा प्रत्ययसंज्ञां न बाधते । तत्र चोरयति चिकीर्षयतीत्यादावार्द्धधातुकत्वेन लघूपधगुणाल्लोपौ प्रयोजनम् । धारयतीत्यत्र " अचो ञ्णिति " (७।२।११५) इति वृद्धिरार्द्धधातुकत्वाभावेऽपि सिध्यति । तस्या अनार्द्धधातुकाधिकारीयत्वात् । अत एव प्रियमाचष्टे प्राययतीत्यादौ वृद्धिः । यस्मादेवं ततो यदुक्तं सत्यापपाशादि-(३।१।२५) सूत्रेऽनुन्यासकारेण चोरयति धारयति चिकीर्षयतीत्यादावार्द्धधातुकत्वाभावे गुणवृद्ध्यल्लोपा न स्युरिति । तत्र धारयतीत्ययुक्तम् । नायुक्तम् । धारयतीत्यत्र " हेतुमति च " (३।१।२६) इत्यनेन द्वितीयो णिच्प्रत्ययः । तथा च चोरयतीति सत्यापपाशादि-(३।१।२५) सूत्रेण विहितस्य प्रथमस्य णिच आर्द्धधातुकसंज्ञा प्रयोजनमुक्तम्[5] । धारयतीत्यत्र " हेतुमति च " (३।१।२६) इत्यस्य । यदि तस्यार्द्धधातुकसंज्ञा न स्यात्तदा पूर्वस्य " णेरनिटि " (६।४।५१) इति णिलोपो न स्यात् ॥

ननु वृद्ध्यभावो दोष उक्तस्तत्किं " णेरनिटि " (६।४।५१) इत्यस्याभावेनोक्तं स्यात् । उच्यते । गुणवृद्ध्यल्लोपा इति वृद्धिश्चाश्चेति वृद्ध्यतौ तयोर्लोपौ वृद्ध्यल्लोपौ । अथ

---

१ Paribhasas 35 to 38 and the Vritti also thereon is mising in A.
२ B. परस्य for अपरस्य. ३ B om भवति. ४ P इत्यनेन for इत्ययं. ५ B उक्तः for उक्तं.

वा लुप्येते इति लोपौ वृद्धयतौ च तौ लोपौ चेति वृद्धयल्लोपाविति कर्मधारयः। ततो गुणश्च वृद्धयल्लोपौ चेति द्वन्द्वः। तेन गुणवृद्धयल्लोपा न स्युरिति। अस्यायमर्थः। गुणो न स्यात्। वृद्धिलोपो न स्यात्। अतो लोपश्च न स्यात्। ननु कथमत्र वृद्धेर्लोपः। यावता "णेरनिटि" (६।४।५१) इत्यनेन णेरेव लोपः। उच्यते। परत्वाद् वृद्धौ कृतायां "णेरनिटि" (६।४।५१) इति वृद्धेरेव लोपः। अथ वा लोपशब्देनात्राभावोऽभिधीयते। तेनायमर्थः। वृद्धेरभावो न स्यात्। ऐकारस्य श्रवणात्। लोपे तु कृते वृद्धेरभावो भवति। ऐकारस्याश्रवणात् ॥

ज्ञापकं चात्र "नित्यं कौटिल्ये गतौ" (३।१।२३) इत्यत्र नित्यग्रहणम्। तद्धि गत्यर्थेभ्यः कौटिल्ये एव यङ् यथा स्यात। क्रियासमभिहारे मा भूदित्येवमर्थं क्रियते। यदि तु सत्यपि संभवे बाधनं भवेत् तदा नित्यग्रहणमनर्थकं स्यात्। कौटिल्ययङा क्रियासमभिहारयङो बाधस्य सिद्धत्वात्। ननु कुटिलं क्रामतीति वाक्यं मा भूदित्येवमर्थं नित्यग्रहणं क्रियते तत्कुतो ज्ञापकम्। उच्यते। कुटिलं क्रामतीत्यादिकं वाक्यमिष्यमाणमेव। तथा च रक्षितः। नित्यग्रहणं वाक्यनिवृत्त्यर्थं न भवति वाक्यस्येष्यमाणत्वात् ॥ ३५ ॥

क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति ॥ ३६ ॥

तेन नपुंसके भावे क्तप्रत्ययो ल्युट्प्रत्ययश्च नित्यं भावे घञं बाधते। हसनं हसितमिति। हासमिति न भवति। तथा "समानकर्तृकेषु तुमुन्" (३।३।१५८) इच्छार्थेषूपपदेषु[1] "इच्छार्थेषु लिङ्लोटौ" (३।३।१५७) इतीमौ नित्यमेव बाधते। इच्छति भोक्तुमिति। तथा "आतो युच्" (३।३।१२८) इति "ईषद्दुःसुषु०" (३।३।१२६) इति खलं नित्यमेव बाधते। ईषत्पानः सोमो भवतीति ॥

अत्र[2] तु क्तादय एवापोद्या[3]: उत्सर्गा इति यावत्। योऽन्योऽजादिप्रत्ययोऽपवादः स्त्र्यधिकारात् प्राग्भूतस्तत्र वासरूपविधिर्भवत्येव। यथा "अब्विधौ भयादीनामुपसंख्यानम्" (३।३।५६ वा. १) इत्यज्विषये वाऽसरूपविधिना ल्युडपि भवति। भयं भयनमिति। वर्षं वर्षणमिति। प्रमाणं चात्र वृषभो वर्षणादिति भाष्यकृद्वचनम्। अत एव "आशिते भुवः करणभावयोः" (३।२।४५) इत्यत्र यदुक्तं न्यासकृता घञं सारूप्याद्बाधते खच्। ल्युट्प्रत्ययः पुनर्वासरूपविधिना भवत्येव। आशितंभवं आशितंभवनमिति तदुपपद्यते। एतस्मिन्वाक्ये इन्दुमैत्रेययोः शाश्वतिको विरोधः। तथाहि। प्रत्ययसूत्रे[4]ऽनुन्यासकार[5] उक्तवान्। प्रतियन्त्यनेनार्थानिति प्रत्ययः। "एरच्" (३।३।५६) इत्यच्। "पुंसि संज्ञायां घः प्रायेण" (३।३।११८) इति वा घं[6] इति। मैत्रेयः पुनराह। "पुंसि संज्ञायाम्" (३।३।११८) इति घप्रत्यय एव। "एरच्" (३।३।५६) इत्यच्प्रत्ययस्तु करणे ल्युटा बाधितत्वान्न शक्यते कर्तुम्।

---

१ B om. इच्छार्थेषु. २ B अत्रानुक्ताः क्तादय एव०. ३ C अपोह्याः. ४ C om. प्रत्ययसूत्रे....प्रत्ययः. ५ B न्यासकारः for अनुन्यासकारः. ६ B om. घ इति.

न च वाऽसरूपविधिरस्ति । क्तल्युडित्यादि वचनात् । तत्रायं मैत्रेयाभिप्रायः । क्तल्युट्तुमुन्खलर्थेष्वित्यत्र क्तग्रहणेन नपुंसकक्तो गृह्यते । ल्युटा साहचर्यात् । ल्युट्सहचरितस्य क्तप्रत्ययस्य ग्रहणात् । "तदधीते तद्वेद" (४।२।५९) इति "मतिबुद्धिपूजार्थेभ्यश्च" (३।२।१८८) इति क्तविषये लटो विधानाच्च । अन्यथा "ञीतः क्तः" (३।२।१८७) इत्यनेन लटो बाधनान्मेद्यतीति न स्यात् ॥ न चैवं "मिदेर्गुणः"[1] (७।३।८२) इत्यस्यानर्थक्यं भूते लक्ष्यमेद्यदित्यत्र कृतार्थत्वात् । एवं च "मतिबुद्धिपूजार्थेभ्यश्च" (३।२।१८८) इत्यत्र नञिङ्बाधनार्थः सुप्तशब्दस्य पाठोऽनर्थकः । नानर्थकः स्पष्टार्थत्वात् । अवश्यं चैतत् । अन्यथा सामान्यग्रहणेऽपि स्वपेः क्तो बाधितुं न शक्यते । ञित्वो ञित्करणसामर्थ्यात् । क्तादीनामपोद्यानां वाऽसरूपविधेरवस्थापितत्वाच्च । तदेवं यदि भावविहितक्तप्रत्ययग्रहणविज्ञानाल्ल्युडपि भावविहितो गृह्यते तदा क्तग्रहणमकृत्वा ल्युड्ग्रहणमेव कुर्यात् । अत एव हासमिति न भविष्यति । ल्युड्ग्रहणं तु न प्रत्याख्येयं सकर्मकेभ्यो भावे क्तप्रत्ययस्याभावात् । तत्रोभयोरुपादानसामर्थ्यात् सामान्यविहितो ल्युड् गृह्यते । अतो युक्तमुक्तं करणल्युटा वाऽसरूपविधेरभावादच्प्रत्ययो नास्तीति । अवश्यं चैतत् । अन्यथा वुञ्छणादि-(४।२।८०) सूत्रे सप्तदश प्रत्यया इति वृत्तिग्रन्थोऽसाधुः स्यात् । "परिमाणाख्यायाम्०" (३।३।२०) इत्यनेनाचं बाधित्वा घञो विधानात् । नन्वेवं "वाऽसरूपोऽस्त्रियाम्" (३।१।९४) इत्यत्र यदुक्तं रक्षितेन 'ल्युट्सहचरितो नपुंसकक्तो नित्यं बाधक इष्यते' इति । तथा "मतिबुद्धिपूजार्थेभ्यश्च" (३।२।१८८) इत्यत्र यदुक्तं क्तल्युट्तुमुन्खलर्थेष्विति ल्युट्सहचरितो नपुंसकक्तो गृह्यत इति तदयुक्तं स्यात् । उच्यते । नात्र नपुंसकभावार्थं कृतं ल्युट्सहचरितत्वं किं तर्हि ल्युटा सह विधानम् । "नपुंसके भावे क्तो ल्युट् च" (३।३।११५) इति यावत् ॥

अनुन्यासकारस्य त्वयमभिप्रायः । क्तल्युडित्यत्र ल्युडपि भावविहित एव गृह्यते तुमुना साहचर्यात् । उभयोरुपादानं तु स्पष्टार्थम् । एतच्च त्वयापि वाच्यम् । यतः सामान्यल्युड्ग्रहणपक्षेऽपि क्तग्रहणमनर्थकमेव । यथा करणाधिकरणयोर्ल्युटा वाऽसरूपविधेरभावादच्प्रत्ययो नास्तीत्युक्तम् । तथा भावल्युटापि सह वाऽसरूपविधेरभावाद् घञ् नास्तीत्यतो हासमिति न भविष्यति । न च वक्तव्यं क्तग्रहणोपादानात् करणाधिकरणल्युटैव वाऽसरूपविधेरभाव इति । एवं हि[4] विज्ञायमाने प्रयोजनाभावात् । नन्विदमस्ति प्रयोजनं सकर्मकेभ्यो भावे क्तो नास्तीति कारमिति यथा स्यात् । सामान्यल्युड्ग्रहणे तु कारामिति न स्यात् । ल्युटा घञो बाधनात् । उच्यते । न हि ज्ञापकादनिष्टं क्रियते ज्ञापकादाचार्येणेष्टसूचनात् । अत एव नात्रोभयोरुपादानात् सामान्यविहितः क्तो गृह्यते । तदेवं करणे ल्युटा वाऽसरूपविधिनास्त्येवाच् प्रत्ययः । न चास्मिन्व्याख्याने सप्तदश प्रत्यया इति वृत्तिग्रन्थोऽसंगतः स्यात् ।

---

१ B om. न. २ A सामान्यग्रहणपक्षेपि. ३ P. om. क्त. ४ B C om. हि. ५ B अत एवात्र....क्तो न गृह्यते.

पदसंस्कारपक्षे प्रत्ययशब्दं व्युत्पाद्योत्तरकालं परिमाणाख्याप्रतीतेः । घप्रत्ययेन वा सप्तदश प्रत्ययाः इति भविष्यति । अथवा प्रत्यय इति सूत्रसाधने कार्यबाधपक्षेऽच्कार्यं ल्युट्शास्त्रेण बाध्यते । ल्युट्शास्त्रं च शास्त्रबाधपक्षे घशास्त्रेण बाधितम् । प्रत्ययप्रवृत्तौ त्वन्तरङ्गत्वादच् प्रत्ययः । अच्प्रवृत्तौ ल्युट् नास्ति ल्युट्शास्त्रस्य घशास्त्रेण प्रागेव बाधितत्वात् । एवं च न चक्रकमिति ॥

एतस्याः प्रमाणं " वाऽसरूपोऽस्त्रियाम् " (३।१।९४) इत्यत्र वाग्रहणस्य व्यवस्थितविभाषाविज्ञानं न्यासकारेणोक्तम् । जयादित्येन तु " प्रैषातिसर्ग० " (३।३।१६३) इत्यत्र कृत्यग्रहणमुक्तम् । केचित् " विभाषाग्रेप्रथमपूर्वेषु " (३।४।२४) इत्यत्र विभाषाग्रहणादित्याहुः ॥ ३६ ॥

सांप्रतिकाभावे भूतपूर्वगतिः ॥ ३७ ॥

वर्तमानाभावे भूतपूर्वस्याश्रयणं भवति । यथा वृक्षैरित्यत्र " बहुवचने झल्येत् " (७।३।१०२) इत्येत्वेऽपि कृते " अतो भिस ऐस् " (७।१।९) प्राप्नोति । तदुक्तम् ।

" कृतेऽप्येत्वे भौतपूर्व्यादैस् तु नित्यस्तथा सति " (महाभाष्य ७।१।९) इति ।

तथा आछि आयाम इत्यस्माल्लिटि द्विर्वचनेऽभ्यासस्य ह्रस्वत्वे च कृते भूतपूर्वगत्या द्विमात्रोऽयमाकार इति " अत आदेः " (७।४।७०) इति तपरकरणाद्दीर्घो न भवति । तथा च आञ्छ आञ्छतुः आञ्छुरिति " तस्मान्नुड् द्विहलः " (७।४।७१) इति नुडागमो न भवति । न चैवं पिबतेः सनि द्विर्वचनेऽभ्यासह्रस्वत्वे च कृते भूतपूर्वगत्या द्विमात्रोऽयमाकार इति तपरकरणात् पिपासतीत्यत्रेत्त्वं न प्राप्नोतीति वाच्यम् । यङ्लुगन्तात्पाठेः सनि पापठिषतीत्यत्र सांप्रतिकस्य द्विमात्रस्य व्यावृत्तौ तपरकरणस्य कृतार्थत्वात् । सांप्रतिकाभावग्रहणाद्धि गौरित्यत्र भूतपूर्वैङन्तात् " एङ्ह्रस्वात्संबुद्धेः " (६।१।६९) इति संबुद्धिलोपो न भवति । हे पटो इत्यत्र सांप्रतिकस्य विद्यमानत्वात् ॥

ज्ञापकं चात्र " अचो यत् " (३।१।९७) इत्यज्ग्रहणम् । तद्धि हलन्तात् " ऋहलोर्ण्यत् " (३।१।१२४) इति ण्यतं वक्ष्यतीति पारिशेष्यादजन्तादेव यति सिद्धे दित्स्यं दित्स्यमित्यत्रार्द्धधातुक इति विषयसप्तम्यामतो लोपे कृतेऽजन्तभूतपूर्वादपि यथा स्यादित्येवमर्थं क्रियते । एतदर्थता च तदा यदेह भूतपूर्वगतिः स्यात् ॥ ३७ ॥

नानुबन्धकृतमसारूप्यम् ॥ ३८ ॥

अनुबन्धकृतमसरूपत्वं नाश्रीयते । तेन गोदः इति कविषयेऽण् न भवति ॥ ज्ञापकं चात्र " ददातिदधात्योर्विभाषा " (३।१।१३९) इति णस्य विषये विकल्पेन शविधानम् । यद्यनुबन्धकृतमसारूप्यं स्यात्तदा वाऽसरूपविधिनैव दायो ददः इति णशाभ्यां सिद्धं स्यात् । ननु यद्यनुबन्धकृतमपि वैरूप्यं स्यात्तदा " वाऽसरूपोऽस्त्रियाम् " (३।१।९४) इत्यत्रासरूपग्रहणमनर्थकम् । अतः सामर्थ्यात्प्रयोगगतमसारूप्यमाश्रयणीयम् । न च काणोः प्रयोगेऽसारूप्यमस्ति । अतो न भविष्यति वाऽसरूप-(३।१।९४)

---

१ B om. पारिशेष्यात् यदा.

विधिरिति । एतेनाप्युक्तम् । अनुबन्धसारूप्ये वाऽसरूपविधिर्मा विज्ञायीत्येवमर्थमसरूप-ग्रहणं स्यात् । " इगुपधज्ञाप्रीकिरः कः " (३।१।३५) " मूलविभुजादिभ्य उपसंख्यानम् (३।२।५ वा. २) इति कः । "पचाद्यच्" (३।१।१३४) " हरतेरनुद्यमनेऽच् " (३।२।९) । यदि हि स्यात् तदा नित्योपपदसमासाभावान्मूलानां विभुजोऽशस्य हर इत्यपि स्यात् । असदेतत् । ' मूलविभुजादिभ्यः ' इत्यस्यानर्थकत्वात् । ' अकारादनुपपदात्सोपपदो भवति विप्रतिषेधेन ' इति वचनाच्च । अस्त्वन्तरङ्गत्वा-न्निरुपपदः । वाऽसरूपविधिना सोपपदो भविष्यति । एवं तर्हि क्विपणोश्च शास्त्रकृत् शास्त्रकार इत्यत्र वाऽसरूपविधेरभावात् समावेशो न स्यात् । न क्विपः प्रयोगोऽस्ति अश्राविल्वात् ॥ ३८ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ प्रत्ययपादो नाम तृतीयाध्यायस्य प्रथमः पादः ॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ॥ ३९ ॥

लक्षणं लाक्षणिकमुपचारात् । प्रतिपदोक्तं विशेषेण प्रतिपादितम् । तयोर्मध्ये प्रतिपदोक्तस्यैव ग्रहणं भवति न तु लाक्षणिकस्य खण्डतो व्युत्पादितस्य । तद्यथा । इङो णिचि " क्रीङ्जीनां णौ " (६।१।४८) इत्यात्वे पुकि च कृति आप्रूपे सम्पन्ने ल्यपि परतो " विभाषापः " (६।४।५७) इत्यनेनायादेशो न भवति अध्याप्य गतः इति । प्रतिपदोक्तस्य स्वैापेर्धातोर्भवति प्राप्य प्रापय्येति । तथा वसेः क्विपि उसिति । उषा चरतीत्यत्रार्थे " चरति " (४।४।८) इति तृतीयासमर्थात् ठकि कृते उस्-शब्दस्य लाक्षणिकत्वात् " इसुसुक्तान्तात् कः " (७।३।५१) इति को न भवति । औषिकामिति । प्रतिपदोक्तोस्प्रत्ययान्ताद्भवति । धानुष्क इति ॥

नन्वेवं सति " ह्वावामश्च " (३।२।२) इत्यत्र माग्रहणेन मेङो ग्रहणं न स्यात् । नैं । गामादाग्रहणपरिभाषया लाक्षणिकस्यापि भवति । न चैवं मा माने इत्यस्यापि ग्रहणमिति वाच्यम् । गामादाग्रहणपरिभाषया लुग्विकरणपरिभाषाबाधस्यानिष्य-माणत्वात् ॥

यत्तु घुमास्थागादि–(६।४।६६) सूत्रे न्यासकारेण लुग्विकरणपरिभाषाया अपि बाध उक्तः तत्केषांचिन्मतमिति । यत्तु " ह्वावामश्च " (३।२।२) इत्यत्र मैत्रेयेणोक्तं येषां तु दर्शनं ' गामादाग्रहणेष्वविशेषः ' इति लक्षणप्रतिपदोक्तपरिभाषाबाधनार्थमिदं निरनुबन्धकपरिभाषाबाधनार्थमिदं वा तेषां मा माने इत्यस्य लुग्विकरणत्वादग्रहणं वेदितव्यम् । तत्र यदुक्तं लक्षणप्रतिपदोक्तपरिभाषाबाधनार्थमिति तदयुक्तम् । एवं हि सानुबन्धकत्वान्माङ्

---

१ B यदुक्तम्. २ B श्वाप्लृधातोः ३ A B om. न. ४ B परिभाषाबस्यमिष्यमाणत्वात्. ५ C रक्षितेनोक्तं. ६ B om. तु; A om. तुदर्शनं ७ B om. इदं निरनुबन्धक.... लक्षणप्रतिपदोक्तपरिभाषाबाधनार्थम्. ८ P ग्रहणं for अग्रहणम्.

मेङोरेव ग्रहणं न स्यात् । मा मान इत्यस्यैव निरनुबन्धकस्य स्यात् । निरनुबन्धकलुग्विकरणविचारे चान्तरङ्गत्वान्निरनुबन्धकपरिभाषैव प्रवर्तते । अन्यथा व्याख्याने तु "अस्तेर्भूः" (२।४।५२) इति श्तिपा निर्देशो वैचित्र्यार्थः इति यदुक्तं तदसंगतं स्यात् । असति श्तिपा निर्देशे लुग्विकरणपरिभाषया असु क्षेपणे इत्यस्यैव ग्रहणप्रसङ्गात् । अथ निरनुबन्धकपरिभाषायाः प्रत्ययविषयत्वादिह धातुग्रहणे तद्व्यापाराभावः । यथा " न कवतेर्यङि " (७।४।६३) इत्यत्र व्याख्यातं न्यासकृता । लुग्विकरणपरिभाषया कौतिरग्रहणमिति । तथापि यदुक्तं निरनुबन्धकपरिभाषाबाधनार्थमिदं चेति तदसङ्गतम् । अतो निरनुबन्धकपरिभाषाबाधे लाक्षणिकत्वान्मेङो ग्रहणं न स्यात् । माङ् माने इत्यस्यैव ग्रहणं स्यात् ॥ उच्यते[1] । नेदं रक्षितेन व्यवस्थार्थमुक्तम् । किं तर्हि सर्वथा लुग्विकरणपरिभाषा गामादाग्रहणपरिभाषया न बाध्यते इति प्रदर्शनार्थम् । तथाहि । इदं केषांचिद्दर्शनं लक्षणपरिभाषा बाध्यते, केषांचिन्निरनुबन्धकपरिभाषा बाध्यते, केषांचिदुभयपरिभाषा न तु लुग्विकरणपरिभाषापि[2] इति यावत । एतच्चायुक्तम् । घुमास्थागादि– (६।४।६६) सूत्रे न्यासकारेण लुग्विकरणपरिभाषाबाधस्याप्युक्तत्वात् । एवं तर्हि निरनुबन्धकपरिभाषाबाधनार्थं वेति नायं वाशब्दः पक्षान्तरे किं तर्हि समुच्चये । तदयमर्थः । गामादाग्रहणपरिभाषा लक्षणपरिभाषां बाधते निरनुबन्धकपरिभाषामपीति । समुच्चयेऽपि वाशब्दो दृश्यत एव । यथा संग्रहशब्दस्य व्युत्पत्तौ न्यासकृतोक्तं सम्यक् समन्ताद्वेति । तस्यायमर्थः । सम्यक्समन्ताच्चेति ॥

खण्डशो व्युत्पन्नं हि लाक्षणिकमिति न सर्वसंमतम् । तेन " विभाषा दिक्समासे बहुव्रीहौ " (१।१।२८) इत्यत्र सर्वनामविधौ प्रतिपदोक्तस्य " दिङ्नामान्यन्तराले " (२।२।२६) इति बहुव्रीहेर्ग्रहणं दक्षिणपूर्वस्यै देहीति । न तु " अनेकमन्यपदार्थे " (२।२।२४) इत्यस्य या पूर्वा सोत्तरास्योन्मुग्धस्य तस्मै पूर्वोत्तरायेति । तथा च "ऋत इद्धातोः" (१।१।१००) इत्यत्र ऋवर्णग्रहणेपीयमुक्ता ॥

ज्ञापकं चात्र " कर्तरि भुवः खिष्णुच्खुकञौ " (३।२।५७) इत्यत्र खिष्णुच इकारादित्वम् । तदुक्तम् ।

> उदात्तत्वाद् भुवः सिद्धमिकारादित्वमिष्णुचः ।
> नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्यते ॥

अनित्या चेयं परिभाषा । तच्चानित्यत्वं " यावत्पुरानिपातयोः०" (३।३।४) इति विशेषणादवसितम् । तेन " दाधा घ्वदाप् " (१।१।२०) इत्यत्र धाग्रहणेन धेटोऽपि ग्रहणं भवति । एतत्त्वापिदिति कर्तव्येऽदाबिति यत् कृतं तल्लक्षणपरिभाषाया अभावेऽप्युपरिति तत एव सिद्धम् । इदं तु वक्तव्यम् । अध्यापयतीत्यत्र लाक्षणिकस्याकारस्य ग्रहणमिति ॥ ३९ ॥

---

१ B om उच्यते. २ B om अपि.

एकदेशविकृतमनन्यवत् ॥ ४० ॥

तेनाभवदित्यत्र " इतश्च " (३।४।१००) इतीकारलोपे कृते तिङाश्रया सार्वधातुकसंज्ञा पदसंज्ञा च । तथा करिषीष्टेत्यत्र " स्यसिच्सीयुट्० " (६।४।६२) इति सीयुड्ग्रहणेन सीमात्रस्य [1]ग्रहणम् । प्रहिणोतीत्यत्र तु " अचः परस्मिन्० " (१।१।५७) इत्यादिना स्थानिवद्भावेनापि " हिनुमीना " (८।४।१५) इति णत्वं सिध्यति ॥

न्यायसिद्धेयम् । तथाहि कर्णच्छेदेऽपि श्वा श्वैव नाश्वो नापि गर्दभः इति । ज्ञापकमप्याहुः आढ्यादि–(३।२।५६) सूत्रेऽच्वाविति प्रतिषेधः ॥ ४० ॥

क्वचिद्विकृतिरपि प्रकृतिं गृह्णाति ॥ ४१ ॥

तेन " निसमुपविभ्यो ह्वः " (१।३।३०) इति ह्वाधातोरात्मनेपदमुच्यमानं प्रकृतिभूतादपि भवति । निह्वयते संह्वयते । ज्ञापकं चात्र " न व्यो लिटि " (६।१।४६) इति विकृतस्य व्येञित्यस्य निर्देशेन व्येञः आत्वनिषेधविधानम् । अत्राहुः । " न व्यो लिटि " (६।१।४६) इत्यत्र " निसमुपविभ्यो ह्वः " (१।३।३०) इत्यत्र चैकारान्ताया एव प्रकृतेरुपादानम् । विकृतिस्तु लक्षणगतेनात्वेन । [2]तस्मात् " दाधा घ्वदाप् " (१।१।२३) इत्यत्र दाधाग्रहणे प्रकृतिभूतयोरपि देङ्धेटोर्ग्रहणम् । प्रणिदयते प्रणिधयतीति ॥ ४१ ॥

बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ४२ ॥

गुणो विशेषणमुपलक्षणम् । चित्रगवादिः । स गुणो यस्यास्ति स तद्गुणः । बहुव्रीहिसमासे विशेषणसहितस्यैव शास्त्रे संविज्ञानम् । तद्यथा । " सर्वादीनि सर्वनामानि " (१।१) इति [3]सर्वस्यापि संज्ञा सिध्यति सर्वस्मायिति । " तसौ मत्वर्थे " (१।४।१९) इत्यत्र तदश्वित्वानित्यत्रोपलक्ष्ये मत्वर्थे मतुपोऽन्तर्भावात्तद्द्वारेणैव मतुपि संज्ञाकार्यं सिद्धम् । न तत्रेयमपेक्ष्यते । यथा काकेभ्यो दधि रक्ष्यतामित्यत्रोपलक्षणात् काकादपि रक्ष्यते । सूत्रेऽपिशब्दात् क्वचिदतद्गुणसंविज्ञानमपि वेदितव्यम् । तदुक्तम् । 'सिद्धं [4]तद्गुणातद्गुणाभ्यां पाणिनेर्यथा लोके' (६।१।१ वा. १५) इति । लोके हि तद्गुणेऽतद्गुणे च बहुव्रीहिर्दृश्यते । यथा लम्बकर्णमानय । चित्रगुमानयेति ॥

ज्ञापकं चात्र आढ्यादि–(३।१।५६) सूत्रे च्व्यर्थेष्वित्युक्त्वाऽच्वाविति निषेधवचनम् । युक्तिरप्यत्र विद्यते । तथाहि । सर्वे आदिर्येषामिति न विश्वादयोऽन्यपदार्थाः । न हि तेषामवयवः सर्वशब्दो भवति । तस्यानारम्भकत्वात् । न च [5]समीपार्थे बहुव्रीहिरस्ति । अनभिधानात् । न हि लम्बकर्ण इत्यनेन यस्य समीपौ लम्बौ कर्णौ सोऽभिधीयते । किं तर्हि यस्यावयवौ स एव । तस्मात् समुदाय एवान्यपदार्थः । न च समुदायस्यैकत्वात् " सर्वादीनि० " (१।१।२७) इत्यत्र बहुवचनानुपपत्तिः । उद्रिक्तावयवभेदः समुदायोऽन्यपदार्थ इत्याश्रयणात् । अतो बहुवचनं युक्तमेव । तदेवं समुदाये सर्वशब्दोऽन्तर्भूत इति तस्यापि संज्ञा भवति ॥ ४२ ॥

१ A ग्रहणे for ग्रहणम्. २ B om. तस्मात्. ३ B सर्वशब्दस्यापि. ४ The Vārttika, given in the Bhāṣya is सिद्धं तु तद्गुणसंविज्ञानात्पाणिनेर्यथा लोके (६।१।१ वा. १५). ५ A समासार्थे for समपार्थे.

ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति ॥ ४३ ॥

तद्यथा “ अलंकृञ्० ” (३।२।१३६) इतीष्णुचाऽलङ्करिष्णुरित्येव भवति । न वाऽसरूप–(३।१।९४) विधिनालंकारक इति । “ स्थेशभास० ” (३।२।१७५) इति वरचि भास्वर इति भवति न तु अनुदात्तेतश्च हलादेरिति युचि भासनः इति ॥ ज्ञापकं चात्र तृज्बाधनार्थं निन्दहिंसादि–(३।२।१४६) सूत्रे वुञो विधानम् । यदि हि वाऽसरूप–(३।१।९४) विधिनां ण्वुलादयस्ताच्छीलिकेषु भवेयुः तदा “ण्वुल्तृचौ” (३।१।१३३) इति ण्वुलि कृते निन्दको हिंसक इत्यादयः सिद्धाः । किं वुञो विधानेन । तत्कृतं ज्ञापयति ताच्छीलिकेषु वाऽसरूप–(३।१।९४) विधिना तृजादयो न भवन्तीति । तदेवं ताच्छीलिकानामताच्छीलिकैर्वाऽसरूप–(३।१।९१) विधिर्नास्तीति ज्ञापितम् । इदानीं तु ताच्छीलिकानां ताच्छीलिकैरेव वाऽसरूप–(३।१।९४) विधिर्नास्तीति ज्ञाप्यते । “ जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः ” (३।२।१५०) इत्यत्र पदेर्धातोर्युजर्थं पदग्रहणमनर्थकम् । “ अनुदात्तेतश्च हलादेः ” (३।२।१४९) इत्यनेनैव युचा पदनः इत्यस्य सिद्धत्वात् । एवं तर्हि “ लषपतपद० ” (३।२।१५४) इति पद्यतेर्युचो बाधक उकञ् स्यात् । न । वाऽसरूप–(३।१।९४) विधिना युजपि भविष्यति । तदेव युज्विधानं ज्ञापयति ताच्छीलिकानां ताच्छीलिकैर्वाऽसरूप–(३।१।९४) विधिर्नास्तीति । तेनालंपूर्वात्करोतेस्तृन्न भवति अलंकर्त्तेति ॥

प्रायिकं चैतत् । “ सूददीपदीक्षश्च ” (३।२।१५३) इति दीपो युच्प्रतिषेधेन ज्ञापितम् । यदि ताच्छीलिकेषु वाऽसरूप–(३।१।९४) विधिर्नास्त्येव तदा “ नमिकम्पिस्म्यजसकमहिंसदीपो रः ” (३।२।१६७) इति रप्रत्ययेनैव विशेषविहितेन युज् बाधिष्यते किं प्रतिषेधेन । तत् कुर्वन् ज्ञापयति कचिदस्ति समावेश इति कम्रा कमना युवतिरिति रयुचोः समावेशः सिद्धः । गन्ताऽखिलः गामुक इति तृजुकञो-र्विकत्थी विकत्थन इति घिनुण्युचोः समावेशः सिद्धः ॥ ४३ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ कर्मणिपादो नाम तृतीयाध्यायस्य द्वितीयः पादः ॥

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥ ४४ ॥

पूर्वस्था अपवादा अनन्तरान् समीपस्थानेवोत्सर्गान् बाधन्ते नोत्तरान् । व्यवहितार्थोऽत्रोत्तरशब्दः । तद्यथा । “ ह्वावामश्च ” (३।२।२) इत्यपवादः समीपमेवानुपसर्गे कं बाधते न व्यवहितं ताच्छीलिकं णिनिं स्वर्गह्वायीति । बाध्यविशेषचिन्तायां चैषा परिभाषा प्रवर्त्तते न समुदायापेक्षयेति “ इको झल् ” (१।२।९) इत्यत्र न्यासकृतोक्तम् । तेन “ निष्ठायां सेटि ” (३।४।५२) इत्यनेन णिलोपेन यथा भक्षितामित्यत्रे-

१ A अलंकृञादिना इष्णुचा. २ After अलंकारक इति P. om. स्थेशभासेति वरचि भास्वर इति भवति । अनुदात्तेतश्च हलादेरिति युचि भासन इति. ३ A om. वासरूपविधिना... सिद्धाः. ४ A बाध उकञ्. ५ A तृन् भवति. ६ B गामुकम् P ७ ताच्छीलिकणिनिं.

यङ् बाध्यते तथा कारितमित्यत्र " एरनेकाचोऽसंयोगपूर्वस्य " (६।४।८) इति यणादेशश्चेति ॥

ज्ञापकं चात्र " परिमाणाख्यायां सर्वेभ्यः " (३।३।२०) इत्यत्र सर्वग्रहणम्। तद्धि द्वौ कारौ त्रयः काराः इत्यत्रापो बाधनार्थम् । अन्यथा पुरस्तादपवादन्यायेन समीपस्य " एरच् " (३।३।५६) इत्यस्यैव बाधकं स्यादिति । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेत्येतत्स्वरूपयाऽनयैव च परिभाषया " वोताप्योः " (३।३।१४१) इत्यत्र सूत्रे न्यासे यदुक्तम् ' यद्यत्राङो निर्देशस्तदा " वोताप्योः " (३।३।१४१) इति प्राप्नोति । परेण सह गुणे कृते पूर्वेण सह वृद्धया भवितव्यम् । सौत्रत्वाददोष इति ' तदुपपद्यते । तथा हि " ओमाङोश्च " (६।१।९५) इत्यनेन पररूपत्वेन समीपभूतमकःसवर्णे-(६।१।१०१) दीर्घत्वं बाध्यते । न तु " वृद्धिरेचि" (६।१।८८) इत्येपि । अन्यथा हि " ओमाङोश्च " (६।१।९६) इत्यनेन वृद्धिदीर्घयोरपवादेन पैररूपत्वेन ' वोताप्योः " (३।३।१४१) इतिनिर्देशस्य सिद्धत्वान्निर्देशादस्य सिद्धिरित्ययुक्तमुक्तं स्यात् ॥

ऐतच्चासम्यक् । सैवर्णदीर्घबाधने तु " ओमाङोश्च (६।१।९५) इति पैररूपविधानवैयर्थ्यात् । नैतत् । अर्छाच्छादनमित्यादौ पररूपत्वेनानुनासिकाकारनिवृत्तेः प्रयोजनत्वात् । अन्यथा सवर्णदीर्घत्वेनात्र पक्षेऽनुनासिकोप्याकारः स्यात् । तदेवं " ओमाङोश्च " (६।१।९५) इत्यत्र यन्मैत्रेयेणोक्तम् ' आङा सह यत्रैकादेशो

इदं तूदाहरणम् । अदाबिति दाप्ग्रहणे दैपोऽपि घुसंज्ञाप्रतिषेधः सिद्धः । अवदातं मुखमिति । भाष्ये पुनर्दिवादौ दाप् शोधने इति पठितव्यमित्युक्तम् ॥

नन्वेतद्यदि प्रयोजनं तदा 'दाधा घ्वपित्' इति क्रियताम् । एवं हि दैपोपि पित्वाद् घुसंज्ञाप्रतिषेधः सिद्ध्यति । लाघवं च भवति । नानुबन्धकृतपरिभाषापि नाश्रयितव्या भवति । उच्यते । दाधा घ्वपिदिति कृते लक्षणपरिभाषात्र न प्रवर्त्तेत इत्यत्रार्थे प्रमाणं न स्यात् । अदाबिति तु कृते यथा प्रतिषेधे लाक्षणिकस्यापि दैपो ग्रहणं तथा विधावपि दाधाग्रहणेन लाक्षणिकस्यापि ग्रहणमुपपद्यते । तथा च " उदीचां माङो व्यतीहारे" (३।४।१९) इत्यत्र रक्षितेनोक्तं ज्ञापकफलमिदं 'दाधा घ्वपित्' इत्यनेन यद्यपि सिध्यति तथापि तथा निर्देशो न कृतः इति तत्रैव प्रतिपादितमिति । [1]किं स्वपाविति द्विवचनेन निर्देशे कृतेऽविद्यमानः पकारो ययोस्तावपाविति [2]प्रतिषेधे दाब्दैपोर्ग्रहणसामर्थ्याद्विधावपि दाधावपि दाधाग्रहणे लक्षणपरिभाषातिक्रमः शक्यत एव व्याख्यातुम् । तथा तु न कृतं प्रणिदापयतीत्यत्रापि पुकि कृतेऽपाविति प्रतिषेधाशङ्काप्रसङ्गात् । अपिताविति तु कृते यद्यप्येतत्परिह्रियते तथापि तथा न कृतं वैचित्र्यार्थत्वात् ॥

ज्ञापकं चात्र "उदीचां माङो व्यतीहारे" (३।४।१९) इति [3]कृतात्वस्य निर्देशः । अनेजन्तत्वे हि स न स्यात् । न च माङ् माने इत्यस्यैव निर्देशस्तस्य व्यतीहारे वृत्त्यसंभवात् ॥ ४५ ॥

चानुकृष्टं नोत्तरत्र ॥ ४६ ॥

चकारेणानुकृष्टमुत्तरत्र नाभिसम्बध्यते । तेन " वदः सुपि क्यप् च " (३।१।१०६) इति चकारेणानुकृष्टस्य यतो " भुवो भावे " (३।१।१०७) इत्यत्रानुवृत्तिर्न भवति । क्यपस्तु भवति ब्रह्मभूयमिति । यत्र स्वरितत्वेनानुवृत्तौ सिद्धायां चकारेणानुकर्षणं क्रियते तत्रास्या व्यापारः । यत्र तु प्रतियोगिनं दृष्ट्वा निवृत्तौ प्राप्तायां चकारेणानुवर्त्तनं तत्रेयं नोपतिष्ठते । तेन " अन्तरान्तरेण युक्ते " (२।३।४) इत्यत्र द्वितीयानुवर्त्तते । मैत्रेयः पुनः सामान्येनैतां मन्यते । यदाह । " इको झल् " (१।२।९) इत्यत्र चानुकृष्टत्वादित्यपि सिद्धान्त इति ॥

ज्ञापकं चात्र "अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ" (३।४।५९) इत्यत्र [4]णमुलधिकारेण णमुल्वचनम् । यदि चानुकृष्टमप्यनुवर्त्तते तदा 'क्त्वा च' इत्येवोच्येत । अनित्या चेयम् । तच्चानित्यत्वं " प्रातिपदिकान्तनुम्विभक्तिषु च " (८।४।११) इति चानुकृष्टमपि विकल्पं निवर्त्तयितुं " एकाजुत्तरपदे णः " (८।४।१२) इति पुन[5]र्णग्रहणादवसीयते ॥ ४६ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ संबन्धपादो नाम
तृतीयाध्यायस्य चतुर्थः पादः ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

---

१ A किं स्वपादिति. २ A प्रतिषेधात्. ३ A om. इति कृतात्वस्य...व्यतिहारे. ४ A णमुलाधिकारेण. ५ AP पुनर्ग्रहणादवसीयते.

मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ ४७ ॥

तद्यथा । "कृञो हेतुताच्छील्यानुलोम्येषु" (३।२।२०) इति पूर्वमणं बाधते । विद्या यशस्करी । न परं ताच्छीलिकं णिनिं (३।२।७८) श्राद्धकारीति । एवम् "इणो यण्" (६।४।८१) इति पूर्वमियङं बाधते । न परौ वृद्धिगुणौ (७।२।११५, ७।३।८४) आयकमयनमिति । "न संप्रसारणे संप्रसारणम्" (६।१।३७) इत्यत्र संप्रसारणग्रहणानुवृत्तौ यत् संप्रसारणग्रहणं तत्सामर्थ्यादुत्तरस्यापि "श्वयुवमघोनामतद्धिते" (६।४।१३३) इत्येतस्य प्रतिषेधो भवति । यूनः पश्य । यूना यून इति । अत एव संप्रसारणग्रहणसामर्थ्यात् संप्रसारणप्रतिषेधे कर्तव्ये "अचः परस्मिन्०" (१।१।५७) इति स्थानिवद्भावोऽपि न प्रवर्तते । स्थानिवत्कृतं व्यवधानं वा नाश्रीयते । ननु तत्र "ल्यपो लिटि" (६।४।५२) इति यत्संप्रसारणमव्यवधाने प्राप्नोति तद्बाधनार्थं संप्रसारणग्रहणं स्याद्विज्यये इति । नैतत्[1] । यद्येतावत्प्रयोजनं स्यात्तदा संप्रसारणग्रहणमकृत्वा ल्यथ इत्येव कुर्यात् । ल्यथश्च संप्रसारणे संप्रसारणं न भवतीति सिद्धं विव्यये इति । "ल्यपो लिटि" (७।४।८८) इत्यत्रैव वा 'ल्यपो यो लिटि' इति कुर्यादिति[2] ॥

ज्ञापकं चात्र "बहुव्रीहेरूधसो ङीष्" (४।१।२५) इत्यत्र स्वरितत्वासञ्जनं वृत्तिन्यासप्रतिपादितम् । तद्धि "अन उपधालोपिनोऽन्यतरस्याम्" (४।१।२८) इत्यत्र स्वरितत्वादनुवर्त्तते । तेन "अन उपधालोपिनोऽन्यतरस्याम्" (४।१।२८) इति परत्वाद् भविष्यन्तं ङीपं बाधित्वा "बहुव्रीहेरूधसो ङीष्" (४।१।२५) इति ङीषेव भवति । घटोध्नीति । अन्यथा ङीष् मध्येपवादत्वात्पूर्वयोरेव डाप्प्रतिषेधयोर्बाधकः स्यात् । ङीष्ङीपोश्च स्वरे भेदः । स्वरोऽपि भेदको भवति । यदाहुः । त्रिधा शब्दो भिद्यते । रूपतोऽर्थतः स्वरतश्चेति । तथा च "तद्धिताः" (४।१।७६) इत्यत्र मैत्रेयः प्रतिपादितवान् । यदि स्त्र्यधिकारात् पूर्वमिदं स्यात् तदा दूषणान्तरम् । ईहा चेष्टेति । "यस्येति च" (६।४।१४०) इति लोपे कृते "एकादेश उदात्तेनोदात्तः" (८।२।५) इत्युदात्तो न स्यात् । अत्र चोदयन्ति । ईहा चेष्टेत्यत्राकारलोपे कृते यद्यपि "एकादेश उदात्तेनोदात्तः" (८।२।५) इत्युदात्तत्वं नास्ति तथापि "अनुदात्तस्य च यत्रोदात्तलोपः" (६।१।१६१) इत्यनेनोदात्तत्वं विद्यत एवेति । न चानयोरुदात्तयोर्विशेषोऽस्ति । अस्तीत्युच्यते । तथाहि । यदा "एकादेश उदात्तेनोदात्तः" (८।२।५) इत्यनेनासिद्धाधिकारिणोदात्तत्वं[3] क्रियते तदा "पूर्वत्रासिद्धम्" (८।२।१) इति तस्यासिद्धत्वात् "उदात्तस्वरितपरस्य सन्नतरः" (१।२।४०) इत्यनेनेकारैकारौ सन्नतरौ न भवतः । सन्नतरोऽनुदात्ततर इत्यर्थः । यदा तु "अनुदात्तस्य च यत्रोदात्तलोपः" (६।१।१६१) इत्यनेन क्रियते[4] तदा तस्य सिद्धत्वात् "उदात्तस्वरितपरस्य सन्नतरः" (१।२।४०) इति

---

१ A om. नैतत्. २ A इत्यत्रैव चाल्यपो लिटीति. ३ A om. इत्युदात्त त्वं… उदात्तेनोदात्तः. ४ A उदात्तः क्रियते.

स्वतरः स्यात् । एकोदेशस्वरस्यासिद्धत्वेऽप्यकारप्रत्ययस्योदात्तत्वमाश्रित्य सन्नतरेण भवितव्यमेवेति न वाच्यम् । यत एकादेशेन प्रत्ययस्य निवर्तितत्वात् कुतस्तस्याद्युदात्तत्वम् । असिद्धत्वं ह्येकादेशस्वरस्य न त्वेकादेशस्य ॥

नन्वेवमपि 'एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः' (८।२।६ वा॰१) इत्यनेनैकादेश-स्वरस्य सिद्धत्वात् सन्नतरेण भवितव्यमेव। उच्यते। तत्र हि परिगणनमस्ति। अयवायावेका-देशशतृस्वरैकानुदात्तसर्वानुदात्तार्थं इति । नन्वेवमपि स्वरितपरत्वात् सन्नतरेण भवितव्यमेव । एकादेशस्वरस्याऽसिद्धत्वादुदात्तानुदात्तयोरेकादेश आन्तरतम्यात् स्वरितः। नैतत्। अन्तर-तमस्वरस्योदात्तत्वेन बाधितत्वात् । अथ तस्यासिद्धत्वात् कुतस्तेन बाधेति चेत् । न । 'परिहृत्यापवादविषयमुत्सर्गः प्रवर्तते' (परि. ९४) इति स्वरित उदात्तविषये न प्रवर्तते । नन्वसिद्धत्वात् कुतस्तस्य विषयोऽयमुच्यते । उच्यते । असिद्धत्वेन तत्काल उदात्तस्वरस्य प्रवृत्तिर्निराक्रियते । न स्वविषयत्वं क्रियते । विषये च प्रवर्तमानोऽपवाद उत्सर्गं बाधत एव । ददतीत्यत्रादादेशो यथा । एवं चात्रापि स्वरितस्योदात्तत्वेन बाधा कर्तव्या । नन्वेव-मपि सन्नतरोऽत्रानिवार्य्य एव । ईहचेष्टिभ्यां "गुरोश्च हलः" (३।३।१०३) इत्य-कारप्रत्यये कृते टाबुत्पत्तेः प्रागेव सन्नतरेण भवितव्यमन्तरङ्गत्वात् । तस्माद्बोद्धव्योऽयं रक्षितः। बोद्धव्याश्च विस्तरा एव रक्षितग्रन्था विद्यन्ते। तथाहि। "ङ्याप्॰" (४।१।१) सूत्रे आबन्तेष्वपि डाप्चाबन्तयोः पूर्वोक्तात् कारणादिति । तथा तत्रैवेह च "इनः स्त्रियाम्" (५।४।१५२) इतीन्नन्ताद्बहुदण्डिनीका चेति विभाषा कब्विधिरिति। तथा "ऋन्नेभ्यो ङीप्" (४।१।५) इत्यत्र कर्त्री हर्त्रीति "घेर्ङिति" (७।३।१११) इति न गुणः। "सुपि च" (७।३।१०२) इत्यनुवृत्तेः सुपि ङिति तद्विधानादिति। "न क्रोडादिबह्वचः" (४।१।५६) इत्यत्र यथा क्रोडाशब्दात् स्त्रीलिङ्गात् प्रतिषेध उक्तस्तथा पुंलिङ्गाद्भवितव्यमेवेति लक्ष्यत इति ॥ ४७ ॥

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ॥ ४८ ॥

विधिर्वा प्रतिषेधो वाऽनन्तरस्यैव भवति । यथा "वा च्छन्दसि" (३।४।८८) इत्यनेन "सेर्ह्यपिच्च" (३।४।८७) इत्यनन्तरमपित्त्वं विकल्प्यते न तु व्यवहितो ह्यादेशः युयुद्धि युयोहि । तथा "नेटि" (७।२।४) इति वृद्धिप्रतिषेधोऽनन्तर-स्यैव "वदव्रजहलन्तस्याचः" (७।२।३) इत्यस्य भवति अदेवीदिति । न सिचि वृद्धेः (७।२।१)। नापि "मृजेर्वृद्धिः" (७।२।११४) इत्यस्य अमार्जीदमार्जीदिति। क्वचित्तु स्वरितत्वप्रतिज्ञानसामर्थ्याद् व्यवहितस्यापि विधिनिषेधौ भवतः। यथा "टिड्ढा-णञ्॰" (४।१।१) इति डापा व्यवहितस्यापि ङीपो विधिः । तथा "कालाध्वनोर-त्यन्तसंयोगे" (२।३।५) इति द्वितीया व्यवहितापि विधीयते । तथा "न षट्स्वस्रा-दिभ्यः" (४।१।१०) इति द्वयोरपि टाप्ङीपोः प्रतिषेधः ॥

---

१ A om. एकादेशः. २ A अन्तरङ्गस्वरस्य. ३ A नीनिवार्य एव. ४ A बोद्धव्याश्च विस्तरा एव रक्षित॰. ५ A ङ्याप्सूत्रे आबन्तेष्वपि प्रसवंतयोः पूर्वोक्तात्.

अयं चार्थः प्रत्यासत्तिन्यायलब्धः पठ्यते । ज्ञापकमप्याहुः । "संख्याव्ययादे०ः" (४।१।२६) इति ङीब्वचनम् । तद्धि " बहुव्रीहेरूधसो ङीष् " (४।१।२५) इति ङीषा व्यवहितो ङीबिति पुनः क्रियते । प्रतिषेधोऽप्यनन्तरस्यैव भवतीत्यत्र " न क्तिचि दीर्घश्च " (६।४।३९) इति दीर्घग्रहणं ज्ञापकम् । तदप्यनया परिभाषया यन्तिः सन्तिरित्यत्रानन्तरस्य "अनुदात्तोपदेश०" (६।४।३७) इत्यस्यैव प्रतिषेधः स्यात् । न व्यवहितस्य "०क्झलोः क्ङिति" (६।४।१५) इत्यस्येत्येवमर्थं क्रियत इति ॥ ४८ ॥

अकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्त्तयन्ति ॥ ४९ ॥

विशिष्ट ऊहो निश्चयो व्यूहः । विशेषेणाकृतनिश्चयाः पाणिनीयाः कृतमपि लक्षणं व्यभिचारयन्तीत्यर्थः । तेन पपुषः पश्येत्यत्र यद्यपि पपिवस्शब्दाच्छस् विहितस्तथाप्यकृतव्यूहा इति वचनात् पपावस् अस इति स्थिते संप्रसारणं संप्रासारणाश्रयं च कार्यं बलीयो भवतीतीडागमं बाधित्वा संप्रसारणम् । ततो वलादित्वाभावादिण् न भवति । अत्राहुः । अस्त्विट् । " उस्यपदान्तात " (६।१।९६) इति पररूपत्वे[1] सिद्धं पपुषः इति । एतच्चायुक्तम्[2] । " उस्यपदान्तात् " (६।१।९६) इत्यत्रादित्वानुवृत्तेः । ननु तथापीटो यणादेशे कृते बहिरङ्गपरिभाषया संप्रसारणस्यासिद्धत्वाद्वलिलोपेन सिद्धम् । असांहितिकत्वाद्वलिलोपस्याचोरनानन्तर्य्येऽविधानान्नाजानन्तर्यं इत्यत्र नास्ति । न च बहिरङ्गपरिभाषया यणादेश एव न प्राप्नोतीति वाच्यम् । 'नाजानन्तर्य्ये' इति वचनात् । अत्रोच्यते । अन्तरङ्गे वलिलोपे कर्त्तव्ये बहिरङ्गस्य यणादेशस्यासिद्धत्वाद्यणेव नास्ति कुतो वलिलोप इति । बहिरङ्गत्वं तु यणादेशस्य संहितापक्षत्वात्[3] । किं त्वेवं वर्त्तेते वर्तेति इत्यत्र " आतो ङितः " (७।२।८१) इति बहिरङ्गस्यैकादेशस्यासिद्धत्वाद्वलि लोपो दुर्घटः । अन्ये तु प्रयोजनमिदं निमित्तापायपरिभाषया सिद्धमित्याचक्षते । न चासिद्धपरिभाषया निमित्तसद्भावोऽस्तीति वाच्यम् । " असिद्धवदत्राभात् " (६।४।२२) इति भाधिकारीयायां परिभाषायां कर्तव्यायां बहिरङ्गस्य भाधिकारीयस्य संप्रसारणस्यासिद्धत्वादङ्गवैकल्येन परिभाषाया व्यापाराभावात् ॥

ननु च व्याश्रयत्वात कथम् " असिद्धवदत्राभात " (६।४।२२) इत्यस्य व्यापारः । उच्यते । परिभाषायां यन्निमित्तं बहिरङ्गं संप्रसारणादि तस्य यन्निमित्तं स्वादि तद् " वसोः संप्रसारणम् " (६।४।१३१) इत्यस्यापि । परंपरयापि यन्निमित्तं तदपि परिभाषाया निमित्तमाश्रीयते । भाधिकारीयकार्यमेतदर्थमेव सिद्धाधिकार इष्यते । अतोऽस्त्येव समाननिमित्तत्वमिति । अवश्यं चैतत । पपुषः पश्येत्यादौ " आतो लोप इटि च " (६।४।६४) इति लोपार्थं व्याख्येयम् । न चात्र " उस्यपदान्तात् " (६।१।९६) इत्यस्ति । तत्कर्त्तव्यतायां[4] संप्रसारणस्यासिद्धत्वात् । एतच्चासम्यक् । अचोरानन्तर्ये

---

१ A पररूपे सिद्धं. २ A तथायुक्तं. ३ A संनिपातापेक्षत्वात्. ४ A तदकर्तव्यतायां.

संहिताधिकारीये "उस्यपदान्तात" (६।१।९६) इति कर्त्तव्ये 'नाजानन्तर्ये०' इत्यनया असिद्धपरिभाषाप्रतिषेधात्। एवं तर्हि "उस्यपदान्तात्" (६।१।९६) इत्यत्र प्रतिपदोक्तस्योसो ग्रहणे पपुषः इत्यत्र लाक्षणिक ङसि पररूपत्वं नास्ति। अत एव "असिद्धवदत्राभात्" (६।४।२२) इत्यत्र न्यासकृतोक्तं प्रतिपदोक्तस्य ङुसस्तत्र ग्रहणमिति ॥

नैनु "उस्यपदान्तात्" (६।१।९६) इत्यत्र लाक्षणिकपरिभाषाबाधात् सामान्यग्रहणमुक्तम्। उच्यते। एवं मन्यते। लक्षणपरिभाषाबाधो न कर्त्तव्यः। प्रयोजनाभावात्। अस्तु लक्षणपरिभाषा। न चैवं पपुषः पश्येत्यत्र च्छान्दसोदाहरणे सार्वधातुकसंज्ञापक्षे "आतो लोप इटि च" (६।४।६४) इत्यस्याभावाल्लाक्षणिके ङसि "उस्यपदान्तात्" (६।१।९६) इत्यस्याभावादाकारश्रुतिर्दूषणम्। "श्नाभ्यस्तयोरातः" (६।३।११२) इत्याकारलोपाच्छान्दसत्वाच्च ॥

यत एवासिद्धपरिभाषा नास्ति तत एव "अपृक्त एकाल्प्रत्ययः" (१।२।४१) इत्यत्र रक्षितेनोक्तम्। वेरपृक्तस्येत्युच्यमाने न दोषो दर्विरित्यादावपृक्तत्वेऽपीति न वाच्यम्। तथा च राजकुलवानमाचष्टे राजकुलयतीत्यत्रापि प्रसङ्ग इति। तथा "जनसनखनक्रमगमो विट्" (३।२।६७) इत्यत्र रक्षितेनोक्तम्। इकारो "वेरपृक्तस्य" (६।१।६७) इति विशेषणार्थ इति। असति तस्मिन् परलोकदश्वयतीत्यत्र णिचि टिलोपे कृते वकारलोपः स्यात्। तस्मादिकारो विशेषणार्थ इति। एतत् 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यस्य टिलोपस्य "असिद्धवदत्राभात्" (६।४।२२) इत्यसिद्धत्वेनाप्रवर्त्तनादुपपद्यते। यथैवं "युवोरनाकौ" (७।१।१) इत्यत्र यदुक्तं रक्षितेनाङ्गसंज्ञानिमित्तयोर्यकारवकारयोर्ग्रहणेऽनुनासिकयोर्यकारवकारयोर्ग्रहणमनर्थकमेवेति तदयुक्तम्। पूर्वोक्तक्रमेण राजकुलयति परलोकदश्वयतीत्यत्वादेशप्रसङ्गात्। उच्यते। भाधिकाराश्रयेऽसिद्धाधिकारमाहुः तन्मतेन वाहऊट्टिलोपयोराभाच्छास्त्रीयत्वं नास्ति। अतोऽसिद्धपरिभाषायां कर्त्तव्यायां "असिद्धवदत्राभात्" (६।४।२२) इत्यस्याप्रवृत्तिरित्यदोषः ॥

ज्ञापकं चात्र "समर्थानां प्रथमाद्वा" (४।१।८२) इत्यत्र समर्थग्रहणम्। तथाहि। यद्येषा न स्यात् तदा समर्थितसर्वकार्यात्तद्धितो यथा स्यादित्येवमर्थं समर्थग्रहणमनर्थकं स्यात्। "गोरतद्धितलुकि" (५।४।९२) इत्यत्रातद्धितग्रहणं केचिदाहुः। तद्धि सुब्लुकि मा भूदित्येवमर्थं क्रियते राजगवीयतीति। अत्र च प्रागेव निष्पन्नटच्। तदुत्तरकालं क्यचि सुब्लुकि यदा प्रवृत्तोऽपि टच् निवर्त्तेते तदा भवति ॥ ४९ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ ङ्याप्पादो नाम

चतुर्थाध्यायस्य प्रथमः पादः ॥

---

१ P om. ङसि. २ A न तु for ननु. ३ A युक्तम् for उक्तम्. ४ A लोपोच्छान्दसत्वात् P लोपश्छान्दसत्वात्. ५ A निवर्तते दानदा भवन्ति.

निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ ५० ॥

एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ॥ ५१ ॥

तेन " सदव्ययतव्य० " (२।२।११) इति षष्ठीसमासनिषेधे निरनुबन्धकस्यैव तव्यस्य ग्रहणं न तव्यतः। तथा " दिव उत् " (६।१।१३१) इत्यत्र दिवु[1]धातोरुत्वं न भवति। अक्षद्यूरिति। " यतोऽनावः " (६।१।२१३) इत्यत्रैकानुबन्धकस्य यतो ग्रहणं न द्व्यनुबन्धकस्य ण्यतः ॥

ज्ञापकं चात्र " वामदेवाड्ड्यड्ड्यौ " (४।२।९) इति [2]ड्यड्ड्यतोर्ङित्वम्। तच्च न कर्त्तव्यम्। "यस्येति च " (६।४।१४८) इति लोपेनैव वामदेव्यस्य सिद्धत्वात्। तत्कृतमनयोरस्तित्वं ज्ञापयति। तदुक्तम्।

" सिद्धं यस्येतिलोपेन किमर्थं ययतौ ङितौ।
[3]ग्रहणं माऽतदर्थे भूद्वामदेव्यस्य नञ्स्वरे " इति ॥

केचित्प्रत्ययविषयां निरनुबन्धकपरिभाषामाहुः। एतत्तु " जृव्रश्च्योः क्त्वि (७।२।५५) इत्यत्रानुन्यासकारेणोक्तम्। तथा च " न कवतेर्यङि " (७।४।६३) इत्यत्र न्यासकारेण लुग्विकरणपरिभाषयाऽऽदादिकस्य कौतेर्[4]ग्रहणे सिद्धे कवतेरिति श्तिपा निर्देशः तौदादिकस्य कवतेर्ग्रहणनिरासार्थं इति यदुक्तं तदुपपद्यते। अन्यथाऽन्तरङ्गाया निरनुबन्धकपरिभाषाया विषये लुग्विकरणपरिभाषा कथमभिधीयते। अन्तरङ्गत्वं तु निरनुबन्धकपरिभाषाया उपदेश एव इत्संज्ञाप्रवर्त्तनात्। लुग्विकरणपरिभाषायास्तु बहिरङ्गत्वमुत्तरकालं विकरणलुको विधानात्। ग[5]णपाठविशेषपरिज्ञानाच्च ॥ अन्ये तु सामान्येन निरनुबन्धकपरिभाषामाहुः। अत एव "अस्तेर्भूः" (२।४।५२) इत्यत्र श्तिपा निर्देशो वैचित्र्यार्थ उक्तो न्यासकृता न त्वसु क्षेपण इत्यस्य निरासार्थं इति। तन्निरासस्य निरनुबन्धकपरिभाषया सिद्धत्वात् ॥

इयं च एकानुबन्धकपरिभाषा " वसोः संप्रसारणम् " (६।४।१३१) इत्यत्र नोपतिष्ठते। वसोरुगित्करणसामर्थ्यात्। तेन वसुग्रहणे क्वसुक्वस्वोरुभयोर्ग्रहणं भवति। ननु चासति वसोरुगित्त्वे वसः संप्रसारणमित्युच्यमाने वस आच्छादने इत्यस्य [6]चर्मवसः पश्येत्यत्रापि संप्रसारणं प्राप्नोति। नैतत्[7]। वस आच्छादने इत्यस्य सानुबन्धकत्वात्। न च वस निवासे इत्यस्य निरनुबन्धकस्य ग्रहणमाशङ्कनीयम्। तत्र क्रियाश्रयस्यैव संप्रसारणस्य सिद्धत्वात्। ननु वसोरुगित्त्वं विद्वानिवाचरतीति क्विबन्तात् क्त्वाप्रत्यये विद्वसित्वा इत्यत्र " उदितो वा " (७।२।५६) इति विकल्पेनेडागमार्थं कस्मान्न भवति। प्रत्ययानुबन्धो लोप समुदायानुबन्ध एव उच्यते। अनभिधानात् क्विबत्र नास्तीति न तदर्थमुगित्त्वमिति " विदेः शतुर्वसुः " (७।१।३६) इत्यत्र रक्षितः ॥

---

१ C P दिवु धातोः. २ A C ड्यड्ड्ययोः. ३ A ग्रहणस्यातदर्थे. B ग्रहणं स तदर्थे. ४ A कौतेर्ग्रहणे. ५ P गणपाठविशेषण. C गणपाठः विशेष. ६ P चर्मवसः. ७ A नैवम्.

भाष्ये तु वसोरपि ह्यनुबन्धकत्वमुक्तम् । तथा च "विदेः शतुर्वसुः" (७।१।३६) इत्यत्र भाष्यम् । वसुरिति द्विसकारको निर्देश इति । तत्रैकः श्रवणार्थोऽपरस्तु ह्यनुबन्धकत्वार्थ इति । अन्ये त्वाहुः । अनुबन्धस्य स्थानिवद्भावेन वसुरपि नैकानुबन्ध इति । नैतत् । स्थानिवद्भावेन ह्यनुबन्धकार्याणामतिदेशो नानुबन्धस्यैव । स्यादेतदेकानुबन्धकग्रहणे न [1]ह्यनुबन्धकस्येति प्रतिषेधान्न ह्यत्र किंचिदेकानुबन्धकमस्तीति "वसोः संप्रसारणम्" (६।४।१३१) इत्यत्र रक्षितः । यथैवं यद् व्याख्यातं "औङ आपः" (७।१।१८) इत्यत्र रक्षितेन 'न हि स्थानिवद्भावेनानुबन्धो भवत्यपि तु कार्यं, स्थानिवद्भावशास्त्रस्य स्थानिकार्यार्थित्वादनुबन्धाश्च कार्यार्था न तु कार्याणीति' तदयुक्तम् । यतस्तत्रापि पूर्वोक्तक्रमेण ह्यनुबन्धकप्रतिषेधादौट्स्थानिकस्यौङो[2] ग्रहणं न स्यात् । एतन्न्यायानुसारेणैव गाङ्कुटादि–(१।२।१) सूत्रे कै गै शब्दे इत्यस्यैव ग्रहणं स्यादित्यवधारणं युज्यते । तथा हि । इण्स्थानिको यो गादेशः स्थानिवद्भावेन सानुबन्धक इति तस्याप्यग्रहणम् । न चैवं वाच्यमेवं हि गाङादेशङकारो न कर्त्तव्यः । स्थानिवद्भावेनेण्धातोरिवेङादेशगा-शब्दस्यापि ग्रहणात् । यतोऽसति ङकारे निरनुबन्धकपरिभाषाया[3] इहाव्यापारे प्रमाणं न स्यात् ॥

नन्वस्यां परिभाषायां सत्यां "उत्करादिभ्यश्छः" (४।२।९०) "नडादीनां कुक् च" (४।२।९१) इति नडकीय इत्यादावेव निरनुबन्धकत्वादायन्नादि–(७।१।२) सूत्रेणेयादेशः प्राप्नोति न तु छणादौ सानुबन्धकत्वात्तैतिरीयमिति । उच्यते । आयन्नादि–(७।१।२) सूत्रे न प्रत्ययग्रहणमपि तु वर्णग्रहणम् । ननु नडकीयादिसिद्ध्यर्थं "नडादीनां कुक् च" (४।२।९१) इत्यनेन किमर्थं छप्रत्ययं कृत्वा कुगागमः क्रियते न नडादिभ्यः कुँट्[4] चेत्येवोच्येत । एवं हि नडादिभ्य इति पञ्चमीनिर्देशेन लाघवं भवति । "तस्णो नलोपश्च" (६।४।१५३ ग. सू.) इति गणसूत्रं न कर्त्तव्यं भवति । पदसंज्ञयैव लोपस्य सिद्धत्वात् । तथा च तत्र रक्षितः । परादौ कुटि कृते "तस्णो नलोपश्च"[5] (६।४।१५३ गणसूत्र) इति वचनमनर्थकम् । प्रत्ययादेस्तु विधियमान ईयादेशो न स्यादिति । अत्रोच्यते । ननु परादौ कुटि कृते "स्वादिषु०" (१।२।१७) इति पदसंज्ञयाऽवग्रहः प्राप्नोति । यथोक्तम् "एकादाकिनिच्चासहाये" (५।३।५२) इत्यत्राकिनिचि कर्त्तव्ये आकिनिचो विधानमवग्रहनिरासार्थमिति । उच्यते । अयस्मयादि-पाठात् भसंज्ञां मन्यते मैत्रेयः । ननु चेदं न छन्दः । उच्यते । तत्र पाठबलाद्भाषायामपि भसंज्ञा भविष्यति । अत एव "टाङसिङसामिनात्स्याः" (७।१।१२) इत्यत्र नादेशे कर्त्तव्ये इनादेशविधानमतिजरसिनेति सिद्ध्यर्थं न्यासे व्याख्यातम् । ननु तथापी-यादेशो न स्यादिति । कथम् । यावता प्रत्ययोपदेशकाल एवेयादेशेन भवितव्यम् । नैतत् ।

---

१ P ह्यनुबन्ध. २ A औङ्स्थानिकस्यौङो C औटः स्थानिकस्य. ३ A परिभाषाव्यापारे. ४ A C कुक् चेत्येव. ५ A नलोपश्चेति वचनमनर्थकं गणसूत्रं.

गृहीतागमा एवागमिन उपजायन्त[1] इति ककारादित्वं स्यादिति । ननु यदि ईयादेशेन नं[2] भावितव्यं तदा कुगागममकृत्वा छप्रत्ययमेव कुर्यात् नडादिभ्यश्छ इति । तस्मात्कुक्यपि कृते ईयादेशेन भवितव्यम् । उच्यते । एवं हि प्रतिपत्तिगौरवं स्यात् ॥ ५०, ५१ ॥

तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥ ५२ ॥

स एवानुबन्धो यस्य स तदनुबन्धकः तस्य ग्रहणेऽन्यस्य तच्छून्यस्य ग्रहणं न भवति ॥ तेन "चङि" (६।१।११) इति चकारानुबन्धे द्विर्वचनं क्रियमाणं तच्छून्येऽङि न भवति । अदर्शदिति । अनुबन्धोच्चारणसामर्थ्यलब्धोऽयमर्थ इति । सः अनुबन्धो यस्य तस्य ग्रहणे[3] स यत्र नास्ति तस्य ग्रहणं न भवतीत्यपरोऽस्यार्थः इत्याहुः ॥ तथा च "स्वादिष्वसर्वनामस्थाने" (१।२।१७) इत्यत्रानया प[4]रिभाषया प्रथमैकवचनग्रहणमुक्तं भवति रक्षितेन ॥ ५२ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ रक्तपादो
नाम चतुर्थाध्यायस्य द्वितीयः पादः ॥

स्वरविधौ व्यञ्जनमविद्यमानवत् ॥ ५३ ॥

उदात्तादिस्वरविधौ व्यञ्जनमविद्यमानवत् स्यात् । तेन तव्यप्रत्ययादेस्तकारस्याविद्यमानत्वात् प्रत्ययादेरकारस्योदात्तत्वं भवति । क[5]र्त्तव्यमिति । राजदृषदित्यत्र हलन्तत्वेऽपि " समासस्य च " (६।१।२२३) इत्यन्तोदात्तत्वम् । उदश्वित्वानित्यत्र " ह्रस्वनुड्भ्यां मतुप् " (६।१।१७६) इत्यनेन तकारेण व्यवधानाद् ह्रस्वात्परो मतुब् न भवतीति तस्योदात्तत्वं न भवति । अनया तु परिभाषया प्राप्नोति । तत्रास्या लक्ष्यस्थित्याऽनाश्रयणेन वृ[6]त्तिकृता समाहितम् । " समासस्य " (६।१।२२३) इत्यत्र तु भाष्येऽप्येतद्दोषपरिहारार्थं हल्स्वरप्राप्तावित्युक्तम् । अत्रोच्यते । अचः स्वरविधानाद् हल्स्वरप्राप्तिरेव नास्ति । तत्किमुच्यते हल्स्वरप्राप्ताविति । तत्रोक्तम् । " उच्चैरुदात्तः " (१।२।२९) इत्यादौ ' अचः ' इति षष्ठीनिर्दिष्टं निवृत्तमिति । चोद्यं च यदत्रापद्यते तत्तत्रैव परिहृतमिति ॥

ज्ञापकं चात्र " अनुदात्तादेश्च " (४।३।१४०) इत्यञो बाधनार्थं " बिल्वादिभ्योऽण्" (४।३।१३६) इति वचनम् । यदि व्यञ्जनं विद्यमानं स्यात्तदा बिल्वादयोऽनुदात्तादयो न भवेयुः । अनुदात्तस्याज्धर्मत्वादिति प्राप्तिरेव नास्ति । मयटो बाधनार्थं तु न वाच्यम् । मयड्बाधनार्थे ह्यस्मिन् बिल्वादिभ्योऽण्" (४।३।१३६) इत्यण्ग्रहणमनर्थकं स्यात् । तस्य हीदं प्रयोजनम् । पाटलिपुत्रशब्दोऽत्र पठ्यते । तस्मादण् यथा स्यात् । यथाप्राप्ताभ्यनुज्ञाने " अनुदात्तादेश्च० " (४।३।१४०) इत्यञ् मा भूदिति । अतश्च हलादित्वादप्राप्तिरित्युक्तम् ॥

---

१ A आगमिनः प्रजायन्ते. २ A om. न. ३ A ग्रहणेन यत्र नास्ति. ४ B. C P om. परिभाषया. ५ A om. कर्तव्यमिति. ६ A. om वृत्तिकृता.

इमनिजादीनां च चित्करणमस्या लिङ्गमुपपद्यते । अन्यथेमनिचो हलन्तत्वादेतदन्तस्य स्वराप्राप्तेश्चित्वमनर्थकं स्यात् । उदाहरणान्तरं चास्याः पौर्वार्द्धिकं दाक्षिणार्द्धिकमित्यत्र ठञि "ञ्नित्यादिर्नित्यम्" (६।१।१८७) इत्याद्युदात्तत्वं भवति । ठञत्र "दिक्पूर्वपदाट्ठञ्" (४।३।६) इत्यनेन । अस्यार्थः । दिक्पूर्वपदादर्द्धशब्दाट्ठञ् भवति चकाराद्यच्चेति । यद्येवं पूर्वपदग्रहणमिह न क्रियतां, दिशष्ठञित्येवं वक्तव्यम् । अयं चार्थः । दिश उत्तरस्मादर्द्धशब्दाट्ठञ् भवतीति । न । दिशष्ठञित्युच्यमाने दिशः स्वरूपग्रहणं स्यात् । पूर्वपदग्रहणे तु कृते दिगित्यर्थग्रहणम् । तर्हि पूर्वग्रहणमेव क्रियताम् । अत एवार्थग्रहणं भविष्यति । यथा "परावराधमोत्तमपूर्वाच्च" (४।३।५) इत्यत्र 'परावराधमोत्तमेभ्यः' इति कर्तव्ये पूर्वग्रहणं परार्ध्यमित्यत्र ठञो बाधनार्थमिति वृत्तावुक्तम् । नैतत् । पदग्रहणे सति पूर्वग्रहणादर्थग्रहणे व्यवस्थापिते बहुपूर्वार्धमिति बहुपूर्वादर्द्धशब्दादपि ठञ् स्यात् । अत्रापि दिक्पूर्वस्यार्द्धशब्दस्य विद्यमानत्वात् । न हि पूर्वग्रहणेनार्थग्रहणं बहुपूर्वादिभ्यः प्रत्ययस्य निराकरणं चोभयं शक्यते कर्त्तुम् । पदग्रहणे तु कृते पूर्वादिशब्देभ्य एव भवति । तत्रैव दिशः पूर्वपदस्य विद्यमानत्वात् । बहुपूर्वार्द्धशब्दात्तु न भवति । तस्यापूर्वपदत्वात् । तस्मात्पूर्वग्रहणं पदग्रहणं चोभयमपि कर्त्तव्यमिति । एवं च सति "दिक्पूर्वपदाट्ठञ्" (४।३।६) इत्यत्र यन्मैत्रेयेणोक्तम् 'यथा पूर्वसूत्रे पूर्वग्रहणस्य प्रयोजनं व्याख्यातं तथात्रासत्यपि पदग्रहणे पूर्वग्रहणादेव स्वरूपग्रहणं निरस्तम्' इति तन्न शोभनम् ॥ ५३ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ युष्मत्पादो नाम
चतुर्थाध्यायस्य तृतीयः पादः ॥

क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च ॥ ५४ ॥

तद्यथा । मृदु पठति । शोभनं पचति । ननु किमर्थं नपुंसकत्वं कर्मत्वं चोभयमाश्रीयते । न नपुंसकत्वमेवास्तु । तत एव मृदु पचतीत्यादि सिध्यति । सत्यम् । किं त्वसति कर्मत्वे मृद्वादीनां प्रथमान्तत्वात् "सपूर्वायाः प्रथमाया विभाषा" (८।१।२६) इत्यनेन ग्रामे मृदु ते पचतीत्यादौ विकल्पेन तेमयादिविधयः स्युः । द्वितीयान्तत्वे तु मृद्वादीनां तेमयादिविधयो नित्या भवन्ति । अथ किं न भवितव्यमेव ग्रामे मृदु ते पचति ग्रामे मृदु तव पचतीति रूपद्वयेन । भवितव्यमेवानन्वादेशे । 'सर्व एव वांनावादयोऽनन्वादेशे विभाषा वक्तव्याः' इति वचनात् । अन्वादेशे त्वयो ग्रामे मृदु ते पचतीत्येव नित्यं भवति । तद्यदि मृद्वादीनां प्रथमान्तत्वं स्यात् तदाऽन्वादेशेऽपि "सपूर्वायाः प्रथमाया विभाषा" (८।१।२६) इत्यनेन विकल्पः स्यात् । यथा अयो ग्रामे कम्बलस्ते स्वम् । अयो ग्रामे कम्बलस्तव स्वामीति । तस्मात् कर्मत्वं नपुंसकत्वं चोभयं कर्त्तव्यम् ॥

१ A हलन्तत्वादन्तस्य. २ A इत्यत्र. ३ A तदग्रहणे पूर्वयादिशः for तत्रैव दिशः. ४ A om. अर्धशब्दात्. ५ A स्वरूपग्रहणान्निरस्तम्. ६ B इति शोभनम्. ७ A तद्यथा मृदु पचति for मृदु पठति । शोभनं पचति.

अयं चार्थो न्यायसिद्ध इत्याहुः । तथाहि । मृदु पचतीत्यत्र पाकक्रियायाः प्रार्थनाध्यवसानादिक्रियया व्याप्तत्वात् कर्मत्वम् । तथाहि । कश्चित्फलमीप्सुः फलं पश्यति एतस्या एतत्फलमिति । दृष्ट्वा प्रार्थयते । ततस्तां कर्तुमध्यवस्यति । ' गम्यमाना च क्रिया कारकाणां निमित्तम् ' इति गम्यमानायाः प्रार्थनादिक्रियायाः पाकक्रिया कर्म भवति । अतस्तद्विशेषणं कर्मैव । क्रियायाश्चासत्वभूतत्वात्तद्विशेषणं सामान्येन लिङ्गेन नपुंसकेनैव निर्देष्टुं युज्यत इति । ननु क्रियानिमित्तस्य कर्मत्वमुक्तं निमित्तं च सिद्धस्वभावं क्रिया च साध्यस्वभावा तत्कथं कर्मत्वं स्यात् । तर्हि " तत्प्रत्यनुपूर्वमीपलोमकूलम् " (४।४।२८) इति क्रियाविशेषणकर्मद्वितीयान्ताट्ठग्विधानं ज्ञापयति । साध्यस्वभावापि क्रिया प्रार्थनाध्यवसानादिक्रियां प्रति साधनत्वेनाश्रीयते ॥ ५४ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ ठक्पादो नाम चतुर्थाध्यायस्य चतुर्थः पादः ॥

इति चतुर्थोऽध्यायः ॥ ४ ॥

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ ५५ ॥
व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ५६ ॥

ग्रहणवतेत्युच्चारणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते । तेन " नडादिभ्यः फक् " (४।१।९९) इति केवलादेव भवति नाडायन इति । न तदन्ताद सौत्रनाडिरिति । व्यपदेशिवद्भावश्च प्रातिपदिकेन न भवति । " क्रतूक्थादिसूत्रान्ताट्ठक् " (४।२।६०) इतीहैव भवति संग्रहसूत्रमधीते सांग्रहसूत्रिकः । व्यपदेशिवद्भावेन केवलान्न भवति । सूत्रमधीते सौत्र इति ॥

ज्ञापिते एते परिभाषे " येन विधिः०" (१।१।७२) इति सूत्रे भाष्यकृता " पूर्वादिनिः " (५।२।८६) इत्यस्यानन्तरं " सपूर्वाच्च " (५।२।८७) इत्यनेन । तदुक्तम् । किमर्थं सपूर्वादिनिर्विधीयते । पूर्वशब्देन प्रातिपदिके विशेषिते तदन्तविधिना सपूर्वादपि भविष्यति केवलाच्च व्यपदेशिद्भावेनेति नार्थोऽनेन । तद् कृतं ज्ञापनार्थम् । एतच्च ज्ञापयति । एते परिभाषे ग्रहणवतेत्यादिके स्त इति । अत एव प्रत्ययविधौ ज्ञापितत्वाद् ग्रहणवतेत्यादिपरिभाषाद्वयं प्रत्ययविधिविषयमाख्याय "गोस्त्रियोरुपसर्जनस्य" (१।२।४८) इत्यत्र तदन्तविधिना गोशब्दान्तग्रहणं व्याचक्षते । अन्ये च सामान्येन प्रत्ययविधौ चाप्रत्ययविधौ च परिभाषामाहुः । तथा च " शेषो घ्यसखि " (१।४।७) इति प्रतिषेधः केवल एव न तदन्ते अतिसखेरागच्छतीति । पुनश्चैतयोर्भाष्ये प्रत्याख्यान-

१ A अवाप्सुः for ईप्सुः. २ A अध्यवस्यमाना for गम्यमाना. ३ A क्रियाविशेषणं कर्म द्वितीयान्ताः ठग्विधानं. ४ After इहैव, A. ins. सूत्रे. ५ A om. ज्ञापनार्थम् । एतच्च

मुक्तम् । तदुक्तम् । आचार्यास्तावदसिद्धं विशेषणविशेष्यभावं प्रति यथेष्टत्वाद्विशेषणेन हि तदन्तविधिर्भवति न विशेष्येण । तत्र समासविधौ “द्वितीयाश्रित०” (२।१।२४) इत्यादौ यत् सुप्सुपेति (२।१।२,४) प्रकृतं न तच्छ्रितादिभिर्विशेष्यते; अपि तु तेनैव श्रितादयो विशेष्यन्ते श्रितादिभिः सुबन्तैरिति । तेन तदन्तविध्यभावान्न भवति कष्टं परमश्रित इत्यत्र समासः । प्रत्ययविधौ “ नडादिभ्यः फक् ” (४।१।९९) इत्यत्र यत्प्रातिपदिकादिति प्रकृतं तेनैव नडादयो विशेष्यन्ते नडादिभ्यः प्रातिपदिकेभ्य इति । तेनेह न भवति सूत्रनडस्यापत्यं सौत्रनाडिरिति । यत्र तु गृह्यमाणेन प्रकृतं विशेष्यते तत्र भवत्येव तदन्तविधिः । यथोपपदं प्रकृतं भयग्रहणेनाढ्यादिभिश्च विशेष्यते । अतस्तदन्तविधिनाऽभयंकरोऽनाढ्यंभविष्णुरिति । स्वग्रहणानुवृत्त्या व्यपदेशिवद्भावाच्च केवलेऽपि भवति भयंकर इत्याढ्यंकरण इति च । “ क्रतूक्थादिसूत्रान्ताट्ठक् ” (४।२।६०) इत्यत्र तदन्तविधिनैव तदन्तत्वे लब्धेऽन्तग्रहणं केवलान्मा भूदित्येवमर्थम् । अन्यथा स्वामित्यस्यानुवृत्त्या केवलादपि स्यात् । अत एव व्यपदेशिवद्भावो न प्रवर्तते । किं त्वेवं गोकुलमित्यत्र स्वंग्रहणानुवृत्त्या व्यपदेशिवद्भावाद्गोपसर्जनह्रस्वत्वं प्राप्नोति । तत्र तदन्तग्रहणसामर्थ्याद्व्यपदेशिवद्भावो न भवतीति न्यासवृत्तिकृता “गोस्त्रियोरुपसर्जनस्य” (१।२।४८) इत्यत्र समाहितम् । स्वग्रहणानुवृत्तिश्च न सर्वेषां मता ॥ ५६ ॥

समासप्रत्ययविधौ तदन्तप्रतिषेध उगिद्वर्णग्रहणवर्जम् ॥ ५७ ॥

तेन श्रितादीनां सुबन्तविशेषणत्वेऽपि तदन्तविधेरभावात्कष्टं परमश्रित इत्यत्र समासो न भवति । तथा प्रत्ययविधौ सौत्रनाडिरित्यत्र फञ्न भवति ॥

उगिद्वर्णग्रहणवर्जमिति वचनात्तदन्तविधिनाऽतिभवतीति दाक्षिरिति भवति । अन्यथा विष्णुवाचिनोऽशब्दात्स्यात् । “ येनविधि-” (१।१।७२) सूत्रे वार्त्तिकमिदं परिभाषारूपेण कैश्चित्पठ्यते । सिद्धं तु विशेषणविशेष्यभावयोर्यथेष्टत्वात् ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ धान्यपादो
नाम पञ्चमाध्यायस्य द्वितीयः पादः ॥

स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि ॥ ५८ ॥

तेन कुटीर इत्यत्र लिङ्गातिक्रमः । अप्कल्पमित्यत्र च लिङ्गवचनयोरुभयोरपि । पचतोरूपं पचन्तिरूपमित्यत्र वचनातिक्र :। अपिशब्दान्नाप्यतिवर्तन्ते कुत्सितोऽश्वोऽश्वक इति॥

ज्ञापकं चात्र “ णचः स्त्रियाम ” (५।४।१४) इत्यत्र स्त्रियामिति वचनम् । लिङ्गानतिक्रमे हि स्त्रियामिति न कर्त्तव्यम् । “ कर्मव्यतिहारे णच् स्त्रियाम् ” (३।३।४३) इति णचः स्त्रियामेव विधानात् स्त्रियामञपि सिद्ध इति ॥ एतस्या उदाहरणान्तरम् ।

१ A तदन्तभावात् for तदन्तविध्यभावात्. २ B C तदन्तविधिनिषेधः. ३ A तदन्तविधिना अत इञिति दाक्षिरिति भवति. ४ A B पचतिरूपम्.

द्विपदिका द्विशतिकेति पुंस्त्वनपुंसकत्वयोरतिक्रमः । अत्र हि द्वौ द्वौ पादौ ददाति द्वे द्वे शते ददातीति " पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च " (५।४।१) इति वुन्प्रत्ययोऽन्त्याकारलोपश्च । अत्र चोदयन्ति । ननु किमर्थमनेन वुन्विधीयते कन्नेव विधीयताम् । तेनापि हि[1] द्विशतिकेति सिध्यति । एवं च " स्थूलादिभ्यः प्रकारे कन् " (५।४।३) इति कन्ग्रहणं कर्त्तव्यं न भवति । एतदेव ह्यनुवर्त्तिष्यते । उच्यते । यदि कन् विधीयेतान्त्यलोपे कृते द्विशतिकेति न स्यात् । तथा कनि भसंज्ञाऽभावाद् द्विपदिकेति भसंज्ञानिबन्धनः " पादः पत् " (६।४।१३०) इति पद्भावो न स्यात् । अथास्तु पद्भावस्तथापि द्विपदिकेति न स्यात् । पद्भावस्य हलन्तत्वाद् द्विपत्केति स्यात् ॥

एवं च यत्तत्र रक्षितेनोक्तम्—'कन्विधानेऽपि सिध्यति द्विशतिकेति । "स्थूलादिभ्यः प्रकारे कन् " (५।४।३) इत्येतत्कर्त्तव्यं न भवति । द्विपदिकेति[2] तु भसंज्ञानिमित्तपदादेशाभावाद् रूपं च न सिध्यति ' इति तदयुक्तम् । कन्प्रत्ययेऽन्त्यलोपे च कृते द्विशतिकेत्येतदपि न सिध्यति । तत्कथमुच्यते कन्विधानेऽपि सिध्यति द्विशतिकेति । अथ लोपग्रहणमपि न कर्त्तव्यं तर्हि भसंज्ञानिमित्तपदादेशाभावाद् रूपं च न सिध्यतीति यदुक्तं तदसङ्गतं स्यात् । तथाहि । यथा भसंज्ञा नास्ति तथा दकारान्तः पाच्छब्दोऽपि नास्ति कथं वा तद्रूपं च न सिध्यतीत्युच्यते । यावताऽन्त्यलोपे कृते पदादेशे चाभ्युपगते सत्यन्त्यो योऽकारस्तस्येत्त्वे सति द्विपदिकेति[3] सिध्यत्येव । किं चोत्तरफक्किकायां लोपग्रहणं प्रत्याख्यातव्यमेव । अधुना तत्प्रत्याख्यानमयुक्तम् । उच्यते । रूपं च न सिध्यतीति यदुक्तं तदुभयत्र वेदितव्यम् । ततोऽयमर्थः । द्विशतिकेति न सिध्यति द्विपदिकेति च न सिध्यति । अन्ये त्वाहुरिह दुरवगमो मैत्रेयाभिप्रायः । न केवलमिहैवापि त्वन्यत्रापि । तथाहि विभक्तिपादे " अधुना " (५।३।१७) इत्यत्र सूत्रे रक्षितेनोक्तम् । यद्ययमधुना प्रत्ययः स्यात्तदा पूर्वसूत्र एवाधुनाप्रत्ययं विदध्यात् । नाश्भावनिपातनार्थमिदं वक्तव्यम् । " इदम इश् " (५।३।३) इतीशादेशे कृते यस्येति–(६।४।१४८) लोपे सत्यधुनेत्यस्य सिद्धत्वात् । तस्मादश्भावनिपातनार्थं[4] यत्पृथग्योगं करोति ततोऽनुमीयते नायमधुनाप्रत्ययः, किं तर्ह्यधुनैव । स्वरे च विशेषो वृत्तिकृतोऽभिप्रेतः । भाष्ये पुनरधुनाप्रत्यय एवायं यस्मादादित्सूत्रे (१।४।१३) कथितः स्त्री अधुनेति प्रत्युदाहरणेन तथा तु योगविभागोऽनर्थकः । अस्मिन्काले वस्तुनीति विवक्षायाम् "इकोचि०" (७।१।७३) इति नुम् मा भूदिति ॥ ५८ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ शतपादो नाम पञ्चमाध्यायस्य चतुर्थः पादः ॥

इति पञ्चमोध्यायः ॥ ५ ॥

१ A om. हि. २ A द्विपदिकेति. ३ A द्विपदिकेति वचनासिध्यत्येव. ४ P तस्मादशाबनिपातनार्थं.

संप्रसारणं संप्रसारणाश्रयं च कार्यं बलीयो भवति ॥ ५९ ॥

तेन जुहावयिषतीत्यत्र " ह्वः संप्रसारणम् " (६।१।३२) " इति शाच्छासाह्वाव्यावेपां युक्" (७।३।३७) इति युकं बाधित्वा संप्रसारणम्। जुहूषतीत्यत्र " अभ्यस्तस्य च " (६।१।३३) इति द्विर्वचनात्प्राक् संप्रसारणम् । जुहुवतुरित्यत्राकारलोपं बाधित्वा संप्रसारणपूर्वरूपत्वे एव भवतः । तेन " अचि श्नुधातु० " (६।४।७७) इत्यादिनोवङ् सिध्यति । अन्यथा " आतो लोप इटि च " (६।४।६४) इत्याकारलोपे सति तस्य[1] " असिद्धवदत्राभात् " (६।४।२२) इत्यसिद्धत्वादुवङ् न स्यात । कथं तर्हि ब्रह्मशब्द उपपदे जिनातेर्धातोः " आतोऽनुपसर्गे कः " (३।२।३) इति के कृते ब्रह्मज्य इति स्यात। यावताऽत्रापि जुहुवतुर्जुहुवुरित्युवङादेशवदियङा भवितव्यम्। न चात्र " एरनेकाचोऽसंयोगपूर्वस्य " (६।४।८२) इति यणादेशो वाच्यः । अङ्गस्यैकाच्त्वात् । तथा च ब्रह्माजिय इत्यनिष्टं रूपं स्यात् । उच्यते । " सर्वत्र[2] संप्रसारणिभ्यो डो वक्तव्यः " इति डप्रत्ययेन भावितव्यामिति । यथाहुः प्रह्व इत्यत्रोक्तम् । अथ वा क्वचिदेषा न सर्वत्रेति । अत एव "साढ्यवहोरोदवर्णस्य" (६।३।११२) इत्यत्र न्यासकृतोक्तम् । क्वचिदेषा न सर्वत्रेति । तेन ब्रह्मज्यः आह्वः प्रह्वः इति कप्रत्यये संप्रसारणपूर्वरूपं बाधित्वा इकारलोपस्तस्यासिद्धत्वादियङुवङौ न[3] भवतः । तथा च "इको यणचि" (६।१।७७) इति कृते सिद्धं ब्रह्मज्य इत्यादि ॥

ज्ञापकं चास्या भाष्ये " लिट्यभ्यासस्योभयेषाम् " (६।१।१७) इत्यत्रोभयेषांवचनमुक्तम् । तद्धि वव्रश्चेत्यादौ हलादिशेषं बाधित्वा संप्रसारणं यथा स्यादित्येवमर्थं कृतम् । तेन कार्यान्तरं बाधित्वा संप्रसारणस्य प्रवर्त्तनादस्या अस्तित्वं गमयति । पुनश्चास्या भाष्ये प्रत्याख्यानमुक्तम् । जुहुवतुरित्यादौ पूर्वविप्रतिषेधेन संप्रसारणस्य संप्रसारणाश्रयस्य च सिद्धिः । किं तु व्याख्यानात् परिभाषाश्रयणमेव लघ्विति । न्यासकारेण पुनरियं " साढ्यवहोरोदवर्णस्य " (६।३।११२) इत्यत्रावर्णग्रहणेन ज्ञापिता । तस्यैतत प्रयोजनमूढः ऊढवानित्यत्र संप्रसारणे पूर्वरूपत्वे चोकारस्यौत्वं मा भूदिति । एतच्चाप्रयोजनम् । धत्वढत्वढलोपेषु संप्रसारणपूर्वरूपत्वाभ्यां परत्वादकारस्यौत्वे कृते संप्रसारणपूर्वरूपत्वं च करिष्यामः इति न किंचिदनिष्टमापद्यते । तदेवमवर्णग्रहणमस्या ज्ञापकमिति ॥

अथ जुहूषतीत्यत्र " आदेशप्रत्यययोः " (८।३।५९) इति कथं मूर्धन्यः । यावता स्थानेद्विर्वचनपक्षे ह्वसो द्विर्वचने कृते जुहूसादेशस्य शब्दान्तरत्वात् प्रकृतिप्रत्ययविभागो नास्ति । न च मूर्धन्यस्यैव द्विर्वचनम् । " पूर्वत्रासिद्धम् " (८।२।१) इत्यसिद्धत्वात् । पूर्वत्रासिद्धीयमद्विर्वचन इति तु प्रायिकम् । " उभौ साभ्यासस्य "

---

१ A om. तस्य. २ सर्वत्र प्रसारणिभ्यो डः (Mahābhāṣya). ३ A om. न.

(८।४।२१) इति वचनात् । उच्यते । तत्वाध्यवसायेन कार्यकारणात् प्रत्ययाश्रयं षत्वं भवति । तथैकाच्–(८।३।३७) सूत्रे रक्षितः । तत्रायं साधारणश्च परिहारः । सिच्‌प्रभृतीनां षोपदेशस्य सामर्थ्यात् " स्तौतिण्योरेव०" (८।३।६१) इति स्तौतिग्रहणाद् " सिचो यङि " (८।३।११२) इति प्रतिषेधाच्चैवं ज्ञाप्यते श्रुत्यभेदात्तत्त्वाध्यवसायेन स्थानेद्विर्वचनेऽपि कार्याणि क्रियन्ते । अन्यथा कः प्रसङ्गः षत्वस्य स्यादिति । अत्रोच्यते । ननु कथं " सिचो यङि " (८।३।११२) इत्यस्य ज्ञापकत्वमुक्तम् । यावता " उपसर्गात् सुनोति० " (८।३।६५) इत्यादिना षत्वे प्राप्ते तन्निषेधार्थं तत् स्यात् । परिसेसिच्यत इति । एतच्च " सिचो यङि " (८।३।११२) इत्यत्र वृत्तावुक्तम् । " उपसर्गात् सुनोति ० " (८।३।६५) इति या प्राप्तिः सा पदादिलक्षणमेव षत्वप्रतिषेधमनन्तरत्वाद् बाधते न " सिचो यङि " (८।३।११२) इति । तस्मादयं प्रतिषेधः सर्वत्रेति । उच्यते । " सात्पदाद्योः " (८।३।१११) इति प्रतिषेधे प्राप्ते "उपसर्गात्०" (८।३।११२)इति सूत्रेण षत्वं विधीयते । "सात्पदाद्योः" (८।३।१११) इत्यनेन च " आदेशप्रत्यययोः " (८।३।१११) इत्यस्यैव प्रतिषेधः । " आदेशप्रत्यययोः" (८।३।५९) इत्यनेन च षत्वस्याप्राप्तिः । सकारस्यानादेशत्वात् । नैतत् । स्थिते तथाविधोऽस्यार्थः । इदानीं पुनरप्राप्तमेव "उपसर्गात्०" (८।३।६५) इति सूत्रेण षत्वं विधास्यते । अतस्तत्प्रतिषेधार्थमेव " सिचो यङि " (८।३।११२) इति स्यात् । न च वाच्यं " सात्पदाद्योः " (८।३।१११) इति " आदेशप्रत्यययोः " (८।३।५९) इत्यस्यापवादः । तत्साहचर्यात् " सिचो यङि " (८।३।११२) इत्यप्यादेशलक्षणषत्वापवादः । यत उभयसंभवे साहचर्यमुच्यते । अयं चादेशलक्षणषत्वापवादो न संभवतीत्यनुपपन्नं साहचर्यम् । उच्यते । स्थानेद्विर्वचनपक्षे परिसेसिच्यते इत्यत्रापि यकारवतः सिच्यभागस्य द्विर्वचने सेसिच्यादेशस्य सिजूव्यपदेशाभावात्कथमुपसर्गादि- (८।३।६५) सूत्रेण सिजूद्वारिका मूर्द्धन्यस्य प्राप्तिर्यन्निषेधार्थं " सिचोऽयङि " (८।३।११२) इति स्यात् । अथ वा यद्यत्र " सिचोऽयङि " (८।३।११२) इति क्रियताम् अयं चार्थः यङ्प्रत्ययं वर्जयित्वोपसर्गात् सिचः षत्वमिति ततः परिसेसिच्यत इति सिद्धे यत् " सिचो यङि " (८।३।११२) इति कृतं तत् " आदेशप्रत्यययोः " (८।३।६५) इत्यस्यापि प्रतिषेधार्थमिति । एतस्मिन्वादे " ओमाङोश्च " (८।१।९५) इत्यत्र रक्षिते पूर्वपक्षो बहुल्पादे पुरस्तादपवादपरिभाषायामुक्तः ॥ ५९ ॥

उभयत आश्रये नान्तादिवत् ॥ ६० ॥

" एकः पूर्वपरयोः " (६।१।८४) इत्यतः पूर्वग्रहणानुवृत्त्या " अन्तादिवच्च " (६।१।८५) इत्यनेनैकादेशः पूर्वस्य कार्यं प्रत्यन्तवत् परस्य कार्यं प्रत्यादिवत्क्रियते तत्र

१ A om. षत्वं. २ A षोपदेशसामर्थ्यात्. ३ A om. षत्वं. ४ A रक्षिते तत्पूर्वपक्षो.

यथा शक्येत विधिः कर्त्तुमिति पूर्वस्यान्तवत्त्वेनाम् इत्यत्र "अदसोऽसेर्दादु दो मः" (८।२।८०) इति भवति। तथा परस्यादिवत्त्वेनाम्नी वृक्षावित्यत्र प्रगृह्यत्वे भवतः। यत्र त्वेकादेश उभयमाश्रयति पूर्वं परं च तत्रोभयत आश्रये नान्तवत्त्वं नाप्यादिवत्त्वमिति वाक्यार्थः। तेन वृक्षमित्यत्रैकादेशस्य पूर्वग्रहणेनाग्रहणान्नाङ्गस्याकारान्तत्वं परग्रहणेनाग्रहणान्मकारस्य न सुप्त्वमिति दीर्घत्वाभावः। तथा प्रोढत इत्यत्र "उपसर्गाद् ह्रस्व ऊहतेः" (७।४।२३) इति न भवति। अत्रेदं वक्तव्यम्। एकादेशस्य पूर्वग्रहणेन ग्रहणे कृते एकदेशविकृतद्वारेण मकारमात्रस्य सुप्त्वमाश्रित्य दीर्घत्वेन भवितव्यमिति। यत्रैकदेशपरिभाषा स्यादुभयताश्रयपरिभाषा निर्विषया स्यात्। इयं च परिभाषा "अन्तादिवच्च" (६।१।८५) इत्यत्र भाष्यकारेण पठिता। तत्रोक्तो लौकिको न्यायः। यथोभयोस्तुल्यबलयोरेकः प्रेष्यो भवति अविरोधार्थी उभयोरपि कार्ये न प्रवर्त्तते इति ॥ ६० ॥

वर्णाश्रये विधौ नान्तादिवत्त्वम् ॥ ६१ ॥

तेन खट्वाभिर्मालाभिरित्यत्र पूर्वं प्रत्यन्तवत्त्वाभावात् "अतो भिस ऐस्" (७।१।१०९) इत्यैस् न भवति। तपरकरणं तु सोमपाभिरित्यत्र कृतार्थम्। तथा ह्वयतेर्जुहावेत्यत्र संप्रसारणपूर्वरूपस्यानादिवत्त्वात् "आत औ णलः" (७।१।३४) इति न भवति। तथा अस्यै अश्वः अस्या अश्व इति "आटश्च" (७।३।९०) इति न वृद्धिः ॥

इयं च परिभाषा "अन्तादिवच्च" (६।१।८५) इत्यत्र भाष्ये पठिता। ज्ञापकं चास्याः "षत्वतुकोरसिद्धः" (६।१।८६) इति तुग्विधावसिद्धवचनं कैयटेनोक्तम्। तथाहि। यद्येषा न स्यात्तदा अधीत्येत्यत्र सवर्णदीर्घस्य परग्रहणेन ग्रहणे कृते ह्रस्वाश्रयस्तुक् सिद्धस्तुक्यसिद्धवचनमनर्थकं स्यात्। नन्वस्यां सत्यां क्षीरपेणेत्यत्र पूर्वं प्रत्यनन्तवत्त्वेन "एकाजुत्तरपदे णः" (८।४।१२) इति णत्वं नित्यं न प्राप्नोत्येकाजाश्रयेण वर्णाश्रयत्वात्तत्र प्रतिषेध एव युक्तः। श्रियामित्यत्र परं प्रत्यादिवत्त्वाभावादियङ् न स्यात् ॥ यत्रैव पूर्वपरौ वर्णावाश्रित्यैकादेशः प्रवर्त्तते तद्वर्णाश्रयेऽन्तादिवद्भावो नेष्यते। अतिदेशस्य तत्रैव व्यापारात्तत्रैव प्रतिषेधो युक्तः। इह त्वेकादेश एव कृते यो वर्ण एकाजुत्तर आकारश्च तदाश्रयौ णत्वेयङ्विधी न तौ निवर्त्येते। तथा चाहुः। इहाद्यन्तशब्दयोरवयववचनत्वात्तदवयवकरणेऽस्यातिदेशस्य व्यापारो न तु तत्करण इति। तदेवं खट्वाभिरित्यादौ पूर्वं प्रत्यन्तवत्त्वेऽपि तदेकदेशता लभ्यते न तु तद्रूपतेति तत्कृत ऐस्प्रसङ्ग इति। एतदेव न्यासकृतोक्तमताद्रूप्योऽयमतिदेश इति ॥ ६१ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ एकाच्पादो नाम षष्ठाध्यायस्य प्रथमः पादः ॥

---

१ A अयं for यथा. २ A आदिवत्त्वेन चाम्नी. ३ P ins. न after अत्रेदं. ४ A न्यायः for न्यायः. ५ A एकाश्रयेण. ६ A आदेशस्य for अतिदेशस्य.

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ ६२ ॥

इयं च परिभाषा प्रत्ययग्रहणपरिभाषाया अपवादः। यत्र संज्ञया स्वरूपेण वा कृतो ग्रहणं भवति तत्र गतिकारकपूर्वमपि गृह्यते न तु यतः प्रत्ययस्तदाद्येव। तद्यथा "क्षेपे" (२।१।४६) इति क्तान्तेन समासः सगतिना सकारकेण च भवति। उदकेविशीर्णम् अवतप्तेनकुलस्थितमिति। "अणिनुणः" (५।४।१५) इतीनुणन्तात्सगतेरण् भवति सांराविण इति[1] ॥

ज्ञापकं चास्या गतिरनन्तर इत्यनन्तरग्रहणम्। तेन क्तान्त उत्तरपदे पूर्वस्यानन्तरस्य गतिस्वरो विधीयते। उद्[2]भूतमवधूतमिति। न हि व्यवहितस्याभ्युद्भूतमिति[3]। तत्र यदीयं परिभाषा न भवेत् तदा प्रत्ययग्रहणपरिभाषयैवोद्भूतशब्दे संघाते सक्तान्ते प्राप्तिरेव नास्तीति किमेतन्निवृत्त्यर्थेनानन्तरग्रहणेन[4]। तत्कृतं ज्ञापयत्यस्तीयं परिभाषेति। लिङ्गमात्रं चेदम्। कात्यायनभाष्यकाराभ्युपगमादेव सिद्धेयम्। अन्यथा कारकपूर्वग्रहणस्य ग्रहणे किं ज्ञापकं स्यात्। अनया परिभाषया "कृत्तद्धितसमासाश्च" (१।२।४६) इत्यत्रापि 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' (परि. ६२) प्राप्नोति। तत्र यत् समाधानं च तद्गतिकारकोपपदानां कृद्भिः समासवचनमित्यस्यां परिभाषायामुक्तम्। लक्ष्यवशादियं न प्रवर्तत इत्यपीति। तेन प्रज्ञासुकरः कटैः[5] इत्यत्र "खित्यनव्ययस्य" (६।३।६६) इति ह्रस्वः "अरुर्द्विषदजन्तस्य०" (६।३।६७) इति च मुम्न भवति कूलमुद्रुज इतिवत् ॥ ६२ ॥

समासान्तो विधिरनित्यः ॥ ६३ ॥

तेन 'मुर्वारण्याशंसा[6] धृतधनुषयाहूय तृणवत्' इत्यत्र "धनुषश्च" (५।४।१३२) इत्यनङ् भवति। तथा बह्वाम्पि तडागानीत्यत्र "ऋक्पूरब्धूः०" (५।४। इत्यकारो न[7] भवति ॥ ज्ञापकं चास्याः "स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च" (६।२।१८७) इत्यत्रोऽध्वग्रहणम्। तद्धि "अगाच्च" (३।२।१८६) इत्यतोऽपादित्यनुवृत्तावपादुत्तरस्याध्वनोऽन्तोदात्तत्वं यथा स्यादिति क्रियते। यदि च नित्यः समासान्तः स्यात्तदा "उपसर्गादध्वनः" (५।४।८५) इति समासान्तेऽचि कृते चित्त्वादेवान्तोदात्तत्वं सिद्धमिति तत्राध्वग्रहणं न कुर्यात्। कृतं चातो ज्ञापयत्यस्तीयं परिभाषेति। तथा भाष्ये "द्वित्रिभ्यां पाद्न्मूर्धसु बहुव्रीहौ" (६।२।१९७) इत्यत्र सूत्रेऽकृतसमासान्तस्य मूर्धशब्दस्योपादानं लिङ्गम्। नित्ये[8] हि समासान्ते यथा पादिति ददिति च "पादस्य लोपोऽहस्त्यादिभ्यः" (५।४।१३९) इति "वयसि दन्तस्य दतृ" (५।४।१४१)

---

१ A om. सांराविण इति. २ A तद्भूतं. ३ A व्यवहितस्याप्युद्भूतमिति. ४ A निरर्थकेन for निवृत्त्यर्थेन. ५ A कटक इत्यत्र खालि खित्यनव्ययस्य. ६ स्वलावण्याशंसा धृतधनुषमहाय तृणवत् इति सांप्रतं मुद्रितेषु महिम्नस्तोत्रपुस्तकेषु पाठो दृश्यते. ७ A om. न. ८ A अनित्ये for नित्ये.

इति कृतसमासान्तौ निर्दिष्टौ तथा मूर्द्धशब्दोऽपि " द्वित्रिभ्यां ष मूर्ध्नः" (५।४।११५) इति कृतसमासान्तो निर्दिष्टः स्यात् । ततश्च मूर्धेष्विति निर्देशः स्यात्तस्मात्तथा चाकृतसमासान्तनिर्देशः समान्तविधेरनित्यत्वं ज्ञापयति । तेन द्विमूर्धा त्रिमूर्धेत्यत्राप्युदात्तत्वं भवति । यतश्च ज्ञापितेयं परिभाषा भाष्ये ततो यदुक्तम् यस्मात्प्रत्ययविधि- (१।४।१३) सूत्रे भागवृत्तिकृता 'समासान्तो विधिरनित्यः' इति नैषा परिभाषा भाष्ये ज्ञापकाभावादिति तदयुक्तम्। ननु लाघवार्थं समासान्तनिर्देशो न कृतोऽन्यथा मूर्धेष्विति गौरवं स्यात्। यद्येवं मूर्धपादास्विति कुर्यात् । एवं च समासान्तक्रमो न लङ्घितो भवतीति ज्ञापितम् ॥ ६३ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ बहुव्रीहिपादो नाम षष्ठाध्यायस्य तृतीयः पादः ॥

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ६४ ॥

आनन्तर्यलक्षणो विधिस्तद्विघातस्य निमित्तं न भवति । यस्यानन्तर्येण यो विहितस्तदानन्तर्यमसौ न विरुणद्धीत्यर्थः ॥ तद्यथा ग्रामाणि ब्राह्मणकुलानीत्यत्र ह्रस्वत्वे कृते नुम्[1] भवति । नैतत्प्रयोजनम् । " असिद्धं बहिरङ्गमन्तरङ्गे " (परि. ६९) इत्यनेनैव सिद्धत्वात्। वृत्तौ पद्धतावित्यत्र तर्हि " अच्च घेः " (१।३।११६) इत्यदादेशे कृते टाब् मा भूदिति प्रयोजनम् । एतदपि[2] न । अदादेशस्य तपरत्वात् । तस्यैतत्प्रयोजनं यदनेनोक्तं टाब् मा भूदिति । इदं तर्हि प्रयोजनम् । शतानि सहस्राणीति विभक्तिसंनिपातेन नुमि कृते तस्य विभक्तिलुकं प्रत्यनिमित्वात् " ष्णान्ता षट् " (१।१।२४) इति षट्संज्ञा न भवति । यदि स्यात् " षड्भ्यो लुक् " (७।१।२२) इति लुक् स्यात् । तथा कुम्भकारेभ्य इत्यत्रैत्वे कृते "कृन्मेजन्तः" (१।१।३९) इति न भवति ॥

इयं च परिभाषा "कृन्मेजन्तः" इत्यत्र भाष्यकारेण पठिता । ज्ञापकमस्याः[3] " न तिसृचतसृ " (६।४।४) इति दीर्घप्रतिषेधवचनम् । तद्धि सत्यामस्यां विभक्तिनिमित्तयोः " त्रिचतुरोः स्त्रियां तिसृचतसृ " (७।२।९८) इति ऋकारान्तयोर्न्यविधानकारिणं ङीपं प्रत्यनिमित्तत्वाद्दीर्घप्राप्तौ[4] प्रतिषेधवचनमुपपद्यते । अन्यथा तु ङीपा व्यवहितत्वात् " नामि " (६।४।३) दीर्घत्वाप्राप्तेः प्रतिषेधवचनमनर्थकं स्यात् । ङीपश्च दीर्घादीर्घाभ्यामविशेषात् ॥

अनित्या चेयं " कष्टाय क्रमणे " (३।१।१४) इति निर्देशेऽकारान्तनिमित्ते " ङेर्यः " (७।१।१३) इति ये कृते यञादौ[5] " सुपि च " (७।३।१०१) इति दीर्घकरणादाहुः । तेन दाक्षिरित्यत्र " यस्येति च " (६।४।१४८) इति लोपः सिध्यति । तथा या सा इत्यत्र टाप् प्रत्ययः । ननु कथं " कष्टाय० " (३।१।१४) इति ज्ञापकं यावता " अतो दीर्घो यञि " (७।३।१०१) इति यकारेण प्रत्याहारसामर्थ्यात् " कष्टाय० " (३।१।१४) इत्यत्र सुपि च इति दीर्घत्वं सिध्यति ।

---

१ A नुम भवति. २ A तदपि न. ३ A ज्ञापकं चास्याः. ४ A दीर्घप्राप्तेः ५ A यञादौ.

उच्यते । " ष्वादीनां ह्रस्वः " (७।३।८०) इत्यत्रागणान्ताः ष्वादय इति दर्शने जानातीत्यत्र " ज्ञाजनोर्जा " (७।३।७९) इति जादेशे कृते ह्रस्वत्वं प्राप्नोति । तन्मा भूदित्येवमर्थं दीर्घान्तादेशविधानमुक्तम् । अन्यथा यदि जानातीत्यत्र " ष्वादीनां ह्रस्वः " इति (७।३।८०) ह्रस्वत्वेन भवितव्यं तदा ह्रस्वमेव क्रियात् ' ज्ञाजनोर्जः ' इति। ननु जायत इत्यत्र दीर्घश्रुत्यर्थं दीर्घान्तजादेशविधानं स्यात् । नैतत् । जम ऽपि कृते " अतो दीर्घो यञि " (७।३।१०१) इति दीर्घत्वमिति नं शक्यते व म । यदि पुनरागणान्ताः ष्वादयो न भवन्तीति दर्शनं तदा जानातीत्यत्र " ष्वादीनाम्० " (७।४।८०) इति नास्ति । अङ्गवृत्तपरिभाषया वा ह्रस्वाभावोऽभिधीयते । कृते वा ह्रस्वत्वे तु पुनः " अतो दीर्घो यञि " (७।३।१०१) इति दीर्घत्वम् । तदा यकारेण प्रत्याहारग्रहणसामर्थ्याद् दीर्घत्वं शक्यत एव वक्तुमिति नानित्यत्वे ज्ञापकम् । अनित्यत्वे त्वेतदेव ज्ञापकम् " नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति " (८।२।२) इति तुग्ग्रहणम् । यदीयं नित्या स्यात् तदा वृत्रहभ्यामित्यत्रानयैव तुग् न भविष्यतीति तुग्ग्रहणमनर्थकम् ॥ ६४ ॥

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ ६५ ॥

तेन " अल्लोपोऽनः " (६।४।१२) इति यथा सार्थकस्य भवति राज्ञो राज्ञेति तथा निरर्थकस्य दध्नो दध्नेति । तथा " इन्हन्पूषार्यम्णां शौ " (६।४।१२) इति यथा बहुदण्डीनि ब्राह्मणकुलानीत्यत्र भवति तथा बहुवाग्मीनीत्यत्रापि स्यात् । तथा " अत्वसन्तस्य चाधातोः " (६।४।१४) इति यथा सुपया इति तथा निर्गतस्ततो निस्तता इत्यत्रापि भवति । " मनः " (४।१।११) इति ङीप्प्रतिषेधो यथा सुदामेत्यत्र भवति तथा सुप्रथिमेत्यत्रापि । इदं च कात्यायनवचनं परिभाषारूपेण पठ्यते । अर्थवत्परिभाषायाश्चानित्यत्वमस्या मूलम् । तच्चानित्यत्वमप्त्रादि-(६।४।११) सूत्रे तृन्तृचोर्भेदेनोपादानादाहुः । तृन्तृचोर्भेदेनोपादानं " अर्वणस्त्रसावनञः " (६।४।१२७) इत्यर्वादेशतृशब्दपरिहारार्थम् । यदि त्वर्थवत्परिभाषा नित्या स्यात्तदार्थवत्परिभाषयैवार्वादेशस्य तृशब्दस्य निरासे सिद्धे तृन्तृचोर्भेदेनोपादानमनर्थकम् । कृतं च तदनित्यत्वे ज्ञापकम् । ननु किमर्थमर्वादेशतृशब्दग्रहणनिरासार्थं तृन्तृचोर्भेदेनोपादानम् । यावतास्तु तस्यापि ग्रहणम् । न चैवमर्वन्तावर्वन्त इत्यत्र दीर्घत्वं स्यात् । यतो नित्यत्वान्नुमि कृते उपधाया विहितत्वाद्दीर्घत्वं न भविष्यति । उच्यते । " वा षपूर्वस्य निगमे " (६।४।९) इत्यतः पूर्वग्रहणानुवृत्तेर्नुमः प्राग् दीर्घत्वमेव भविष्यतीति मन्यते । एतच्चावश्यं वक्तव्यम् । अन्यथा बह्वाम्भि तडागानीत्यत्रापि नुमि कृते दीर्घत्वं न स्यात् ॥

अन्यस्त्वाह । तृन्तृचोर्भेदेनोपादानं सामान्येऽपि निर्देशे कश्चिद्विशेषो गृह्यत इति ज्ञापनार्थम् । तेन " न कोपधायाः " (६।३।३७) इत्यत्र सामान्योक्तावपि तद्धितबु-

---

१ A ह्रस्व एव क्रियताम्. २ A om. न. ३ A om. राज्ञः. ४ A om. दध्नः.

संबन्धेव ककारो गृह्यते न ककारमात्रम्। तेन कोपधप्रतिषेधे तद्धितवुग्रहणं कर्त्तव्यमित्येतद्वक्तव्यं न भवति। एतन्मते परिभाषाया अनित्यत्वे "आनि लोट्" (८।४।१६) इत्यत्र लोड्ग्रहणं ज्ञापकम्। तथाहि। प्रवपानि मांसानीत्यत्रानर्थकत्वादेव णत्वाभावः सिद्ध इति ॥ ६५ ॥

वार्णादाङ्गं बलीयः ॥ ६६ ॥

वर्णकार्यादङ्गकार्यं बलीयस्त्वाद् भवति। तेन भवतीत्यत्र यणादेशं बाधित्वा गुण एव भवति॥ परिभाषा चेयं सशेषा समानाश्रये[1] इति। तेन व्याश्रये न प्रवर्त्तते। तेन सिवेरौणादिके नप्रत्यये स्योन इत्यत्र सिउन इति स्थितेऽन्तरङ्गत्वाल्लघूपधगुणं बाधित्वा यणेव भवति। अत्र चार्थे "च्छ्वोः शूडनुनासिके च" (६।४।१९) इत्यत्र सतुक्कस्य छकारस्योपादानं लिङ्गम्। यदि व्याश्रयेऽपि प्रवर्त्तेत तदा छकारनिमित्तं वर्णतुकं बाधित्वा विश्नः इत्यादावनुनासिकनिमित्त आङ्गश्छकारस्य[2] शकारः स्यात्। तत्र कृते निमित्ताभावान्नास्ति तुगिति किं सतुक्कछकारोपादानेनेति। न चासिद्धपरिभाषया तुगाशङ्कनीयः। तुकः पूर्वमेव बाधितत्वात्। न्यासकारेण तु "सार्वधातुकमपित्" (१।२।४) इत्यत्र व्याश्रयेऽपीयमुक्ता। यदाह। च्यवन्ते प्लवन्ते इत्यत्र वार्णादाङ्गं बलीय इत्येकादेशात् प्राग्गुण इति। तत्रास्याः कचिद्व्याश्रयेऽपि प्रवृत्तिरित्यत्रार्थे "यजयाचयतविच्छप्रच्छरक्षो नङ्" (३।३।९०) इत्यत्र नङो ङित्करणं गुणप्रतिषेधार्थं क्रियमाणं ज्ञापकम्। अन्यथा हि विच्छेस्तुकि सति गुणप्रसङ्ग एव नास्तीति नङो ङित्करणमनर्थकं स्यात् ॥

ज्ञापिता चेयं परिभाषा "अभ्यासस्यासवर्णे" (६।४।७८) इत्यत्रासवर्णग्रहणेन। तदेवमर्थं[3] क्रियते, ईषतुरीषुरूषतुरूषुरित्यत्र सवर्णेऽचीयङुवङौ मा भूतामिति। यदि च वार्णादाङ्गस्य बलीयस्त्वं न स्यात् तदाऽन्तरङ्गत्वात्कृते सवर्णदीर्घत्वे इयङुवङोः प्राप्तिरेव नास्तीति किमसवर्णेनेति। तत्कृतं ज्ञापयत्यस्तीयं परिभाषेति। अत्रोच्यते। यदि सवर्णेऽचीयङुवङौ न भवतस्तदेयेषोवोषेत्यत्रापीयङुवङौ न प्राप्नुतः। यतोऽत्रापि "अचः परस्मिन्पूर्वविधौ" (१।१।५७) इति स्थानिवद्भावादियँङुवङोः[4] कर्त्तव्ययोः सवर्णस्य परस्याचो विद्यमानत्वमिति। एवं च विधेरभावादसवर्णग्रहणमनर्थकमेव। उच्यते। नात्र स्थानिवद्भावोऽस्त्यादिष्टादचः पूर्वत्वादभ्यासस्य। तथाहि। परत्वाद्गुणे कृते "द्विर्वचनेऽचि" (१।१।५९) इति स्थानिवद्भावाद् द्विर्वचनम्। द्विर्वचने कृते स्थानिवद्भावविधौ द्विर्वचन एवेत्यवधारणाद्गुणः पूर्वरूपेणाऽवतिष्ठते। न पुनर्द्विर्वचनादुत्तरकालं पुनः क्रियते। तेन "अचः परस्मिन्०" (१।१।५७) इतीयङुवङोः कर्त्तव्ययोः स्थानिवद्भावो न भवति। यदि हि स्यात्तदार्त्तेरेवाभ्यासस्येयङादेशो विधेय इत्यर्त्तेरभ्यासस्येत्येव ब्रूयात्। इदमेवासवर्णग्रहणं 'यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवत्' इत्यस्याः परिभाषाया मूलम् ॥ ६६ ॥

---

१ A सामान्याश्रये. २ A छस्य for छकारस्य ३ P तद्वैवमर्थं. ४ A इयङुवकोश्च.

यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवत् ॥ ६७ ॥

यो[1] हि "अचः परस्मिन्०" (१।१।५७) इति स्थानिवद्भावः सोऽनादिष्टादचः पूर्वस्य[2] कार्ये भवति । तेन पटयतीत्यत्र टशब्दाकारादनादिष्टादचः पूर्वो यः पशब्दाकारस्तस्य "अत उपधायाः" (७।२।११६) इति वृद्धिं प्रति लोपः स्थानिवद्भवति । आदिष्टादचः पूर्वस्य कार्ये तु न स्थानिवत्त्वं यथा वैयाकरणः सौवश्व इति । तेन "एचोऽयवायावः" (६।१।७८) इति न भवति । अत्र ह्यचः पूर्वयोरैचोः संभवो नास्ति यकारवकाराभ्यां पूर्वयोरैचोर्विधानात् । न्यासकृता त्वत्र 'असिद्धं बहिरङ्गमन्तरङ्गे' (परि. ६९) इत्यनेन समाहितम् । तन्मतेनाचीकरदित्युदाहार्यम् ॥

आदिष्टादचः पूर्वस्य कचित् स्थानिवत्वमुपेयिवानितीडर्थनिपातनात्प्रतीयते । यदि ह्यादिष्टादचः पूर्वस्य कार्ये स्थानिवत्वं न स्यात्तर्हीडर्थनिपातनं वृत्तिकृतोक्तमयुक्तं स्यात् । तथाहीणो द्विर्वचने कृते "दीर्घ इणः किति" (७।४।६९) इति दीर्घत्वे कृते ततः सवर्णदीर्घत्वेनैकाच्त्वादेव[3] "वस्वेकाजाद्धसाम्" (७।२।६७) इतीडागमः सिद्धः स्यादुपेयिवानित्यत्र । न च वाच्यं "दीर्घ इणः किति" (७।४।६९) इति दीर्घविधानसामर्थ्यात्सवर्णदीर्घत्वेन न भवितव्यम् । ईर्येतुरीयुरित्यत्र[4] यणादेशे चरितार्थत्वात् । न च स्थानिवद्भावाद्दीर्घत्वप्राप्तिः । आदिष्टादचः पूर्वत्वाद् द्विर्वचनस्य । यत एवादिष्टादचः पूर्वस्य कचित्कार्ये स्थानिवत्त्वं प्रवर्ततेऽत एव सवर्णविधिं प्रति न स्थानिवदिति प्रतिषेध उपपद्यते शिण्ढि पिण्ढीति । तथा यद्वक्ष्यति "उपधायां च" (८।२।७८) इत्यत्र दीर्घविधौ रिर्यतुः रिर्युरित्यत्र स्थानिवत्त्वप्रवृत्त्या यणादेशं कृत्वा द्विर्वचने कृते "अचः परस्मिन्०" (१।१।५७) इति स्थानिवद्भावान्न दीर्घः इति तदुपपद्यते ॥

अयं चार्थः "अचः परस्मिन्पूर्वविधौ" (१।१।५७) इत्यस्यार्थः परिभाषारूपेण पठ्यते । तत्राजपेक्षमादेशापेक्षं[5] निमित्तापेक्षं वा पूर्वत्वमाश्रीयत इत्युक्तम् । तत्र यदाऽजपेक्षं पूर्वत्वं तदाऽयमर्थः । अजादेशः परनिमित्तकः पूर्वस्य विधौ स्थानिवत् । कुतः पूर्वस्य विधौ स्थानिवत्त्वमचः । तदेवमजपेक्षपूर्वत्वमस्या मूलम् । ज्ञापकं चाहुः । "अभ्यासस्यासवर्णे" (६।४।७८) इत्यत्रासवर्णग्रहणम् । "अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्" (७।४।९५) इति वचनं वा । तेन हि सन्वद्भावबाधनार्थमद् विधीयते । यदि चादिष्टादप्यचः पूर्वे कार्ये स्थानिवत्त्वं स्यात्तदाऽत्त्वमपि नैव कुर्यात् ॥ ६७ ॥

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ ६८ ॥

तेन "विदो लटो वा" (३।४।८३) इति णलाद्यादेशविकल्पो यङ्लुगन्तस्यापि भवति । वेवेद । वेविदतुः । वेविदुः । वेवेत्ति । वेवित्तः । वेविदतीति ॥ न्यायसिद्धत्वमस्याः "निष्ठा शीङ्०" (१।२।१९) इत्यादिसूत्रे न्यासकृता दर्शितम् । तथाहि ।

---

१ A योयं for यो हि. २ A पूर्वस्य पूर्वकार्ये. ३ A सवर्णदीर्घत्वेनैकत्वादेव. ४ A ईर्युरीयुरित्यत्र वत्स्यात् । प्रवृत्त्या यणादेशं. ५ A om. आदेशापेक्षं.

स्थानेद्विर्वचनपक्षे स्थानिवद्भावात्प्रकृतिव्यपदेशः । द्विःप्रयोगे च स एव द्विरावर्त्यते इति युक्तं प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति । ज्ञापकमप्याहुः । " ऊदुपधाया गोहः " (६।४।८९) इत्यत्रोपधाग्रहणम् । ' ऊदोर्गोहः ' इति लाघवार्थं वक्तव्ये यदुपधाग्रहणं करोति तद्यङ्लुकि जोगूहतीत्यत्र योऽभ्यासस्यौकारस्तस्य मा भूदित्येवमर्थं क्रियते । एतच्च तदा स्याद्यदि प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणं भवतीति । ननु चोत्तरार्थमुपधाग्रहणं " गमहनजनखनघसाम्० " (६।४।९८) इति । अन्यथाऽल्लोन्त्यस्य लोपः स्यात् । उच्यते । ज्ञापकवादिनो मते तत्रात[1] इति स्थानी प्रतिपादयितव्यः । श्तिपा निर्देशे चैषा नोपतिष्ठते । तथा च स्मृतिः ।

> " श्तिपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च ।
> यत्रैकाज्ग्रहणं[2] तत्र[3] पञ्चैतानि न यङ्लुकि ॥ "

श्तिपा निर्देशः " इन्धिभवतिभ्यां च " (१।२।६) इति । शपा " भरज्ञपिसनाम् " (७।४।५९) इत्यत्र भर इति । अनुबन्धेन " शीङो रुट् " (७।१।६) इति । गणेन " वनतितनोत्यादीनाम्० " (६।४।३७) इति । एकाज्ग्रहणेन " एकाच उपदेशेऽनुदात्तात् " (७।२।१०) इति "श्र्युकः किति" (७।२।११) इतीट्प्रतिषेधः । अत्र श्लोके किंचिदिति शेषः । यत्रैकाज्ग्रहणेन धातुर्विशिष्यते तत्परिग्रहणार्थम् । यत्र तु धात्ववयवस्य निर्देशो यथा " एकाचो द्वे प्रथमस्य " (६।१।१) इत्यत्रैकाज्ग्रहणं यङ्लुङ्निवृत्त्यर्थं न भवति । तेन यङ्लुकि द्विर्वचनेन बोभवतीति सिध्यतीति यथाकथंचिदाहुः ॥

ननु भवतीत्यत्राकर्तृवाचिनि सार्वधातुके श्तिपि कथं शबुत्पद्यते । उच्यते । श्तिपः शित्त्वादकर्तृवाचिन्यपि शप् । नैतत् । शित्त्वस्य " आदेच उपदेशेऽशिति " (६।१।४५) इत्यात्त्वप्रतिषेधे चरितार्थत्वात् । रोदितिरित्यत्र " रुदादिभ्यः सार्वधातुके " (७।२।७९) इतीडर्थत्वाच्च । किं च असति शित्त्व आर्धधातुकत्वात् श्तिपीट् स्यात् । अथ " तितुत्रतथ० " (७।२।९) इति प्रतिषेधादिडभावः । एवमप्यार्धधातुकत्वात् " णेरनिटि " (६।४।५१) इति णेर्लोपः स्यादेव । एवं तर्हि " इन्धिभवतिभ्यां च " (१।२।२) इति निर्देशादेव शप् । कथं तर्हीक्श्तिपौ धातुनिर्देशे वक्तव्याविति व्याचक्षाणेन न्यासकृतोक्तं शित्करणसामर्थ्याच्छबेति । उच्यते । शितः करणं यस्येति बहुव्रीहिणा शित्करणशब्देन भवतिनिर्देश एवोच्यते । तदयमर्थः । भवतीति निर्देशकरणसामर्थ्याच्छबिति । अन्यस्त्वाह । श्तिपि द्वौ शकारावनुबन्धौ " लशक्वतद्धिते " (१।३।८) इत्यत्रोपदेशानधिकारादित्संज्ञा । एतच्चानुन्यासकृन्मतमेकयोगनिर्दिष्टपरिभाषायामुक्तम् । तदेवं द्वितीयशित्करणसामर्थ्याच्छप् ॥ ६८ ॥

---

१ A तत्र तत्र स्थानी. २ B. C. यत्र for यत्र. ३ P चैव for तत्र.

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ६९ ॥

अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गमसिद्धं भवति ॥ तेन पचावेदमित्यादौ बहिरङ्गस्याद्गुणस्यासिद्धत्वात् " एत ऐ " (३।४।९३) न भवति । ग्रामणि ब्राह्मणकुलमित्यत्र " ह्रस्वस्य पिति कृति तुक् " (६।१।७१) इति न तुक् । नार्कुटः नार्पत्यमित्यत्र "खरवसानयोः०" (८।३।१५) इति न भवति । राजन्यत्रेत्यत्र संयोगान्तलोपो न भवति ॥ ज्ञापकं चात्र " वाह ऊठ् " (६।४।१३२) इत्यूठो विधानम् । तत्र ह्युच्यते । प्रकृतं संप्रसारणमेव वकारस्य विधीयतां ततः पूर्वरूपत्वम् । ततो ण्विप्रत्ययस्य प्रत्ययलक्षणेनोकारस्यौकारो गुणस्ततो वृद्धिरेचीति वृद्ध्या सिद्धं प्रष्ठौहेति । अनकारान्ते चोपपदे छन्दसि वहेर्ण्विर्न दृश्यते । तत्किमूठो विधानेन । तत् कृतं ज्ञापयत्यस्तीयं परिभाषेति[3] । बहिरङ्गं संप्रसारणं भसंज्ञानिमित्तप्रत्यये विधानात्तत्रान्तरङ्गेऽभ्यन्तरङ्गे प्रत्ययाश्रये गुणे कर्तव्ये बहिरङ्गस्य संप्रसारणस्यासिद्धत्वादुकारो नास्तीति कथं गुणः स्यादिति ॥

अनित्या चेयं परिभाषा । तच्चानित्यत्वं " नलोपः सुप्स्वर० " (८।२।२) इति तुग्विधौ नलोपस्यासिद्धत्वेन ज्ञापितम् । तथाहि । यदीयं नित्या स्यात् तदाऽनयैव वृत्रहभ्यामित्यत्रान्तरङ्गे तुकि कर्तव्ये बहिरङ्गस्य नलोपस्यासिद्धत्वं सिद्धमेवेत्यनित्यत्वे ज्ञापकम् । ननु सिद्धे पुनर्यदसिद्धवचनं तन्नियमार्थं स्यात् । कृत्प्रत्ययलक्षणे तुक्येवासिद्धं न त्वलक्षण इति । तेन वृत्रहच्छत्रमित्यत्र तुकि कर्तव्येऽसिद्धं बहिरङ्गमन्तरङ्ग इति नै प्रवर्तते । न च विधिनियमसंभवे विधिरेव ज्यायानित्यस्ति, नियमज्ञापकयोरर्थद्वयापेक्षत्वेन तुल्यत्वात् । उच्यते । वृत्रहच्छत्रमित्यत्र नलोपो न बहिरङ्गोऽपि तु तुगेव । तुको द्विपदाश्रयत्वात् । वृत्रहभ्यामित्यत्र तु विभक्तिमाश्रित्य नलोप इति तत्र तस्य बहिरङ्गत्वम् । अनित्यत्वे चामू इत्यत्रैकादेशस्य बहिरङ्गस्यान्तरङ्गे उत्वे मत्वे च कर्तव्येऽसिद्धत्वं न भवति । तथा पपुषः पश्येत्यत्र संप्रसारणस्यासिद्धत्वाद्वलक्षणो " वस्वेकाजाद्घसाम् " (७।२।६७) इतीण् न भवति । अत्र चास्याः प्रवर्तनाभाव उपायान्तरमकृतव्यूहाः (परि. ५०) इत्यत्रोक्तम् ॥ ६९ ॥

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ७० ॥

पूर्वापवादोऽयं योगः । अचोरानन्तर्ये बहिरङ्गपरिभाषा नास्ति । तेन कह्वः इत्यादौ " एचोऽयवायावः " (५।१।७८) इति भवति । तथा अक्षद्यूरित्यत्र " इको यणचि " (७।१।७७) इति । यूनो मघोन इत्यत्राकःसवर्णाद्गुणो । यद्येवं पचावेदमित्यत्रापि " एत ऐ " (३।४।९३) प्राप्नोति । अत्राप्यचोरानन्तर्ये बहिरङ्गस्याद्गुणस्य प्रवृत्तत्वात् ' असिद्धं बहिरङ्गमन्तरङ्गे ' इत्यस्याः प्रतिषेधो युक्तः । नैतत् । अचोरा-

---

१ A B om. ब्राह्मण. २ Before प्रष्ठौहेति A B ins. प्रष्ठौहः. ३ A B om. इति. ४ A तत् for न. B om. न. ५ B अन्तरङ्गात् for अन्तरङ्गे. ६ A om. मत्वे. ७ A om. आद्गुणस्य''''इत्यस्याः.

नन्तर्ये सति यत्रोभयमन्तरङ्गं वहिरङ्गं च तत्रेयं प्रतिषिध्यते यथा वहवः अक्षद्यूरिति । तथा-ह्यत्र बहिरङ्गे प्रवृत्ते विद्यमान एव गुण ऊठि चान्तरङ्गावयणादेशौ कर्त्तव्यतया विद्येते । पचा-वेदमित्यत्र वहिरङ्ग एकादेशे कृतेऽचोरानन्तर्यं निवृत्तमित्यचोरानन्तर्ये द्वयं न विद्यते । तत्कथमस्याः प्रतिषेधः । यद्येवमधीत्य प्रेत्येत्यत्राप्येकादेशे कृते अचोरानन्तर्ये द्वयं नास्ति कथं तदा " षत्वतुकोरसिद्धः " (६।१।८६) इत्यस्य ज्ञापकतोपपत्तिः । तथा ह्यत्र 'पूर्वं धातुरुपसर्गेण युज्यते' (परि० १२८) इत्यत्र दर्शने दीर्घादुत्तरकालमन्तरङ्गे तुकि कर्त्तव्येऽचोरानन्तर्यं नास्ति । एवं तर्हि 'पूर्वं धातुः साधनेन युज्यते' (परि० १२७) इत्यस्मिन् दर्शनेऽधीत्य प्रेत्येत्यत्र 'नाजानन्तर्ये०' इत्युच्यते । एतद्दर्शने ह्येकादेशात् प्राग् ल्यपि कृतेऽचोरानन्तर्येऽन्तरङ्गं वहिरङ्गं च द्वयं विद्यत एव । न चास्मिन् दर्शनेऽन्तरङ्गत्वात्तुकि कृते " षत्वतुकोरसिद्धः " (६।१।८६) इत्यस्यानर्थक्यम् । यथान्तरङ्गत्वं तुकस्तथा नित्यत्वं दीर्घस्य, तदेतयोर्नित्यान्तरङ्गयोः परत्वाद्दीर्घत्वं स्यात् । अथ वा 'पूर्वं धातुरुपसर्गेण युज्यते' इत्यत्राप्यकृतव्यूहाः इति प्रविभज्यान्वाख्यानेऽचोरानन्तर्यमस्ति । किं च " षत्वतुकोरसिद्धः " (६।१।८६) इत्यत्र " धातोस्तन्निमित्तस्यैव " (६।१।८०) इत्यत्र न्यासकृता व्याख्यातम् । संहिताधिकारीये कार्ये कर्त्तव्ये 'असिद्धं बहिरङ्ग-मन्तरङ्गे' इति 'नाजानन्तर्ये०' इत्यनया बाध्यते । " एत ऐ " (३।४।९३) इतीदं प्रकरणान्तरविहितं कार्यमिति कुतस्तत्र कर्त्तव्ये प्रतिषेध उच्यते । एतदेव " च्छ्वोः शूडनुनासिके च " (६।४।१९) इत्यत्र मैत्रेयेणोक्तम् । अचोरानन्तर्ये यत्तद् द्वयं प्राप्नोत्यन्तरङ्गं वहिरङ्गं च तत्रेयं प्रतिषिध्यते, इह तु कृत एव बहिरङ्गेऽचोरानन्तर्ये च निवृत्तेऽन्तरङ्गं प्राप्नोतीति कुतस्तस्याः प्रतिषेध इत्यादिना ग्रन्थेन ॥ अस्यायमर्थः । अस्तीत्यध्याहार्यम् । तदयमर्थः । अचोरानन्तर्ये यत्र द्वयमस्ति वहिरङ्गं प्रवृत्तमन्तरङ्गं प्राप्नोत्यन्तरङ्गं प्रवृत्तं वहिरङ्गं वा तत्र वहिरङ्गपरिभाषा प्रतिषिध्यते इति ॥

ज्ञापकं चात्र " षत्वतुकोरसिद्धः " (६।१।८६) इति तुक्येकादेशस्यासिद्ध-वचनम् । यद्यचोरानन्तर्येऽपि बहिरङ्गस्यासिद्धत्वं स्यात्तदाधीत्येत्यादावन्तरङ्गे तुकि कर्त्तव्ये पदद्वयाश्रितस्य सवर्णदीर्घस्यासिद्धं बहिरङ्गमन्तरङ्ग इत्यत एवासिद्धत्वादसिद्धवचनमनर्थकं स्यात्, अनया चान्तरङ्गपरिभाषा न बाध्यत इत्यन्तरङ्गपरिभाषायामुक्तम् ॥ ७० ॥

संज्ञापूर्वको विधिरनित्यः ॥ ७१ ॥

तेन "धाम स्वायम्भुवं ययुः" इत्यत्र " ओर्गुणः " (६।४।१४६) इत्यस्या-भावादुवङ् सिध्यति । तथा ज्योतिषमित्यत्राण्यादिवृद्धिर्न भवति । पञ्चवाणः क्षिणो-तीत्यत्र न गुणः । उदश्वित्वानित्यत्र श्वयतेः क्विपि न सम्प्रसारणम् ॥ ज्ञापकं चात्र "ओरोत्" इति कर्त्तव्ये "ओर्गुणः" (६।४।१४६) इति गुणग्रहणम् । तथा " उतो

१ A ऊठि चान्तरङ्गा इधियणादेशौ. P ऊठिवान्तरङ्गावयणादेशौ. २ A उपसर्गेण for साधनेन. ३ A प्रवृत्तं for प्राप्नोति. ४ A श्वयतेः for श्वयतेः.

वृद्धिर्लुकि हलि ” (७।३।८९) इत्यत्र औदिति कर्त्तव्ये वृद्धिग्रहणम् । तेन स्तुयादित्यत्र वृद्धिर्न भवति । एवं च “ क्ङिति च ” (१।१।५) इत्यत्राचिनवमस्तुनवमितिसिद्ध्यर्थं वृत्तौ यदुक्तं यासुटो ङिद्वचनं ज्ञापकं ‘ लकाराश्रयं ङित्त्वमादेशानां न भवति ’ इति तदुपपद्यते । अन्यथा यासुटो ङिद्वचनं स्तुयादित्यत्रानिग्लक्षणवृद्धिप्रतिषेधार्थं स्यात्, खुतो ज्ञापकम् ॥

ननु तथाप्यस्य ज्ञापकत्वमयुक्तं चिनुयुरित्यादौ “ जुसि च ” (७।३।८३) इति प्रतिषेधार्थत्वात । एतच्चायुक्तम् । यतः सत्यपि ङित्त्वे भवितव्यमेवात्र “जुसि च” (७।३।८३) इति गुणेन, क्ङिद्विषय एव तस्यारम्भात् । न । येन नाप्राप्तिन्यायेन “सार्वधातुकमपित् ” (१।२।४) इत्यनेन यन् ङित्त्वं तदेवानेन बाध्यते । न यासुडाश्रितमपि । उच्यते । यद्येतावत्प्रयोजनं स्यात “ क्सस्याचि ” (७।३।७२) इत्यतोऽचीत्यनुवर्त्याजादौ जुसि गुणो विधेयः इति यासुटो ङित्त्वं ज्ञापकमेव । “ अपिः पदार्थसम्भावना०” (२।४।९६) इत्यत्र स्तुयादित्यत्र ङिच्च पिन्न भवतीति वचनाद्राक्षितेन वृद्धप्रभावो व्याख्यातः । स्तुयादिति “अकृत्सार्वधातुकयोः०” (७।४।२५) इति नै दीर्घः । सार्वधातुकयकारत्वात । ननु चाचिनवमित्यादिसिद्ध्यर्थं ज्ञापकमभिधीयते । यावता पिच्च ङिन्न भवत्यनेन ङित्त्वाभावाद् गुणः सिद्ध एव । उच्यते । भाष्यमतमिदं न सूत्रकृतः । अत एव “ सेर्ह्यपिच्च ” (३।४।८७) इत्यत्र न्यासे उक्तम् । सोर्हि ङिदिति क्रियमाणे स्थानिवद्भावेन पित्त्वं स्यादिति । अन्यथा तत्रापि ङिच्च पिन्न भवतीति कः प्रसङ्गः पित्त्वस्य स्यादिति । ननु यदि सूत्रकारस्यानपेक्षितमिदं ङिच्च पिन्न भवतीति तथा ब्रूताद्भवानित्यत्र पित्त्वस्य स्थानिवद्भावाद् “ ब्रुव ईट् ” (७।३।९३) इतीड् स्यात् । उच्यते । सत्यपि सम्भवे बाधनं भवतीति तातङो ङित्त्वेन तिपः पित्त्वं बाधनीयम् । एवं भिन्यादित्यत्रापि तिपः पित्त्वेन लिङो ङित्त्वस्य बाधितत्वात् । ङित्कार्यार्थं यासुटो ङित्त्वं कर्तव्यमेव । अचिनवमित्याद्यपि न दूषणम् । तिपः पित्त्वेन ङित्त्वस्य बाधितत्वाद् ॥७१॥

संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ॥ ७२ ॥

तद्यथा धीवरीत्यादौ ङीप्संनियोगशिष्टो “ वनो र च ” (४।१।७) इति रेफादेशः । पञ्चधीवेत्यादौ पञ्चभिर्धीवरीभिः क्रीतेत्यार्हीयस्य ठकः “ अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम् ” (५।१।२८) इति लुकि कृते “ लुक्तद्धितलुकि ” (१।२।४९) इति ङीपो निवृत्तौ रेफस्यापि निवृत्तिः ॥

अस्याः परिभाषायाः “ छेदादिभ्यो नित्यम् ” (५।१।६४) इत्यत्र भाष्यकारेण न्यायसिद्धत्वमुक्तम् । तदुक्तम् । लौकिक एवायं न्यायः संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः । तद्यथा देवदत्तयज्ञदत्ताभ्यामिदं कर्त्तव्यमित्युक्ते देवदत्तापाये यज्ञदत्तोऽपि न करोतीति । ज्ञापकमप्यस्या भाष्यकारेण “ बिल्वकादिभ्यश्छस्य लुक् ” (६।४।१५३)

---

१ A विधीयते for विधेयः. २ A om. न. ३ P om. ङित्कार्यार्थं यासुटो ङित्त्वं कर्तव्यमेव । अचिनवमित्याद्यपि न दूषणम् । तिपः पित्त्वेन ङित्त्वस्य बाधितत्वाद् ॥ ७१ ॥

इत्यत्र व्याख्यातम् । तत्र युक्तं बिल्वकादिभ्य इति कुका निर्देशः । कुक् चाऽयं "नडादीनां कुक् च" (४।२।९१) इति छप्रत्ययसंनियुक्तस्तत्र बिल्वादिभ्यः परश्छ एव संभवतीति बिल्वकादिभ्यो लुगित्युच्यमाने भसंज्ञानिमित्तप्रत्यये छस्यैव लुग्भविष्यति किं छग्रहणेन । तत्कृतं छस्यैव केवलस्य लुग्यथा स्यात् । अन्यथा संनियोगपरिभाषया कुकोऽपि निवृत्तिः स्यादित्येवमर्थम् । एवं चास्याः परिभाषाया अस्तित्वे ज्ञापकम् ॥

अत्रोच्यते । ननु यदि[1] बिल्वकादिभ्यो लुगित्युच्यते सामान्येन प्रत्ययमात्रस्य लुक् स्यात् । तथा च बिल्वकादित्यत्र सुपे[2]ऽपि लुक् स्यात् । उच्यते । "हलस्तद्धितस्य" (६।४।१५०) इत्यस्मात्तद्धितग्रहणानुवृत्तेर्न भविष्यति । नन्वेवमपि बिल्वकस्यावयवो विकारो वा बैल्वकः इत्यत्र "कोपधाच्च" (४।२।७९) इत्यस्याणो लुक् प्राप्नोति । एवं तर्हि "आपत्यस्य च तद्धितेऽनाति" (६।४।१५१) इत्यतस्तद्धित इत्यनुवृत्तेस्तद्धितस्य भसंज्ञस्य तद्धिते परतो लुक् । एवमपि बिल्वके भवो बैल्वकी बैल्वक्यास्येदं बैल्वकीयमित्यत्र प्राप्नोति । नैतत् । बिल्वकादिभ्यो यो विहितस्तस्मिन् लुप्यते । न चात्र बिल्वकाच्छो विहितोऽपि तु बैल्वकादिति ॥

अनित्या चेयम् । तच्चानित्यत्वं "भस्याढे तद्धिते" इत्यढ इति पुंवद्भावप्रतिषेधेन ज्ञापितम् । तत्र ह्यढ इति किमित्युक्त्वा श्यैनेयो रौहिणेयः इति प्रत्युदाहृतम् । यदि चेयं नित्या स्यात् तदा "यस्येति च" (६।४।१४८) इति लोपे कृते संनियोगपरिभाषया नकारस्याऽपि निवृत्तिः स्यात् । ततश्च पुंवद्भावे[3]ऽविशेषादढे इति प्रतिषेधोऽनर्थकः स्यात् । ननु कथमनर्थकः यावता लोपे सति "अचः परस्मिन्०" (१।१।५७) इति स्थानिवद्भावेन प्रत्ययलक्षणेनासिद्धपरिभाषया वा ङीप्संनियोगो विद्यत एव । एवं च सति संनियोगपरिभाषाया अनुपस्थानान्नकारादेशो न निवर्त्तते । उच्यते । स्थानिवद्भावादिना कार्यं क्रियते । न तु लुप्तवर्णसंनिधानम् । न[4] चैवं संनियोगपरिभाषाया अनुपस्थानम् । अपायमात्रे तत्प्रवर्त्तनात् । ज्ञापकमप्यस्यास्तादृशमेव । अन्यथा छस्य लुक्यपि कृते कुको निवृत्तिर्न प्राप्नोति प्रत्ययलक्षणादिना तस्य विद्यमानत्वात् ॥ ७२ ॥

ताच्छीलिके णेऽप्यण्कृतं कार्यं भवति ॥ ७३ ॥

अणा कृतं कार्यमण्कृतम् । तण्णप्रत्ययेऽपि भवति । तेन चुरा शीलमस्या इति छत्रादित्वाण्णप्रत्ययान्तादपि ङीब्[5]भवति । चौरी तापसी । ताच्छीलिके इति किम् । "शीलिकामिभिक्षाचरिभ्यो णो वक्तव्यः" (३।२।१ वा. ७) । मांसशीला मांसभिक्षा । "प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः" (५।२।१०१) प्राज्ञा ब्राह्मणीति । अत्राण्कृतं ङीब्[6] न भवति ॥

---

१ A om. यदि. २ A om. सुपि. ३ पुंवद्भावविशेषात्. ४ A न चैवं सति स्थानिवद्भावेन प्रत्ययलक्षणेन असिद्धपरिभाषया वा ङीप्संनियोगो विद्यत एव । योगपरिभाषया उपस्थानम् । ५ A C ङीन । चौरा तापसी । ६ A B om. न.

" कार्मस्ताच्छील्ये " (६।४।१७२) इत्यत्र ज्ञापितेयम् । तत्र कर्मशब्दात्ताच्छील्यमित्यनुवर्त्तमाने छत्रादित्वाण्णप्रत्यये कार्म इति निपात्यते । अत्रोच्यते । "नस्तद्धिते" (६।४।१४४) इति टिलोपेन कार्म इति सिद्धे टिलोपार्थं निपातनमयुक्तम् । न च " अन् " (६।४।१६७) इति प्रकृतिभावोऽस्ति, आणि तस्य विधानात् । एवं तर्ह्येतज् ज्ञापयत्यस्तीयं परिभाषेति । अत्रोच्यते । यदि ताच्छीलिकेऽप्यण्कृतं कार्यं भवतीति किमर्थं तर्हि ताच्छीलिकेऽथ्यण्प्रत्यय एव न विधीयते । एवं च ज्ञापकं कर्त्तव्यं न भवति । उच्यते । वैचित्र्यार्थं न कृतम् ॥ ७३ ॥

धातोः कार्यमुच्यमानं तत्प्रत्यय एव भवति ॥ ७४ ॥

धातोर्यत्कार्यमुच्यते तद्धातुप्रत्यय एव भवति । तेन " सृजिदृशोर्झल्यमकिति " (६।१।५८) इत्यम् रज्जुसृड्भ्यामित्यत्र क्विबन्तानां सत्यपि धातुत्वे सुपि प्रातिपदिकप्रत्यये न भवति । तथा " अचि विभाषा " (८।२।२१) इति गिरौ गिर इत्यत्र न भवति.। तथोदकमग्भ्यां प्राणनग्भ्यामित्यत्र " मस्जिनशोर्झलि " (७।१।६०) इति नुम् । यद्येवं यथा प्राणनग्भ्यामित्यत्र न[1] नुम् तथा " नशेर्वा " (८।२।६३) इति नशधात्वाश्रितं कुत्वमपि पक्षे न स्यात् । उच्यते । पदस्य कुत्वविधानान्न धातुप्रत्ययाश्रितं कुत्वं नुमागमस्तु धातुप्रत्ययाश्रित एव । इमामेव परिभाषामवलम्ब्योपयट्काम्यतीत्यत्र काम्यचः ककारस्यानित्संज्ञा । श्रियौ श्रियः भ्रुवौ भ्रुवः इत्यादौ प्रातिपदिकप्रत्ययेपीयङुवङौ भवतः । " ओः सुपि " (६।४।८३) इति " वर्षाभ्वश्च " (६।४।८४) इति सूत्रारम्भात् । " परिव्यवेभ्यः क्रियः " (१।३।१८) " भुवः प्रभवः " (१।४।३१) इति निर्देशाच्च । वार्त्तिककारास्त्वन्यादृशीं परिभाषां पठन्ति । " धातोः स्वरूपग्रहणे तत्प्रत्यय एव कार्यविज्ञानम्" (७।२।११४ वा.२) इति । अत्र हि पाठे दृग्भ्यां दृग्भिरित्यत्र"अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्" (६।१।५९) इत्यत्रास्वरूपधातुग्रहणात सुप्यप्यमागमः स्यात्[2] । एतच्च " अचि विभाषा " (८।२।१७) इत्यत्र " मृजेर्वृद्धिः " (७।२।११४) इत्यत्र च रक्षितेन व्याख्यातम् ।

एतस्याः परिभाषायाः दाण्डिनायनादि---(६।४।१७४) सूत्रे भ्रौणहत्यशब्दे तत्वनिपातनं लिङ्गम् । तथाहि यद्येषा न स्यात् तदा "हनस्तोऽचिण्णलोः" (७।३।३२) इति ष्यञि तत्वं सिद्धमिति निपातनमनर्थकं स्यात् । अत्रोच्यते । निपातनमिदं कुत्वाभावार्थं स्यात् । उच्यते । " न क्वादेः " (७।३।५९) इति योगविभागेन कुत्वं न[3] भविष्यति । टिलोपार्थमपि न वाच्यम् । परत्वाट्टिलोपं बाधित्वा " हनस्तोऽचिणणोः " (७।३।३२) इति तस्य विद्यमानत्वात् । उपधावृद्ध्यभावार्थमपि न । आदिवृद्ध्योपधावृद्धेर्बाधितत्वाद्, त्वाष्ट्रो जागत इति यथा । ञ्नित्यादिस्वरबाधनार्थमपि न । तस्येष्यमाणत्वात् ॥ ७४ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ अङ्गपादो नाम षष्ठाध्यायस्य चतुर्थः पादः ॥

इति षष्ठोध्यायः ॥

---

१ A om. न. २ A इत्यत्र स्वरूपधातुग्रहणं सुप्यप्यमागमः. ३ P om. न.

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ७५॥

यो यस्य मध्यपाती स तद्ग्रहणेन गृह्यत इत्यर्थः । तेन सर्वकः इत्यत्र साकच्कस्यापि सर्वनामत्वे " जसः शी " (७।१।१७) इति शीभावः । तथा वैयाकरणः इत्यत्राप्यैजागमे कृते तद्धितद्वारिका प्रातिपदिकसंज्ञा ॥

लौकिक एवायं न्यायः । तद्यथा भट्टग्राम इति । तत्राभट्टा अपि भट्टव्यपदेशं समासादयन्ति तथाऽमल्ला अपि मल्लव्यपदेशम् । ज्ञापकं चात्र ''नेदमदसोरकोः'' (७।१।११) इत्यत्राकोरिति पदम् । 'यद्येवा न स्यात्तदेदमदसोः प्रतिषेध उच्यमानोऽकचि कृते ईमकैरसुकैरित्यत्र[1] शब्दान्तरत्वादेव न स्यात् किमकोरिति प्रतिषेधेन' इति ''येन विधि०''(१।१।७२) सूत्रे भाष्यकृतोक्तम् । यद्येवं कथं तर्हि स एव भगवान् ''नेदमदसोरकोः'' (७।१।११) इत्यत्रेदमदसोः कादिति नियमं कृत्वा निषेधं प्रत्याख्यातवान् । उच्यते । अस्यायमभिप्रायः । मा भूदिदमकोरिति[2] ज्ञापकम् । ''एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ''(६।१।१३२) इत्यत्र यदकोरिति पदं तद्भविष्यति । '' युवोरनाकौ '' (७।१।१) इत्यत्र पश्यामाचष्टे पश्ययतीत्यत्र प्रस्तावे यद् दूषणादिकं तन् ङ्याप्पादेऽकृतव्यूहा इत्यत्रोक्तम् ॥ ७५ ॥

अबाधकान्यपि निपातनानि भवन्ति ॥ ७६ ॥

तेन " पुराणप्रोक्तेषु० " (४।३।१०५) इति निपातनस्य नित्यमबाधकत्वात्[3] " सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च " (४।३।२३) इति ट्युट्युलौ तुडागमोऽपि भवति । तथा च 'दधतः पुरातनमुनेर्मुनिताम् ' इति भारवेः, 'पुरातनीर्नदीः ' इति च माघस्य प्रयोग उपपद्यते ॥

ज्ञापकं चात्र त्रयाणामिति सिद्धये ''त्रेस्त्रयः'' (७।१।५३) इति सूत्रम् । यदि हि बाधकान्येव निपातनानि स्युस्तदा " निजां त्रयाणाम्० " (७।४।७५) इति सिद्धं स्यात् । यदा त्वबाधकान्यपि निपातनानि भवन्ति तदा[4] त्रीणामिति प्रयोगनिवृत्त्यर्थं ''त्रेस्त्रयः'' (७।१।५३) इति सूत्रमर्थवद्भवति । अन्ये त्वाहुः । नेयं परिभाषा नापि भाष्यकारवचनम् । 'बाधकान्येव निपातनानि' इति ''सर्वादीनि०'' (१।१।२७) इत्यादिसूत्रे व्याख्यातम् । अत एव तत्रैव सूत्रे भागवृत्तिः पुरातनमुनेर्मुनितामिति पुरातनीर्नदीरिति च प्रमादपाठावेतौ गतानुगतिकतया कवयः प्रयुञ्जते न तेषां लक्षणे[5] चक्षुरिति ॥ ७६ ॥

---

१ A इदमकैः. B इमकैरसुकैः. २ A इमकोरिति. ३ A नित्यमेव बाधकत्वात्. ४ A तदा निजां त्रयाणामिति. ५ B P लक्षणं for लक्षणे.

अङ्गाधिकारे तस्य तदुत्तरपदस्य च ॥ ७७ ॥

तेन ' अस्थिदधि० ' (७।१।७५) इत्यादिना प्रियास्थ्ना प्रियदध्नेत्यत्राप्यनङ् भवति । ग्रहणवता प्रातिपदिकेनेत्यस्यायमपवादः । ज्ञापकं चात्र " युजेरसमासे " (७।१।७१) इत्यत्रासमासग्रहणम् । तद्वयश्वयुगित्यत्र नुम् मा भूदित्येवमर्थं क्रियते । यदि चाङ्गाधिकारे तदुत्तरपदस्यापि कार्यं न भवति तदा युजेर्नुमि अश्वयुजि कः प्रसङ्गो यन्निषेधार्थमसमासग्रहणं स्यादिति ॥७७॥

प्रत्येकं वाक्यपरिसमाप्तिः ॥ ७८ ॥

इह शास्त्रे प्रत्येकं वाक्यानि परिसमाप्यन्ते । यथा वृद्धिसंज्ञा प्रत्येकमादैचाम् । गुणसंज्ञा चादेङाम् । लौकिक एवायं न्यायः " उभे अभ्यस्तम् " (६।१।५) इत्यत्र भाष्यकारेण व्याख्यातः । तदुक्तम्[2] । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्युक्ते न पुनरुच्यते प्रत्येकमिति । अथ च प्रत्येकं भोज्यन्त इति । अत्र[3] शब्दशक्तिरेव प्रमाणम् । ज्ञापकमप्यत्र "णलुत्तमो वा" (७।१।९१) इत्यत्रोत्तमग्रहणं णलो[4] विशेषणम् । यदि हि प्रत्येकं वाक्यसम्बन्धो न स्यात्तदोत्तमग्रहणमिड्वस्मसां त्रिकेण संबद्धमिति णलः केवलस्य विशेषणं न स्यात् ॥ ७८ ॥

क्वचित् समुदायेन वाक्यपरिसमाप्तिः ॥ ७९ ॥

यथा "हलोऽनन्तराः संयोगः"(१।१।७)इति संयोगसंज्ञाविधानम् ।एतदर्थं संयोग इति महती संज्ञा कृतेति न्यासकृतोक्तम् । लौकिक एवायं न्यायो "वृद्धिरादैच्" (१।१।१) इत्यत्र भाष्ये दर्शितः। गर्गाः शतं दण्ड्यन्तामिति। समुदायेनार्थिनो राजानो[5] हिरण्येन भवन्तीति न चात्र प्रत्येकं दण्डयन्ति । अत्रापि शब्दशक्तिरेव प्रमाणम्[6] । केचिदत्र युक्तिमाहुः । शतमत्र प्रधानं कर्म, गर्गास्तु गुणकर्म तदङ्गत्वात् । गुणभेदे च प्रधानभेदो न युक्तः। ज्ञापकमप्याहुः । "प्रथमयोः पूर्वसवर्णः" (६।१।१०२) इत्यत्र प्रथमाद्वितीययोर्वचनषट्कयोः प्रयुक्तं प्रथमयोरिति पदम् । प्रथमाशब्दो हि यदि सुपां त्रिकस्य स्वौजसिति समुदायस्य संज्ञा स्यात् सामीप्याच्चामौट्शसिति त्रिकेषु प्रयुज्यते तदा प्रथमयोरिति निर्देशः साधीयान् भवति । यदि तु प्रत्येकं प्रथमाशब्दः स्यात्तदा सोरेकवचनस्य प्रथमाशब्देन ग्रहणं स्यात् । सामीप्याच्चाम इति लाघवार्थं स्वमोरित्येवं कुर्यात् । तस्मात् "प्रथमयोः०" (६।१।१०२) इति निर्देशे[7] समुदायेन वाक्ये परिसमाप्तिं बोधयति । यथेष्टं च पक्षयोराश्रयणम् । केचित्तु उभयथा[8] वाक्यपरिसमाप्तिरित्याहुः । यथा गर्गैः सह न भोक्तव्यमिति प्रत्येकं न भुज्यते समुदितैश्चेति । तेन स्वादिविधिवाक्यस्य " बहुषु बहुवचनम् " (१।४।२१) इत्यादिना " कर्मणि द्वितीया " (२।३।२) इत्यादिना च शास्त्रैकवाक्यतानेकवाक्यतापक्षौ तत्र तत्राभिधीयमानावुपयुज्येते इति ॥ ७९ ॥

---

१ A om. अपि. २ A om. तदुक्तम्. ३ A अथ शक्तिरेव for अत्र शब्दशक्तिरेव ४ A om. णलो विशेषणम्. ५ A om. राजानः. ६ A P. प्रधानम् for प्रमाणम्. ७ B.C.P. निर्देशेन for निर्देशे. ८ A P यथा for उभयथा.

अभेदका इह शास्त्रे गुणाः ॥ ८० ॥

तेन " वृद्धिरादैच् " (१।१।१) इत्युदात्तस्वरितानामादैचां वृद्धिसंज्ञासिद्धिः। लोके गुणानां भेदकत्वमभेदकत्वं च। यथैकमुदकमिदं शीतमिदमुष्णमिति [1]गुणभेदाद्भिद्यते। अभेदकत्वं च यथा देवदत्तो गौरो लोहितः कृष्णो वा वृद्धो वेति [2]स्वाभिख्यां न जहाति। एवं च शास्त्रे उभयग्रहणे प्राप्ते नियमोऽयम् ॥

अयं चार्थः " चतुरनडुहोरामुदात्तः " (७।१।९८) इत्युदात्तग्रहणेन ज्ञापितः। तथा " अस्थिदधि० " (७।१।७५) इत्यत्रोदात्त इत्यनेन, " लुङ्लङ्० " (६।४।७१) इत्यत्रोदात्तग्रहणेन च। यदि भेदकाः स्युर्गुणास्तदोदात्तगुणयुक्त एवाकार उच्चारयितव्यः इत्युदात्तग्रहणमनर्थकं स्यात। अतो ज्ञापकम् ॥ ८० ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ युवपादो नाम सप्तमाध्यायस्य प्रथमः पादः ॥

औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ ८१ ॥

उपदेशे भव औपदेशिकः प्रयोगे भवः प्रायोगिकः। अध्यात्मादित्वाट्ठञ्। तयोर्मध्ये औपदेशिकस्यैव ग्रहणम्। तद्यथा " तरप्तमपौ घः " (१।१।२२) इति प्रत्ययस्यैव तरपो घसंज्ञा ब्राह्मणितरेति। न तु [3]तरतेरप्प्रत्यये कृते यः प्रयोगस्तस्य नदीतरः इति। यदि तु स्याद् " घरूप० " (६।३।४३) इति ह्रस्वः स्यात॥

ज्ञापकं चात्र " श्वीदितो निष्ठायाम् " (७।२।१४) इति श्विग्रहणम। यदि प्रायोगिकस्यापि ग्रहणमभविष्यत् तदा संप्रसारणे कृते शूनः शूनवानित्यत्रो[4]गन्तत्वादेव " श्र्युकः किति " (७।२।११) इतीट्प्रतिषेधः सिद्ध इति श्विग्रहणं न कुर्यात्। एतच्चायुक्तम्। " एकाच उपदेशे० " (७।२।१०) इत्यत उपदेशग्रहणानुवृत्तेः " श्र्युकः किति " (७।२।११) इत्यनेनोपदेश उगन्तात्प्रतिषेधः। शून इत्यत्र तु नोपदेशे उगन्तत्वमपि तु प्रयोगे। तथा च " श्वीदितो निष्ठायाम् " (७।२।१४) इत्यत्र रक्षितः उपदेशग्रहणानु[5]वृत्तेः " श्र्युकः किति " (७।२।११) इति प्रतिषेधो न प्राप्नोतीति श्विग्रहणम इति। उच्यते। ज्ञापकवादिनोऽयमभिप्रायः " श्र्युकः किति " (७।२।११) इत्यत्रोपदेशाधिकारो न स्वीक्रियते। न चैवं तीर्णमित्यादाविट्प्रतिषेधाभावः प्राप्नोति। " श्वीदितो निष्ठायाम " (७।२।१४) इत्यत्र श्विग्रहणेनौपदेशिकोगन्तादिट्प्रतिषेधात्। ननु श्विग्रहणमिट्प्रतिषेधार्थमयुक्तम्। उड्डीन [6]इत्यत्रोदुदित्वादेवेडागमाभावस्य सिद्धत्वात्। किं च परिभाषाया: प्रयोजनं नास्ति। " तरप्तमपौ घः " (१।१।२२) इत्यत्र तमपा साहचर्याल्लक्षणपरिभाषया च प्रत्ययस्यैव तरपो ग्रहणात। तथोपदेशावस्थायां पकारस्ये[7]त्संज्ञालोपे कृते गुणपरवेलायां पकाराभावात्तरसमुदायो नास्तीति कथं

---

१ A om. गुण. २ A स्वाभिख्यां. ३ A तरतेरप्रत्यये. ४ A उगित्वादेव. ५ A अनुवृत्तिः. ६ A P इत्येतदुद्यो दित्वादेव. B इत्यत्रोदित्वादेव. ७ A इत्संज्ञायां लोपे कृते.

नदीतर इत्यत्र घसंज्ञाशङ्का । किं च यदीयं परिभाषाऽस्ति तदा किम् " उपदेशेऽजनुनासिक० " (१।३।२) इत्यादावुपदेशग्रहणेन । उच्यते । आद्यस्तावन्न भवति प्रपञ्चार्थत्वात् । द्वितीयोऽपि न । उपायस्यानुपायतोपालम्भो न रूपाय गौरवमिति वचनात् । तृतीयोऽपि न । सर्वत्रैवेत्संज्ञायां लोपे कृते भूतपूर्वगत्या पकारमाश्रित्य संज्ञाविधानात् । चतुर्थोऽपि न । परिभाषाश्रयापेक्षया प्रक्रियालाघवार्थत्वात् ॥ ८१ ॥

सर्वविधिभ्य इड्विधिर्बलवान् ॥ ८२ ॥

तेन श्वयित्वेत्यत्र संप्रसारणात् पूर्वमिडागम एव भवति । तथा च " न क्त्वा सेट् " (१।२।१८) इत्यकित्वात्संप्रसारणाभावः ॥ ज्ञापकं चात्र " सनि ग्रहगुहोश्च " (७।२।१०) इत्यत्रोकोऽनुकर्षणार्थं चकारकरणम् । अन्यथा स्तॄपतीत्यत्र " इको झल् " (१।२।९) इति सनः कित्वे " श्र्युकः किति " (७।२।११) इत्येवेट्प्रतिषेधः सिद्ध इति किमुकोऽनुकर्षणार्थेन चकारेण । पश्यति त्वाचार्योऽन्यत्रेड्विधिर्बलवानिति प्रथमतस्तस्मिन्कृते झलादित्वाभावात्कित्वं नास्तीत्युकोऽनुकर्षणं करोति ॥ ८२ ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम् ॥ ८३ ॥

तेन " गापोष्टक् " (३।२।८) इत्यलुग्विकरणस्यैव पिबतेर्ग्रहणम् । न तु लुग्विकरणस्य पातेः । सत्सूद्विषादि--(३।२।६१) सूत्रे विदिग्रहणे एषा न प्रवर्तते । "नुदविद०" (८।२।५६) इत्यकारान्तस्योपादानाद् गणे येऽकारान्ता विदधातवो विद ज्ञाने विद विचारणे विद सत्तायामिति ते सर्वे गृह्यन्ते ॥

अस्याश्चास्तित्वे " स्वरतिसूतिसूयति० " (७।२।४४) इत्यत्र सूतिसूयत्योर्विकरणनिर्देशो ज्ञापकः । तत्र ह्युक्तम् । सूङिति सामान्यनिर्देशोऽस्तु तत एवादादिकदैवादिकयोर्ग्रहणं भविष्यति । न सू प्रेरणे इत्यस्य । तत्किं विकरणनिर्देशेन, एवं तर्हि ज्ञापयत्यस्तीयं परिभाषा । सूङ्ग्रहणे लुग्विकरणपरिभाषया दैवादिकस्यैव ग्रहणं स्यात् नादादिकस्य, विकरणेनोभयोर्निर्देशः क्रियमाणोऽस्या ज्ञापको भवति । ननु च सूतिरिति श्तिपा निर्देशः क्वचित् श्तिपि पित्कार्यं न भवतीति ज्ञापनार्थः । तेन श्तिपोऽपित्त्वान् ङित्वेन "सूति०" (७।२।४४) इत्यत्र " क्ङिति च " (१।१।५) इति गुणप्रतिषेधः सिध्यति । तथा " मन्यकर्मण्यनादरे विभाषा० " (२।३।१२) इत्यत्र मनुतेर्ग्रहणं मा भूदित्यत्र मनुतेरिति गुणाभावेन सिध्यति । उच्यते । सूतिसूयतीति विकरणनिर्देशः पित्त्वाभावं बोधयन्नेव परिभाषास्तित्वं ज्ञापयति, अन्यथा यदि विकरणनिर्देशस्य पित्त्वाभावज्ञापनमेव केवलं प्रयोजनं स्यात्तदा सूतीति निर्देशं कृत्वा सूङ्ग्रहणमेव कृतं स्यात् ' स्वरतिसूतिसूङ्धूञूदितो वा' इति । अत्रापि सूतिसूङोरुपादानं पित्त्वाभावज्ञापनार्थं भविष्यति । अत्र तु लुग्विकरणालुग्विकरणयोर्लुग्विकरणस्यैव ग्रहणमिति विपरीतोऽर्थो न ज्ञाप्यते । 'न ह्यनिष्टार्था शास्त्रे प्रक्लृप्तिर्युज्यते' इति वचनात् । " वेत्तेर्विभाषा " (७।१।७) इत्यत्र वेत्तेरिति श्तिपा निर्देशाच्च । तस्य द्योतत्प्रयोजनम् । लुग्विकरणपरिभाषया रौधादिकस्य विद विचारणे इत्यस्य ग्रहणं मा

१ A उपायस्यानुपायते । पालम्भेन रूपायगौरवं. २ B स्तॄपतीत्यत्र. ३ A B विद्ग्रहणे. ४ A B गुणाभावेन. ५ A ततः कुर्यात् for कृतं स्यात्.

भूदिति । यदि च लुग्विकरणालुग्विकरणयोर्लुग्विकरणस्यैव ग्रहणमिति स्यात्तदा विद इत्यपि कृते विद ज्ञान इत्यस्यैव ग्रहणं भविष्यति किं श्तिपा निर्देशेन । न च यङ्लुग्निवृत्त्यर्थमिति वाच्यम् । " शीङो रुट् " (७।१।६) इत्यत्र शीङोऽयङ्लुग्ग्रहणेन साहचर्याद्यङ्लुग्ग्रहणाभावसिद्धेः ॥ ८३ ॥

वर्त्स्यत्प्रवृत्त्येह कार्याणि क्रियन्ते ॥ ८४ ॥

भविष्यन्तीं प्रवृत्तिमाश्रित्य कार्याणि क्रियन्ते इत्यर्थः । यथा " शदेः शितः " (१।३।६०) इत्यनेन भाविना शित्त्वेन शीयत इत्यत्रात्मनेपदम् । तथा निन्यतुर्निन्युरित्यत्र भविष्यदनेकाच्त्वेन द्विर्वचनात् प्रागेव " एरनेकाचोऽसंयोगपूर्वस्य " (६।४।८२) इति यणादेशः । अन्यथेयङ् स्यात् ॥

ज्ञापकं चात्र " वस्वेकाजाद्घसाम् " (७।२।६७) इत्येकाज्ग्रहणम् । तद्धि क्विटि द्विर्वचनस्यावश्यकत्वान्न कश्चिदेकाजस्तीति भविष्यदभ्यासलोपप्रवृत्तेरुत्तरकालं भावी य एकाच् तदर्थं कृतम् । तदर्थता च तदा स्याद्यदि वर्त्स्यत्प्रवृत्त्येह कार्याणि स्युः । ननु द्विर्वचनात्प्राग्यो धातुरेकाच् तदर्थमेकाज्ग्रहणं स्यात् । तस्कमनुक्तार्थस्य ज्ञापकम् । उच्यते । द्विर्वचनात्प्राक् सर्वे धातव एकाच एवेत्येकाज्ग्रहणमनर्थकं स्यात् । नैतत् । स्वादौ चिरिजिरी पठ्येते प्रत्ययान्ताश्च येऽनेकाचो धातवस्तन्निवृत्त्यर्थत्वात् । असदेतत् । ' कास्यनेकाच इति वक्तव्यम् ' इत्यनेकाज्भ्यो नित्यमाम्विधानात् । जागर्तेर्व्यावृत्त्यर्थं तर्हि स्यात् । जागर्तेर्हि " उषविदजागृभ्योऽन्यतरस्याम् " (३।१।३८) इति विकल्पेनाम्विधानात् । उच्यते । यद्येतदर्थमेकाज्ग्रहणं स्यात्तदैकाज्ग्रहणमपनीय 'न जागुः' इत्येवं ब्रूयात्। अयं चार्थः । जागर्तेर्वसोरिण् न भवति । ननूर्णोतिरपि व्यावर्त्योऽस्ति । नैतत्। 'वाच्य ऊर्णोर्णुवद्भावः'(महाभाष्य ३।१।३६)इति णुवद्भावातिदेशेनोर्णोतेरेकाच्कार्येण भाव्यमेवेति ज्ञापकमेव न । द्विर्वचने कृते यदैकाच्त्वं भवति तदैव तदर्थत्वात् । युक्तं चैतत् । अन्यथा घसिग्रहणमनर्थकं स्यात् । " घसिभसोर्हलि च " (६।४।१००) इति लोपात्प्राक् परत्वादेकाच इत्यनेनैवात्रेडागमेन भवितव्यम् । तत्र हि कृते "गमहनजनखनघसाम्०" (६।४।९८) इत्युपधालोपस्य "द्विर्वचनेऽचि" (१।१।५९) इति स्थानिवद्भावात्सिद्धं जक्षिवानिति । उच्यते । ज्ञापकवादिनोऽयमभिप्रायः । एकाज्ग्रहणात्तावत्कृतद्विर्वचनानामिटा भवितव्यम् । स चेद् द्विर्वचनात्प्राग् यदि क्रियते तदा परत्वन्यायो न लङ्घितो भवति । तथा च "वस्वेकाजात्०" (७।२।६७) इति सूत्रे रक्षितः, द्विर्वचनोत्पत्तेः प्रागेव परत्वादिडागम इति । घसिग्रहणं तु प्रत्याख्यायत एवेति । अथ वा " अन उपधालोपिनोऽन्यतरस्याम " (७।१।२८) इति भविष्यदुपधालोपिनो ङीब्विधानं ज्ञापकम् । अन्यथा सति ङीप्युपधालोपः सत्युपधालोपे च ङीबित्यसङ्गतिः स्यात् ॥

---

१ A विकरणयोरलुग्विकरणस्यैव० २ A ग्रहणाभावसिद्धिः. ३ A द्विर्वचनस्याम्भावान्; B द्विर्वचनस्यावश्यंभावान्. ४ A om. एवेति. B om. एकाचः ५ A ननूर्णोतिरपि. ६ P व्यावृत्त्योऽस्ति. ७ A कृतद्विर्वचनानामिति. ८ A स चेद्. ९ A om. न.

अथ वर्त्स्यत्प्रवृत्त्येति कथम् । यावता "संयोगे गुरु" (१।४।११) इति गुरुसंज्ञाबाधनाल्लघूपधगुणो न प्राप्नोति । उच्यते । विहितविशेषणस्वीकारे लघूपधाद्विहितं यत्सार्वधातुकमार्द्धधातुकं वा तस्मिन् गुण इत्यदोषः । न चैवं कुण्डितेत्यत्र गुणप्रसङ्गः । धातुग्रहणेन धातूपदेश एव नुम्प्रवृत्तेः । विहितविशेषणेन तर्हि रुणद्धीत्यत्रापि गुणः स्यात् । एवं तर्हि "नाभ्यस्तस्याचि पिति सार्वधातुके" (७।३।८७) इत्यत्राज्ग्रहणात्संयोगे गुणो भविष्यति । अन्यथा हि नेनेक्तीत्यत्र गुणभावार्थमचांत्यनर्थकं स्यात् । नैवम् । अनेनेगित्यत्र गुणप्रतिषेधाभावार्थत्वादज्ग्रहणस्य । एवं तर्हि प्रकृतिप्रत्यययोर्हलोरानन्तर्ये गुरुसंज्ञा न भवति । "त्रसिगृधिधृषिक्षिपेः क्नुः" (३।२।१४०) इति क्नोः कित्करणात् । "हलन्ताच्च" (१।२।१०) इति लघूपधगुणप्रतिषेधार्थं कित्वाच्च । तदुक्तम्

"क्नुसनोर्थत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे" इति

यद्येवं "दृढः स्थूलबलयोः" (७।२।२०) इत्यत्र तर्हि न्यासे यदुक्तं तदसंगतम् । तत्र ह्युक्तम् । किमर्थं हकारलोपो निपात्यते । यावता "हो ढः" (८।२।७) इति ढत्वे कृते "ढो ढे लोपः" (८।३।१३) इत्येवं सिद्धं दृढ इति । सत्यं सिध्यति । द्रढीयानित्यत्र तु रेफादेशो न सिध्यति । "र ऋतो हलादेर्लघोः" (७।२।७) इति कर्तव्ये ढलोपस्यासिद्धत्वाद् गुरुसंज्ञया लघुसंज्ञाबाधनात् । उच्यते । एवं मन्यते । गुण एव कर्तव्ये गुरुसंज्ञा न प्रवर्त्तते । अतो रेफादेशे कर्तव्ये स्यादेव गुरुसंज्ञा । तथा च क्लृप्तशिख इत्यत्र "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" (७।२।७) इति गुरुत्वात् प्लुतो भवत्येव । एतच्चायुक्तम् । "अतो हलादेर्लघोः" (७।२।७) इत्यत्र प्रत्युदाहृतमिटीत्येवापाक्षीदिति । तस्य द्व्यङ्गवैकल्यात् । तथाहि । यथा सिजिडादिर्न भवति तथा लघुरकारोऽपि । संयोगगुरुत्वेन लघुत्वस्य बाधनात् । तर्ह्येवं मन्यते द्रढीयानित्यत्र ज्ञापकसिद्धं न सर्वत्रेति लघुसंज्ञया न भवितव्यम् । तथा क्लृप्तशिख इत्यत्रापि गुरुसंज्ञैव भवति । अथ वा यत्र प्रत्यये प्रकृतिहला संयोगस्तस्मिन्नेव प्रत्यये यदि लघुसंज्ञाकार्यप्राप्तिस्तदैव क्नुसनोः कित्वाज् ज्ञापकाद् गुरुसंज्ञा न भवति । ज्ञापकस्य तुल्यत्वात् । तथाहि । भेत्तेत्यादौ तृचि गुणप्राप्तिः । अपाक्षीदित्यत्रापि सिचि वृद्धिप्राप्तिः । परस्मैपदग्रहणं तु सिचो विशेषणम् । द्रढयति द्रढीयानित्यत्र तु णावीयसुनि च रेफादेशो न तु के । क्लृप्तशिख इत्यत्रापि न क्ताश्रयः प्लुतः अपि तु प्रकृतिप्रत्ययसंयोगाश्रयः, अतोऽत्र गुरुसंज्ञैवेति । अन्यस्त्वाह । क्नोः कित्वाद्गुरुत्वेन लघुत्वं न बाध्यते । अपि तूभयसंज्ञासमावेशः क्रियते । तेन भेत्तेत्यादौ सत्यपि गुरुत्वे लघ्वाश्रयो भवत्येव गुणः । क्लृप्तशिख इत्यत्रापि गुरुसंज्ञाश्रयः प्लुतः । अपाक्षीदित्यत्रापि लघ्वाश्रया वृद्धिः स्यात् । "र ऋतो हलादेर्लघोः" (६।४।१६१) इत्यनेन तु कुम्भीधान्यन्यायेन लघुसंज्ञकस्यैव ऋकारस्य

---

१ A कुण्डिनेत्यत्र. २ A om. गुण. ३ A दृढीयान्. ४ Before प्रत्युदाहृतं A. ins. यत्.

रेफादेश इत्याशङ्कानिरासार्थं हकारलोपनिपातनं न्यासकृतोक्तम् । अयं भावः । अन्यथा हलोपस्यासिद्धत्वाद्गुरुसंज्ञकोऽयमृकारो न तु लघुसंज्ञक एवेति रेफादेशो न स्यात् ॥८४॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते ॥ ८५ ॥

अन्तरङ्गानपि नुमादीन् बाधित्वा बहिरङ्गो लुगेव प्रवर्तते । तेन गोमान् प्रियोऽस्य गोमत्प्रियः । गोमानिवाचरति गोमत्यते इत्यत्र सुपो लुकि कृते सर्वनामस्थानाभावान्नुम्न प्रवर्तते । प्रत्ययलक्षणं च नास्ति । "न लुमताङ्गस्य" (१।१।६३) इति निषेधात् ॥

इयं परिभाषा "प्रत्ययोत्तरपदयोश्च" (७।२।९८) इत्यत्र भाष्यकारेण ज्ञापिता । तत्र ह्युक्तम् । तवायं त्वदीयो ममायं मदीय इत्यादौ छप्रत्यये तव पुत्रस्त्वत्पुत्रो मम पुत्रो मत्पुत्रः इत्यादौ चोत्तरपदे विभक्त्याश्रयत्वात् "त्वमावेकवचने" (७।२।९७) इत्यनेनैव त्वमौ भविष्यतः । समासोत्तरकालभावी लुग् बहिरङ्गः स पश्चाद् भविष्यति ॥

न च निमित्तापायपरिभाषया त्वमावपि निवर्त्तेते । यतो बहिरङ्गस्य लुकोऽसिद्धत्वाद्विद्यत एव निमित्तिसिद्धौ पूर्वेण त्वमाविति किं "प्रत्ययोत्तरपदयोश्च" (७।२।९८) इत्यनेन । तदेतत्कृतं ज्ञापयति । अस्तीयं परिभाषेति । तेन त्वमौ बाधित्वा विभक्तिलुकि कृते विभक्त्यभावात्पूर्वेण त्वमौ न प्राप्नुत इति वचनमर्थवद्भवति । ननु त्वत्तरो मत्तर इति तरपि त्वमौ यथा स्यातामिति प्रत्ययग्रहणं स्यात् । प्रातिपदिकमात्रादेव तरबादयः स्वार्थिका विधीयन्ते न तु सुबन्तात् । समर्थाधिकारनिवृत्तेः । तथा च "समर्थानां प्रथमाद्वा" (४।१।८२) इत्यत्र व्याख्यातं स्वार्थिकप्रत्ययावधिश्चायमधिकार इति । उत्तरपदग्रहणमपि कर्त्तव्यम् । तव पुत्रस्त्वत्पुत्रस्तुभ्यं हितं त्वद्धितमित्यत्र "तवममौ ङसि"(७।२।९६) "तुभ्यमह्यौ ङयि" (७।२।९५) इति बाधित्वा त्वमौ यथा स्याताम । अन्यथा यथा तव तुभ्यमित्यत्र तवतुभ्यौ भवतस्तथात्रापि स्याताम् । "प्रत्ययोत्तरपदयोश्च" (७।२।९८) इति सूत्रे तु कृते तयोरपवादौ त्वमावेव क्रियेते इति कथं ज्ञापकम् । उच्यते । आद्यस्तावददोषः । यतः स्वार्थिका अपि निवृत्तेऽपि समर्थाधिकारेऽन्तरङ्गत्वात् सुपि कृते सुबन्तादेव भवन्तीति व्यवस्थितम् ; तथा च "कुत्सिते" (५।३।७४) इत्यत्र सूत्रे भाष्यम् ।

स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम् ।
समवेतस्य च वचनं लिङ्गं संख्यां विभक्तिं च ॥ १ ॥
अभिधाय तान् विशेषान् अपेक्षमाणश्च कृत्स्नमात्मानम् ।
प्रियकुत्सनादिषु पुनः प्रवर्ततेऽसौ विभक्त्यन्तः ॥ २ ॥

इति । तस्मात्सुबन्तस्यैव प्रियकुत्सनादयोऽर्था विशेषणमिति सुबन्तादेव तरबादय इति युक्तमुक्तं प्रत्ययग्रहणं ज्ञापकमिति ॥

---

१ A विभक्त्याश्रयत्वमावेकवचनेनैव. २ A एव निमित्ति, सिद्धौ. ३ A त्वतरो मतरः. ४ A व्याख्या for व्याख्यातं. ५ A om उच्यते.

ये तु मन्यन्ते ' तरबादिप्रकृतेस्तरबादिविधौ ङ्याप्प्रातिपदिकस्यैव स्वभावतः पुरुषाद्यथावृत्तित्वमित्यनवकाशत्वात् सुपं बाधित्वा प्रातिपदिकादेव तरबादिभिर्भवितव्यमिति ' तन्मते नैव तरबादिविधौ ङ्याप्प्रातिपदिकात् इत्यनुवर्तते इति वृत्तावुक्तम् । तथा "स्वादिष्वसर्वनामस्थाने " (१-४-१७) इत्यत्र राजतरो राजतमः इत्युदाहृतम् । तन्मते प्रत्ययग्रहणं न ज्ञापकमित्याहुः । उत्तरपदग्रहणमेव ज्ञापकम् । द्वितीयोऽप्यदोषः । तथाहि । यदि[1] तवतुभ्यादेशं बाधित्वा प्रत्ययोत्तरपदयोश्चेत्यनेन भवितव्यं तदोत्सर्गसमानत्वादपवादानां मपर्यन्तस्यैव तौ भविष्यतो न सर्वस्येति किं मपर्यन्तस्येत्यनुकर्षणार्थेन चकारेणेति तवतुभ्यादेशबाधनया भवितव्यम् । तदा चकारेण मपर्यन्तस्येत्यनुकर्षणं यत्कृतं तदनर्थकं स्यात् । तस्यैतत्प्रयोजनं सर्वादेशार्थत्वे तु सर्वादेशः स्यात् । अतस्तन्निरासार्थं चकारेण मपर्यन्तस्येत्यनुकर्षणमुपपद्यते ॥ ८५ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ सिचिपादो नाम सप्तमाध्यायस्य द्वितीयः पादः ॥

सत्यपि सम्भवे बाधनं भवति ॥ ८६ ॥

क्वचिदिति शेषः । तेन वर्त्तमानक्तेन भूतक्तस्य बाधा, तथा णिनिनिपतीत्यत्र द्वितीयद्विर्वचनेन प्रथमद्विर्वचनस्य, तथा त्वाष्ट्रो जागतः इत्यत्राद्यज्वृद्ध्या " अचो ञ्णिति " (७।२।११५) इत्यस्य " अत उपधायाः " (७।२।११६) इत्यस्य च बाधनम् ॥

लौकिक एवायं न्यायः । यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति । ज्ञापकं चात्रानुशतिकादिषु पुष्करसच्छब्दपाठः । अन्यथा हि भिन्नविषयत्वादाद्यज्वृद्ध्योपधावृद्धिर्न बाधितव्येति सिद्धं पौष्करसादिरित्यनर्थः पाठो भवेत् । ननु पुष्करसदा जितमित्यत्रार्थे " तेन दीव्यति खनति० " (४।४।२) इति ठकि कृते पौष्करसादिक इत्यत्र ठकि वृद्ध्यर्थः पाठः स्यात् किति ह्युपधावृद्धिर्नास्ति ञ्णिति तद्विधानात् । उच्यते । ठगेवात्र नास्ति अनभिधानात् । केचित्तु " विभाषा सुपो बहुच् पुरस्तात्तु " (५।३।६८) इत्यत्र विभाषाग्रहणं ज्ञापकमाहुः । तन्न । यतो विभाषाग्रहणं कल्पबादीनां पक्षे विधानार्थं वृत्तौ व्याख्यातम् । अन्यथा ह्यसति विभाषाग्रहणे नित्यमेव बहुचि सति कल्पबादयो न स्युः । न च वाच्यं पूर्वदेशे[4] बहुच् परदेशे कल्पबादयो भविष्यन्तीति । यतो बहुचि कृते तेनैवेषदसमाप्त्यर्थस्य द्योतितत्वादभिहितेऽभिधानं नास्ति किं पुनर्द्योतिते द्योतनमिति कल्पबादयो न प्राप्नुवन्त्येव । एतच्च तत्र न्यासकृता व्याख्यातम् । न ह्यवश्यं देशकृत एव सामान्यविशेषयोर्विरोधो भवति । किं त्वर्थकृतोऽपि । बहुचः कल्पबादिभिः समानोऽर्थ इति बहुचा द्योतितत्वादभिहिते पुनरभिधानं नास्ति । किं पुनर्द्योतिते पुनर्द्योतनमिति तस्यार्थेत्यादिना ग्रन्थेनेति ॥ ८६ ॥

---

१ The text here, from यदि तवतुभ्यादेशं upto उपपद्यते in A, is full of mistakes and omissions. २ A बाधनं भवति. ३ A शब्दस्य पाठः. ४ A सर्वदेशे for पूर्वदेशे. ५ A om. नास्ति...व्याख्यातम्.

पर्जन्यवदिह लक्षणप्रवृत्तिः ॥ ८७ ॥

इह पर्जन्यवत् मेघवल्लक्षणं प्रवर्त्तते । तदुक्तम् । कृतकारि खल्विदं शास्त्रं मेघवन्नाकृतकारि दहनवद्, दहनो हि दग्धं न दहति । तेन खट्वाढकमित्यादौ दीर्घः सिध्यति । मेघो हि जलेऽपि वर्षति ॥

ज्ञापकं चात्र "प्रवाहणस्य ढे" (७।३।२८) इत्यनेन प्रवाहणस्यापत्यं प्रावाहणेयः[1] इति शुभ्रादित्वाड् ढकि उत्तरपदे[2]वृद्धिविधानम् । तत्र पूर्वपदस्य प्रशब्दस्य विभाषोत्तरपदस्य तु वाहनस्य दीर्घस्याप्याकारस्य नित्यं वृद्धिः ॥ ननु प्रवाहणेय इत्यत्रोत्तरपदवृद्धेः किं प्रयोजनम् । प्रवाहणेयी भार्या यस्य[3] प्रवाहणेयीभार्यः इत्यत्र "वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे" (६।३।३९) इति पुंवद्भावप्रतिषेधः प्रयोजनमिति चेत् । न । "जातेश्च" (६।३।४१) इत्यनेनैव तत्सिद्धेः । जातित्वं चास्य गोत्रं च चरणैः सहेति । "जातेश्च" (६।३।४१) इत्यत्र स्वाङ्गाच्चेतोऽमानिनीत्यनुवृत्तेर्मानिनि पुंवद्भावनिषेधो नास्ति प्रवाहणेयमानिनी । ततश्चात्र न "वृद्धिनिमित्तस्य०" (६।३।३९) इति पुंवद्भावप्रतिषेधार्थं वृद्धिविधानमिदमिति । यद्येवं कथं तत्र तर्हि न्यासकृता व्याख्यातं "जातेश्च" (६।३।४१) इति पुंवद्भावप्रतिषेधे सिद्धे "वृद्धिनिमित्तस्य०" (६।३।३९) इति पुंवद्भावप्रतिषेधार्थं प्रवाहणस्य ढे इति वृद्धिविधानं "जातेश्च" (६।३।४१) इत्यस्यानित्यत्वं ज्ञापयति, तेन हास्तिकमित्यत्र "जातेश्च" (६।३।४१) इति पुंवद्भावप्रतिषेधो न भवतीति । उच्यते । व्यक्तौ तदा ज्ञापकं बोद्धव्यम्[4] ॥ ८७ ॥

गर्भवट्टाबादयो भवन्ति ॥ ८८ ॥

यथा मध्ये गर्भस्तथा टाबादयः स्त्रीप्रत्ययाः प्रातिपदिकस्वाद्योर्मध्ये भवन्ति । का के काः इति कादेशे कृते टाब्भवति । आदिग्रहणात् "अर्वणस्त्रसावनञः" (६।४।१२६) इति विभक्तौ त्रादेशे कृते "उगितश्च" (४।१।६) इति ङीप् अर्वन्त्यौ[5] अर्वत्यः इति केचिदाहुः । क्रोष्टुशब्दाद्विभक्तौ "स्त्रियां च" (७।१।९६) इति तृज्वद्भावे क्रोष्ट्रीभ्यां क्रोष्ट्रीभिरित्यन्ये ॥

ज्ञापकं चात्र "न यासयोः" (७।३।४५) इतीत्त्वप्रतिषेधार्थं वचनम् । यदि गर्भवट्टाबादयो न स्युस्तदा विभक्तौ त्यदाद्यत्वे कृते गर्भवट्टापोऽभावात् यका सकेति न स्यात् । एवं च "प्रत्ययस्थात्[6]" (७।३।४४) इतीत्त्वप्राप्तेरभावात् "न यासयोः" (७।३।४५) इत्यनर्थकं स्यात् । श्रीपुरुषोत्तमदेवेन तु व्याख्यातम् । ज्ञापकं च न यासयोरितीत्त्वप्रतिषेधवचनम् । यदि न[7] गर्भवट्टाप् स्यात्तदा त्यदाद्यत्वे कृते सुपः परेण स्याद् । यका सकेत्यत्र "प्रत्ययस्थात०" (७।३।४४) इतीत्त्वप्राप्तिरेव नास्ति सुपः परत्वादापः । तत्किं प्रतिषेधेनेति ॥ ८८ ॥

---

१ A प्रवाहणेयः २ A पदादि for पद. ३ P om. प्रवाहणेयी भार्या यस्य. ४ A बोध्यम् for बोद्धव्यम्. ५ A अर्वन्त्यौ अर्वन्त्यः. ६ A प्रत्ययस्थादिना ७ A om. न.

विधौ परिभाषोपतिष्ठते नानुवादे ॥ ८९ ॥

तेन " क्ङिति च " (१।१।५) इत्यत्र क्ङितीत्यस्य गुणवृद्धिभ्यां संबन्धात् " तस्मिन्निति निर्दिष्टे० " (१।१।६६) इति परिभाषा नोपतिष्ठते । तेन क्ङिन्निमित्ते प्रत्यये निषेधाद्भिन्नमित्यत्रापि निषेधः सिध्यति ॥

प्रधानाप्रधानन्यायलभ्योऽयमर्थः । ज्ञापकं चात्र "उदीचामातः स्थाने०" इत्यत्र स्थानप्रतिपत्त्यर्थं स्थानग्रहणम् । अव्यापिका चेयं " संख्याव्ययादेः" (४।१।२६) इत्यत्रादिग्रहणात् । अन्यथा संख्याव्ययाभ्यामित्येवोच्येत । अयं चार्थः संख्याव्ययाभ्यामुत्तरो य ऊधःशब्दस्तदन्ताद्बहुव्रीहेर्ङीषिति । नन्वेवं संख्याव्ययाभ्यामुत्तर ऊधःशब्दान्तो यो बहुव्रीहिरिति स्यात्तथेहैव स्यात् । पञ्चघटोध्न्यः । पञ्चघटोध्नीति । भवति ह्यत्र संख्याव्ययाभ्यामुत्तर ऊधःशब्दान्तो बहुव्रीहिः । उच्यते । प्रत्यासत्त्योधःशब्द एव संख्याव्ययोर्विशेष्यो न बहुव्रीहिः । तथाहि । संख्याव्ययाभ्यामित्यत्रोधश्शब्द एव प्रत्यासन्नो नेतरः । नन्वेवमपि त्रिपदे बहुव्रीहौ न प्राप्नोति तदर्थं यत्न आस्थेयः ॥ ८९ ॥

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणं भवति ॥ ९० ॥

तेन " हेरचङि " (७।३।५६) इति हिनोतेर्ण्यन्तादपि सनि कृते जिघापयिषतीति कुत्वं भवति । अभिषावयति परिषावयतीत्यत्र तु सुनोतिमेव प्रति क्रियायोगो न तु सावयतिं प्रतीति " उपसर्गात्सुनोति० " (८।३।६५) इति षत्वमिति वृत्तावुक्तं न त्वनया परिभाषयेति ॥

ज्ञापकं चात्र " हेरचङि " (७।३।५६) इति प्रतिषेधः । यदि प्रकृतिग्रहणे ण्यधिकस्य ग्रहणं न स्यात् तदा केवलस्य हिनोतेरङ्गस्याभ्यासनिमित्तप्रत्यये कुत्वमुच्यमानं, कः प्रसङ्गो ण्यधिके स्यात् यदर्थमचङीति प्रतिषेधः क्रियत इति ॥ अव्यापिका चेयम् । न भादि (८।४।३४) सूत्रे ण्यन्तानां भादीनामुपसंख्यानमिति वचनात् । तेनार्ह (३।२।१२) इत्यत्र ण्यन्तस्यार्हतेर्ग्रहणं न भवतीति रक्षितेनोक्तम् ॥ ९० ॥

अङ्गवृत्तेः पुनरङ्गवृत्तावविधिर्निष्ठितस्य ॥ ९१ ॥

अङ्गकार्यस्य वृत्तिः प्रवृत्तिरङ्गवृत्तिस्ततो हेतोर्निष्ठितस्य प्रयोगार्हस्याङ्गस्य पुनरङ्गकार्यप्रवृत्तावविधिरविधानं भवति । अङ्गवृत्ताविति सप्तमी षष्ठ्यर्थे । पुनरङ्गकार्यवृत्तेरविधिरविधानमनिष्पत्तिरित्यर्थः ॥ तेन पिबतीत्यत्र पिबादेशे कृते लघूपधगुणो न भवति ॥

इयं च परिभाषा भाष्ये " ज्ञाजनोर्जा " (७।३।७९) इत्यत्र " ज्यादादीयसः " (६।४।१६०) इत्यत्र च ज्ञापिता । तथा हि । पूर्वत्रोक्तम् । किमर्थं जाभावो विधीयते न जभाव एव विधीयताम् । तत्रापि " अतो दीर्घो यञि " (७।३।१०१) इत्यनेन सिध्यत्येव जायत इति । उत्तरत्राप्युक्तं ज्यात्परस्येयसः प्रत्ययस्याऽऽत्वं किमर्थं

१ A om. न्याय. २ A सुनोतिमेव क्रियायोगो. ३ A विधीयमानं for उच्यमानम्. ४ A om. प्रवृत्तिः ५ A सप्तम्यर्थः

लुप्यते न प्रकृतो लोप एव विधीयताम् । तस्मिन्नपि कृते " अकृत्सार्वधातुकयो० :" (७।४।२५) इत्यनेन ज्यायानिति सिध्यत्येव । तस्मात्पूर्वत्र जाभाव इतरत्र खाकार-विधानमुभयमपि ज्ञापकमस्तीयं परिभाषेति । न्यासकारः पुनराह । प्रतिपत्तिलाघवार्थं दीर्घान्तादेशविधानम् । ह्रस्वेऽपि हि कृते " अतो दीर्घो यञि " (७।३।१०१) इत्येवं जानातीति सिध्यति ॥ ननु चाङ्गवृत्तपरिभाषया न प्राप्नोति । नैतत् । निष्ठि-तस्येलुप्यते । न हि ज इत्यादेशे कृते निष्ठितमङ्गं भवति । अप्रयोगार्हत्वात् । "ज्यादा-दीयसः" (६।४।१६०) इत्यस्य ज्ञापकत्वमुक्तम् " अकृत्सार्वधातुकयोः०" (७।४। २५) इत्यत्र क्ङिद्ग्रहणाननुवृत्त्या । अननुवृत्तिश्चोरुयेत्यादौ छान्दसत्वाद्दीर्घाभाव-सिद्धेः ॥ ९१ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ देविकापादो नाम सप्तमाध्यायस्य तृतीयः पादः ॥

पूर्वत्रासिद्धीये न स्थानिवत् ॥ ९२ ॥

तेन पापक्रियायष्टिरित्यत्र पूर्वत्रासिद्धाधिकारीये कुत्वे षत्वे च कर्त्तव्येऽतो लोप-स्यास्थानिवत्त्वाज्झलादौ कुत्वं षत्वं च सिध्यति । ननु पापक्रियायष्टिरित्यत्र "यङोचि च" (२।४।७४) इति यञ्झल्समुदायस्य लोपे कृते हलचोरादेशो न स्थानिवदिति सिद्धम् । नैतद् । " अतो लोपः " (६।४।४८) इत्यकारलोपे कृते " यङोऽचि च " (२।४।७४) इति यकारमात्रमेव लुप्यते । कुत एतत् । "न पदान्तादि–" (१।१।४) सूत्रे यायावर इत्यत्र स्थानिवद्भावप्रतिषेधार्थाद्वरेग्रहणात् । समुदायलोपे हि स्थानिवत्त्वप्राप्त्य-भावाद्वरेस्थानिवत्त्वप्रतिषेधोऽनर्थकः स्यात् । यथैवं "न धातुलोप आर्धधातुके" (१।१। ४) इत्यनर्थकम् । यङोऽकारस्य स्थानिवत्त्वेन लोलुवः पोपुवः इत्यादेः सिद्धत्वात् । एवं तर्हि " न धातुलोप– " (१।१।४) सूत्रसामर्थ्यादचि प्रत्यये लोपः समु-दायस्यैव क्रियते इति ज्ञाप्यते । अन्यत्र तु प्रत्येकम् । तेन सनीस्रंसः इत्यादि सिध्यति । तथा सनीस्रंसको दैनीध्वंसक इति । यथैवं " निष्ठा शीङ्० " (१।२।१९) इत्यत्र न्यासकृतोक्तं शीङो ङित्करणस्य प्रयोजनं यङ्लुकि कित्वप्रतिषेधो मा भूच्छेशियतः शेशियतवानिति तदसंगतम् । निष्ठायाः सत्यप्यकित्त्वे यङोऽकारस्य स्थानिवत्त्वेन गुणा-प्रसङ्गात् । एवं तर्ह्यार्धधातुक इत्यस्य विषयसप्तमीत्वमाश्रित्य तत्र व्याख्यातम् । यदि वाचि लोपः समस्तस्यैवान्यत्र तु नियमो नास्तीति वाक्यार्थः । तेन प्रत्येकं समुदायस्यापि लोपः । अतो यदा समुदायलोपस्तदा शेशियतः इत्यत्राकित्त्वप्रतिषेधार्थं ङित्करणमिति न्यासकारस्याभिप्रायः ॥

१ A अकार for आकार. २ A नैवम् । अकारमात्रमेव लुप्यते. ३ A धनीध्वंसकः. ४ गुणप्रसङ्गात्.

इयं च परिभाषा “ नाग्लोपिशास्वृदिताम् ” (७।४।२) इत्यत्र भाष्ये ज्ञापिता । तत्र ह्युक्तम् । अचकयदित्यादावजादेशस्य स्थानिवत्त्वादेव णौ ह्रस्वो न भविष्यति, कि[1]मग्लोपिनां नेति प्रतिषेधेन । तत उक्तं यत्र स्थानिवद्भावो नास्ति तदर्थमत्यरराजदिति । न ह्यत्र टिलोपोऽजादेशः किं तर्हि हलचोरादेश इति । ततः पुनरुक्तम् । न तर्ह्यग्लोपिनां नेदि प्रतिषेधोऽत्र प्राप्नोति । न ह्यत्रागेव लुप्यते । किं तर्ह्यन्योऽपि । अथ योऽत्राग्लुप्यते तदाश्रयो निषेधः । एवं तर्हि ‘ योऽज् लुप्यते तदाश्रयः स्थानिवद्भावोऽपि भविष्यति ’ इत्युक्त्वोपसंहृतम् । एवं तर्हि यदग्लोपिनां नेति प्रतिषेधं शास्ति ततो ज्ञापयत्याचार्यः इत आरभ्येतरत्र स्थानिवद्भावो न भवतीति । तेन पूर्वत्रासिद्धीये न स्थानिवादिति वक्तव्यं न भवतीति ॥

अन्ये त्वाहुः । हलचोरादेशो न स्थानिवादिति । अत एव “ नाग्लोपिशास्वृदिताम् ” (७।४।२) इत्यत्र रक्षितेनोक्तम् । हलचोरादेशो न स्थानिवदिति । यदि हि स्यात्तदा स्थू[2]लादीनां यणादिलोपेऽवादेशो वक्तव्यः स्यात् । स्थवीयानिति । अन्ये च बहवो दोषा उक्ताः । तस्माद्धलचोरादेशो न स्थानिवदिति । इह पुन[3]रग्लोपिग्रहणसामर्थ्यात् समुदायलोपेऽप्यग्लोपीत्याश्रीयते । केवलाग्लोपे प्रतिषेधस्यानर्थक्यादिति भाष्यटीकायां (महाभाष्यप्रदीप ७।४।२) निरूपितम् । ननु स्थवीयानित्यादाववादेशो वक्तव्यः स्यादिति कथमुच्यते । यावताकारस्य स्थानिवत्त्वादवादेशः स्यादेव । उच्यते । हलचोरादेशो न स्थानिवदित्यस्मिन्नसति समुदायस्य स्थानिवत्त्वादवादेशो न स्यात् । नै[4]तत् । अचः स्थानिवत्त्वमुच्यते न समुदायस्य । उच्यते । यथात्र यो ह्युभयोः स्थाने सम्पद्यत इति वचनाद्[5]झलादेशस्याप्यजादेशव्यपदेशस्तथानजादेशव्यपदेशोऽप्यस्ति । तदेवं यदानज्व्यपदेशस्तदावादेशो वक्तव्यः स्यादित्युक्तम् । यदेतदुक्तमिहाग्लोपिग्रहणसामर्थ्यात्समुदायलोपेऽप्यग्लोपीत्याश्रीयते । केवलाग्लोपे प्रतिषेधस्यानर्थकत्वादिति । एतच्चाग्लोपे सामान्यज्ञापकम् । तेन दृषदमाख्यददृषदित्यत्रागनग्लोपेऽप्यनग्लोप इति प्रतिषेधात् “ दीर्घो लघोः ” (७ । ४ । ९४) इति न भवति । अन्यथागनग्लोपेऽग्लोपव्यपदेशो न स्यात् । अचकथदित्यत्र केवलाग्लोपेऽग्लोपप्रतिषेधस्य चरितार्थत्वात् । न चेदं स्थानिवद्भावेन सिध्यति दीर्घविधौ तन्निषेधात् ॥

अनित्या चेयम् । “न पदान्तादि–” (१।१।५८) सूत्रे द्विर्वचनग्रहणात् । तेन वेतस्वानित्यत्राकारलोपस्य स्थानिवत्त्वादसक[6]ारान्तपदं भवतीति रुत्वाभावः । तथा कुटादीत्यत्राकारस्य स्थानिवत्त्वाट्टकारस्यापदान्तत्वेन जश्त्वाभावः । नन्वेकादेशस्य पूर्वग्रहणेन टकारस्य पदान्तत्वं नास्ति । उच्यते । परग्रहणं युक्तम् । यथा शक्येत विधिः

१ A अग्लोपिनेति. २ A स्थूलादीनां यणादिलोपो वा वक्तव्यः स्यात्. ३ A पुनरग्लोपि. ४ A नैवम् । ५ A अज्झलसमुदायस्याप्यनजादेशस्तथाजादेशोऽप्यस्ति । ६ A असकारान्तमपदं.

कर्तुमिति न्यायात् । सत्यम् । यत्र पराश्रितो विधिः । यथा वृक्षादित्यत्रासुपः परग्रहणात् सुप्त्वात्पदत्वम् । कुटादी[1]त्यत्र न परग्रहणाश्रितं जश्त्वम् । न हि जश्त्वमाकारमपेक्षते । यद्यपि जश्त्वस्याकारो निमित्तं न भवति तथापि परग्रहणे सति कुडिति टकारान्तं पदं भवतीति जश्त्वस्य परग्रहणमेव निमित्तम् । ननु सत्यपि परग्रहणे जश्त्वं नास्ति टकारस्यापदान्तत्वात् । अकारान्तं हि पदं ततः सुब्विधिः । उच्यते । परग्रहणे कृते एकदेशविकारद्वारेण टकारान्तं पदम् । नैतत् । अन्तादिवत्त्वे एकदेशविकाराभावात् । अन्यथा हि वृक्षमित्यत्राप्येकादेशस्य पूर्वग्रहणे मकारस्यैकदेशविकारद्वारेण सुप्त्वे "सुपि च" (७।३।१०२) इति दीर्घः स्यादेव । एवं चोभयत आश्रये नान्तादिवदिति व्यर्थं स्यात् । उच्यते । यत्र विधिरुभयमाश्रयति एकमन्तादिवत्त्वेनापरमेकदेशविकारद्वारेण तत्रैकदेशविकारास्वीकारो[1] यथा वृक्षमिति । कुटादीत्यत्र न जश्त्वं परमाकारमाश्रयतीति युक्तमेकदेशविकारिणष्टकारस्य पदान्तत्वमिति । ननु तथाप्यत्र पदान्तविधौ जश्त्वे कर्त्तव्ये पदान्तविधिं प्रति न[2] स्थानिवदिति स्थानिवत्त्वप्रतिषेधाज्जश्त्वेन भवितव्यमेव । उच्यते । सति स्थानिवत्त्वनिषेधे पदान्तत्वं, सति च पदान्तत्वे स्थानिवत्त्वनिषेध इतीतरेतराश्रयत्वम् । एवमपि "झलां जशोऽन्ते" (८।२।३९) इति जश्त्वमस्त्येव । न चास्ति स्थानिवत्त्वम् । जश्त्वविधिं प्रति न स्थानिवदिति तन्निषेधात्। उच्यते । रेफपादीये चर्सहचरिते "झलां जशोन्ते" (८।२।३९) इति जश्त्वे कर्त्तव्ये स्थानिवत्त्वप्रतिषेध इष्यते । तथा च धत्त्व सन्धिरित्युदाहरणम् । एतच्च "ठाजादावूर्ध्वं द्वितीयादचः" (५।३।८३) इत्यत्र षडिकप्रस्तावे रक्षितेनोक्तम् ॥ ९२ ॥

उपजातनिमित्तोऽप्युत्सर्ग उपजनिष्यमाणनिमित्तेनापवादेन बाध्यते ॥
परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते ॥ ९३ । ९४ ॥

तेन दधतीत्य[3]त्रोपजातनिमित्तोऽप्यन्तरङ्गो "झोऽन्तः" (७।१।८३) इत्यन्तादेशः उपजनिष्यमाणनिमित्तेन "अदभ्यस्तात्" (७।१।४) इत्यदादेशेन बाध्यते ॥ ज्ञापकं चात्र "शीङः सार्वधातुके गुणः" (७।४।२१) इत्यत्रैकारे विधातव्ये गुणग्रहणम् । तस्यैतत्प्रयोजनं गुणश्रुत्येक्परिभाषोपस्थानादिक एव स्थाने गुणो यथा स्यादिति । अन्यथा शेते इत्यत्र ङकारस्येत्संज्ञां बाधित्वैकारः स्यात् । तत्र यद्यन्तरङ्गस्तदा गुणग्रहणमनर्थकं ङकारे लुप्तेऽन्यथैवेकारस्यैकारादेशप्रसङ्गात् । अत एव शीङः सार्वधातुके गुण इत्यपनीय सार्वधातुकमपिदशीङ इति न कृतम् । न चैवमधिशय्येते इत्यत्र ङित्वप्रतिषेधात् "आतो ङितः" (७।२।८१) इतीयादेशो न स्यादिति वाच्यम् । यतोऽशीङ इतिपञ्चमीनिर्देशाच्छीङ उत्तरस्य प्रतिषेधेन भवितव्यम् । न चाशीङ्पर्युदासाच्च सादृश्येनाजन्तत्वाच्चाचो ङित्वेन भवितव्यम् । पर्युदासस्याग्रहणात् । अथवा न शीङ

[1] P विकारस्वीकारः [2] A om. न स्थानिवदिति । [3] A ददतीत्यत्र [4] A न चैवमपि शय्यते.

इति पृथगेव क्रियतामिति । तस्मात्परिभाषाद्वयस्य ज्ञापकमिति । उपजातनिमित्तोऽप्युत्सर्गः उपजनिष्यमाणनिमित्तेनापवादेन बाध्यते इत्यत्रार्थे "ऋच्छत्यृताम्" (७।४।११) इत्यत्र ऋकारप्रश्लेषो रक्षितेन ज्ञापक उक्तः । यद्येषा न स्यात् ऋ अतुसिति स्थिते इको रेफ-यणादेशे कृते स्थानिवद्भावाद् द्विर्वचने कृते " अत आदेः " (७।४।७०) इति दीर्घत्वेन सिद्धमारतुरारुरिति । अस्यां तु सत्यां यणादेशो नास्ति । द्विर्वचने कृते उपज-निष्यमाणनिमित्तेन सवर्णदीर्घत्वेन बाधितत्वात् । सवर्णदीर्घत्वे च कृते प्रकृतिग्रहणेन ग्रहणा-द्रतुरिति स्यात् । अभ्यासग्रहणपक्षे रेफलोपे " आतो लोप इटि च " (६।४।६४) इत्याकारलोपे चातुररिति स्यात् । ऋ गतावित्यस्य तु ग्रहणे गुणेनारतुरारुरिति सिध्यति । एतच्च ' वार्णादाङ्गं बलीयः ' (परि. ६६) इत्यस्याव्याश्रयत्वपक्षाश्रयणादुच्यते । यदि तु व्याश्रये वार्णादाङ्गं बलीयः इति स्यात् तदा सवर्णदीर्घत्वं बाधित्वोरदत्वादिकं स्यात् । अत एव " उश्च " (१।२।१२) इत्यत्र रक्षितेनोक्तम् । अथ वा ऋग्रहणं तत्र प्रत्याख्यातं यत इति ॥ ९३, ९४ ॥

णौ कृतं स्थानिवत् ॥ ९५ ॥

णौ परतो यद् वृद्ध्यादिकं कृतं तद् द्विर्वचने कर्त्तव्ये स्थानिवत्स्यात् । तेन शुशावयिषति जुहावयिषतीत्यत्राभ्यासस्योवर्णान्तत्वं सिद्धं भवति । अशूशवदित्यत्र तु वकारस्य संप्रसारणं णौ कृतमपि द्विर्वचने न स्थानिवद्भवति । अजादेशस्यैव णौ कृतस्य द्विर्वचने स्थानिवदित्यभ्युपगमात् । एतच्च " द्विर्वचनेऽचि " (१।१।५६) इत्यत्र भाष्ये उक्तम् ॥

ज्ञापकं चात्र " ओः पुयण्ज्यपरे " (७।४।८०) इत्यत्राभ्यासविशेषण-मोरिति पदम् । तेन हि पवर्गे यणि जकारे चाऽवर्णपरेऽभ्यासस्येत्वं विधीयते बिभाव-यिषतीत्यादिषु । यदि च णौ कृतं वृद्ध्यावादेशादिकार्यं स्थानिवन्न स्यात्कथमभ्यासस्योका-रस्येत्वं विधीयते । तुल्यजातीयत्वाज्ज्ञापकस्य । पराणां पुयण्जां सदृशा अन्येऽवर्णपरा एव स्थानिवत्त्वं भजन्ते । तेनाचिकीर्त्तदित्यत्र न स्थानिवदिति " उर्ऋत् " (७।४।७) इत्यत्र रक्षितः । एतत्तु न सम्यक् । " स्तौतिण्योरेव षण्यभ्यासात् " (८।३।६१) इत्यत्र सिषेधयिषतीत्युदाहरणे एकारपरेऽनया स्थानिवत्त्वं कृत्वा द्विर्वचनस्य प्रतिपादि-तत्वात् । तथौजढदित्यत्रानया स्थानिवत्त्वेन द्विर्वचनमुक्तमयुक्तं स्यात् । तथा " लोपः पिबतेरीच्चाभ्यासस्य " (७।४।४) इत्यत्रापीप्यदित्यत्र णौ कृतं स्थानिवद्भवतीति वृत्तिकृद्वचनं व्याहतं स्यात् । तस्मात्सामान्येन परिभाषा । ज्ञापकसिद्धं न सर्वत्रेत्याचि-कीर्त्तदित्यत्र व्यवस्था । अवश्यं चैतत् । अन्यथाऽधिजिगापयिषतीत्यत्र का गतिः ॥ अन्यस्त्वाह । अङ्गैकदेशाजादेशो णौ कृतं स्थानिवदिति । तेनाधिजिगापयिषतीत्यत्र स्था-निवत्त्वं न । तच्च " णौ च संश्चङोः (६।१।३१) इत्यत्र रक्षितेन व्याख्यातम् । एवमप्यचिकीर्त्तदित्यत्र दोष एव ॥ ९५ ॥

१ P उकारेत्वं. २ A सिषेचयतीत्युदाहरणे. ३ A om. न.

अभ्यासविकारेष्वपवादा नोत्सर्गान्विधीन्बाधन्ते ॥ ९६ ॥

अभ्यासविकारेष्वपवादत्वान्तरङ्गत्वपरत्वादिभिर्बाधका बाध्यान् विधीन्न बाधन्ते ॥ तेन मीमांसते इत्यत्र मान्बधादिना (३।१।६) दीर्घेण " सन्यतः " (७।४।७९) इतीत्वं न बाध्यते । तथाऽचिक्षणदित्यत्र सावकाशं " सन्यतः " (७।४।७९) इतीत्वमचीकरदित्यादौ " दीर्घो लघोः " (७।४।९४) इत्यनेन न बाध्यते ॥

ज्ञापकं चात्र " दीर्घोऽकितः " (७।४।८३) इत्यत्राकिद्ग्रहणम् । तद्धि यंयम्यत इत्यादौ दीर्घो मा भूदित्येवमर्थं क्रियते । यदि चाभ्यासविकारेष्वपि बाध्यबाधकभावः स्यात्तदा नुगागमे कृतेऽनजन्तत्वादेव दीर्घो न भविष्यति किमकिद्ग्रहणेन । तत् कृतमुक्तार्थस्य ज्ञापकमिति[3] ॥ ९६ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ णौपादो नाम
सप्तमाध्यायस्य चतुर्थः पादः ॥

इति सप्तमोऽध्यायः ॥

पूर्वत्रासिद्धीयमद्विर्वचने ॥ ९७ ॥

द्विर्वचने कर्त्तव्ये " पूर्वत्रासिद्धम् " (८।२।१) इति न प्रवर्त्तते । तेन द्रोग्धादोग्धा द्रोढाद्रोढेत्यत्र द्रुहेर्झलि घत्वढत्वयोः कृतयोः " सर्वस्य द्वे " (८।१।१) इति द्विर्वचनं भवति । अन्यथा " पूर्वत्रासिद्धम् " (८।२।१) इत्यासिद्धत्वाद् द्रोहृतेत्यस्य द्विर्वचनं स्यात् । ततो " वा द्रुहमुह० " इति घत्वविकल्पः । तत्रैतन्न लभ्यते 'यदा प्रकृतेर्घत्वं तदा द्विरुक्तस्यापि ' इति । ततश्च ढत्वमपि कदाचित्स्यात् । एवं च द्रोग्धाद्रोढेत्यनिष्टं स्यात् ॥ नन्वसिद्धपादं पठित्वा सर्वस्यद्वेपादः पठ्यतां ततोऽसिद्धत्वं न भविष्यति । नैतत् । एवं हि पठतिपठतितरामित्यत्र प्रकर्षप्रत्ययात्परत्वेन द्विर्वचनं न स्यात् । पूर्वत्रासिद्धीये नास्ति परत्वमभावादुत्तरस्येतिवचनाद् ग्रामस्त्वेक्षत इत्यत्र च "स्वामौ द्वितीयायाः" (८।१।२३) इत्यस्यासिद्धत्वादाद्गुणो न स्यात् ॥

---

१ A om. न. २ A om. न. ३ After ज्ञापकमिति A adds न चाभ्यासेन विधीयमानेनाभ्यासस्य योन् तस्य दीर्घत्वं ततश्च नुगागमे कृतेपि दीर्घप्राप्तिरस्त्येव तत् कुतो ज्ञापकम् । उच्यते । एवं तर्हि व्याख्यायमाने अचीकरदित्यादौ सन्यतः (७।४।७९) इतीत्वं बाधित्वा दीर्घो लघोः (७।४।९४) इति दीर्घः स्यात् ॥ ४ A om. न.

ज्ञापकं चात्र " सर्वस्य द्वे " (८।१।१) इत्यत्र सर्वस्येति वचनम् । तद्धि मत्वर्थीयाकारप्रत्ययान्तम् । तेनायमर्थः । सर्वकार्ययुक्तस्य द्विर्वचनं सर्वकार्यं कृत्वा द्विर्वचनं भवतीत्यर्थः । एवं च तदुपपद्यते यथाऽसिद्धत्वं न भवतीति ज्ञापकम् । ननु सर्वस्येति वचनं सर्वस्य द्विर्वचनार्थम् । अन्यथा " परेर्वर्जने " (८।१।५) इति द्विर्वचनमन्त्यस्य स्यात् । एतच्चायुक्तम् । द्वे विधीयेते तयोश्चानेकाल्त्वात्सर्वादेशः सिद्ध एव । सत्यम् । हलन्तेषु पर्यादिष्विकारस्यालोन्त्यस्य स्यात् । ननु द्वाविकारौ स्याताम् । ततश्चानेकाल्त्वायुक्तं सर्वादेशत्वम् । न च द्वाविकारौ कृतैकादेशावादेशत्वं प्रतिपद्येते इत्येकाल्त्वादादेशोऽन्त्यस्य स्यात् । न ह्यप्रवृत्तयोस्तयोरेकादेशशास्त्रप्रवृत्तिरस्ति । प्रवृत्तिकाले चानेकाल्त्वात्सर्वादेशत्वमिति नास्त्यन्त्यस्य विधिः ॥ स्यादेतत् । अचोऽर्द्धमात्रे तर्हि प्राप्नुतः परिशब्दस्यार्द्धमात्रे द्वे विधीयमानेऽल्ग्रहणेन चार्द्धमात्राया अग्रहणादनेकाल्त्वाभावेऽसति सर्वस्येति वचनेऽन्त्यस्य प्राप्नुतः इति । एतच्चातीवासम्यक् । अश्लिष्टस्यार्द्धमात्राद्वयस्योच्चारणायोग्यत्वादशक्य आदेशः कर्त्तुम् ॥ अन्यस्त्वाह । " सर्वस्य द्वे " (८।१।१) इत्यत्र सूत्रे कात्यायनवाक्यमिदं परिभाषारूपेण पठ्यते । 'पूर्वत्रासिद्धीयमद्विर्वचने' (व्या. महाभाष्य भाग ३, पृ. ३६४, पङ्क्ति ६) इति ॥ अनित्या चेयम् । उभौ साभ्यासस्य " (८।४।२१) इति वचनात् । तेन प्रणिनायेति सिध्यति ॥ ९७ ॥

इति परिभाषावृत्तौ सर्वस्यद्वेपादः ॥ १ ॥

अनित्यमागमशासनम् ॥ ९८ ॥

तेन 'शाकं पचानस्य'इत्यादौ[1] मुम्न भवति । 'सागरं तर्त्तुमिच्छति'इत्यत्रेड् न भवति॥ ज्ञापकं चात्र " आनि लोट् " (८।४।१८) इत्यत्रानीत्यागमसहितस्य नेर्ग्रहणं नित्ये ह्यागमशासने आट उपादानमकृत्वा " नि लोट् " इत्येवं कुर्यात् । तथा " युवोरनाकौ " (७।१।१) इत्यत्र न्यासे " घोर्लोपो लेटि वा " (७।३।७०) इति वाग्रहणेन ज्ञापिता। केचित्तु " स्तोः श्चुना श्चुः " (८।४।४) इत्यकृतनुमागमनिर्देशं ज्ञापकमाहुः। नन्वागमशासनमिति कथम् । यावता " अमि पूर्वः " (६।१।१०७) इत्येकादेशस्य परग्रहणेन ग्रहणादन्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपेन भवितव्यम् । उच्यते । " अचः परस्मिन्० " (१।१।५७) इति स्थानिवत्त्वान्न भविष्यति । न चात्र पदान्तविधिं प्रति न स्थानिवदित्यस्ति । इतरेतराश्रयत्वात् । सति स्थानिवत्त्वप्रतिषेधे पदान्तत्वं सति च पदान्तत्वे स्थानिवत्त्वप्रतिषेध इति । नन्वेवमपि 'पूर्वत्रासिद्धे न स्थानिवत्' (१।१।५८ वा. ३) इति स्थानिवत्त्वं न प्राप्नोति । उच्यते । 'उत्तरपदत्वे चापदादिविधौ०' (१।१।६३ वा. ६) इत्युत्तरस्य पदत्वे कर्त्तव्ये प्रत्ययलक्षणप्रतिषेधाच्छासनस्य पदत्वं नास्तीति कुतो नलोपः । यथैवं " षात्पदान्तात् " (८।४।३५) इत्यत्र वृत्तौ यद् व्याख्यातं पदेऽन्तः पदान्त इति सप्तमीसमासोऽयं तेनेह न भवति सुसर्पिष्केण सुयजुष्केणेति तदसङ्गतम् । तथाहि । यथा

---

१ A यथासिद्धत्वं. २ A पचानेत्यत्र.

द्रुसर्पिष्केणेत्यत्र कप्रत्ययेऽपदे परतः षकारान्तं तथैवापदान्तत्वं षान्तस्य । उच्यते । पदादिविधिशब्देन " सात्पदाद्योः " (८।३।१११) इत्यारभ्य ये विधयस्ते गृह्यन्ते । तेन "अपदादिविधौ" (१।१।६३ वा. ६) इतिवचनादुत्तरस्य पदत्वं भवत्येव । अत्र चार्थे "षात्पदान्तात्" (८।४।३५) इत्यत्र पदान्तग्रहणं ज्ञापकम् । तथा च "पदव्यवायेऽपि" (८।४।३८)इत्यत्र मैत्रेयः । अत्र च ज्ञापकम्। "षात्पदान्तात्"(८।४।३५) इत्यत्र पदेऽन्तः पदान्त इत्येवमर्थस्य पदान्तग्रहणस्योपादानम्। न हि तदन्यथा सम्भवतीति ॥ अत्रोच्यते। ननु यद्येवमर्थं पदान्तग्रहणं तदा तदकृत्वा षात्सुपीत्येवं क्रियताम् । षात्पद इति वा । अयं चार्थः सुबन्ते परतो यः षकारः पदे परत इति । एतदेवमुक्तार्थस्य ज्ञापकं भविष्यति । किं चैवंविधज्ञापने न प्रयोजनम् । षात्पदान्तादिति कर्त्तव्ये प्रत्ययलक्षणं भवतीत्येवास्तु । उच्यते । यत्तावदुक्तं सुपीति क्रियतां पद इति वा । तन्न । यदि तन्निर्दिश्येत तदा किं पदान्तग्रहणस्योक्तार्थज्ञापकता व्याहन्यते । द्वितीयमपि न । यत एवंविधज्ञापने द्रुणसो वार्ध्रीणस इत्यादावुत्तरस्य नस्-शब्दस्य पदान्तत्वात् " पूर्वपदात्संज्ञायामगः " (८।४।३) इति णत्वं भवति । चर्मनासिके णत्वाभावः । अन्यथा मातृभोगीणवच्चर्मनासिक इत्यत्रापि णत्वं स्यात् । तथा माषकुम्भवापेनेति समास उत्तरस्य कुम्भशब्दस्य पदत्वं भवति । तेन माषकुम्भवापेनेत्यत्र पदव्यवाये णत्वप्रतिषेधः सिध्यति । अन्यथा प्रत्ययलक्षणाभावान्निमित्त-निमित्तिनोः पदव्यवायो न स्यात् ॥

नन्वत्रापि " पदव्यवायेऽपि " (८ । ४ । ३८) इतिसामर्थ्यात्प्रत्ययलक्षणेन पदत्वं भविष्यति । उच्यते । यदि सामर्थ्याद्व्यवस्था तदोक्तप्रकारे निष्फलो व्यारोपः । ननु यदि " सात्पदाद्योः " (८।३।१११) इत्यारभ्य कार्येऽपदादिविधाविति वचनादुत्तरस्य पदत्वं भवति तर्हि " भावकर्मणोः " (१।३।१३) इत्यादौ " पदान्तस्य " (८ । ४ । ३७) इति कर्तव्ये णत्वप्रतिषेधे पदत्वं प्राप्नोति । ततश्च " पदान्तस्य " (८ । ४ । ३७) इति णत्वप्रतिषेधेन भवितव्यम् । उच्यते । " भावकर्मणोः " (१।३।१३) इति निर्देशाददोषः । ननु च यदि ' उत्तरपदत्वे चापदादिविधौ ' इत्यस्ति कथं तर्हि विमलद्यु दिनमिति । यावताऽत्रापि " उत्तरपदत्वे चापदादिविधौ " इति वचनाद्दिवशब्दस्य पदत्वं नास्ति । उच्यते । तत्र "एङः पदान्तादति" (६।१।१०९) इत्यतोऽन्तग्रहणमनुवर्तते । तेन तदन्तविधिना दिवशब्दान्तपदस्योत्त्वमिति सिद्धं विमलद्यु दिनमिति । केवले तु द्युम्यामित्यादौ व्यपदेशिवद्भावाद्दुत्वम् । न चास्ति "व्यपदेशिवद्भावोऽप्रातिपदिकेन" इति । " द्युप्रागपागुदक्प्रतीचो यत् " (४ । २ । १०१) इत्यत्र निर्देशात् ॥ ९८ ॥

---

१ A षकारान्तत्वात् । षात्पदादिशब्देन. २ A एव for एवम्. ३ A वार्ध्रीणसः ४ णत्वं न for पदत्वं.

निमित्तापाये नैमित्तिकस्याप्यपायः ॥ ९९ ॥

निमित्तेन निर्मितं नैमित्तिकम् । वुञ्छणादौ (४।२।८०) कुमुदादित्वाट्ठक् । कारणापाये तत्कार्यमप्यपैति ॥ तेन स्नातीत्यत्र मूर्द्धन्याभावे णत्वमपैति । पटुभार्य्यः इत्यत्र ङीब्निवृत्तौ यणादेशो निवर्त्तते ॥

ज्ञापकं चास्याः " उदः स्थास्तम्भोः पूर्वस्य " (८ । ४ । ६१) इत्यादौ षकारनिवृत्तौ ठस्य थकारोच्चारणम् । लौकिकश्चैष सव्यभिचारो न्यायः । लोके हि जपाकुसुमसन्निधौ स्फटिके रागस्तन्निवृत्तौ निवर्त्तते, तक्षकाभावे च प्रासादोऽस्त्येव । तेनास्यापत्यमिति प्रकृतेरपाये प्रत्ययो न निवर्त्तते । तथा 'अभून्नृपः' इत्यादौ पदसंस्कारे भूतसामान्ये लुङ्नद्यतनावगमवेलायां न निवर्त्तते । एतस्मिन् पादे " उपसर्गादसमासेऽपि णोपदेशस्य " (८।४।१४) इत्यत्र स्थानेद्विर्वचनपक्षेऽपि श्रुत्यभेदात्तत्त्वाध्यवसायेन कार्याणि प्रवर्त्तन्त इति सोपदेशानां सिच्प्रभृतीनां पाठेन[1] " सिचो यङि " (८।३।११२) इति प्रतिषेधो[2]नेत्यादिफक्किकायां दूषणं समाधानं चैकाच्पादे संप्रसारणं भाषायामुक्तम्[3] ॥ ९९ ॥

इति महामहोपाध्यायश्रीसीरदेवकृतायां परिभाषावृत्तौ रेफपादो नाम अष्टमाध्यायस्य तृतीयः पादः ॥

इत्यष्टमोऽध्यायः ॥ ८ ॥

अतः परं न्यायमूलाः परिभाषाः ॥

गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ १०० ॥

प्रयत्नोपपादितार्थो गौणः शब्दः, श्रुतिमात्रेण प्रतीयमानस्तु मुख्यः, एतयोर्मध्ये मुख्य एव कार्यं भवति । तद्यथा " अग्नेर्ढक् " (४ । २ । ३३) इति मुख्यादग्निशब्दाड्ढग्भवति । न त्वग्निर्माणवक इत्यादेरुपचरिताद्गौणात् । तथा " विभाषाऽवरदिक्स्त्रियाम् " (५।४।८) इति प्राच्यवाची दिगित्यत्र खप्रत्ययो मुख्ये दिगर्थेऽदिक्स्त्रियामिति प्रतिषिध्यते । न तु दिगर्थोपसर्जनीभूते ब्राह्मण्यर्थे प्राचीना ब्राह्मणीति ॥

न्यायमूला चेयम् । तथाहि " अग्नेः स्तुत्स्तोमसोमाः " (८।३।८२) इत्यत्र भाष्यकारेणोक्तम् । लौकिक एवायं न्यायो गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति । यथा गौरनुबध्यतामित्युक्ते वाहीको नानुबध्यते । तेनाग्निसोमौ माणवकावित्यत्रोपचरितवृत्तेरग्निशब्दादुत्तरस्य सोमसकारस्य " अग्नेः स्तुत्स्तोमसोमाः " (८।३।८२) इति षत्वं न भवति । मुख्यार्थात्तु " ईदग्नेः सोमवरुणयोः " (६।३।२७) इतीत्वे कृते भवत्येव षत्वमग्नीषोमाविति । अत एव "ईदग्नेः सोमवरुणयोः" (६।३।२७) इत्यत्र वृत्तौ " अग्नेः स्तुत्स्तोमसोमाः " (८।३।८२) इत्यनेन षत्वमुक्तम् । न चैकदेशविकारद्वारेण गौणोऽर्थो भवति, । तथाहि । यथा गौरनुबध्यतामित्युक्ते वाहीको नानुबध्यते न तथा कर्णादिहीनो गौरिति । न्यासकारेण तु " अग्नेः स्तुत्स्तोमसोमाः " (८।३।८२) इत्यत्र

---

१ A पाठे for पाठेन. २ A प्रतिषेधार्थं नेत्यादि. ३ A संप्रसारणभाषायां.

" विभाषेटः " (८।३।७६) इत्यतोऽनुवृत्ताविभाषाग्रहणस्य व्यवस्थितविभाषया दीर्घादेवाग्नीशब्दात्षत्वमुक्तम् । अग्निसोमौ माणवकावित्यत्र षत्वं न भवतीत्युक्तम् । पुरुषोत्तमदेवेन तु व्याख्यातम् । ज्ञापकमप्यत्र वर्णयन्ति द्यावापृथिव्यादि–(४।२।३२) सूत्रे अग्नीषोम इति षत्वार्थं निपातनम् । षत्वं ह्यत्र " अग्नेः स्तुत्स्तोमसोमाः " (८।३।८२) इति ह्स्वेकारान्तान्मुख्यादाग्निशब्दात्परस्य सोमसकारस्योच्यमानं " ईदग्नेः सोमवरुणयोः " (६।३।२७) इतीत्वे कृत ऐकदेशविकारेण स एवायमिति संप्रत्ययेऽपि गौणत्वान्न प्राप्नोतीत्यग्नीषोमा इति षत्वार्थं निपातनं ज्ञापकम् । न च " अग्नेः स्तुत्स्तोमसोमाः " (८।३।८२) इति वचनात्षत्वमाशङ्कनीयम् । अग्नीषोमाख्यौ कौचिदित्यत्र देवताद्वन्द्वे वचनस्य चरितार्थत्वादिति । लक्ष्यवशात्कचिद्गौणोऽप्यर्थः स्वीक्रियत एव । यथा " शीतोष्णाभ्यां कारिणि " (५।२।७२) इति कन्विधौ शीतकोऽलसः उष्णको दक्षः इति । " गोतो णित् " (७।१।९०) " औतोऽम्शसोः " (६।१।९३) इत्यत्र गोशब्दप्रधानत्वान्निर्देशस्यार्थाश्रययोर्गौणमुख्ययोर्न विचार इति गौर्वाहीको गां वाहीकमानयेति वृद्ध्यात्वे भवतः ॥ १०० ॥

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः ॥ १०१ ॥

कृत्रिमं पारिभाषिकम् । ततोऽन्यदकृत्रिमम् । तयोर्मध्ये कृत्रिमे कार्यसंविज्ञानम् ॥ यथा " कर्मणि द्वितीया " (२।३।२) इति कर्त्तुरीप्सिततमं कर्म गृह्यते । न लौकिकं क्रिया कर्मेति । तथा " कण्वादिभ्यो गोत्रे " (४।२।१११) " इञश्च " (४।२।११२) इति पारिभाषिकगोत्रेञन्तादण् भवति दाक्षेरमी दाक्षाश्छात्राः, न लौकिकगोत्राद्युवप्रत्ययान्तात्पाणिनिशब्दात् । तेनौत्सर्गिको वृद्धाच्छ एव भवति पाणिनीया इति । पाणिनिशब्दो हि पाणिनस्यापत्यमिति युवापत्येञन्तः । " वृद्धस्य च पूजायाम् " (४।१।१६६) इति वा गोत्रप्रत्ययस्यैव युवसंज्ञायां युवप्रत्ययेञन्तः । तदेवं " यूनि लुक् " (४।१।९०) इति इञो लुकं कृत्वा पाणिनशब्दाच्छप्रत्यये कृते पाणिनीय इति । अन्यः पुनराह—" गोत्रोक्षोष्ट्रोरभ्रराजराजन्य० " (४।२।३९) इत्यत्रापत्यप्रत्ययान्ताद्राजन्यशब्दात्प्रत्ययविधानात्प्रत्ययाधिकारे न लौकिकं गोत्रं गृह्यत इति । तद्धि अनन्तरापत्यार्थे " गोत्रोक्षोष्ट्रोरभ्रराज० " (४।२।३९) इत्यत्र क्रियते । यदि चात्र लौकिकं गोत्रमपत्यमात्रं गृह्यते तदाऽनन्तरापत्यार्थमपि राजन्यग्रहणमनर्थकम् । अपत्यमात्रस्य गोत्रग्रहणे गोत्रश्रुत्यैवोपात्तत्वात् । तस्माद्राजन्यग्रहणं ज्ञापयति प्रत्ययाधिकारे लौकिकं गोत्रं न गृह्यत इति । तेन प्रत्ययाधिकारे " अणिञोरनार्षयोः " (४।१।७८) इत्यत्र तथा " कण्वादिभ्यो गोत्रे " (४।२।१११) " इञश्च " (४।२।११२) इत्यादावपि शास्त्रीयमेव गोत्रं गृह्यते । तन्मतेनैव " यस्कादिभ्यो गोत्रे " (२।४।६३) इत्यत्र वृत्तावुक्तम् । प्रत्ययविधेश्चान्यत्र लौकिकस्य गोत्रस्य ग्रहणमिति ॥

---

१ A एकादेशविकारेण २ A पारिभाषिकगोत्रादण् ३ After न A ins. तु ४ A om. न ५ A om. एव.

एतच्च वार्त्तिककारमतम् । स हि राजन्यशब्दस्य जातावपि वर्त्तमानस्यापत्यार्थत्वमभ्युपेत्य " प्रकृत्याऽके राजन्यमनुष्ययुवानः" इति " आपत्यस्य च तद्धितेऽनाति " (६।४।१५१) इति यलोपनिवृत्तये प्रकृतिभावमारभते । अपर[1] आह । उभयगतिरिह शास्त्रे सम्भवतीति क्वचिच्छास्त्रीयग्रहणम् । तेन " अणिञोरनार्षयोः " (४।१।७८) इत्यत्र तथा " कण्वादिभ्यो गोत्रे " (४।२।१११) " इञश्च " (४।२।११२) इत्यत्र कृत्रिमपरिभाषया शास्त्रीयगोत्रग्रहणम् । " यस्कादिभ्यो गोत्रे " (२।४।६३) इत्यत्र " गोत्रोक्षोष्ट्रोरभ्र० " (४।२।३६) इत्यत्र प्रत्ययविधावपि लौकिकगोत्रग्रहणम् । राजन्यग्रहणं त्वपत्यप्रत्ययान्तकार्यान्तरनिवृत्त्यर्थम् । तेन राजन्यकमित्यत्र "आपत्यस्य च तद्धितेऽनाति " (६।४।१५१) इति लोपो न भवति । एवं च " प्रकृत्याऽके राजन्यमनुष्ययुवानः" इत्येतद्वक्तव्यं न वक्तव्यं भवति । एतच्च सूत्रदर्शने " गोत्रोक्षोष्ट्र०" (४।२।३६) इत्यत्र वृत्तावुक्तम् । अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यत इति । अपत्याधिकारे तु " तस्यापत्यम् " (४।१।९२) इत्यधिकारात " गोत्रे कुञ्जादिभ्यश्च्फञ् " (४।१।६८) इत्यादौ गोत्रग्रहणाच्छास्त्रीयमेव गोत्रं गृह्यते । अपत्यमात्रस्य लौकिकस्य गोत्रस्यापत्याधिकारादेव लब्धत्वात् ॥ १०१ ॥

प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः ॥ १०२ ॥

तेन " आकडारादेका संज्ञा " (१।४।१) इत्यत्र " कडाराः कर्मधारये " इत्यत्र यः कडारशब्दः सोऽवधित्वेन गृह्यते न तु प्राक्कडारात्समासः इत्यत्र । " कडाराः कर्मधारये " (२।२।३८) इत्यत्र यः कडारशब्दस्तस्यानुवादत्वात् प्राधान्यम् ॥

लौकिक एवायं न्यायः प्रधानाप्रधानयोरित्यादिः । तथाहि बहुषु गच्छत्सु कश्चित् कंचित पृच्छति कोऽयं याति । स आह राजेति । यः पृच्छति यश्चाचष्टे तयोरुभयोरपि प्रधाने राजनि संप्रत्ययो न तु समीपपुरुषादाविति । अयं च प्रधानाप्रधानन्यायः क्वचिदन्तरङ्गन्यायं बाधते क्वचिन्नेति । तथाहि । लोको हि प्रातरुत्थाय मुखधावनादीन्यन्तरङ्गाणि तावदादौ करोति पश्चात्प्रधानं राजगृहगमनादिकमिति । तदेवमुभाभ्यां प्रधानान्तरङ्गाभ्यामिह व्यवहारः । तथाहि । प्रधानाप्रधानन्यायेन स्थानिवद्- (१।१।५६) सूत्रे कार्यातिदेश उक्तः । शास्त्रापेक्षं कार्यं प्रधानं शास्त्रस्य तदर्थत्वात् । तथा गाङ्कुटादि-(१।२।१) सूत्रेऽन्तरङ्गत्वाच्छास्त्रातिदेशः । तथा चोश्चुकुटिषतीत्यत्रानौपदेशिकत्वात्सनो ङित्वादात्मनेपदाभावो न्यासे व्याख्यात उपपन्नो भवति । कार्यातिदेशे हि यथाध्यगीष्टेत्यत्रात्मनेपदं स्थानिवद्भावेनोक्तं तथा[2] चोश्चुकुटिषतीत्यत्रापि स्यात । कार्यापेक्षया शास्त्रस्यान्तरङ्गत्वं प्रथमतो ग्रहणात ॥ १०२ ॥

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ १०३ ॥

तेन नमस्यति देवानिति कर्मणि द्वितीया भवति । न तु " नमःस्वस्ति० " (२।३।१६) इत्युपपदविभक्तिश्चतुर्थीति ।

---

१ A om अपरः २ A तथा चोः कुः । कुटिषतीत्यत्रापि.

अत्राहुः। ननु प्रत्ययार्थे गुणीभूतस्य नमःशब्दस्य पृथक्सम्बन्धाभावादेव देवैशब्दाच्चतुर्थ्याः प्रसङ्गो नास्ति। तथा नमस्करोति देवानित्यत्रापि नमःशब्दो यदा करोतिपरः करोतेः प्रणाममर्थं द्योतयन् "साक्षात्प्रभृतीनि च" (१।४।७४) इत्यनेन क्रियायोगे गतिसंज्ञको भवति तदा करोत्यर्थे तस्य प्रादिवत् सर्वशब्दावृत्तेः पृथग्देवशब्देन सम्बन्धानुपपत्तेश्चतुर्थीप्रसङ्गो नास्ति। यथा "अपिः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चयेषु" (१।४।९६) इत्यत्र सर्पिषोऽपि स्यादित्यत्र सर्पिःशब्दात्कर्मप्रवचनीयविभक्त्यभावो न्यासे व्याख्यातः। तत्किमेतदर्थपरिभाषाश्रयणम्। युक्तं चैतत्। अन्यथा क्रियायोगाभावपक्षेऽपि यदा विशेषभूतं प्रणामार्थमाह तदाप्यनया परिभाषया चतुर्थीं बाधित्वा द्वितीया स्यात्। न चेष्यते। तथा च भट्टिः—

'नमश्चकार देवेभ्यः पर्णशालां मुमोच च इति ॥

तथा

रावणाय नमः कुर्यात्सीतेऽस्तु स्वस्ति ते ध्रुवमिति ॥

अन्ये त्वाहुः। गुणभूतापि क्रिया साधनसम्बन्धमनुभवति यथा कृतपूर्वी कटं देवदत्त इति। तद्वदिह नमोऽर्थः प्रणामो देवैः सम्बध्यत इति नमस्यति देवानित्यत्र स्यादेव चतुर्थ्युपपदविभक्तिरिति परिभाषा समाश्रयितव्या ॥

किं त्वेवं देवाय नमः करोतीत्यत्र स्याद् द्वितीया। तस्मादिदमुदाहरणम्। कुतोऽप्यागच्छति कुतः पर्यागच्छतीत्यत्र "अधिपरी अनर्थकौ" (१।४।९३) इत्यधिपर्योः कर्मप्रवचनीयत्वेऽपि कुत इति किंशब्दादपादाने पञ्चमी। न कर्मप्रवचनीययुक्ते द्वितीया। कर्मप्रवचनीयसंज्ञा गतिसंज्ञाबाधनार्था। तेन "गतिर्गतौ" (८।१।७०) इति निघातो न भवति। अत्र हि किंशब्दवाच्यस्याधिपर्यर्थेनोपरिभावेन सर्वतोभावेन च सम्बन्धोऽस्ति। तथा सुसिक्तं भवतेत्यत्र सुशब्दस्य "सुः पूजायाम्" इति कर्मप्रवचनीयत्वेऽपि भवच्छब्दात्कर्तृतृतीया न तु कर्मप्रवचनीयद्वितीया। अन्तरङ्गन्यायलब्धोऽयमर्थः ॥ १०३ ॥

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ १०४ ॥

प्रधानाप्रधानन्यायलब्धोऽयमर्थः। तथाहि समुदायस्य सर्वानुग्राहित्वेन प्राधान्यं तेनावयवाश्रितात् समुदायाश्रितं कार्यं भवति। तेन "दीधीवेवीटाम्" (१।१।६) इत्यत्र दीधीङ्वेवीङोर्ग्रहणं न तु दीङ् क्षये धीङ् अनादरे वेञ् तन्तुसन्ताने वी गत्यादिष्वित्येषामिति ॥ ननु कथं प्रत्येकग्रहणशङ्का यावता प्रत्येकं ग्रहणे दीङ्वेञोर्ग्रहणमनर्थकं तत्र गुणाभावात्प्रतिषेधोऽनर्थकः। तथा चैञ्जिवयस्य दीङो "मीनातिमिनोतिदीङां ल्यपि च" (६।१।५०) इत्यात्वे कृते तथा वेञश्च स्वभावादेयेन्न सम्भवति। उच्यते। द्वयोरप्येतयोर्यति "ईद्यति" (७।४।४०) इतीत्वे च कृते देयं चेयमित्यत्र गुणप्रतिषेधः संभवति। ननु तथापि वेञो ग्रहणमसङ्गतं वीग्रहणेनैव लब्धे एतस्यापि वेञो गुणप्रतिषेधः

---

१ A गुणभूतस्य. २ A om. देव. ३ A करोत्यर्थेन. ४ A क्रिया या साधनसाधनसंबन्धं for क्रिया साधनसंबन्धं. ५ A om. कथं. ६ A यथापि.

सिध्यति । न सिध्यति । लाक्षणिकत्वादस्य । न्यासकारस्तत्रोक्तवान् । यदि दीङादीनां ग्रहणमभिमतं स्यात्तदाऽसन्देहार्थं धीवेधीदीटामिति विन्यासं कुर्यात् । एवं चैतत्परिभाषाप्रयोजनं न दृश्यते । सर्वत्रैवासंदिग्धकरणादेवापेक्षितसिद्धेः ॥ १०४ ॥

गामादाग्रहणेष्वविशेषः ॥ १०५ ॥

तेन "घुमास्थागादि०" (६।४।६६) सूत्रे गाग्रहणेन गै शब्दे गा स्तुतौ "गाङ् लिटि" (२।४।४६) "णौ च संश्चङोः" (६।१।३१)इति गाङ् गताविलेते गृह्यन्ते। अत्रैव च घुमाग्रहणेन मा माने माङ् माने मेङ् प्रणिदाने इति । दाग्रहणेन च दाधा घ्वदाबित्यत्र डुदाञ् दाने देङ् रक्षणे दो अवखण्डने दाण् दाने इति ॥ यद्येवं "गापोष्टक्" (३।२।८) इत्यत्राप्यनया गाङो ग्रहणं प्राप्नोति । गा स्तुताविलयं तु छान्दसत्वान्निराकृतो रक्षितेन । तथा "ह्वावामश्च" (३।२।२) इत्यत्रापि मा मान इत्यस्य। तथा "दाधा घ्वदाप्" इत्यत्रापि दाशयतेर्दाशब्दस्य ग्रहणम् । ततश्च प्रनिदाशयतीत्यत्र "नेर्गदनद०" (८।४।१७) इत्यादिना णत्वं स्यात् । उच्यते । "गापोष्टक्" (३।२।८) इत्यत्र परस्मैपदिना पिबतिना साहचर्याद्गायतेरेव ग्रहणम् । साहचर्यपरिभाषा चानया न बाध्यते ॥

न चैवं घ्वादिसूत्रेऽपि साहचर्यपरिभाषया गायतेरेव ग्रहणमाशङ्कनीयम्। "गाङ्कुटादि०"(१।२।१)सूत्रे गाङ्ग्रहणात्। तद्धि अध्यगीष्टेलत्र ङित्त्वार्थं क्रियते। तच्चापीत्वार्थम् । "ह्वावामश्च" (३।२।२) इत्यत्रापि सानुबन्धकेहृेङ्साहचर्यान्माङ्मेङोः सानुबन्धयोरेव ग्रहणं न निरनुबन्धकस्य मा मान इत्यस्य । लुग्विकरणपरिभाषाऽप्यनया न बाध्यते । घुमास्थागादि–(६।४।६६) सूत्रे मतान्तरेण लुग्विकरणपरिभाषाबाधोऽपि न्यास उक्तः । "दाधा घ्वदाप्" (१।१।२०) इत्यत्रापि दाग्रहणेनार्थवत्परिभाषया दाशयतेर्दाशब्दस्याग्रहणम् । अर्थवत्परिभाषाऽप्यनया न बाध्यते। यद्येवं प्रणिदापयतीत्यत्र निरर्थकत्वाद् घुसंज्ञा न स्यात् । अनागमकानां सागमका आदेशा भवन्तीति सागमकस्यार्थवत्त्वम् । उच्यते । 'आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इत्याश्रयणीयम् । इयं च परिभाषा निरनुबन्धकलुग्विकरणलक्षणपरिभाषाणामपवादिका। लक्ष्यवशाश्चै काचिदित्याहुः । निरनुबन्धकलक्षणपरिभाषयोरित्यन्ये । लक्षणपरिभाषाया इत्यपरे । तत्र निरनुबन्धलक्षणपरिभाषयोर्बाधे युक्तिमपि केचिदाहुः । गामादाग्रहणे या परिभाषाऽस्ति सैवानया बाधितव्या । तद्ग्रहणे चान्तरङ्गत्वान्निरनुबन्धकपरिभाषा विधते लक्षणपरिभाषा च । न तु लुग्विकरणसाहचर्यपरिभाषे च । बहिरङ्गत्वात् । अर्थवत्परि-

---

१ A सर्वत्रासंदिग्ध०. २ A गामादाग्रहणेषु विशेषो न. ३ A गा गतौ. ४ A om. घु. ५ A om. ग्रहणम्. ६ A हेञ्वेञ्साहचर्यात्. ७ A om. सानुबन्धयोः. ८ A इत्यस्य लुग्विकर णपरिभाषया वा । लुग्विकरण०. ९ A om. न.

भाषापि बहिरङ्गैव । अर्थवत्ताया लौकिकवैदिकप्रयोगादधिगमात् । तदेवं निरनुबन्धकलाक्षणिकग्रहणविचारे कार्यकाले संज्ञापरिभाषे इत्यत्र पक्षे तुल्यत्वात्सामान्येन द्वयोरपि निरनुबन्धकलाक्षणिकपरिभाषयोर्बाधां करोति गामादाग्रहणेष्वविशेष इति ॥

न चैवं देवदत्तहन्तृहतन्यायेन गामादाऽग्रहणम्, निरनुबन्धकलाक्षणिकपरिभाषाबाधे नास्ति लुग्विकरणपरिभाषेति वाच्यम्।शास्त्रबाधानभ्युपगमात् । गाङ्कुटादि–(१।२।१) सूत्रस्थगाङो ङकारप्रत्याख्यानकाले यथोद्देशपक्षमाश्रित्य परत्वाल्लक्षणपरिभाषां बाधित्वा निरनुबन्धकपरिभाषया कै गै शब्द इत्यस्यैव ग्रहणं स्यादित्युक्तं न्यासकारेण । यथोद्देशपक्षे हि सामान्यग्रहणं नास्ति । परत्वान्निरनुबन्धकपरिभाषाया बलवत्त्वात् । ये तु प्रत्ययविधिविषयां निरनुबन्धकपरिभाषामाहुस्तन्मतेन लक्षणपरिभाषैव बाध्यत इति । अस्यां च परिभाषायां गामादा गृह्यन्ते यस्मिन्नित्याश्रयणेनान्यस्यापि सामान्यग्रहणमाहुः । तेन " दाधा घ्वदाप् " (१।१।२०) इत्यत्र धाग्रहणेऽपि सामान्यग्रहणेन धेटोऽपि ग्रहणं भवति। अनया " दाधा घ्वदाप् " (१।१।२०) इत्यत्र दाग्रहणेन " मीनातिमिनोतिदीङां ल्यपि च " (६।१।५०) इत्यात्वे कृते दीङो यैद् ग्रहणं प्राप्नोति तत्प्रयोजनाभावान्न भवति । तथाहि " उपसर्गे घोः किः " (३।३।९२) इति किप्रत्ययेऽनेज्विषयत्वादात्वं नास्ति । " दो दद् घोः " (७।४।४६) इत्यपि कर्तव्ये आत्वं नास्ति। ति किति तद्विधानात् । " घुमास्था० " (६।४।६६) इति ईत्त्वमपि नास्ति । तस्यापि कित्येव विधानात् । " सनि मीमाघु० " (७।४।५४) इत्यत्रापि सनि " इको झल् " (१।२।९) इति कित्त्वादात्वं नास्ति । अथाप्यस्ति तथापि दाग्रहणे तद्ग्रहणादिसादेशेन भवितव्यमेव ॥

ननु " नेर्गद० " (८।४।१७) इति णत्वसम्भवात्प्राणिदातेति कथं प्रयोजनाभावः । उच्यते । नेर्गदादि–(८।४।१७) सूत्रे घ्वन्तस्य घुशब्दस्य परनिपातेनात्र णत्वाभावमाहुः । नन्वेवमपि लुङि सिचि एज्विषयत्वादात्वे कृते " स्थाघ्वोरिच " (१।२।१७) इति कित्वेत्वे स्यातामित्यस्ति प्रयोजनसम्भवः । ततश्चोपादास्तेति न स्यात् । तत्र भाष्ये संनिपातलक्षणपरिभाषया परिहार उक्तः । सिचो ह्यकित्वादेवैजविषयतायां सत्यामाकारेणात्मा लब्धः स यथात्मानं दर्शयित्तदाऽकित्वस्योच्छेदः स्यात् । तस्मादकित्वविघाताय न यतते इत्यात्मानमपह्नुत इति ॥ १०५ ॥

सामान्यस्यातिदेशे विशेषस्यानतिदेशः ॥ १०६ ॥

तद्यथा । " गाङ्कुटादिभ्यः " (१।२।१) इत्यादौ कुटादिभ्यः परस्य ञ्णित्सामान्यस्य यत्कार्यं तत्र " क्ङिति च " (१।१।५) इति गुणप्रतिषेधादीकोऽतिदिश्यते, न तद्विशेषस्य यङादेर्यत्कार्यं द्विर्वचनादिकं तदातिदिश्यते ॥

---

१ A om. गामादा......सामान्यग्रहणं नास्ति. २ A अपि for यत्. ३ A om. ति किति...नास्ति. ४ P प्रयोजनासंभवः. ५ A षष्ठ्यन्तस्य for घ्वन्तस्य. ६ A विघातायांव इत्यापात्मानं. ७ A प्रतिषेधादिकेतिनि(र्दि)श्यमानेन तावद्विशेषस्य यङादे०.

लोकसिद्ध एवायमर्थः । तथाहि । लोके ब्राह्मणवदस्मिन् क्षत्रिये प्रवर्त्तितव्यमित्युक्ते ब्राह्मणसामान्यकार्यं[1] वन्दनादिकमतिदिश्यते । न तु माठरादिविशेषसम्बद्धं परिवेषणादिकम् । काचिद्विशेषोऽप्यतिदिश्यते । तत्र "स्थानिवदादेशोऽनल्विधौ" (१।१।५६) इति विधिग्रहणं लिङ्गम् । तत्र ह्युच्यते । अनल् इति सम्बन्धसामान्ये षष्ठी क्रियताम्, अत एवालाश्रयो विधिर्व्यूढोरस्केनेत्यत्र सकारस्य स्थानिवत्त्वे णत्वप्राप्तिः । तथाऽल[3] एव स्थाने विधिर्द्युकाम इत्यत्रोत्त्वस्य स्थानिवत्त्वाद्वलि[2] लोपः । तथाऽलि[4] उत्तरो यो विधिर्द्यौरित्यौत्वस्य स्थानिवत्त्वाद्धलः सुलोपः । तथाऽलि परतो यो विधिः स इष्टवानित्यत्र सम्प्रसारणस्य स्थानिवत्त्वात् "एतत्तदोः सुलोपः०" (६।१।१३२) इति सुलोपः, स सर्वोऽल्विधिरित्यनल् इत्युच्यमाने इदं[5] चार्थचतुष्टयं लभ्यत एव तत्किं विधिग्रहणेन ॥

इदं तर्हि प्रयोजनमलाश्रयो विधिरल्विधिरित्युत्तरपदलोपी समासो यथा स्यादिति । तेनानल्विधाविति प्रतिषेधः सामान्याश्रयं च कार्यं यावत्स्थानिवदित्यतिदेशात्प्राप्नोति तन्निरासार्थं क्रियते । तेन प्रतिदीव्येत्यत्र क्त्वागोचरवर्णादित्वाश्रये[6]ण्निषेधो भवति । अन्यथा सामान्यस्यातिदेशो विशेषस्यानतिदेश इति यदेव प्रत्ययत्वार्धधातुकसामान्याश्रयं तदेवातिदेशेन स्यान्न वलादिविशेषाश्रयमपीति प्रतिदीव्येति वलादित्वाभावादिड् नास्तीति किं विधिग्रहणेन । ज्ञापकस्य च फलमग्रहीदित्यत्र ग्रहोऽलिटिदीर्घस्य स्थानिवत्त्वातिदेशादिड्रूपत्वेन "इट ईटि" (८।२।२८) इति सिचो लोपासिद्धिः ॥ १०६ ॥

श्रुतानुमितयोः श्रौतः संबन्धो बलीयान् ॥ १०७ ॥

तेन "अचो रहाभ्यां द्वे" (८।४।४८) इत्यत्र रहाभ्यामिति साक्षाच्छ्रुतेन निमित्तभावेन यरन्तर्भावादनुमितं कार्यित्वं बाध्यते । तेन मद्रह्रद इत्यत्र रेफस्य द्वित्वं न भवति । यदि स्याद् द्वयो रेफयोः श्रवणं स्यात् । "रो रि" (८।३।१४) इत्येकस्य लोपो भविष्यतीति चेन्न । लोपे कर्त्तव्ये पूर्वत्रासिद्धमित्यसिद्धत्वात् । "हलो यमां यमि लोपः" (८।४।६४) इत्यनेन तर्ह्येकस्य लोपो भविष्यति । सिद्धं ह्येतस्मिन् द्विर्वचनं लोपे । एवमपि पक्षे द्वयो रेफयोः श्रवणं स्यात् । तत्र हि "झयो होऽन्यतरस्याम्" (८।४।६२) इत्यतोऽन्यतरस्यांग्रहणमनुवर्त्तते । जातिपक्षाश्रयणादिह "अनचि च" (८।४।४७) इति [7]रेफे हकारस्य द्विर्वचनं न भवति ॥

अयं च लौकिकन्यायलब्धोऽर्थः । तथा च पठन्ति 'साक्षाच्छिष्टेनानुमितं बाध्यते', 'प्रत्यक्षानुमितयोः प्रत्यक्षं[8] बलीयः' इति । एतदेव कुतः । अनुमानात्प्रत्यक्षमन्तरङ्गं प्रत्यक्षपूर्वकत्वादनुमानस्य । यथा ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषातामित्येकं वाक्यं ब्राह्मणभोक्तृकस्य माठरकौण्डिन्यपरिवेष्टृकस्य विधायकम् । तदेकत्वाद्वाक्यस्य न बाध्यबाधकभावः । अथ द्वे एते वाक्ये तदाऽनुमितस्य भोजनस्य बाधनेन विना परिवेषणं नोपपद्यते ।

---

१ A कार्यं चन्दनादिकं. २ A हलि for वलि. ३ A om. अलः. ४ A द्यौरित्यौत्वस्य स्थानिवत्त्वाद्धलि लोपः. ५ A इह for इदं. ६ A वलादित्वाश्रयोण्निषेधः. ७ A रेफयोः for रेफे. ८ A प्रत्यक्षत्वं for प्रत्यक्षं.

ततो वाक्यसामर्थ्यादिह बाधा । मद्रह्रद इत्यादौ तु हकारात्परस्य रेफस्य सम्भवत्येव द्वित्वम् । एवं तर्हि 'सामान्यश्रुतिं विशेषश्रुतिर्बाधते' इति । यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति तक्रदानेन दधिदानं बाध्यत इति । यत्तु श्रीपुरुषोत्तमदेवेन व्याख्यातम् । ज्ञापकं चात्र "ग्रामह्रदोत्तरपदात्" (४।२।१४२) इति ग्रामह्रदादेर्द्विर्वचनाकरणमिति तन्न । "हलो यमां यमि लोपः" (८।४।६४) इति रेफलोपसंभवात् "सर्वत्र शाकल्यस्य" (८।४।५१) इति प्रतिषेधाच्च ॥ १०७ ॥

पित्स्वराच्चित्स्वरो बलीयान् ॥ १०८ ॥

तेनाम्बष्ठ्या सौवीर्येत्यत्र पित्स्वरमनुदात्तं बाधित्वा चित्स्वादन्तोदात्त एव भवति ॥ अयं चार्थश्चा[1]प्रत्ययान्तरकरणात् सिद्धः । तथाहि । यद्यत्र पित्स्वरः स्यात् "अजाद्यतष्टाप्" (४।१।४) इत्यनन्तरं यङश्चेति कृत्वा टापमेव विदध्यात् । तस्मात्प्रत्ययान्तरकरणं चित्स्वरार्थमेवेति । "अनुदात्तौ सुप्पितौ" (३।१।४) इत्यत्र त्वनुन्यासकारेणोक्तम्, इदं सूत्रं "तास्यनुदात्तेत्०" (६।१।१८६) इत्यस्यानन्तरं कस्मान्न क्रियते, एवं हि द्विरनुदात्तग्रहणं [2]कर्त्तव्यं न भवति । अस्त्येतत् । इदं तु प्रयोजनम्, पित्स्वराच्चित्स्वरो बलीयान् यथा स्यात् । "यङश्चाप्" (४।१।७४) इत्यत्र प्रत्ययोत्पत्तिसमकालभावी पित्स्वरो भवति सूत्रपाठाच्च पूर्वः, चित्स्वरश्चापि पश्चाद्भवन् सतिशिष्टस्वरो भवति, सूत्रपाठाच्च परः इति तस्य बलीयस्त्वम्, अन्यथा विपर्ययः स्यादिति ॥ १०८ ॥

विधिनियमसम्भवे विधिरेव ज्यायान् ॥ १०९ ॥

तेन "ह्वावामश्च" (३।२।२) इत्यत्र सोपसर्गादण् सिद्ध एभ्य एव सोपसर्गेभ्यो नान्येभ्य इति नियमो न भवति । तथा "आतोऽटि नित्यम्" (८।३।३) इत्यत्र नित्यग्रहणं स्पष्टार्थमुक्तमुपपद्यते । अन्यथाऽसति नित्यग्रहणे "अत्रानुनासिकः पूर्वस्य तु वा" (८।३।२)इति विकल्पे सिद्धे आत एवाटि अट्येवातः इति वा नियमः स्यात् ॥

अयं चान्तरङ्गन्यायसिद्धोऽर्थः । तथाहि । नियमपक्षेऽश्रुतस्य प्रतिषेधवाक्यस्य द्वितीयस्य कल्पनायां गौरवं भवति । तथा च "श्लिष आलिङ्गने" (३।१।४६) इत्यत्रा[3]नु[4]न्यासकारः ।

"तत्र तस्माद्विधेरेव ज्यायस्त्वं नियमात् स्थितम् ।
नियमः परिसंख्यास्मिन् शास्त्रे त्रिदोषिका मता ॥
श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात् ।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका" इति ॥

नियमज्ञापकयोर्मिथोविरोधे द्वयोरप्यर्थद्वयावलम्बित्वेन तुल्यत्वान्न तत्र बलाबलम् । अत एव प्रत्यय-(३।१।१) सूत्रे न्यासकारेण "इच एकाचोऽम्प्रत्ययवच्च"

---

१ A चाप्रत्ययान्त. २ A न कर्तव्यं for कर्तव्यं न. ३ P इत्ययं for इत्यत्र. ४ P अनुन्यासः.

(६।३।६८) इत्यादिव्याख्यानप्रस्तावे प्रत्ययग्रहणं ज्ञापकमुक्त्वा नियमार्थमाशङ्कितम् । तथा ङ्याप्–(४।१।१) सूत्रे " नौद्व्यचष्ठन् " (४।४।७) इत्यत्र प्रस्तावे नौग्रहणं ज्ञापकमुक्त्वा नियमार्थमुक्तमिति ॥ १०९ ॥

प्रतिपदविधानाद्योगविभागो गरीयान् ॥ ११० ॥

तेन " जभोऽचि " " रधेश्च " " नेट्यलिटि॰" इति (७।१।६१–६२) सूत्रत्रयेण सिद्धौ किमर्थं द्वौ रधिग्रहणमिति न पूर्वपक्षणीयमिति । गरीयस्त्वं च योगविभागस्य युक्तमेव । तथाह्येकयोगे ग्रन्थगौरवेऽप्येकैव वाक्यार्थप्रतीतिरुदेति भिन्नयोगे प्रतियोगं भिन्नबुद्ध्युदयाद् व्यक्तं प्रतिपत्तिगौरवमिति ॥ ११० ॥

सर्वविधिभ्यो लोपविधिर्बलवान् ॥१११ ॥

तेन कानि सन्तीत्यत्र यणादेशात्पूर्वं श्नसोरल्लोपः सिध्यति । ज्ञापकं चास्याः "प्रत्ययलोपे प्रत्ययलक्षणम् " (१।१।६२) इति सूत्रम् । यदीदं न स्यात्तदा लोपात् प्रागेव प्रत्ययकार्यं कृत्वा पश्चात्प्रत्ययलोपादिष्टसिद्धौ सूत्रमिदमनर्थकं स्यादिति । भाष्ये त्वियं नोपगता प्रयोजनाभावात् ॥ १११ ॥

अनन्त्यविकारेऽन्त्यसदेशस्य ॥ ११२ ॥

अनन्त्यस्य यो विकारः सोऽन्त्यसदेशस्यान्त्यसमीपवर्त्तिनः स्थाने भवति । सदेशस्येति निपातनात्समानस्य सभावः । तेन न्यमार्ट् मिमार्जिषतीत्यत्र " मृजेर्वृद्धिः " (७।२।११४) अडागमाभ्यासेकारयोर्न भवति । तथा अक्ष्णा तक्ष्णेत्यत्र "अल्लोपोऽनः" (६।४।१३४) इत्यादेरकारस्य लोपो न भवति । विदुषः इति " वसोः संप्रसारणम् " (६।४।१३१) इति च विद्वकारस्य न भवति ॥

इयं च परिभाषा भाष्ये " ष्यङः संप्रसारणम्॰ " (६।१।१३) इत्यत्र पठिता । तत्रैव चैषाऽतिप्रसङ्गदोषभयात् प्रत्याख्याता । तथाहि । अस्यां सत्यां " धात्वादेः षः सः " (६।१।६४) इति " णो नः " (६।१।६५) इति चेहैव स्यात् सोता नोतेति । इह तु न स्यात् सिञ्चति नमतीति । तथा "तदोः सः सावनन्त्ययोः" (७।२।१०६) इतीहैव स्यात्तदः स इति । इह तु न स्यात् त्यदः स्य इति । अन्यानि च बहूनि दूषणानि सन्ति । उक्तप्रयोजनानि च प्रकारान्तरेण साधितानि । तदुक्तं न्यमार्ट् इत्यत्राकारस्य वृद्धिर्न भवति, इक्परिभाषयेक एव वृद्धिर्भविष्यति । मिमार्जिषतीत्यत्रापि वृद्धौ कृतायामभ्यासह्रस्वत्वं भविष्यतीति । अक्ष्णा तक्ष्णेत्यत्रापि न दूषणम् । " अल्लोपोऽनः " (६।४।१३४) इत्यनाऽकारं विशेषयिष्याम: । अनो योऽकार इति ॥

---

१ A प्रस्तावेन for प्रस्तावे. २ P यौक्तं for युक्तं. ३ A भिन्नबुद्ध्युकं तथा व्यक्तं.

नन्वेवमप्यनसे[1] मनसे इत्यत्रापि प्राप्नोति । उच्यते । अन्कारेणाङ्गं विशेषयिष्यामः । अन्कारान्तस्याङ्गस्यानो योऽकार इति । एवमप्यनस्तक्ष्णा मनस्तक्ष्णेत्यत्रापि प्राप्नोति । एवं तर्हि कार्यकालं संज्ञापरिभाषामिति यत्र कार्यं तत्र द्रष्टव्यम् । भस्येत्यत्रोपस्थितमिदं भवति । "यचि भम्" (१।४।१८) इति । तत्र यजादिपरतयाऽन्कारं विशेषयिष्यामः । यजादिपरस्यान्कारस्यानो योऽकारः इत्यादि बहु व्याख्यानम् । किं तु प्रत्येकं[2] व्याख्यानाद् वचनमेव साधीयः इति परिभाषाश्रयणम् । दृश्यते चानया व्यवहारः

"अदसोऽद्रेः पृथग् मुत्वं केचिदिच्छन्ति लत्ववत् ।

केचिदन्त्यसदेशस्य नेत्येके सेर्हि दृश्यते" इति ॥[3]

अतिप्रसङ्गश्च[4] नाशङ्कनीयो लक्ष्यानुरोधेन परिभाषाश्रयणात् । उदात्तनिर्देशाद्वा । यत्रैषा[5] परिभाषेष्यते तत्रोदात्तनिर्देशः कर्त्तव्यः । तदुक्तम् । उदात्तनिर्देशात्सिद्धमिति । अस्यां च परिभाषायां "अत उपधायाः" (७।२।११६) इत्युपधाग्रहणं चिन्त्यम् ॥११२॥

नानर्थकेऽलोन्त्यविधिः ॥ ११३ ॥

इयं च परिभाषा भाष्ये नोक्ता, तत्प्रयोजनस्य प्रकारान्तरेण सिद्धत्वात् । तथाह्यस्याः प्रयोजनम् "अव्यक्तानुकरणस्यात इतौ" (६।१।९८) इत्यत्राच्छब्दस्य पररूपे, तथा "हलि लोपः" (७।२।११३) इतीद्रूपलोपे, तथा "ध्वसोरेद्धावभ्यासलोपश्च" (६।४।११९) इत्यभ्यासलोपे, "अत्र लोपोऽभ्यासस्य" (७।४।५८) इत्यभ्यासलोपे चान्तविज्ञानं मा भूदिति । तत्र यथाक्रमं "नाम्रेडितस्यान्त्यस्य तु वा" (६।१।९९) इति ज्ञापकात्, अनादेशे कृतेऽन्त्यनकारलोपाद्, द्विशकारनिर्देशेन लोपस्य शित्त्वात्, अत्रग्रहणस्य सर्वादेशार्थत्वात् सर्वादेशाविज्ञानं सिद्धमिति किमनया । अत एव "तस्य लोपः" (१।३।९) इत्यत्र तस्यग्रहणं सर्वलोपार्थं कृतं सूत्रकारेण । ये चाप्येतामभ्युपगच्छन्ति तेऽप्यनभ्यासविकारेष्विति शेषमस्याः पठन्ति । तेनाजीगणदित्यत्र "ई च गणः" (७।४।९७) इत्यलोऽन्त्यस्येकारः स्यात् ॥ ११३ ॥

प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् ॥ ११४ ॥

यद्यप्यस्याः परिभाषाया अस्तित्वे प्रमाणं नास्ति, तथापि "अङ्गस्य" (६।४।१) इत्यत्र भाष्यकारेण व्याख्यातेयम् । कैयटेनापि "नामि" (६।४।३) इत्यत्र पठिता । अत एवास्याः प्रामाण्यं न्यासकारादिभिरङ्गीक्रियते । यत्तु "अपृक्त एकाल्प्रत्ययः" (१।२।४१) इत्यत्रानुन्यासकारेण व्याख्यातमिह प्रत्ययग्रहणात्प्रत्ययाप्रत्ययपरिभाषा नास्ति । तन्न । प्रत्ययग्रहणं विस्पष्टार्थमिति तत्र न्यासे साक्षादेव व्याख्यातत्वात् । विस्पष्टार्थं च स्वरूपविधिविषये औचित्या[6]दस्याः प्रवृत्तिर्न्याय्या न त्वस्वरूपविधिविषये इति । "स्वाङ्गे तस्प्रत्यये कृभ्वोः" (३।४।६१) इत्यत्र तु स्वरूपग्रहणे प्रत्ययग्रहणे प्रत्ययपरिभाषाया अभावे[7] प्रमाणमेव ॥

---

१ A एनसे for अनसे. २ A B प्रत्येकं व्याख्यानात्तु बहु वचनमेव साधीयः. ३ B C P. om. नेत्येके सेर्हि दृश्यते इति. ४ A अतिप्रसङ्गं च नाशङ्कनीयम्. ५ B P om. च. ६ A B भिसित्यादौ for औचित्यात्. ७ A स्वभावे for अभावे.

प्रयोजनं चास्याः " सनाशंसभिक्ष उः " (३।२।१६८) इत्यत्र प्रत्ययग्रहणम् । न चार्थवत्परिभाषया व्यवस्था । प्रत्ययाप्रत्यययोरुभयोरप्यर्थवत्त्वात् । एतदपि प्रयोजनं केषांचिन् मतेन । तथाहि । " सनाशंसभिक्ष उः " (३।२।१६८) इत्यत्र प्रत्ययग्रहणे गर्गादिषु जिगीषुशब्दपाठो ज्ञापको न्यासकारेण प्रागेव व्याख्यातो न तु प्रत्ययपरिभाषया। तथा " वलः " (६।४।१८) इत्यत्र "उपसर्गस्य घञ्यमनुष्ये बहुलम् " (६।३।२२) इत्यत्र बहुलग्रहणात् प्रत्ययग्रहणमुक्तम् । अन्यस्तु " मतौ बह्वचोऽनजिरादीनाम् " (६।३।११९) इति मतुप्साहचर्याद्वलप्रत्ययस्यैव ग्रहणमाह । ननु " वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम् " (६।३।११६) इति पूर्वभूतेन वनगिर्योः साहचर्येण वलप्रातिपदिकग्रहणमाशङ्कनीयम् । यतः शब्दपरविप्रतिषेधेन मतुपैव साहचर्यं न्याय्यम् । "मतौ" (६।३।११९) इत्यत्रेदं नाशङ्कनीयं प्रातिपदिक एव मताविति । उकारस्यानुनासिकविशिष्टस्योपादानान्मतुपैवायं निर्देशः । "वनगिर्योः संज्ञायाम् " (६।३।११६) इत्यतः संज्ञायांग्रहणानुवृत्तेर्वा । न च मतिशब्देन संज्ञा गम्यते । "वनो र च" (४।१।७) इत्यत्रानया न प्रयोजनम् । वन षण संभक्तौ वनु याचने इत्येताभ्यां विच्प्रत्ययादर्शनात् ॥ ११४॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ ११५॥

तेन " गुपूधूपविच्छिपणिपनिभ्य आयः " (३।१।२८) इत्यत्र स्तुत्यर्थेन पनिना साहचर्यात् पणेः स्तुत्यर्थस्यैव ग्रहणम् । तथा "पञ्चम्यपाङ्परिभिः (२।३।१०) इत्यत्राङा व्यवधानेऽप्यपेन साहचर्यात् परेर्वर्जनार्थस्य ग्रहणम् । यत्र पूर्वेणापि साहचर्यं परेणापि तत्र शब्दपरविप्रतिषेधे परेणैव साहचर्यम् । यथा सत्सूद्विषादि–(३।२।६१) सूत्रे द्विषा साहचर्यात् षूङ् प्राणिप्रसवे इत्यस्यादादिकस्य ग्रहणं न त्वनादादिकेन सादिना साहचर्याद-नादादिकस्य सूयातोः ॥

लौकिक एवायं न्यायः । तदुक्तं " कर्मप्रवचनीयाः " (१।४।८३) इत्यत्र भाष्ये। लोके हि गोर्द्वितीयेनार्थ इत्युक्ते गौरेव द्वितीय उपादीयते साहचर्यान्नाश्वो न वा गर्दभ इति। अनित्या चेयम् । तच्चानित्यत्वं " द्वित्रिश्चतुरिति कृत्वोऽर्थे " (८।३।४३) इत्यत्र न्यासकारेण कृत्वोर्थग्रहणाच्चतुरो विशेषणाद् विज्ञापितम् । यदीयं नित्या स्याद् द्वित्रिःशब्दयोः सुच्प्रत्ययान्ततया तत्साहचर्यात् कृत्वोऽर्थवृत्तेरेव ग्रहणं सिद्धं चतुरोऽपीति किं कृत्वोऽर्थग्रहणेन । अनित्यत्वे चास्य " दीधीवेवीटाम् " (१।१।६) इत्यत्र दीधीवेव्योः साहचर्यादिट किट गतावित्यस्य धातोर्ग्रहणं न भवति, आगमस्य तु भवति । ननु धातोरग्रहणेऽपि कथमागमस्य ग्रहणं यावताऽर्थवत्परिभाषया प्रत्ययपरिभाषया वा पचे इत्यत्राद्गुणप्रतिषेधार्थं प्रत्ययस्यैव ग्रहणं युक्तम् । अत एव " दीधीवेवीटाम् " (१।१।६) इत्यत्र न्यासकृताऽल्पाच्तरस्येटोऽपूर्वनिपातेनागमस्येटो ग्रहणमुक्तं न त्वेतत्परिभाषाया अनित्यत्वेन । उच्यते । एवं मन्यते, अर्थवत्परिभाषाऽनित्या " आनि लोट् (८।४।१६) इत्यत्र लोड्ग्रहणात् । प्रत्ययपरिभाषा शास्त्र एव नास्ति । ननु तथापि सामान्यग्रहणं युक्तम् । न युक्तम् । प्रत्ययग्रहणे केवलस्येटो गुणाभावात् पच इत्यत्र ह्याद्गुणो लट्प्रत्ययाश्रय एवेति ॥ ११५॥

---

१ A om. from प्रत्ययग्रहणम्......upto अनित्यत्वेन at the end of this page.

यथोद्देशं संज्ञापरिभाषम् ॥ ११६ ॥ कार्यकालं संज्ञापरिभाषम् ॥ ११७ ॥

संज्ञापरिभाषमिति समाहारद्वन्द्वः । संज्ञा परिभाषा च यत्रोपदिष्टा तत्रैव व्याप्रियते । तथा चोच्यते । परिभाषा पुनरेकदेशस्थैव सकलशास्त्रमभिज्वलयतीति । अपर आह । यत्र कार्यं तत्र व्याप्रियते तादर्थ्यात् । तथा चोच्यते । यत्रयत्र गुणवृद्धी श्रूयेते[1] तत्रतत्रेक्परिभाषोपतिष्ठते इति । व्युत्पन्नाव्युत्पन्नप्रतिपत्तृभेदादेतौ यथोद्देशकार्यकालपक्षौ । यथेष्टं च[2] भाष्यकारेणानयोः परिभाषयोस्तत्रतत्र समाश्रयणादेव प्रामाण्यम् । तथाहि । यथोद्देशपक्षमाश्रित्य अरुंतुदः इत्यत्र "पूर्वत्रासिद्धम्" (८।२।१) इत्यनेनासिद्धं बहिरङ्गमन्तरङ्ग इति पूर्वस्मिन् परिभाषाकार्ये कर्त्तव्ये परस्य संयोगान्तलोपस्यासिद्धत्वम् । तेनान्तरङ्गाभावादसिद्धं बहिरङ्गमन्तरङ्ग इति न प्रवर्त्तते । तेन संयोगान्तलोपः सिध्यति । अन्ये तु यथोद्देशं संज्ञापरिभाषमित्यस्मिन्पक्षे जीवताद्भवानित्यत्र परत्वेन "ङिच्च" (१।१।५३) इत्यस्मात् "अनेकाल्शित्सर्वस्य" (१।१।५५) इति सर्वादेशं तातङमाहुः । तत्तु न शोभनम् । यतस्तातङो ङित्करणं गुणवृद्धिप्रतिषेधार्थम्, अन्तादेशत्वे हि ङित्करणमनर्थकं स्यात् । "एरुः" (३।४।८६) इत्यस्यानन्तरं तिह्योस्तादाशिष्यन्यतरस्यामित्येवमन्तस्य सिद्धत्वात् । तथा च भाष्यम् । एरुप्रकरण एव ब्रूयात्[3] तिह्योस्तादाशिष्यन्यतरस्यामिति । नन्वेरुप्रकरणे तिह्योस्तादिति कृते "विदेः शतुर्वसुः" (७।१।३६) इत्यनेन नित्यवसुरादेशः स्यात् । न । प्रज्ञादिगणे विदन्निति पाठाद्विकल्पेन वसुर्भविष्यति । नन्वेवमपि जीवतात्त्वमित्यत्र परत्वात्तातङादेशेन[4] "अतो हेः" (६।४।१०५) इति लुगभावो युक्तः । नैतत् । पूर्वविप्रतिषेधेन लुकं बाधित्वा तादादेशविधानात् । कार्यकालपक्षमाश्रित्य नार्कशो नार्पत्यमित्यत्र 'असिद्धं बहिरङ्गमन्तरङ्गे' (परि. ६९) इति परिभाषया खरवसानयोर्विसर्जनीयो न भवति । तदुक्तम् । न वा बहिरङ्गत्वादिति । तथा "झलो झलि" (८।२।२६) "ह्रस्वादङ्गात्" (८।२।२७) इत्यादौ सप्तमीपञ्चमीनिर्देशानां "तस्मिन्निति निर्दिष्टे पूर्वस्य" (१।१।६६) इत्यादिपरिभाषासु कर्तव्यास्वसिद्धत्वाभावो दर्शित इति ॥ ११६,११७ ॥

गणकार्यमनित्यम् ॥ ११८ ॥

तेन श्वसः शीङश्च "अदिप्रभृतिभ्यः शपः" (२।४।७२) इति शब्लुकोऽभावात् 'न विश्वसेत् पूर्वविरोधितस्य' 'मण्डपे शयामि किमतः परम्' इत्यादि सिध्यति । शयामीत्यात्मनेपदानित्यत्वेन परस्मैपदम् । तच्चात्मनेपदानित्यत्वं फणादौ भ्राजृ भ्राशृ दीप्तौ इति पठित्वा पुनरेजृ भ्रेजृ भ्राजृ दीप्तौ इत्यत्र भ्राजतेः पाठात्केचिदाहुः । कथं कृत्वा । उच्यते । द्विरात्मनेपदिषु[5] पाठो नियमात्मनेपदार्थमेव । एवं च तदुपपद्यते यदि कचिदात्मनेपदिनोऽपि परस्मैपदभाजो भवन्ति । अन्ये तु राजसाहचर्याद्राजृसहचरितस्यैव भ्राजतेर्ग्रहणं न त्वेजृ भ्रेजृ भ्राजृ दीप्ताविति, तेन क्विपि भ्राक् क्विनि भ्राक्विरिति द्विष्पाठप्रयोजनं वदन्ति । तेषां चक्षिङोऽनुबन्धद्वयमात्मनेपदानित्यत्वे ज्ञापकम् ॥

१ A विधीयेते for श्रूयेते. २ A om. च. ३ P क्रियात् for ब्रूयात्. ४ A ताताङेन for तातङादेशेन. ५ A आत्मनेपदिपाठः.

गणकार्यानित्यत्वे तु ज्ञापकं क्षमूष् सहने इत्यस्य घटादित्वादेव षित्त्वे सिद्धे षित्करणम् । न च षित्त्वं " षिद्गौरादिभ्यश्च " (४।१।४१) इति ङीषर्थं स्यात् । यथा घेटष्टित्त्वं स्तनंधयीति ङीबर्थम् । आगमेः क्षमायामित्यत्र क्षमायामिति निर्देशात् ॥ ११८॥

संदेहे बहुवचनं प्रयोक्तव्यम् ॥ ११९ ॥

यथा काति भवतः पुत्रा इति । युक्तमेवेदं व्याप्तिन्यायेन बहुवचननिर्देशेन सर्ववचनानामनुग्रहात् ॥ ११९ ॥

अर्थाद्विभक्तिविपरिणामः ॥ १२० ॥

लोकसिद्ध एवायमर्थः । तथाहि ' उच्चानि गृहाण्यस्य देवदत्तस्य आमन्त्रयस्वैनम् ' इति षष्ठीं द्वितीयया विपरिणम्य[1] एनं देवदत्तमिति संबध्यते । तथा शास्त्रेऽपि यथा " आङो नाऽस्त्रियाम् " (७।३।१२०) इत्यत्र घेरिति षष्ठ्यन्तमनुवर्त्तमानमर्थादेव पर्यालोच्य पञ्चम्यन्ततया विपरिणम्यते । तेनायमर्थो भवति घेरुत्तरस्याङो नाभाव इति । एतस्या एव प्रपञ्चमाहुः " अभिधेयवल्लिङ्गवचनानि भवन्ति " इति ॥ १२० ॥

योगविभागादिष्टसिद्धिः ॥ १२१ ॥

तेन " इद्गोण्याः " (१।२।५०) इत्यत्र इदिति योगविभागेन पञ्चसूचिरित्येव नान्यः । युक्तं चैतत् । तथाहि । यदि ' इत् ' इति सूत्रं सर्वविषयं स्यात् तदा ' गोण्याः ' इति द्वितीयं वचनमनर्थकं स्यात् । ननु प्रथममिदिति सूत्रं सामर्थ्याद्विकल्पार्थं भविष्यति ततश्च गोण्या इति नित्यार्थं स्यादिति कथमनर्थकम् । उच्यते । एकयोगविषयविशेषणानां योगद्वये प्रतीतिः सर्वयोगविभागेषु । तेन यथैकस्मिन्योगे विभाषाशङ्का नास्ति न योगद्वयेऽपीति ॥ १२१ ॥

पर्यायशब्दानां गुरुलाघवचर्चा नाद्रियते ॥ १२२ ॥

तेन " आपो वा " इति वक्तव्ये " आपोऽन्यतरस्याम् " (७।४।१५) इति किमर्थमिति न पूर्वपक्षणीयम् । वैचित्र्यफलमेतत् पर्यायशब्दानामिति । यद्येवं कथं " कर्तृस्थे चाशरीरे कर्मणि " (१।३।३७) इत्यत्र लाघवार्थं कायशब्दे कर्तव्ये शरीरग्रहणं शरीरैकदेशग्रहणार्थमिति शरीरग्रहणस्य ज्ञापकत्वमुक्तं न्यासकृता । तथा " कर्णे लक्षण० " (६।३।११५) इत्यादौ सूत्रे चिह्नग्रहणे कर्तव्ये यल्लक्षणग्रहणं कृतं तल्लक्षणविशेषग्रहार्थं न्यासकृतोक्तम् । कथं वा " अनभिहिते " (२।३।१) इति सूत्रे अनुन्यासकृता लाघवार्थमनुक्त इति कर्तव्ये यदनभिहित इत्युच्यते तेनाभिमुख्येन नैरन्तर्येण यदप्रतिपादितं तत्रायं प्रतिषेध इत्युक्तम् । उच्यते । यत्र ज्ञाप्यं न विद्यते तत्र वैचित्र्यार्थमुच्यते । यत्र तु ज्ञाप्यं विद्यते तत्र नोच्यते वैचित्र्यार्थमिति ॥ १२२ ॥

अगत्या हि खलु परिभाषाश्चाश्रीयन्ते ॥ १२३ ॥

इदमपि वचनं युक्तमेव । परिभाषा हि नाम न साक्षात्पाणिनीयवचनानि किं तर्हि नानाचार्याणाम् । तत्र पाणिनीये शब्दानुशासने यत्रैव कचिदिष्टविषये मुख्यलक्षणेन

---

१ B P परिणम्य for विपरिणम्य.

ने[1] सिद्धिस्तत्रैता गत्यन्तरमपश्यद्भिराश्रीयन्ते ; यत्र त्वेतत्समाश्रयणे दोष एव प्र[2]सज्यते तत्र नाश्रीयन्त एव । एतेन परिभाषाश्रयणेन नानिष्टासञ्जनं कर्त्तव्यमित्युक्तं भवति ॥१२३॥

व्यवस्थिताविभाषयाऽपि कार्याणि क्रियन्ते ॥ १२४ ॥

जातिपक्षसमाश्रयणस्यायमर्थः पठ्यते । जातौ हि पदार्थे सकृदेव लक्षणं प्रवर्त्तते । भावाभावौ च विकल्पः । तत्र लक्ष्ये जातिमाश्रित्यैकत्र लक्ष्ये भावः सर्वत्र कृतो भवति । जातेरेकत्वात् । एतावतैव च विकल्पस्य चरितार्थत्वात् । विशिष्टविषयेऽवस्थिताभावाविकल्पे व्यवस्थितविभाषेत्युच्यते । तेन " अचि विभाषा " (८।२।२१) इति लत्वं प्राण्यङ्गे नित्यमेव विधीयते गल इति । विषे तु न विधीयते एव गर इति । जातिव्यक्तिपक्षौ चाचार्येण यथेष्टमाश्रितावेव । तत्र जातेराश्रयणे " जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् " (१।२।५८) इति सूत्रं लिङ्गम् । व्यक्तेराश्रयणे " सरूपाणामेकशेष एकविभक्तौ " (१।२।६४) इति सूत्रम् ॥ १२४ ॥

अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति ॥ १२५ ॥

तेनावेः को "यावादिभ्यः कन्" (५।४।२९) इत्येवमादीनामपि प्रत्ययसंज्ञा भवति । तथा हि । त्रिविधाऽर्थवत्ता लौकिकी अन्वयव्यतिरेकसमधिगम्या प्रतिज्ञाप्रापिता च । तत्र लौकिकी तावत्पद एव नास्ति किं पुनस्तदेकदेशस्य । प्रवृत्त्यैव निवृत्त्यैव शब्दो लोकेऽर्थवान् भवति । वाक्य एव प्रवृ[3]त्तिनिवृत्ती दृष्टे इति तस्यैव लौकिकी । अन्वयव्यतिरेकसमधिगम्या यथा ण्वुलादीनां कर्त्रादिः । प्रतिज्ञाप्रापिता यथा किबादीनां कर्त्रादिः । न ह्यसावन्वयव्यतिरेकसमधिगम्या । किबादीनां व्यतिरेक एव नान्वयः श्रवणाभावात् । तदेवं प्रतिज्ञाप्रापितार्थवत्ता या तत्फलमेवानिर्दिष्टार्थाः प्रत्यया इति यस्मात्तैर[4]प्यर्थं प्रतियन्तीति तेऽपि प्रत्यया एव । अत्राहुः । ननु यथाऽनिर्दिष्टार्था इत्यनेन कन्नादीनां प्रत्ययत्वं तथा विकारागमयोरपि स्यात् । ततश्च " हनस्तः०" (७।३।३२) इत्यनेन 'हनः' इति षष्ठीनिर्देशादन्त्यनिवृत्तिपूर्वको ब्रह्महत्येत्यत्र प्रत्ययत्वात्तकारो विकारः प्रकृतेः परः स्याद्यथा "भ्रस्जो रोपधयो रमन्यतरस्याम्" (६।४।४७) इत्यत्र रोपधनिवृत्तिपूर्वको रमागम इति ॥

उच्यते । अनेन हि वचनेन यावादिभ्यः प्रातिपदिकेभ्यः पृथग्भूतानामनवयवानामेव कन्नादीनां स्वार्थिकत्वं प्रतिज्ञायते । तथाहि । यावक इत्यादावुत्पन्नेऽपि कनि प्रकृतिः स्वार्थिकैव । तदेवं यत्र प्रकृतिः पृथगर्थमाह तत्रैव नेष्टपितृधनन्यायेन विधातव्यस्याप्यर्थवत्त्वम्, विकारागमयोस्तु प्रवृत्तयोः प्रकृतेः पृथग् नार्थवत्त्वं सविकारागमाया एव प्रकृतेरर्थवत्त्वात् । यथेवं " गुप्तिज्किद्भ्यः सन् " (३।१।५) इत्यत्र सनः प्रत्ययत्वं न स्याद् गुपादिषु निन्दादेः स्वार्थस्याप्रतीतिः । उच्यते । गुपादीनां निन्दादयः स्वार्था विद्यन्त एव । यत्तूक्तं गुपादिषु निन्दादेः स्वार्थस्याऽप्रतीतेरिति तस्यायमभिप्रायः । धातोरनेकार्थत्वे कुतोऽवगम्यते प्रकृतेर्निन्दादिः सना द्योत्यते इति न पुनर्गोपनादिरपीति । सोऽपि हि प्रकृतेरेवार्थः । अत एवान्वयव्यतिरेकाभ्यां सनो निन्दादयोऽर्थाः " गुप्ति-

---

१ A P om. न. २ A सज्यते for प्रसज्यते. ३ A प्रवृत्तिर्दृष्टा. ४ A तैरपि अर्थमतीयाचिः. ५ com. om. नष्ट.

ज्किद्गुप: सन् ” (३।१।५) इत्यत्र न्यासकारेणोक्ता: । तत्रायमाशय: । अन्वयव्यतिरेकाभ्यां निन्दादिद्योतन एव सनः सामर्थ्यदर्शनं, न पुनरन्वयव्यतिरेकाभ्यामपूर्वं स्वार्थ: सनाऽभिधीयते । तस्य स्वार्थिकत्वात् । स्वार्थिकत्वं तु “ धातो: कर्मण:० ” (३।१।७) इत्यत्र न्यासेन व्याख्यातमिति ॥ १२५ ॥

ज्ञापकसिद्धं न सर्वत्र ॥ १२६ ॥

उचितमेवैतत् । ज्ञापकं नाम न बाधकमपि तु निमित्तेन सूचकम् । तत्र कचिदेवेष्टसिद्धौ व्याप्रियते न सर्वत्रेति युज्यते ज्ञापकसिद्धं न सर्वत्रेति । तेन ज्ञापकसिद्धमात्मनेपदानित्यत्वादि न सर्वत्र प्रयोक्तव्यं किं तु कचिदेव । शिष्टप्रयोगदर्शनात् ॥१२६॥

युगपदधिकरणवचनो द्वन्द्वः ॥ १२७ ॥

एकदैवैकानां चार्थाभिधाने द्वन्द्वो भवतीत्यर्थः । तेनाङ्गश्च वाङ्गश्च सौह्मश्चेत्यङ्गवङ्गसुह्मा: इत्यत्र तद्राजान्तस्य बहुत्वात् “ तद्राजस्य बहुषु तेनैवास्त्रियाम् ” (२।४।६२) इति लुक् सिध्यति । तथा देवदत्तयज्ञदत्तौ पचत: इत्यत्रैककालमेव क्रियाकारकसम्बन्ध: । अतो द्विवचनान्त एव क्रियाभ्यामभिसम्बध्यते । वाक्ये तु देवदत्त: पचति यज्ञदत्तश्चेति साधनयो: क्रियासम्बन्ध: प्रत्येकं क्रमवार्यो भवति । अत एव पचतीत्येकवचनान्तमेव प्रयुज्यते । ननु यथा द्वन्द्वे युगपदर्थाभिधानं तथा वाक्येऽपि प्राप्नोति । वाक्यसमासयोरेकार्थत्वात् । एवं च वृक्षौ वृक्षौ चेति वाक्येन भवितव्यमिति केषांचिन्मतम् । एतत्तु पापीय: प्रतिभासते—

“ न हि वाक्ये पदस्यास्ति शक्ति: सर्वार्थबोधने ” इति ॥

यद्येवं वृत्तिसमानार्थता वाक्यस्य न स्यात् । न । समुच्चयात्माभिधायकत्वे साधनसाधर्म्यात् प्रवृत्तिसमानार्थता भविष्यति वाक्यस्य । ननु यदि द्वन्द्वे पदानामेकार्थता तदा धवखदिरपलाशा: इत्यत्र सरूपाणामेकशेष: स्यात् । विरूपाणामपि समानार्थानामेकशेषो भवत्येव यथा वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डाविति । न चैकशेषे सति द्वन्द्वस्यानर्थक्यम् । तस्यैकार्थसम्पादनेनैकशेषप्रयोजनवत्त्वस्य विद्यमानत्वात् । यं विधिं प्रत्युपदेशोऽनर्थक: स विधिर्बाध्यते । यस्य तु विधे: स एव निमित्तं नासौ बाध्यते । उच्यते । द्वन्द्वपदानामेकार्थता संनिधान एव न पुनस्तदभावेऽपीति । भवति हि पदान्तरसंनिधाने पदानामर्थविशेषे वृत्तिर्यथा गौर्वाहीक: सिंहो माणवक: इति । तदेवं यद्येकशेष: स्यात्तदा धवा इत्यत्र धवार्थमात्रं प्रतीयेत न खदिरपलाशावपीति । अतो नैकशेषप्रसङ्ग: । तदेवं द्वन्द्व एकदैव प्रत्येकं सर्वार्थप्रतीतिरिति स्थितम् । तथा चोक्तम् ।

“ सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयो: ।
क्रमेणार्थप्रतीतौ तु न स्याद् द्विवचनादिकम् ” इति ॥

यत एव द्वन्द्वपदानामेकार्थत्वमत एव द्वन्द्वात्परो य: श्रूयते लभतेऽसौ प्रत्येकमभिसंबन्धमित्युच्यते । तथाहि । यद्येकतरेण सह संबन्धस्तदा परेण संबन्धोऽर्थवशादेव

१ P स्वार्थानामभिधाने. २ A क्रमवाक्ये च प्रयुज्यते. ३ A वृचौ च वृचौ चेति. B वृक्षौ च वृक्षौ च.

त्वक्षतस्य सर्वार्थाभिधायकत्वात् । यद्येवं गाङ्कुटादि-(१।२।१) सूत्रेऽपि प्रत्येकमादिशब्दसंबन्धाद्गाङादिः कुटादिः स्यात् । उच्यते । गाङ्कुटादिभ्यः (१।२।१) इति बहुव्रीहिगर्भो द्वन्द्वो न तु द्वन्द्वगर्भो बहुव्रीहिः । अन्यथा ङित्त्वात् “ आतो लोप इटि च ” (६।४।६४) इत्याकारलोपेन ‘ गण संख्याने ’ इति निर्देशो नोपपद्यते । न च वाच्यं ख्यातेस्तद्रूपम् । संपूर्वस्य ख्यातेः प्रयोगाभावोऽनभिधानात् । एतच्च “ समि ख्यः ” (३।२।७) इत्यत्र न्यासकारेणोक्तम् ॥

ननु ल्युटि परतः ख्याञादेशेन न भविनव्यमसनयोश्चेति प्रतिषेधात् । नैतत् । संज्ञायां तु उच्यते यथा विचक्षण इति । अथ वा चेञा छन्दसीति कुरुनादिगणं पठन्ति तद्बहुव्रीहिगर्भे द्वन्द्वे प्रमाणम् । तद्धि रूपमजेर्वीभावेनेति । यस्त्वाह । प्रत्यासत्त्यादिशब्दस्य कुटशब्देनैव संबन्ध इति तेन ग्रन्थेन बहुव्रीहिगर्भो द्वन्द्व एव लक्षयितव्यः । एवं च “ लोमादिपामादि० ” (५।२।१००) सूत्रे प्रत्येकमादिग्रहणं स्पष्टार्थमिति । यस्त्वाह नात्र द्वन्द्वगर्भो बहुव्रीहिरन्यथा लघ्वक्षरं पूर्वं निपततीति कुटः पूर्वनिपातः स्यादिति तदयुक्तम् । समानाचि तदप्रवर्त्तनात् कुशकाशमिति यथा । इह तु कुट शब्देऽकार उच्चारणार्थोऽस्ति ॥ १२७ ॥

पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण ॥ १२८ ॥

तेन धातूपसर्गस्यात्र दर्शने बहिरङ्गत्वेन सुटोऽसिद्धत्वात्संस्कृषीष्ट समस्कृतेत्यत्र “ ऋतश्च संयोगादेः ” (७।२।४३) इति इण् न भवति । तथा ‘ संस्क्रियते ’ इत्यत्र “ ऋतश्च संयोगादेर्गुणः ” (७।४।१०) इति गुणो न भवति । नन्वस्मिन्दर्शने समचिस्करदित्यत्र ण्यन्ताल्लुङि चङि सुटोऽसिद्धत्वात् “ दीर्घो लघोः ” (७।४।९४) इति प्राप्नोति । यदि दीर्घत्वं नेष्यते तदा [1]प्रतिविधेयं क्रियासाधनयोर्निमित्तनिमित्तभावेन सम्बन्धस्यान्तरङ्गत्वात्पूर्वं धातुः साधनेन युज्यते इतीदमेव दर्शनमिति केचिदाहुः । अन्ये त्वभ्यासव्यवायेपीति वचनादमुमर्थमाहुः ॥

ननु चेङ्किोरधिपूर्वयोरेवाध्ययनस्मरणवृत्तित्वात्केवलयोरनर्थकयोः पूर्वं साधनसम्बन्धोऽशक्यः कर्त्तुम् । तथा प्रतिष्ठते इत्यत्रादौ साधनसम्बन्धे स्थितिक्रियायाः कर्त्ता प्रतीयते पश्चादुपसर्गसम्बन्धाद्गतिरिति । तथा तिष्ठति गच्छतीति विरुद्धमर्थद्वयं क्रमभावि प्रतीयेत । तथा अनुभूयते कम्बलो देवदत्तेनोपास्यते गुरुरित्यत्र भवत्यासोरकर्मकत्वाद् भावे लकारः स्यात् । पश्चादुपसर्गेण सम्बन्धे सति सकर्मकतायां कर्मणि द्वितीया स्यात् । यदा तु पूर्वं धातुरुपसर्गेण युज्यते तदा सोपसर्गस्य सकर्मकत्वे कर्मण्येव लकारो भवति अभिहितत्वात्कर्मणो नास्ति द्वितीयाप्रसङ्गः ॥

उच्यते । आद्यं ताव[2]ददूषणम् । यस्मादिङ्किावेवाध्ययनस्मरणयोरभिधायकौ अधेस्तु द्योतकत्वम् । द्योतकत्वेनैव निपातानामभ्युपगमात् । अवश्यं चैतत् । अन्यथा यदि धातोरनर्थकत्वं स्यात्तदा धातुसंज्ञैव न स्यात् । क्रियाया अभावात् । अथानयोरस्तु गणे पाठाद्धातुत्वमेवमपि कर्त्रादौ कारके लकारो न स्यात् । अथास्त्व[3]न्धकुक्कुटवदनर्थकादेव

[1] A विधेयं for प्रतिविधेयं. [2] A तावद्दूषणम्. [3] com. reads अन्धकुक्कुर.

धातोः कर्त्रादिकारकमात्रे प्रत्ययः । एवमपि धातोरनर्थकत्वे तिङन्तमपि तदन्वितमनर्थकं स्यात् । किं च धातोरनर्थकत्वे पूर्वक्रमेण धात्वादेः क्त्वाप्रत्ययान्तस्यानर्थकत्वात्समर्थपरिभाषयाऽधीत्येत्यत्र समासो न स्यात् । तस्माद्धातुरेवाध्ययनस्मरणयोरपि, धातावुपसर्गास्तु द्योतकाः ॥ अर्थवत्सूत्रे यदेतयोरानर्थक्यमुक्तं न्यासकृता तत्रायं भावः । सत्यपि धातोरानर्थक्येऽध्यादिप्रयोगेऽर्थवत्ता भविष्यति यथा स्फटिकस्य जपाकुसुमसन्निधौ लौहित्यमिति । एवं प्रतिष्ठते इत्यत्रापि धातुरेव गमनमाह प्रशब्दस्तु द्योतकः । तथाऽनुभूयते कम्बलो देवदत्तेनेत्यत्रापि भवतिरेवानुभवने ज्ञानविशेषे वर्त्तते स चानुशब्देन द्योत्यते इत्यभ्युपगन्तव्यम् । तस्य च ज्ञानविशेषस्याभिधायी भवति सकर्मको भवतिः ॥ १२८ ॥

अन्ये तु पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेनेत्याहुः ॥ १२९ ॥

तेन "नेर्विशः" (१।३।१७) इत्यत्रात्मनेपदनियम उपपद्यते । अन्यथादौ साधनसम्बन्धे शेषत्वेन परस्मैपदप्रसङ्गादघटमानः स्यात् । तद्दर्शने चानुभूयते कम्बलो देवदत्तेनेत्यादि निरवद्यम् । संस्कृषीष्ट इत्यत्र स्विडागमाभावः सुटोऽभक्तत्वादुपदेशाधिकाराद्धोपदेशे संयोगादिमतो धातोर्ग्रहणात् । संस्क्रियते इत्यत्रापि "नित्यं छन्दसि" (७।४।८) इत्यतो नित्यग्रहणानुवृत्तिर्नित्यसंयोगादेर्ग्रहणात् । प्रतिपदोक्तसंयोगादिग्रहणाच्च "ऋतश्च संयोगादेः०" (७।४।१०) इत्यस्याभावः । अयं चार्थो न्यायसिद्धः । तथाहि । क्रिययोपसर्गसम्बन्धतादात्म्येन क्रियासाधनयोर्हि निमित्तनिमित्तिभावेन उपसर्गेण हि क्रियामभ्युपादिश्य सम्बध्यत इति निमित्तिनिमित्तभावस्सम्बन्धोऽन्तरङ्ग इति 'धातूपसर्गयोः सम्बन्धोऽन्तरङ्गः' इति ॥ १२९ ॥

समासकृत्ताद्धितेषु सम्बन्धाभिधानमन्यत्र
रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः ॥ १३० ॥

समासकृत्तद्धितेषूत्पन्नो भावप्रत्ययः सम्बन्धमाह । यथा नीलोत्पलत्वं कारकत्वं दाण्डित्वमिति । रूढ्यभिन्नरूपाव्याभिचारितसम्बन्धेभ्यस्तु न भवति सम्बन्धाभिधानम् । रूढिर्यथा तैलपायिकात्वमिति केचित्[2] । कुम्भकारत्वमित्यादौ समासादुत्पन्नो भावप्रत्ययः क्रियासम्बन्धं नाभिदधाति । किं तर्हि जातिम् । अभिन्नरूपं यथा "पूरणाद्भागे तीयादन्" (५।३।४८) इति तृतीय इत्यत्र हि भावप्रत्ययेपि कृते भागमात्रमुच्यते न सम्बन्धः । अव्यभिचरितसम्बन्धो यथा सच्छब्दः[3] । अयं सच्छब्दः उत्पत्तिमत्स्वपि पदार्थेषु[4] न सम्बन्धं व्यभिचरतीति तदुत्पन्नो भावप्रत्ययः सामान्यमभिदधाति न तु क्रियासंबन्धम्[5] ॥

इति महामहोपाध्यायश्रीक्षीरदेवकृता बृहत्परिभाषावृत्तिः समाप्ता ॥

---

१ A reads the परिभाषा as कृत्ताद्धितेभ्यः संबन्धोभिधानं भावप्रत्ययस्य and without comment closes the work. २ After केचित् B reads कुम्भकारत्वमित्यन्यः । अत्र हि समासादुत्पन्नो भावप्रत्ययः etc. ३ P महच्छब्दः for सच्छब्दः. ४ P अयं शतशब्दः सत्स्वपि पदार्थेषु. ५ P अभिदधाति तत्रेति ॥

श्रीमानशर्मनिर्मिता

बृहत्परिभाषावृत्तिटिप्पणी

(विजया)

श्रीवासुदेवाय श्रीगणाधिपतये नमः ॥

स्फुरदभिनवसारः स्फारतारोच्चहारः
प्रसभशमितदेवमातविद्वेषिवर्गः ।
विहितहितसहस्रः सेवकानां जनानां
प्रभवतु सुरवैरी बुद्धिवृद्धयै सदा नः ॥१॥

श्रीशंकराराधनलब्धशर्मा श्रीमानशर्मार्चितविश्वरूपः ।
सत्सीरदेवेन विनिर्मिताया वृत्तेर्विधत्ते विषमेषु टीकाम् ॥२॥

स्फुरदित्यादि । एषा प्रस्तूयमाना परिभाषावृत्तिरासेविता समन्तादभ्यसन्ती जाड्यजातोत्थान्त्यै विविधमौर्ख्याभिभवाय अवान्तरानेकप्रकारकाप्रशस्तज्ञानसमूहप्रध्वंसाय वा प्रभवतु समर्था भवतु । **प्रभवत्विति** । प्रपूर्वात् भवतेर्लोट् । प्रभुशब्दादाचारक्विबन्ताद्वा । चतुर्थी नमःस्वस्ति० इत्यादिना अलमर्थयोगे ॥ किंविशिष्टा । **स्फुरदभिनवरागा** । स्फुरन्प्रकाशीभवन् अभिनवो नूतनो रागोनुरागो यस्याः सा । कथम् । अधीयतां (अधीयमानानां) अभ्यस्यतां एवंरूपो ग्रहो यस्यां सा तथा । यद्वा स्फुरन्तश्चाभिनवाश्चेति स्फुरदभिनवाः । तेषां रागो यस्याम् । यद्वा स्फुरन्तश्चाभियश्च स्फुरदभि । समाहारैकत्वे क्लीबत्वे ह्रस्वत्वम् । तस्य नवो रागो यस्याम् ॥ किंभूता । **भास्करा** । दीप्तिकारिणी । पचाद्यच् । योध्ययनादिकं तस्याः करोति तं शोभयतीत्यर्थः ॥ अपि किंभूता । **भा** । प्रगल्भा । दीप्त्या ओजस्विनी अबाध्येति । अथवा **भास्कराभा** । भास्करस्येवाभा यस्याः । यद्वा भास्करा भेव भास्कराभा । इवे प्रतिकृतौ इति कनो देवपथादिभ्यश्च इति लुप् । अनया च यथा साम्यं तथा पश्चाद्योजयिष्यते । **प्रगल्भा** । प्रगल्भं करोतीति णिच्यचि टाप् ॥ पुनः किंभूता । **प्रसभशमितदोषा** । प्रसभेन हठेन शमितः प्रध्वस्तो दोषः पूर्वपक्षो यया सा तथा । यद्वा प्रकृष्टा सभा येषां ते प्रसभाः वादिनः तेषां शमितो दोषः अहंकारो यया । यद्वा सभं सदीप्तिं करोतीति णिच्यचि टापि सभा । ततः प्रकृष्टा सभा प्रसभा । सा चासौ शमितदोषा चेति ॥ अपि किंविशिष्टा । **स्फीतसश्लोकचक्रा** । सन्तश्च ते लोकाश्चेति सल्लोकास्तेषां चक्रं समूहः । स्फीतं वृद्धं सल्लोकचक्रं यया यस्या वा । यद्वा सल्लोकं चक्रयतीति सल्लोकचक्रा । स्फीता चासौ सा चेति ॥ पुनः किंभूता । **विहितहितविचारा** । विहितः कृतः हितो हितरूपो विचारो व्याख्यानं सिद्धान्तो वा यया सा । यद्वा । विशिष्टश्चारः प्रसिद्धिर्यस्याः सा विचारा । विहितहिता चासौ विचारा चेति ॥ भास्करामापक्षे स्फुरन् व्यक्तीभवन् अभिनवो रागो लौहित्यं यस्यां सा तथा । प्रगल्भा प्रतिभानवती । भास्करेति यावत् । प्रसभेन शमितं दोषा रात्रिर्यया सा तथा । अत्र पक्षे

---

(१) २·३·१६. (२) ३·१·१३४. (३) ५·३·९६. (४) ५·३·१००.

दोषाशब्दस्यानाबन्तत्वात् खर्परे शरि वेति विसर्गलोपः । अन्ये तु रात्रिवाचकपक्षेपि दोषाशब्दमाबन्तमाहुः । स्फीतं सश्लोकचक्रं संध्योपासकादि स वारिसमूहो यया सा तथा । विहितो हितकृतो यो वीनां पक्षिणां चारो गमनादिर्यया सा तथा । जाड्यजातोपशान्त्यै शीतसंततिनाशाय सेवितोपात्ता ॥

व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् ॥ १ ॥

व्याख्यानत इति । कचित्स्पष्टार्थमादौ भवतीत्यपि दृश्यते । व्याख्यानतः आद्यादित्वात् तसिः । पञ्चमी चेयं ल्यब्लोपे हेतौ वा । **प्रतिपत्तिः** । अवगमो निश्चय इति यावत् । हिशब्दस्त्वर्थे । **न तु लक्षणाभाव इति** । एतेनालक्षणमित्यर्थाभावेऽव्ययीभावमाह । प्रसज्यप्रतिषेधे नञ्समासस्य ज्ञापकसिद्धत्वात् क्लिष्टतां मन्यते । **अस्य प्रत्याख्यान इति** । एतच्चोत्तरत्र निर्दिश्यमानपरिभाषायां व्यक्तीभविष्यति । **यथासंभवमिति** । यस्या यस्याः संभवः यथा यथा संभव इति वा । वीप्सायामव्ययीभावः । नन्वगीष्कादौ क एव नास्त्यनभिधानात् इत्याशङ्क्याह । **अनभिधानं तु न वाच्यमित्यादि** । अत्र च शेषाद्विभाषेति कबभावपक्षे प्रागिवीयकप्रत्ययो न तु कप् । तथा च गतिर्न कपीति प्रतिषेधात् केर्णी इति प्राप्तिरेव नास्ति । **टकारेण प्रत्याहारग्रहणं कुर्यादिति** । एवं संदेहापनयनमपि फलमाधिकं जायते इत्याशयः । **सामर्थ्यद्वयं स्यादिति** । लोकेप्युच्यते । शक्तस्यापि द्वाववध्याविति । अत्र च उँरण् रपरः अणो प्रगृह्यस्येत्यत्र च पूर्वेण णकारेण प्रत्याहारग्रहणे युक्तिर्नोक्ता । तस्योपरि वक्तव्यस्याभावात् । अस्य च ग्रन्थकारस्यायमेवाशयः । प्रायेण परिभाषा विवेचनव्याजेन चतुर्ग्रन्थिमध्यवर्त्तिविषमवाक्यावतारणम् । अन्यथा लक्षिशृत्यैवावगतेति किमनयाधिकं कृतं स्यादिति । अत्र पुनरेषा युक्तिः । उँरण् रपर इत्यत्र पूर्वणकारेण प्रत्याहारे प्रश्चास्तॄणामिति निर्देशो लिङ्गम् । अन्यथा ऋकारस्यापि रपरत्वे प्रशास्तॄणामिति स्यात् । अणो प्रगृह्यस्येत्यत्रापि परेणाभीष्टे असंदेहार्थमट इति कुर्यात् । यत्तु तत्र न्यासकृतोक्तं 'अट इति कुर्यात् । न पदान्ता हलोणः सन्ति' इति तद् वृक्षऽँकरोतीत्युदाहरणमनभिसंधाय । **न हृदयग्राहीति** । एकस्मिन्नेव सूत्रे जातिव्यक्त्योराश्रयणात् । कचिज्जातिः कचिद् व्यक्तिरित्येवं युक्तम् । **समाहारद्वन्द्व इति** । ऋश्च ऋश्च ऋ तस्य उः । **एवं तर्हीदं ज्ञापयति** । एतेन सन्देह एव न तिष्ठतीत्यर्थः । **तत्कर्तरि चेति सूत्रे स्थिते इति** । अन्यथा अपां स्रष्टेत्यादौ कर्मणि चेति सिद्धे कर्तरि तद्योगे षष्ठी न समस्यत इति वक्तव्यमित्यनेन सह कर्मणि चेत्यस्य विषयविभागो नोक्तः । अकर्मकधातोर्भावे ल्युटः प्रयोगे कर्तरि या षष्ठी तदर्थत्वाद्यथा ब्राह्मणस्य शयनमित्यादि प्रमाणाभावादिति । पुरां भेत्ता देवदत्त इत्यनेनैव वाक्यस्य निराकाङ्क्षत्वात् कर्तरि चेति न कर्तव्यं स्यात् । तथा च क्वानुवर्त्तेत । न च नित्यं क्रीडाजीविकयोरित्यत्रापि अनुवर्त्स्यतीति वाच्यम् । यतस्तृच् क्रीडाजीविकयोर्नास्ति इति वृत्तावुक्तम् । किं च कर्तरि चेति स्थिते अपां स्रष्टेत्याद्यर्थं तेनैव प्रेष्यस्य कारयितेत्यादावपि भविष्यतीति कृत्वोत्तरार्थं तृज्ग्रहणमुच्यते । अन्यथा तु प्रैष्यस्य कारयितेत्याद्यर्थमिहार्थमेव स्यात् तृज्ग्रहणमित्यर्थः । **अण्यन्तापेक्षयोक्तमुत्तरार्थमित्येके इति** । तेषामयमाशयः । प्रैष्यस्य कारयितेति वाक्यमेव न भवति । यतः कर्तृकर्मणोः कृति इत्यनेन प्रत्यासत्तेर्यस्य कृतो यः कर्ता तत्रैवानुक्ते षष्ठी विधीयते । अत्र च ण्यन्तात् कृत् तस्य कर्त्ता स्वाम्यादिः प्रैष्यः अण्यन्तकर्त्ता । ननूभयप्राप्तौ कर्मणीत्यनेनैवात्र कृत्ताद

---

(१) सि. कौ. ८·३·३६ वा. (२) ५·४·४४ वा १. (३) ५·४·१५४. (४) ५·३·७०. (५) ७·४·१४. (६) ७·४·१३. (७) १·१·५१. (८) ८·४·५७. (९) ६·४·११. (१०) २·२·१४. (११) २·२·१६. (१२) २·४·१७. (१३) २·३·६५. (१४) २·३·६६.

ष्ठी न भवतीत्याह—**उभयप्राप्तावित्यादि** । **षष्ठी हेतुप्रयोगे इति** । यद्यपि कृत्योर्थप्रयोगे इति प्रयोगग्रहणं प्रत्यासन्नं तथापि हेतुशब्दः कर्त्तारमाह । कर्तुः प्रयोगे कर्मणो गम्यमानत्वेप्ययं नियम इति मतान्तरोपन्यास उपयोक्ष्यते । **एवं चेति** । यदि सामर्थ्यप्राप्तमुभयोरुपादानं यत्र तत्रैवायमित्यर्थः । **षष्ठीप्रसङ्गाच्चेति** । अत्र पुरां भेत्ता देवदत्त इत्यत्र नियमेनाभीष्टसिद्धिरित्यर्थः । एतच्चोभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेध इत्यनाश्रित्य । तदाश्रयणे तु राज्ञो भोजनाः शाल्य इति वेदं कर्त्तरि चेति नारम्भणीयामिति । पुरां भेत्ता देवदत्त इत्यत्रात्मनेति गम्यमानत्वादित्यर्थः । **एवं तर्हीति** । प्राचीन एव तर्हि सिद्धान्त इत्यर्थः । एवं च कार्यः कटो देवदत्तस्य इत्यत्र यः प्रयुक्तो दोषः स न लोकेत्यत्र नेति योगं विभज्य परिहार्य इत्याशयः । इन्दुस्तूभयप्राप्तौ इत्येतत्सूत्रस्थे विभाषाऽविशेषेणैव विभाषेति विकल्पेन यत्र पक्षे नियमो नास्ति तत्र कर्मषष्ठ्या कृद्योगा षष्ठी समस्यत इति समा समाचष्टे । न्यासकृत्तु शेषविवक्षायां या षष्ठी तया षष्ठीत्येव समासमाचख्यौ ॥ १ ॥

न हि कार्यी निमित्ततयाश्रीयते ॥ २ ॥

न हीति । न हीति निपातो निषेधार्थः । यथा वामनः ‘अभावे नहि नो ना च, मास्म मा न च वारणे’ इति । **गुणवृद्धिप्रतिषेधो न भवतीति** । एतच्च क्ङितीत्यादौ व्यवधानात् सतिसप्तम्यां दोषं वीक्ष्य क्ङितीति निमित्तसप्तम्याश्रितेति कृत्वोदाह्रियते । अन्ये तु क्नोः कित्वात् तत्कालपरसप्तम्यामपि स्वावयवे न व्यवधानमाश्रीयत इति आचक्षाणा अत्र गुणवृद्धिनिषेधाभावमाहुः । अत एवापरितुष्यन् उदाहरणान्तरमाह । **अरिरिषतीति** । भवतिग्रहणेनेति । तत्र गाङ्कुटादिसूत्रात् क्ङिद्ग्रहणमपि वृद्धिनिषेधार्थमनुवर्त्तत इति अर्थव्यक्तौ वा । अन्यथा वसूवेत्युत्तमे णलि च णलुत्तमो वेत्यपि च पक्षे गुणनिषेधार्थत्वे कुतस्त्या ज्ञापकता । **पिपठीरिति** । सन्नन्तात् क्विप्यतो लोपे र्वोरुपधाया इति दीर्घः । **आदेशा न भवन्तीति** । त्यादयः । रूपं च संयोगान्तलोपजश्त्वचर्त्वेष्वेकवचने युट् । अन्यत्र युष्मौ युष्म इत्यादि । **क्नौ लुप्त इति** । यतोत्रास्याः परिभाषाया उपन्यासः न ह्यजादेशाः क्नौ विषय इत्यर्थः । **इग्लक्षणवृद्धिप्रतिषेधस्तावदिति** । अयमाशयः । इग्लक्षणे हि द्वे एव वृद्धी मृजेर्वृद्धिः सिचि वृद्धिश्च । तत्र मृजेस्तावदक्ङित्येव । सिचिवृद्धेश्चाङि सति तावन्न कार्या आत्मनेपदित्वात् । कितौ च भात् द्वावेव इक् स्मरणे ओहाङ् त्यागे । तत्र प्रथमस्येण्वदिक इति गादेशादनिगन्तत्वम् । अपरस्य स्वत एव । **न्यधुवीदिति** । अत्र कुटादित्वात्सिचो ङित्वं साहचर्यादिति । गुणनिषेधे हि र्वोर्धातुकार्धधातुकयोरित्यस्येक् स्मरण इत्यादावसत्त्वात् क्ङित्त्वात्तनिमित्तकतापि संभवतीत्यर्थः । अचीत्यस्याजादेशं प्रतीति । इहाचीत्यस्य द्व्यामादेशद्विर्वचनाभ्यां कार्यकारणभावः संबन्धः । सोऽकार्यित्वेनैव न कापि कार्यित्वेन । न हि चक्रतुः पेचतुरित्यादौ यद्यणादेशादिकार्यं तदेकत्राप्यतुसादौ समवैतीति । **कार्यमनुभवन्नेव कार्यीति** । एतच्चेनिप्रत्ययेयोगादेव लभ्यते । न हि कुण्डलयोग्यतामात्रेणैव कुण्डलीत्युच्यते । अपि तु कुण्डलयोगादेव । अत्र हि सन्यङोरिति निर्देशात् षष्ठ्या योग्यत्वमस्ति प्रथमस्य द्वितीयस्येति वचनादनुभवाभाव इत्यर्थः । **प्रायिकमेतदिति** । ज्ञापकसिद्धं न सर्वत्रेति भावः ॥२॥

इतरेतराश्रयाणि कार्याणि न प्रकल्पन्ते ॥ ३ ॥

वनसिंहयोरिति । यथा सिंहावस्थानवशात् भिया वनं न छिद्यते वनगुप्तत्वात् सिंहस्य च स्थितिः सुकरा न भवन्तीत्यर्थः ॥ ३ ॥

(१) २·३·२६. (२) २·३·६४. (३) २·३·६९. (४) १·२·१. (५) १·१·१. (६) ८·२·७६. (७) ७·२·१४. (८) ७·२·१. (९) ७·३·८४.

आगमा गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ ४ ॥

अवयविग्रहणेन गृह्यन्ते इति । यथा देवदत्तोलंक्रियतामित्युक्ते तदीयः पदादिरप्यलंक्रियते । तद्गुणीभूता इत्यत्र तच्छब्देनागमिपरिग्रहः । **सर्वेषामिति** । एतदुपलक्षणं केषामिति तु बोध्यम् । अदस्तु अदः सर्वेषामिति निर्देशादपि सिध्यति । **अजादेरिति** । ईदृशं तत्रोक्तम् । प्रथमद्विर्वचने कृते यो द्वितीयद्विर्वचन एकाज् भवति तस्य स्यादेवं च द्वयोरोकारयोरवादेशे कृते अववोणिष्यतीति स्यादोणिणिषतीति चेष्यते इत्यादि । **यद्येवमित्यादि** । अत्रापि प्राग् हलादिशेषश्च कृत इत्यर्थः । **हलादिशेषः स्यादेवेति** । पूर्वमकृतत्वादित्याशयः । **प्रयोजनं न दृश्यत इति** । प्रातिपदिकान्तत्वेनैव सिद्धत्वादित्याशयः । एतत्तु केषांचिन्मतं यतस्तत्रैव सूत्रे वृत्तिकृतैवोक्तं इह पूर्वपदाधिकारादुत्तरपदप्रातिपदिकान्तस्य नकारस्य णत्वं भवतीति । तथा च नुम्ग्रहणं क्रियते इति । अयमर्थः । कुतोपि भवन्नुम् समुदायस्य स्यात् , न तूत्तरपदस्येति । कुतः । प्रातिपदिकान्तद्वारा सिद्धिः तेन समं समान आशयः । यथा प्रेन्वनामित्यत्र णत्वाभावाय यत्नः तेन च समानमिदं प्राह्णिवनीति रूपमतोऽत्रापि णत्वेन न भवितव्यमेवेति स्थितमेवास्य मते । नुम्ग्रहणस्य प्रयोजनं नास्तीति तत्र नुमो भक्तत्वज्ञापनार्थमिति यस्मिँदादादिसूत्रे रक्षितः ॥ अभक्तश्चायं नुमिति सूत्रकारपक्षः । न्यासकृता वृत्तिकृताप्युक्तम् । तदादिग्रहणं स्यादिनुमर्थमिति ॥ ४ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ ५ ॥

यथा उर्दःस्थेति । तत्र हि पूर्वस्येति अवयवनिर्देशोऽवयवश्चारम्भको भवति । न चाडागमेन स्थाधातुरारब्ध इत्यर्थः । अटश्च प्राप्तिरागमेन भक्तत्वात् । **यद्यप्येकशतमिति** । एतच्च प्राधान्येन । इतोधिका अपि संबन्धा धात्वनुसारेण प्रतिपादयितुं शक्यन्ते । एषां च कतिपये यथाप्रधानं गण्यन्तेपि । स्थान्यादेशयोः संबन्धः। तथा जन्यजनकयोः समीपसमीपिनोः संयोगसंयोगिनोः अवयवावयविनोः गुणगुणिनोः जातिजातिमतोः ज्ञाप्यज्ञापकयोः स्वस्वामिनोरित्यादि । अन्येपि भाव्यभावकसंबन्धाः कार्यकारणसंबन्धेनैव क्रोडीकृता इति । ईदृश एवाचार्यपारंपर्योपदेशः यदस्तेरादेश एव भूर्न समीपादिरिति ॥ ५ ॥

नानुबन्धकृतमनेकाल्त्वम् ॥ ६ ॥

अन्यथातोभिस ऐसिति । अयं भावः दिवं उत् इत्यादौ तकारसहितेप्यादेशे कृते तकारस्येत्संज्ञायां लुप्ते नास्त्यधिकमनिष्टम् । अतो भिस ऐस् इत्यादौ तु तथाङ्गीकारे वृक्षैरित्यादावैस् स्यात्सकाराभावात् । एतच्च " निुँणभिश्चलक्ष्णैः " इत्यादि ज्ञापकमाश्रित्य । **प्रतिपाद्यैकेत्यादि** । प्रतिपादकः संज्ञारूपः तपर इकारः । प्रतिपाद्यश्च संज्ञिरूप इकारः । तत्र संज्ञागतमनुबन्धं संज्ञिन्यारोप्य तकारेत्त्वमुक्तमित्यर्थः । यथा भ्रमरशब्दगतरेफद्वयमभिधाय प्राणिन्यारोप्य द्विरेफशब्देन प्राण्यभिधीयते इति । **तन्मतेनेति** । संज्ञागतेनापि तित्त्वेन ये संज्ञिनं तितं मन्यन्ते तन्मतेनेत्यर्थः । अन्यथा हि दिव उदित्यादिनोकारादिमात्रे एवादेशे प्रत्ययस्य इतोभावात् प्रत्ययग्रहणेन किं व्यवच्छिद्यते । **न तु तपरः समुदाय इति** । तपरत्वस्य चित्रगुन्यायेनोपलक्षणत्वादित्याशयः । **स्वंग्रहणानुवृत्त्येति** । यथा अर्ध्य च्वौ इति शुक्लीकरोति इत्यादावपि भवतीति । **इत्यत्र पक्ष इति** । 'अनयवा अप्यनुबन्धाः, उच्चरितप्रध्वंसिनः' इति सौत्रिद्-सूत्रेऽग्रहणेन ज्ञापितः । तत्र च पक्षे नानया कश्चिदर्थ इत्यर्थः । **तत्र सर्वादेशार्थं स्यादिति** । अत्र ह्यनुबन्धेनाप्यनेकाल्त्वं नास्ति लोपस्याभावरूपत्वादित्याशयः । **उपदेशे प्रत्ययादित्यमिति** ।

---

(१) ७-३-१००. (२) ७-४-६०. (३) १-३-१३. (४) ८-४-६१. (५) ६-१-१३१. (६) ७-१-९. (७) २-१-३१. (८) ७-४-३२. (९) ६-४-६२.

अत्र हि धात्वधिकारे आदेरत्वकारस्य स्यात् । अनधिकारे चेकारस्य उभयथापि न प्रत्ययादित्वम् । किं तु प्रत्ययैकदेशादित्वमिति भावः । इह ऐर्वणस्तु० इति कृते अनुबन्धेनाप्यनेकाल्त्वे सति अनिडभावान्नानया प्रयोजनं नापि शिद्ग्रहणेनेति परिभावनीयं सूरिभिः ॥ ६ ॥

वर्णाश्रये प्रत्ययलक्षणं नास्ति ॥ ७ ॥

वर्णाश्रये । वर्णमात्राश्रये इत्यर्थः । **ङीब् न भवतीति** । न त्वकारान्तात् टिड्ढाणञित्यादिना ङीप् विधीयते । तत्कथं वर्णाश्रयत्वमित्याशङ्क्याह । **ङीप इत्यादि** । **अत एवेति** । अन्यथा पञ्चमी स्यादेवेति ल्युन इति कुर्यादित्यभिप्रायः । **तदुपायान्तरमिति** । अन्ये तु न्यासकाराशयमन्यथाचक्षते । यथा ' तृणेढि ' इत्यत्र हलाद्याश्रयत्वमाधिरभिहितः तथा मोदतेर्मुदित्यत्र क्विपो हलाद्याश्रय इट् स्यादिति । अस्य पुनरागमशासनानित्यत्वाज्जेडित्याशयः । एवं चेमोप्यभावः इत्यत्समर्थन इत्युक्तम् ॥ ७ ॥

क्वचिदेकदेशोप्यनुवर्तते ॥ ८ ॥

पदैकदेशेति । उपलक्षणं सूत्रैकदेश इत्यपि बोद्धव्यम् । तथा च ज्ञापकमस्यास्तादृशमेव । **आदिग्रहणाननुवृत्तावपीति** । अन्यथादिग्रहणानुवृत्तौ तत्र शमयातामित्यादौ लेटोडाटावित्याटि कृते न स्यात् ॥ ८ ॥

अर्थवद्ग्रहणे नानर्थकस्य ॥ ९ ॥

यदा त्वतिशुन्यादाविति । तद्यथा । अतिश्वनिरदन्तवर्तिनो वन इति । **तयेद्व हिमहिति** । यदि विशेषणार्थे वर्णान्तरे कार्ये वर्णान्तरकरणं कार्यान्तरकरणार्थं भवतीत्याशयः । **समाधेयमिति** । एतच्चोत्तरत्र परिभाषायां स्वयमेव समाधास्यति । **अन्ये न क्षमन्ते इति** । श्रीपुरुषोत्तमदेवस्य सुखप्रतिपत्तिरुपायान्तरं वेत्याशयः । **असकारादित्वाच्चेति** । ऊनिमीमेत्यत्र हि स्यार्धधातुक इत्यतः सीत्यनुवर्तते । **स्वरूपविधिविषयेति** । यत्र संज्ञया अर्थाक्षेपेण वा न शब्द उपादीयते अपि तु स्वशब्देनैव तद्विषयेत्यर्थः । **अधिपरी इति** । एवं चानेनैव ज्ञापकेनानर्थकादपि सुलुक्सिद्धौ उदाहरणान्तरं प्रदर्शनीयम् । उदाहरणान्तरासंभवेपि प्रपञ्चमात्रम् । **प्रकरणेति** । यत्र लक्षणमात्रं प्रवृत्तं न प्रकर्षः इत्यर्थः । **प्रातिपदिकग्रहणादिति** । अयमप्यधिकारी अनर्थकाविर्त्यस्य ज्ञापकस्य प्रपञ्चः ॥ ९ ॥

न वर्णग्रहणेषु ॥ १० ॥

अर्थवत्परिभाषेति । धातुस्तु सोपसर्ग एव स्मरणार्थः । **न तु प्रथमत एवेति** । प्रथमतस्तु संज्ञाग्रहणमेवेत्यर्थः । यद्यपीको यणचीत्यत्रापीदं वक्तुं शक्यते तथापि तत्र प्रथमतः प्रत्याहारग्रहणम् । उत्तरकालं तत्र च इकारादयः ते कीदृशा गृह्यन्तामित्यत्र विचारः । इयं परिभाषा हेडी शल्वित्यत्र पश्चाद्विचारेपि नोपस्थातुं युज्यते तदन्तग्रहणात् । **आनर्थक्यामिति** । केवलयोस इति शेषः । **आगमप्रत्यययोरिति** । प्रत्ययग्रहणं च छन्दसि ददातेर्लुङि मन्त्रे घसह्वरेति हेलुङि छन्दस्युभयथेतीट् । आर्धधातुकत्वे ' आदि ' इति रूपे आतो लोपार्थम् । अन्यथा छन्दसवर्णलोपेनापि सिध्यतीत्येके । तत्सामान्यज्ञापकमिति । अन्यथा दीर्घविधानेप्येन-

---

(१) ६·४·१२०. (२) ४·१·१५. (३) ३·४·९४. (४) ७·४·५४. (५) १·४·९३. (६) ६·१·१७७. (७) १·२·९. (८) २·४·८०. (९) ३·४·११७. (१०) १·१·५६.

ल्विधित्वात्स्थानिवत्त्वं न स्यादित्याशयः । **न किंचिदागमस्येति** । यथा शास्त्रेपि । तत्रादिग्रहणादेतत्प्रत्ययस्यैव ङित्वम् । **प्राकरणिकस्येति** । तस्येत्यधिकारात् । **मिश्रीकरणमिति** । अन्यथा मिश्रशब्दान्ताकारस्यानर्थक्यादस्य च्याविति न स्यादित्यर्थः । एवं च प्रत्यय इत्यादि बहुविधं लिङ्गमत्र कर्तुं शक्यते ॥ १० ॥

भाव्यमानोण् सवर्णान्न गृह्णाति ॥ ११ ॥

दीर्घो न भवतीति । विधानसामर्थ्यं तु नास्ति । पर्यायार्थत्वात् । **प्रत्याय्यत इति** । एवं चान्तर्भावितण्यर्थादिणो घप्रत्ययः ॥ ११ ॥

यस्मिन् विधिस्तदादावल्ग्रहणे ॥ १२ ॥

एशीति । एवं च शितीति श एवेदिति कर्मधारयः कार्यः । इतरथा वक्ष्यमाणे कितीतिवत् प्रत्ययपरिग्रहे वर्णग्रहणं न स्यात् । **ज्ञापयतीति** । ननु व्यतिरेकफलं तन्निवृत्त्यर्थं स्यात् । उच्यते । पितो हलन्तस्याभावात् । न मिपोमस्ति । उच्यते । एवं हलीत्यपनीयानीति कुर्यात् । ननु लोटो वस्मसावपि स्तः । उच्यते । तत्रोत्सर्गेणैव गुणसिद्धेः । नन्वेवमपृक्तेपि सिध्येत् । अथात्र वृद्धिविधानान्न प्राप्नोति । एवं तत्रापि न स्यात् । एवं च विषयविभागार्थमवश्यमिदमारब्धव्यम् । उच्यते । एवं च गुणोपृक्ते इत्यप्यकृत्वा हलः स्थाने उत्तम इति कुर्यात् । ननु मिव्निवृत्त्यर्थं स्यात् । उच्यते । एवं हलीति स्थाने आडमोरिति कुर्यात् । ननु लेटोपि स्यात् । एवं तर्हि क्रिय इति निर्देशः परिभाषालिङ्गम् । यद्वा यदि मिपो व्यावृत्त्ये हल्ग्रहणं तदानीममसोरित्यस्तु । आमि सकारान्ते चेत्यर्थः । सकारान्तश्चापि लोट् वस्मसन्तो नास्तीत्यलं पल्लवेन ॥ १२ ॥

विधिविधानविधिभाजां त्रयाणां संनिधाने तदन्तविधिर्भवति ॥ १३ ॥

विधिशब्दः कर्मसाधनः । कार्यविशेषेण विशेषाणां समवाये विशेषणेन च तदन्तविधिरिति तात्पर्यार्थः । **सत्यमेतद् व्यक्ताविति** । यथेयादेशादिविध्यर्थमपि परिवर्त्येत इत्यर्थः । **जातौ तु दोष एवेति** । उदस्थादित्यादौ क्वचिदेव विषये परिभाषा कृतार्था । यत्र वचनान्तरं बाधकं तत्र न प्रवर्तेत इत्यर्थः । **वर्णविधित्वमल्विधीनां न स्यादिति** । यदि तदन्तविधिः स्यात् । अतोऽवश्यमत्र परिभाषानुपस्थानं मन्तव्यम् ॥ १३ ॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १४ ॥

संदेहविच्छेदायेति । अन्योदाहरणमार्ष्टिधूर्धुलनसहचर इत्रः इति । **तत्र करोति न करोति चेति** । करोति यथा । ऋत्विशौ स्त्यर्तिभ्यश्चेति । अत्रापि सर्तिग्रहणादेव ऋवर्णग्रहणं नास्त्यन्यथा तत्र कुर्यादिति हृधृकोर्ग्रहणमनर्थकं स्यात् । ननु यदि ह्रस्वऋकारान्ताद्भवति । तदाह । हृधृहृभ्यामेवेति नियमार्थं स्यात् । उच्यते । तर्हि कृञोर्नियमार्थत्वे वर्णग्रहणासिद्धिः ॥ १४ ॥

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ १५ ॥

कमिग्रहणं कृत्वेति । अन्यथा कमेरौणादिकसप्रत्ययेन साधितत्वात्कंसशब्दस्य कमिग्रहणेनैव सिद्धेः । अपरे तु अप्त्रादिसूत्रे नप्त्रादिग्रहणादिमानाहुः । धातुत्वाभावादिति । तत्र हि क्षिपि धातोर्वा इत्यतो धातोरित्यनुवर्तते ॥ १५ ॥

(१) ७·४·३२. (२) ७·३·९१. (३) ३·२·१८४. (४) ३·१·५६.
(५) ६·४·११. (६) ८·२·७४.

सर्वो द्वन्द्वो विभाषयैकवद्भवति ॥ १६ ॥

यद्वोद्रिक्तेत्यादि । यावता पदेन द्वन्द्वः तस्य सर्वस्यैव विवक्षा भवति । रविचन्द्राग्नयो घ्नन्तीति । **तिरोहितेति** । यत्र प्रत्येकमवयवत्वेन समुदितस्य विवक्षा यथा छत्रोपानहं सम्प्रहेशकरं, काष्ठस्थालीजलाग्नि अर्थबाधकमिति । **प्रयत्नप्रतिपाद्यमिति** । अनितरेतरवृत्ति द्विगुणादहर्ये प्रयत्नः । यथा **राहोः शिर इति** । अन्यथा शिरोमात्ररूपत्वाद्राहोर्भेदनिबन्धनसम्बन्धलक्षणा षष्ठी न स्यादित्यर्थः । **नरवानररक्षसामित्युदाहरणं** दिङ्मात्रमनेकत्वपक्षे दोषपत्तेः ॥ १६ ॥

उदित् सवर्णं गृह्णाति न सवर्णमात्रम् ॥ १७ ॥

किंत्वेवं यत्रेति । न च तत्रैकिञ्त्यकृत्वा ऐजिति कर्तुं शक्यते वृक्षावित्यादौ दोषः । **निर्देशार्थत्वेन व्याख्यातत्वादिति** । मत्वर्थे तपरमेवास्त्विति तु मैत्रेयाशयः । **सावर्ण्यमुक्तमिति** । अत्र च नाज्झलाविस्येव लिङ्गम् । **स्वात्मनि क्रियाविरोधादिति** । तस्य स्वेन निषेधकरणादित्यर्थः । यथा सुशिक्षितोऽपि नटबटुः स्वस्कन्धमारोढुमसमर्थः । **ग्रहणकशास्त्रस्येति** । अणुदिदित्यस्य ॥ १७ ॥

प्रकृतिवदनुकरणं भवति ॥ १८ ॥

णत्वे भवत इति । पदान्तस्येति निषेधादिति भावः । **निरर्थकस्येति** । क्रियार्थकशून्यस्य अनुकरणस्य तु प्रातिपदिकत्वोपयोग्यनुकार्यमर्थोऽस्त्येव । **सार्थकानुकरणे प्रकृतिवदिति** । सार्थकानुकरणे अनुकरणमपि सार्थकमित्यर्थः । **विशेषग्राहितयेति** । धाताविति विकल्पसंभव इत्यर्थः । **न शास्त्रीयं कार्यमिति** । कार्यं हि द्विविधं । विधिरूपं निषेधरूपं च । अत्र च प्रातिपदिकत्वे विधिर्धातोरन्यस्येति । धातुत्वं तटस्थं । निषेधकं च नेदं **पर्युदासे** नर्मतीति ॥ १८ ॥

विकरणेभ्यो नियमो बलीयान् ॥ १९ ॥

नित्यात् परस्मादपीति । अविशद्धो वार्थः ॥ **निष्प्रातिद्वन्द्वोति** । अतिबली । बाधकस्यापि बाधनादित्यर्थः । **सर्वेषामिति** । पुरस्तादपवादपरिभाषामनादृत्य । **अन्ये त्विति** । शेषो नियमविधौ सिद्धस्य नियमं करोति प्रेत्यते इति प्राग्यक्, पश्चादात्मनेपदमित्यर्थः । एवश्च कर्मव्यवहृत्या भाविसार्वधातुकत्वमाश्रित्य साधु । पूर्वत्र पक्षे उपजातनिमित्तपरिभाषया भवति । अत्र च पक्षे एधिष्यत इत्यादावनुदात्तङित इति विहितशेषपक्षे आत्मनेपदम् । **ऋच्छेरनादेशस्येति** । पूर्वपक्षे इदमाशङ्कामात्रम् । **नेर्गदेति**[४] । प्राचीनपक्षे तु पूर्वविप्रतिषेधेनाटः प्राङ् नियममभ्युपेत्य साधु । **असिद्धत्वबाधनमिति** । ढेशि चेति कार्ये रोरसिद्धत्वादित्यर्थः ॥१९॥

सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव॥

पुनः प्रसङ्गविज्ञानात् सिद्धम् ॥ २०, २१ ॥

एवं च संख्याशब्देभ्य इत्यादि । एक इत्यत्र हि संख्यातस्य द्विबहुत्वरूपस्य व्यावर्त्यस्याभावात् । स्वार्थातिरिक्ताया: संख्याया अभावात् । एवं द्विबह्वोरपि । **देवदत्तयज्ञदत्ताविति** । अत्र हि द्वित्वावच्छिन्ने स्वार्थे सामासिकं प्रातिपदिकं वर्तत इति नाधिका संख्या वाच्या । नापि संख्यान्तरं व्यावर्त्यते । तथा अग्रेवणमित्यत्रापि आधारप्राधान्यात्संख्याया अप्रसङ्गः ।

---

(१) १·१·१०. (२) १·१·७३. (३) ८·४·३७. (४) ८·४·१७. (५) १·१·११४.

प्राचीनं ग्रामादाम्रा इति ग्रामात्पूर्वमाम्राः सन्तीत्यर्थः । अग्रे च । प्रागेव । **प्राचीनमिति।** विभाषा चेति स्वार्थे खः । प्रागिति वाच्यमित्यर्थः । **अनभिधानात्** । शब्दशक्तिस्वाभाव्यात्। **अर्थग्रहणादिति** । प्रातिपदिकग्रहणादित्यर्थः ॥ २०, २१ ॥

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवत् ॥ २२ ॥

व्यापारस्यायुक्तत्वादिति । यथा शक्येत विधिः कर्तुमिति वचनात् इत्यर्थः । **पद-संस्कार इति** । नेन्द्रस्येति ज्ञापकात् पूर्वोत्तरपदयोः प्राक् कार्यं, पश्चादेकादेशादिरित्यपि समादधत्यन्ये । **तथा हि दिव इति** । न लोकाव्ययेत्यत्रापि यथोकारप्रश्लेषात् प्राक्सवर्णदीर्घः। **अत एवैतदर्थतेति** । अन्वार्थताप्येकसंज्ञाधिकारस्य यथा दूषयित्वा स्थाप्यते तथा अनुन्यासादिसारे अवोचामेति ॥ २२ ॥

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ २३ ॥

पञ्चमी तु पौर्वापर्यमिति । एतच्च विनापि पञ्चम्या सिद्धमित्यपरितोषेणाह— **तस्मादिति योगविभाग इति** ॥ २३॥२४ ॥

प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ २५ ॥

तत्रानुवृत्तिसामर्थ्यादिति । न हि स्त्रीस्येवंरूपः प्रत्ययः काप्यस्ति यन्निषिध्येतेत्यर्थः। **अन्यथा लघ्वीति** । ऊन्वल्लघुनि इति ह्रस्वे कृते अततक्षदित्यत्र सन्वद्भावप्राप्तिर्दोषः। स च गुरुसंज्ञासमावेशे लघुसंज्ञाप्रणयनेऽपि स्यादतस्तद्वैयर्थ्यमित्याशयः । **लक्ष्मीप्रभृति-ष्विति** । औणादिकस्य ईकारादेः स्त्रियामित्यधिकृत्याविधानादित्यर्थः । **प्रतिषेध इति**। अन्यथा श्रीरित्यादेरीकारस्य स्त्र्यधिकारे अविहितत्वात् अयुक्तो निषेधः स्यात् । **एतत्त्वनागम-मिति** । मयैवोक्तं नान्यत्रास्तीत्यर्थः ॥ २५ ॥

न स्त्रीप्रत्यये चानुपसर्जने ॥ २६ ॥

अन्यः समुदाय इति । यत्र हि पक्षे समुदायस्य प्राधान्यम् । **शास्त्रीयोपसर्जनाभाव इति** । तद्धितार्थ इत्यत्र दिक्संख्ये इत्यनुवर्तते इति पञ्चशब्दस्यैव प्रथमानिर्दिष्टत्वं न खट्वाशब्दस्येत्यर्थः ॥ **लौकिकोपसर्जनामिति** । प्राधान्योपलक्षणम् । **दीर्घग्रहणादिति** । हृदि निष्कौशाम्बिरतिखट्व इत्यत्र मा भूदित्येवमर्थम् । अत्र कौशाम्बखट्वशब्दाभ्यामेव ङीप्टापौ कृताविति तदादितदन्तनियमादेव सुलोपो न भविष्यतीति ज्ञापकम् ॥ २६ ॥

संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति ॥ २७ ॥

गौरी ब्राह्मणितरेति । गौरीतिसंज्ञा । गौरशब्दो भाषितपुंस्कः तेन पुंवत्त्वम् । **ल्स्वग्रहणादिति** । न च तद् घप्रन्तमनभिधानादाचार्योपदेशाच्च । **पितौ घः इति** । पित्त्वं प्रत्ययस्यैव भवति न समुदायस्येत्यर्थः । **प्रत्ययान्तस्य प्रतिषेध इति** । निषेधविधेरसंज्ञाविधि-त्वात् । अन्ये तु अर्थवद्ग्रहणानुवृत्त्या कृत्तद्धितान्तस्य चार्थवत्त्वात्तत्रान्तग्रहणमाहुः । **उपपद-संज्ञार्थ इति** । ज्ञापकसिद्धं न सर्वत्रेत्यनभिधानं वा ॥ २७ ॥

इति चंपाहट्टीय-श्रीमानशर्मनिर्मितायां विजयाख्यायां प्रथमोऽध्यायः ॥

एषा विषममात्रस्य वाक्यस्य स्वप्रयोजिका ।
संक्षेपतः संग्रहकृल्लोकादेव विनिर्मिता ॥

---

(१) ७·३·२२. (२) २·३·६९. (३) ७·४·९३. (४) २·१·५१.

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ २८ ॥

अभिधान इति । स्त्रियामित्यस्य प्रत्ययार्थपक्षे स्त्रीत्वं टाबादिभिरुच्यते इति स्त्रीलिङ्गानां निर्देशोऽनर्थकः स्यादिति । स हि पुलिङ्गव्यावृत्त्यर्थः । यदि चात्र लिङ्गविशिष्टग्रहणे प्रातिपदिकस्य पुंलिङ्गानां ग्रहणं स्यात्सोऽनर्थकः स्यात् । न च स्त्रीलिङ्गेनापि समासार्थः स इति वाच्यम् । कुमारशब्देनासामानाधिकरण्यात् । व्यतिरेकेण च कुमार्या अग्रहणात् । **अस्वरूपविधिविषये इति** । तेन ग्रहणवता प्रातिपदिकेनेत्यस्यां परिभाषायां यत् प्रातिपदिकग्रहणं संज्ञात्वेनार्थस्वरूपं तत्रापि लिङ्गविशिष्टस्य रोणीत्यादेर्ग्रहणं भवतीत्याशयः । **कुमारयतीति** । अन्यथा गौरिवेत्व-प्रातिपदिकस्येत्यत्रास्वरूपग्रहणात् कुमार्या इष्ठवद्भावाभावे बहुलवचनात्तु उच्यते ॥ २८ ॥

विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ २९ ॥

संप्रसारणं स्यादेवेति । ङीषोऽविभक्तित्वादित्याशयः ॥ २९ ॥

सूत्रे लिङ्गवचनमतन्त्रम् ॥ ३० ॥

तत्सामर्थ्यादिति । अन्यथा लाघवार्थं सुतैः इति कुर्यादित्यर्थः ॥ ३० ॥

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थः ॥ ३१ ॥

यदा तु यत्र द्वित्वादावर्थे इति । सुद्धेयः इत्यत्र बहुषु सुतादिधातुषु सुतिरेको बहुरारोप्यते । **तद्भेद इति** । आरोपस्थानभेदः 'सांकाश्यं चत्वारि योजनानि' इत्यत्र आरोपस्थानानां भेदो नाश्रीयत इति सांकाश्यं स्वसंख्ययैवावतिष्ठते इत्यर्थः । **विरुद्धादौ इत्यादि** । प्रमाणत्वं तत्त्वपरिग्रहाय । **अत्राहुरित्यादि** । एतच्च न भद्रमदूषि । यतोन्तरङ्गानपीति परिभाषया लुपो बलीयस्त्वमायाति न समासस्य । किं च स्वमित्यादिपदसंनिधौ नञादेशे क्रियमाणे क्व समासशङ्का । वाक्यसंस्कारपक्षे यथाकथंचिदिदं दूषणं लगतीति रक्षितोक्तिदूषणोद्धारः । असमत्स्वमिति समासविद्धरूपस्यास्माकमित्यनेन समासे कृते अनेन चासमासे साम्यं इति च सिद्धान्तः । नेन्द्रस्य सूत्रे अकारकरणसिद्धान्तस्तु नेत्यत्र प्रतिपत्तिलाघवं न इत्यत्र लाघवाभावः चतुर्थीद्वितीयाबहुवचनाशङ्का चेति ॥ ३१ ॥

गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः ॥ ३२ ॥

सुपः प्रागन्तरङ्गत्वादिति । स्वार्थद्रव्यलिङ्गसंख्याकर्माद्यात्मक इत्यभिधाक्रमेण लिङ्गस्य संख्याकर्मणोः प्राथम्यादाप् इति । एतच्च परिहृत्यापवादविषयपरिभाषामनाश्रित्य । **तत्समुदायादिति** । एकदेशस्य च शब्दयोः सत्यपि प्रातिपदिकत्वे यथायोगमनाख्यावचनत्वात् अकरणत्वात् । क्रीतान्तप्रातिपदिकस्य जातिवाचित्वाच्च शब्दस्य ङीप् । स शक्यते कर्तुमित्याशयः । **णत्वं न स्यादिति** । सुपः प्राक् समासे नकारान्तस्योत्तरपदस्य प्रातिपदिकत्वे णत्वं निष्पतीत्यर्थः । **पदत्वादैजिति** । न य्वाभ्यां पदान्ताभ्यामिति वचनात् । **शार्ङ्गरवादित्वादिति** । पदान्तत्वादतो गुणे इत्यस्याभावात् । तेन 'गति' इति लिङ्गमात्रं चेदम् । अन्यथा कारके किं भिन्नं स्यात् । **समाधेयमिति** । तिङैव संख्यादेरभिहितत्वादित्यर्थः ॥ **केचित्त्विति** । ज्ञापकसिद्धं न सर्वत्रेति वदन्तः । **उरःकेणेति** उरः कायतीत्यातोनुपसर्गे कः । **परिगणनमिति** । स्पष्टार्थं हि तत् ॥ ३२ ॥

---

(१) ४·१·३. (२) ६·४·१५५ वा. १. (३) १·३·९१. (४) २·२·६.
(५) ७·३·३. (६) ६·१·९४ वा. ४. (७) ३·२·३.

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ॥ ३३ ॥

गत्यर्थसूत्रे इति । सूत्रकृद्भाष्यकृतोराशयः संक्षेपेण लिख्यते । यद्येतावत्सूत्रं न स्यात्तदा ग्रामाय गच्छतीत्यत्र चतुर्थ्यर्थं क्रियाग्रहणमवश्यं कर्तव्यमित्यास्थेयम् । तथा च शोभनं यथा स्यात्तथा ग्रामं गच्छतीत्यत्र पक्षेऽपि स्यात् । क्रियाया हि प्रार्थनादिक्रियाव्याप्यतया कर्मत्वे तद्विशेषणस्य शोभनस्य कर्मत्वम् । तथा च कर्मणा यमभिप्रैतीति ग्रामस्य संप्रदानत्वं स्यात् । ग्रामो गम्यते इति च नित्यं न स्यात् । संप्रदानसंज्ञकेनाकर्मकत्वात् । तस्मात्सूत्रमिदमनारब्धव्यमिति सूत्रकाराशयः ॥ भाष्यकाराशयस्तु तस्मिन्नेव शोभनं ग्रामं गच्छतीत्युदाहरणे युगपत् प्रार्थनादिक्रियाभेदोऽभेदश्चास्थेयः । भेदे च क्रियायाः कर्मत्वात् तद्विशेषणस्य कर्मत्वं प्रार्थनादिक्रियाभेदेनाश्रयणे तु गतिक्रियायाः कर्मत्वाभावे तदभिप्रेयमाणस्यापि ग्रामस्य संप्रदानत्वं नास्ति । ग्रामो गम्यत इत्यादिसिद्ध्यर्थं च नित्यमभेद आश्रयितव्यः **परत्वाद्वा कर्मसंज्ञैवेति** ॥ ३३ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते ॥ ३४ ॥

इदं च ल्यब्ग्रहणं ल्यपि कृते असिद्धपरिभाषया पुनरङ्गकार्यं न प्रवर्तत इत्यत्रार्थे ज्ञापकम् । **प्रत्ययाधिकारे इति** । अधिकारस्य हि सूत्रे उपस्थानं न प्रयोग इत्यर्थः ॥ ३४ ॥

इति परिभाषावृत्तिटीकायां विजयाख्यायां द्वितीयोऽध्यायः ॥

असति संभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यात् ॥ ३५ ॥

अत एव प्राययतीति । अन्यथा प्रियशब्दात्तत्करोतीति णिचोऽधातुविहितत्वादार्धधातुकत्वाभावाद् वृद्धिर्न स्यात् । अपि त्वंचो ञ्णितीति अविशेषोपादानादार्धधातुके वृद्धिविधानं प्रमाणपरिहीणमेव । प्राययतीत्यत्र प्रियस्थिरेति प्रादेशः । **परत्वाद् वृद्धाविति** । एतच्च हृदेर्लोपो व्योः[4] बलीयानित्यनङ्गीकृत्य ॥ ३५ ॥

क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति ॥ ३६ ॥

भूते लङि अमेद्यादित्युपलक्षणं लोटि विध्यादिलिङि च बोद्धव्यम् । अपि च भूते स्मयोगे लडप्यस्त्येव मेद्यति स्मेति । **एवं चेति** । यदि न वर्तमाने क्तेन वासरूपविधिर्भवत्येवेत्यर्थः । **क्तादीनामपोद्यानामित्यस्य** ञीतः क्त इत्यस्य स्वपितृषोर्नजिङित्यपेक्षयोत्सर्गात् । घशालमित्यादौ घशात्रस्य कार्यमिति बोद्धव्यम् । तेन देवदत्तहन्तृहतन्यायो नावतरति । इत्थं हि चक्रकं पर्यवस्यति । प्रागन् प्राप्नोति स च ल्युटा बाध्यते । ल्युडपि घेन । प्रवृत्तिकाले चान्तरङ्गत्वादन् प्रवर्तितुमुत्सहते । स च ल्युटा बाध्यते । ल्युडपि घेनेति चक्रवद् ग्रहणमापतितमिति । ल्युड्ग्रहणमुक्तमिति । अन्यथा वासरूपेणैव तव्यादेः सिद्धत्वात् तन्न कुर्यादिति । तत्र लिङ्गमात्रं सत् परिभाषां ज्ञापयति । न तु सविशेषः क्तादौ वासरूपविधिर्नास्तीति ॥ ३६॥३७ ॥

नानुबन्धकृतमसारूप्यम् ॥ ३८ ॥

मूलविभुजादिभ्य इत्यस्यानर्थक्यादिति । वाक्यस्य षष्ठीसमासेपीह महाविभाषया सिद्धत्वादित्याशयः । अस्त्वन्तरङ्गत्वान्निरुपपदः, वासरूपविधिना सोपपदो भविष्यतीति । अस्यां फक्किकायां सीरदेवाशयो दुरधिगमः । सरूपयोः कयोरन्योश्च प्रसङ्गे वा वासरूपविधेरुक्तेस्तत्र विचक्षणोक्तिस्त्वात् ॥ ३८ ॥

---

(१) १·४·३२. (२) ७·२·११५. (३) ६·४·१५७. (४) ६·१·६६. (५) ३·१·९४. (६) ३·२·१८७. (७) ६·२·१७२. (८) ३·२·५ वा. २.

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ॥ ३९ ॥

तेन विभाषा दिगिति । बहुव्रीहिः खण्डशो व्युत्पन्नः । **उदात्तत्वादिति** । सेट्कादिडागमेनैवेकारादित्वं सिद्धमित्यर्थः । स्वरसिद्ध्यर्थमित्यत्राशयः स्वरोन्यथालंकृत्रादिविहित एवेत्याशयः इतिकारेण लाक्षणिकत्वात् । **निपातग्रहणादिति** । तादि वतुवत् तृतीयैकवचनान्तयोर्यावत्पुराशब्दयोर्निवृत्त्यर्थं क्रियते । तन्निवृत्तिश्च लाक्षणिकत्वादेव सिध्यति । अन्ये तु भुवंश्च महाव्याहृतेरिति भूशब्दस्यैवोवङ् जसादौ मा भूदित्येतदर्थत्वान्महाव्याहृतिग्रहणादस्या अनित्यत्वमाहुः ॥ ३९ ॥

एकदेशविकृतमनन्यवत् ॥ ४० ॥

णत्वं सिध्यतीति । तत्रेयमुपयोगमर्हतीत्यर्थः । **अच्वाविति प्रतिषेध इति** । अन्यथाऽत्यंकरणमित्यादौ अस्त्यैं च्वावितीकारस्य शब्दान्तवत्त्वादेव ल्युनः प्राप्तिर्नास्तीति निषेधो न क्रियेतेत्यर्थः ॥ ४० ॥

क्वचिद्विकृतिरपि प्रकृतिं गृह्णाति ॥ ४१ ॥

तस्माद्धेधा घ्विति । अत्र हि दाप्धाञोरपि ग्रहणार्थमाकारान्तयोरेवोपादानमित्यर्थः । एवं चास्याः प्रामाण्यं भाष्यकारादिभिरङ्गीकरणात् । यथा विभक्तौ लिङ्गविशिष्टस्याग्रहणमित्यदोषः ॥ ४१ ॥

बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ४२ ॥

यथा काकेभ्य इति । भ्रान्तीयो दृष्टान्तः । न्यासादौ त्वीदृशः प्रायेण दृश्यते । यथा देवदत्तशालायां ब्राह्मणा भोज्यन्तामित्युक्ते यदि देवदत्तोऽपि ब्राह्मणो भवति तदा सोपि भोज्यत एव । अदः सर्वेषामित्येतमपि निर्देशमस्या ज्ञापकमाहुः । अन्यथा सर्वं विहाय सर्वनामानीत्येवं स्यात् ॥ ४२॥४३ ॥

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥ ४४ ॥

न्यासे समर्थनमयुक्तमिति । उपायान्तरत्वेन स्पष्टार्थत्वेन वा अयुक्तमेवेति मन्तव्यम् ॥ ४४ ॥

नानुबन्धकृतमनेजन्तत्वम् ॥ ४५ ॥

लक्षणपरिभाषात्र न प्रवर्तत इत्यादि प्रामाण्यं न स्यादिति । दाप्पदनिषेधस्य कृतार्थत्वे दैप्ग्रहणे प्रामाण्याभावादित्यर्थः । **अदाविति तु कृते इति** ॥ एतच्चापिदिति कर्तव्ये यददाविति कृतं तदुभयग्रहणमित्यन्येनापि प्रायेण संगच्छते । अत्रापि दाप्ग्रहणे दैप्ग्रहणे किं प्रमाणमिति पृच्छति । किमुत्तरणीयं स्यात् । घुसंज्ञासूत्रे लाक्षणिकपरिभाषानुपस्थाने गामादाग्रहणेष्वविशेष इति परिभाषा जागर्तीत्येव । दा इत्यस्य ग्रहणं यत्रेति बहुव्रीहिणा सूत्रमभिप्रेतमित्यादिना हेत्वन्तरं वक्ष्यति । तच्च शोभनतरम् । यतोपिदिति कृते अविद्यमानः पित् यस्मात्वर इति आकाङ्क्षायां प्रणिददातीत्यादौ लोडुत्तमादौ दोषः ॥ ४५ ॥

चानुकृष्टं नोत्तरत्र ॥ ४६ ॥

इयं परिभाषा स्वरितत्वानासञ्जनप्रपञ्चः ॥ ४६ ॥

---

(१) ८·२·७१. (२) ३·२·५६. (३) ७·४·३२. (४) १·१·२० (५) ७·३·१००. (६) १·१·२०.

मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ ४७ ॥

आबन्तेष्वपि न डाप्चाबन्तयोः पूर्वोक्तात्कारणादिति । इत्यमत्र देश्यम्–ननु यदि पूर्वोक्तात्कारणात् अप्रत्यय इति निषेधात् डाप्चापोः प्रातिपदिकत्वं नास्ति तथा टापोपि तथैवेति तत्त्यागः किमर्थः । यदपि परस्याभिमतं खट्वार्थमाप्ग्रहणमनर्थकम् । अकः सवर्णे दीर्घ इत्यस्य पूर्वं प्रत्यन्तवत्त्वे खट्वादौ प्रातिपदिकग्रहणेन ग्रहणात् वक्ष्यामीति तत्त्यागः कृतः । तदेतदपि वक्तुं चापि नोचितायते इति तस्योपन्यासः किमर्थः । **विभाषा कब्विधिप्रसङ्ग इति** । घेर्ङितीत्यत्रापि कर्तृशब्दस्य ऋकारान्तत्वादिकारोकारान्तस्य घिसंज्ञाविधानात्कुतो गुणप्राप्तिरिति । **तथा पुंलिङ्गाद्भवितव्यमेवेतीति लक्ष्यते इति** । अत्रापि यदि पुंलिङ्गाद्भवितव्यमेव तदा कोडाशब्दात्प्रतिषेधानर्थक्यम् । यतोऽसत्यपि प्रतिषेधे कल्याणकोडी कल्याणकोडेति यद्रूपद्वयं तत्सत्यपि प्रतिषेधे तदेवेति । अत्र च समर्थना न सुकरेति सीरदेवेनोपेक्षितम् । व्याख्यायकास्तु कुशकाशावलम्बनमाचरन्ति । प्यङोकार उच्चारणार्थस्तेन सवर्णदीर्घाभावात् चाप्याबन्तत्वाशङ्का नास्तीति प्रथमे समाधिः । मातृजमातृकमातृष्विति वर्धुनि बहुव्रीहाविल्यत्र वार्तिके यस्मात् मातृकयोर्बहुव्रीहावुत्तरपदत्वेनाश्रयणं तज्ज्ञापकं शेषाद्विभाषेत्यतोन्यस्यापि कपो वैकल्पिकत्वमिति । सा द्वितीयेति समर्थना । शेषो घ्यसखि इत्यत्र यू इत्यस्याननुवृत्तौ सामान्येनापि शेषे आश्रीयमाणे योऽत्र गुणमाशङ्कते तस्य मन्दधियो भ्रमनिराशायापि ङिदिति विधानादित्युक्तम् । तत्र यू इत्यनुवर्तते । तेन ऋकारान्तस्य घिसंज्ञैव नास्तीत्ययं वा सिद्धान्तो भण्यतामयं वेति को दोषः इति तृतीये समाधानम् । कोडाशब्दस्य निषेधसामर्थ्यात् शेषाद्विभाषेति कप् भवति । तेन कल्याणकोडाकेति न भवति । अन्यथा सत्यपि प्रतिषेधे कल्याणकोडी कल्याणकोडा कल्याणकोडिकेति स्यादिति तृतीयः सिद्धान्तः ॥ ४७ ॥ ४८ ॥

अकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्तयन्ति ॥ ४९ ॥

लाक्षणिकपरिभाषाबाधनात् सामान्यग्रहणमुक्तमिति । एतच्चोपदान्तादित्यभिधानात् कल्प्यते । तच्च का उखा कोखा का उषिता कोषिता इत्यत्र मा भूदित्येवमर्थं क्रियते । अत्र चाद्ये अर्थवत्परिभाषया द्वितीये लक्षणपरिभाषया व्यावृत्तिः सिद्धेति किं तेन । तदुक्तं शाप्यविइह विशेषमनपेक्ष्य उम् संगृह्यते इति । **भाधिकारात्प्राग्ये असिद्धाधिकारमाहुरिति** । तेषां च मते पपुष इत्यादौ परिभाषाया अप्रवृत्तिरनित्यत्वात् ॥ ४९ ॥

निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ ५० ॥
एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ॥ ५१ ॥

ग्रहणं माऽतदर्थे भूदिति । अतदर्थ इत्यनेन यतोऽनावतदर्थे इति सूत्रमुपलक्ष्यते । अत्र ङ्यस्य डित्वं प्रथमपरिभाषास्तित्वे ज्ञापकम् । ङ्यतो द्वितीयपरिभाषायाः । **वसोरपि द्व्यनुबन्धकत्वमिति** । तच्चाकारस्येत्संज्ञायां कृतायां हलन्त्यमित्यत्रोपदेशाधिकारमनङ्गीकृत्य । **एकानुबन्धकेत्यादि** । अयमाशयः । अस्याः परिभाषायास्तत्रोपस्थानं यत्र किंचिदेकानुबन्धकं किंचिद् द्व्यनुबन्धकं च । तत्र क्वसुः द्व्यनुबन्धकः । स्थानिवद्भावेन यदि वसुरपि द्व्यनुबन्धकः स्यात्तदा कथं

---

(१) ६·१·१०१. (२) ७·३·१११. (३) ६·१·१४ वा. (४) ६·१·१४.
(५) ५·४·१५४. (६) १·४·७. (७) ६·१·९६. (८) ६·२·१५६. (९) १·२·३.

तदुपस्थानं स्यात् । तथा च कुत्र कर्तव्ये स्थानिवद्भावः स्यात् इति । एवं च स्थानिवद्भावा-द्भाङ् वसोरेकानुबन्धकत्वात्प्रवृत्ता परिभाषा न स्थानिवद्भावेनापसारयितुं शक्यते । अतः ङकारद्वयकरणेन वसोः उकारकरणसामर्थ्याद्वा अस्याः परिभाषाया अनुपस्थानं वैसोः संप्रसारण-मित्यत्रास्त्येवम् । **यतोऽसति ङकारे निरनुबन्धकपरिभाषाया इहाव्यापारे प्रमाणं नास्ती-ति ।** ङकारे सति गाङ्कुटादिभ्य इति कृते निरनुबन्धकत्वमेव नास्तीति सा परिभाषा न प्रवर्तते इत्यर्थः । एतच्च वचो न प्रतिसंधानसहम् । यतो न चैवं वाच्यमेवं हीत्यादेरिदं तात्पर्यम्—यदि गाङ्कुटादिभ्य इति कृते गाङः सानुबन्धकत्वात्तद्ग्रहणेन न भवितव्यं तदानीं गाङादे-शस्य ङकारो व्यतिरेके कुटादिसूत्रे स्याग्रहणार्थः पर्यवसितः स्यात् । तर्हि न कर्तव्यः । स्थानि-वद्भावेनेण्धातोरिव तस्याग्रहणसिद्धेरिति । अत्र च यतोऽसतीत्याद्यनुत्तरम् । तस्मादित्थ-मत्रोपस्कारः कर्तव्यः । न चैवं वाच्यमेवं हि यदि स्थानिवद्भावेनानुबन्धः समायाति तदानीं गाङा-देशे ङकारो नैव कर्तव्यः । स्थानिवद्भावेनेण्धातोरनुबन्धागमनवदस्यापि ङकारागमने गाङ्कुटा-दिभ्य इति कृते गाङो ग्रहणमस्तु इति । यतोऽसति ङकारे अत्रानन्यार्थे चेणादेशस्यैव ग्रहणं न गाङ् गतौ इत्यस्यात्र तु प्रमाणं न स्यादिति ॥ पदसंज्ञयेति ॥ कुटिल्यनजादित्वाच्चि-मनित्यस्याप्रवृत्तेः ॥ ५० ॥ ५१ ॥

तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥ ५२ ॥

प्रथमैकवचनेति । एतच्च कस्यचिन्मते । न्यासकृता स्वौदिसूत्रे सोरुकार उच्चारणार्थो-ऽङ्गीकृतः । अन्ये तु स्वादिसूत्रे निरनुबन्धकपरिभाषया असर्वनामस्थाने इति प्रतिषेधाच्च सप्तमी-बहुवचनस्याग्रहणं वर्णयांचक्रुः ॥ ५२ ॥

स्वरविधौ व्यञ्जनमविद्यमानवत् ॥ ५३ ॥

हल्स्वरप्राप्तावित्युक्तमिति ॥ न चात्रोदश्वित्वानित्यत्र तकारे स्वरप्राप्तिरिति कुतोऽस्या विद्यमानतेति भावः । **तस्यापूर्वपदत्वादिति ।** बहुचोऽपूर्वपदत्वादित्यर्थः । **तन्न शोभन-मिति ।** तदत्र समर्थाः समर्थयन्ते । ग्रन्थाधिक्यादर्थाधिक्यमिति कृत्वा पूर्वग्रहणेनैव सर्वाभीष्टं सेत्स्यति । अन्यथा पूर्वपदग्रहणेऽपि बहुचः सार्थकत्वे बहुपूर्वशब्दस्य दिग्वाचिनः पूर्वपदसत्त्वेन कः प्रतीकारः स्यादिति ॥ ५३ ॥

क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च ॥ ५४ ॥

गम्यमानाऽपि क्रिया कारकाणां निमित्तमिति ॥ एतच्च क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति स्थानिग्रहणेन ज्ञापितम् ॥ ५४ ॥

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥
व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ५५, ५६ ॥

तदन्तग्रहणसामर्थ्यादिति ॥ अन्यथा यत्र तत्र स्वस्यैव गोशब्दस्य ह्रस्वोऽस्त्वित्यर्थः । तदन्तस्य सूत्रे अनुपात्तत्वात् । अस्य सिद्धान्तस्य क्लिष्टत्वादेकगोपूर्वादिति ज्ञापकाज् ज्ञापकसि-द्धस्यासार्वत्रिकत्वाच्च समाधिमन्ये समामनन्ति ॥ ५५, ५६ ॥ ५७ ॥

---

(१) ६·४·१३१. (२) १·२·१. (३) १·२·१७. (४) २·३·१४. (५) ५·२·११८.

स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेपि ॥ ५८ ॥

उदाहरणान्तरमिति । एतच्च रक्षितग्रन्थं दूषयितुम् । एवमन्यत्रापि ॥ **अथास्तु पद्भाव इति** ॥ अभ्युपगमवादोऽयम् । पादः पदित्यत्र योगविभागेन भानधिकाराद्वा । **तथा हि विभक्तिपादेऽपीति** ॥ एतच्च विभक्तिपादे परिभाषाया अभावादत्र तत्र रक्षितग्रन्थं दूषयति

व्याकारसारसारण्यभास्वद्रण्यगणाग्रणीः
क्षीरदेवो लसद्विप्रः तन्त्रदीपाभिभावकः ॥

अस्मिन्नित्यादि । अत्र च लाक्षणिकपरिभाषया कुतः स्याद्दिलोपप्राप्तिरिति मैत्रेयाशयः ॥ ५८ ॥

इति श्रीविजयाख्यायां परिभाषावृत्तिटीकायां तद्धितपादः ॥

संप्रसारणं संप्रसारणाश्रयं च कार्यं बलीयो भवति ॥ ५९ ॥

क्वचिदेषा न सर्वत्रेति । ज्ञापकसिद्धं न सर्वत्रेति कृत्वा । **षोपदेशसामर्थ्यादिति** । तेषां षोपदेशः सिषेवेत्यादावादेशप्रत्यययोरिति षत्वार्थः । तच्च सिजादेशस्यान्यत्वेनादेशसकाराभावान्नोपपद्यत इति उक्तार्थस्य ज्ञापकम् । **स्तौतिग्रहणादिति** । तदपि 'तुस्तु' शब्दस्य शब्दान्तरत्वे स्तौतिव्यपदेशाभावेनुपपादकं गदितार्थस्य ज्ञापकम् । **सिचो यङीति प्रतिषेधाच्चेति** । सोपि सेषिच्यत इत्यत्र षेषिच्यभागस्यान्यत्वे तथैवेत्यर्थः । तत्त्वाध्यवसायः पूर्वरूपारोपः ॥ ५९ ॥

उभयत आश्रये नान्तादिवत् ॥ ६० ॥

ज्ञापकमप्यस्यांशंदेशीत्यत्राकृतदीर्घोंशामिति निर्देशः ॥ ६०॥६१॥६२॥६३ ॥

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ६४ ॥

तुक् न भवतीति । अचेश्चेत्यजन्तसंनिपातजो ह्रस्वो नाजन्ततां तुका विघातयतीत्यर्थः ॥ **शतानीति** । एतदपि ष्णान्ता षडित्यत्रान्तग्रहणात् लाक्षणिकौपदेशिकपरिभाषाभ्यां च सिद्धमिति वदन्तः प्रपञ्चार्थमेवैतत् केचिदाहुः । अपरे तु स्वरादौ तिसृचतस्रोः पाठान्न विर्दैन्तद् इत्यस्य क्षीबनिषेधे दीर्घप्राप्तावश्यकार्यतया ज्ञापकताया असमर्थत्वान्नास्याः प्रमाणमित्याचक्षते । **यस्येति लोपः सिध्यतीति** । अन्यथाकारसंनिपातेनेञ् विहितः कथमकारलोपनिमित्तं भवेत् । एवं या सेत्यत्रापि विभक्तिसंनिपातजष्टाप् कथं तदानन्तर्यं विहन्यात् ॥ ६४ ॥

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ ६५ ॥

राज्ञो राज्ञेति । राजशब्दस्य कनिन्प्रत्ययान्तत्वादनः सार्थकत्वं, सुदामेत्यस्य मनिन्प्रत्ययान्तत्वात्तदेकदेशस्यानोऽनर्थकत्वम् । **सुप्रथिमेति** । पृथोर्भावः प्रथिमेति शोभनः प्रथिमा यस्याः सा सुप्रथिमा । अत्रापि इमनिच एवार्थवत्वं न मनः ॥ ६५ ॥

वार्णादाङ्गं बलीयः ॥ ६६ ॥

गुण एव भवतीति । न चात्र परत्वमस्ति यणोन्तरङ्गत्वात् ॥ ६६ ॥

---

(१) ६·४·१३०. (२) ८·३·५९. (३) ८·३·११२. (४) ५·२·६१.
(५) १·२·२८. (६) १·१·२४. (७) ६·४·४. (८) ६·४·१४८.

यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवत् ॥ ६७ ॥

न्यासकृता त्वसिद्धमिति । एतत्संहिताधिकारेपि कश्चिदसिद्धपरिभाषामभ्युपेत्या-सिद्धत्वाद्यागचोरानन्तर्याभावात् । **शिण्ढि पिण्ढीति** । अन्यथा अशेोरल्लोप इति अजादेशे प्राप्नुवतः परसवर्णविधौ स्थानिवत्त्वस्य प्राप्तिरेव नास्तीति निषेधो निष्फलः स्यात् ॥ ६७ ॥

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ ६८ ॥

अत्रात इति स्थानीति । अतोयू इत्यतो मण्डूकप्लुत्या अत इत्यनुवर्तनीयमित्यर्थः ॥ **यथा कथंचिदिति** । यङ्लुकः प्राक् द्विर्वचनेनापि सिद्धेरिति यथाकथंचिच्छब्दार्थः । **अकर्तृवाचिनीति** । यद्यपि कृत्त्वात् कर्तरि कृदिति प्रत्ययार्थः कर्ता युज्यते एव तथापि धातुनिर्देशे विधीयमानः श्तिप् कर्तारमभिधातुमसमर्थः इति भावः । **भवतिनिर्देश एवोच्यत इति** । नन्वेवं 'अन्यथा श्तिकरणमनर्थकं स्यात्' इत्युत्तरो न्यासग्रन्थः कथं संगच्छताम् । उच्यते । अनर्थकमयोग्यमनुपपन्नमित्यर्थः ॥ ६८ ॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ६९ ॥

बहिरङ्गस्येति । अन्यपदाश्रितत्वात् । **ग्रामणीति** । अत्रापि प्रातिपदिकस्य नपुंसकस्य समाश्रयणाद्बहिरङ्गत्वम् । नार्कुट इत्यत्र बाह्यतद्धितहेतुकादिवृद्धिप्रभवत्वाद्रेकस्य । राजन्यश्चेत्यत्रापि यणादेशस्य द्विपदाश्रयत्वात् । **वहेर्णिचि न दृश्यते इति** । येन तत्र वृद्ध्यभावादूकारस्य श्रवणार्थं वृद्धिबाधनार्थमाशङ्कनीयमिति भावः ॥ ६९ ॥

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ७० ॥

तथाहीत्यादि । अक्षद्यूरित्यस्य बहिरङ्गस्याचोऽचोरानन्तर्ये यद्यपि नोत्पत्तिर्वृत्ता तथाप्युत्पन्नस्यैव तदस्ति । **तदानन्तर्य इति** । पचावेदमित्यत्र तु तदपि नास्तीति विशेषः ॥ ७० ॥ ७१ ॥

संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ॥ ७२ ॥

बिल्वकादित्यत्र छुपोपि लुक् प्राप्नोतीति ॥ कुकार्यं निर्देश इत्यत्र प्रमाणं नास्तीति मत्वेदमाशङ्क्यते । अन्यथा कुगागममात्रात् क विभक्त्युत्पत्तिप्रसङ्गः । अत एव कोपधाच्चेत्युत्तरग्रन्थोप्युपपद्यते ॥ ७२ ॥ ७३ ॥

धातोः कार्यमुच्यमानं तत्प्रत्यय एव भवति ॥ ७४ ॥

ओः सुपि धैर्याभ्वश्चेति । अन्यथा उवङोऽभावे तदपवादस्य यणो विधानमनर्थकं स्यात् । **आदिवृद्ध्या उपधावृद्धेर्बाधितत्वादिति** । सत्यपि संभवे बाधनं कृत्वा ॥ ७४ ॥

इति बृहत्परिभाषावृत्तिटिप्पण्यां विजयाख्यायां षष्ठोऽध्यायः ॥

तन्मध्यपातितस्तद्ग्रहणेन गृह्यते ॥ ७५ ॥

नियमं कृत्येति । लक्ष्यस्थित्या विपरीतो नियमो नाशङ्कनीयः ॥ ७५ ॥

अबाधकान्यपि निपातनानि भवन्ति ॥ ७६ ॥

प्रमादपाठावेताविति ॥ अन्ये तु तनोतेः पचौयचि साधयन्ति । गौरादिपाठाद् दीर्घं कुर्वन्ति ॥ ७६ ॥ ७७ ॥ ७८ ॥

(१) ६·४·१११. (२) ३·४·६७. (३) ६·४·८३. (४) ६·४·८४. (५) ३·१·१३४. (६) ४·१·४१.

क्वचित्समुदायेन वाक्यपरिसमाप्तिः ॥ ७९ ॥

लाघवार्थं स्वमोरिति ॥ एतद् द्विवचनयोरुपलक्षणं मन्तव्यम् । अन्यथा औरन्भावे अमि चौमिपूर्वत्वेन बाधे अयुक्तमिदमुक्तं स्यात् ॥ ७९ ॥

अभेदका इह शास्त्रे गुणाः ॥ ८० ॥

स्वामभिख्यामिति ॥ स्वं नाम ॥ ८०॥८१ ॥

सर्वविधिभ्य इड्विधिर्बलीयान् ॥ ८२ ॥

वशित्वेति । वश कान्तौ । **एवं चेति** । संप्रसारणं संप्रसारणाश्रयं चेति परिभाषामपि बाधत इयं परिभाषा । एतदर्थमेव च सर्वग्रहणं । यथोद्देशपक्षे परत्वाद्वा । एतच्च निमित्तापाय-परिभाषया सिद्धमित्याहुः । तथा हि प्राग् वृत्ते हि संप्रसारणे पश्चादकित्त्वे किन्निमित्तकं संप्रसारणमप्येवं स्यादिति किमनया ॥ ८२ ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम् ॥ ८३ ॥

युजविदेत्यकारोच्चारणादिति । एतच्च लक्षणस्थित्या । अन्यथा अकारस्योच्चारणार्थत्वेनोपपन्नत्वात् तदनुच्चारणे विदिति हलन्तोच्चारणे वा किं स्यादित्यनुपन्यसनीयमेवादः स्यात् । श्तिप्यपि पित्कार्यार्थं परिभाषाज्ञापनं च । अर्त्यादिवच्छान्दसत्वाच्छपं कृत्वा तस्यापि लुकं भवतीति निर्देशाद्बोद्धव्यम् । ग्रन्थे तु कचित् पर्याकुलं दृश्यते । तदनाकुलीकर्तव्यम् ॥ ८३ ॥

वत्स्यर्त्प्रवृत्त्येह कार्याणि क्रियन्ते ॥ ८४ ॥

कृताद्विर्वचनानामिटा भवितव्यमेवेति । एकाचामिति शेषः कृताद्विर्वचनानामित्यस्यानन्तरं द्रष्टव्यः । **घसिग्रहणं प्रत्याख्यायत एवेति** । एकाच्त्वादेव सिद्धेरित्यर्थः । **हलन्ताच्चेति** । ज्ञापकमाकृतौ । अस्ति हि तस्याविषयः । धीप्सतीत्यत्र नलोपः । व्यक्तौ वा यत्केनचिदवाचि । व्यक्तौ हि वक्तुमत्रायुक्तं युक्तिमता । दम्भेर्हल्ग्रहणस्य जातिवाचकत्वे समाख्यायमाने समीचः सूत्रस्य जातिपक्षप्रवर्तकत्वं चौरापराधसाधिना लब्धभव्यमाण्डव्यदण्डनसख्यमाकाङ्क्षति ॥ ८४ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते ॥ ८५ ॥

बहिरङ्गासिद्धत्वादिति । अस्यां तु परिभाषायामसिद्धपरिभाषा न प्रवर्तते । वचनसामर्थ्यात् । **निरपेक्षो द्रव्यमाह समवेतमिति** । प्रियकुत्सनार्थानपेक्षो निरपेक्षः । समवेतं स्वार्थे न विशेष्यम् । **सुबन्तादेव भवन्तीति** । अत्र चार्थे घकालतनेष्विति पूर्वाह्णेतरामित्यादावलुग्विधानमपि ज्ञापकं बभणति वैयाकरणगण्यमतयः ॥ ८५ ॥ ८६ ॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥ ८७ ॥

व्यक्तौ तज् ज्ञापकमिति ॥ व्यक्तिपक्षे यावन्त्युदाहरणानि तावन्त्येव सूत्राणि । तत्र प्रवाहणेयमानिनीत्यर्थं सूत्रं तन्मा भूज्ज्ञापकम् । यत् प्रवाहणेयीभार्य इत्यर्थं तदधिकृतायां ज्ञापकमेवेत्यर्थः ॥ ८७ ॥

---

(१) ६·१·१०७. (२) ७·४·५६. (३) ६·३·१७.

गर्भवद्भावादयो भवन्ति ॥ ८८ ॥

यका सकेति न स्यादिति । अयं भावः । प्रत्ययेनेति परेण सुपि च भवितव्यम् । सुपि च विहिते तेनैव परशब्दस्यावष्टब्धत्वात् टादिर्न स्यात् । न च वाच्यमेवं धातोः स्यादयोपि न स्युः लकारेण परदेशस्यावष्टब्धत्वात् । यतः स्यतासी लृलुटोरित्यादिवचनसामर्थ्यात्तदुत्पत्तिः । **सुपः परेण स्यादिति ।** व्यवहितेपि परशब्दस्य प्रवृत्तेः । बाल्यात्परं वृद्धत्वमितिवत् । न ह्यत्राधिकाव्यवहितकारणं निर्दिष्टग्रहणादिकमस्तीत्याशयः । इत्थमेव च स्वार्थिकानां प्रत्ययानां सुबन्तात्परेणोत्पत्तिरुपपादिता भवति ॥ ८८ ॥

विधौ परिभाषोपतिष्ठते नानुवादे ॥ ८९ ॥

क्ङिति चेत्यत्र विधेयत्वं प्रतिषेधस्य । गुणवृद्ध्योस्तु निषेध्यत्वेनानुवादः । **ऊदीचामातः स्थाने इति ।** अत्र ह्यकारस्येत्वं न विधीयते किं त्वकारविशेषणार्थमाकारमनूद्य आकारस्य स्थाने योकारः तस्येत्वमित्यनुवादविषयोयम् । **संख्याव्ययाभ्यामिति ।** एतच्च परिभाषाया एव ज्ञापकम् । यदि ह्यनुवादेपि परिभाषोपतिष्ठेत तदानीं पञ्चमीनिर्देशे तस्मादित्युत्तरस्येति छिद्रादिग्रहणमकृतं स्यादिति । **अव्यापिका चेयमिति** तु प्रमादतः । अन्यस्त्विति बोद्धव्यम् – यदि पुनर्ह्यद्यादिवद्धि विधौ वृद्ध्याद्यर्थमादिग्रहणमेतच्च पंचमीनिर्देशेन लभ्यते तस्मादित्युत्तरस्येति वचनात् तदानित्यत्वे ज्ञापकं भवति । यतोनुवादेत्र क परिभाषोदय इति कृत्वा । परं तु त्रिपदे बहुव्रीहौ न स्यादित्युत्तरो ग्रन्थस्तदागच्छते ॥ अत एकत्रावश्यं प्रमादः ॥ ८९ ॥

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणं भवति ॥ ९० ॥

अर्ह इति । तेन पूजार्हीत्यत्रापि ङीप् सिध्यतीति भावः ॥ ९० ॥

अङ्गवृत्तेः पुनरङ्गवृत्तावविधिर्निष्ठितस्य ॥ ९१ ॥

अङ्गवृत्ते इति । न्यासकारो वर्तनं वृत्तमङ्गवृत्तेः अङ्गकार्यस्य प्रवृत्तौ सत्यामिति निर्विकल्पमाह । प्रथमापि तत्संस्करणे पश्चाद्भक्ष्यत्यत्रैव भवत्येषा परिभाषा अङ्गवृत्ते इति । अकारान्त आदेशे स्वरदोषं मन्यते । **निष्ठितस्येति ।** लक्ष्यदर्शादुच्यते न तु ज्ञापकमीदृशस्य लभ्यते ॥ ९१ ॥

पूर्वत्रासिद्धीये न स्थानिवत् ॥ ९२ ॥

पापक्किरित्यादौ क्किन् क्रियां क्किजिति न शक्यते । ण्यार्श्रन्यो युजिति अप्रत्ययादिति च बाधितत्वात् । **अज्झल्समुदायस्य लोपे कृते इति ।** अतो लोपे यस्य हल इति यलोपे त्ववश्यमेवास्थेयमित्यवधेयम् । **पोपुव इत्यादेः सिद्धत्वादिति ।** एतच्च समुदायगतं स्थित्वमवयवे यलोकारे उपचर्य क्ङिति गुणनिषेधसिद्धेरिति बोद्धव्यम् । **दनीध्वंस इति सिध्यतीति ।** अचि अनिदितामिति यलो ङकारस्य स्थानिवत्त्वेन लोपो न भवतीत्यर्थः । **तथा सनीस्रंसक इति ।** अन्यत्र प्रत्येकमित्यस्योदाहरणमिदम् । तत्र यलोकारस्य स्थानिवत्त्वादनिदितामिति नलोपो भवत्येव । **विषयसप्तमीं चाश्रित्येति ।** अत्र ह्यपरनिमित्तत्वात्स्था-

---

(१) ३-१-३३. (२) १-१-५. (३) ७-३-४६. (४) १-१-६७. (५) ३-३-९४. (६) ३-३-१०७. (७) ६-४-४८. (८) ६-४-४९. (९) ६-४-२४.

निवद्भावस्याविषयता । **अन्ये त्वाहुः । हलचोरादेशे न स्थानिवदिति ।** एतन्नाल्लोपीत्येन ज्ञाप्यत इति शेषः । एतच्च त्रिमुनिपक्षे । तेन परिभाषा कात्यायनवचनात्सिद्धैवेति ॥ **अन्ये च बहवो दोषा इति ।** विंशं शतमित्यत्र ति विंशतेर्डितीति तिलोपस्य स्थानिवत्वात् अतो गुणे यैस्येति लोपे अन्तरास्थितिवस्वादाभीदसिद्धेश्च । उपद इत्यादौ प्राचामुपादेरिखुपेन्द्रदत्तशब्दादडाचि ठाजादावूर्ध्वमिति लोपे अतो गुणे यैस्येति लोपो वा न स्यादित्याशयः । **तदेवं यदा नाज्व्यपदेशस्तदाऽवादेशो वक्तव्यः स्यादित्युक्तमिति ।** नन्वज्व्यपदेशपक्षे स्थानिवद्भाव एव नास्ति । तत्कुतोऽवादेशस्य वक्तव्यता । उच्यते । नकारोत्र लेखकप्रमादकृतः । **द्विर्वचनग्रहणादिति ।** अन्यथा दध्यत्रेत्यादावनयैव सिद्धेः किं तेन । **इतरेतराश्रयत्वमिति।** एतच्च वेतस्वानित्यत्रापि बोद्धव्यम् ॥ ९२ ॥

उपजातनिमित्तोप्युत्सर्ग उपजनिष्यमाणनिमित्तेनापवादेन बाध्यते ॥ परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते ॥ ९३, ९४ ॥

अदादेशेन बाध्यत इति । वचनसामर्थ्यं तु नास्ति । जक्षतीत्यादौ चारितार्थ्यात् । **अत एव चेति ।** परिभाषाद्वयं ज्ञापयितव्यमित्यर्थः ॥ ९३॥९४ ॥

णौ कृतं स्थानिवत् ॥ ९५ ॥

औजढदिति । अत्र हि ऊढिमाख्यदिति णिचि ढकारलोपे पूर्वत्रासिद्धीयमद्विर्वचने इत्यस्याः प्रायिकत्वेन पूर्वत्रासिद्धत्वादजादेर्द्वितीयस्येति हृतशब्दो द्विरुच्यत इति कुत्रावर्णपरत्वमत्र । **एवमप्यचिकीर्तदित्यत्र दोष एवेति ।** ज्ञापकसिद्धस्य प्रायिकतया समाहितत्वादित्याशयः । एष च ग्रन्थस्तादवस्थ्य इव लक्ष्यते गतार्थत्वात् ॥ ९५ ॥

अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन् बाधन्ते ॥ ९६ ॥

एवं व्याख्यायमान इति । परिभाषाया अज्ञापितत्वादिति भावः ॥ ९६ ॥

पूर्वत्रासिद्धीयमद्विर्वचने ॥ ९७ ॥

प्रणिनायेति सिध्यतीति । अन्यथा परत्वाण्णत्वे ततो द्विरुक्तौ प्रणिणायेति स्यात् । न चास्यासिद्धत्वात् प्राग् णत्वशास्त्रस्याप्रवृत्तिः । पूर्वत्रासिद्धमद्विर्वचनादिति ॥ ९७ ॥

आगमशासनमनित्यम् ॥ ९८ ॥

पचानस्येति । आतो ङित इतीयादेशोपि नास्ति । आतिदेशिकं कार्यमनित्यमिति ङित्त्वाभावात् । **यदि तान्निर्वहति इति ।** मात्रागौरवकारिनिर्देशाश्रयस्तु पर्यनुयोगोवशिष्यते । स ग्रन्थाधिक्येन समुदायगतं पदत्वमेकदेशे उपचर्य कदाचित्सुसर्पिष्केणेत्यत्र निषेधाशङ्कानिवृत्त्यर्थतया वैचित्र्यार्थतया च निरसनीयः । **वार्ध्रीणस इत्यादाविति ।** स्वधोऽसपदत्वमित्यपि समादधति । अत एवापरितुष्यन्नाह—**मापकुम्भवापेणेत्यादि** ॥ ९८॥९९ ॥

इति बृहत्परिभाषावृत्तिटिप्पण्यां विजयाख्यायां सप्तमाष्टमावध्यायौ ॥

---

(१) ७·४·२. (२) ६·४·१४२. (३) ६·१·९७. (४) ६·४·१४८. (५) ६·४·२२. (६) ५·३·८०. (७) ५·३·८३. (८) ६·१·२. (९) ७·२·८१.

गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ १०० ॥

वृद्धचात्वे भवत इति । अन्ये पदसंस्कारे साध्नुवन्ति ॥ १००॥१०१ ॥

प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः ॥१०२॥

सनो क्त्वियादित्यादि । यदि ह्यसौ कार्यातिदेशः स्यात् तदा गाङ्कुटादिति सूत्रेणै-वात्मनेपदं विधेयमिति । न च तत्रोपदेशाधिकारोस्तीत्याशयः । अन्ये त्वेतदर्थं ङिकीति क्ङिदित्याहुः । अध्यगीष्टेत्यत्रात्मनेपदं स्थानिवद्भावेनाप्युक्तं गाङो ङकारस्यानन्यार्थत्वं प्रतिपादयता न्यासकृता ॥ १०२॥१०३॥१०४ ॥

गामादाग्रहणेष्वविशेषः ॥ १०५ ॥

शास्त्रे कार्यबाधाभ्युपगमादिति । एतेन पूर्वं क्ङिविकरणपरिभाषाकार्यं बाधितं न परिभाषैवेति । क्व । देवदत्तहन्तृहतन्यायमाचष्टे । शास्त्रे ह्यकार्यबाधाभ्युपगमादिति क्वचित्कः पाठः । स लेखकप्रमादजः । कुतः । **परत्वाल्लक्षणपरिभाषां बाधित्वेति ।** लक्षणपरिभाषा हि कर्तरि भुवः खिष्णुजित्यत्र कर्मणिपदे ज्ञापिता । निरनुबन्धकपरिभाषा तु रक्तपादे वार्मे-देवात् ड्यड्याविंत्यत्र । **अथाप्यस्ति, तथापि इति ।** माग्रहणेन ग्रहणादिति । अयमर्थः – मेनिमीमित्यत्र सूत्रे मीनातिमिनोत्यादिसूत्रेणात्वे कृते सामान्यग्रहणं न भवतीत्यत्र मीमेति ग्रहणं कृत्वा मीग्रहणं ज्ञापकम् । एवं च ग्रहणादित्यस्य तत्सदृशग्रहणात्सदृशस्यैव मिथो ग्रहणादित्यर्थो बोद्धव्यः ॥ १०५ ॥

सामान्यस्यातिदेशे विशेषस्यानतिदेशः ॥ १०६ ॥

सकारस्य स्थानिवत्त्वेनेति । विसर्जनीयागमने अटां मध्ये विसर्जनीयाभ्युपगमाण्णत्वं स्यादित्याशयः । **ग्रहो लिटीति ।** एतच्च ईटि कार्ये दीर्घग्रहणादपि साधयन्ति ॥ १०६ ॥

श्रुतानुमितयोः श्रौतः संबन्धो बलीयान् ॥ १०७ ॥

जातिपक्षेत्यादि ॥ एष ग्रन्थो जातिपक्षाविषयस्याचो रहाभ्यामित्यस्य वैयर्थ्यं न भवतीत्येवंरूपो वेदितव्यः । एतच्च हयवरडित्यत्र वृत्तिन्यासे व्यक्तम् । यत्तु जातिपक्षाश्रयणादि-हानचि चेति रेफहकारस्य द्वित्वं न भवति इति क्वचित्पाठो दृश्यते स न युक्तः । अनचि चेति अत्र यरं इत्यनुवृत्तेः जातिपक्षाश्रयणेन सिद्धान्तयितुमशक्यत्वाद्वा ॥ १०७॥१०८ ॥

विधिनियमसंभवे विधिरेव ज्यायान् ॥ १०९ ॥

नियमः । परिसंख्येति । परिसंख्या परिगणनम् । **श्रुतार्थस्य परित्यागादिति ।** यथा पतिः समास एवेति श्रुतार्थोत्र प्रजापत्यादिशब्दस्य घिसंज्ञाविधानं तत्परित्यजति विधि-त्वात् । **अश्रुतार्थस्य कल्पनादिति ।** पतिशब्दे घिसंज्ञानिषेधस्य । न ह्यत्र निषेधवाचकं किंचिदस्ति । **प्राप्तस्य बाधादिति ।** विपरीतनियमाशङ्कया यथा दृढमुष्टीत्यादौ ॥ १०९ ॥

प्रतिपदविधानाद्योगविभागो गरीयान् ॥११०॥

प्रयोजनाभावादिति ॥ पदसंस्काराश्रयणेन सिद्धत्वात् ॥ ११०॥१११ ॥

---

(१) १·२·१. (२) १·१·५. (३) ३·२·५७. (४) ४·२·९. (५) ७·४·५४. (६) ६·१·५०. (७) ८·४·४६. (८) ८·४·४७. (९) ८·४·४५. (१०) १·४·८.

अनन्त्यविकारेऽन्त्यसदेशस्य ॥ ११२ ॥

चिन्त्यमिति । स्पष्टार्थमित्यर्थः ॥ ११२ ॥

नानर्थकेलोन्त्यविधिः ॥११३॥

यथाक्रममित्यादि ॥ अलोन्त्यस्येत्यनेनैव सिद्धेः । तत्रान्त्यस्येति वचनमत्र प्रकरणे अलोन्त्यपरिभाषा नास्तीति तथाऽनार्थ्यक इति सावचि हलि चादेशे कृते अनादेशस्यैवान्त्यनकारलोपः ॥ ११३॥११४॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥११५॥

अन्यथा चेति । प्रत्ययाप्रत्ययपरिभाषया ॥ ११५॥११६॥११७॥

गणकार्यमनित्यम् ॥११८॥

चक्षिङोनुबन्धद्वयामिति ॥ ङित्त्वं ज्ञापकं अनुदात्तेत्त्वयुअर्थमवश्यं कर्तव्यमेव। अनुदात्तेत्त्वमपि तदाकाररूपमन्यथेदित्वान्नुम् स्यात् ॥ ११८॥११९॥१२०॥१२१॥१२२॥ १२३॥१२४॥

आनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति ॥१२५॥

नष्टपितृधनन्यायेनेति । यथा पुत्राः पितृधनं भजन्ति । अत्र च पितृधनत्वं तस्यैवार्थंजातस्य यदनुत्पन्नेषु पुत्रेषु सत्स्वभावेषु तैर्विनोपार्जितं न तु तैः सह यत् पित्रोपार्जितं पितरि वा विद्यमाने पुत्रैरेवोत्पादितमिति ॥ १२५॥१२६॥१२७॥

पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण ॥१२८॥

अन्धकुक्कुरीन्यायेनेति । एकः श्वजीवी अन्धः स च श्वानं हारयित्वा इतस्ततः प्रतिसंदधानो यदृच्छया तमासादयेत् तथा सामान्येन धातोः प्रागुपसर्गयोगात् प्रत्ययं विधाय पश्चादुपसर्गयोगे जाते यथास्वमर्थप्रतिपत्तिरित्यर्थः ॥ १२८॥१२९॥१३०॥

व्याख्यायकबुधव्रातरुचिरा सा चिराश्रया ।
एषास्तु मम शिष्याणां विजया विजयावहा ॥ १ ॥
अनुन्यासादिसारस्य कर्त्रा श्रीमानशर्मणा ।
श्रीलक्ष्मीपतिपुत्रेण विजयेयं विनिर्मिता ॥ २ ॥

इति वारेद्रचंपाहट्टीय–श्रीश्रीमानशर्मनिर्मिता सीरदेवबृहत्परिभाषावृत्तिटिप्पणी विजयाख्या समाप्ता ॥

---

(१) १·१·५२. (२) ७·२·११२.

नीलकण्ठदीक्षितविरचिता

परिभाषावृत्तिः

१४

वरदेश्वरयज्वानं नीलकण्ठेन यज्वना ।
नमस्कृत्य सतां प्रीत्यै शब्दन्यायो विविच्यते ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥ १ ॥

अण्ग्रहणेषु पूर्वणकारेण परणकारेण वेति संदेहवारणाय 'लण्' (माहे. सू. ६) इति सूत्रे अन्यानुबन्धे कर्तव्ये पुनर्णकारानुबन्धादियं परिभाषा ज्ञाप्यते । अस्यार्थः— व्याख्यानतो व्याख्यानाद् विशेषप्रतिपत्तिर्यविशेषज्ञानं, न तु संदेहमात्रेण अलक्षणम् अबोधकम् । लक्ष्यते अनेन इति लक्षणं ज्ञानसाधनम् । अबोधकत्वं नास्तीत्यर्थः ॥१॥

न हि कार्यी निमित्तत्वेनाश्रीयते ॥ २ ॥

कार्यमनुभवन् कार्यी स्थानी निमित्तत्वेन नाश्रीयते नोपादीयते इत्यर्थः । इयं च 'दीधीवेवीटाम्' (१।१।६) इति सूत्रेण गुणप्रतिषेधाज्ज्ञाप्यते । अन्यथा दीधीङ् दीप्तिदेवनयोः, वेवीङ् वेतिना तुल्ये, एतयोर्ङित्त्वादेव गुणनिषेधे सिद्धे किं गुणनिषेधेन । प्रयोजनम्–इङ् अध्ययने अध्येता, शीङ् स्वप्ने शयिता इत्यादौ तृचि 'सार्वधातुकार्धधातुकयोः' (७।३।८४) इति गुणः ॥ २ ॥

इतरेतराश्रयाणि च कार्याणि प्रकल्पन्ते ॥ ३ ॥

'इग्यणः संप्रसारणम्' (१।१।४५) इत्यत्र भाष्ये भाविसंज्ञाविज्ञानादियं न्यायमूलिकेत्युक्ता । तद्यथा–अस्य सूत्रस्य शाटकं वयेत्युक्ते यदि शाटकः, न वातव्यः, अथ वातव्यः न शाटकः । शाटको वातव्यश्च इति विप्रतिषिद्धम् । एवं तर्हि भाविनी संज्ञाभिप्रेता यस्मिन्नुते शाटक इति संज्ञा भवति तथा वय इति । तेन 'इग्यणः संप्रसारणम्' (१।१।४५) इत्यादौ संप्रसारणसंज्ञासिद्धिः ॥ ३ ॥

यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ ४ ॥

प्रधानस्यावयवभूता आगमा अवयविग्रहणेन गृह्यन्ते इत्यर्थः । इयं च लोकन्यायसिद्धा इति 'आद्यन्तौ टकितौ' (१।१।४६) इति सूत्रे भाष्यम् । 'नेटि' (७।२।४) इति निषेधोऽपि ज्ञापकः । अन्यथा इडागमे सिचि 'सिचि वृद्धिः परस्मैपदेषु' (७।२।१) इत्यस्य प्राप्तेरेवाभावात् किं तन्निषेधार्थेन 'नेटि' (७।२।४) इति सूत्रेण इति स्पष्टमेवाकरे । 'इयं च वर्णग्रहणे न प्रवर्तते आने मुको विधानात्' इति 'उरण् परः' (१।१।५१) इति सूत्रे भाष्ये स्पष्टम् ॥ ४ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ ५ ॥

निर्दिश्यमानस्य स्थानित्वेनोपात्तस्यादेशा विधीयमाना भवन्तीत्यर्थः । इयं च ‘ षष्ठी स्थानेयोगा ’ (१।१।४९) इत्यस्यार्थस्यान्वाख्यायिका । अन्यथा ‘ अस्तेर्भूः ’ (२।४।५२) इत्यादावस्तेः स्थाने अनन्तरे समीपे वेति संदेहे ‘ व्याख्यानतो विशेषप्रतिपत्तिः ’ (परि. १) इति संदेहनिवृत्तिसिद्धौ किं सूत्रेणेत्याक्षिप्य षष्ठ्यन्तं स्थानेन युज्येत यतः षष्ठ्युच्चारितम् । किं कृतं भवति ‘ षष्ठी स्थानेयोगा ’ इति एषा परिभाषा न कर्तव्या भवतीति ‘ षष्ठी स्थानेयोगा ’ इति सूत्रे भाष्ये प्रतिपादितम् । तेन ‘ षष्ठी स्थानेयोगा ’ इति सूत्रार्थभूतेति फलितम् । ‘ पादः पत् ’ (६।४।१३०) इति सूत्रे भाष्येपि ‘ निर्दिश्यमानस्यादेशा भवन्तीत्येषा न कर्तव्या षष्ठी स्थानेयोगा इत्यनेन सिद्धेः ’ इत्युक्तम् । ‘ इयं चावयवषष्ठ्यांविषयेपि । तेन तदोः सत्वम् अतिरय इत्यत्र न ’ इति ‘ पादः पत् ’ (६।४।१३०) इति सूत्रे भाष्ये स्पष्टम् । रिङादीनां ङित्करणाद्वर्णग्रहणे नैषा प्रवर्तते । अनया च ‘ अलोन्त्यस्य ’ (१।१।५२) इत्यादीनां स्वस्वनिमित्तसंनिधापितानां समावेश एव न तु बाध्यबाधकभावः विरोधाभावात्। उभयोरपि तुल्यबलत्वात् परार्थत्वाच्चाङ्गाङ्गिभावोपि न इति ध्येयम् ॥ ५ ॥

नानुबन्धकृतमनेकाल्त्वम् ॥ ६ ॥

इत्संज्ञकवर्णकृतं सर्वादेशप्रयोजकीभूतमनेकाल्त्वं नाश्रीयत इत्यर्थः । एतच ‘ अनेकाल्शित् सर्वस्य ’ (१।१।५५) इति सूत्रे शित्करणेन ज्ञाप्यते । अन्यथा ‘ इदम इश् ’ (५।३।३) इत्यादेरनेकाल्त्वेन सर्वादेशत्वे सिद्धे किं तदर्थेन शित्करणेन इति ‘ अनेकाल्शित्सर्वस्य ’ (१।१।५५) इति सूत्रे भाष्ये स्पष्टम् ॥ ६ ॥

नानुबन्धकृतमनेजन्तत्वम् ॥ ७ ॥

अनुबन्धकृतमित्संज्ञकवर्णकृतमनेजन्तत्वमेजन्तत्वप्रातिबन्धकं नेत्यर्थः । तेन धेट् पाने इत्यस्यैजन्तत्वात् ‘ आदेश उपदेशेऽशिति ’ (६।१।४५) इत्यात्वप्रवृत्तिः प्रतिहता । अत्र च ज्ञापकम् ‘ उदीचां माङो व्यतीहारे ’ (३।४।१९) इति सूत्रे कृतात्वस्य मेङः सानुबन्धकनिर्देशः इति ‘ दाधा घ्वदाप् ’ (१।१।२०) इति सूत्रे भाष्ये स्पष्टम् ॥ ७ ॥

नानुबन्धकृतमसारूप्यम् ॥ ८ ॥

इत्संज्ञकवर्णकृतं वैजात्यं नाश्रीयत इत्यर्थः । तेन शप्यं लभ्यामित्यादौ ‘ पोरदुपधात् ’ (३।१।९८) इति यत्प्रत्यये वासरूपपरिभाषया ‘ ऋहलोर्ण्यत् ’ (३।१।१२४) इति ण्यत्प्रत्ययो न भवति । अत्र च ज्ञापकं ‘ ददातिदधात्योर्विभाषा ’ (३।१।१३९) इति सूत्रे विभाषाग्रहणम् । अन्यथा वासरूपन्यायेन णप्रत्ययप्रवृत्त्या दायो धायः इति रूपसिद्धौ शप्रत्यये ददः दधः इति च रूपसिद्धौ किं विभाषाग्रहणेनेति वासरूपसूत्रे भाष्ये स्पष्टम् ॥ ८ ॥

वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥ ९ ॥

प्राधान्येन वर्णमाश्रित्य यत्र कार्यं विधीयते तत्राल्विधित्वादप्राप्तप्रत्ययलक्षणविध्यर्थं 'प्रत्ययलोपे प्रत्ययलक्षणम्' (१।१।६२) इति सूत्रेण विधीयमानं न प्रवर्तते इत्यर्थः। तेन गवे हितं गोहितमित्यत्र प्रत्ययलोपपरिभाषया अवादेशो न। इयं च परिभाषा प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रे प्रत्ययपदस्यानुवर्तनाल्लोपे प्रत्ययलक्षणमित्येव सिद्धे पुनः प्रत्ययग्रहणेन ज्ञाप्यते। तेन प्रत्ययस्यैवासाधारणं रूपं यत्राश्रीयते तत्रैव प्रत्ययलक्षणं नान्यत्रेति प्रत्ययलक्षणसूत्रे भाष्ये स्पष्टम् ॥ ९ ॥

क्वचिदेकदेशोऽप्यनुवर्तते ॥ १० ॥

स्पष्टम्। यद्देशे स्वरितत्वप्रतिज्ञानमस्ति तावदेवानुवर्तते इत्यर्थः। तेन 'समर्थानां प्रथमाद्वा' (४।१।८२) इति पदत्रयस्याधिकृतत्वेऽपि 'प्राग् दिशः०' (५।३।१) इत्यस्यानन्तरं समर्थानां प्रथमादित्येतयोर्निवृत्तावपि वेत्यस्यानुवृत्तिरस्ति। एतच्च 'संख्याव्ययादेर्ङीप्' (४।१।२६) 'दामहायनान्ताच्च' (४।१।२७) इति सूत्रयोर्भाष्ये स्पष्टम् ॥ १० ॥

अर्थवद्ग्रहणे नानर्थकस्य ॥ ११ ॥

स्पष्टम्। तेन 'प्रादूहोढ०' (६।१।८९) इत्यत्रोढग्रहणेन ऊढवच्छब्दग्रहणाभावः। अत्र च ज्ञापकं 'व्रश्च०' (८।२।३६) इति सूत्रे राजेः पृथग् भ्राजिग्रहणमिति कौस्तुभकाराः। भाष्ये तु 'स्वं रूपं०' (१।१।६८) इति सूत्रे रूपग्रहणं विहाय स्वं शब्दस्य इति सूत्रिते सति अर्थवद्ग्रहणे अनर्थकस्य ग्रहणाभावः' इति 'स्वं रूपं०' इति सूत्रे स्थितम्। ननु 'स्वं रूपं०' इति सूत्रस्थभाष्ये प्रत्याख्यानात् कथमियं रूपग्रहणेन ज्ञाप्यते इति चेत् सत्यम्। उपस्थितस्यार्थस्य शब्दाविनाभूतस्य शब्दं प्रति विशेषणत्वेनान्वयसंभवे सर्वथा त्यागे मानाभाव इति न्यायमूलैवा परिभाषेति तत्रैव सूत्रे भाष्ये स्पष्टमिति ध्येयम्। इयं च विशिष्टरूपोपादान एव प्रवर्तते इति 'ओत्' (१।१।१५) इति सूत्रे कौस्तुभादिषु स्पष्टम् ॥ ११ ॥

न वर्णग्रहणेषु ॥ १२ ॥

इयमर्थवत्परिभाषा वर्णग्रहणे न प्रवर्तते इत्यर्थः। तेन 'यस्य हलः' (६।४।४९) इत्यत्र यस्येति संघातग्रहणात्पुत्रकाम्येत्यादौ न यलोप इत्याकरे स्पष्टम् ॥ १२ ॥

एतन्मूलकमेव 'येन विधिः०' (१।१।७२) इत्यत्र भाष्ये स्पष्टं पठ्यते—

अल्लैवानर्थकेन तदन्तविधिः ॥ १३ ॥

इति। स्पष्टम्। तेन हन्ग्रहणे प्लीहन्ग्रहणं न ॥ १३ ॥

गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ १४ ॥

गौणत्वमप्रसिद्धत्वं लाक्षणिकत्वं च। तत्रोपात्तविशिष्टरूपपदान्तरसंबन्धनिमित्तककार्यस्याप्रवृत्तिरिति भावः। एतच्च 'निपात एकाजनाङ्' (१।१।१४) इति सूत्रे भाष्ये स्पष्टम्। इयं चानित्या। 'इणः षीध्वं लुङ्लिटां धोऽङ्गात्' (८।३।७८)

इत्यत्राङ्गग्रहणात् । तद्धि परिवेविषीध्वमित्यत्र मूर्धन्यादेशनिवृत्तये क्रियते । यदि चेयं परिभाषा स्यात् तदा गौणत्वादेव तत्रादेशस्याप्रवृत्तिसिद्धौ किं तद्व्यावृत्त्यर्थकाङ्गग्रहणेन । तत् क्रियमाणं परिभाषाया अनित्यतां ज्ञापयतीति दिक् ॥ १४ ॥

एतन्मूलकमेव ' येन विधिः ' (१।१।७२) इत्यत्र भाष्ये स्पष्टं पठ्यते—

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ १५ ॥

इति । अनिन्नादयो गृह्यन्ते येषु तानि अनिनस्मन्ग्रहणानि अर्थवदनर्थकसाधारण्येन तदन्तविधिं भावयन्तीत्यर्थः । राज्ञेत्यर्थवता साम्नेत्यनर्थकेन दण्डीत्यर्थवता वाग्मीत्यनर्थकेन, सवया इत्यर्थवता सुस्रोता इत्यनर्थकेन सुशर्मेत्यर्थवता सुप्रथिमेत्यनर्थकेन ॥ १५ ॥

भाव्यमानोऽण् सवर्णान्न गृह्णाति ॥ १६ ॥

विधीयमानोण् स्वग्राह्यदीर्घादीन् न गृह्णातीत्यर्थः । तेन इदम इश् विधीयमानो ह्रस्व एव न तु दीर्घः । ननु ' अणुदित्सवर्णस्य चाप्रत्ययः ' (१।१।६९) इति सूत्रेऽप्रत्यय इति निषिद्धत्वादेव विधीयमानस्य इशादेशस्य सवर्णग्राहकत्वाभावसिद्धेरियं परिभाषा किमर्थेति चेत् । सत्यम् । असत्यामस्यामप्रत्यय इत्यस्योदिदंशेपि संबन्धः स्यात् । परिभाषारम्भे तु अणंश एव संबन्ध इति निर्णीयते । तेनास्यार्थस्येयमन्वाख्यायिकेति फलितम् । यदि तु ' चोः कुः ' (८।२।३०) इत्यादिविधिप्रदेशेषूदित्करणादप्रत्यय इत्यस्योदिदंशे संबन्धाभावसिद्धिः तदा परिभाषा मन्दैवेत्यणुदित्सूत्रे भाष्ये स्पष्टम् । इयं चानित्या । ' उर्ऋत् ' (७।४।७) इत्यादौ तपरकरणाल्लिङ्गात् । अन्यथा विधीयमानत्वादृकारस्य सवर्णग्राहकत्वाप्राप्तेः किं तन्निवृत्त्यर्थेन तपरकरणेनेति स्पष्टमाकरे ॥ १६ ॥

यस्मिन्विधिस्तदादावल्ग्रहणे ॥ १७ ॥

सप्तम्यन्तेन विधौ विशेषणं तदादेः संज्ञा स्यात् । तदन्तविध्यपवादः । इयं च वाचनिकी । एतच्च ' येन विधिः० ' इति सूत्रे वार्तिकत्वेन भाष्ये पठितम् । तेन ' वान्तो यि प्रत्यये ' (६।१।७९) इत्यत्र यादौ प्रत्यये इत्यर्थलाभाद् गव्यमित्यादिसिद्धिः ॥ १७ ॥

विधिविधानविधिभाजां त्रयाणां संनिधाने तदन्तविधिर्भवति ॥ १८ ॥

स्पष्टम् । इयं च निर्मूलेति केचित् । ' येन विधिः० ' (१।१।७२) इत्यस्य फलितार्थकथनमित्यन्ये ॥ १८ ॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १९ ॥

सूत्रस्थपरस्परान्वितपदार्थकपदानां सहैवानुवृत्तिनिवृत्ती इत्यर्थः । वाशब्दोऽवधारणार्थः । अत्र च ज्ञापकं ' नेड् वशि कृति ' (७।२।८) इत्यत्रेडित्यनुवर्तमानेनापि सिद्धौ ' आर्धधातुकस्येड् वलादेः ' (७।२।३५) इत्यत्र पुनरिड्ग्रहणम् । तद्धि निषेधसंबन्धनिवृत्त्यर्थम् । यदि चान्वितपदार्थकपदैकदेशानुवृत्तिरिष्येत ततो व्यर्थमेवेड्ग्रहणं स्यात् । न च ' दीधीवेवीटाम् ' (१।१।६) इति सूत्रे इडिति वर्तमाने पुनरिड्ग्रहण-

ङिटो गुणानिवृत्त्यर्थमित्युक्तार्थज्ञापकं कथमिति वाच्यम् । 'दीधीवेवीटाम्' इति सूत्रकारेणेटो गुणनिषेधारम्भेण तन्मते गुणनिवृत्त्यर्थकोपायान्तरस्यानावश्यकतया पुनरिङ्ग्रहणस्य प्रयोजनान्तरालाभेनोक्तपरिभाषाज्ञापकत्वसिद्धेः । भाष्यमते तु वाचनिकीयम् । इयं चानित्या । 'ङ्णोन्तः' (७।१।३)'समर्थानां प्रथमाद्वा'(४।१।८२) इत्यादावेकदेशस्यानुवृत्तिदर्शनादित्यस्मद्गुरुचरणकृततत्त्वबोधिनीव्याख्याने गूढार्थदीपिकाख्याने प्रपञ्चितमस्माभिः ॥ १९ ॥

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ २० ॥

व्युत्पत्तिकार्याभाववन्तीत्यर्थः । अत्र च ज्ञापकम्—'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' (८।३।४६) इति सूत्रे कमिग्रहणात्पृथक् कंसग्रहणम । अन्यथा धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानादेव कमिग्रहणे कंसग्रहस्यापि सिद्धत्वात् किं कंसग्रहणेनेति भाष्ये स्थितम ॥ २० ॥

उणादयो व्युत्पन्नान्यपि ॥ २१ ॥

एतच्च 'ण्वुल्तृचौ' (३।१।१३३) इति सूत्रपर्यालोचनया लभ्यत इत्याहुः ॥ २१ ॥

सर्वो द्वन्द्वो विभाषयैकवद् भवति ॥ २२॥

इयं च न्यायसिद्धा । 'चार्थे द्वन्द्वः' (२।२।२९) इति सूत्रेणेतरेतरसमाहारयोरविशेषेण द्वन्द्वविधानात । 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम' (१।२।६३) इति सूत्रे बहुवचनग्रहणं ज्ञापकं च । यदि च नित्यमेकवत् तदा बहुवचनायोगात तस्य द्विवचनविधानमनुपपन्नं स्यादिति तिष्यपुनर्वस्वोरिति सूत्रे भाष्ये स्थितम ॥ २२ ॥

प्रकृतिवदनुकरणं भवति ॥ २३ ॥

स्पष्टम् । अत्र च ज्ञापकं 'भू सत्तायाम्' इत्यत्र विभक्त्यदर्शनमेव । 'यत्तदेतेभ्यः०' (५।२।३९) इति ज्ञापकमप्यस्याः । अत्र च एकशेषाकरणादनित्या चेयम । 'क्षियो दीर्घात्' (८।२।४६) इति सूत्रे भाष्ये तु प्रकृतिवदनुकरणमित्याश्रयणे क्षियो दीर्घादित्यत्र क्षिय इति स्वाद्युत्पत्तिर्न स्यात् । अधातुरिति निषेधेन प्रातिपदिकसंज्ञाया अभावादिति स्थितम् ॥ २३ ॥

विकरणेभ्यो नियमो बलीयान् ॥ २४ ॥

शबादिभ्य आत्मनेपदं परस्मैपदं च बलवदित्यर्थः । अत्र च ज्ञापकं 'वृद्भ्यः स्यसनोः' (१।३।९२) इति सूत्रे स्यग्रहणम । अन्यथा परस्मैपदात्पूर्वमेव 'स्यतासी लृलुटोः' (३।१।३३) इति लकारापेक्षस्य प्रत्ययस्य प्रवृत्तिर्निर्बाधा तत किं स्यग्रहणेनेति 'अनुदात्तङित:०' (१।३।१२) इति सूत्रे भाष्ये स्थितम् । 'शदेः शितः' (१।३।६०) इति सूत्रे भाष्ये तु विकरणव्यवधानेपि नियमप्रवृत्तिः स्यग्रहणेन ज्ञाप्यते इति ध्वनितम् । तेन चिनोति सुनोतीत्यादौ तिपमाश्रित्य 'सार्वधातुकार्धधातुकयोः'

(७।३।८४) इति गुणो न । किंतु विकरणस्यापित्सार्वधातुकत्वाद् ङित्वे ' क्ङिति च ' (१।१।५) इति गुणनिषेधः ॥ २४ ॥

सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ॥ २५ ॥

व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणभेदादुभयोरपि शास्त्रयोस्तत्तल्लक्ष्यविषययोश्चारितार्थ्येन पर्यायप्रसङ्गे नियमार्थं ' विप्रतिषेधे परम्० ' (१।४।२) इति सूत्रमिति पक्ष इदम्। तेन भवतादित्यत्र हेर्न लुक् । तातङा परत्वाद् बाधात् इति ' विप्रतिषेधे परम् ' (१।४।२) इति सूत्रे भाष्ये स्थितम् ॥ २५ ॥

पुनःप्रसङ्गविज्ञानात्सिद्धम् ॥ २६ ॥

तुल्यबलविरोधे ' विप्रतिषेधे परम्०' (१।४।२) इति बाधितस्य पुनःप्राप्ति-विज्ञानादिष्टं सिद्धमित्यर्थः । अयं भावः—जातिपक्षे तत्तज्जात्याक्रान्ते क्वचिच्चारितार्थयोर्द्वयोः सत्प्रतिपक्षन्यायेन विरोधस्थलेऽप्रवृत्तौ तत् सूत्रं परविध्यर्थं न तु पूर्वनिवृत्त्यर्थम् । तस्मिंश्च कृते पूर्वस्य निमित्तसत्त्वे तदपि भवतीति पक्ष इदम् । तेन भिन्द्धि इत्यत्र हेर्धित्वं बाधित्वा परत्वात्तातङि पुनर्धित्वं भवत्येवेपि विप्रतिषेधसूत्र एव भाष्ये स्पष्टम् ॥ २६ ॥

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः ॥ २७ ॥

अल्पाश्रयबह्वाश्रययोरल्पाश्रयं बलीय इत्यर्थः । अत्र च ज्ञापकं ' ओमाङोश्च ' (६।१।९५) इत्याङ्ग्रहणम् । अन्यथा सवर्णदीर्घे गुणे च रूपसिद्धौ किं तेन इति ' संप्रसारणाच्च ' (६।१।१०८) इति सूत्रे विप्रतिषेधसूत्रे च भाष्ये स्पष्टम् ॥ २७ ॥

एतन्मूलकमेव पठ्यते—

पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन ॥ २८ ॥

साधनेनेत्यस्य धातूत्तरप्रत्ययार्थेनेत्यर्थः । एतच्च सुट्विधायकसूत्रे भाष्ये ध्वनितम् ॥ २८ ॥

पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण ॥ २९ ॥

अर्थः प्राग्वत् । अत्र च ज्ञापकं 'णेरध्ययने वृत्तम् ' (७।२।२६) इति निर्देशः । एतच्च ' सुट् कात्पूर्वः ' (६।१।१३५) इति सूत्रे भाष्ये स्पष्टम् । पक्षद्वयमपीदं यथायथं लक्ष्यानुरोधाद् व्यवस्थितं बोध्यम् ॥ २९ ॥

सर्वे विधयश्छन्दसि विकल्प्यन्ते ॥ ३० ॥

स्पष्टम् । इयं च ' व्यत्ययो बहुलम् ' (३।१।८५) इति सूत्रे बहुलमिति योगविभागेन तत्रैव भाष्ये प्रतिपादिता । ' षष्ठीयुक्तश्छन्दसि वा ' (१।४।९) इति सूत्रे वेति योगविभागाल्लभ्यत इति शब्दकौस्तुभादिषु स्थितम् ॥ ३० ॥

प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ ३१ ॥

'यस्मात्प्रत्ययविधि०' (१।४।१३) इति सूत्रे तदादीति योगविभागेनास्यां तदादेरित्यन्तांशो लभ्यते । ' येन विधिः ' (१।१।७२) इत्यनेन च तदन्तांशः । प्रत्यय-

श्लिष्टस्य प्रकृत्यवयवकसमुदायस्य विशेष्यस्य सर्वत्राव्याहतत्वात् । तेन च 'अपाक्षीरोदनम्' इति वाक्यस्य हरिषु इत्यादौ सोऽथ न पदत्वम् । इयं च अङ्गसंज्ञासूत्रे भाष्ये स्पष्टा ॥३१॥

'येन विधिः' (१।१।७२) इत्यत्र च तदपवादः पठ्यते—

प्रत्ययग्रहणे चापञ्चम्याः ॥ ३२ ॥

यत्र पञ्चम्यन्तं प्रत्ययविशेषणं तत्र तदन्तग्रहणं नेत्यर्थः । तेन यथा 'रदाभ्यां निष्ठातः०' (८।२।४२) इत्यत्र तदन्तग्रहणाभावः ॥ ३२ ॥

प्रत्ययग्रहणपरिभाषाया अपवादान्तरमाह—

स्त्रीप्रत्यये चानुपसर्जने न ॥ ३३ ॥

विषयसप्तमीयम् । यः शब्दः स्त्रियं प्राधान्येनाह तत्र तदादिनियमेन स्त्रीप्रत्ययान्तत्वाभावेपि तदन्तत्वप्रयुक्तकार्यम् । यस्त्वप्राधान्येनाह तस्य च तदादिनियमेन तदन्तत्वप्रयुक्तकार्यं नेति तदर्थः । तेन परमकारीषगन्धीपुत्रः इत्यत्र 'ष्यङः०' (६।१।१३) इति संप्रसारणम् । अतिकारीषगन्ध्यापुत्रः इत्यत्र च न । एतच्च 'ष्यङः संप्रसारणम्०' (६।१।१३) इति सूत्रे भाष्ये स्पष्टम् । एतच्च अङ्गसंज्ञासूत्रे 'नेयङुवङ्०' (१।४।४) इत्यतो नेत्यस्य 'वामि' (१।४।५) इत्यतो वेत्यस्य चानुवर्तनेन व्यवस्थितविभाषाश्रयणाल्लभ्यत इति वदन्ति ॥ ३३ ॥

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ ३४ ॥

स्पष्टम् । एतच्च 'सुप्तिङन्तं०' (१।४।१४) इत्यन्तग्रहणेन ज्ञाप्यत इति सुप्तिङन्तमिति सूत्रे भाष्ये स्पष्टम् । तेन 'तरप्तमपौ घः' (१।१।२२) इत्यनेन प्रत्यययोरेव संज्ञा न तदन्तस्य ॥ ३४ ॥

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ ३५ ॥

'प्रत्ययग्रहणे यस्मात्०' इत्यस्यायमपवाद इत्यङ्गसंज्ञासूत्रे भाष्ये स्पष्टम् । 'गतिरनन्तरः' (६।२।४९) इति सूत्रे अनन्तरग्रहणमस्या ज्ञापकम् । तद्धि 'अभ्युद्धृतम्' इत्यादौ व्यवहितानिरासाय । अन्यथा व्यवहिते प्राप्तेरेवाभावादनन्तरग्रहणं व्यर्थं स्यादिति 'गतिरनन्तरः' (६।२।४९) इति सूत्रे भाष्ये स्थितम् । अपिशब्देन प्रत्ययग्रहणपरिभाषालभ्यार्थः समुच्चीयते । एतदभावे हि तयैव व्यवस्था स्यादित्येतावतापवादत्वव्यवहारः । न चैवं ल्यब्विधायकसूत्रस्थेनानयोः सावकाशत्वप्रतिपादकेन द्वयोः सावकाशयोः समवस्थितयोरित्यादिभाष्येण सह विरोध इति वाच्यम् । परस्परं बाध्यबाधकभावमात्रे तात्पर्यादिति भाष्यतत्वविवेके प्रपञ्चितमस्माभिः ॥ ३५ ॥

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ ३६ ॥

पदाधिकारे अङ्गाधिकारे च विधीयमानं कार्यं तस्य च तदन्तस्य चेत्यर्थः । तेन अतित्वान् अतिमाम् निर्जरसः इत्यादिसिद्धिः । इदं च 'येन विधिः' (१।१।७२) इत्यत्र भाष्ये स्पष्टम् ॥ ३६ ॥

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ ३७ ॥

सप्तमीपञ्चम्योर्निर्देशे ‘ तस्मिन्निति निर्दिष्टे पूर्वस्य ’ (१।१।६६) इति सूत्रापेक्षया ‘ तस्मादित्युत्तरस्य ’ (१।१।६७) इत्येतस्य परत्वात् प्रबलत्वमित्यर्थः । तेन ‘ ङः सि धुट् ’ (८।३।२९) इत्यत्र ङात् परस्य सस्य धुट् इत्यर्थलाभः । एतच्च ‘ तस्मिन्निति निर्दिष्टे पूर्वस्य ’ (१।१।६६) इति सूत्रे भाष्ये स्पष्टम् ॥ ३७ ॥

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ ३८ ॥

‘ प्रातिपदिकग्रहणे ’ इति बहुव्रीहिः । प्रातिपदिकं गृह्यते यस्मिञ्शास्त्रे तत् प्रातिपदिकग्रहणम् । तत्र लिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणमित्यर्थः । तेन ‘अयस्कुम्भी’ इत्यत्र ‘ अतः कृकमिकंस० ’ (८।३।४६) इति सत्वम् । श्वश्रूः इत्यप्युदाहरणम् । अत्र च ज्ञापकं ‘ कुमारः श्रमणादिभिः ’ (२।१।७०) इत्यत्र स्त्रीलिङ्गश्रमणाशब्दपाठः । अपिशब्दात् केवलस्यापि । इयं च यत्र लिङ्गप्रत्ययरहितस्य प्रातिपदिकत्वं तत्रैवेत्यर्थः । इयं च ‘ शक्तिलाङ्गला०’ (३।२।९ वा. १) इति वार्तिके घटघटीग्रहणादनित्या । एषा ङ्याप्सूत्रे भाष्ये स्पष्टा ॥ ३८ ॥

विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ ३९ ॥

विभक्तौ परतः प्रातिपदिकस्य विधीयमानं कार्यं लिङ्गविशिष्टस्य न भवतीत्यर्थः । लिङ्गविशिष्टपरिभाषाऽनित्यत्वमूलिकेयम् । एषा च ‘ युवोरनाकौ ’ (७।१।१) इति सूत्रे भाष्ये स्पष्टा ॥ ३९ ॥

लिङ्गवचनमतन्त्रम् ॥ ४० ॥

व्याख्यानमूलिका चैषा । अत एव क्वचिद्विवक्ष्यते । यथा ‘सुप्सुपा’ इति ॥४०॥

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥ ४१ ॥

स्वस्मादन्यस्मिन् स्वसदृशेऽधिकरणे द्रव्ये वर्तेते । हि यतः तथार्थगतिरस्ति । तयोः प्रत्ययोस्तीत्यर्थः । न्यायसिद्धेयम् । अत एव भाष्ये ‘ न हि अब्राह्मणमानयेत्युक्ते लोष्टमानीय कृती भवति ’ (महाभाष्य ३।१।१२) इत्युक्तम् । ‘ इदुदुपधस्य चाप्रत्ययस्य ’ (८।३।४१) इत्युदाहरणम् । यथा वा ‘ अर्थवदधातुः०’ (१।२।४५) इति । अत्राधातुरिति पर्युदासादेवार्थवत्त्वलाभादर्थवद्ग्रहणस्योत्तरार्थत्वसिद्धिरित्यादि मनोरमायां स्पष्टम् । ‘ ओपधेश्च विभक्तावप्रथमायाम् ’ (६।३।१३२) ‘ अकर्तरि च कारके संज्ञायाम् ’ (३।३।१९) इत्यादौ विभक्तिकारकग्रहणाभ्यामस्या अनित्यत्वं ज्ञाप्यते । अन्यथा अप्रथमायामकर्तरि चेति पदादेव विभक्तिकारकलाभात् तदुपादानवैयर्थ्यापत्तेरिति भाष्ये स्पष्टम् ॥ ४१ ॥

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः ॥ ४२ ॥

गतिकारकोपपदानां कृदन्तेनैव सुबुत्पत्तेः प्राक् समासो वक्तव्य इत्यर्थः । इयं च ‘ उपपदमतिङ् ’ (२।२।१९) इत्यतिङ्ग्रहणेन ‘ कर्तृकरणे कृता बहुलम् ’ (२।१।३२) इति बहुलग्रहणेन च सिद्धा । तेन च व्याघ्री अश्वक्रीती इत्यादिसिद्धिः ।

'अम्बाम्ब०' (८।३।९७) इति सूत्रे गवादिग्रहणादनित्येयम्। अन्यथा गोष्ठः इत्यादौ 'सुपि स्थः' (३।२।४) इति कप्रत्यये 'गतिकारकोपपदानाम्०' इति सुबुत्पत्तेः पूर्वं समासे 'सात् पदाद्योः' (८।३।१११) इति निषेधाप्राप्त्या 'आदेशप्रत्यययोः' (८।३।५९) इत्येव सिद्धे तदुपादानवैयर्थ्यात्। 'अम्बाम्ब०' (८।३।९७) इत्यत्र हि लक्षणप्रतिपदोक्तपरिभाषया 'सुपि स्थः' (३।२।४) इतिविहितकप्रत्ययान्त एवानुक्रियते इति सिद्धान्तः। इदं च पदस्यादिः पदादिरिति व्याख्यानपक्षे बोध्यम्। इयं च 'पुंयोगादाख्यायाम्' (४।१।४८) इत्यत्र भाष्ये स्पष्टा ॥ ४२ ॥

परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते ॥ ४३ ॥

अपवादविषयं मुक्त्वोत्सर्गः प्रवर्तते इत्यर्थः। अपवादवैयर्थ्यापत्तिन्यायमूलिकेयम्। इयं च प्रादिपदिकार्थसूत्रे भाष्ये स्पष्टा ॥ ४३ ॥

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ॥ ४४ ॥

अपवादविषये अपवादस्यान्येन निषेधेऽप्युत्सर्गो भवतीत्यर्थः। यथा रामौ इत्यत्र वृद्ध्यपवादभूतस्य पूर्वसवर्णदीर्घस्य 'नादिचि' (६।१।१०४) इति प्रतिषेधेऽपि वृद्धिः। 'तौ सत्' (३।२।१२७) इति निर्देशोऽत्र लिङ्गम्। 'इको गुणवृद्धी' (१।१।३) इति सूत्रे भाष्ये स्पष्टेयम्। दिग्यादेशविषये द्वित्वप्रवृत्त्यभावात् क्वचिदिति ॥ ४४ ॥

असति संभवे बाधनं भवति ॥ ४५ ॥

उत्सर्गापवादयोरेकत्र संभवाभावे बाध्यबाधकभाव इष्यते। विरोधस्य बाध्यबाधकभावनियामकत्वादिति भावः। तेन रामेभ्यः इत्यत्रैत्वेन 'सुपि च' (७।३।१०२) इति दीर्घत्वं बाध्यते। इयं च न्यायसिद्धेति स्पष्टमाकरे ॥ ४५ ॥

अत्रैवोपोद्बलकमाह—

अस्ति च संभवो यदुभयं स्यात् ॥ ४६ ॥

चशब्दश्चेदर्थे। संभवोऽस्ति चेदुभयं भवेदेवेत्यर्थः। तेन तथाजातीयः इत्यत्र थाल्जातीययोः संभवः ॥ ४६ ॥

नन्वेवमौपगव इत्यादौ आदिवृद्ध्या अन्त्यवृद्धिबाधो न स्यादित्याह—

सत्यपि संभवे बाधनं भवति ॥ ४७ ॥

स्पष्टम्। तक्रकौण्डिन्यन्यायमूलकमेतत्। एतत् त्रयमपि 'मिदचोऽन्त्यात् परः' (१।१।४७) इति सूत्रे भाष्ये स्पष्टम् ॥ ४७ ॥

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥ ४८ ॥

प्राप्त इति भावे क्तः। यत्कर्तृकावश्यप्राप्तौ यो विधिरारभ्यते स तस्य नित्यं बाधक इत्यर्थः। अत्र येनेत्यस्य यदि स्वेतरेणेत्यर्थः। तदा स्वविषये प्राप्तमात्रस्य बाधः। एवैव बाध्यसामान्यचिन्ता इत्युच्यते। यदा तु यद्धर्मावच्छिन्नकार्यविशेषेणेत्यर्थः, तत्कार्ये

केन विहितामिति जिज्ञासा च, तदा बाध्यविशेषचिन्ता । यथा 'एत्येधत्यूठ्सु' (६।१।८९) इत्यत्र पररूपबाधकत्वे ज्ञाते केन विहितस्येति । यथा वा 'नासिकोदरोष्ठ०' (४।१।५५) इति ङीप् निषेधत्वावच्छिन्नं प्रति बाधकः ॥ ४८ ॥

केन विहितस्य बाधकामिति व्यवस्थाकाङ्क्षायामाद्यव्यवस्थापकमाह—

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥ ४९ ॥

समीपस्था अपवादाः संनिहितानेव बाधन्ते न विप्रकृष्टानित्यर्थः । यथा 'एत्येधत्यूठ्सु' (६।१।८९) इति वृद्धिः 'एङि पररूपम्' (६।१।९४) इत्यस्यैव बाधिका, न तु 'ओमाङोश्च' (६।१।९५) इति स्पष्टं सिद्धान्तकौमुद्यादौ । प्रथमातिक्रमे कारणाभावादिति न्यायमूलिकेयम् ॥ ४९ ॥

मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ ५० ॥

स्पष्टम् । इयमपि पूर्वोक्तन्यायमूलिका । तेन 'नासिकोदरोष्ठ०' (४।१।५५) इत्यत्र ओष्ठादिषु पक्षस्वसंयोगोपधादित्येव बाध्यते । विप्रतिषेधशास्त्रबाधे मानाभावात् । 'बहुव्रीहेरूधसः०' (४।१।२५) इत्यस्य 'अन उपधालोपिनः' (४।१।२८) इत्यत्रानुवृत्तये कृतं स्वरितत्वप्रतिज्ञानं ज्ञापकमपि । तद्धि अनेन न्यायेन पूर्वयोर्ङीप्प्रतिषेधयोरेव बाधकं स्यात्, न तु परस्य 'अन उपधा०' (४।१।२८) इत्यस्येति कुण्डोध्नीत्यादौ परत्वान्ङीपि विषये विकल्प एव स्यात् स मा भूदित्येवमर्थमिति दिक् । स्पष्टं चेदम् 'आवट्याच्च' (४।१।७५) इति सूत्रे भाष्ये । यदि तु कार्यद्वयं नैकधर्मावच्छिन्नं तदोभाभ्यां भिन्नधर्मावच्छिन्नाभ्यां केनापि रूपेण येन नाप्राप्तन्यायस्याभावान्नानयोर्विषयः । स्पष्टं चेदम् 'इको गुणवृद्धी' (१।१।३) 'इको झल्' (१।२।९), 'नासिकोदरोष्ठ०' (४।१।५५) 'एत्येधति०' (६।१।८९) इत्यादौ भाष्यकैयटकौस्तुभादिषु इति संक्षेपः ॥ ५० ॥

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ॥ ५१ ॥

विधिप्रतिषेधौ संनिहितस्यैव भवतः इत्यर्थः । तेन 'ऋतो भारद्वाजस्य' (७।२।६३) इति भारद्वाजनियमप्रापितो निषेधः 'अचस्तास्वत्०' (७।२।६१) 'उपदेशेऽत्वतः' (७।२।६२) इति योगद्वयप्रापितस्यैव निषेधस्य न तु क्र्यादिनियमप्रापितस्य इति सिद्धान्तकौमुदीमनोरमातत्त्वबोधिन्यादिषु स्पष्टम् । अत्र च ज्ञापकमार्थेशे 'संख्याव्ययादेर्ङीप्' (४।१।२६) इति ङीब्वचनम् । तद्धि अनन्तरस्य ङीप एव विधिर्मा भूत् इति क्रियते । अन्ये तु 'न क्तिचि दीर्घश्च' (६।४।३९) इति सूत्रे दीर्घग्रहणम् । तद्धि अनन्तरस्य 'अनुदात्तोपदेश०' (६।४।३७) इत्यस्यैव निषेधो मा भूत इत्येतदर्थमिति सीरदेवीयपरिभाषावृत्त्यादिषु स्पष्टम् । इयमुपस्थितिन्यायमूला चेति ध्येयम ॥ ५१ ॥

अभ्यासविकारेषु बाध्यबाधकभावो नास्ति ॥ ५२ ॥

'अत्र लोपोऽभ्यासस्य' (७।४।५८) इत्यारभ्य विधीयमानकार्येषु बाध्यबाधकभावो नास्तीत्यर्थः । तेन दित्स्यं धित्स्यमित्यादौ अभ्यासादिलोपः । अत्र चं

ज्ञापकं ‘ दीर्घोऽकितः ’ (७।४।८३) इत्यकिद्ग्रहणम् । अन्यथा पंपश्यते पम्पश्यते इत्यत्र ‘ जपजभ० ’ (७।४।८६) इति नुकि कृतेऽनजन्तत्वाद् दीर्घाप्राप्तौ तद्वैयर्थ्यं स्पष्टमेवेति भाष्ये (महाभाष्य ७·४·८३) स्पष्टम् । इयं च परान्तरङ्गत्वादिबाधाभावस्यापि बोधिका । यत्तु सर्वेषां प्रवृत्तावेव एतत्प्रवृत्तिरिति कैयटस्तन्न । नुकि कृते दीर्घाप्राप्त्या धर्मिग्राहकमानविरोधापत्तेः मान्वधादीनां दीर्घे कृते इत्वाप्राप्त्या ‘ गुणो यङ्लुकोः ’ (७।४।८२) इति सूत्रे मीमांसते अचीकरदित्यादिभाष्योक्तोदाहरणासंगतेश्चेति संक्षेपः ॥ ५२ ॥

ताच्छीलिकेषु वासरूपविधिर्नास्ति ॥ ५३ ॥

ताच्छील्यार्थेषु विहितप्रत्यये वासरूपपरिभाषा न प्रवर्तते इत्यर्थः । अत्र च ताच्छीलिकेष्विति विषयसप्तमी । तेन ताच्छीलिककृतामताच्छीलिकैः वासरूपविधिर्नेत्यर्थः । एतच्च ‘ जुचंक्रम्य० ’ (३।२।१५०) इति सूत्रे भाष्ये स्पष्टम् । अत्र च ज्ञापकं ‘ निन्दहिंसादिसूत्रेण वुञ्विधानम् । अन्यथा ण्वुलैव सिद्धे किं तेनेत्यन्यत्र विस्तरः । इयं चानित्या । ‘ सूददीप० ’ (३।२।१५३) इत्यनेन युच्प्रतिषेधात् । अन्यथा ‘ नमिकम्पि० ’ (३।२।१६७) इति रप्रत्ययनैव तद्बाधे सिद्धे किं तेनेति स्पष्टं भाष्यतत्त्वविवेके ॥ ५३ ॥

क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ॥ ५४ ॥

स्पष्टम् । अत्र च ज्ञापकं ‘ अर्हे कृत्यतृचश्च ’ (३।३।१६९) इति सूत्रे कृत्यतृचोर्ग्रहणम् । तद्धि समुच्चितलिङा कृत्यतृचोर्बाधा मा भूदित्येतदर्थम् । यदि च वासरूपविधिः स्यात् किं तदुपादानेन । तया च वासरूपविधेरनित्यत्वं ज्ञाप्यते इति फलितम् ॥ ५४ ॥

सांप्रतिकाभावे भूतपूर्वगतिः ॥ ५५ ॥

ताच्छीलिककार्यप्रयोजकीभूतधर्मानवच्छिन्नत्वे पूर्वं विद्यमानत्वमादाय शास्त्रं प्रवर्तनीयमित्यर्थः । न्यायसिद्धेयमित्येके । वस्तुतस्तु ‘ अचो यत् ’ (३।१।९७) इति सूत्रस्याज्ग्रहणमस्या ज्ञापकम् । अन्यथा ‘ ऋहलोर्ण्यत् ’ (३।१।१२४) इति हलन्तेभ्यो ण्यत्प्रत्ययस्य विधानादन्तरेणाप्यज्ग्रहणं परिशेषादजन्तादेव यत्प्रत्ययो भविष्यतीति किमज्ग्रहणेन । तत् क्रियमाणं भूतपूर्वाजन्तस्यापि यत्प्रत्ययविधानार्थं संपद्यते । तेन धात्रो दाञश्च सति द्वित्वे ‘ सनि मीमाघु० ’ (७।४।५४) इति इसि अभ्यासस्य ‘ अत्र लोपोऽभ्यासस्य ’ (७।४।५८) इति लोपे ‘ सः स्यार्धधातुके ’ (७।४।४९) इति तत्वेऽनुत्पन्नार्धधातुके अतो लोपे हलन्तत्वात्प्राप्तं ण्यतं बाधित्वा भूतपूर्वाजन्तत्वमादाय ‘ अचो यत् ’ (३।१।९७) इति यत्प्रत्यये ‘ यतोऽनावः ’ (६।१।२१३) इत्याद्युदात्तत्वसिद्धिरिति संक्षेपः । विस्तरस्तु वैयाकरणसिद्धान्तरहस्याख्यास्मत्कृतसिद्धान्तकौमुदीव्याख्यानेऽनुसंधेयः । एषा च ‘ नामि ’ (६।४।३) इत्यादि सूत्रस्यभाष्ये स्फुटा ॥ ५५ ॥

भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ५६ ॥

तेषां गुणानां अवयवपदार्थानां संविज्ञानं विशेष्यान्वयिनाऽन्वयित्वं बहुव्रीहौ भवतीत्यर्थः । अपिना अतद्गुणसंविज्ञानमपि । हिशब्दः प्रसिद्धौ । तेन संयोगसमवायान्यतरसंबन्धेन संबन्धी यत्रान्यपदार्थः प्रायस्तत्र तद्गुणसंविज्ञानत्वम् । यथा लम्बकर्णमानय यथा वा चित्रगुमानयेति । एतच्च ' सर्वादीनि० ' (१।१।२७) इति सूत्रे भाष्ये स्पष्टम् ॥ ५६ ॥

चानुकृष्टं नोत्तरत्र ॥ ५७ ॥

चकारेणानुकृष्टं नोत्तरत्रानुवर्तते इत्यर्थः । अत्र च ज्ञापकं णमुल्यनुवर्तमाने ' अन्यथैवंकथमित्थंसु० ' (३।४।५९) इति सूत्रे पुनर्णमुल्ग्रहणम् । अन्यथा क्त्वा चेत्युक्तावपि उत्तरत्रोभयोः संबन्धसिद्धौ किं तेन । इयं चानित्या । ' तयोरेव कृत्यक्तखलर्थाः ' (३।४।७०) इति सूत्रे एवकारग्रहणात् । तद्धि कर्त्रर्थव्यवच्छेदार्थं क्रियते । यदि च चानुकृष्टमुत्तरत्र न स्यात् ' लः कर्मणि च ' (३।४।६९) इत्यत्रापि कर्तुश्चानुकृष्टत्वादुत्तरत्राप्राप्तौ किमेवकारेण इति अस्मत्कृतपाणिनीयदीपिकायां स्पष्टम् ॥ ५७ ॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ५८ ॥

अल्पाश्रयकार्ये कर्तव्ये बह्वाश्रयमसिद्धमित्यर्थः । तेन पचावेदं पचामेदम् इत्यादौ बहिरङ्गैकादेशगुणस्यासिद्धत्वादन्तरङ्गैत्वाभावः । अत्र च ज्ञापकं ' वाह ऊठ् ' (६।४।१३२) इति ऊठ्ग्रहणम् । तद्धि विश्वौहः इत्यादिसिद्ध्यर्थम् । यदि चेयं न स्यात् वाहः संप्रसारणमित्युक्तावपि ' संप्रसारणाच्च ' (६।१।१०८) इति पूर्वरूपत्वे वृद्धौ च विश्वौह इति रूपसिद्धौ किमूठ्ग्रहणेन । सत्यां ह्यस्यां बहिरङ्गसंप्रसारणस्यासिद्धतया रूपासिद्धिः स्पष्टैव । एतच्च विप्रतिषेधसूत्रे भाष्ये स्पष्टम् । इयं चोत्तरपदाधिकारे न प्रवर्तते इति ' इच एकाचोम्० ' (६।३।६८) इति सूत्रे भाष्ये स्पष्टम् । इयं च सापवादेति ' अन्तरङ्गं बलीयः ' इति परिभाषान्तरे प्राक् पठितम् । अनयैव निर्वाहे ' अन्तरङ्गं बलीयः ' इति परिभाषा न कार्येत्यपि विप्रतिषेधसूत्रे भाष्ये स्पष्टम् ॥ ५८ ॥

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ५९ ॥

बहिरङ्गपरिभाषापवादोयम् । यत्रान्तरङ्गे बहिरङ्गे वाऽचोरानन्तर्यमाश्रियते तत्र बहिरङ्गपरिभाषा न प्रवर्तते इत्यर्थः । अत्र च ज्ञापकं ' षत्वतुकोरसिद्धः ' (६।१।८६) इति सूत्रम् । तद्धि कोऽसिचत् कोऽस्य इत्यादौ षत्वनिवारणार्थं क्रियते । यदि चासिद्धपरिभाषा प्रवर्तेत बहिरङ्गत्वेनैकादेशस्यासिद्धतया षत्वाप्राप्तेः किं सूत्रेण । तत् क्रियमाणं ' नाजानन्तर्ये० ' इति परिभाषां ज्ञापयति । अत्र च ' अचोः ' इति द्वित्वं विवक्षितम् । अन्तरङ्गे बहिरङ्गे वा अचोरानन्तर्यमाश्रीयते यत्र तत्रैवेयं परिभाषा प्रवर्तत इति हरदत्तः । तन्न । पचावेदमित्यादौ एत ऐत्वमाशङ्क्य बहिरङ्गत्वेन गुणस्यासिद्धत्वादिति स्थलान्तरीयस्वग्रन्थविरोधात् । किं च बहिरङ्गस्यासिद्धताबलेन प्रेद्धमित्यादिसिद्धिरिति प्रतिपादनपरनधातुलोपलोपसूत्रस्थभाष्यविरोधापत्तेश्च । तस्माद्वर्णग्राहकमानानुरोधेनोत्तरकाल-

प्रवृत्तकार्ये यत्राजानन्तर्यं तत्र नाजानन्तर्ये इति निषेधः । अस्ति हि उत्तरकालप्रवृत्तकार्ये षत्वे अजानन्तर्याश्रयणम् । इणः परस्य सस्य इत्युक्तेः । एतच्च 'न धातुलोप०' (१।१।४)- सूत्रे 'अचः परस्मिन्०' (१।१।५७) इति सूत्रे च शब्दकौस्तुभे विप्रतिषेधसूत्रे (१।४।२) भाष्ये च स्पष्टम् ॥ ५९ ॥

वार्णादाङ्गं बलीयः ॥ ६० ॥

युगपत्प्रवृत्तौ समानाश्रये च वार्णापेक्षयाङ्गं बलवदित्यर्थः । युच्छतीत्यत्र गुणवारणाय युगपत्पदम् । कार इत्यादावतिव्याप्तिवारणाय समानाश्रये इति । तेन ऊहतुः इत्यादौ सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणाद् ह्रस्वः प्राप्तो न भवति सकृत्प्रवृत्तत्वात् । आङ्गत्वाद्धि पर्जन्यवल्लक्षणप्रवृत्तौ ह्रस्वे कृते ततो दीर्घः वार्णादाङ्गं बलीयः इति न्यायादिति सिद्धान्तकौमुदी व्याख्याता । अत्र च 'अङ्गस्य' (६।४।१) 'आडजादीनाम्' (६।४।७२) इत्यादिसूत्रस्थभाष्ये व्याश्रयाणामपि प्रयोजनानामुपन्यासात् समानाश्रयत्वविशेषणमनावश्यकमित्याहुः । इयं च परिभाषा 'अभ्यासस्यासवर्णे' (६।४।७८) इत्यसवर्णग्रहणेन ज्ञापितेति षष्ठे प्रथमाह्निकान्ते भाष्ये स्थितम् । तद्धि ईषतुः ऊषतुः इत्यादिवारणाय नोपयुज्यते । अन्तरङ्गेण सवर्णदीर्घेणेयङुवङोर्बाधात् । अतश्च क्रियमाणमसवर्णग्रहणं परिभाषां ज्ञापयति ॥ अनित्या चेयं 'च्छ्वोः शूडनुनासिके च' (६।४।१९) इति सूत्रे सतुक्कग्रहणात् । स हि तुकः श्रवणं मा भूदिति क्रियते । यदि च पूर्वं शादेशः स्यात्तत्तुकोऽप्राप्तेस्तद्वैयर्थ्यं स्पष्टमेवेति 'येन विधिः' (१।१।७२) इति सूत्रे कैयटे 'अचः परस्मिन्०' (१।१।५७) इति सूत्रे कौस्तुभे च विस्तरेण प्रपञ्चितम् ॥ ६० ॥

अकृतव्यूहाः पाणिनीयाः ॥ ६१ ॥

विशिष्ट ऊहो येषां ते व्यूहाः । अकृताश्च ते व्यूहाश्चाकृतव्यूहाः । निमित्तनिर्णयविरहे कार्यं न कुर्वन्तीत्यर्थः । अस्याश्च ज्ञापकं 'गोरतद्धितलुकि' (५।४।९२) इति सूत्रस्यातद्धितग्रहणम् । तद्धि राजगवीयतीत्यादौ सुपो लुकः सत्त्वेन टज्निषेधो मा भूदिति क्रियते । अन्यथान्तरङ्गत्वात् टच्सिद्धौ किं तेन । अस्याश्च प्रवृत्तौ निमित्तविनाशसम्भावनैव निमित्तं न तु विनाश इति ध्येयम् । 'समर्थानां प्रथमात्' (४।१।८२) इत्यत्र समर्थग्रहणमपि ज्ञापकमिति दिक् । इयं चानित्या । 'अल्लोपोऽनः' (६।४।१३४) इति सूत्रे तपरकरणात् । तद्धि अनितेः क्विपि 'आन्' इत्यत्र लोपाभावाय क्रियते । अन्यथा दीर्घाभावे लोपसंभावनासत्त्वेनानया तदप्रवृत्तौ तद्वैयर्थ्यं स्पष्टमेवेत्याहुः ॥ ६१ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते ॥ ६२ ॥

स्पष्टम् । 'अदो जग्धिर्ल्यप्ति किति' (२।४।३६) इति सूत्रे ल्यब्ग्रहणमत्र ज्ञापकमिति तत्रैव सूत्रे भाष्ये स्पष्टम् ॥ ६२ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते ॥ ६३ ॥

स्पष्टम् । तेन गोमत्प्रियः इत्यादिसिद्धिः । अन्यथा लुकः प्रागन्तरङ्गप्रवृत्तौ नुम् स्यात् । अत्र च ज्ञापकं ‘ प्रत्ययोत्तरपदयोश्च ’ (७ । २ । ९८) इति सूत्रे उत्तरपदग्रहणम् । प्रत्ययग्रहणं त्वाचारक्विबन्तादौ चरितार्थम् । न च तदपि तव पुत्रस्त्वत्पुत्र इत्यादौ तवममादिबाधनेन चरितार्थमिति वाच्यम् । ‘ त्वमौ० ’ (७।२।९७) इति सूत्रे मपर्यन्तस्यैव स्थानित्वनिर्णयेन अधिकस्य स्थानित्वे मानाभावेन सर्वादेशत्वाभावे सिद्धे पुनर्मपर्यन्तानुवृत्तिर्वाक्यभेदेन पुनर्विधानार्थास्यार्थस्य ज्ञापिकेति भाष्ये स्पष्टम् । इयं च न सामासिकलुङ्मात्रविषया, किन्तु लुङ्मात्रविषयैव । अन्यथा ‘ एङ्ह्रस्वात्संबुद्धेः ’ (६।१।६९) ‘ न यासयोः ’ (७।३।४५) इत्यादिसूत्रस्थाकराविरोधापत्तेः । तथा च लुक्स्थानिभूतप्रत्ययानिमित्तान्तरङ्गकार्यापेक्षयैव लुकः प्राबल्यमनया बोध्यते धर्मिग्राहकमानात् प्रत्यासत्तेश्चेति । इयमप्यकृतव्यूहपरिभाषान्तर्गतैवेति ध्येयम् ॥ ६३ ॥

निमित्तापाये नैमित्तिकस्याप्यपायः ॥ ६४ ॥

स्पष्टम् । यथा अपेक्षाबुद्धिविनाशे द्वित्वनाशो न्यायनये, प्रारब्धनाशाद् विक्षेपनाशो वेदान्तिनां तथेति भावः । ‘ घुमास्था० ’ (६।४।६६) इति निर्देशोपि ज्ञापकः । इयमपि ‘ अकृतव्यूहाः० ’ (परि. ६१) इत्यस्या एव प्रपञ्चः ॥ ६४ ॥

कृतमपि निवर्तयन्ति ॥ ६५ ॥

इत्येषाप्येवमेव ॥ ६५ ॥

उपजनिष्यमाणनिमित्तोप्यपवाद उपजातनिमित्तमप्युत्सर्गं बाधते ॥ ६६ ॥

कालान्तरभाविनिमित्तोपजीव्यापवादः क्लृप्तनिमित्तमपि सामान्यं बाधत इत्यर्थः । तेन दधतीत्यत्रान्तादेशं बाधित्वाभ्यस्ताश्रयोऽदादेश एव । इयमपि अकृतव्यूहपरिभाषान्तर्गतैव । अपवादविषयाभावस्यापि निमित्तकोटौ प्रवेशात् । स्पष्टं चैतत् ‘ उभे अभ्यस्तम् ’ (६।१।५) इति सूत्रे भाष्ये ॥ ६६ ॥

स्वरविधौ व्यञ्जनमविद्यमानवत् ॥ ६७ ॥

स्वरोद्देश्यकविधावित्यर्थः । इदं च ‘ समासस्य ’ (६।१।२२३) इति सूत्रे भाष्ये स्पष्टम् । ‘ नोत्तरपदेनुदात्तादौ० ’ (६।२।१४२) इत्यत्रेयं ज्ञापितेति स्पष्टं तत्रैव ॥ ६७ ॥

हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ॥ ६८ ॥

स्पष्टम् । ‘ यतोऽनावः ’ (६।१।२१३) इत्यत्र ‘ अनावः ’ इति प्रतिषेधोस्या ज्ञापक इति स्पष्टं तत्रैव ॥ ६८ ॥

निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ ६९ ॥
तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥ ७० ॥

केवलोपादाने अनुबन्धसहितस्य अन्यानुबन्धकग्रहणे तदनुबन्धविशिष्टस्य च ग्रहणं नेत्यर्थः । अनयोश्च ज्ञापकं ' वामदेवाड् ड्यड्ड्यौ ' (४।२।९) इत्यत्र ड्यड्ड्ययोर्ङित्वम् । तद्धि ' ययतोश्चातदर्थे ' (६।२।१५६) इत्यत्रानयोरग्रहणार्थं सत् परिभाषाद्वयं ज्ञापयतीति ' वामदेवाड् ड्यड्ड्यौ ' (४।२।९) इति सूत्रे भाष्ये स्पष्टम् । ' दिव औत् ' (७।१।८४) इत्यत्रास्य भाष्ये संचारितत्वात् प्रत्ययाप्रत्ययविषयेयमिति वदन्ति । वर्णग्रहणे चैतयोरप्रवृत्तिरिति ' औङ आपः ' (७।१।१८) इति सूत्रे भाष्ये स्पष्टम् ॥ ६९,७० ॥

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ ७१ ॥

प्रत्ययविधौ गृह्यमाणेन प्रातिपदिकेन ' येन विधिः० ' (१।१।७२) इति प्राप्तस्तदन्तविधिर्नेत्यर्थः । इयं च ' समासप्रत्ययविधौ प्रतिषेधः ' (१।१।७२ वा. ३) इत्यादिवार्तिकार्थानुवादिका । अत एव स्वस्रादौ तदन्तविधिः संगच्छते । अत एव येन विधिरिति सूत्रे भगवता नेयमुक्ता । एतच्च ' असमासे निष्कादिभ्यः ' (५।१।२०) इति सूत्रे भाष्यकैयटयोः स्पष्टम् । अस्याश्च ज्ञापकं ' पूर्वादिनिः ' (५।२।८६) इत्येव सिद्धे ' सपूर्वाच्च ' (५।२।८७) इति सूत्रम् ॥ ७१ ॥

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ७२ ॥

गृह्यमाणेन प्रातिपदिकेन व्यपदेशिवद्भावो नास्तीत्यर्थः । प्रत्ययविषया चेयम् । ' पूर्वादिनिः ' ' सपूर्वाच्च ' (५।२।८६,८७) इति योगविभागकरणमस्या ज्ञापकमिति ' येन विधिः० ' (१।१।७२) इत्यत्र भाष्ये स्पष्टम् ॥ ७२ ॥

स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ ७३ ॥

' णचः स्त्रियामञ् (५।४।१४) इत्यत्र स्त्रियांग्रहणं ज्ञापकमस्याः । अन्यथा ' कर्मव्यतिहारे णच् स्त्रियाम् ' (३।३।४३) इति णचः स्त्रियामेव विधानात् किं स्त्रियामित्यनेन ॥ ७३ ॥

समासान्तविधिरनित्यः ॥ ७४ ॥

' प्रतेरंश्वादयस्तत्पुरुषे ' (६।२।१८३) इति सूत्रेऽन्तोदात्तार्थमंश्वादिषु राजन्शब्दस्य पाठोऽस्या ज्ञापकः । अन्यथा ' राजाहःसखिभ्यष्टच् ' (५।४।९१) इति टचि चित्त्वादेवोदात्तत्वे सिद्धे किं तदुपादानेनेति वृद्धिसूत्रे शब्दकौस्तुभे स्पष्टम् ॥ ७४ ॥

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ७५ ॥

संनिपातो द्वयोः संबन्धः तन्निमित्तो यो विधिः स तयोः संनिपातविघातकविधेरनिमित्तमित्यर्थः । तेन शतानि सहस्राणि इत्यत्र नुमि कृते नान्तत्वात् 'ष्णान्ता षट्' (१।१।२४) इति प्राप्ता षट्संज्ञा न भवति, विभक्तिसंनियोगेन जातस्य नुमः षट्संज्ञाप्रयोजकत्वे सति 'षड्भ्यो लुक्' (७।१।२२) इति लुकि विभक्तिसंनिपातविघातकत्वापत्तेः । अत्र च ज्ञापकं 'वामि ह्रस्वश्च' इति सूत्रमकृत्वा 'वामि' (१।४।५) 'ङिति ह्रस्वश्च' (१।४।६) इति सूत्रद्वयकरणम् । तद्धि भ्रूणामित्यादौ नुड् यथा स्यादित्येतदर्थम् । नुटि अजादिप्रत्ययसंबन्धस्य विनाशाद् यादृशानुपूर्वीसंबन्धेन कार्यं तादृशानुपूर्वीसंबन्धविनाशेऽप्येषा प्रवर्तते इति स्पष्टं 'कृन्मेजन्तः' (१।१।३९) इति सूत्रे भाष्ये ॥ इयं चानित्या । 'कष्टाय क्रमणे' (३।१।१४) इत्यादिनिर्देशात् । अन्यथाऽकारान्तसंनिपातेन यादेशस्यादन्तविघातकत्वायोगात् । तेन दाक्षिरित्यादावकारान्ताज्जातस्य इञः अङ्गसंज्ञानिमित्तत्वेनाङ्गसंज्ञाया अल्लोपनिमित्तत्वं नेति 'कृन्मेजन्तः' (१।१।३९) इति सूत्रे भाष्ये स्पष्टम् ॥ ७५ ॥

प्रकृतिग्रहणे यङ्लुगन्तस्य ग्रहणम् ॥ ७६ ॥

आटिटत् इत्यादौ णिलोपवारणाय द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्ताज्जुहुधि इत्यादौ कृते द्वित्वे धित्ववत् कृताद्वित्वयङ्लुगन्तेपि प्रकृतिप्रयुक्तकार्यसिद्धिरिति भावः । तथा च न्यायसिद्धेयामिति फलितम् ॥ ७६ ॥

संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ॥ ७७ ॥

स्पष्टम् । अत्र च ज्ञापकं 'बिल्वकादिभ्यश्छस्य लुक्' (६।४।१५३) इति सूत्रे छग्रहणमित्येके । समुच्चयार्थकचशब्दयोगे विधेययोरैककालिकत्वैकदेशिकत्वनियमात् न्यायसिद्धेयामित्यन्ये ॥ ७७ ॥

संज्ञापूर्वको विधिरनित्यः ॥ ७८ ॥

अत्र च ज्ञापकं 'ओरोत्' (६।४।१४६) इति वक्तव्ये गुणग्रहणम् । इयं च विधेयकोटौ संज्ञापूर्वकत्व एव प्रवर्तते । तेन 'स्वं रूपं' (१।१।६८) 'अणुदित्०' (१।१।६९) इत्यादौ प्रवृत्त्यभाव इत्याहुः ॥ ७८ ॥

ताच्छीलिकेष्वण्कृतं भवति ॥ ७९ ॥

ताच्छील्याद्यर्थे विहितप्रत्ययेषु अण्कार्यं भवतीत्यर्थः । 'अन्' (६।४।१३७) इति अणि विहितप्रकृतिभावबाधनार्थेन 'कार्मस्ताच्छील्ये' (६।४।१७२) इति निपातनेनैषा ज्ञाप्यत इत्यन्यत्र विस्तरः ॥ ७९ ॥

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् ॥ ८० ॥

धातुस्वरूपोपादाने धातुशब्दव्यापारेण विहितप्रत्यये कार्यविज्ञानमित्यर्थः। अत्र च ज्ञापकं भ्रौणहत्ये तत्वनिपातनम्। अन्यथा 'हनस्तः०' (७।३।३२) इत्येव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। अत्र स्वरूपग्रहणं यथाकथंचित्, न तु शृङ्गग्राहिकया उपादानमिति 'मृजेर्वृद्धिः' (७।२।११४) इति सूत्रे भाष्ये स्पष्टम्। तेन परिमृड्भ्याम् इत्यादौ 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' (६।१।५९) इत्यमागमो न। इयं च पदान्तनिमित्तकार्ये न। अप्रशान् (८।३।७) इति निषेधाल्लिङ्गात्। 'न भूसुधियोः' (६।४।८५) इति निषेधेन अनित्यत्वज्ञापनादियङादिविधावपि नेति ज्ञेयम् ॥ ८० ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ८१ ॥

'येन विधिः०' (१।१।७२) इति सूत्रे भाष्ये स्पष्टम् ॥ ८१ ॥

तदेकदेशस्तद्ग्रहणेन गृह्यते ॥ ८२ ॥

इति तत्रैव भाष्ये स्पष्टम् ॥ ८२ ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम् ॥ ८३ ॥

अत्र च ज्ञापकं 'स्वरतिसूति०' (७।२।४४) इति सूत्रे सूतिसूयत्योः पृथङ्निर्देशः। अन्यथा सूङ् इत्येव वदेत्। इयं च 'गातिस्था०' (२।४।७७) इति सूत्रे भाष्ये स्पष्टा ॥ ८३ ॥

विधौ परिभाषोपतिष्ठते नानुवादे ॥ ८४ ॥

अनूद्यमानविशेषणेषु नोपतिष्ठते, किं तु विधावेवेत्यर्थः। इयं च साक्षाद्विध्यङ्गभूतानां साक्षाद्विधेयेनासिद्धत्वादन्वयासंभवे तद्विशेषणव्यवस्थापकत्वेन चरितार्थानां तद्विशेषणव्यवस्थापकत्वे मानाभावः इति तर्कमूलेयमित्येके। 'उदीचामातः स्थाने' (७।३।४६) इति स्थानेग्रहणमस्या ज्ञापकमित्यन्ये ॥ ८४ ॥

प्रकृतिग्रहणे ण्यधिकस्य ग्रहणम् ॥ ८५ ॥

केवलधातुग्रहणे णिजन्तस्यापि ग्रहणमित्यर्थः। 'हेरचङि' (७।३।५६) इति सूत्रे अचङि इति प्रतिषेधेन अस्या ज्ञापनात् कुत्वमात्रविषयेयमिति भाष्ये स्पष्टम् ॥ ८५ ॥

अङ्गवृत्ते पुनर्वृत्तावविधिः ॥ ८६ ॥

अङ्गे अङ्गाधिकारे वृत्तं वर्तनं यस्य तदङ्गवृत्तं शास्त्रम्। तस्मिन् कृते सति पुनः शास्त्रान्तरं न प्रवर्तते इत्यर्थः। तेन यूयं वयमित्यत्र शेषे लोपोऽन्त्यलोप इति पक्षे जसः शीभावो न। एषा च परिभाषा 'ज्यादादीयसः' (६।४।१६०) इति सूत्रे भाष्ये ज्ञापिता। अन्यथा ज्यायानित्यत्रेयसुनः ईकारस्य 'बहोर्लोपः०' (६।४।१५८) इत्यतो लोपमनुवर्त्य लोपं विधाय 'अकृत्सार्वधातुकयोः०' इति दीर्घेण च सिद्धे किमा-

द्विधानेनेति ॥ अनित्या चेयम् । द्वयोरित्यादिनिर्देशात् । अनित्यत्वज्ञापकान्यार्थाभिप्रायेण वा 'भ्यसो भ्यम्' (७।१।३०) इति सूत्रे निष्ठितस्येति पठितम् ॥ ८६ ॥

आगमशास्त्रमनित्यम् ॥ ८७ ॥

'नि लोट्' (८।४।१६) इत्येव सिद्धे आनिग्रहणमत्र लिङ्गम् । तेन 'साक्षं तर्तुकामस्य' इत्यादि सिद्धम् ॥ ८७ ॥

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः ॥ ८८ ॥

कृत्रिमं स्वशास्त्रसंकेतितम् । अनित्या चेयम् । 'संख्याया अतिशदन्तायाः कन्' (५।१।२२) इति सूत्रे शदन्तपर्युदासात् । स्पष्टं चैतत् संख्यासंज्ञासूत्रे भाष्ये ॥८८॥

प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः ॥ ८९ ॥

अन्तरङ्गोपजीव्यापेक्षयापि प्रधानप्राबल्यस्य लोके दृष्टत्वान्न्यायमूलिका चेयम् । 'हेतुमति०' (३।१।२६) इति सूत्रे भाष्यकैयटयोः स्पष्टमेतत् ॥ ८९ ॥

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ ९० ॥

उक्तन्यायमूलिकेयम् । तेन नमस्करोति देवान् इति सिद्धम् ॥ ९० ॥

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ ९१ ॥

योगजन्यबोधे रूढिजन्योपस्थितिः प्रतिबन्धिकेति रथकाराधिकरणन्यायसिद्धेयम् ॥ ९१ ॥

गणकार्यमनित्यम् ॥ ९२ ॥

'तनादिकृञ्भ्यः०' इति सूत्रे कृञ्ग्रहणमत्र लिङ्गम् । तेन 'न विश्वसेत्' इत्यादि सिद्धम् ॥ ९२ ॥

व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ ९३ ॥

'व्याख्यानतः०' (परिभाषा १) इत्यस्य प्रपञ्चोयम् । 'लटः शतृ०' (३।२।१२४) इत्यादौ भाष्ये स्पष्टम् ॥ ९३ ॥

अनन्त्यविकारेऽन्त्यसदेशस्य ॥ ९४ ॥

अन्त्यसदेशासदेशयोरेकप्रयोगे युगपत्प्राप्तौ अन्त्यसदेशस्येत्यर्थः । अदमुयङ् । 'ष्यङः संप्रसारणम्०' (६।१।१३) इति सूत्रे भाष्येस्याः परिभाषायाः प्रयोजने अन्यथासिद्धिप्रदर्शनेन इयं प्रत्याख्याता ॥ ९४ ॥

नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ॥ ९५ ॥

अभ्यासविकारं वर्जयित्वा अनर्थके अलोन्त्यविधिर्नेत्यर्थः । अस्या ज्ञापकम् 'इदोय् पुंसि' (७।२।१११) इति सूत्रस्थमिद्ग्रहणम् । अन्यथा 'इदमो मः'

(७।२।१०८) ‘ दश्च ’ (७।२।१०९) ‘ यः सौ ’ (७।२।११०) ‘ अय् पुंसि ’ (७।२।१११) इत्येव वदेत् । अनभ्यासविकारे इति तु ‘ अर्तिपिपर्त्योश्च ’ (७।४।७७) इति निर्देशेन ज्ञाप्यते । इयं च उपधासंज्ञासूत्रे (१।१।६५) भाष्ये प्रत्याख्याता ॥ ९५ ॥

विधिनियमसंभवे विधिरेव ज्यायान् ॥ ९६ ॥

मीमांसकानां परिसंख्याविधिर्वैयाकरणैर्नियमविधित्वेन व्यवहारात् परिसंख्यायाश्च स्वार्थहानिः परार्थपरिकल्पना प्राप्तबाधश्चेति दोषत्रयविशिष्टत्वाद् नियमविध्यपेक्षया अत्यन्ताप्राप्तार्थप्रापकापूर्वविधिरेव युक्त इति भावः ॥ ९६ ॥

सामान्यातिदेशे विशेषानतिदेशः ॥ ९७ ॥

सामान्योपस्थितिकाले नियमेन विशेषोपस्थापकसामग्र्यभावाद् न्यायमूलिकेयम् । तेन ‘ आशंसायां भूतवच्च ’ (३।३।१३२) इति लुङ एवातिदेशो न लङ्लिटोः । ‘ न ल्यपि ’ (६।४।६९) इति लिङ्गादनित्येयमित्याहुः ॥ ९७ ॥

प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् ॥ ९८ ॥

इयं चाङ्गसूत्रे भाष्ये पठिता । तत्रैव कैयटे वर्णग्रहणे न प्रवर्तते इत्यपि स्थितम् ॥ ९८ ॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ ९९ ॥

सहचरणसंबन्धज्ञानमूलकतदर्थमात्रतात्पर्यग्रहोऽस्या बीजम् । यथा रामलक्ष्मणौ इत्युक्ते दाशरथ्योरेव बोधः ॥ ९९ ॥

श्रुतानुमितयोः श्रुतसंबन्धो बलीयान् ॥ १०० ॥

अत्र श्रुतत्वं साक्षाच्छ्रूयमाणत्वम् । अनुमितत्वं सामान्यरूपेण प्रतीतिविषयत्वम् । तेन विशेषविषयानुमानात् । यद्वा अनुमितत्वं प्रकरणप्राप्तत्वम् । तथा च विलम्बितोपस्थितिकत्वापेक्षया शीघ्रोपस्थितिकत्वस्य लघुत्वादिति भावः । तेन ‘ अस्थिदधि० ’ (७।१।७५) इत्यादौ लिङ्गं श्रूयमाणास्थ्यादीनामेव विशेषणं, न स्वाङ्गस्येति अतिदध्ना ब्राह्मणेनेति सिद्धम् ॥ अनित्या चेयं ‘ तस्मादित्युत्तरस्य ’ (१।१।६७) इति लिङ्गात् इत्याहुः ॥ १०० ॥

श्रुतानुमितयोः श्रुतेनैव संबन्धः ॥ १०१ ॥

इयमपि पूर्वस्यैव प्रपञ्चभूता ॥ १०१ ॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ १०२ ॥

लाक्षणिकत्वं विलम्बितोपस्थितिकत्वम् । तदपेक्षया शीघ्रोपस्थितिकत्वमेव युक्तमिति लौकिकन्यायमूलिकेयमिति स्पष्टं कैयटादिषु । एतच्च ‘ ओत् ’ (१।१।१५) इति सूत्रे भाष्ये स्पष्टम् ॥ १०२ ॥

ग्रामादाग्रहणेष्वविशेषः ॥ १०३ ॥

एषु लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तते इत्यर्थः । अत्र च ज्ञापकं दैपः पित्त्वम् । तद्धि अदाप् इति सामान्यग्रहणार्थम् । लाक्षणिकत्वादेवाग्रहणे सिद्धे किं निषेधसामान्यग्रहणार्थेन पित्त्वेन । इयं च लक्षणप्रतिपदोक्तपरिभाषाया निरनुबन्धकपरिभाषाया लुग्विकरणपरिभाषायाश्च बाधिका येननाप्राप्तन्यायात् । साहचर्यपरिभाषाया अर्थवत्परिभाषायाश्च बाधिकेयमित्येके । नेत्यन्ये । ' दाधा घ्वा० ' (१।१।२०) इति सूत्रे भाष्ये स्पष्टा ॥ १०३ ॥

प्रत्येकं वाक्यपरिसमाप्तिः ॥ १०४ ॥

यथा ' वृद्धिरादैच् ' (१।१।१) इत्यत्र । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यादौ भुजिवत् ॥ १०४ ॥

क्वचित् समुदायेपि ॥ १०५ ॥

यत्रान्वर्थतादिकं गमकं तत्रेति भावः । यथा संयोगसंज्ञायां द्वयोर्बहूनां वा संयोगसंज्ञा । यथा वा गर्गाः शतं दण्डयन्तामित्यत्र अर्थिनश्च राजानो हिरण्येन भवन्तीति वाक्यशेषात् समुदाये वाक्यपरिसमाप्तिः ॥ १०५ ॥

उभयत्रापि वाक्यपरिसमाप्तिः ॥ १०६ ॥

यथा ' अट्कुप्वाङ्० ' (८।४।२) इत्यत्र, यथा वा गर्गैः सह न भोक्तव्यम् इत्युक्ते समुदितैः प्रत्येकं च न भुज्यते तद्वत् । त्रितयं चैतन्न्यायसिद्धं व्याख्यानगम्यं चेति ध्येयम् ॥ १०६ ॥

अभेदका गुणाः ॥ १०७ ॥

उदात्तादयो गुणा भेदकरा न भवन्तीत्यर्थः । मुण्डित्वजटिलत्वादिभिर्देवदत्तस्यान्यत्वाभावान्न्यायसिद्धेयम् । ' अनुदात्तः ' (७।१।७५) इति उदात्तग्रहणमपि ज्ञापकम् । अन्यथा ' अनङ् ' उदात्तगुण एवोच्चार्येत । एतच्च वृद्धिसूत्रे भाष्ये स्पष्टम् । ' अणुदित्० ' (१।१।६९) सूत्रे अण्ग्रहणादनित्येयमिति ध्येयम् ॥ १०७ ॥

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ १०८ ॥

' येन विधिः० ' इत्यस्यायं प्रपञ्च इत्यवोचाम । इयं चोत्तरपदाधिकारेपि प्रवर्तते । परं तु उत्तरपदशब्दं विशेष्यं कृत्वा तद्विशेषणे तु न प्रवर्तते । ' हृदयस्य हृल्लेख० ' (६।३।५०) इति लेखग्रहणाल्लिङ्गात् ॥ १०८ ॥

बाधकान्येव निपातनानि ॥ १०९ ॥

शास्त्रेण प्राप्तकार्यस्य बाधकं निपातनमित्यर्थः । तेन ' सर्वनामानि ' (१।१।२७) इत्यत्र ' पूर्वपदात्संज्ञायामगः ' (८।४।३) इति णत्वाभावः । एतच्च ' सर्वादीनि० ' (१।१।२७) इति सूत्रे भाष्ये स्पष्टम् । तक्रकौण्डिन्यन्यायमूलकमेतत् ॥ १०९ ॥

अबाधकान्यपि निपातनानि ॥ ११० ॥

' तयोरेव कृत्य० ' (३।४।७०) इति सूत्रे एवकारेण तक्रकौण्डिन्यन्यायस्य अनित्यत्वज्ञापनात् तन्मूलिकेयम् । एतच्च वृत्त्यादिषु स्पष्टम् ॥ ११० ॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥ १११ ॥

' कृतकारि खल्विदं शास्त्रं मेघवत् ' इति ' इको झल् ' (१।२।९)इति सूत्रस्थभाष्येण न्यायसिद्धेयम् । तेन ऊरुतुरित्यादौ ह्रस्वस्याप्यभ्यासह्रस्वत्वे ततो दीर्घे पुनर्ह्रस्वो न भवति । लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायात् ॥ १११ ॥

लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः ॥ ११२ ॥

यथोक्तविषयेषु ह्रस्वाप्रवृत्तिः । ' इरयो रे ' (६।४।७६) इति द्विवचननिर्देशोऽस्या ज्ञापक इति स्पष्टम् ' एकः पूर्वपरयोः ' (६।१।८४) इति सूत्रे भाष्ये ॥ ११२ ॥

निषेधाश्च बलीयांसो भवन्ति ॥ ११३ ॥

तसिलादिषु जातीयदेशीययोर्ग्रहणं चास्या लिङ्गम् । अन्यथा ' पुंवत्कर्मधारय० ' (६।३।४२) इति सिद्धे तद्वैयर्थ्यं स्पष्टमेव । एतच्च ' न लुमताङ्गस्य ' (१।१।६३) ' कर्मणिङ् ' (३।१।३०) इत्यादौ भाष्ये स्पष्टम् ॥ ११३ ॥

अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ॥ ११४ ॥

अर्थाकाङ्क्षायामन्यानुपस्थितिरस्या बीजम् । स्पष्टं च ' सुपि स्थः ' (३।२।४) इत्यत्र भाष्ये ॥ ११४ ॥

योगविभागादिष्टसिद्धिः ॥ ११५ ॥

न त्वनिष्टापादनं कार्यमित्यर्थः । तत्तत्समानविधिकद्वितीययोगेन विभक्तस्य ज्ञापनाथैतद्बीजम् ॥ ११५ ॥

पर्यायशब्दानां गुरुलाघवचर्चा नाद्रियते ॥ ११६ ॥

तत्र तत्र अन्यतरस्यां, विभाषा, वा इति सूत्रनिर्देशादिदं सिद्धम् ॥ ११६ ॥

यथोद्देशं संज्ञापरिभाषम् ॥ ११७ ॥

संज्ञाशास्त्रं परिभाषाशास्त्रं च यत्रोपदिष्टं तत्रैवेत्यर्थः । इदं यथाश्रुतग्राहिप्रतिपत्त्रपेक्षया । ' धृतराज्ञाम् ' (६।४।१३५) इत्यादिनिर्देशाश्चास्या लिङ्गम् ॥ ११७ ॥

कार्यकालं संज्ञापरिभाषम् ॥ ११८ ॥

यत्र कार्यं तत्रोभयोरुपस्थितिरित्यर्थः । अत्र च 'वृद्धिरादैच्' (१।१।१) इत्यत्र त्रैपादिकस्य रोरुकारस्येत्संज्ञाप्रयुक्तलोपकरणं ज्ञापकम् । इत्त्वे हि लोपः तत्सामर्थ्यादेव सिद्धः । युक्तिसिद्धा चेयम् ॥ ११८ ॥

ज्ञापकासिद्धं न सर्वत्र ॥ ११९ ॥

तत्र तत्र परिभाषाणामनित्यत्वज्ञापनमूलमेतत् ॥ ११९ ॥

उभयत आश्रयणे नान्तादिवत् ॥ १२० ॥

इयम् 'अन्तादिवच्च' (६।१।८५) इति सूत्रे भाष्ये स्पष्टा । न ह्युभयोस्तुल्ययोरेकः प्रेष्यो विरुद्धकार्यकृद् भवति, किं तु द्वयोरपि कार्यकृन्न भवति इति न्यायसिद्धेयमित्यपि तत्रैव । तेन अभीयादित्यादिसिद्धिः ॥ १२० ॥

समासप्रत्ययविधौ प्रतिषेधः ॥ १२१ ॥

तदन्तविध्यपवादः । तेन कृष्णं परमश्रितः सूत्रनडः इत्यादौ समासप्रत्ययाभावः ॥ १२१ ॥

उगिद्वर्णग्रहणवर्जम् ॥ १२२ ॥

पूर्वोक्तस्यापवादः । उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वेत्यर्थः । तेन अतिमहती इत्यादिसिद्धिः । एतदुभयमपि 'येन विधिः०' (१।१।७२) इति सूत्रे वार्तिकत्वेन भाष्ये पठितम् । दित्यदिति०' (४।१।८५) इति सूत्रे अदितिग्रहणमाद्यस्य ज्ञापकमित्याहुः ॥ १२२ ॥

वर्णाश्रये नान्तादिवत् ॥ १२३ ॥

इयमपि 'अन्तादिवच्च' (६।१।८५) इति सूत्रे भाष्ये वार्तिकत्वेन पठिता ॥ १२३ ॥

यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः ॥ १२४ ॥

न त्वादिष्टादचः इत्यर्थः । 'अचः परस्मिन्०' (१।१।५७) इति सूत्रवार्तिकसिद्धार्थकथनमेतत् । 'ह्वावामश्च' (३।२।२) इति सूत्रे भाष्ये स्पष्टम् ॥ १२४ ॥

एकदेशविकृतमनन्यवद् भवति ॥ १२५ ॥

स्थानिवत्सूत्रे वार्तिकत्वेन भाष्ये पठिता । स्थानिवत्सूत्रादेशग्रहणसिद्धार्थकथनमेतत् ॥ १२५ ॥

पूर्वत्रासिद्धीयमद्वित्वे ॥ १२६ ॥

'सर्वस्य द्वे' (८।१।१) इति सूत्रे वार्तिकत्वेन पठितम् । 'न मु ने' (८।२।३) इत्यत्र योगविभागसिद्धं च । इदं च द्वित्वाश्रयवर्णस्यान्यस्य वासिद्धत्वे कार्ये सर्वत्र प्रवर्तते । अप्रवृत्तौ मानाभावात् । इयं च 'उभौ साभ्यासस्य' (८।४।२१) इति लिङ्गादनित्या ॥ १२६ ॥

णौ कृतं द्वित्वे न स्थानिवत् ॥ १२७ ॥

इदं च ‘ द्विर्वचनेऽचि ’ (१।१।५९) इति सूत्रे भाष्ये वार्तिकत्वेन पठितम् । ‘ ओः पुयण्जि० ’ (७।४।८०) इति सूत्रे ‘ पयर्योरिति वक्तव्ये वर्णप्रत्याहारजग्रहोस्या ज्ञिम् ’ इति ‘ ऊन परिहाणे ’ इति धातौ सिद्धान्तकौमुदीमनोरमयोः, ‘ द्विर्वचनेऽचि ’ (१।१।५९) इति सूत्रे कौस्तुभे च विस्तरेण प्रपञ्चितम् ॥ १२७ ॥

पूर्वत्रासिद्धीये न स्थानिवत् ॥ १२८ ॥

‘ न पदान्त० ’ (१।१।५८) इति सूत्रे वार्तिकमिदं त्रिपाद्यसिद्धत्वन्यायमूलकम् ॥ १२८ ॥

संदेहे बहुवचनं प्रयोक्तव्यम् ॥ १२९ ॥

संदेहजन्यप्रश्नादावित्यर्थः । तेन कतीत्यस्य नित्यबहुवचनान्तत्वमेव । द्वयोरेकस्मिन् वा संदेहस्यैवासत्त्वेन न्यायसिद्धमेतत् । संदेहविषयस्य च बहुत्वात् ॥ १२९ ॥

पित्स्वराच्चित्स्वरो बलीयान् ॥ १३० ॥

परत्वान्न्यायसिद्धमेतत् । ‘ यङश्चाप् ’ (४।१।७४) इति सूत्रे भाष्ये स्पष्टमेतत् ॥ १३० ॥

विधिविधानविधिभाजां त्रयाणां समवधाने तदन्तविधिः । व्याख्यातम् (परिभाषा १८) ॥

अथ प्रक्षिप्ता निर्मूलाश्च प्रदर्श्यन्ते —

उदित् सवर्णं गृह्णाति ॥ १३१ ॥

न सवर्णमात्रम् । स्थानमात्रतुल्यं सवर्णं गृह्णातीत्यर्थः । विशिष्टस्यैव सवर्णसंज्ञाविधानाद् भाष्ये अदर्शनाच्चेयं प्रक्षिप्ता ॥ १३१ ॥

क्वचिद्विकृतिरपि प्रकृतिं गृह्णाति ॥ १३२ ॥

इयं निर्मूला भाष्याव्यवहृता च । ‘ निसमुपविभ्यः० ’ (१।३।३०) इत्यादौ ह्वेञ एवानुकरणे लक्षणवशासंपन्नमात्वम् । अशितीति प्रसज्यप्रतिषेधः ॥ १३२ ॥

संप्रसारणं तदाश्रयं च कार्यं बलवत् ॥ १३३ ॥

निर्मूलेयं ‘ लिट्यभ्यासस्य० ’ (६।१।१७) इत्युभयेषांग्रहणवैयर्थ्यापातेन भाष्ये प्रत्याख्याता ॥ १३३ ॥

क्रियाविशेषणानां कर्मत्वमेकत्वं क्लीबत्वं च ॥ १३४ ॥

इयं भाष्यापाठिता । ‘ ज्योतिष्टोमेन यजेत ’ इत्यादौ करणत्वदर्शनात् फलविशेषणे कर्मत्वस्य पूर्वेणैव सिद्धेश्च सामान्येन नपुंसकत्वस्यापि सिद्धेश्च क्रियाविशेषणत्वादेव न्यायत एकत्वस्य सिद्धेश्च व्यर्था ॥ १३४ ॥

औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ १३५ ॥

इयं निर्मूला । तत्रतत्रोपदेशग्रहणं कुर्वतः सूत्रकृतोऽसंमता च । ' दादेर्धातोर्घः ' (८।२।३२) इति सूत्रे अधोक् इत्यादौ घत्वाप्राप्तिसमाधानपरभाष्यासंमता च ॥ १३५॥

सर्वविधिभ्य इड्विधिर्बलीयान् ॥ १३६ ॥

इयं भाष्याव्यवहृता निर्मूला च ॥ १३६ ॥

सर्वविधिभ्यो लोपविधिर्बलीयान् ॥१३७॥

इयं भाष्याव्यवहृता निर्मूला च । आशीरित्यादौ क्विबादेरन्तरङ्गत्वाल्लोप इत्यर्थं ' प्रत्ययलोपे०' (१।१।६२) इत्यस्य चारितार्थ्यान्निष्फला च ॥ १३७ ॥

प्रतिपदविधानाद् योगविभागो गरीयान् ॥१३८॥

इयं निर्मूला तत्र तत्र योगविभागमाश्रित्य सूत्रप्रत्याख्यानपरभाष्यविरुद्धा च ॥१३८॥

गर्भवदावादयो भवन्ति ॥ १३९ ॥

प्रातिपदिकत्वाद्योर्मध्ये इत्यर्थः । ' न यासयोः' (७।३।४५) इति ज्ञापकसिद्धा संनिपातपरिभाषाऽनित्यत्वन्यायमूलेयम् ॥ १३९ ॥

वर्त्स्यत्प्रवृत्त्येह कार्याणि क्रियन्ते ॥ १४० ॥

यथा ' शिदेः शितः ' (१।३।६०) इति । न्यायसिद्धा चेयम् ॥ १४० ॥

परिभाव्य महाभाष्यं दिङ्मात्रमिह दर्शितम् ।
तेन तुष्यन्तु विबुधा मत्कृतिं वीक्ष्य सादरम् ॥

इति श्रीपदवाक्यप्रमाणपारावारीणस्य रामचन्द्राध्वरेः पौत्रेण वरदेश्वरदीक्षितपुत्रेण नीलकण्ठदीक्षितेन विरचिता परिभाषावृत्तिः समाप्ता ॥

हरिभास्कर-अग्निहोत्रि-कृतः परिभाषाभास्करः

(१५)

आखण्डलादिसुरमण्डलमण्डनं त-
मुद्दण्डकोकविरहानलदण्डचक्रम् ।
ईडेहमत्र बहुबोधितपद्मकाण्डं
मार्तण्डमन्धतमसं प्रति कालदण्डम् ॥१॥
श्रीगुरून् पितरौ नत्वाऽग्निहोत्री भास्कराभिधः ।
भास्करं परिभाषाणां तनुते बालबुद्धये ॥ २ ॥
युक्तायुक्ताभिज्ञं वन्द्यं भूयो भूयो विद्वद्वृन्दम् ।
नामं नामं याचे मन्दो मान्यं चेदं शोध्यं सम्यक् ॥ ३ ॥
मृद्वी मृद्विकया तुल्या खैरिव खलैर्यदि ।
नादृतेयं कृतिस्तस्मादस्माकं हानिरस्ति किम् ॥ ४ ॥

तत्र तावद् भाष व्यक्तायां वाचलिस्मात् परितो भाष्यते इति व्युत्पत्तेः कर्मणि घञुत्पत्तेस्तथा प्रतीतेश्च परिभाषापदं यौगिकम् । न चैवं संज्ञादिष्वतिप्रसङ्गः । [1]निर्मन्थ्येनेष्टकाः पचन्तीत्यत्र पाकादौ निर्मन्थ्यपदस्येव तत्र परिभाषापदस्य प्राचीनप्रयोगाभावात् । न चैवं सति रूढ्यनङ्गीकारे दाक्षायणयज्ञेन स्वर्गकामो यजेतेति-वाक्यगतदाक्षायन-[2]पदस्य यौगिकत्वेन संज्ञात्वाभावात् " पूर्वपदात्संज्ञायामगः " (८।४।३) इति णत्वानापत्तिरिति वाच्यम् । संज्ञात्वं हि नियतप्रयोगशब्दनिष्ठोपाधित्वम्[3] । स चोपाधिर्दाक्षायनपदेप्यस्तीत्याहुः । अथवा छान्दसं तत्र णत्वम् । यद्वा निर्मन्थ्य[4]दाक्षायणादिशब्दानां योगरूढतामते इदं योगरूढमेवास्तु । एवं च ' परितो व्यापृतां भाषां परिभाषां प्रचक्षते ' इति प्राचीनकारिकायाः ' परिभाषा पुनरेकदेशस्था सती कृत्स्नं शास्त्रमभि[5]ज्वलयति तद्यथा प्रदीपः सुप्रज्वलित एकदेशस्थः कृत्स्नं वेश्माभिज्वलयाति ' इति भाष्यस्य चात्रैव तात्पर्यमुन्नेयम् ॥

व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् ॥ १ ॥

व्याख्यानाद्विशेषार्थज्ञानं संदेहे सति कर्तव्यम् । न तु संदेहा[6]दभिमतार्थप्रतिपादकं शास्त्रं स्यात् । तच्च व्याख्यानं षड्विधम् । यथाहुः ।

" पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपोथ समाधानं व्याख्यानं षड्विधं स्मृतम् " इति ॥

अथोदाहरणम्–" ङेराम्नद्याम्नीभ्यः " (७।३।११६) । अत्र सप्तम्येकवचनस्यैव ग्रहणं न तु चतुर्थ्येकवचनस्य । तथा "आत्मन्विश्वजनभोगोत्तरपदात् खः " (५।१।९)

---

१ A निर्मथ्येन. २ A दाक्षायन. ३ B प्रयोगवच्छब्दनिष्ठोपाधित्वम्. ४ A निर्मथ्य, ५ A अभिज्वलति. ६ A संदेहहेतुकं for संदेहात् ।

अत्र विश्वजन इति षष्ठीतत्पुरुषो बहुव्रीहिः कर्मधारयो वेति संदेहे कर्मधारय एवेति सिद्धान्तः । अत एव ‘ क्षणं मया विश्वजनीनमुच्यते ’ इति माघप्रयोगे विश्वस्मै जनाय हितमिति व्याचख्युरभियुक्ताः ॥ अत्र प्राञ्चः अणिण्ग्रहणेषु संदेहे व्याख्यानादेवं निर्णयः—

‘ ऋतेणुदित्सवर्णस्येत्येतदेकं परेण तु ’

इत्युदाजह्रुः । तत्र वदन्ति । नैषोर्थो व्याख्यानैकशरणः किं तु ज्ञापकसिद्धः । तथा हि । ढ्रलोपे पूर्वस्येत्यत्र ढ्ढादिषु ढ्ढशब्दे दीर्घीकरणम् । “केणः” (७।४।१३) “ अणोप्रगृह्यस्य० ” (८।४।५७) इत्युभयत्राण्ग्रहणम् “उरण् रपरः” (१।१।५१) इत्यत्र प्रशास्तृणामिति निर्देशः पूर्वणकारेणाण्ग्रहणे ज्ञापकम् । अणुदित्सवर्णस्येत्यत्र तु परणकारेणैवाण्ग्रहणम् “ ऋत उत् ” (६।१।११) इत्यत्र ऋत इति तपरकरणात् । इण्ग्रहणेपि “ साकल्यान्तवचनेषु ” (२।१।६) इति षत्वनिर्देशान्न दोष इति । परिभाषायां ज्ञापकं तु ‘ वर्णोच्छ्रिताविव लण्सूत्रे णकारोपादानम् ’ (१४ मा.) इति भाष्यकारादयः । नव्यास्तु णकारं प्रत्याचक्षते । तथाहि । त्रिभ्य एव कणमाः स्युरित्युक्तेर्णकारस्याणिण्यणिति तिस्रः संज्ञाः प्रयोजनम् । तत्राणः प्रदेशोणुदित्सवर्णस्येति । तत्राप्यण्ग्रहणं मास्तु । अस्य ब्वात्रित्यादौ हि ‘ ग्रहं संमार्ष्टि ’ इत्यत्र ग्रहैकत्ववद्देश्याकारगतविशेषणमविवक्षितम् । त्यदादीनामः (७।२।१०२) इत्यादौ तु ‘ पशुना यजेत ’ इत्यत्र पश्वेकत्ववद्विवक्षितमेवेत्यदोषः । अत एवोक्तं वार्तिके– ‘ सवर्णोण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् ’ इति । एवं चाप्रत्ययग्रहणमप्यकर्तुं शक्यम् । यद्वा अणुदित्सूत्रे (१।१।६९) लण्सूत्रस्याकारेणैव प्रत्याहारोस्त्विति ‘ ओदित्सवर्णस्य चाप्रत्ययः ’ इति पाठ्यम् । इण्यणोस्तु प्रदेशाः “ इण्कोः, ” (८।३।५७) “ इको यणचि ” (६।१।७७) इत्यादयः । तत्रापि ‘ यकोः, ’ ‘ इको योचि ’ इत्यादि पाठ्यम् । क यकारेण क चेकारेण प्रत्यय इति संशयादिदमयुक्तमिति चेन्न । त्वन्मतेपि तस्य सत्त्वात् । ज्ञापकान्निर्णयस्योभयमतेप्यविशिष्टत्वात् । प्रकृतपरिभाषाया अपि लकाराकारस्यैव प्राग्वज्ज्ञापकत्वसंभवादिति मास्तु लणित्यत्र णकारः । एवं च “ आदिरन्त्येन० ” (१।१।७१) इति सूत्रगतमित्पदं मन्दप्रयोजनम् । वस्तुतः सत्यपि णकारे तन्मास्तु।यत्तु“सुडनपुंसकस्य”(१।१।४३) इत्यत्र पदमज्ञर्पामन्त्येन वर्णेन सह प्रत्याहार इति लण्सूत्राकारस्यातथात्वाद्ग्रत्याहारार्थमित्पदमित्युक्तं तच्चिन्त्यम् । लकाराकारानुनासिकत्वप्रतिज्ञासामर्थ्येन रप्रत्याहारस्य सिद्धत्वात्, णकारलोपेन्त्याकारस्यान्तत्वाच्चेति दिक्॥ विशेषप्रतिपत्तिरिति कर्मषष्ठ्या समासः । न च कर्मणि चेति तन्निषेधः शङ्क्यः । तस्य हि चशब्दस्येत्यर्थकतयोभयप्राप्ताविति षष्ठ्या समासो नेत्यर्थः । तथा च भाष्यम्– ‘इत्यर्थेयं चः पठितः ’ इति । इह तु कर्तृकर्मणोः कृति (२।३।६५) इति षष्ठी । यद्वा शेषषष्ठ्या समासः ॥ १ ॥

---

१ B व्याख्यानादेवाणुनिर्णयः. २ A इत्यत्रत्तं इति; B इत्यत्रतं इति । ३ A यथा हि— ४ A om. यद्वा .... पाठ्यम् । ५ B पदमज्ञर्पामन्त्यत्वप्रयुक्तेत्संज्ञकेन सह प्रत्याहार इति कथनाल्लण्सूत्राकारस्य । ६ A. कर्मषष्ठ्याः समासः.

न हि कार्यी निमित्तत्वेनाश्रीयते ॥ २ ॥

तेनाध्येता शयितेत्यादौ धातूनां द्वित्वमादाय न गुणनिषेधः । तेन[1] अरिरिषति इह ऋ इ स इति स्थिते सनः कार्यितया निमित्तत्वाभावाद् "द्विर्वचनेचि"(१।१।५९) इत्यस्याप्रवृत्तौ गुणे कृते रिस्–शब्दस्य द्वित्वम् । सुध्युपास्यः इत्यादौ तु व्यक्तिपदार्थाङ्गीकारेण निर्वाहः । "तस्मादित्युत्तरस्य"(१।१।६७)इति निर्देशाद्वा। नन्वेवमूर्णुनविषतीत्यत्र सन्नन्तस्य कार्यित्वाद् द्विर्वचनेचीति कर्तव्ये कथं निमित्ततेति चेन्न । कार्यीति मत्वर्थो येनेनिना कार्यमनुभवत एव कार्यित्वाभिधानात् । तथा च परिभाषान्तरं पठ्यते 'कार्यमनुभवन् हि कार्यी निमित्तत्वेन नाश्रीयते' इति । ऊर्णोतेर्हि नुशब्द एव द्वित्वाख्यं कार्यमनुभवति न तु सन् । एवं च द्विर्वचनेचीति सूत्रे अज्ग्रहणप्रत्युदाहरणे जेघ्रीयते देध्मीयते इति भाष्याद्युक्ते चिन्त्ये । परिभाषायां ज्ञापकं तु दीधीवेव्योर्गुणप्रातिषेध इति केचित् । कुटादौ कूङ्पाठ इत्यन्ये । शयितरि इति निर्देश इत्यपरे ॥ २ ॥

इतरेतराश्रयाणि कार्याणि शास्त्रे प्रकल्पन्ते ॥ ३ ॥

यथा गार्गीयः । ज्ञापकमत्र "इग्यणः संप्रसारणम्" (१।१।४५) इति । आकरे तु सर्वाणि चेतरेतराश्रयाणि एकत्वेन परिहृतानि सिद्धं तु नित्यशब्दत्वादित्युक्तम् ॥३॥

आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ ४ ॥

तच्छब्देनागमी गृह्यते । तेन सर्वेषामित्यत्र "आमि सर्वनाम्नः सुट्" (७।१।५२) इति सुटं[2] आम्ग्रहणेन ग्रहणाद् "बहुवचने झल्येत्" (७।३।१०३) इत्येत्वम् । तथा षट् सन्त इत्यत्र धुटः परादित्वाट्टवर्गस्य पदान्तत्वेन "न पदान्तात्०" (८।४।४२) इति ष्टुत्वनिषेधः। अत एव 'डः सि धुट्' इति नाकारि। मनोरमायां तु अत एव वक्ष्यमाणस्तुगिहैव न कृत इत्युक्तम्। तच्च 'चयो द्वितीयाः' (८।४।४८ वार्तिक) इति द्वितीयादेशापत्तेरयुक्तमिति केचित्तच्चिन्त्यम् । अत एवेत्येवकारस्य शङ्खः पाण्डुर एवेतिवदयोगव्यवच्छेदार्थत्वात् । यद्यपि शिरोमणिमते दृष्टान्तेऽप्यन्ययोगव्यवच्छेद एव पार्थ एव धनुर्धर इतिवदेवकारार्थ[3]स्तथापि दण्डेनैव घट इत्यादावन्ययोगव्यवच्छेदार्थासंभवमभिप्रयतां प्राचां मते अयोगव्यवच्छेद एवकारार्थः संभवत्येव । ष्टुत्वानिषेधे[4] तुगकरणहेतुत्वान्ययोगव्यवच्छेद एव वा प्रकृतैवकारार्थोऽस्तु । अन्यर्थो वा एवकारः । तथा च प्रकृते तुकोऽकरणहेत्वन्तरसत्त्वेऽप्यक्षितिः[5] । उपायस्योपायान्तरादूषकत्वादिति[6] न्यायात् । उक्तं हि भर्तृहरिणापि–'उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता[7] इति । एतेन "न संप्रसारणे संप्रसारणम्" इत्यत्र 'अत एव ज्ञापकात् परस्य यणः संप्रसारणम्' इति ग्रन्थो व्याख्यातः । अन्यथा शब्दपरविप्रतिषेधेनापि परस्य यणः संप्रसारणे एवकारासंगतिः[8] । यथाह "दिव उत्" (६।१।१३१) इत्यत्र रक्षितः । दिउ ओकसः इति स्थिते शब्दपरविप्रतिषेधादुकारस्य यणि दिवौकस इति । तथा पदन्निति सूत्रे प्रभृतिग्रहणं प्रकारार्थमित्युक्तम् । अत एव भाष्ये 'मांस्पचन्या उखायाः'

---

१ A. तथा for तेन. २ B. सुट आम्ग्रहणात्. ३ A. इतिवदेकार्थः. ४ A. om. ष्टुत्वनिषेधे .... एवकारः । ५ A. अक्षतिः. ६ B. उपायान्तरदूषकत्वात्. ७ B. अव्यवस्था इति. ८ A. एवकारसंगतिः.

इत्युदाहृतमित्यपि व्याख्यातम्। अत्रापि हि "मांसस्य पाचि ल्युड्घञोः"(६।१।१४४काशिका) इति लोपरूपोपायान्तरसत्त्वेप्येवकारस्यायोगव्यवच्छेदार्थतया बाधकाभावात् । अयस्मयादिगणपाठकल्पनेन संयोगान्तलोपवारणं तु पक्षद्वयेपि समानम् । न चाकारलोपपक्षे तस्यानित्यत्वेन संयोगान्तलोपवारणाद् अयस्मयादिगणपाठकल्पनं नेति लाघवमिति वाच्यम्। पूर्वत्रासिद्धीये न स्थानिवदिति स्थानिवद्भावाभावादिति संक्षेपः। ननु प्रकृतपरिभाषया भूयादित्यादावाद्युदात्तश्चेत्युदात्तत्वे लब्धे पुनर्यासुट उदात्तवचनं किमर्थमिति चेदन्यागमानामनुदात्तत्वज्ञापकार्थमिति गृहाण । अत एव 'तस्यां सुपर्णा वृषणा' इत्यादौ स्याडनुदात्तत्वं "सावेकाच०" इति विभक्तिस्वरं बाधत इति केचित्। तत् "न गोश्वन्साववर्ण०" (६।१।१८२) इति निषेधास्मरणनिबन्धनम्। वस्तुत आगमानुदात्तत्वेन विभक्त्युदात्तत्वस्य बाधनेपि न क्षतिः। "एकादेश उदात्तेनोदात्तः" (८।२।५) इत्यस्य प्रवृत्तेः। वेदेपि हि दृश्यते 'अस्या ऊ षु ण उपसातये' इति। न चेहापि "साववर्ण०" इति निषेधः शङ्क्यः। "ऊडिदंपदाद्यप्पुम्रैद्युभ्यः" (६।१।१७१) इत्यस्य जागरूकत्वात्। एतेन याट्स्याड्विधायकसूत्रयोर्याट्स्याटोराकारस्थाने अकारकरणे रमायै इत्यादौ पररूपापत्तेः। न चाकारोच्चारणसामर्थ्यात्तन्निवृत्तिः, ज्ञायै इत्यादौ विभक्तिस्वरबाधनार्थतयोपक्षीणत्वादकारोच्चारणस्य इति विद्यारण्यपञ्जिकोक्तिरपास्ता। अत एवोक्तं मनोरमायां 'स्पष्टार्थं याट् कृतः' इति दिक्। परिभाषायां ज्ञापकं "णेरनिटि" (६।४।५१) इत्यनिड्ग्रहणमिति केचित्। "नेटि" (७।२।४) इति वृद्धिनिषेध इत्यन्ये। "अधराणि" (१।१।३४) इति निर्देश इत्यपरे ॥ ४ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ ५ ॥

यथा "जराया जरसन्यतरस्याम्" (७।२।१०१) निर्जरसौ इत्यादि। उदाहरणान्तराण्यपि "पादः पत्" (६।४।१३०) इति सूत्रगतभाष्यवार्तिकाभ्यामवसेयानि। इयं च परिभाषा "षष्ठी स्थानेयोगा" (१।१।४९) इत्यस्यार्थतया पठ्यते। तदुक्तं भाष्ये—"न तर्हीदानीमयं योगो वक्तव्यः। वक्तव्यश्च। किं प्रयोजनम्। षष्ठ्यन्तं स्थानेन यथा युज्येत यतः षष्ठ्युच्चारिता। किं कृतं भवति। 'निर्दिश्यमानस्यादेशा भवन्ति' इत्येषा परिभाषा न कर्तव्या भवति" (महाभाष्य १।१।४९)इति ॥ ५ ॥

नानुबन्धकृतमनेकाल्त्वम् ॥ ६ ॥

यथा "अर्वणस्त्रसावनञः" (६।४।१२०) अर्वन्तौ इत्यादि। ज्ञापकस्तु "अनेकाल्शित्" (१।१।५५) इति शिद्ग्रहणम् ॥ ६ ॥

वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥ ७ ॥

तेन 'रैकुलम्' इत्यत्र नायादेशादि। 'अतृणेट्' इत्यत्र इम् तु भवत्येव। "तृणह इम्" (७।३।९२) इत्यस्य केवलं "एचोऽयवायावः" (६।१।७८) इतिवद्वर्णाश्रयत्वाभावात्। परिभाषायां ज्ञापकं "प्रत्ययलोपे प्रत्ययलक्षणम्"(१।१।६२)

---

१ B. एवकारस्य पूर्वोक्तार्थतया. २ A. स्थानिवद्भावादिति संक्षेपः। ३ B. om. अत एव तस्यां सुपर्णा .... इति दिक्। ४ A. om विद्यारणपंजिकोक्तिरपास्ता।

इति द्वितीयं प्रत्ययग्रहणम् । " तृणह इम् " (७।३।९२) इत्यत्र हलीति निवर्त्यानल्विधित्वेन स्थानिवत्त्वेनैव अतृणेडित्यादिसिद्धेः प्रत्ययलक्षणसूत्रस्य प्रत्ययासाधारणरूपाश्रय एव विधौ प्रत्ययलक्षणं नतु प्रत्ययाप्रत्ययसाधारणरूपाश्रयणाच्छोभना दृषदोस्य सुदपल्प्रासाद इत्यादौ प्रत्ययलक्षणाप्रवृत्त्या दीर्घाद्यभावासिद्धिरिति तु भाष्यसंमतः पन्थाः ॥ ७ ॥

क्वचिदेकदेशोप्यनुवर्तते ॥ ८ ॥

तेन " शेन्तः " (७।१।३) इत्यत्र " आयनेयीनीयीयः० " (७।१।२) इत्यतः प्रत्ययग्रहणमेकदेशभूतमनुवर्तते । तेन शैयान्ते इत्यत्र नाव्याप्तिः । यदि तु 'छन्दसि दृष्टानुविधिः ' इति निरीक्ष्यते तर्हि उदाहरणान्तरं बोध्यम् । यथा " विसर्जनीयस्य सः" (८।३।३४) इत्यत्र "खरवसानयोः०" (८।३।१५) इत्यतः खर्ग्रहणमनुवर्तते । तेन राम इत्यादौ नातिव्याप्तिरिति सिद्धान्तः । अत्रेदं चिन्त्यम्—" अवसाने विसर्जनीयः " (८।३।१५) ततो " भोभगोअघोअपूर्वस्य योशि " (८।३।१७) ततो यथासिद्धान्तं पठित्वा ' खरि रस्य सः ' । ततः " शर्परे विसर्जनीयः " (८।३।३५) "वा शरि" (८।३।३६) "रोः सुपि"(८।३।१६)इति लघुन्यासे किं बाधकम् । "रोः सुपि" (८।३।१६) इत्यनेन हि यावत्प्राप्तं नियम्यते । न च दुर्गतिरित्यादौ जिह्वामूलीयापत्तिः सर्वत्र रेफस्यैवानुवर्तनादिति वाच्यम् । नेर्गदेतिनिर्देशबलात् खर्ग्रहणमनुवर्त्य खर्रूपयोः कुप्वोः परतः तद्विधानात् । किं चैवंविधन्यासे मण्डूकप्लुत्या एकदेशानुवृत्त्याश्रयणक्लेशो नास्तीतीतरदनुकूलम् । तस्मादिदमपि नोदाहरणम् । किं तर्हि । " इदितो नुम्धातोः " (७।१।५८) इति । अत्र " गोः पादान्ते " (७।१।५७) इत्यतोन्तग्रहणमनुवर्तते । तेनान्तेदितो नुम्विधानात ' चष्टे ' इत्यादौ नुम् नेत्याहुः । न च चक्षिङोनुदात्तेत्त्वं व्यर्थम् । तस्य युजर्थत्वात् । अनुदात्तेत्त्वलक्षणात्मनेपदानित्यत्वज्ञापनार्थत्वाच्च । तेन ' उदयति वितत०' (शिशुपालवध सर्ग ४) इत्यादिप्रयोगा उपपन्नाः । यत्तु ' गिरिशमचलकन्या तर्जयामास० ' इति भानुकविपद्ये तर्जयतेरनुदात्तत्वेपि तर्जयामासेति परस्मैपदप्रयोग उपपन्न इत्याहुः तन्मुधैव । एधामासेतिवदात्मनेपदस्याप्रवृत्तेः । न चानुबन्धसामर्थ्यादनुप्रयुज्यमानादप्यात्मनेपदं प्रवर्ततामिति वाच्यम् । अनुबन्धस्य परगामिक्रियाफले तर्जयते इत्यादावात्मनेपदार्थतया सामर्थ्यविरहात् । तेन ङित्तं तार्जि पठतो बोपदेवस्य मते तर्जनं तर्जा "भावे", " गुरोश्च हलः " (३।३।१०३) इत्यप्रत्यये टाप् । तां चकारेति तर्जयामासेति समाधानं परास्तम् । यदपि बोपदेवमतानुसारिणः चक्षिङोनुदात्तत्वेन ङित्त्वलक्षणात्मनेपदस्यानित्यत्वात्तर्जयामासेति सिद्धमिति समादधिरे तदपि प्रागुक्तदिशा व्यर्थमसंभवदुक्तिकं च । अनुदात्तेत्त्वस्य विचक्षणः प्रथयान्निल्यादौ

१ A. om. तृणह इमित्यत्र....भाष्यसंमतः पन्थाः. २ A. शयान्ते. ३ B. खारूपयोः. ४ A. एकदेशाश्रयण० ५ A. om तस्य युजर्थत्वात्. ६ A. सामर्थ्याविरहात् । एतेन.

" अनुदात्तेतश्च हलादेः (३।२।१४९) इति युजर्थत्वेन वैयर्थ्याभावात् । अनिष्टस्वरापत्त्या ल्युटस्तत्र वक्तुमशक्यत्वात् । किं च विचक्षणा मतिरित्यादौ टित्वान्ङीबापत्तेः । कथं तर्हि ' तामतर्जयदम्बरे ' इति । इत्थम् । तर्जनं तर्जा । तामकरोदित्यतर्जयत् । तत्करोतीति णिचा णाविष्ठवदिति टिलोपः । यद्वा । तर्जेरनुदात्तत्वेन ङित्वेन वा णिचः पाक्षिकत्वं ज्ञाप्यत इति । तर्जते इत्यादौ केवलेनुबन्धस्य चरितार्थतया णिजन्तात् " अनुदात्तङितः० " (१।३।१२) इत्यस्याप्रवृत्तेः । परगामिक्रियाफले " णिचश्च " (१।३।७४) इत्यस्याप्यप्रवृत्तेर्नास्त्यात्मनेपदप्रसङ्ग इति । यदप्यन्तेदितो नुम् इति व्याख्यामालम्ब्य गवाद्यन्तर्गणसूत्रस्य " ऊधसोनङ् च " (५।१।२ गणसूत्र) इत्यस्य स्थाने ऊधसो नश्चेति मनोरमाग्रन्थस्योधन्यमिवाचरतीत्यर्थे ऊधन्यशब्दात् क्विपि यश्ब्दाकारलोपानुनासिकदीर्घयोरूधानते इत्यत्रात्मनेपदार्थं नङो ङित्वमावश्यकमिति दूषणं क्विप इकारस्येत्त्वेन अनुदात्तेत्त्वलक्षणेनात्मनेपदेनैव ऊधानते इति सिद्धमिति परिजह्रुः तदपि न । अतिकृष्णतीत्यादौ आत्मनेपदापत्तेः । न च त्राहीतिवदूधानते इत्यत्रात्मनेपदमसाध्वेव इति सुष्ठूक्तं मनोरमायामिति वाच्यम् । दृष्टान्तदार्ष्टान्तिकयोर्भेदात् । 'अवयवे चरितार्थं लिङ्गं समुदायस्य विशेषकं भवति' इति न्यायात् । अत एव "गमःक्वौ" (६।४।४०) सूत्रे ऊङ् चेति वार्तिकमुपादाय विनापि ङित्वेनान्त्यस्य सिध्यत्यूकार इति नार्थो ङित्वेनेति कैयटोक्तं चिन्त्यम् । अग्रे गवते इत्यादावात्मनेपदार्थङित्वस्यावश्यकत्वात् । अनुदात्तोकारान्तस्य सवर्णदीर्घेण प्रश्लेषान्निर्वाहेप्यनुदात्तेत्त्वाद्युजापत्तेः । न चेष्टापत्तिः । भाष्यवार्तिकासंमतेः । न चाग्रेगूः अग्रेभूः इति भाष्योदाहरणाभ्यामग्रेपूर्वाणामेव गवादीनामूङ्विधानाद् हलादित्वाभावान्न युजापत्तिरिति वाच्यम् । " अचिश्नुधातुभ्रुवाम्० " (६।४।७७) इत्यत्र भ्रूग्रहणं न कर्तव्यं धातुत्वादुवङः सिद्धत्वात् इति स्वग्रन्थासंगत्यापत्तेः । एतेन ' अनुनासिकलोपे कृते अलोन्त्यपरिभाषयान्त्यस्योकारे सिद्धे ङकारो विस्पष्टप्रतिपत्त्यर्थम् ' इति विवरणग्रन्थोपि प्रत्युक्तः । यदपि तस्मादुक्तमनोरमाग्रन्थोऽसंगत एवेति नव्यतरैरुक्तं तदपि न । नश्चेत्यत्र नकाराकारस्यानुदात्तेत्त्वकल्पनया उधानते इत्यादावात्मनेपदस्य सिद्धत्वात् । अत्रेदं प्रतिभाति । ऊर्ध्वोनते इति न युक्तम् । ऊधन्यते इति तु रूपमुचितम् । तत्र एशसेगतैकारवच्चक्षिङोनङश्च ङित्वमावश्यकम् । यथा चोक्तं " ज्यादादीयसः " (६।४।१६०) इत्यत्रात्वविधिज्ञापिताङ्गवृत्तपरिभाषा भाष्यप्रदीपे कैयटेन । "ज्ञाजनोर्जा" इत्यत्रापीयं परिभाषा ज्ञापिता । तत्रास्मिन् स्थिते ज्ञापके जा इत्यादेशविधानं दीर्घश्रवणार्थम् । तस्मिंश्च ज्ञापके सति ज्यायानिति सिद्ध्यर्थमाद्वचनम् । अन्यथा टिलोपे कृते परिभाषावशाद्दीर्घो न स्यादितीत्यलमतिप्रसङ्गेन । परिभाषायां ज्ञापकं " तस्मादित्युत्तरस्य " (१।१।६७) इत्यत्र इतिशब्दोपादानम् । अन्यथा निर्दिष्टपदवदितिशब्दानुवृत्त्यैव सिद्धौ किं तेनेति केचित् । " इको गुणवृद्धी " (१।१।३) इत्यत्र पूर्वसूत्रयोरनुवृत्त्यैव सिद्धौ व्यर्थं सद् गुणवृद्धिग्रहणमित्यपरे ॥

---

१ A. om यद्वा...प्रसङ्गः. २ A. अग्रेगवतं इत्यादौ. ३ A. अनुदात्तेत्वाद्युजापत्तेः । ४ A. om ऊधानते इति न युक्तं...उचितम् । ५ B. सिद्धे व्यर्थजापत्तिः.

ननु “ द्विर्वचनेचि ” (१।१।५९) इति सूत्रगतमेकशेषनिर्देशोयमिति “ छ्वोः शूडनुनासिके च ” (६।४।१९) इतिसूत्रगतं कावप्याचार्यप्रवृत्तिर्ज्ञापयति नानेन क्वौ दीर्घत्वं भवतीति यदयं ‘ क्विप्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च ’ इति दीर्घत्वं शास्तीति च भाष्यमसंगतं पूर्वयोगतो द्विर्वचनझल्ग्रहणयोरेकदेशानुवृत्त्यैव सिद्धेःइति।मैवम्।कचित्पदेन सर्वत्र प्रवृत्तेरनभ्युपगमात्।“आर्धधातुकस्येड् वलादेः(७।२।३५) इत्यत्रेड्ग्रहणात् । अन्यथा “ नेड् वशि कृति ” (७।२।८) इत्यत इडनुवृत्तेरेव सिद्धेर्व्यर्थतापत्तिः । सति तु कचित्पदे नेति नानुवर्ततामिति तत्सार्थकमित्याहुः। यत्तु विध्यभावादेव निषेधो नानुवर्तेत । न हि आर्धधातुकस्येति प्रतिषिध्यमान इटि किमपीड्विधायकं वचोस्ति येनोक्तं ज्ञापकं संभवेदिति वदन्ति तन्न । निषेधान्यथानुपपत्त्या वलाद्यार्धधातुकातिरिक्तार्धधातुकसामान्योद्देशेनेड्विधेः कल्पयितुं शक्यत्वात् । यथा ‘न तु कांस्यस्य तापनम्’ इति द्रव्यशुद्धिप्रकरणपठितो निषेधस्तैजसद्रव्यत्वावच्छेदेन तापनविधिं कल्पयन् कांस्यद्रव्यविषयकतापनं निषेधति । यथा च स्वार्थिककन्विधिप्रकल्पको “ न सामिवचने ” (५।४।५) इति निषेधः सामिवचनमात्रे कनं निषेधति । ईत्थमेव च “ आर्धधातुकस्येड् वलादेः ” (७।२।३५) इत्यत्र प्रक्रियां व्याचक्षाणा इट्करणसार्थक्यमुक्त्वा भवतेत्यादौ “ दीधीवेवीटाम् ” (१।१।६) इति निषेधानुपन्यासप्रयुक्तमूलन्यूनतापरिहारायाङ्गस्यस्वविकारनिवृत्त्यर्थतामिट्करणस्य कथमुक्तवन्त इति त एव प्रष्टव्याः । केचित्त्वाहुः “ तोः षि ” (८।४।४३) इत्यत्र तोरिति कचित्पदे प्रमाणामिति । तत्फलं तु “ डाति च ”(१।१।२५) इत्यस्यारम्भः । तथा “ चोः कुः ” (८।२।३०) “ दादेर्धातोर्घः ” (८।२।३२) “ वा द्रुहमुहष्णुहष्णिहाम् ” (८।२।३३) इति न्यासाकरणम् । ढ इत्यत्र ह इत्येकदेशस्यानुवर्तयितुमशक्यत्वात् । किं चैवंविधन्यासे सूत्रद्वये उद्देश्यविधेयतयोः संदेहः इति सर्वं शिवम् ॥

अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ॥ ९ ॥

तेन ‘ प्रादूहोढोढ्येषैष्येषु ’ (६।१।८९ वा. ४) इत्यनेनोढग्रहणेन ‘ प्रोढवान् ’ इत्यत्र न वृद्धिः । तथा “ तीयस्य ङित्सु० ” (१।१।३६ वा. ३) इत्यनेन पटुजातीय इत्यादौ न सर्वनामता । यत्तु “ विभाषा द्वितीयातृतीयाभ्याम् ” (७।३।११५) इत्यत्र सर्वनाम्नः इत्यनुवर्त्य षष्ठ्यन्ततया विपरिणमय्य ङिति सर्वनामसंबन्धिकार्यमनयोर्वेति व्याख्याय तीयस्येति वार्तिकं प्रत्याचक्षाणा नेदमुदाहरणमित्याहुः । तन्न । वार्तिकप्रत्याख्यानासंभवात् । कचिद् ‘विकृतिरपि प्रकृतिं गृह्णाति ’ (परि. ४३) इति परिभाषाया दूषयिष्यमाणतया लिङ्गविशिष्टग्रहणे प्रातिपदिकस्य ग्रहणमित्यस्या ज्ञापनीयतया च द्वितीयस्मै इत्याद्यसिद्धेः । लाघवेन सूत्रप्रत्याख्यानस्यैव युक्तत्वाच्च । किंच । विभक्तिविपरिणामं विनैव सति निर्वाहे तदाश्रयणं न युज्यते । अत एव “ ऊँ ” (१।१।१८) इति सूत्रे अनुवृत्तस्य प्रथमान्तस्य प्रगृह्यपदस्यादेशविशेषणत्वं सिद्धान्तितमाकरे । स्थानिविशे-

१ B. om इत्थमेव च .... इति सर्वं शिवम् ॥

षणत्वे हि विपरिणामापत्तीरिति । स्यादेतत् । तत्सूत्रगतः शाकल्यग्रहणानुवृत्तिसाधको यैत शाकल्यस्येत्यादिहरदत्तग्रन्थोऽसंगतः । इत्थं हि तदाशयः । 'शाकल्यग्रहणाननुवृत्तावनुवृत्तस्य प्रगृह्यपदस्य षष्ठ्यन्ततया विपरिणतस्य उञ इति स्थानिविशेषणत्वात् प्रगृह्यस्योञो नित्यमूँ इत्यादेशो भवतीति तत्सूत्रार्थे सिद्धे पूर्वसूत्रेणोञः प्रगृह्यत्वपक्ष एवैतदादेशप्रवृत्तेः स्थानिद्वाराजोदेशेपि प्रगृह्यकार्यस्य प्रकृतिभावस्य सिद्धेः ऊँ इति रूपसिद्धिः । अप्रगृह्यत्वपक्षेप्यादेशप्रकृतिभावयोरभावाद् वितीति रूपसिद्धिर्नतु उ इति इति तृतीयं रूपं स्यादिति तत्सिद्ध्यर्थं शाकल्यानुवृत्तिः' इति । स च न युक्तः । शाकल्यग्रहणाननुवृत्तावपि हि विपरिणामं विना निर्दुष्टादेशविशेषणत्वे संभवति स्थानिविशेषणत्वं नैवाश्रीयते । यत्त्वयमस्यादेशविशेषणत्वे दोषः । तदा हि प्रगृह्यग्रहणाननुवृत्तावपि प्रगृह्यग्रहणेन स्थानिनोऽविशेषणेऽविशेषात्प्रगृह्याप्रगृह्ययोर्द्वयोरप्युञोः प्रगृह्यसंज्ञक ऊँ इत्यादेशः स्यात् । तत्र सिद्धान्ते तावच्छाकल्यग्रहणस्याप्यनुवृत्तेर्विकल्पे सति प्रगृह्यस्यादेशे ऊँ इति, तस्यैवानादेशे उ इति, अप्रगृह्यस्यानादेशे विति, इति सिद्धेपीष्टे रूपत्रये अप्रगृह्यस्यादेशे तस्य सानुनासिकत्वेनान्तरतम्याद् यणि सानुनासिके वकारे विँति इत्यनिष्टं चतुर्थं रूपमापद्यते । शाकल्यग्रहणाननुवृत्तावपि प्रगृह्याप्रगृह्ययोर्द्वयोरपि नित्यं प्रगृह्य आदेशः स्यात् । ततश्च ऊँ इति इत्येकमेव रूपं स्यान्न तु इतरे द्वे । तत्र प्रगृह्यसंज्ञाविकल्पद्वारा वितीतिसिद्ध्यर्थो योगविभागो मुधा स्यादिति । तस्माद् वृत्तिग्रन्थानादरेण प्रगृह्यग्रहणं स्थानिविशेषणमेव । तमेव च पक्षमाश्रित्य शाकल्यग्रहणाभावे उ इति इति न स्यादिति युक्तमेव तदाशयवर्णनमिति तदबोधविलसितम् । यावता सिद्धान्ते प्रगृह्यग्रहणस्यादेशविशेषणसामर्थ्यादेव न प्रगृह्याप्रगृह्ययोरादेशविकल्पः प्रसज्यते किं त्वप्रगृह्यस्यैव भवति । प्रगृह्यस्यापि ह्यादेशे स्थानिवद्भावादेव आदेशस्यापि प्रगृह्यत्वफलप्रकृतिभावसिद्धेरादेशस्यापि प्रगृह्यत्वमपार्थकं स्यात् । तस्मात् सिद्धान्ते अनादेशविशेषणत्वेपि रूपचतुष्टयापत्तिः । अत एव शाकल्यग्रहणाननुवृत्तावपि न ऊँ इतीत्येकरूपापत्त्या योगविभागवैयर्थ्यम् । एवं हि न वितीति रूपसिद्धिर्योगविभागस्य फलं किं तु उ इतीत्येव । तथा हि । यद्ययमेको योगः स्यात् उञ ऊं इति तत उञ इत्यस्य ऊं इत्यादेशेनैव श्रुतत्वादेकवाक्यत्वाच्च संबन्धः स्यात् न त्वधाभूतया प्रगृह्यसंज्ञया । सा तु उञो "निपात एकाजनाङ्" (१।१।१४) इत्यनेनैव स्यात् । शाकल्यानुवृत्त्या चादेशे विकल्पिते रूपद्वयमेव स्यात् । ऊँ इति, उ इति इति । न तु तृतीयं विति इति । तत्सिद्ध्यर्थो योगविभाग इति प्रतिपादयता पूर्वग्रन्थेन ऊं इति सूत्रे शाकल्यग्रहणानुवृत्तिमङ्गीकृत्य वितीति रूपासिद्धिर्योगविभागफलत्वेनोक्तेति । अथ वितीतिरूपासिद्धिलक्षणं योगविभागफलं न सिध्यतीति तत्साधनायादेशविशेषणत्वं प्रगृह्यग्रहणस्या-

१ A. om ग्रहण after शाकल्य. २ B. यदि शाकल्यस्येत्यादि. ३ A. ग्रहणानुवृत्तावनुवृत्तस्य प्रगृह्य... ४ A. B. स्थानिद्वाराचादेशेपि. ५ A. रूपासिद्धिः । अप्रगृह्यत्वपक्षे.... ६ A. प्रगृह्यग्रहणानुवृत्ताविव प्रगृह्यग्रहणेन. ७ A. योगविभागो यथा स्यादिति । ८ A. om. प्रगृह्यस्यैव भवति......आदेशस्यापि. ९ B. ऊ इत्यादेशेनैव १० B. om. अथ वितीति .... सिध्यतीति.

नादत्य बलाद्विपरिणाम एव स्यात्तथा च उ इतीति न स्यादिति ब्रूषे तर्हि प्रगृह्यग्रहणमादेशविशेषणमेवास्तु । योगविभागफलं उ इतीति रूपसिद्धिरेव । योगविभागाभावे हि शाकल्यग्रहणाक्षेपपक्षे " निपात एकाज्० " (१।१।१४) इति नित्यं प्रगृह्यसंज्ञकस्य उञ ऊँ इत्यादेशः स्यात् । ततश्च ऊँ इतीत्येकमेव रूपं स्यात्, आदेशस्य च प्रगृह्यविशेषणमनर्थकं स्यात् । सति हि तस्मिन् प्रगृह्यविशेषणसार्थक्यार्थमप्रगृह्यस्य उञ ऊँ इत्यादेशे सति ऊँ इति उ इतीतिरूपद्वय सिद्धिर्भवतीति न योगविभागानर्थक्यम्, नतरां विपरिणामो, नतमां च उ इतीति रूपासिद्धिः । तस्मादसंगत एव हरदत्तीयः शाकल्यग्रहणानुवृत्तिसाधनप्रयासः इति ॥

अत्रोच्यते । सिद्धान्ते तावदनुवृत्तं प्रगृह्यग्रहणमादेशविशेषणमेव । न तु स्थानिविशेषणम् । विनाकारणं विपरिणामस्य दुष्टत्वादित्युक्तमेव । स चादेशोऽप्रगृह्यस्यैव भवति न त्वविशेषात्प्रगृह्यस्यापि । प्रगृह्यविशेषानर्थक्यापातात् । तथा च वितीति चतुर्थरूपाप्रसक्तेरिष्टरूपत्रयासिद्धिरपि भवत्येवेत्यप्युक्तमेव । तस्मात्प्रगृह्यग्रहणस्यादेशविशेषणत्वमेव सिद्धान्तो न तु स्थानिविशेषणत्वम् । तमेव च सिद्धान्तमाश्रित्य शाकल्याननुवृत्तौ सिद्धान्तवदेवाप्रगृह्यस्योञ ऊँ इत्यादेशे ऊँ इति, प्रगृह्यस्य तु सिद्धान्तवदेवादेशाभावाद् उ इतीति द्वे एव रूपे स्यातां न तु वितीति स्यादिति तत्सिद्ध्यर्थं शाकल्यानुवृत्तिरित्याकरग्रन्थपरिशीलनशालिभिर्विभावनीयम् ॥ प्रकृतमनुसरामः—

परिभाषायां ज्ञापकं " पूर्वपरावरदक्षिण० " (१।१।३४) इति सूत्रे परशब्दात्पृथगपरग्रहणमिति प्रतीमः । यत्तु सीरदेवः 'भ्रस्ज्यादिसूत्रगतं राजेः पृथग् भ्राजिग्रहणं तत्' इत्याह तच्चिन्त्यम् । विभ्राड् विभ्रागिति रूपसिद्धये साहचर्याद् फणादिभ्राजेरेव षत्वार्थतया भ्राजिग्रहणस्योपक्षीणत्वात् । यदप्यूचुः ' अर्थवत्परिभाषाऽभावे भ्रस्जेतिसूत्रेऽफणादिभ्राज्येकदेशस्यापि राजेस्सत्त्वेन फणादेरेव ग्रहणमिति नियामकाभावेन तत्साहचर्येण फणादिभ्राजिग्रहणार्थं भ्राजिग्रहणं नोपक्षीणम् ' इति तदपि मन्दम् । परस्परसाहचर्येण फणाद्योरेव राजिभ्राज्योर्ग्रहणमिति नियमार्थतया भ्राजिग्रहणस्योपक्षीणतायास्तादवस्थ्यात् । यथा रामलक्ष्मणावित्यत्रोभयोरदाशरथित्वेऽपि परस्परसाहचर्येण दाशरथ्योरेव प्रतीतिः । अत एव ' संयोगो विप्रयोगश्च साहचर्यं विरोधिता ' इत्यादिभर्तृहर्युक्तिमनूद्य काव्यप्रकाशकृता साहचर्योदाहरणप्रसङ्गे ' रामलक्ष्मणाविति दाशरथी ' इत्युक्तम् । तत्र दाशरथाविति क्वाचित्कपाठोऽपि प्रदीयतां दाशरथायेतिवत् "तस्येदम्" (४।३।१२०) इत्यणि कृते न विरुध्यते । यथा च हल्ङ्यादिसूत्रे परस्परसाहचर्याद् विभक्तीनामेव सुतिसीनां ग्रहणात् ' अभैत्सीत् ' इत्यादौ सिचो लोपाभावः । न च तत्र सुत्योर्विभक्त्योरेव सत्त्वेन ताभ्यां साहचर्यात्सेरपि विभक्तेरेव लोप इति शङ्क्यम् । सुरां सुनोतीति सुरासुत् तमाचष्टे सुरासयति, ततः क्विप् सुराः सुरासौ सुरासः । स्वस्ति आचष्टे स्वस्तयति ततः क्विप् स्वः स्वस्तौ स्वस्तः इत्यादावविभक्त्योरपि सुत्योः सत्त्वात् । यदप्युक्तं राजेः फणादेरेव ग्रहणमिति नियमेऽपि राजिग्रहणेन अफणादेर्ग्रहणासंभवेन किं तद्व्यावृत्तये राजिसाहचर्येण फणादेरेव राजेर्ग्रहणार्थेन भ्राजिग्रहणेनेति तदप्येतेनैव परास्तम् ।

१ A. चोपक्षीणमिति. २ A. om यथा.

यदपि मनोरमायां ‘ षत्वविधौ राज इति पठित्वा सुसाधमेकस्य भ्राजतेर्ऋकारस्य प्राग्विदातुं शक्यत्वात् ऋभ्राज ’ इत्युक्तं तदपि चिन्त्यम् । धातुसूत्रन्यासभङ्गेन क्लिष्टत्वात् । किं चैवमनुबन्धनिर्देशाद् राराष्टि इत्यादौ षत्वानापत्तेः । अपि च भ्राजेकदेशस्य राजेर्ग्रहणं न स्यात्, ऋकारस्य समुदायानुबन्धत्वात् । कथमन्यथा रमायै इत्यत्र प्रागुक्ताटश्चेति-वृद्धिदूषणं भवदुक्तं संगच्छेत । यदपि भाष्ये “ स्वं रूपं शब्दस्य० ” (१।१।६८) इति सूत्रगतं रूपग्रहणमेतत्परिभाषाया ज्ञापकमुक्तं तदपि तत्रैव तत्सूत्रप्रत्याख्यानात्संभवतीति दिक् ॥ ९ ॥

न वर्णग्रहणेषु ॥ १० ॥

तेन दध्याशयति इत्यादौ यण् । तद्विधानं हि ‘अकारो वासुदेवः स्यात्’ इत्यादि-कोशप्रतिपादितात् ‘ अतेर्डः ’ इत्यादिभाष्यकारव्युत्पादिताकारादिषु चरितार्थम् । अत्र “ ईदूतौ च सप्तम्यर्थे ” (१।१।१७) इति निर्देशो ज्ञापक इत्याहुः । इयं च परिभाषा वर्णसमुदायग्रहणे न प्रवर्तते इति सप्तमे कैयटः ॥ १० ॥

भाव्यमानोण् सवर्णान्न गृह्णाति ॥ ११ ॥

भाव्यमानो विधीयमानः यथा “ त्यदादीनामः ” (७।२।१०२) इति । सूत्रकाररीत्या भाष्यकारोणुदिदितिसूत्रीयाप्रत्ययग्रहणेन “ज्यादादीयसः” (६।४।१६०) इतियोगगतात्वविधिना चेमां परिभाषामसाधयत् । प्रागुपन्यस्तभाष्यवार्तिकरीत्या तु मास्त्वियमिति निष्कर्षः ॥ ११ ॥

यस्मिन्विधिस्तदादावल्ग्रहणे ॥ १२ ॥

यस्मिन्निति सप्तम्यन्तानुकरणम् । सप्तम्यन्ते अल्ग्रहणे विशेषणे[5] यो विधिः स तदादौ स्यात् । तेन “ अतो दीर्घो यञि ” (७।२।१०१) इत्यत्र यञादित्वलाभः। ये तु “ अड् गार्ग्यगालवयोः ” (७।३।९९) इत्यतोटमनुवर्त्य यञादेः सार्वधातुकस्य तं विधाय दीर्घग्रहणं प्रत्याचक्षते तेषां यञादित्वं दुर्लभम् । सप्तम्यन्त इत्युक्तेः । किं च । ननु पचामि भोः इत्यादौ “ अनन्त्यस्यापि प्रश्नाख्यानयोः ” (८।२।१०५) इति प्लुतो दुर्वारः । न च चरुमुपदधातीत्यस्य वाक्यस्य स्थण्डिलनिष्पादन इव अड्विधेः प्लुत-निवृत्तौ व्यापारः कल्प्यतामिति वाच्यम् । दृष्टान्ते ह्युपधानसंस्कृतस्य चरोः प्रयोजनलाभान्य-थानुपपत्त्या स्थण्डिलनिष्पादकत्वम् । इह तु पररूपनिवृत्तेरेव प्रयोजनत्वान्न तेन प्लुतनि-वृत्तिः । यत्तु मनोरमायामत आचक्षीतिन्यासे प्लुतः स्यादित्युक्तं तत्त्वाकारान्तरप्रश्लेषेण वारयितुं शक्यत्वादुपेक्ष्यम् । अपि चाटोनुवृत्तौ सत्यां “ सुपि च ” (७।३।१०२) इत्यनेनाप्यट् स्यात् । ततश्चाभ्यामित्यत्र “ हलि लोपः ” (७।२।११३) इति न स्यात् । न्यासकारप्रसादकारौ तु अघुक्षावहि अतिजराभ्याम् इत्यादौ “ क्सस्याचि ” (७।३।७२) “ जराया जरसन्यतरस्याम् ” (७।२।१०१) इति सूत्राभ्यां लोप-जरसादेशौ मा भूतामिति दीर्घग्रहणमित्याहतुः । तन्न । संनिपातपरिभाषयैव लोपजरसादेशा-

१ A. सुसमाधं एकस्य. २ A. om भ्राजेकदेशस्य. ३ A. वृद्धिदूषणं च भवदुक्तं. ४ A. ज्ञापकं. ५ A. om विशेषणे. ६ A. जरसादेशाभावासिद्धेः.

भावसिद्धेः । यदप्युक्तं भाष्यकारैः ' प्रयोजनं नाम तद्वक्तव्यं यन्नियोगतः स्यात् ' इति । कैयटोप्याह ' नियमेनावश्यंभावेन यदन्यथा साधयितुमशक्यं तत् प्रयोजनम् ' इति । अत एव च " वोतो गुणवचनात् " (४।१।४४) इति सूत्रीयौ ' उतः किम्', 'शुचिः' इति कौमुदीग्रन्थौ चिन्त्यौ । " कृदिकारादक्तिनः " (४।१।४५ गणसूत्र) इत्यनेन हि शुची शुचिरिति रूपद्वयं भवत्येवेत्याहुः । तत्रेयं[3] चिन्ता । " कृदिकारादक्तिनः " (४।१।४५ गणसूत्र) इत्यस्य बह्वादिगणसूत्रत्वेन गणकार्यमनित्यमित्यनित्यत्वात्कातिसुगन्धिः इत्यादौ सर्वतो क्तिन्नर्थादिति वाक्यान्तरस्यैव व्यवस्थितविकल्पत्वाद्वा न प्रवृत्तिरित्यभिप्रयातां काशिकाकारादीनामनुरोधेनेदं प्रत्युदाहरणम् । तेषामननुरोधे तु कोमलेति प्रत्युदाहर्तव्यमिति । न च तथापि न्यासप्रसादोक्तं दीर्घपदप्रयोजनं सम्यगेव । यतः संनिपातपरिभाषा अनित्येति वाच्यम् । तावताप्यौत्सर्गिकप्रवृत्त्येष्टसिद्धेरित्यास्तां तावत् । तथा " अचि श्नुधातुभ्रुवां य्वोः० " (६।४।७७) इत्यत्र अजादौ इत्यर्थाच्छ्रियः इत्यादावियङादिसिद्धिः । अन्यथा श्रियावित्यादावेव तत्प्रवर्तेत । "इको यणचि " (६।१।७७) इत्यत्र तु अचीत्यस्य विशेषणत्वाभावान्न तदादिविधिः । इयं च परिभाषा वार्तिकरूपेण " येन विधिस्तदन्तस्य " (१।१।७२) इत्यत्र भाष्ये पठिता । अत्र ज्ञापकमप्याहुः " न भूसुधियोः " (६।४।८५) इत्यत्र इयङादेशकरणमिति ॥ १२ ॥

विधिविधानविधिभाजां त्रयाणां संनिपातेन तदन्तविधिः ॥ १३ ॥

विधीयते इति विधिः कर्मसाधनः । विधीयमान इत्यर्थः । विधीयते अनेन तद्विधानम् । करणे ल्युट् । विधिं विधीयमानं कार्यं भजतीति विधिभाक् । एषां त्रयाणां संनिपातेन तदन्तविधिः स्यात् । यथा एरच् । अत्र क्रमेण अजिवर्णधातूनां विधिविधानविधिभाजां संनिधानादिवर्णान्ताद् धातोरच् प्रत्ययो भवतीत्यर्थः संपद्यते । "एचोयवायावः" (६।१।७८) इत्यादौ तु विधिभाजोभावान्न तदन्तविधिः । इयं च परिभाषा " येन विधिस्तदन्तस्य " (१।१।७२) इत्यस्य फलितार्थरूपेण पठ्यते ॥ १३ ॥

इति श्रीमदग्निहोत्रिवंशावतंसाप्पाजिभट्टसूनुपराभिधानहरिभास्करकृते
परिभाषाभास्करे प्रथमेध्याये प्रथमः पादः ॥

संनियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १४ ॥

अत्र वाशब्द एवार्थे । 'वा स्याद्विकल्पोपमयोरेवार्थेपि समुच्चये' इति विश्वकोशात् । तेनायमर्थः । एकसूत्रनिर्दिष्टानां पदानां अनुवृत्तिनिवृत्ती सहैव सहैव स्याताम् । न तु

१ A. om. कौमुदी. २ B. बह्वादिगण. ३ A. तत्रेयं चिन्ता । सूत्रकाररीत्यैवेदं प्रत्युदाहरणम् । वार्तिकरीत्या तु कोमलेति प्रत्युदाहर्तव्यमिति । ४ B. श्रियादावेव. ५ B. संनिधानेन. ६ A. om. पराभिधानहरि.

एकस्यानुवृत्तिरन्यस्य निवृत्तिरिति । तेन " उश्च " (१।२।१२) इति सूत्रे " लिङ्सिचावात्मनेपदेषु " (१।२।११) इति सर्वं सूत्रमनुवर्तते । ज्ञापकमत्र "हनः सिच्" (१।२।१४) इति सूत्रे सिज्ग्रहणम् । अन्यथा " लिङ्सिचौ० " (१।२।११) इत्यतोनुवृत्यैव तदर्थसिद्धौ तन्न कुर्यात् । वस्तुतस्त्वियं परिभाषा 'क्वचिदेकदेशोप्यनुवर्तते' (परि.८) इति परिभाषायाःक्वचित्पदस्यैव प्रपञ्च इति तत्रैवेममर्थं सविशेषं न्यरूपयम्॥१४॥

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ १५ ॥

तेन जिव्रिः इत्यत्र धातुत्वाभावान्न " हलि च " (८।२।७७) इति दीर्घः । जिव्रिरिति रूपं तु जीर्यतेर्धातोरुणादिपञ्चमपादगतेन "जीर्यतेः क्रिन् रश्च वः" (उणादि७३७) इति सूत्रेण क्रिन्प्रत्यय इत्वे रपरत्वे रेफस्य वकारे च कृते सिध्यति । अत्र सीरदेवेन 'अयं चार्थोऽर्थवत्सूत्रप्रणयनादस्तीत्याहुरन्यथा सर्वेषामुणादीनां धातुजत्वेन कृदन्तत्वात्प्रातिपदिकसंज्ञा सिद्धैवेति तन्न कुर्यात्' इत्युक्तम् । तत्र 'आहुः' इत्यनेन नेदं ज्ञापकं युक्तमित्यस्वरसो गम्यते । व्युत्पत्तिपक्षेपि बहुपटवः इत्याद्यर्थमर्थवत्सूत्रस्यावश्यकत्वात् । न च बहुपूर्व इति न्यासं त्यक्त्वा एवंविधसूत्रप्रणयनमेव ज्ञापकमिति वाच्यम् । कृद्ग्रहणपरिभाषया मूल्केनोपदंशमित्यादौ कृदन्तत्वेनातिप्रसङ्गापत्तेः । कृत्तद्धितेतिसूत्रीयसमासग्रहणस्य नियमार्थताया अप्यर्थवत्सूत्रप्रणयनायत्तत्वेनाकिंचित्करत्वात् इति । अतः "अतः कृकमि०" (८।३।४६) इत्यत्र कंसग्रहणं ज्ञापकमिति केचित् । "उणादयो बहुलम्" (३।३।१) इति बहुलग्रहणस्यैवायं प्रपञ्च इत्यन्ये ॥ १५ ॥

सर्वो द्वन्द्वो विभाषैकवद् भवति ॥ १६ ॥

द्वन्द्वावच्छेदकावच्छिन्नो द्वन्द्वो विकल्पेनैकवद् भवति । तेन बाभ्रवशालङ्कायनं बाभ्रवशालङ्कायनाः इत्येकवचनबहुवचने सिध्यत इति " तिष्यपुनर्वस्वोः०"(१।२।६३) इत्यत्र स्पष्टम् । न च धवखदिरावित्यादावपि पाक्षिकैकवचनानापत्तिः । न्यायसिद्धार्थानुवादकत्वादस्याः परिभाषायाः । तथाहि " चार्थे द्वन्द्वः " (२।२।२९) इत्यनेन चार्थे द्वन्द्वो विधीयते । स यदा समाहारे तदा तस्यैकत्वादेकवचनम् । इतरेतरयोगे त्ववयवभेदानुगमाद् द्विवचनबहुवचने इतीतरेतरसमाहारात्मकद्वन्द्वे फलित एकवद्भावविकल्पोऽनपाऽनूद्यत इति । न चैवं वतिनिर्देशासंगतिः, एक एकवद्भवतीत्यर्थासंभवादिति वाच्यम् । विजन्तस्य वैदेः सत्वेन वतेरभावात् । न चैवमपि अनयैव निर्वाहे " विभाषा वृक्षमृग०" (२।४।१२) इति सूत्रवैयर्थ्यं शङ्क्यम् । वृक्षादीनां स्वजातीयैरेव द्वन्द्वे एकवद्भाव इति नियमार्थत्वात् । तेन 'नरवानररक्षसाम्' इत्यादौ इतरेतरयोगद्वन्द्वेन बहुवचनं व्याख्यातम् । एवं प्राण्यङ्गादीनां समाहार एव यथा स्यात् इति नियमार्थत्वेन " द्वन्द्वश्च प्राणितूर्य०" (२।४।२) इत्यादेरपि न वैयर्थ्यम् । ज्ञापकमत्र " तिष्यपुनर्वस्वोः०" (१।२।६३) इत्यत्र बहुवचनग्रहणमिति भाष्यकारादयः । यद्यप्यत्र न्यायसिद्धार्थानुवादकत्वेन

१ B. धातुजत्वे कृदन्तत्वात्. २ B. बहुश्पूर्व. ३ B. om. इति केचित्. ४ B. विदेःसत्त्वेन. ५ A. om. ग्रहणम्.

ज्ञापकं न युज्यते तथापि द्वन्द्वश्च प्राणीतिसूत्रे प्राण्यङ्गादीनामेव समाहारो नान्येषामिति विपरीतनियमनिरासज्ञापनद्वारा एतदर्थोपस्थापकत्वेन ज्ञापकोक्तिर्निबन्धकाराणामिति बोध्यम् ॥ १६ ॥

इति प्रथमे द्वितीयः पादः ॥

उदित् सवर्णं गृह्णाति, न सवर्णमात्रम् ॥ १७ ॥

मात्रशब्दः साकल्ये । उदिद्वर्णः "अणुदित्सवर्णस्य०" (१।१।६९) इति सूत्रेण स्थानप्रयत्नाभ्यां विशिष्टमेव सवर्णं गृह्णाति, न तु स्थानैकतुल्यं सवर्णमात्रम् । " न विभक्तौ०" (१।३।४) इत्यत्र वर्गात्पृथक् सकारग्रहणाल्लिङ्गात् । " तुल्यास्यप्रयत्नम्० " (१।१।९) इति स्थानप्रयत्नविशिष्टस्यैव सवर्णसंज्ञाभिधानाद्वा । तेन " चोः कुः " इत्यादौ न हकारादिविधिः ॥ १७ ॥

प्रकृतिवदनुकरणं भवति ॥ १८ ॥

तेन कॄ गॄ इत्याद्यनुकरणस्य प्रकृतिवद्भावेन धातुत्वात् ' कीः ', ' गीः ' इत्यादौ " ॠत इद्धातोः " (७।१।१००) इतीत्वादि । अत्र ज्ञापकं "परिव्यवेभ्यः क्रियः" (१।३।१८) इत्यत्र क्रियः इति इयँङादेशकरणम् । अत्रेदमवधेयम् । अयमतिदेशो वैकल्पिकः । " विपराभ्यां जेः " (१।३।१९) इति निर्देशात् । तेनोक्तोदाहरणे ' कॄः ', ' गॄः ' इत्यपि सिद्धम् । क्रिय इत्यादौ सार्थकस्यैव लब्धधातुव्यपदेशस्यानुकरणं जेरित्यादौ तु निरर्थकस्येति नेयङिति सीरदेवोक्तिस्तु चिन्त्या । अनुकरणस्यानुकार्येण सह भेदाभेदविवक्षया प्रातिपदिकसंज्ञाभावाभावौ निर्णेयाविति ॥ १८ ॥

विकरणेभ्यो नियमो बलीयान् ॥ १९ ॥

यथा एधिष्यते । अत्र नित्यात्परस्मादपि स्यविकरणात्प्राक् " अनुदात्तङित आत्मनेपदम् " (१।३।१२) इति नियमो बलीयस्त्वाद्भवति । ज्ञापकमत्र " अनुपसर्गाद्वा " (१।३।४३) इति क्रमेरात्मनेपदविधानम् इति भाष्यकारः । चक्राम, चक्रमे क्रम्यात् क्रंसीष्ट इत्यादौ तस्यावश्यकत्वात् । ज्ञापकत्वासंभवमभिप्रयन्तः कैयटहरदत्तादयस्तु " वृद्भ्यः स्यसनोः " (१।३।९२) इति परस्मैपदविकल्पविधानं तदिति प्रतिपेदिरे । प्राग्विकरणप्रवृत्तौ हि तेन व्यवायादेव अनुदात्तङितः शेषात् कर्तरीतिवाक्ययोरप्रवृत्ते-स्तिप्तस्झीतिसामान्यवाक्येन पदद्वयसिद्धौ तद् व्यर्थं भवेदिति । वस्तुतः स्यातेरार्धधातुके

१ A. समाहारे नान्येषाम्. २ A. B. इयङादेशाकरणम्. ३ A. om. वस्तुतः स्यातेः .... नोपपादितमित्येव ।

प्रयोगाभावकल्पनेन ‘ सस्थानत्वं नमःख्यात्रे ’ (२।४।५४ वा.८) इति वार्तिकस्वहादीनां प्रयोगाभावानुमानेन“वाह ऊठ्” (६।४।१३२) इति ऊठ्ग्रहणस्यासिद्धपरिभाषाज्ञापकत्वव क्रमेर्लिङाशीर्लिङोः प्रयोगाभावकल्पनेन भाष्योक्तज्ञापकं सूपपादम्। परंतु तैर्नोपपादितमित्येव। एवं सत्यनुदात्तङित इत्यत्र चङ्ङ्म्यामात्मनेपदप्रसङ्गभिया भूवादिसूत्राद्धातुग्रहणानुवर्तनेन भाष्यकारीयं मुधेति वदन्ति। केचित्तु ङिदन्तादिति तदन्तलाभाय ल्कारेण धातुपदमाक्षिपन्तो भाष्योक्तव्यवहितानुवृत्तेरनौचित्यं वदन्तो बेभिद्यते ऋतीयते इत्यत्र तदन्तविधिद्वारा आत्मनेपदसिद्धिर्धातुग्रहणस्य प्रयोजनमित्यभिदधाति। अन्ये तु ‘ समभिहारे यङ्’ इति च्छित्वा “ ऋतेरीयङ् ” (३।१।२९) इत्यत्र इकारान्तरं प्रश्लिष्य अनुदात्तेल्लक्षणमात्मनेपदं मन्वाना उक्तप्रयोजनद्वयमन्यथा साधयन्ति। अपरे तु ‘उपस्थितस्य संबन्धो दुर्वारः’इति न्यायेन [1]उपस्थितधातुपदसंबन्धो वारयितुमशक्यः। न च प्रयोजनाभावस्तद्वारकः। चङ्ङ्म्यामात्मनेपदनिवृत्तेरेव प्रयोजनत्वात्। न हि प्रकृतपरिभाषया तत्सिद्धिः। “ वृद्भ्यः स्यसनोः ” (१।३।९२) इत्यत्र कृतेऽपि विकरणे नियमः प्रवर्तते इत्यस्यैव ज्ञापनीयतया विकरणान्नियम[2]बलीयस्त्वस्यानङ्गीकारात्। अन्यथा हि औद्यत इत्यादौ नियमाडागमयोः संप्रसारणे परत्वादाटि सति आटश्चेति न स्यात्। [3]उपस्थितिस्तु धातोः प्रकरणादर्थापत्तेरनुमानाद्वेति न कोऽप्याग्रह इति प्राहुः ॥ १९ ॥

इति प्रथमे तृतीयः पादः ॥

सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ॥ २० ॥

अत्र [4]विप्रतिषेधशब्दार्थमाह भाष्यकारः—‘ द्वौ प्रसङ्गौ यदा अन्यार्थौ भवतः एकस्मिंश्च युगपत्प्राप्नुतः स विप्रतिषेधः ’ इति। तथा चायमर्थः— गतौ शास्त्रयोः प्राप्तौ सत्यां यो विप्रतिषेधस्तस्मिन् सकृदेकवारं यद्बाधितं तद् बाधितमेव। उदाहरणम्। भवतात्। “ अतो हेः” इति [5]तातङ्भावपक्षे भवेत्यादौ “ तुह्योस्तातङ्० ” (७।१।३५) इति अत्तात् इत्यादौ चरितार्थमिति परस्परमन्यत्र चरितार्थयोस्तयोः प्रसङ्गे परत्वात्तातङा बाधितो हिलुक् पुनस्तातङः स्थानिवत्त्वान्न प्रवर्तते। यद्वा कुमार्यां मालायां तस्याम् इत्येतेषूदाहरणेषु आट्स्याड्भिर्बाधितस्य नुटः पुनर्न प्रवृत्तिः। [6]इयं परिभाषा विप्रतिषेधसूत्रीयव्यक्तिपक्षस्य प्रपञ्चः। व्यक्तौ पदार्थे हि प्रतिलक्ष्यं लक्षणव्यापारभेदात्तृणादिन्यायेनोभयोः शास्त्रयोः पर्यायेण प्राप्तौ सत्यां विप्रतिषेधसूत्रं परमेव कार्यं भवति न पूर्वमिति नियमार्थं सत् ‘सकृद्गतौ’ इत्यादिपरिभाषामुपपादयतीति तत्सूत्र एव भाष्ये स्पष्टम् ॥ २० ॥

---

१ A. आश्रित for उपस्थित. २ A. नियमबलीयस्त्वस्याङ्गीकारात्. ३ A. om. उपस्थितिस्तु ... आग्रह इति. ... ४ A. विप्रतिषेधार्थमाह। ५ A. तातङभाव. ६ A. इयं च परिभाषा.

पुनःप्रसङ्गविज्ञानात् सिद्धम् ॥ २१ ॥

बाधितस्य शास्त्रस्य पुनः प्रसङ्गविज्ञानाद् ' भिन्द्धकि ' इत्यादि सिद्धमित्यर्थः । तथा हि । भिन्द् हि इति स्थिते अकज्धिभावयोः प्राप्तयोः परत्वाद् धिभावे कृते पुनरकच् प्रवर्तते । एवमीजतुरित्यादौ द्वित्वादि । इयं परिभाषा विप्रातिषेधसूत्रीयजातिपक्षस्य प्रपञ्चः । जातिपदार्थे लक्षणस्य सकृत् प्रवृत्तौ अन्यत्र चरितार्थयोर्द्वयोरपि शास्त्रयोरप्रवृत्तेर्विप्रतिषेधसूत्रे अपूर्वायाः परकार्यप्रवृत्तेर्ज्ञापनान्नियमाभावेन पूर्वशास्त्रप्रवृत्तेर्विघाताभावात् ॥ २१ ॥

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवत् ॥ २२ ॥

तेन स्योन इत्यादौ लघूपधगुणादिकं बाधित्वा यणादि । यत्तु भाष्ये ' धौकामिः स्यौकामिः ' इत्यत्र परां वृद्धिं, दुद्यूपति सुस्यूपति इत्यत्र नित्यं द्विर्वचनं च बाधित्वा सवर्णदीर्घ इत्युक्तं तत्त्वन्यथासिद्धम् । आद्योदाहरणद्वये अन्त्योदाहरणद्वये च "समर्थानां प्रथमाद्वा" (४।१।८२) इति सूत्रगतसमर्थपदेन यणेकादेशाभ्यां वृद्धिबाधस्य मध्योदाहरणद्वये " द्विर्वचनेचि " (१।१।५९) इति सूत्रे मत्वर्थीयाच्प्रत्ययं कृत्वा द्विर्वचनमस्ति अस्मिन्सोयं द्विर्वचनः इति भाष्यकारीयव्याख्यानसामर्थ्याच्छब्दान्तरे प्राप्त्या द्विर्वचनमनित्यं यण् तु नित्यः इति कैयटोपन्यस्तमताद्वा यणा द्विर्वचनबाधस्य सिद्धत्वादित्याहुः । अथ ' असिद्धं बहिरङ्गमन्तरङ्गे ' इत्यनेनैवेयं परिभाषा गतार्थेति चेन्न । अजानन्तर्ये "नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः " (परि. १११) इत्यसिद्धपरिभाषाया निषिद्धत्वात् । न च स निषेधोस्या अपि शङ्क्यः । वक्ष्यमाणस्य नाजानन्तर्ये इति परिभाषाज्ञापकषत्वतुकोरासिद्ध इति सूत्रस्य असिद्धपरिभाषयैवानया वैयर्थ्याभावादिति केचित् । भाष्यकारस्तु विप्रतिषेधसूत्रे अन्तरङ्गपरिभाषां सप्रयोजनां व्याख्याय 'अनयैव सिद्धम्' इति ग्रन्थेन असिद्धपरिभाषया अस्या गतार्थतां मन्वानो नोरीचकार । न चैवमयज इन्द्रमित्यादौ भाष्यमते बहिरङ्गपरिभाषाया अजानन्तर्ये निषेधात् सवर्णदीर्घापत्तिरिति वाच्यम् । पदसंस्कारपक्षाभ्युपगमात् । वाक्यसंस्कारपक्षे परिभाषाङ्गीकारेपि शब्दपरविप्रतिषेधेन दोषतादवस्थ्यादिति ॥ २२ ॥

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ २३ ॥

इयं च परिभाषा " तस्मिन्निति० " (१।१।६६) " तस्मादित्युत्तरस्य " (१।१।६७) इत्यनयोर्विप्रतिषेधे तस्मादित्युत्तरस्येत्यस्य प्राबल्यार्था । "विप्रतिषेधे परं कार्यम्" (१।४।२) इत्युक्तेः । तदयमर्थः । उभयोः पञ्चमीसप्तम्योरेकत्र निर्देशे पञ्चमीनिर्देश एव सप्तम्याः षष्ठीकल्पने बलीयान् न सप्तमीनिर्देशः पञ्चम्याः षष्ठीकल्पन इति । तेन " आमि सर्वनाम्नः सुट् " (७।१।५२) इत्यत्रानुवृत्तमातैः इति पञ्चम्यन्तमामीति सप्तम्याः षष्ठी

---

१ A. om. शब्दान्तरे.......मताद्वा. २ A. कल्पनेन बलीयान्. ३ A. अत इति पञ्चम्यन्तं.

प्रकल्पयति । " आज्जसेरसुक् " (७।१।५०) " त्रेस्त्रयः " (७।१।५३) इति सूत्रयोः आत् आमि इत्यनयोः परस्परनैरपेक्ष्येण चरितार्थत्वात् तस्मादित्युत्तरस्येत्यस्य तस्मिन्निति निर्दिष्टे इत्यपेक्षया परत्वेन आदित्वस्यैव प्रकल्पकत्वौचित्यात् । उभयोरन्यत्रा-चरितार्थत्वेपि पञ्चमीनिर्देशप्राबल्यं यथा "ङः सि धुट्" (८।३।२९) । सप्तमीनिर्देशस्तत्र लाघवाय ॥ २३ ॥

सर्वे विधयश्छन्दसि विकल्पन्ते ॥ २४ ॥

तेन 'युक्ता मातासीद् धुरि दक्षिणायाः' इत्यत्र दक्षिणायाम् इति प्राप्ते वैकल्पिकत्वात्र सप्तमी किंतु शेषे षष्ठी । अयं चार्थो " व्यत्ययो बहुलम् " (३।१।८५) इत्यस्य प्रपञ्चभूतेन " षष्ठीयुक्तश्छन्दसि वा " (१।४।९) इति सूत्रे ' वा ' इति योग-विभागेन भाष्ये साधितः ॥ २४ ॥

प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ २५ ॥

प्रत्ययग्रहणे यस्मात्प्रकृतिरूपात् प्रत्ययो विहितस्तदादेः प्रकृतिरूपादेः तदन्तस्य प्रत्ययान्तस्य ग्रहणं स्यात् । तेन "सनाद्यन्ता धातवः" (३।१।३२) इत्यत्र सन्प्रत्यय-ग्रहणाच्चिकीर्षतीत्यादौ तदन्तस्य धातुत्वं न प्राचिकीर्षत् इत्यादौ संघातस्य । 'अवतप्तेनकुल-स्थितं तवैतत् ' इत्यादौ तु कृद्ग्रहणपरिभाषया[१] निर्वाहो वक्ष्यते । इयं च परिभाषा " यस्मात्प्रत्ययविधिः " (१।३।१३) इति सूत्रे योगविभागाल्लभ्यते । तदुक्तं तत्रैव भाष्ये " सा तर्हि एषा परिभाषा कर्तव्या । न कर्तव्या । एवं वक्ष्यामि । 'यस्मात्प्रत्ययविधि-स्तदादि प्रत्यये' गृह्यमाणे गृह्यते । ततः ' अङ्गम् ' अङ्गसंज्ञं च भवति इति ॥ २५ ॥

स्त्रीप्रत्यये चानुपसर्जने न ॥ २६ ॥

चशब्दस्त्वर्थे । अनुपसर्जने स्त्रीप्रत्यये तु प्रत्ययग्रहणपरिभाषा न प्रवर्तते । यथा परमकारीषगन्धीपुत्रः । अत्र " ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे " (६।१।१३) इत्यनेन संप्रसारणमनुपसर्जनत्वात् सिद्धम् । उपसर्जने तु [२]प्रत्ययग्रहणपरिभाषा प्रवर्तत एव इत्यतिकारीषगन्ध्यपुत्र इत्यत्र न संप्रसारणम् । य[३]त्तु कैयटः—कचिदुपसर्जनत्वेपि तदादि-नियमो न । हल्ङ्यादिसूत्रे दीर्घग्रहणाल्लिङ्गात् । तथा चातिराजकुमारिरित्यत्र गोस्त्रियोरिति ह्रस्व इति । तन्न । दीर्घग्रहणस्यातिखट्वेत्यादौ सोराबन्तादेरविहितत्वेपि परत्वादनयाल्लोप-निवृत्त्यर्थतयोपक्षीणत्वात् । अतिराजकुमारिरित्यत्र त्वनुपसर्जनत्वेनैव निर्वाहः । कुमारीत्व-स्यातिक्रान्तं प्रत्युपसर्जनत्वेपि राजानं प्रत्यतत्त्वात् । न चैवं कृत्तद्धितेतिसूत्रे समासग्रहणस्य नियमार्थत्वासंभवः । राजकुमारीत्यत्रानुपसर्जनत्वे प्रत्ययग्रहणपरिभाषाया निषेधात् पूर्व-

१ A. परिभाषाया निर्वाहः. २ A. स्त्रीप्रत्ययग्रहणपरिभाषा न प्रवर्तते । ३ A. om. यत्तु कैयटः ... राजानं प्रत्यतत्त्वात् ।

सूत्रेण प्रत्ययान्तत्वेनाप्राप्ते प्रातिपदिकत्वे विध्यर्थौचित्यादिति वाच्यम् । अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते इति परिभाषाबलादन्तरङ्गस्यापि हल्ङ्यादिलोपस्य लुंग्विषये अप्रवृत्तेः । श्रूयमाण एव सुपि समासप्रवृत्तावप्रत्ययान्तत्वेन प्रवृत्तायाः संज्ञाया एकदेशविकृतन्यायेन विभक्तिलुक्यप्यपायाभावादिति । इयं परिभाषा उदाहृतभाष्योक्तयोगविभागादेव लभ्यते । विभक्तिसूत्रे " नेयङुवङ्० " (१।४।४) इत्यतः अस्त्रीग्रहणं " वामि " (१।४।५) इत्यतो वाग्रहणं चानुवर्त्य व्यवस्थितविभाषाज्ञापनात् । अत एव अङ्गचरणादौ यस्मात्प्रत्ययविधिरित्यस्य पाठेन अङ्गस्येति सूत्रस्य गतार्थता न शङ्क्या इति वदन्ति ॥ २६ ॥

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ २७ ॥

तेन " तरप्तमपौ घः " (१।१।२२) इति तरप्तमपोरेव घसंज्ञा । तथा च " घरूपकल्पचेलट्० " (६।३।४३) इति ह्रस्वो गौरीब्राह्मणितरा इत्यादौ गौरीशब्दे न भवति, किं तु ब्राह्मणीशब्दे । अत एव " सनाद्यन्ता धातवः " (३।१।३२) इत्यत्र अन्तग्रहणमावश्यकम् । ननु " कृत्तद्धित० " (१।२।४६) इति सूत्रेऽप्यन्तग्रहणं कर्तुमुचितमिति चेन्न । पूर्वसूत्रादर्थवद्ग्रहणानुवृत्त्यैव कृत्तद्धितान्तयोः संज्ञा इत्यर्थस्याकरे उपपादितत्वात् । अत एव अर्थवत्सूत्रे प्रत्ययान्तपर्युदास आवश्यकः । अन्यथा उत्तरसूत्रेण तद्धितान्तस्य संज्ञाविधानं व्यर्थं स्यादिति मनोरमोक्तं तु चिन्त्यम् । प्रत्ययान्तस्य चेत्प्रातिपदिकत्वं तर्हि तद्धितान्तस्यैवेति नियमार्थं तत् किं न स्यात् । न च कृद्ग्रहणस्य छिद् धुक् इत्यादौ अधातुपर्युदासे प्राप्ते नियमार्थत्वासंभवेन ' मूलकेनोपदंशं ' इत्यत्र समासग्रहणकृतनियमेनैव परत्वात्तद्धितग्रहणमात्रकृतनियमेन कारक इत्यादौ संज्ञा निवर्तेत इति वाच्यम् । अनिष्टफलकेनापि नियमेन तद्धितग्रहणस्य संभवति सार्थक्ये वैयर्थ्यापादनायोगात् । अन्यथा ''द्वन्द्वे च'' (१।१।३१) इति निषेधः समुदायस्यैवेति प्रतिपादयन्त्यां मनोरमायामवयवनिषेधवैयर्थ्येन च दक्षिणोत्तरपूर्वाणामित्यत्र इष्टमपि पुंवद्भावं निषेद्धुं इदं किं न स्यादिति वाच्यम् इत्याशङ्काग्रन्थस्य निर्बलत्वापत्तेः । किं च " विप्रतिषेधे परं कार्यम् " (१।४।२) इत्यत्र परशब्दस्येष्टवाचकतया कृद्ग्रहणेनैव तद्धितग्रहणकृतनियमबाधोक्तीकर्तुं युक्तः, न तु भाष्यस्वकृतकौस्तुभाद्युक्तोक्तनियमपरित्यागेन तद्धितग्रहणवैयर्थ्यहेतुकगुरुभूतप्रत्ययान्तपर्युदास इत्यास्तां तावत् । परिभाषायां ज्ञापकं तु सुप्तिङन्तं पदमित्यन्तग्रहणम् ॥ २७ ॥

इति श्रीमदग्निहोत्रिवंशावतंस–अपाजिभट्टसूनुभास्करकृते
परिभाषाभास्करे प्रथमोऽध्यायः ॥

---

१ A. प्रत्ययान्तत्वेन पर्युदासे प्राप्ते विध्यर्थौचित्यात्. २ A. लुग्विषये प्रवृत्तेः. ३ B. विभक्तसूत्रे. ४ B. विज्ञानात् for ज्ञापनात्. ५ B तर्हि तद्धितस्यैवेति. ६ B निर्दलत्वापत्तेः, ७ B वस्तुतः for किं च. ८ B वाचितया. ९ B भाष्यकृतकौस्तुभ.

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ २८ ॥

अत्र लिङ्गपदेन लिङ्गबोधकः प्रत्ययो लक्ष्यते । उदाहरणं ' सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः ' (३।१।११ वा.) इति दण्डीवाचरति दण्डिनतीत्यत्रेव दण्डिनीवाचरति[1] दण्डिनयतीत्यत्रापि भवति । तथा " लोहितादिडाज्भ्यः क्यष् " (३।१।१३) इति लोहितायति लोहितायते इत्यत्रेव लोहिनीयति[2] लोहिनीयते इत्यत्रापि भवति । एवं " अचित्तहस्तिधेनोष्ठक् " (४।२।४७) इति हस्तिनीनां समूहो हास्तिकमित्यत्र भवति । यत्तु " भस्याढे तद्धिते " (६।३।३५ वा. ११) इति पुंवद्भावस्य ठकः प्रागेव प्रवृत्या तत्सिद्धिः । " जातेश्च " (६।३।४१) इति प्रतिषेधस्य च " प्रवाहणस्य ढे " (७।३।२८) इति सूत्रमूलकसौत्रप्राप्तिमात्रविषयकत्वस्य सिद्धान्तितत्वात्तद्धित इत्यस्य विषयसप्तमीत्वाङ्गीकारात् । तथा च हास्तिकमित्यनुदाहरणम् इति । तन्न । तद्धित इत्यस्य परसप्तमीत्वेन ठगुत्पत्तेः प्राक् पुंवद्भावाप्रवृत्तेः । अन्यथा " तस्य समूहः " (४।२।३७) इत्यधिकारीय–" भिक्षादिभ्योऽण् " (४।२।३८) इति सूत्रगतभिक्षादिगणस्थयुवतिशब्दादणि चिकीर्षित एव पुंवद्भावप्रवृत्तौ अणा पुंवद्भावबाधापत्तिः । तथा च युवतीनां समूहो यौवतमिति न स्यात् । यौवतमिति तु यौतेः शत्रन्तात् अनुदात्तादेरञि सिद्धम् । एतेन अणिञोरनार्षयोरितिसूत्रीयस्तद्धित इत्यस्य विषयसप्तमीत्वप्रतिपादकरक्षितग्रन्थोपास्त इत्याहुः । भाष्यवार्तिककारौ तु भिक्षादिगणे युवतिशब्दपाठं प्रत्याचख्यतुः । तथा च तत्रौत्सर्गिक एवाणित्यवधेयम् । ज्ञापकमत्र युवाखलतिसूत्रे युवजरत्योः समासविधानम् । एतत्परिभाषाऽभावे हि तत्र सामानाधिकरण्याधिकारात् समासानुपपत्तिरित्याकरः । यत्तु हरदत्तेन युवा जरतीवेत्यौपचारिकं सामानाधिकरण्यं भिन्नलिङ्गयोरपि संभवत्येवेति चिन्त्यमिदमित्युक्तं तत्रेयं चिन्ता–युवजरतीत्यत्र यूनो जरत्या[3] सह समासे चिकीर्षिते औपचारिकं सामानाधिकरण्यं शब्दस्वाभाव्यान्नैव प्रतीयते । यथा पञ्चमुक्तशब्दात् पञ्चभिर्मुक्तमस्येत्यर्थ इति । केचित्तु श्रमणादीनां स्त्रीलिङ्गानां पाठो ज्ञापक इति वदन्ति ॥ २८ ॥

विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ २९ ॥

विभक्तौ यत्कार्यं तत्र लिङ्ग[4]बोधकप्रत्ययविशिष्टस्य ग्रहणं न स्यात् । " पथिमथ्यृभुक्षामात् " (७।१।८५) अत्र सुपथीत्यस्य न ग्रहणम् । अत्र विभक्तावेवेति न नियमः, किं तु विभक्तिस्थानिकमपि कार्यं ग्राह्यम् । 'शुनः स्वरैः'[5] इत्येतत्परिभाषाप्रयोजनवार्तिकमुपादाय यथेह भवति शुना शुने शुन्या इत्यत्रापि स्यादिति भाष्योदाहरणात् । इयं परिभाषा भाष्ये " युवोरनाकौ " (७।१।१) इत्यत्र पठिता । केचित्तु मद्राज्ञीत्यादौ " राजाहःसखिभ्यष्टच् " (५।४।९१) इत्यादीनामप्रवृत्तये " शाक्लिाङ्गल० "

---

१ A B दण्डेनति for दण्डिनाति. २ A लोहितीयति लोहितीयते. ३ A युवत्या सह समासे कृते. ४ A लिङ्गबोधकग्रहणं न स्यात् । ५ A शुनः सुर इत्येतत्.

(३।२।९ वा. १) इत्यादौ घटशब्दात् पृथग् घटीशब्दोपादानेन लिङ्गविशिष्टपरिभाषाया अनित्यत्वज्ञापनस्यावश्यकत्वात्तेनैव इमामपि संगृह्णन्ति ॥ २९ ॥

इति द्वितीये प्रथमः ॥

सूत्रे लिङ्गवचनमतन्त्रम् ॥ ३० ॥

सूत्रे लिङ्गं वचनं चाविवक्षितं स्यात् । " अर्धं नपुंसकम् " (३।२।२) इति नपुंसकग्रहणात् । " आ कडारादेका संज्ञा " (१।४।१) इत्यत्र एकाग्रहणाच्च । धान्यपलालन्यायाद्वा । तेन " साधकतमं करणम् " (१।४।४२) इत्यनेन काष्ठेन पचतीत्यत्रेव शरेण च्छिनत्तीत्यत्रापि करणत्वात् तृतीया । नपुंसकलिङ्गस्याविवक्षितत्वात् । यथा स्वर्गकामो यजेतेत्यत्र पुंलिङ्गस्याविवक्षितत्वात् स्त्रिया अपि यागेऽधिकारः । वचनस्याविवक्षितत्वात् काष्ठैः पचतीत्यत्रापि तृतीया । यथा ग्रहं संमार्ष्टि इत्यत्रैकत्वस्याविवक्षितत्वाद्बहुत्वविशिष्टानां ग्रहाणां संमार्गः । स्वर्गकाम इत्यत्रैकत्वं तूपादेयकर्तृविशेषणत्वाद्विवक्षितमेवेति सिद्धान्तितं मीमांसायाम् । ननु " षड्भ्यो लुक् " (७।१।२२) इति गौणत्वेपि लुगापत्तिः तथा " सप्तमी शौण्डैः " (२।१।४०) इत्यत्र गणग्रहणं न स्यात् बहुवचनयोरतन्त्रत्वादिति चेन्नैवम् । आद्ये बहुवचनग्रहणसामर्थ्याद्गौणव्यावृत्तिसिद्धेः । द्वितीये गणपाठसामर्थ्याद्गणग्रहणसंभवात् । न चेहापि बहुवचनसामर्थ्यम् । तेन बहुवचनान्तेनैव शौण्डपदेन समास इत्यस्यापि वक्तुं शक्यत्वात् । बहुवचननिर्देशाच्छौण्डादिभिरिति विज्ञास्यते इति भाष्यस्याप्येतत्तात्पर्यकत्वात् । एवं च " द्युद्भ्यो लुङि " (१।३।९१) इत्यत्र द्युतादिग्रहणे व्याख्यातमेव शरणीकरणीयमिति सारम् ॥ ३० ॥

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥ ३१ ॥

नञ्पदयुक्तमिवपदयुक्तं च शब्दस्वरूपं स्वस्मादन्यस्मिन् सदृशाधिकरणे सदृशाभिधेये वाच्यतासंबन्धेन वर्तते । हि यस्माल्लोके तथा तादृशी अर्थगतिरर्थप्रतीतिरस्ति । तथा च लौकिकन्यायसिद्धेयं परिभाषेति भावः । उदाहरणम् " निपात एकाजनाङ् " (१।१।१४) " तत्र तस्येव " (५।१।११६) । लोकेपि 'अब्राह्मणमानय', 'ब्राह्मणमिवानय' इत्यादिवाक्येभ्यो ब्राह्मणभिन्नब्राह्मणसदृशानयनादि प्रतीयते । अयमेव च नञ् पर्युदास इत्युच्यते । असूर्यंपश्या राजदाराः इत्यादौ तु 'ओषधेश्च०' (६।३।१३२) इत्यादिसूत्रे विभक्तिग्रहणादेतत्परिभाषाया अनित्यत्वात् प्रसज्यप्रतिषेधः । सूर्यं न पश्यन्तीति नञः क्रियया संबन्धात् । तदेतदाहुर्भट्टपादाः—

---

१ B. om. स्वर्गकाम इत्यत्र...मीमांसायाम् । २ B. om. एवं च. ३ B द्युतादिग्रहणे तु "पुषादिद्युतादि०" (३।१।५५) इति सूत्रेण परस्मैपदे परतोऽङ्विधानाज्ज्ञापकादिति सारम् ॥

" प्रसज्यप्रतिषेधोयं क्रियया सह यत्र नञ् ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् " इति ।

अयं चार्थो " नञ् " (२।२।६) सूत्रे भाष्यादिषु स्पष्टः । अत्रेदं बोध्यम् । आरोपो नञर्थः । [1]विषयत्वं संसर्गः । तेन अब्राह्मणशब्दादारोपविषयो ब्राह्मण इति बोधः । अनिर्वचनीयताख्यातिवादिमतरीत्या शुक्तौ रजतस्येव क्षत्रियादौ ब्राह्मणस्यारोपात् । तथा च ' असः ' इत्यादौ उत्तरपदार्थस्यानुपसर्जनत्वात् सर्वनामकार्यं सिद्धम् । ननु सूत्रकारस्यासंमतो[2]ऽयमर्थ इति चेत्, अत्राह हरदत्तः—अत्र लिङ्गम् "एतत्तदोः सुलोपः०" (६।१।१३२) इत्यत्र अनञ्समासग्रहणमिति । यत्तु

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥

इति पठित्वा अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गोअश्वेभ्यः, अधर्मः इत्युदाहरन्ति । यच्च नामधेयचरणे तत्सिद्धिजाति[3]सारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रया इति तत्सिद्धिपेटि[4]कायामजादेरप्रशस्तपशुत्वाभिधानम् । तदेतत्सर्वमार्थिकार्थमभिप्रेत्यावधेयम् । अत एवानेकमन्यपदार्थे सेव्यतेऽनेकया इत्यादिप्रयोगा उपपन्ना इत्या[5]करीयसिद्धान्तसरणिः । न[6]व्यास्तु— ' पतन्त्यनेका जलधेरिवोर्मयः ' इत्यत्र बहुवचनप्रयोगानुरोधादभाव एव नञर्थः । निवृत्तपदार्थक इति नञ्सूत्रगतभाष्यस्य निवृत्तं पदार्थोऽस्य इति बहुव्रीहिणा अभावरूपनञर्थप्रतिपादनपरत्वात् । स चाभावः प्रतियोगिनो विशेषणं विशेष्यो वा । तत्राद्ये ' अनहं भवामि ', ' अत्वं भवसि ' इत्यादौ भेदप्रतियोगिमदभिन्नकर्तृका भवनक्रिया, भेदप्रतियोगित्वदभिन्नकर्तृका भवनक्रिया इत्याद्यर्थादस्मद्युष्मत्सामानाधिकरण्यात् पुरुषव्यवस्थाना । अन्यथा द्वितीयेपि अस्मदादेस्तद्भिन्ने लक्षणायां नञो द्योतकत्वाद्भिन्नेन तदर्थेन तिङः सामानाधिकरण्यात्सा । मद्भिन्नाश्रयिका भवनक्रियेत्याद्यर्थात् अस इत्यादौ सर्वनामकार्यं तु " एतत्तदोः "० (६।१।१३२) इति ज्ञापकादेव सुसाधम् । अनेकमित्येकवचनं तु " सुबामन्त्रिते० " (२।१।२) इति सूत्रादनुवर्तमानस्य सुबिति विशेष्यस्यानुसाराज्जात्यभिप्रायाद्वा । एवमनेकयेत्यपि योषयेति विशेष्यानुसारादिति युक्तमुत्पश्यन्ति ॥३१॥

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः ॥३२॥

" कुगति०" (२।२।१८) इत्यादिसूत्रैर्यः समास उक्तः स सुबुत्पत्तेः प्रागेव कृद्भिर्भवति । गतिसमासे व्याघ्री । अत्र जिघ्रतेः " पाघ्राध्माधेट्० " (३।१।१३७) इति शप्रत्ययस्य संज्ञायां प्रतिषेधात् " आतश्चोपसर्गे " (३।३।१०६) इति कप्रत्यये कृते

---

१ A. om. विषयत्वं...इति बोधः । २ A अयमर्थ इति केचित् । अत्राह. ३ A सिद्धिगतिसारूप्य. ४ A पेटिकयामजादे. ५ A इत्याकरीयः सिद्धान्तः सरणिः. ६ A om. नव्यास्तु...युक्तमुत्पश्यन्ति ।

सुबुत्पत्तेः प्राक् "कुगतिप्रादयः" (२।२।१८) इति समासे सति अदन्ताद् व्याघ्रशब्दाज्जातित्वान्ङीष्। सुबन्तेन समासे तु सुपो लिङ्गनिर्णयायत्ततया पूर्वं स्त्रीलिङ्गविवक्षया जातेरप्रतीतेष्टाप् स्यात्। कारकसमासे। अश्वक्रीती। अत्र "कर्तृकरणे कृता बहुलम्" (२।३।३२) इति करणकारकांशेन सुबुत्पत्तेः प्रागेव क्तान्तक्रीतपदेन समासे "क्रीतात् करणपूर्वात्" (४।१।५०) इति ङीष्। सुबन्तेन समासे तु टाप् स्यात्। उपपदसमासे। कच्छपी। इहापि "उपपदमतिङ्" (२।१।१९) इति सुबुत्पत्तेः प्राक् समासे जातित्वान्ङीष् नान्यथा। केचित्तु व्याचक्षते—गतिकारकोपपदानामविशेषेण समासो भवति, क्वचित्तु प्राक्सुबुत्पत्तेरिति। [1]तन्मते धातूपसर्गयोः समासवारणं 'पूर्वं हि धातुः साधनेन युज्यते' [2]इति पक्षेण कर्तव्यम्। इयांस्तु विशेषः। पूर्वमते प्रपठतितराम् इत्यत्र न समासः। एतन्मते तु भवत्येवेति। इयं परिभाषा भाष्यकारैः "उपपदमतिङ्" (२।१।१९) इति सूत्रीयातिङ्ग्रहणेन ज्ञापिता। तथा हि। अतिङ्ग्रहणं [3]मा भवान् भूत् इत्यादौ समासवारणार्थम्। तत्र च सुपेत्यधिकारात् तिङन्तेन समासस्याप्रसङ्ग एवेति व्यर्थं सदतिङ्ग्रहणं कुगतिप्रादयः उपपदमतिङ् इति योगयोः सुपेत्यस्य निवृत्तिं ज्ञापयति। कुगतीत्यत्रापि गतिग्रहणं पृथक्कृत्य अतिङ्ग्रहणं तत्रापकृष्यते। तथा चेयं परिभाषोपपन्ना। यद्यपि कारकविषये ज्ञापकं नास्ति "कर्तृकरणे कृता बहुलम्" (२।३।३२) इति कृद्ग्रहणं तु काष्ठैः पचतितराम् इत्यादौ तद्धितेन समासवारणार्थं तथापि उक्तज्ञापकस्य सामान्यापेक्षत्वात् [4]स्तैपाशपेतिवदेकदेशानुमत्या संपूर्णाप्याश्रीयते। [5]यद्वा "कर्तृकरणे कृता बहुलम्" (२।३।३२) इति बहुलग्रहणं 'कारकसमासः प्राक्सुबुत्पत्तेः' इत्यर्थस्य संग्राहकम्। बहूनर्थांल्लातीति व्युत्पत्तेः। अत एव क्वचित्सुबुत्पत्तेरनन्तरमपि समासः। तेन धनक्रीतेति सिद्धम् ॥३२॥

इति द्वितीये द्वितीयः पादः ॥

क्वचिदपवादविषयेप्युत्सर्गोऽभिनिविशते ॥३३॥

तेन 'काञ्चनी वासयष्टिः' इत्यत्र "नित्यं वृद्धशरादिभ्यः" (४।३।१४४) इति मयटो विषये "अनुदात्तादेश्च" (४।३।१४०) इत्यञ्। तथा 'प्रदीयतां दाशरथाय मैथिली' इत्यत्र "अत इञ्" (४।१।९५) इत्यस्य विषये "प्राग्दीव्यतोऽण्" (४।१।८३) इत्यण्। ज्ञापकमत्र "अकेनोर्भविष्यदाधमर्ण्ययोः" (२।३।७०) इति भविष्यदकप्रयोगे 'कटं कारको व्रजति' इत्यादौ षष्ठीनिषेधविधानम्। तद्ध "अण् कर्मणि च" (३।३।१२) इत्यपवादविषये "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"

---

१ A om. तन्मते. २ A इति पक्षे कर्तव्यम्. ३ A मा भवानभूत्. ४ A पितपाशपेत्यादिवत्. ५ A om. यद्वा...धनक्रीतेति सिद्धम्।

(३।३।१०) इत्युत्सर्गप्रवृत्तावेव सार्थकम् । अन्यथा वासरूपविधेरभावाद् व्यर्थं स्यात् । नन्वेवं श्रीशः इत्यादावपि यणाद्यापत्तिः । मैवम् । क्वचिदित्युक्तेरिति प्राञ्चः । अत्र वदान्ति—इयं परिभाषा मन्दप्रयोजना । तस्येदमित्यणैवोक्तप्रयोजनयोः सिद्धेः । अत एव च " एरनेकाचः० " (६।४।८२) इत्यादीनां न वैयर्थ्यम् । यदप्यकेनोरिति ज्ञापकमुक्तं तदपि मन्दम् । वासरूपविधिनैव " अण् कर्मणि च " (३।३।१२) इत्यपवादविषये ण्वुलः सिद्धतया अपवादविषये उत्सर्गप्रवृत्तावपि अकेनोरिति षष्ठीनिषेधवैयर्थ्याभावात् । न च " ण्वुल्तृचौ " (३।१।१३३) इति सिद्धे पुनः " तुमुन्ण्वुलौ क्रियायाम्० " (३।३।१०) इति ण्वुल्विधानसामर्थ्याद्वासरूपविधिर्नेति वाच्यम् । भविष्यत्कालविषयविधानार्थतया ण्वुल उपक्षीणत्वात् । तथा च " अकेनोर्भविष्यदाधमर्ण्ययोः " (२।३।७०) इत्यत्र भविष्यदधिकारविहितण्वुलो ग्रहणाद्दशशतस्य पूरकः इत्यादौ षष्ठीनिषेधाभावः[2] सिध्यति । अभविष्यत्कालविहितण्वुलोपि तत्र ग्रहणमिति मुनित्रयोक्तिविरुद्धमिति यत्किंचिदेतदिति तन्न । तस्येदमित्यणा दाशरथायेति सिद्धावपि वृद्धाच्छस्यापवादतया काञ्चनीत्यस्यासिद्धेः । यदपि माधवाचार्यैः " प्राणिरजतादिभ्योञ् " (४।३।१५४) इति रजतत्वादत्रि काञ्चनमित्युक्तं तदपि न । रजतादौ तत्पाठ्यादर्शनात् । 'शार्वरस्य तमसो निषिद्धये' इत्यादिमहाकविप्रयोगाणां परिभाषाङ्गीकारमन्तरेण असिद्धेश्च । नापि ज्ञापकस्य मन्दता । " धातुसम्बन्धे प्रत्ययाः " (३।४।१) इति सूत्रबलात् " ण्वुल्तृचौ " (३।१।१३३) इत्यनेनैव ण्वुलः सिद्धतया तुमुन्ण्वुलोवैयर्थ्येन प्राचां ज्ञापकस्यानवद्यत्वात् इत्यवहितैर्विभावनीयम् ॥ ३३ ॥

इति द्वितीये तृतीयः पादः ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्[3] बाधते ॥ ३४ ॥

अनेकपदाश्रयसमासनिमित्ततया बहिरङ्गो ल्यप् एकपदविषयप्रकृतिप्रत्ययापेक्षतया अन्तरङ्गान् हित्वादिविधीन् बाधते । यथा प्रधाय । अत्र ल्यपा " दधातेर्हिः " (७।४।४२) इति हिरादेशो बाध्यते । एवं प्रखाय प्रखन्य इत्यत्र " जनसनखनां सञ्झलोः " (६।४।४२) इति आत्वं बाध्यते । तथा च " ये विभाषा " (६।४।४३) इति वैकल्पिकमेवात्वमित्यवधेयम् । अत्र ज्ञापकम् " अदो जग्धिर्ल्यप्ति किति " (२।४।३६) इत्यत्र तिकितीत्यतः पृथग् ल्यब्ग्रहणमिति द्वितीये सप्तमे च भाष्यकारः । उक्तं च—

" जग्धौ सिद्धेन्तरङ्गत्वात्ति किती ति ल्यबुच्यते ।
ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम् " इति ॥

---

१ A उत्सर्गाप्रवृत्तावपि. २ A निषेधाभावात् सिध्यति । ३ B लुप् बाधते ॥

ननु स्थानिवत्सूत्रे भाष्यकारेण अल्विधौ कार्येषु स्थानिवद्भावाभावस्य इदमेव ल्यब्ग्रहणं कथं ज्ञापकतयोपन्यस्तामिति चेत् अत्राह प्रदीपकारः—यमर्थमन्तरेण यस्यानुपपत्तिस्तस्य सर्वस्य ज्ञापकं तद्भवति इत्यनेकोऽप्यर्थो ल्यब्ग्रहणेन ज्ञाप्यत इति । यदा तु "ष्वत्तुकोरसिद्धः" (६।१।८६) इति सूत्रेण "असिद्धं बहिरङ्गमन्तरङ्गे" इति परिभाषाया अनित्यत्वं ज्ञाप्यते इति बृहद्विवरणोक्तरीतिराश्रीयते तदेयमपि तेनैव संगृहीतेति नास्यां ज्ञापकापेक्षेति ध्येयम् । एतेन 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' इत्यादि व्याख्यातम् ॥ ३४ ॥

समासश्च द्विपदाश्रयत्वाद्बहिरङ्गोपि ल्यपं बाधते ॥ ३५ ॥

यथा प्रकृत्य इत्यादि । अयं चार्थः "समासेऽनञ्पूर्वे क्त्वो ल्यप्" (७।१।३७) इत्यत्र समासस्य ल्यब्निमित्तत्वाभिधानादवसीयते । यदाहुः । यस्य तु विधेर्निमित्तमेव नासौ बाध्यते इति ॥ ३५ ॥

इति मदापाजिभट्टसूनुभास्करकृते परिभाषाभास्करे द्वितीयोऽध्यायः ॥

असति संभवे बाधनं भवति ॥ ३६ ॥

कार्ययोर्विरोधादसति समावेशे बलवता कार्येण इतरस्य बाधनं भवति । यथा रामेन्य इत्यादौ एत्वादिना दीर्घत्वादेरिति सिद्धार्थानुवादः ॥ ३६ ॥

अस्ति च संभवो यदुभयं स्यात् ॥ ३७ ॥

अत्र स्यादिति विधौ लिङ् । यत्रास्ति समावेशस्तदोभयमपि भवेदित्यर्थः । यत्तु प्राञ्चः–स्यादिति विभक्तिप्रतिरूपकमव्ययं भवतीत्यर्थः । एवं स्तः स्युरित्यपि भवतो भवन्तीत्यर्थे निपाताविल्याहुः । तन्न । मानाभावात् । अस्तिभवत्योरर्थविशेषाभावात् । शब्दानां नित्यत्वेपि बुद्धिविपरिणाममात्रस्य विधेयतया लिङर्थस्य विधेः सूपपादत्वात् । कार्यत्वे तु वर्णविधानस्यैव संभवादिति । उदाहरणं तथाजातीयः । अत्र स्वभावात् प्रकारवति विधीयमानेन जातीयरा प्रकारमात्रे विधीयमानस्याल् न बाध्यते । ज्ञापकं चात्र "नित्यं कौटिल्ये गतौ" (३।१।२३) इति नित्यग्रहणम् । तद्ध गत्यर्थेभ्यः कौटिल्य एव यङ् इति नियमार्थम् । यदि सत्यपि संभवे बाधः स्यात्तर्हि कौटिल्ययङा क्रियासमभिहारयङः सिद्धैव निवृत्तिरिति किं तेन । कुटिलं क्रामतीति वाक्यं स्थिष्यत एवेत्याहुः ॥ ३७ ॥

क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ॥ ३८ ॥

क्तादयोऽपवादा उत्सर्गान् नित्यं बाधन्ते न तु वासरूपविधिना विकल्पेन । क्तल्युटोर्यथा "नपुंसके भावे क्तः" (३।३।११४) इति क्तप्रत्ययो ल्युट्प्रत्ययश्च भावे घञं नित्यं बाधेते । तेन हसितं हसनं इति भवति, न तु हासमिति । ल्युट् करणघञमपि

---

१ A om. यदा तु...व्याख्यातम् । २ B यत्तु प्राञ्चः, A यत्तु प्राचा. ३ A om. विधेयतया लिङर्थस्य विधेः.

बाधते इत्यपि केचित् । तद् भाष्यादिविरोधादुपेक्ष्यम् । तुमुनि । “ समानकर्तृकेषु तुमुन् ” (३।३।१५८) इति तुमुन्[1] प्रत्ययः “ इच्छार्थेषु लिङ्लोटौ ” (३।३।१५७) इति लिङ्लोटौ नित्यं बाधते । तेन भोक्तुमिच्छतीत्येव भवति । खलर्थे । “ आतो युच् ” (३।३।१२८) इति युच्प्रत्ययः खलं नित्यं बाधते । तेन ईषत्पानः इत्येव भवति । इयं परिभाषा “ वाऽसरूपोऽस्त्रियाम् ” (३।१।९४) इति वाग्रहणस्य व्यवस्थितविभाषात्वाल्लभ्यत इति तु काशिका ॥ ३८ ॥

सांप्रतिकाभावे भूतपूर्वगतिः ॥ ३९ ॥

तेन कुरु इत्यत्र उदादेशः । तथा वृक्षैरित्यत्र परत्वादेत्वे कृतेऽप्यैस्त्वम् । तदुक्तं वार्तिके —

“ एत्वं भिसि परत्वाच्चेदत ऐस् क भविष्यति ।
कृतेऽप्येत्वे भौतपूर्व्यादैस् तु नित्यस्तथा सति ” इति ।

अस्यायमाशयः । पदादयः पृथगेव शब्दाः । न तु पादादीनामादेशाः । तेन पद्भिरित्यादौ भूतपूर्वगत्याश्रयणेऽप्यैस्त्वाभाव उपपन्नः इति केचित् । वस्तुतस्तु द्विपाद्भिः इत्यादौ भूतपूर्वगत्याश्रयणे ऐस्त्वमापद्यत एवेत्यभिप्रेत्य । ननु नाप्राप्ते एत्वे ऐसारभ्यमाणस्तस्यापवादो युक्तः उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः । एवं तर्हि पूर्वपक्षवादिनोत्सर्गापवादमनाश्रित्य चोदितमिति तदनुसारेणैव सिद्धान्ती परिहरति इति ग्रन्थेन कैयटो ‘ न विप्रतिषेधे सिद्धान्तितात्पर्यमस्ति ’ इति प्राह । तथा आञ्छि आयामे अस्माल्लिटि द्विर्वचने अभ्यासह्रस्वे च कृते भूतपूर्वगत्या अकारस्य द्विमात्रत्वात् “ अत आदेः ” (७।४।७०) इत्यस्याप्रवृत्तेः “ तस्मान्नुड् द्विहलः ” (७।४।७१) इत्यस्याप्रवृत्तौ ‘ आञ्छ, ’ ‘ आञ्छतुः ’ इत्यादि सिद्धम् इति काश्चित् । सांप्रतिकाभाव इति किम् । हे गौः । अत्र “ एङ्ह्रस्वात्० ” (६।१।६९) इति न संबुद्धिलोपः । हे हरे, हे भानो इत्यादौ सांप्रतिकस्य एङो विद्यमानत्वात् । इयं परिभाषा “ अचो यत् ” (३।१।९१) इति अज्ग्रहणादवसीयते । असत्यां ह्यस्यां “ ऋहलोर्ण्यत् ” (३।१।१२४) इति हलन्तेभ्यो ण्यतो विधानात् परिशेषादजन्तेभ्य एव यता भाव्यमिति अज्ग्रहणं व्यर्थं स्यात् । सत्यां तु दित्स्यं धित्स्यं इत्यादावतो लोपे कृतेऽपि यत्प्रत्ययं प्रवर्तयितुमावश्यकमिति केचित् । “ अत उत्सार्वधातुके ” (६।४।११०) इत्यत्र सार्वधातुकग्रहणमूह्यमित्यन्ये ॥ ३९ ॥

नानुबन्धकृतमसारूप्यम् ॥ ४० ॥

तेन गोदः इति कविषये अण् न । ज्ञापकमत्र “ ददातिदधात्योर्विभाषा ” (३।१।१३९) इति णस्य विषये विकल्पेन शकारविधानम् । अन्यथा वासरूपन्यायेन पक्षयोः सिद्धौ तद् व्यर्थं स्यात् ॥ ४० ॥

इति तृतीये प्रथमः पादः ॥

---

१ B om. इति तुमुन्.

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ॥ ४१ ॥

लक्ष्यत इति लक्षणम् अनुमेयम् । प्रतिपदोक्तं प्रत्यक्षम् । एतेन लक्षणं लाक्षणिकसुच्चारादिति व्याख्यानं चिन्त्यम् । उदाहरणम् ! अध्याप्य गतः । अत्र “ क्रीङ्जीनां णौ ” (६।१।४८) इति इङो णौ आत्वे पुकि च कृते आपोनुमेयरूपत्वात् “ विभाषापः ” (६।४।५७) इति नाप् । परिभाषायां ज्ञापकं तु “ कर्तरि भुवः खिष्णुच्खुकञौ ” (३।२।५७) इत्यत्र खिष्णुच इकारादित्वम् । अन्यथा हि इडागमेनैव तत्सिद्धौ व्यर्थं स्यात् । सत्यां त्वस्यां “कृत्योकेष्णुच्चार्वादयश्च” (६।२।१६०) इत्यत्रास्य लाक्षणिकत्वादग्रहणं मा भूदिति तत्सार्थकमित्याहुः । वस्तुतः प्रत्यक्षानुमानयोः प्रत्यक्षं बलीयः इति न्यायासिद्धैवेयं परिभाषा । कैयटोपि इत्थमेव “ विभाषापः ” (६।४।५७) इत्यादौ व्याचकार । अध्यापयतीत्यत्र लाक्षणिकाकारस्य पुक् कथमिति चेत्, एतत्परिभाषाया अनित्यत्वात् “ यावत्पुरानिपातयोर्लट् ” (३।३।४) इत्यत्र निपातग्रहणात् ॥४१॥

एकदेशविकृतमनन्यवत् ॥ ४२ ॥

तेन अभवत् इत्यत्रेकारलोपे तिङाश्रितं सार्वधातुकत्वम् । तथा ‘ सुधो–’ शब्दस्य भाषितपुंस्कस्य “ ह्रस्वो नपुंसके० ” (१।२।४७) इति ह्रस्वोपि पुंवद्भाव इति रूपमालायाम् । धातुवृत्तौ माधवाचार्यास्तु पुंवद्भावं नेच्छन्ति । तथा निर्जरशब्दे “ जराया जरसन्यतरस्याम् ” (७।२।१०१) इति जरस् । ज्ञापकमत्र आढ्यादिसूत्रे (३।२।५६) ‘ अच्वौ ’ इति पर्युदासः । स्थानिवत्सूत्रे (१।१।५६) भाष्यकारस्तु अस्या न्यायसिद्धतामाह । तद्यथा । श्वा कर्णे पुच्छे वा छिन्ने श्वैव भवति नाश्वो न गर्दभ इति ॥ ४२ ॥

क्वचिद्विकृतिरपि प्रकृतिं गृह्णाति ॥ ४३ ॥

तेन “ निसमुपविभ्यो ह्वः ” (१।३।३०) इति ह्वाधातोरुच्यमानमात्मनेपदं तत्प्रकृतिभूताद् ह्वेञो भवति निह्वयते इति, इति केचित् । तत्र एकेतराया एव प्रकृतेः सत्त्वात्, विकृतेस्तत्त्वेन संभवात् । एतेन एतत्परिभाषायां “ न व्यो लिटि ” (६।१।४६) इति ज्ञापकोक्तिरपास्ता । यद्यपि “ दाधा घ्वदाप् ” (१।१।२०) इत्यत्र दाधाग्रहणे देङ्धेटोर्ग्रहणमिति प्रयोजनं सीरदेवेनोक्तं तदपि न । आद्यस्य गामादाग्रहणपरिभाषयैव ग्रहणसंभवात् । लाक्षणिकत्वाद् ग्रहणं न स्यादिति चेन्न । “ ह्वावामश्च ” (३।२।२) इत्यत्र लक्षणप्रतिपदोक्तपरिभाषां बाधित्वा गामादाग्रहणपरिभाषया मेङोपि ग्रहणं भवतीति स्वग्रन्थविरोधापत्तेः । को हि मेङ्देङोर्विरोधः । उक्तं च भाष्यादावपि । लक्षणपरिभाषायाः गामादाग्रहणेष्वविशेषः इत्यपवादोस्तीति । द्वितीयस्य त्वदाबिति प्रतिषेधसामर्थ्येनैव ग्रहणस्य स्वयमेवान्यत्रोपपादितत्वात् । तथाहि । दा धा घ्वपिदिति कर्तव्ये अदाप् इति पर्युदासकृतं तल्लक्षणपरिभाषाया अभावे हेतुरिति तत एव धेटो ग्रहणं सिद्धमिति “ दो दद् घोः ” (७।४।४६) इत्यत्र धेट्निवृत्त्यर्थेन द इत्यनेन धेटो घुसंज्ञाया ज्ञापितत्वाच्च । तस्मादियं परिभाषा मन्दप्रयोजनैवेति कृतबुद्धयो विदांकुर्वन्तु ॥ ४३ ॥

---

१ A. एकातरायां एव प्रकृतेः सत्त्वात्. २ A. न्यासादावपि । ३ A. om. दो दद्घोरित्यत्र....ज्ञापितत्वाच्च ।

बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ४४ ॥

गुणो विशेषणं लम्बकर्णादि । स[1] गुणो यत्रास्ति स तद्गुणः विशेषणविशिष्टः तस्य शास्त्रे संविज्ञानं भवति । यथा लोके 'लम्बकर्णमानय' इत्यत्र आढ्यादि-(३।२।५६) सूत्रे 'च्व्यर्थेषु' इत्युक्त्वा 'अच्वौ' इति वचनाज्ज्ञापकात् । अपिशब्दादतद्गुणसंविज्ञानम् । यथा लोके 'चित्रगुमानय' इत्यत्र 'आम्प्रत्ययवत्' इत्यादेशात् । उदाहरणे- "यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्" (१।३।१३) इत्यत्र तदादीति । "जक्षित्यादयः षट्" (६।१।६) इति ॥ ४४ ॥

ताच्छीलिकेषु वासरूपविधिर्नास्ति ॥ ४५ ॥

'ताच्छीलिकेषु' इति विषयसप्तमी । तेन ताच्छीलिकानामताच्छीलिकैस्ताच्छीलिकैश्च वासरूपविधिर्न । तत्राद्यं यथा । "अलंकृञ्०" (३।२।१३६) इति सूत्रे ष्णुचि अलंकरिष्णुरिति भवति । न तु वासरूपन्यायेन अलंकारकः इति । "निन्दाहिंस०" (३।२।१४६) इत्यादिसूत्रेण वुञो विधानाज्ज्ञापकात् । अन्यथा वासरूपविधिना ण्वुलि निन्दक इत्यादिसिद्धौ वुञ्विधानमनर्थकं स्यात् । द्वितीयं यथा । अलंपूर्वात् करोतेस्तृन्न भवति किं तु इष्णुजेव अलंकरिष्णुरिति । "अनुदात्तेतश्च०" (३।२।१४९) इति युचि सिद्धे पुनः "जुचङ्क्रम्य०" (३।२।१५०) इत्यादिना पदेर्युज्विधानात् । न च "लषपतपदस्था०" (३।२।१५४) इति उकञा बाधे प्राप्ते पक्षे अनेन युच् प्रतिप्रसूयत इति वाच्यम् । वासरूपन्यायेन तत्सिद्धेः । अनित्या चेयम् । "सूददीपदीक्षश्च" (३।२।१५३) इति दीपो युच्प्रतिषेधात् । अन्यथा "नमिकम्पि०" (३।२।१६७) इति विशेषविहितरप्रत्ययेन युजनिवृत्तिसिद्धौ किं तेन । तथा च कम्रा कमनेत्यादि सिद्धम् ॥ ४५ ॥

इति तृतीये द्वितीयः पादः ॥

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥ ४६ ॥

पूर्वमुक्ता अपवादाः समीपपठितान् विधीन् बाधन्ते न दूरस्थान् । तेन "ह्वावामश्च" (३।२।२) इत्यपवादेन "आतोऽनुपसर्गे कः" (३।२।३) इत्यस्य बाधेऽपि दूरस्थताच्छील्यणिनेः (३।२।७८) न बाधः । तथा च 'आह्वायी' इति सिद्धम् । तेन[2] "आद्यन्तौ टकितौ" (१।१।२१) इत्यपवादेन "षष्ठी स्थानेयोगा" (१।१।४९) इत्यस्य बाधेऽपि "प्रत्ययः, परश्च" (३।१।१-२) इत्यस्याबाधात् "चरेष्टः" (३।२।१६) इत्यादयः पर एव भवन्ति । यत्तु[3] "इको झल्" (१।२।९)

[1] B. तस्य गुणस्य बहुव्रीहौ संविज्ञानं भवति for स गुणो यत्रास्ति....संविज्ञानं भवति ।
[2] A. om. तेन आद्यन्तौ टकितौ....पर एव भवन्ति । [3] A. om. यत्तु इको झल्..."न श्रद्धेयम् ।

इत्यत्र कौस्तुभ उक्तं ' उभयापवादतासंभावनायामेवेयं परिभाषावतरति ' इति तत् " कर्मण्यण् " (३।२।१) इत्यादिसूत्रगतभाष्यकैयटादिग्रन्थविसंवादात्स्वग्रन्थविसंवादाच्च न श्रद्धेयम् । ज्ञापकमत्र " परिमाणाख्यायां सर्वेभ्यः " (३।३।२०) इत्यत्र सर्वग्रहणम् । तद्धि पुरस्तादपवादन्यायेन " एरच् " (३।३।५६) इत्यस्यैव बाधो मा भूत् किं तु ' द्वौ कारौ, ' ' त्रयः काराः ' इत्यादौ " ऋदोरप् " (३।३।५७) इत्यस्यापि बाधो यथा स्यादित्येवमर्थम् ॥ ४६ ॥

इति तृतीये तृतीयः पादः ॥

नानुबन्धकृतमनेजन्तत्वम् ॥ ४७ ॥

तेन " दाधा घ्वदाप् " (१।१।२०) इत्यत्र ' अदाप् ' इति दैपोपि प्रतिषेधात् ' अवदातं मुखम् ' इति सिद्धम् । भाष्यकारस्त्वाह– ' अथ दाग्रेयायं न दैवस्ति ' इति दिवादौ दाप् शोधने इति पाठ्यमिति तदाशयः। अत्र ज्ञापकमपि स एवाह "उदीचां माङो व्यतीहारे" (३।४।१९) इति सानुबन्धकस्य आत्वभूतस्य मेङो ग्रहणमिति ॥४७॥

चानुकृष्टं नेतरत्र ॥ ४८ ॥

तेन " उरत् " (७।४।६६) इति सूत्रे चानुकृष्टं छन्दोग्रहणं नानुवर्तते । स्वरितत्वादनुवृत्तौ सिद्धायां पुनश्चकारानुकर्षणस्थल एवायं प्रवर्तत इति केचित् । मैत्रेयस्तु नियमत्वेन प्रवृत्तिमाह । ज्ञापकमत्र " अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् " इत्यत्र न, " अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ " (३।४।५९) इत्यत्र णमुलधिकारे पुनर्णमुल्वचनम । अन्यथा हि क्त्वा च इत्येवावक्ष्यत् । अनित्या चेयम् । " एकाजुत्तरपदे णः " (८।४।१२) इत्यत्र विकल्पाधिकारस्पष्टीकरणार्थत् पुनर्णग्रहणात् ॥ ४८ ॥

इति भास्करकृते परिभाषाभास्करे तृतीयोध्यायः ॥

मध्येपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ ४९ ॥

यथा " कृञो हेतुताच्छील्यानुलोम्येषु " (३।२।२०) इति पूर्वमणं बाधते । यद्यपि ' यूनः ' इत्यादौ परेण " श्वयुवमघोनामतद्धिते " (६।४।१३३) इत्यनेन प्राप्तस्य संप्रसारणस्य " न संप्रसारणे संप्रसारणम् " (६।१।३७) इति पूर्वसूत्रेण बाधो न युज्यते तथापि संप्रसारणानुवृत्तौ सत्यां पुनः संप्रसारणग्रहणं कुर्वता सूत्रकारेणैतत्परिभाषानुपस्थितिज्ञापनान्न दोषः । ज्ञापकमस्याः "बहुव्रीहेरूधसो ङीष्" (४।१।२५) इत्यत्र स्वरितत्वप्रतिज्ञानं निर्बन्धकृतम[1] । तथाहि । " अन उपधालोपिनोन्यतरस्याम् " (४।१।२८) इत्यत्र स्वरितत्वप्रतिज्ञानान्ङीबनुवर्तते । तेन घटोघ्नीत्यत्र परत्वात् प्राप्तं

---

१ B. निबन्धकृताम्.

ङीपं बाधित्वा " बहुव्रीहेः० " (४।१।२५) इति ङीषेव भवति । तत्र यद्ययं परिभाषा न स्यात्तदायं ङीष् मध्येऽपवादत्वेन पूर्वयोरेव ङीप्प्रतिषेधयोर्बाधको न भविष्यतीति ङीपि स्वरितत्वप्रतिज्ञानं व्यर्थं स्यादिति ॥ ४९ ॥

अनन्तरस्य विधिर्वा प्रतिषेधो वा ॥ ५० ॥

आद्यो यथा । वा छन्दसीत्यनेन सेह्यपिच्चेत्यनन्तरमपित्त्वं विकल्प्यते । न तु व्यवहितो हिरादेशः । युयुहि युयोहि । अन्त्यो यथा । "नेटि" (७।२।४) इति निषेधो " वदव्रजहलन्तस्याचः " (७।२।३) इत्यस्यैव न तु " सिचि वृद्धेः " (७।२।१)। क्वचित्तु योगविभागसामर्थ्यादियं बाध्यते । यथा " हन्तेरत्पूर्वस्य " (८।४।२२) इत्यत्र। अत्र ' अत्पूर्वस्य ' इति योगविभागाण्णत्वमात्रं निवर्त्यते । न च " वमोर्वा " (८।४।२३) इत्युत्तरसूत्रे वृत्तिकारादिभिरुपसर्गग्रहणस्य ' प्रातर्हन्वः ' इत्यादौ णत्ववारणायानुवर्तनादिहापि सूत्रे तत्संबन्धस्यावश्यकतयोपसर्गघटितनियमात् ' प्रघ्नः ' इत्यादौ णत्ववारणेपि ' वृत्रघ्नः ' इत्यादौ वृत्रस्यानुपसर्गत्वान्न णत्वनिवृत्तिरिति वाच्यम् । उपसर्गस्य मण्डूकप्लुतिन्यायेन वमोर्वेत्यत्रानुवर्तनेपि अत्पूर्वस्येत्यत्रासंबन्धात् । न हि " खरवसानयोः० " (८।३।१५) इत्यतो " विसर्जनीयस्य सः " (८।३।३४) इत्यत्रानुवृत्तं खर्ग्रहणं " मय उञो वो वा " (८।३।३३) इति पूर्वसूत्रे संबध्यते । ' बहुवृत्रह्नाणि ' इत्यत्र तु णत्वं भवत्येव। ' नार्कुटः ' इत्यत्र विसर्गे कर्तव्ये वृद्धेरिव णत्वे कर्तव्ये दीर्घस्यासिद्धत्वेन अत्पूर्वत्वात्। एतेन " कुव्यवाये हादेशेषु प्रतिषेधो वक्तव्यः " (८।४।२ वा. ४) इति वार्तिकं व्याख्यातम् । यद्यपि भाष्ये वार्तिकमादाय ' अत्पूर्वस्य ' इति न कर्तव्यमित्युक्तं तथापि तत् वार्तिकाशयवर्णनमात्रं न तु वस्तुस्थितिः । सूत्रेण हि वार्तिकार्थोपसंग्रहो युक्तः । यदुक्तम्—

' सूत्रेष्वेव हि तत्सर्वं यद् वृत्तौ यच्च वार्तिके '

इति । एतेन वार्तिकमनादृत्य ' अत्पूर्वस्य ' इति प्रत्याचक्षाणा निरस्ताः । तस्माद्योगविभागसामर्थ्यादियं परिभाषा बाध्यते । एवं च " शर्परे विसर्जनीयः " (८।३।३५) इत्यत्र ' शर्परे न ' इत्येव वक्तुं शक्यम् । यत्तु मनोरमायामुक्तं " यदि तु ' शर्परे न ' इत्येवोच्येत तर्हि प्रकृते सत्वे निषिद्धेपि कुप्वो ≍क≍ पौ स्याताम् । वासः क्षौमम्, अद्भिः प्सातम् इति विसर्जनीयवचनात्तु विकारमात्रं बाध्यते इति तदयुक्तम् । योगविभागसामर्थ्येनैवानन्तरस्येत्यादि बाधित्वा विकारमात्रस्य बाधसंभवात् । अन्यथा हि ' विसर्जनीयस्य सोऽशर्परे ' इत्येवावक्ष्यदिति । यदपि कश्चिदाह— एकसूत्रं कृत्वा विसर्जनीयग्रहणमेव कर्तव्यं न तु योगविभागो गौरवादिति । तदपि न । योगविभागादक्षराधिक्यस्यैव गरीयस्त्वात् । कथमन्यथा योगविभागमाश्रित्य वार्तिकादिप्रत्याख्यानं भाष्योक्तं संगच्छेत । अत एव " तृज्वत् क्रोष्टुः " (७।१।९५) इत्यत्र ' एवं तर्हि द्विक्रोष्टुग्रहणं योगविभागाल्लघु ' इति कैयटोक्तं चिन्त्यमिति वदन्ति । अथ परिभाषायां ज्ञापकम् । तत्रार्थे

१ A. वमोर्वेत्यनुवर्तनेपि. २ B. अत्पूर्वात् । ३ A. om. बहुवृत्रह्नाणि......अत्पूर्वत्वात् । ४ B. om. शर्परे न इत्येव वक्तुं शक्यम् । ५ B. om. यदपि कश्चिदाह...... चिन्त्यमिति वदन्ति ।

…लाव्ययादेर्ङीप् " (४।१।२६) इति ङीब्वचनम् । तद्धि ङीषा व्यवहितो ङीप् …पुनः क्रियते । अन्यथा तु " न क्तिचि दीर्घश्च " इति दीर्घग्रहणम् । तदपि हि … परिभाषया " अनुदात्तोपदेश० " (६।४।३७) इत्यस्यैव प्रतिषेधः स्यान्न व्यव… " अनुनासिकस्य क्विझलोःक्ङिति " (६।४।१५) इत्यस्यैवमर्थं क्रियते ॥ ५० ॥

अकृतव्यूहाः पाणिनीयाः ॥ ५१ ॥

विशिष्ट ऊहो व्यूहो निश्चयः । न कृतो व्यूहो यैस्ते अकृतव्यूहाः । निमित्त …न्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्ति इत्यर्थः । यथा निपेदुषी । अत्र वलाद्यार्ध… …के नङ्क्ष्यति इत्यालोच्य इडागमं न कुर्वन्ति । यद्यप्येतत्फलकमेव 'कृतमपि वा …यन्ति' इति परिभाषान्तरं पठ्यते तथापि तद् गुरु । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं … इति न्यायात् । ज्ञापकमत्र 'समर्थानां प्रथमाद्वा' (४।१।८२) इत्यत्र समर्थ… …द । एवं च " शश्छोटि " (८।४।६३) इत्यत्र तदो " वावसाने " (८।४।५६) … चर्त्वे कृते पश्चात् शिवशब्देन संबन्धे जश्त्वे चर्त्वे च तच्छिव इति इति प्रसाद… …ऽसंगतः। भाविन्यवसानभङ्गे तन्निमित्तकचर्त्वाप्रवृत्तेः । अत एव " उपदेशेजनुनासिक …" (१।३।२) इत्यत्र दाधि ब्राह्मणकुलम् इति न्यासकारोक्तमुपदेशपदप्रत्युदाहरणं …देशिकप्रायोगिकयोः० इत्यादिपरिभाषायां दूषयिष्यामः ॥ ५१ ॥

इति चतुर्थे प्रथमः पादः ॥

निरनुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम् ॥ ५२ ॥

तेन " पूरणगुण० " (२।२।११) इत्यादिसूत्रे तव्यस्यैव ग्रहणं न तव्यतः । …" दिव औत् " (७।१।८४) इत्यनेन दिवुधातोर्नौत्वम्, तेन अक्षद्यूरिति सिद्धम् …ग्रहणं तदन्यथापि सिद्धम् । तथा च वार्तिकम्—" अधात्वधिकारात् सिद्धम् " (७।१।८४ वा. २) इति ॥ ५२ ॥

एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ॥ ५३ ॥

तेन " यतोऽनावः " (६।१।२१३) इत्यत्र यत एव ग्रहणं न ण्यतः । अत्र पूर्वत्र …ज्ञापकम्—" वामदेवाड्ड्यड्ड्यौ " (४।२।९) इति ड्यड्ड्ययोर्डित्वम् । तदुक्तं भाष्ये—

" सिद्धे यस्येतिलोपेन किमर्थं ययतौ डितौ ।

ग्रहणं मा तदर्थे भूद्वामदेव्यस्य नञ्स्वरे " इति ।

अस्यार्थ :— यस्येतिलोपेन सिद्धे ड्यड्ड्ययोर्डित्वे " ययतोश्च० " (६।२।१५६) … सूत्रेण विधीयमानं नञ उत्तरस्य ययदन्तस्य अन्तोदात्तत्वमवामदेव्यशब्दस्य मा …, किं तु अव्ययपूर्वपदस्वर एव यथा स्यात् इत्येवमर्थं क्रियते । तत्र यद्येते परि… …न स्यातां तर्हि कृतेपि डित्त्वे अवामदेव्यशब्दे ययतोरिति स्यादेव इति डित्वमनर्थकं …द । अतो डित्वमनयोरास्तित्वं ज्ञापयतीति ॥ ५३ ॥

---

[1] B. अवामदेव्यशब्दे मा भूत् ।

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ ५७ ॥

तेन " नडादिभ्यः फक् " (४।१।९९) नाडायनः इत्यत्रैव भवति, न तु सौत्रनाडिरित्यत्र । एषा परिभाषा प्रत्ययविधिविषयेत्येके । प्रत्ययविधौ ज्ञापितत्वात् । तच्च ज्ञापकमुत्तरपरिभाषायां स्फुटीकरिष्यते । तथा च तन्मते समासप्रत्ययविधौ प्रतिषेधः इति प्रत्ययग्रहणेनेयं गतार्थेति वदन्ति ॥ ५७ ॥

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ५८ ॥

विशिष्टोपदेशो व्यपदेशः मुख्यव्यवहारः । सोऽस्यास्तीति व्यपदेशी मुख्यव्यवहारवान् । तेन तुल्यं व्यपदेशिवत् । तस्य भावोऽप्रातिपदिकेन स्यात् । तेन " क्रतूक्थादिसूत्रान्ताट्ठक् " (४।२।६०) इति सूत्रान्ताद्विधीयमानष्ठक् संग्रहसूत्रमधीते सांग्रहसूत्रिकः इत्यत्रैव भवति, न तु सूत्रमधीतेऽसौ सौत्र इत्यत्र । अत्र पूर्वत्र च ज्ञापकं " पूर्वादिनिः " (५।२।८६) इत्यस्यानन्तरं " सपूर्वाच्च " (५।२।८७) इति सूत्रकरणम् । अन्यथा हि पूर्वशब्देन प्रातिपदिके विशेषिते सति तदन्तविधिना पूर्वाद् व्यपदेशिवद्भावेन च केवलात्सिद्ध ऐवेनिरिति तद् व्यर्थं स्यात् ॥ ५८ ॥

समासप्रत्ययविधौ प्रतिषेध उगिद्वर्णग्रहणवर्जम् ॥ ५९ ॥

समासविधौ कृष्णं परमश्रितः । अत्र " द्वितीया श्रित० " (२।१।२४) (२।१।२४) इत्यादिना श्रितादीनां सुबन्तविशेषणत्वेपि तदन्तविध्यभावान्न समासः । प्रत्ययविधौ सौत्रनाडिरित्यत्र न फक् । उगिद्वर्णग्रहणयोस्तु तदन्तविधिरस्त्येव । तेन अतिभवती दाक्षिरित्यादौ " उगितश्च " (४।१।६) " अत इञ् " (४।१।९५) इति सूत्राभ्यां ङीविञौ सिद्धौ । " येन विधिः " (१।१।७२) इति सूत्रे वार्तिकरूपेणेयं पठ्यते । अत्रेदं बोध्यम् । ग्रहणवतेत्यादिपरिभाषात्रयं मास्तु । उदाहरणानामन्यथा सिद्धत्वात् । आद्यन्त्ययोर्विशेषणविशेष्यभावे कामचारात् । मध्यमायां " सूत्रान्ताट्ठक् " (४।२।६०) इत्यन्तग्रहणादित्याकरे स्पष्टम् ॥ ५९ ॥

इति पञ्चमे द्वितीयः पादः ॥

स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ ६० ॥

तेन कुटीर इत्यत्र प्रकृतेः स्त्रीलिङ्गत्वेपि प्रत्ययान्तस्य पुंलिङ्गता । पचन्तिरूपमित्यत्र वचनातिक्रमः । ज्ञापकं चात्र " णचः स्त्रियामञ् " (५।४।१४) इत्यत्र स्त्रियांग्रहणम् । अन्यथा ' कर्मव्यतिहारे णच् स्त्रियाम् " (३।३।४३) इति स्त्रियामेव णच् विहितः इति किं तेन । तस्य च ज्ञापकस्य सामान्यापेक्षतया वचनातिक्रमविषयतापि बोध्या ॥ ६० ॥

इति पञ्चमे चतुर्थः पादः पञ्चमाध्यायश्च ॥

---

१ A. इति सूत्रान्तरं द्वितीयं मानष्ठकं. २ A. पूर्वादिनि रित्यस्य नितरां सपूर्वाच. ३ A. एवेतिरिति. B. एवैतिरिति. ४ B. कष्टं परमाश्रितः. ५ A. अतिभवन्ती. ६ A. आद्यन्तयोः. ७ A. पचतिरूप.

संप्रसारणं संप्रसारणाश्रयं च कार्यं बलीयो भवति ॥ ६१ ॥

तेन जुहुवतुः इत्यत्राकारलोपं बाधित्वा संप्रसारणपूर्वरूपत्वे एव भवतः । तेनोबलादेशासिद्धिः । अन्यथा " आतो लोप इटि च " (६।४।६४) इत्यालोपे कृते तस्यासिद्धत्वात् स न स्यात् । इयं च परिभाषा "लिट्यभ्यासस्योभयेषाम्" (६।१।१७) इत्यत्र उभयेषांग्रहणेन भाष्ये ज्ञापिता । उभयेषामित्यनेन हि वव्रश्च इत्यादौ हलादिशेष इति निर्वर्त्यते[1] । न्यासे तु " सहिवहोरोदवर्णस्य " (६।३।११२) इति सूत्रगतावर्णग्रहणं ज्ञापकमुक्तम् । तद्धि ऊढवान् इत्यत्र संप्रसारणपूर्वरूपयोः कृतयोरोत्वं मा भूदित्येवमर्थम् । तत्र यदीयं न स्यात्[2] तदा व्यावर्त्याभावात्तद् व्यर्थं स्यात् ॥ ६१ ॥

उभयत आश्रये नान्तादिवत् ॥ ६२ ॥

तेन ' रामम् ' इत्यत्र " सुपि च " (७।३।१०२) इति दीर्घो न । पूर्वान्तवद्भावेनाकारान्ताङ्गत्वं परादिवद्भावेन मकारस्य सुप्त्वमित्युभयत आश्रयणात् । इयं च परिभाषा भाष्ये " अन्तादिवच्च " (६।१।८५) इत्यत्र पठिता । अत्र मूलं लौकिको न्यायः । यथा उभयोस्तुल्यबलयोरेकः प्रेष्योऽविरोधार्थादुभयोरपि कार्ये न प्रवर्तते ॥ ६२ ॥

वर्णाश्रये विधौ नान्तादिवत् ॥ ६३ ॥

तेन खट्वाभिः इत्यत्र पूर्वान्तवद्भावात् " अतो भिस ऐस् " (७।१।९) इति न भवति । अत्र ज्ञापकं " षत्वतुकोरसिद्धः " (६।१।८६) इति तुग्विधावसिद्धवचनम् । यदि ह्येषा न स्यात्तदा ' अधीत्य ' इत्यत्र परादित्वात्तुक् सिद्ध एवेति तद् व्यर्थं स्यात् इति प्रदीप उक्तम् । भाष्यकारस्तु " अन्तादिवच्च " (६।१।८५) इत्यत्रेमां पपाठ ॥ ६३ ॥

इति षष्ठे प्रथमः पादः ॥

कृद्ग्रहणे गतिकारकपूर्वपदस्यापि ग्रहणम् ॥ ६४ ॥

अत्राह सीरदेवः । इयं प्रत्ययग्रहणपरिभाषाया अपवादः इति । तच्चिन्त्यम् । येननाप्राप्तिन्यायविषयत्वेनापवादत्वायोगात् । व्यावलेखि व्यावचार्चि इत्यादौ कृद्ग्रहणपरिभाषोदाहरणे स्त्रीप्रत्यये चानुपसर्जने न इति प्रत्ययग्रहणपरिभाषाया अप्रवृत्तेः । अत एव " समासेऽनञ्पूर्वे क्त्वो ल्यप् " (७।१।३७) इति सूत्रगतः प्रत्ययग्रहणकृद्ग्रहणपरिभाषयोः सावकाशत्वप्रतिपादको द्वयोः परिभाषयोः सावकाशयोरित्यादिभाष्यग्रन्थः संगच्छते । नन्वेवं सांकूटिनमित्यादौ प्रत्ययग्रहणपरिभाषा कुतो नेति चेत्, उच्यते । प्रत्ययग्रहणपरिभाषा अङ्गसंज्ञासूत्रे (१।४।१३) ज्ञापिता, कृद्ग्रहणपरिभाषा तु "गतिरनन्तरः"

---

१ A. निवर्तते. २ A. यदीयं च स्यात्.

(६।२।४९) इत्यत्र । तथा च यथोद्देशपक्षे परत्वात् कृद्ग्रहणपरिभाषया प्रत्ययग्रहणपरिभाषा बाध्यते इति । उदाहरणं नखनिर्भिन्नः । " कर्तृकरणे कृता बहुलम् " (२।३।३२) इति समासः । तथा ' उदकेविशीर्णं तवैतत्, ' अवतप्तेनकुलस्थितं तवैतत् । अत्र " क्षेपे " (२।१।४७) इति समासः । [1]परिभाषाया ज्ञापकं " गतिरनन्तरः " (६।२।४९) इत्यनन्तरग्रहणमिति भाष्यकारः । तथाहि । गतिरनन्तरः इत्यनेन क्[2]तान्तेऽव्यवहितस्य गतेः प्रकृतिस्वरो विधीयते पुरोहितमिति । न तु अभ्युद्धृतमिति व्यवहितस्य । अ[3]त्र यदीयं परिभाषा न स्यात्तदा प्रत्ययग्रहणपरिभाषया व्यवहितस्य न स्यादेवेत्यनन्तरग्रहणं व्यर्थं स्यादिति । परिभाषायामपिशब्देन प्रत्ययग्रहणपरिभाषा समुच्चीयते इति कैयटः ॥ ६४ ॥

समासान्ताविधिरनित्यः ॥ ६५ ॥

तेन " धृतधनुषमह्याय " इत्यत्र " धनुषश्च (५।४।१३२) इत्यङ् न भवति । यत्तु " अश्वपत्यादिभ्यश्च " (४।१।८४) इति सूत्रे दीव्यतः प्राक् प्राग्दीव्यत् इति विग्रहं कुर्वतां प्राचां समासान्तविधेरनित्यत्वान्न " झयः " (५।४।१११) इति टच् इत्याहुस्तन्न । " नपुंसकादन्यतरस्याम् " (५।४।१०९) इत्यतो झयः इत्यत्र अन्यतरस्यांग्रहणानुवृत्तेष्टचो वैकल्पिकत्वेनैव तद्विग्रहोपपत्तेः । एतेन प्राग्दीव्यतमिति तूचितमिति मनोरमोक्तं चि[4]न्त्यम् । [5]न च प्राग्दीव्यतीयशब्दे " अव्ययानां भमात्रे टिलोपः " इति टिलोपापत्तेः प्राचां विग्रहेऽनौचित्यं शङ्क्यम् । अव्ययीभावस्याव्ययत्वे लुङ्मुखस्वरोपचाराः इति परिगणनाट्टिलोपे कर्तव्ये अव्ययीभावस्यानव्ययत्वादेव तदप्रवृत्तेः सुवचत्वात् । भाष्योक्तोक्तपरिगणनप्रत्याख्यानपक्षेपि परिगणितोक्तलुगादिप्रयोजनत्रयातिरिक्तस्थले अव्ययीभावानव्ययत्वस्य निर्विवादत्वात् । यदपि " येन विधिः० " (१।१।७२) इति सूत्रे परमसखायौ इति भाष्योदाहरणं तत्पुरुषत्वं टच् तु प्रकृतपरिभाषया नेति तदपि न । बहुव्रीहिणैव तत्प्रयोगोपपत्तेः कैयटादिभिरुक्तत्वादिति दिक् । अत्र ज्ञापकं भाष्ये " द्वित्रिभ्यां पादन्मूर्धसु " (६।२।१९७) इति मूर्धशब्दे समासान्ताकरणमित्युक्तम । ज्ञापकान्तरमपि ग्रन्थान्तरादवगन्तव्यम् ॥ ६५ ॥

इति षष्ठे द्वितीयः पादः ॥

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ६६ ॥

संश्लेषलक्षणो विधिस्तद्विघातस्यानिमित्तं भवति । य[6]त्संबन्धेन जातस्तस्य न विघातक इति यावत् । तेन शतानि सहस्राणीत्यत्र विभक्तिसंनिपातनिमित्तो नुम् न तद्विघातकः । अन्यथा " ष्णान्ता षट् " (१।१।२४) इति षट्संज्ञायां लुक् स्यात् ।

१ B. परिभाषायां ज्ञापकं. २ A. कृतेऽव्यवहितस्य. ३ B. तत्र यदीयं परिभाषा ४ A. चिन्त्यमिति वदन्ति । ५ A. om. न च प्राग्दीव्यतीयशब्दे........इति दिक् । ६ B. यत्संबन्धे जातस्तस्य.

तथा ' श्रीपम् ' इत्यत्र पातेः क्विपि नपुंसकह्रस्वत्वे " ह्रस्वस्य पिति कृति तुक् " (६।१।७१) इति न तुक् । अजन्तत्वसंनिपातेन कृतस्य ह्रस्वस्य तदविघातकत्वात् । बहिरङ्गस्य ह्रस्वस्यासिद्धत्वाद्वा । इयं परिभाषा " कृन्मेजन्तः " (१।१।३९) इत्यत्र भाष्ये पठिता । अत्र मूलं प्रसिद्धो लौकिकन्यायः । सीरदेवस्तु ज्ञापकमप्याह — " न तिसृचतसृ " (६।४।४) इति दीर्घनिषेधवचनम् । तद्धि सत्यामस्यां विभक्त्यानन्तर्य-निमित्तयोस्तिसृचतसृ इत्यनयोर्ङीपं प्रत्ययनिमित्तत्वाद्दीर्घप्राप्तावुपपद्यत इति । तन्न । तिसृचतसृभ्यां स्वस्रादिपाठात् " न षट्स्वस्रादिभ्यः " (४।१।१०) इति ङीन्निषे-धेनैव ङीपोऽप्रवृत्त्या " न तिसृचतसृ " (६।४।४) इत्यस्योपपत्तेः । प्रत्युत स्वस्रादौ तिसृचतस्रोः पाठादनित्येयम् । " कष्टाय क्रमणे " (३।१।१४) इति निर्देशात् । तेन रामाय दाक्षिः क्रापयति इत्यादि सिद्धम् ॥ ६६ ॥

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ ६७ ॥

क्रमेणोदाहरणानि । " अल्लोपोनः " (६।४।१३४) राज्ञः दध्नः । " इन्हन्पूषार्यम्णां शौ " (६।४।१२) बहुदण्डीनि बहुवाग्मीनि । "अत्वसन्तस्य चाधातोः" (६।४।१४) सुपयाः सुस्रोताः । " मनः " (४।१।११) सुदामा, सुप्रथिमा । इयं परिभाषा ' येन विधिः ' (१।१।७२) इत्यत्र वार्तिकरूपेण पठिता । अत्र मूलम् " इणः षीध्वं लुङ्लिटां० " (८।३।७८) इत्यादिसूत्रगताङ्गग्रहणज्ञापितमर्थवत्परि-भाषाया अनित्यत्वम् । अन्यथा हि परिवेविषीध्वमित्यत्र षीध्वंशब्दस्यानर्थ त्वादेव न ग्रहणमिति किमङ्गग्रहणेन ॥ ६७ ॥

वार्णादाङ्गं बलीयः ॥ ६८ ॥

तेन कौरकः इत्यत्र यणं बाधित्वा वृद्धिर्भवति । तथा " ऊत्वतुः " इत्यादौ द्वित्वे हलादिशेषे च कृते अन्तरङ्गमपि वर्णाश्रयं सवर्णदीर्घं बाधित्वा आङ्गः परश्च ह्रस्वः पर्जन्यन्यायाद्भवति । अत एव तदुत्तरं सवर्णदीर्घे कृते अन्तवद्भावेन प्राप्तो ह्रस्वो न । सकृत्प्रवृत्तत्वात् । यत्तु " च्छ्वोः शूडनुनासिके च " (६।४।१९) इत्यत्र तुक्सहित-छकारोपादानाल्लिङ्गात् समानाश्रय एव वार्णपरिभाषोपस्थितेरूत्वतुरित्यादिकं स्योन इतिवद-नुदाहरणम्, ह्रस्वस्य प्रत्ययाश्रयत्वेन सवर्णदीर्घस्य तदनाश्रयत्वेन व्याश्रयत्वादित्याहुः । तन्न । व्याश्रयेऽपि क्वचित्तत्प्रवृत्तेरभ्युपगमात् । " यजयाच० " (३।३।९०) इतिविहि-तनङो ङित्करणाज्ज्ञापकात् । तद्धि ङित्त्वं प्रश्नः इत्यत्र " ग्रहिज्या० " (६।१।१६) इति संप्रसारणार्थं विश्नः इत्यत्र गुणनिषेधार्थं वा । नाद्यः । " प्रश्ने चासन्न० " (३।२।११७) इति निर्देशेन संप्रसारणस्यासाधुत्वात् । नान्त्यः । अन्तरङ्गस्य तुकः प्रवृत्त्या गुणाप्रवृत्तेः । अतो व्याश्रयेऽपीयं प्रवर्तते । अन्यथा अटा सिद्धे आड्वचनमेतत्परि-भाषाया ज्ञापकमन्ये वर्णयन्तीत्यादिकौ " न माङ्योगे " (६।४।७४) इति सूत्रगतौ

१ B. दीर्घप्राप्तावनुपपद्यते इति. २ A. om. तन्न ।....... तिसृचतस्रोः पाठात् । ३ B. मन् । सुदामा सुप्रथिमा । ४ A. om. अत्र मूलम्...किमङ्गग्रहणेन । ५ B. तेन कुम्भकार इत्यत्र. ६ A. ऊषतुरित्यादिकं.

प्रत्यय इत्यत्र वार्णपरिभाषया सवर्णदीर्घत्वाभावसाधकौ अङ्गस्येति सूत्रगतौ च प्रदीपविवरणग्रन्थौ विरुद्धे स्याताम् ॥

किं चैवं " सार्वधातुकमपित् " (१।२।४) इति सूत्रे च्यवन्ते प्लवन्ते इत्यत्र वार्णपरिभाषया एकादेशात्प्राग्गुणः इति न्यासग्रन्थो विरुध्येत । अपि च ऊचे इत्यादीनि न सिध्येयुः । कथं तर्हि स्योन इति चेत्, व्याश्रयत्वात् । यथा हि कष्टायेति निर्देशेन ज्ञापितं संनिपातपरिभाषाया अनित्यत्वं शतानि इत्यादौ न विभक्तिं लोपयितुमीष्टे तथा व्याश्रये ज्ञापिता वार्णपरिभाषाप्रवृत्तिः स्योन इत्यत्र न यणं निवर्तयितुं समर्थेति न कश्चिद् दोषः । एतेन युच्छधातुगतग्रन्थविरोधोपि निराकृतः । तस्मादूखतुरित्यत्राङ्गत्वात् ह्रस्वः सवर्णदीर्घं बाधते । एवं च तत्र परत्वमपि सद्धेतुः । एतेन परत्वमपि न हेतुर्दीर्घस्यान्तरङ्गत्वात् । भवता चात्रैव टीकायां बहिरङ्गपरिभाषया ह्रस्वो नेति वदन्माधवो ह्रस्वस्याङ्गत्वेन बहिरङ्गत्वादित्यादिना दूषित इति दीर्घस्यान्तरङ्गत्वस्वीकारास्वीकारे सिद्धान्तकौमुदीमनोरमयोर्गतिश्चिन्त्या इति वदन्तोपास्ता इति दिक् । परिभाषायां ज्ञापकं " अभ्यासस्यासवर्णे " (६।४।७८) इत्यत्रासवर्णग्रहणम् । तद्धि ईषतुः इत्यादौ सवर्णेचि परतः इयङुवङौ मा भूतामित्येवमर्थं क्रियते । यदीयं न स्यात्तर्हि अन्तरङ्गत्वात् कृते सवर्णदीर्घे इयङुवङोः प्राप्तिरेव नास्तीति किमसवर्णग्रहणेन ॥ ६८ ॥

यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः ॥ ६९ ॥

यः ' अचः परस्मिन्० ' (१।१।५७) इति स्थानिवद्भावः सोनादिष्टादचः पूर्वस्य कार्ये स्यात् । यथा गणयति । न त्वादिष्टादचः पूर्वस्य । यथा वैयाकरणः सौवश्वः । अत्र यणादेशे कृते ऐज्भवतीति तस्य ' एचोयवायावः ' (६।१।७८) इति कर्तव्ये न यणः स्थानिवत्त्वम् । यथा वा अचीकरत् । अयं चार्थः ' अचः परस्मिन्पूर्वविधौ ' (१।१।५७) इत्यस्य । तत्र हि अजपेक्षं पूर्वत्वं गृह्यते न त्वादेशनिमित्तापेक्षम् । स्थान्यच आदेशेनापहारेपि तस्य काकादिवदुपलक्षणत्वेनाश्रयणात् । ज्ञापकमन्याहुः । ' अभ्यासस्यासवर्णे ' (६।४।७८) इत्यत्रासवर्णग्रहणम् । यदि ह्यादिष्टादचः पूर्वस्य कार्ये स्थानिवत्त्वं स्यात् तदा इयेष उवोष इत्यत्र गुणस्य स्थानिवत्त्वेनासवर्णाच्परत्वासंभव एवेति तद् व्यर्थं स्यादिति । इयर्ति इत्यादौ संभवोस्तीति चेत् तर्हि उरभ्यासस्येति सूत्राकरणमेव ज्ञापकमस्तु । अन्ये तु ' अत्स्मृदृत्वर० ' (७।४।९५) इति वचनं ज्ञापकमाहुः ॥ ६९ ॥

प्रकृतिग्रहणे यङ्लुगन्तस्य ग्रहणम् ॥ ७० ॥

तेन वेदेतिवद्वेवेदेत्यत्रापि " विदो लटो वा " (३।४।८३) इति णलादेशः । तथा जाग्रहीता इत्यत्र " ग्रहोऽलिटि दीर्घः " (७।२।३७) इति महाशया माधवाचार्याः । यत्त्वत्र दीक्षितैरुक्तं " एकाचो द्वे प्रथमस्य " (६।१।१) इतिसूत्रगतमहाभाष्यग्रन्थविरुद्धमिदम् । यदा ग्रहेरङ्गादिति भाष्यमुपादाय कैयटः तृचो हि जरीगृहिलङ्गं न तु ग्रहेः विशेषणसामर्थ्याद्धि यथाश्रुतरूपाश्रयणमिति यद्यपि तत्र यङन्तं प्रक्रम्येदमुक्तं तथापि

१ A. निवर्तयितुमसमर्था । २ A. पृच्छधातुगत. ३ A. om. यथा गणयति. ४ A. om. स्थान्यच आदेशेन...उपलक्षणत्वेनाश्रयणात् । ५ A. इयर्तेरभ्यासस्येति. ६ A. व्याख्याग्रन्थ for महाभाष्यग्रन्थ.

लुकेः साम्याद्यङ्लुगन्तेपि न दीर्घ इति लक्ष्यत इति । अत्रेदं वक्तव्यम् । प्रकृतिग्रहणे यङ्लुगन्तस्येति परिभाषाया जागरूकत्वात्कथं युक्तिसाम्यम । तथा च कथं भाष्यविरोध इति । प्रत्युत "ग्रहोऽलिटि दीर्घः" (७।२।३७) इति सूत्रगतयङ्लोपेचोक्तामितिवार्तिकभाष्यकैयटीयपर्यालोचनया यङ्लुकि दीर्घो भवत्येवेति स्पष्टं लभ्यते । एवं च "एकाचो द्वे" (६।१।१) इति सूत्रे यदुक्तं हरदत्तेन ग्रहोऽलिटीत्यत्रैकाज्ग्रहणमनुवर्तते इति तन्नादर्तव्यम । अन्यथा हि–

"श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ।"

इति स्मरणाद्यङ्लुकि दीर्घो न स्यात् । अस्तु वा हरदत्तमते जाग्रहितेति रूपम् । तथापि माधवाचार्योदाहृते जाग्रहीतेति रूपे भाष्यविरोधोद्भावनमसंगतमेवेत्यन्यत्र विस्तरः ॥

परिभाषाया ज्ञापकम् "ऊदुपधाया गोहः" (६।४।८९) इत्यत्रोपधाग्रहणम् । तद्धि ऊद्गोहः इति वक्तव्ये जोगूहीतीत्यत्रापि अभ्यासस्य ऊदादेशः प्राप्नोतीति तन्निवृत्त्यर्थं क्रियते न तु हकारस्य तन्निवृत्त्यर्थम् । "ओः सुपि" (६।४।८३) इत्यत ओरित्यनुवृत्त्यैव तत्सिद्धेः । यत्त्वाह सीरदेवः–ननु चोत्तरार्थं उपधाग्रहणं कर्तव्यं "गमहनजनखनघसाम्" (६।४।९८) इति । अन्यथा अलोन्त्यस्य लोपः स्यात् । उच्यते । ज्ञापकवादिनो मते तत्र 'अतः' इति स्थानी प्रतिपादयितव्यः इति तदयुक्तम । उत्तरार्थस्याप्युपधाग्रहणस्येह किंचित् त्रपो इति न्यायेन इहकरणस्य साफल्यौचित्यादुक्तज्ञापकोपपत्तावत इति स्थानिप्रतिपादनस्य व्यर्थत्वात् । उक्तं हि यङ्लुगन्तशिरोमणौ 'उत्तरार्थमुपधाग्रहणं चेदुत्तरत्रैवाकरिष्यत' इति । अनभ्यासे तु द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्तितत्वाद्यङ्लुक्यपि सर्वे विधयो भविष्यन्तीति न्यायसिद्धार्थानुवादिकेयमित्युक्तम ॥७०॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ७१ ॥

तेन 'पचावेदम' इत्यत्र गुणस्यासिद्धत्वात् 'एत ऐ' (३।४।९३) न भवति । ज्ञापकमत्र "वाह ऊठ्" (६।४।१३२) इत्यूठ्विधानम् । तथा हि । ऊठ्ग्रहणं मास्तु । "वसोः संप्रसारणम्" (६।४।१३१) इत्यतोनुवृत्तं संप्रसारणमेव विधीयतां तस्य ल्घूपधगुणे कृते "वृद्धिरेचि" (६।१।८८) इति सिद्धं विश्वौह इति । एवं स्थिते बहिरङ्गपरिभाषां ज्ञापयति । सत्यां ह्येतस्यां बहिरङ्गसंप्रसारणस्यासिद्धत्वादन्तरङ्गो गुणो न स्यादित्यूठ्ग्रहणं सार्थकम् । नन्वकारान्तेकारान्तोपसर्गे च रूपे विशेषः स्यादिति चेन्मैवम । भाष्योक्ति ज्ञापकबलेनैतादृशस्थले ण्विप्रत्ययाभावस्यानुमानादिति निर्बन्धकृतः ॥ ७१ ॥

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ७२ ॥

अचोरानन्तर्ये बहिरङ्गपरिभाषा नास्ति । तेन 'बहवः' इत्यत्र "एचोऽयवायावः" (६।१।७८) इति भवति । न च 'पचावेदम्' इत्यत्र "एत ऐ" (३।४।९३) इति

१ A. सूत्रगतयङोपि चोक्तमिति वार्तिक... २ A. om. न तु हकारस्य...तन्निवृत्त्यर्थम् । ३ B. उपपत्तावबत इति, A उपपत्तवत इति. ४ A. om. उक्तं हि यङ्लुगन्त...अकरिष्यदिति. ५ A. विशेषनस्यादिति. ६ A. इति निबन्धः कृतः ।

स्यादिति वाच्यम् । यत्र हि अचोरानन्तर्यमाश्रित्य अन्तरङ्गं प्राप्नोति तत्रैवं प्रवर्तते । नहि प्रकृतेऽन्तरङ्गे अचोरानन्तर्यमस्ति । ज्ञापकमत्र " षत्वतुकोरसिद्धः " (६।१।८६) इति तुंकि एकादेशस्यासिद्धत्वम् । यदि हि अचोरानन्तर्येऽपि बहिरङ्गपरिभाषा प्रवर्तेत तदा कोऽसिचदित्यादौ पूर्वरूपादेरेकादेशस्य बहिरङ्गत्वादसिद्धत्वमस्त्येवेति किं तेन । नन्वेतदयुक्तम् । पचावेदमितिवदन्तरङ्गप्रवृत्तिवेलायामजानन्तर्याभावादिति चेत्, अत्राहुः—संहिताधिकारीये कार्ये क्रियमाणे अन्तरङ्गे बहिरङ्गे वा अजानन्तर्ये सति नाजानन्तर्ये इति प्रवर्तते। पचावेदमित्यत्र "एत ऐ" (३।४।९३) इति तु संहिताधिकारीयं कार्यमेव न भवतीत्यदोष इति । वस्तुत एकस्याप्यच आनन्तर्यमाश्रिते उत्तरकालप्रवृत्तिके विधौ नाजानन्तर्ये इति प्रवर्तते इति न काप्यनुपपत्तिः । विवरणकारास्तु " षत्वतुकोरसिद्धः " इत्यत्र ' नाजानन्तर्ये ' इति न ज्ञाप्यते किं तु बहिरङ्गपरिभाषाया अनित्यत्वमित्याहुः ॥ ७२ ॥

संज्ञापूर्वको विधिरनित्यः ॥ ७३ ॥

तेन ' स्वायंभुवम् ' इत्यादौ " ओर्गुणः " (६।४।१४६) इति न गुणः । ज्ञापकमत्र ' ओरोत् ' इति वक्तव्ये गुणग्रहणमेव । तथा " उतो वृद्धिर्लुकि हलि " (७।३।८९) इत्यत्र वृद्धिग्रहणम् । तेन स्तुयादित्यादौ न वृद्धिः । एतेन ' ङित्वोत्कीर्यते क्वचिदनुबन्धकार्येऽप्यनल्विधाविति प्रतिषेधः ' (सि. कौ.) इति व्याख्यातम् । अन्यथा हि स्तुयादित्यादौ यासुटो ङित्वस्य वृद्धिप्रतिषेधार्थत्वेन वैयर्थ्याभावेन ज्ञापकत्वं न स्यात् । नै च स्थानिवद्भावलभ्येन ङित्वेनैव तत्सिद्धिः । वृद्धेरनिग्लक्षणत्वेन क्ङिति चेत्यस्याप्रवृत्तेरिति वार्तिककृन्मताशयः । भाष्यमते तु ङिच्च पिन्नेत्युक्तेर्यासुटो ङित्वेन पित्त्वबाधात् ' स्तुयात् ' इत्यादौ वृद्धिप्रसङ्गः । यासुटो ङित्वं ज्ञापकमपि न इत्यवधेयम् ॥ ७३ ॥

संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ॥ ७४ ॥

पञ्चधीवा । अत्र पञ्चभिर्धीवरीभिः क्रीत इति विग्रहे आर्हीयस्य ठकः " अध्यर्ध० " (५।१।२८) इत्यादिना लुकि " लुक् तद्धितलुकि " (१।२।४९) इति ङीपो निवृत्तौ तत्संनियोगेन शिष्टो " वनोर च " (४।१।७) इति रेफादेशो निवर्तते । ज्ञापकमत्र भाष्यकार आह—" बिल्वकादिभ्यश्छस्य लुक् " (६।४।१५३) इति छग्रहणम् । तद्धि " नडादीनां कुक् च " (४।२।९१) इति छप्रत्ययसंनियोगशिष्टस्य कुकोऽनया परिभाषया लुक् मा भूत्, किंतु छस्यैव यथा स्यादित्येवमर्थमिति । अनित्या चेयम् । "भस्याढे०" (६।३।३५ वा. ११) इत्यत्र ' अढे ' इति प्रतिषेधात् । यदि हि कृतेऽप्येतस्मिन् रौहिणेय इत्यादौ " यस्येति च " (६।४।१४८) इति लोपे कृतेऽनया परिभाषया ङीप्संनियोगशिष्टो नकारो निवर्तेत तर्हि स व्यर्थः स्यात् ॥ ७४ ॥

ताच्छीलिके णेऽप्यण्कृतं कार्यं भवति ॥ ७५ ॥

तेन चुरा शीलमस्या इति चौरी इत्यत्र छत्रादित्वाण्णप्रत्यये "टिड्ढाणञ्"(४।१।१)

---

१ B. om. तुकि. २ A. तदा अधीत्येत्यादौ सवर्णदीर्घस्य बहिरङ्गस्यासिद्धत्वमस्त्येवेति किं तेन for तदा कोऽसिचदित्यादौ...किं तेन । ३ B. पचावेदिवदन्तरङ्गेऽचोरानन्तर्याभावादिति चेत् अत्राहुः । ४ A. न च स्थानिवद्भावकृतेन ङित्वेनैव तत्सिद्धिः । ङिच्च ङित्वेति भाष्योक्तेस्तु ङित्वस्य बाधादिति कौस्तुभादावुक्तम् । ५ A. अन्यथा रौहिणेय for यदि हि...

इति ङीप् । ताच्छीलिक इति किम् । प्राज्ञा । " प्रज्ञाश्रद्धा०" (५।२।१०१) इति ण-प्रत्यये टाबेवात्र भवति । ज्ञापकं चात्र कार्मस्ताच्छील्ये इति वचनम् । तद्धि ' अन् ' (६।४।१६७) इत्यणि विधीयमानो " नस्तद्धिते " (६।४।१४४) इति टिलोपनिवर्तकः प्रकृतिभावो मा भूदित्येवमर्थम् । यदि तु ' छत्रादिभ्योण् ' इत्येवोच्येत तदेयं मास्त्विति वदन्ति[2] ॥७५॥

धातोः कार्यमुच्यमानं तत्प्रत्यय एव भवति ॥ ७६ ॥

तेन " पाघ्राध्मा०" इति पिबादेशः 'कीलालपः पश्य' इत्यत्र न । तथा 'अचि विभाषा' (८।२।२१ इति लत्वं गिरौ गिरः इत्यत्र न । तथा[3] 'प्रसुङ्भ्याम्' इत्यत्र "अनुदात्तस्य चर्दुपधस्य०" (६।१।५९) इति नाम् । ज्ञापकमत्र "दाण्डिनायन०" (६।४।१७४) सूत्रे भ्रौणहत्यशब्दे तत्वं निपातनम् । तद्धि अनया परिभाषया " हनस्तोचिण्णलोः" (७।३।३२) इति न प्राप्नोतीति क्रियते । अनित्या चेयम् । " ओः सुपि " (६।४।८३) " वर्षाभ्वश्च " (६।४।८४) इत्यनयोरारम्भात् । तेन श्रियौ भुवौ इत्यादौ इयङुवङादि सिद्धम् ॥७६॥

इति भास्करकृते परिभाषाभास्करे षष्ठस्य चतुर्थः षष्ठाध्यायश्च ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ७७ ॥

' तेन ' सर्वके ' इत्यत्र अकच्सहितस्यापि सर्वनामत्वाच्छीभावः । ज्ञापकमत्र " नेदमदसोरकोः "(७।१।११) इत्यत्र अकोरिति पदम् । यद्वा । " एतत्तदोः सुलोपोकोरनञ्समासे हलि " (६।१।१३२) इत्यत्र अकोरिति ॥७७॥

अबाधकान्यपि निपातनानि भवन्ति ॥ ७८ ॥

तेन ' दधतः पुरातनमुनेर्मुनिताम् ' इति भारविप्रयोगः, ' पुरातनीर्नदीः ' इति माघप्रयोगश्च व्याख्यातौ । "पुराणप्रोक्तेषु०" (४।३।१०५) इत्यादिनिपातनस्य नित्यमबाधकत्वात् । ज्ञापकमत्र " ङेर्यः " (७।१।५३) इति सूत्रम् । यदि हि बाधकान्येव निपातनानि भवेयुस्तर्हि " णिजां त्रयाणां " (७।४।७५) इति निपातनादेव त्रयाणामिति सिध्यतीति किं तेन । उक्तं च कातन्त्रविस्तरेपि—पुराणः शेषे वा पुराणः पुरातन इति । केचित्तु पुरा अतनमस्यास्तीति पुरातनः। पुरातनीत्यत्र तु—अतनमस्या अस्तीति अतना। सैव अतनी ताः पुरातनीरिति व्याचक्षते। अन्ये तु "विभाषा पूर्वाह्णापराह्णाभ्याम्" (४।३।२४) इत्यत्र विभाषेति योगं विभज्य योगविभागस्य इष्टसिद्ध्यर्थतया पुराशब्दाट्युप्रत्ययस्य तुटो विकल्पेन विधानात् पुरातनेति सा यन्ति । पृषोदरादित्वात्[4] (६।३।१०९) पुरातनः

---

१ A. om. प्राज्ञा. २ B om. वदन्ति. ३ A. om. तथा प्रसुङ्भ्यां....इति नाम्.
४ A. om. पृषोदरादित्वात्...प्रामादिकमिति.

इति कैयटोऽपि साधुत्वं मन्यते । एवं च पूर्वोक्तपदद्वयं प्रामादिकमिति वदन् भाष्यवृत्तिकारस्तदनुगामिनः सीरदेवादयश्चोपेक्ष्याः । ये [1]त्वाहुः अबाधकानीत्यादि नेयं परिभाषा नापि भाष्यकारवचनमिति ते एवं प्रष्टव्याः किमिदं परिभाषात्वमिति । [2]पैरिभाषाशब्दव्यवहार्यत्वं हि सर्वत्राप्यविशिष्टम् । तथा च भाष्यकारानुक्तत्वेपि न [3]क्षतिरिति यत्किंचिदेतत् ॥७८॥

अङ्गाधिकारे तस्य तदुत्तरपदस्य च ॥ ७९ ॥

'ग्रहणवता०' (परि०) इत्यादिना प्रतिषिद्धस्तदन्तविधिरनेन प्रतिप्रसूयते । तेन "अस्थिदधि०" (७।१।७५) इत्यादिना 'दध्ना', 'प्रियदध्ना' इत्युभयत्राप्यनङ् । ज्ञापकमत्र "युजेरसमासे" (७।१।७१) इत्यत्रासमासग्रहणम् । तद्धि अनया परिभाषया 'अश्वयुक्' इत्यत्र प्राप्तस्य नुमो निवृत्त्यर्थमिति सी[4]रदेवः । परं तु सौत्रतदन्तविधिनैव सकलेष्टसिद्धेर्मास्त्वियं परिभाषा । न च ग्रहणवतेत्यस्यायं विषयः । तस्य समासप्रत्ययविधौ० इत्यनेन सह समानविषयत्वादिति प्रपेदिरे ॥७९॥

प्रत्येकं वाक्यपरिसमाप्तिः ॥ ८० ॥

इह शास्त्रे प्रत्येकं वाक्यानां परिसमाप्तिर्दृश्यते । तेन आदैचां प्रत्येकं वृद्धिसंज्ञा, अदेङां च गुणसंज्ञा । लौकिकोयं न्यायः । तद्यथा । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति । न चोच्यते प्रत्येकमिति । प्र[5]त्येकं भुजिः परिसमाप्यते । ज्ञापकमप्याहुः । "णलुत्तमो वा" (७।१।९१) इत्यत्र उत्तमग्रहणं णल्विशेषणम् । यदि हि प्रत्येकं वाक्यसमाप्तिर्न स्यात् तदोत्तमग्रहणं मिब्वस्मसां त्रिकेण संबद्धमिति णलः केवलस्य विशेषणं न स्यादिति ॥८०॥

क्वचित्समुदाये वाक्यपरिसमाप्तिः ॥ ८१

यथा संयोगसंज्ञायाम् । अयमपि लौकिकन्यायः । तद्यथा । [6]गर्गान् शतं दण्डयतान्, अर्थिनश्च राजानो हिरण्येन भवन्तीति । ज्ञापकमप्याहुः । "प्रथमयोः पूर्वसवर्णः" (६।१।१०२) इत्यत्र प्रथमाद्वितीययोर्वि[7]चनषट्कयोः प्रयुक्तं प्रथमयोरिति पदम् इति ॥८१॥

क्वचिदुभयथा वाक्यपरिसमाप्तिः ॥ ८२ ॥

यथा "बहुषु बहुवचनम्" (१।४।२१) इत्यादिना, "कर्मणि द्वितीया" इत्यादिना [8]चैकवाक्यतानेकवाक्यतापक्षयोः । यथा च "अट्कुप्वाम" (८।४।२) इति सूत्रे । अयमपि लौकिकन्यायः । तद्यथा । गर्गैः सह न भोक्तव्यमिति । अत्र समुदितैः प्रत्येकं च तैः सह न भुज्यते ॥ ८२ ॥

---

१ B. यत्त्वाहुः. २ A. ज्ञापकसिद्धत्वादि सर्वत्राप्यविशिष्टम् । ३ B. क्षितिरिति. ४ A. om. मिति सीरदेव...प्रपेदिरे. ५ B. om. प्रत्येकं भुजिः....यदि हि. ६ A. om. गर्गान् शतं...ज्ञापकमप्याहुः । ७ A. वचनद्वयोः प्रयुक्तं. ८ A. om. यथा चाट्कुप्वामिति सूत्रे.

अभेदका इह गुणाः ॥ ८३ ॥

तेन "वृद्धिरादैच्" (१।१।१) इत्यत्र उदात्तानुदात्तस्वरितानामादैचां वृद्धिसंज्ञा। ज्ञापकमत्र "चतुरनडुहोरामुदात्तः" (७।१।९८), "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" (७।१।७५) इत्यादिषूदात्तग्रहणम। यदि भेदका गुणास्तदोदात्तमेवोच्चारयेत् इति उदात्तग्रहणमनर्थकं स्यात्। न्यायश्चात्र मूलम्। यथा देवदत्तो मुण्डयपि जटयपि शिख्यपि स्वामाख्यां न जहाति ॥ ८३ ॥

इति सप्तमे प्रथमः पादः ॥

औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ ८४ ॥

तेन "दादेर्धातोर्घः" (८।२।३२) इति घत्वमौपदेशिकस्य दादेर्धातोर्भवति। तथा च 'अधोक्', 'दामलिट्' इत्यादौ नाव्याप्त्यतिव्याप्ती। एतेन धातोरित्यावर्तते तत्रैकमतिरिच्यमानमुपदेशकालं लक्षयतीति मनोरमोक्तं चिन्त्यम्। यत्तु "तरप्तमपौ घः" (१।१।२२) इत्यत्र तरतेरप्प्रत्ययान्तस्य तर इत्यस्याग्रहणं प्रयोजनमन्यथा नद्यास्तरो नदीतर इत्यत्र "घरूप०" (६।३।४३) इति ह्रस्वः स्यादित्याहुस्तन्न। तमपा साहचर्याल्लक्षणपरिभाषया प्रत्ययाप्रत्यययोरित्यादिपरिभाषया च प्रत्ययस्यैव तरपो ग्रहणादतरबन्ताग्रहणस्यान्यथासिद्धत्वात्। परिभाषायां ज्ञापकं तु "श्वीदितो निष्ठायाम्" (७।२।१४) इत्यत्र श्विग्रहणम्। तद्धि 'शूनः,' 'शूनवान्' इत्यत्रानया परिभाषया 'श्र्युकः किति" (७।२।११) इति निषेधाप्रवृत्तौ सार्थकम्। नहि "श्र्युकः किति" (७।२।११) इत्यत्र उपदेशग्रहणानुवृत्तिरस्ति। तीर्णमित्यादाविट्प्रतिषेधस्तु औपदेशिकोगन्तात्परयोर्गित्कितोर्नेट् इति व्याख्यानात्साधनीयः। न चैवमपि श्विग्रहणं व्यर्थम्। उह्रीनवदोदितत्वादेव इडागमाभावसिद्धेः इति वाच्यम्। सर्वविधिभ्य इड्विधिर्बलवत्ताज्ञापनार्थत्वात्[1]। एकस्य श्विग्रहणस्य कथमर्थद्वयज्ञापकतेति चेन्न। अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते इत्यत्रोक्तयुक्तेः[2]। अनित्या चेयम्। "उपदेशेऽजनुनासिक इत्" (१।३।२) इत्यत्र उपदेशग्रहणात्। तद्धि 'अभ्र आँ अपः' इत्यत्र "आङोऽनुनासिकश्छन्दसि" (६।१।१२६) इत्यनुनासिकाकारस्येत्संज्ञानिवृत्त्यर्थम्[3]। यदीयं परिभाषा न स्यात्तदानयैवात्रेत्संज्ञा निवर्तेतेति किं तेन। ननु तत्रास्तु इत्संज्ञा का क्षतिरिति चेदुच्यते। अनुबन्धानामनेकान्तत्वदर्शने आदितश्चेत्यस्य समीपवर्ती आकार इत्स्यादिति[4] व्याख्यानादेटित इत्यत्र इण्न स्यादिति वाच्यम्। आङिदिति वक्तव्ये आङोऽनुनासिकसामर्थ्यान्नेत्वमिति तन्निवृत्त्यर्थमपि। यत्तु न्यासकारः दधीच्छतीति दधीयति ततः क्विप् 'दधि

---

१ A. reads संज्ञापूर्वकस्य विधेरनित्यताज्ञापनार्थत्वात् instead of सर्वविधिभ्य इड्विधेर्बलवत्ताज्ञापनार्थत्वात्। २ A. इत्यत्रोक्तमित्याहुः। ३ B. reads नच 'अभ्र आँ अपः' इत्यत्र...इत्संज्ञानिवृत्त्यर्थं तत्। सत्यां हि तस्यामनुबन्धानामनेकान्तत्वदर्शने. ४ After आदित इत्त्वेन स्यात्, A reads यत्तु मनोरमायामुपदेशपदमुच्चरार्थम्। अभ्र आँ अपः इत्यादौ तु विधानसामर्थ्यान्नेत्वमित्युक्तं तत्तु अनुबन्धानामेकान्तत्वपक्षाभिप्रायेणेत्यवधेयम्। न्यासकारस्तु दधीच्छति दधीयति.

ब्राह्मणकुलम् ' इति, अत्र " अणोऽप्रगृह्यस्य० " (८।४।५७) इत्यनुनासिके कृते इकारस्येत्संज्ञा स्यात् । ततश्चेदित्वान्नुम् स्यादतस्तन्निवृत्त्यर्थमिति तन्न । पूर्वत्रासिद्धत्वापेन अनुनासिकस्यासिद्धत्वादेवेत्संज्ञाभावासिद्धेः । किं च । सत्यपि नुमि नलोपेनेष्टसिद्धेः । न च तृतीयाद्येकवचनेष्वानिष्टापत्तिः । अवसानाभावेनानुनासिकस्यैवाभावात् । नै च तद्वचनोत्पत्तेः प्रागेवानुनासिको भविष्यतीति वाच्यम् । अकृतव्यूहपरिभाषाविरोधात् । अपि च ' अगप्रगृह्य इत् ' इति वक्तव्ये अनुनासिकविधानसामर्थ्येनैव तत्संज्ञाया अप्रवृत्तेस्सुवचत्वात् ॥

यदपि केचिदाहुः :—उपदेशपदमत्र योगविभागेन हलन्त्यमिति सूत्रस्य प्रत्याख्यानार्थम् । तथा हि । उपदेश इत् इत्येकं सूत्रम् । उपदेशे वर्ण इत्संज्ञः स्यादिति तदर्थः । ततः अजनुनासिकः इति द्वितीयं सूत्रम् । तच्च अच् चेदित्संज्ञस्तर्ह्यनुनासिक एवेति नियमार्थम् । तथा च " हलन्त्यम् " (१।३।३) इति मन्दप्रयोजनम् इति । तदपि न । अनन्त्यहल्सु अतिव्याप्तेः । न च " आदिर्ञिटुडवः " (१।३।५) इत्यादीनामनन्त्यस्य चेदेतेषामेवेति नियमार्थतया निस्तारः । आदिहलश्चेदेतेषामेव इति नियमस्यापि वक्तुं शक्यत्वात्तादृशनियमस्यैवादरे मानाभावाच्च । तैस्मात् अग्निचिदादौ शब्दे अन्त्यस्य हलो " हलन्त्यम् " (१।३।३) इत्यनेन प्राप्ताया इत्संज्ञाया निवृत्त्यर्थमित्युत्तरार्थतोपदेशपदस्यावशिष्यते । तत्राप्यनया परिभाषयैव सिद्धौ उपदेशपदं व्यर्थं सदस्या असार्वत्रिकत्वं ज्ञापयतीत्याहुः ॥ वस्तुतस्तु " एकाचो बशो भष्० " (८।२।३७) इत्यत्रैव धातोरिति षष्ठ्या व्यधिकरणतया " दादेर्धातोर्घः " (८।२।३२) इत्यत्र धातोर्योदादिरवयव इति व्याख्यानेन ' अधोक् ' इत्यादावतिव्याप्तिनिरासः संभवतीत्याद्यन्यत्र प्रतिपादिताकरोक्तदिशा ' औपदेशिकप्रायोगिकयोः ' इत्यादिपरिभाषा मास्तु ॥ ८४ ॥

सर्वविधिभ्य इड्विधिर्बलीयान् ॥ ८५ ॥

तेन ' श्वैयित्वा ' इत्यत्र संप्रसारणात्पूर्वमिट् । ततो " न क्त्वा सेट् " इति कित्वनिषेधान्न संप्रसारणम् । ज्ञापकमत्र " सनि ग्रहगुहोश्च " (७।२।१२) इत्यत्र चकारकरणम् । तद्धि " श्र्युकः किति " (७।२।११) इत्यत उकोनुकर्षणार्थम् । यदीयं न स्यात्तदा " इको झल् " (१।२।९) इति कित्वादेव " श्र्युकः किति " (७।२।११) इत्यनेन रुरूषतीत्यत्र इडभावे सिद्धे किं तेन । सत्यां त्वस्यां पूर्वमिट्प्रवृत्तेर्झलादित्वाभावात् " इको झल् " (१।२।९) इत्यस्याप्रवृत्तौ सार्थकं तदिति ॥ ८५ ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम् ॥ ८६ ॥

यथा " गापोष्टक् " (३।२।८) अत्र पिबतेर्ग्रहणं न तु पातेः । एवं " गातिस्था० " (२।४।७७) इति सूत्रेपि । ज्ञापकमत्र " स्वरतिसूति० " (७।२।४४) इत्यत्र सूतिसूयत्योर्विकरणानिर्देशः । स हि अनया परिभाषया

१ B. न च द्विवचनोत्पत्तेः प्रागेवानुनासिको भविष्यतीति वाच्यम् । अकृतव्यूहपरिभाषाविरोधात् ॥ यदपि केचिदाहुः । २ B. om. तस्मादग्निचिदादौ शब्दे....परिभाषा मास्तु ॥ ३ A. ' स्वपित्वा ' इत्यत्र.

दैवादिकस्यैव ग्रहणं मा भूदित्येवमर्थम् । अन्यथा सूङ् इत्युक्त्वैव पू प्रेरणे इत्यस्य निवृत्तिमकरिष्यदिति किं तेन । यद्वा । " वेत्तेर्विभाषा " (७ । १ । ७) इत्यत्र वेत्तेरिति श्तिपा निर्देशः । सोपि ह्यनया परिभाषया विद विचारणे इति रौधादिकस्यैव ग्रहणं मा भूदित्येवमर्थं, न तु यङ्लुङ्निवृत्त्यर्थं शीङ्साहचर्येणैव तत्सिद्धेरित्याहुः ॥ ८६ ॥

वर्त्स्यत्प्रवृत्त्येह कार्याणि क्रियन्ते ॥ ८७ ॥

भविष्यन्तीं प्रवृत्तिमाश्रित्य कार्याणि क्रियन्ते । यथा "शिदेः शितः" (१।३।६०) इत्यत्र तथा " जसः शी " (७ । १ । १७) इत्यत्र शित्त्वात्सर्वादेशः । यथा परिव्राजकः सर्वभूताभयदक्षिणां दत्त्वा गच्छेदित्यत्राङ्गीकृततन्त्रान्तरे । यथा चौदनं पचतीत्यत्र । ज्ञापकमत्र " वस्वेकाजाद्घसाम् " (७।२।६७) इत्यत्र एकाज्ग्रहणम् । तद्धि कृतद्विर्वचनानामेकाचामिड्विधानार्थम् । स च द्विर्वचनात् प्रागेव परत्वेन कर्तुं युज्यते । तत्र यदीयं न स्यात्तदा परत्वोल्लङ्घनापत्तिः । यद्वा "अन उपधालोपिनः०" (४।१।२८) इत्यत्र भविष्यदुपधालोपिनो ङीब्विधानम् । वर्त्स्यदित्यत्र लघूपधगुणः । गुरुसंज्ञा तु नास्ति । " त्रसिगृधि० " (३।२।१४४) इत्यत्र क्नोः कित्करणेन प्रकृतिप्रत्यययोरानन्तर्ये तदभावज्ञापनात् ॥ ८७ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते ॥ ८८ ॥

तेन ' गोमत्प्रियः ' इत्यत्र " उगिदचां० " (७।१।७०) इति नुम् न । कृतेपि लुकि प्रत्ययलक्षणाभावान्न सः । ज्ञापकमत्र " प्रत्ययोत्तरपदयोश्च " (७।२।९८) इति सूत्रम् । तद्धि अनया परिभाषया ' त्वदीयो, मदीयः, त्वत्पुत्रः, मत्पुत्रः ' इत्यादौ " त्वमावेकवचने " (७।२।९७) इति न प्राप्नोतीत्येवमर्थम् । अन्यथा समासोत्तरकालभाविनं बहिरङ्गं लुकं बाधित्वा तेनैव त्वमयोः सिद्धौ किं प्रत्ययेत्यादिसूत्रेणेति वदन्ति ॥ ८८ ॥

इति सप्तमे द्वितीयः ॥

सत्यपि संभवे बाधनं भवति ॥ ८९ ॥

तेन त्वाष्ट्रो जागत इत्यत्रादिवृद्ध्या अन्त्योपधावृद्धी बाध्येते । तथा वर्तमानक्तेन भूतक्तस्य बाधः । अत एव च ' पूजितो यः सुरासुरैः ' इत्यादि चिन्त्यमिति हरदत्तः । तत्रेयं चिन्ता ' जनैरविदितविभवो भवानीपतिः ' इत्यादिप्रयोगसिद्ध्यर्थं तेनेत्यधिकारगतेन " उपज्ञाते " (४।३।११५) इति सूत्रनिर्देशेन कश्चिन्मत्यार्थेभ्यो भूतेपि क्तप्रत्ययस्य ज्ञापनात्साधनीयमिति । तक्रकौण्डिन्यन्यायमूलेयं परिभाषा । सत्यपि संभवे दधिदानस्य तक्रदानेन बाधाभ्युपगमात् । ज्ञापकमप्यत्र अनुशतिकादिषु (७।३।२०) पुष्करसच्छब्दपाठः । अन्यथा आदिवृद्ध्या उपधावृद्धिर्न बाध्येति सिद्धं पौष्करसादिरिति किं तेन । पुष्करसच्छब्दात्त्वकतु नैवास्त्यनभिधानादित्याहुः ॥ ८९ ॥

---

१ A. इत्युक्तौ पू प्रेरणे. २ A. भविष्यत्प्रवृत्त्येह. ३ B. om. इति वदन्ति. ४ A. om. त्वाष्ट्रो जागतः....तथा. ५ A. om. अत एव च...बाधाभ्युपगमात् । ६ A. om. पुष्करसच्छब्दपाठः....किं तेन ।

पर्जन्यवल्लक्षणप्रवृत्तिः ॥ ९० ॥

मेघो हि जलेपि वर्षति । उक्तं च कृतकारि खल्विदं शास्त्रं मेघवदिति । तेन बभूवेत्यत्र ह्रस्व इति अभ्यासस्य ह्रस्वः । ज्ञापकमप्यत्र " प्रवाहणस्य ढे " (७।३।२८) इत्यनेन प्रावाहणेयः इत्यत्र उत्तरपदस्य वाहनस्यादेराकारस्य वृद्धिविधानम् । तद्धि प्रावाहणेयीमानिनी इत्यत्र " वृद्धिनिमित्तस्य० " (६।३।३९) इति पुंवद्भावनिषेधार्थम् । " जातेश्च " (६।३।४१) इत्यनेन तु स न सिध्यति । अमानिनीत्यस्यानुवृत्तेरित्याहुः ॥ ९० ॥

गर्भवद्भावादयो भवन्ति ॥ ९१ ॥

प्रातिपदिकस्वाद्योर्मध्ये इति शेषः । तेन सा[1] ते ताः इत्यादौ विभक्तौ कृतायामेव (कृतायामंते) टाप् । आदिशब्दादर्वन्शब्दाद्विभक्तौ " अर्वणस्त्रसौ० " (६।४।१२७) इति त्रादेशे उगित्वान् ङीपि अर्वत्यावित्यादि । यत्तूदाहरन्ति-क्रोष्टुशब्दाद् विभक्तौ स्त्रियां " विभाषा तृतीया०" (७।१।९७) इति तृज्वद्भावे ङीपि क्रोष्ट्रीभिरित्यादि तस्याय[2]माशयः स्त्रियामिति तृज्वद्भावस्य विभक्तिनिमित्तत्वमाङ्गत्वादङ्गेन प्रत्ययाक्षेपादिति । ज्ञापकमत्र " न यासयोः " (७।३।४५) इति इत्वनिषेधार्थं वचनम् । तद्धि अस्यां सत्यां यका सका इत्यादावनया परिभाषया " प्रत्ययस्थात्० " (७।३।४४) इत्यादिना इत्वप्राप्तौ सार्थकमिति ॥ ९१ ॥

विधौ परिभाषोपतिष्ठते नानुवादे ॥ ९२ ॥

' विधिरत्यन्तमप्राप्ते ' इत्युक्तो विधिः । तत्र परिभाषोपतिष्ठते यथा " सार्वधातुकार्धधातुकयोः " (७।३।८४) इत्यादौ ' इको गुणवृद्धी (१।१।३) इति । अनू[3]द्यमानविशेषणे तु न । यथा " वृद्धिर्यस्याचामादिस्तद् वृद्धम ।" (१।१।७३) इत्यत्र । तेन शालीयादिसिद्धिः । ज्ञापकमत्र " उदीचामातः स्थाने यकपूर्वायाः " (७।३।४६) इत्यत्र स्थानेग्रहणम् । अन्यथा " षष्ठी स्थानेयोगा " (१।१।४९) इत्यनेनातः स्थान एवेत्वं भाविष्यतीति किं तेन । गुरुचरणास्तु स्थानेग्रहणं मास्तु । प्र[4]कृतपरिभाषया निष्प्रयोजनत्वात् । प्रत्युत " अचो रहाभ्यां द्वे " (८।४।४६) इत्यत्र तस्मादित्युत्तरस्येत्यस्याप्रवृत्तेरधिह्रि अनुभव इत्यत्र यणि द्वित्वं स्यादिति महद्वैानिष्टम् । शालीयादिसिद्धिस्तु संज्ञापरिभाषयोर्विधिशेषत्वेन पर[5]स्परसंबन्धाभावादुपपादनीया प्रधानगामित्वन्यायाच्चेत्याहुः ॥९२॥

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम् ॥ ९३ ॥

तेन हिनोतेर्ण्यन्तादपि सनि ' जिघापयिषति ' इत्यत्र० " हेरचङि " (७।३।५६) इति कुत्वम् । ज्ञापकं चात्र हेरचङीत्यत्र ' अचङि ' इति पदम् । यदीयं न स्यात्तदा ण्यधिके प्रसङ्ग एव नास्तीति किं तेन । य[6]त्तु " न भाभूपूकमि०" (८।४।३४)

---

१ A. om. सा ते ताः....यत्तूदाहरन्ति. २ A. om. तस्यायमाशयः....प्रत्ययाक्षेपादिति. ३ A. अनुवादे तु न । ४ B. प्रकृतपरिभाषायाः. ५ A. परस्परासंबन्धाभावात्. ६ A reads अनित्या चेयम् । न भाभूपूगमीत्यत्र ण्यन्तभादीनामुपसंख्यानात् for यत्तु नेभाभूपू....एवानुदयात् ।

इत्यत्र ण्यन्तानां च भादीनामुपसंख्यानादनित्येयं तेनाङ्पूर्वाण्ण्यन्ताद् हन्तेः “ आङो यमहनः ” (१।३।२८) इति नात्मनेपदमिति कश्चितन्न । एतत्परिभाषायाः कुत्वमात्रविषयत्वस्याकर उक्तत्वादन्यत्रातिप्रसङ्गशङ्काया एवानुदयात् ॥९३॥

अङ्गवृत्ते पुनर्वृत्तावविधिः ॥ ९४ ॥

अङ्गवृत्ते अङ्गाधिकारीयशास्त्रे कृते सति पुनस्तस्य प्रवृत्तौ अविधानं स्यात् । तेन पिबतीत्यत्र लघूपधगुणो न । एवं ‘ यूयं वयं ’ इत्यत्र शेषे लोपोन्तलोप इति पक्षे “ जसः शी ” (७।१।१७) इति शी न भवतीत्याहुः । ज्ञापिता चेयं भाष्यकारेण “ ज्यादादीयसः ” (६।४।१६०) “ ज्ञाजनोर्जा ” (७।३।७९) इति सूत्रयोः । तथा हि । आद्ये तावद् “ बहोर्लोपः०” (६।४।१५८) इत्यतो लोपमनुवर्त्य इकारलोपं विधाय ‘ अकृत्सार्व०’ (७।४।२५) इति दीर्घे कृते सिध्यत्येव ‘ ज्यायान् ’ इति रूपमिति व्यर्थं सदाकारादेशविधानं ज्ञापकम् । अत एव अकृत्सार्वेतिसूत्रे ‘ क्ङिति ’ इत्यस्यानुवृत्तिर्वृत्तिकारोक्ता भाष्यविरुद्धेत्यवधेयम् । न च ‘ क्ङिति ’ इत्यस्याननुवृत्तौ ‘ उरुया, धृष्णुया’ इत्यादौ दीर्घापत्तिः। छन्दसि सर्वेषां विधीनां वैकल्पिकतया दीर्घाभावसिद्धेः । ‘ शङ्कव्यं दारु ’ इत्यत्र तु नित्यत्वात् “ ओर्गुणः ” (६।४।१४६) एव दीर्घं बाधते इति न कोपि दोषः । द्वितीये तु जादेशविधानम् । अन्यथा जं कृत्वा “ अतो दीर्घो यञि ” (७।३।१०१) इति दीर्घेणैव जानातीति साधयेदिति किं तेनेति । अनित्या चेयं ‘ द्वयोः ’ ‘ एकस्य ’ इत्यादिनिर्देशात् । अत्र केचित्– निष्ठितस्येत्युक्त्वा ‘ द्वाभ्याम् ’ इत्यत्र “ सुपि च ” (७।३।१०२) इति दीर्घो भवत्येव । तं विना तस्यापरिनिष्ठितत्वात् । “ भ्यसोभ्यम् ” (७।१।३०) इति सूत्रे भाष्येपि ‘ परिनिष्ठितस्य ’ इति पठितम् इत्याहुः । तच्च पूर्वोदाहृतभाष्यस्यज्ञापकविरुद्धमपि मनोरमायां पक्षान्तरपरत्वादिना कथंचिद्योजितमिति तत एव बोद्धव्यम् ॥९४॥

इति सप्तमे तृतीयः पादः ॥

पूर्वत्रासिद्धीये न स्थानिवत् ॥ ९५ ॥

तेन पापच्यते पापक्तिः इत्यत्र त्रिपादीस्थे रुत्वे कर्तव्ये अतो लोपस्य न स्थानिवत्त्वम् । न चेदमन्यथासिद्धं “ यङोचि च ” (२।४।७४) इत्यज्हस्थानिवत्त्वम् … न पदान्त० ” (१।१।५८) इति सूत्रे वरलसमुदायस्य लुप्तत्वादिति वाच्यम् । “ न पदान्त० ” (१।१।५८) इति सूत्रे वरल्समुदायस्य लुप्तत्वादिति वाच्यम् ।

१ A. ज्ञापकाविरुद्धमपि. २ B. om. पापच्यते. ३ A. यङोचि चेत्यासिच्समुदायस्य.

ग्रहणाल्लिङ्गात् अतो लोपे कृते यङोचि चेत्यनेन यमात्रस्य लोपविधानात् । यत्तु अत्र [1] "न धातुलोप०" (१।१।४) इति सूत्रं तु अचि प्रत्यये समुदायस्यैव लोप इति ज्ञापनार्थं तेन 'सनीसस्रंसे' इत्यादि सिद्धमन्यथेह स्थानिवत्त्वात् "आनिदिताम्०" (६।४।२४) इति नलोपः स्यादिति सीरदेवस्तन्न । संज्ञापूर्वकस्य विधेरनित्यत्वेन लोपाप्रसङ्गात् । "न धातुलोप०" (१।१।४) इति सूत्रं तु नारम्भणीयमिति भाष्य एव स्पष्टम् । इयं परिभाषा भाष्ये "नाग्लोपिशास्वृदिताम्" (७।४।२) इत्यत्र ज्ञापिता । तथा हि । 'अ[2]भेमालत्'। इत्यादौ अजादेशस्य स्थानिवत्त्वादेव णौ ह्रस्वो न भविष्यतीति किमग्लोपिनां नेति प्रतिषेधेन । स एवं ज्ञापयति इत आरभ्य स्थानिवद्भावो न भवतीति। वस्तुतः पूर्वत्रासिद्धमित्युक्तेः "अचः परस्मिन्०" (१।१।५७) इति सूत्रं त्रिपाद्यां नैव प्रवर्तते इति न्यायसिद्धार्थानुवाद एवायम् । अत एव "तस्य दोषः संयोगादिलोपलत्वणत्वेषु" (१।१।५८ वा. १०) इति निषिद्धमिति स्थानिवद्भावविधानपरतया व्याख्यातम् ॥९५॥

उपजातनिमित्तोप्युत्सर्ग उपजनिष्यमाणनिमित्तेनापवादेन बाध्यते ॥ ९६ ॥

तेन ददतीत्यत्र उपजातनिमित्तमपि अन्तरङ्गं "झोन्तः" (७।१।३) इत्यन्तादेशमुपजनिष्यमाणनिमित्तः "अदभ्यस्तात्" (७।१।४) इत्यदादेशो बाधते[3]। अत्र ज्ञापकं "शीङः सार्वधातुके गुणः" (७।४।२१) इत्यत्र इक्परिभाषोपस्थापकं गुणग्रहणम् । यदा ह्येषा न स्यात्तदा शेते इत्यादिकमुत्सर्गभूतया इत्संज्ञया ङकारलोपे सति एकारविधानेन सिद्धमिति तन्न कुर्यात् । सत्यां त्वस्यामित्संज्ञां बाधित्वा ङकारस्यैकारो मा भूदित्येतदर्थमुपयुज्यते । अत एव 'सार्वधातुकमपित्, न शीङः' इति पठित्वा शीङ उत्तरस्य ङित्वं न निषिद्धं सूत्रकृता ॥ ९६ ॥

णौ कृतं स्थानिवत् ॥ ९७ ॥

णौ[4]वजादेशरूपं यत्कार्यं तद् द्विर्वचने कर्तव्ये स्थानिवत्स्यात् । रूपातिदेशश्चायम्। "द्विर्वचनेऽचि" (१।१।५९) इत्यत्रास्य भाष्ये पाठात् । तत्सूत्रे[5] ह्यज्ग्रहणं भाष्योक्तरीत्या जेघ्रीयते देध्मीयते इत्यत्र कौस्तुभोक्तरीत्या त्वधिजगे इत्यत्र स्थानिवद्भावं निवर्तयितुं क्रियते । यदि हि रूपं स्थानिवत्तदैव तत्सार्थकमिति । उदाहरणम् । तुनावयिषति। अत्र स्थानिवत्त्वेन अभ्यास उकारःश्रूयते । तथा पुस्फारयिषति अपुस्फुरत् । णौ इति पर[6]सप्तमीति व्याचक्षाणस्य सीरदेवस्य मते तु नेदं सिध्येत् । किं[7] च इह निर्दिष्टपरिभाषाग्रहाद्दुर्वचा । णावित्यस्यासत्तिवशात्कृत एव संबन्धादनूद्यमानविशेषणत्वेन 'विधौ परिभाषोपतिष्ठते नानुवादे' इति तन्निषेधात् । न च तस्यानित्यत्वं युक्तं "संख्याव्ययादेर्ङीप्" (४।१।२६) इत्यत्र 'संख्याव्ययाभ्याम्' इत्येतावतैव सिद्धौ आदिग्रहणस्य तत्रा-

१ A om. अन्यथेह....भाष्य एव स्पष्टम् । २ B. अममलदित्यादौ. ३ B. बाध्यते। ४ A. णावचादेशरूपं. ५ A. तत्सूत्रे ह्यज्ग्रहणेन रूपातिदेशो ज्ञापितः । तद्धि अज्ग्रहणं. ६ A. परसप्तम्यन्तं. ७ A om. किं चेह निर्दिष्टपरिभाषा........इति दिक् ।

तिरिच्यमानस्य ज्ञापकत्वसंभवादिति वाच्यम् । संख्याव्ययाभ्यामित्युच्यमाने द्विविधोघ्नीत्यादौ संख्योधसोः पदान्तरेण व्यवधाने ङीब् न स्यादिति तत्सिद्धयर्थमादिग्रहणस्यावश्यकत्वे ज्ञापकत्वासंभवात् । प्रत्युत आदिग्रहणस्य अर्धमात्रानुच्चारणकृतलाघवार्थत्वाच्च ॥

नन्वेवं णावित्यस्य स्थानिवत्स्यादिति प्रधानक्रियान्वयं संभवन्तं विहाय कथं कृतेन संबन्ध इति चेच्छृणु । यत्र कृतात्मसंस्कारो गुणः प्रधानमुपकरोति तत्रान्मनोपि संस्कारमनुभूय प्रधानेनाभिसंबध्यते । यदाहुः —

' गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते ।
प्रधानस्योपकारे हि तथा भूयसि वर्तते ' इति ।

प्रकृते हि णौ इति विशेषणसंबन्धरूपसंस्कारयुक्तः कृतरूपो गुणः प्रधानस्य महत उपकाराय प्रभवति । पुस्फारयिषतीत्यादौ व्यवहितस्यापि स्थानिवद्भावसिद्धेः इति दिक् ॥ परिभाषायां ज्ञापकं " ओः पुयण्ज्यपरे " (७।४।८०) इत्यत्र ओः पयोरिति वक्तव्ये वर्गप्रत्याहारजग्रहः । स हि मिमावयिषति अमीमवत् इत्यादावित्यर्थः । इत्वं तु णिचि वृद्धौ कृतायां द्विर्वचने ह्रस्वे सन्यत इति इत्वे च सिध्यति इति वर्गप्रत्याहारजग्रहो व्यर्थः सन् णौ स्थानिवत्त्वं ज्ञापयति । यद्यपि भाष्यवार्तिकयोः "ओः पुयण्ज्यपरे" (७।४।८०) इति सर्वं सूत्र ज्ञापकमत्रोक्तं तथापि तस्योक्तविषय एव तात्पर्यम् । पिपविषते यियविषति इत्यत्र " द्विर्वचनेऽचि" (१।१।५९) इति स्थानिवत्त्वोद्भूतोकारस्य इत्वार्थं पयोरित्यस्यावश्यकत्वात् ॥

नन्वेवमचिकीर्तादिति न स्यात् । कृतधातोर्णिचि चङि " उपधायाश्च " इति इदादेशस्य स्थानिवद्भावापत्तेः । मैवम् । यत्र हि द्विरुक्तौ अभ्यासोत्तरखण्डे आद्योच्प्रक्रियायामौननत् इत्यादौ परिनिष्ठिते वा चुक्षावयिषति इत्यादौ अवर्णो लभ्यते तत्रैव स्थानिवत्त्वम् । ज्ञापकस्य तुल्यजातीयापेक्षत्वादिति भाष्ये स्पष्टम् । परिनिष्ठितरूप एवावर्णपरत्वं तत्रैव इति बोपदेवीयनियमस्त्वनाकरत्वादुपेक्ष्यः । उपेक्ष्यौ च ज्ञापकस्य सामान्यविषयत्वमभिदधानौ न्यासकृत्सीरदेवौ ॥ यदपि सीरदेवेन ज्ञापकसिद्धं न सर्वैरुच्चिकीर्तदित्यत्र व्यवस्था अन्यथा अधिजिगापयिषतीत्यत्र का गतिरित्युक्तं तदपि स्वयं भाष्यविरुद्धं च । कथं तर्हि अधिजिगापयिषतीति । इत्थम् । तत्र स्थानिवत्त्वे णिचो द्वित्वं स्यात् । तथा चोक्तस्थलयोरवर्णपरता नास्तीति न स्थानिवत्त्वमिति । स्यादेतत् । दिदीवनीयिषतीत्यादावपि स्थानिवत्त्वापत्तिः । णिविपर्ययत्वे मानाभावेन द्वित्वे कार्ये आदेशः स्थानिवत् स्यात् इति ज्ञापनादिति चेन्न । येन नाव्यवधानमिति न्यायेन द्वित्वनिमित्तप्रत्ययस्यैकप्रत्ययव्यवधायकत्वं णेरेव संभवतीति तद्विषय एव तत्कल्पनात् । यद्वा णौ स्थानिवदिति वार्तिकवलाण्णेर्लाभः ॥ ९७ ॥

---

१ A. जग्रहोः । स हि विभावयिषति अबीभवदित्यादौ. २ A. वर्गयण् जग्रहो व्यर्थः सन्. ३ A. दिदावनीयिषति. ४ A णिविषयत्वेन.

अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन् बाधन्ते ॥ ९८ ॥

अत्र अपवादशब्दस्थाने बाधकशब्दः पठितो "गुणो यङ्लुकोः" (७।४।८२) इत्यत्र भाष्ये। तेन मीमांसते अचीकरत् इत्यत्र "सन्यतः" (७।४।७९) इतीत्वं "मान्बधदान्०" (३।१।६) इति "दीर्घो लघोः" (७।४।९४) इति दीर्घविधिभ्यां [1]परान्तरङ्गाभ्यामपि न बाध्यते। ज्ञापकमत्र "दीर्घोऽकितः" (७।४।८३) इत्यत्र अकिद्ग्रहणम्। अन्यथा हि यंयम्यते इत्यत्र नुकि कृतेऽनजन्तत्वाभावाद्दीर्घो न भविष्यतीति किं तेन[2]। अत एव "णिजां त्रयाणां गुणः श्लौ" (७।४।७५) इत्यैकारविधानेनैव सिद्धौ गुणग्रहणं चिन्त्यप्रयोजनम् ॥९८॥

इति परिभाषाभास्करे सप्तमोऽध्यायः ॥

पूर्वत्रासिद्धीयमद्विर्वचने ॥ ९९ ॥

"पूर्वत्रासिद्धम्" (८।२।१) इदं सूत्रं द्विर्वचने कर्तव्ये न प्रवर्तते इत्यर्थः। यथा वाक्यसंस्कारपक्षे कृष्णादिसंबुद्ध्यन्त उपपदे ऋधेः क्विनि कृते कृष्ण ऋध् ति इति स्थितेऽसिद्धत्वात्पूर्वमाद्गुणे कृते (६।१।८७) "अचो रहाभ्यामिति" (८।४।४६) द्वित्वं "झषस्तथोर्धोऽधः" (८।२।४०) इति विधीयमानाज् "झलां जश् झशि" (८।४।५३) इति जश्त्वप्रवृत्तिनिमित्ताद् द्वित्वात्प्रागेव परत्वात्प्रवर्तते। अत एव मनोरमायां कृष्णार्द्धिरित्यत्र "अचो रहाभ्यां०" (८।४।४६) इति पक्षे द्वित्वमिति मूलप्रतीकमुपादाय ऋधेर्धस्येति भावः इत्युक्तम्। सुध्युपास्यः इत्यत्र एकदा द्वित्वे कृते पुनर्धस्यैव वा द्वित्वमिति प्रकाशकृद्धाक्यवत् "उभौ साभ्यासस्य" (८।४।२१) इति सूत्रगतसाभ्यासग्रहणज्ञापकप्रकृतपरिभाषाऽनित्यत्वज्ञापनाद्वा। एतेन "झलां जश्०" (८।४।५३) इति जशोऽप्रतिहतप्रसरत्वादुक्तन्यायेन जशः सिद्धत्वाच्चोदाहृतमनोरमाग्रन्थोऽयुक्त इति वदन्तः परास्ताः। यथा वा 'उचिच्छिषति' अत्र तुकि कृते चछाभ्यां सहितस्य इटो द्वित्वम्। निमित्तापाये नैमित्तिकस्याप्यपाय इति त्वनित्यम्। तथा द्रोग्धा द्रोग्धा द्रोढा द्रोढा। अत्र असिद्धयोरपि घत्वढत्वयोः कृतयोरेव "सर्वस्य द्वे" (८।१।१) इति द्वित्वम्। इदं च "[3]सर्वस्य द्वे" (८।१।१) इति सूत्रे कात्यायनवाक्यं परिभाषारूपेण पठ्यते। तत्रैव सूत्रे मत्वर्थीयाच्प्रत्ययान्तः सर्वशब्दो ज्ञापक इत्यन्ये। "न मु ने" (८।२।३) इत्यत्र नेति योगविभागेन संग्राह्येयमित्यपरे ॥ ९९ ॥

अनित्यमागमशासनम् ॥ १०० ॥

तेन 'क्षुब्धो राजा', 'शाकं पचानस्य' इत्यत्र नेण्मुकौ। [4]शुंवृत्ता, मुक्ता इत्यत्रागमानित्यत्वान्नेट् इति केषांचिदुक्तिस्तु न युक्तेति प्रतिपादितं मोक्षवादे मुक्तोपदेशाख्ये

---

१ A om. परान्तरङ्गाभ्यामपि. २ A. किं तेनेत्याहुः। वस्तुतस्तु 'अस्ति च संभवो यदुभयं स्यात्' इत्यनेनैवेयं गतार्था। ३ A सर्वस्य द्वे ज्ञापकमित्यन्ये. ४ A शुवृत्तं शुक्ता.

अस्माभिरिति तत एव ज्ञेयम् । ज्ञापकमत्र "आनि लोट्" (८।४।१६) इत्यत्र आकारग्रहणम् । अन्यथा हि 'नि लोट्' इत्येवावक्ष्यत् ॥ १०० ॥

निमित्तापाये नैमित्तिकस्याप्यपायः ॥ १०१ ॥

निमित्तेन निर्वृत्तं नैमित्तिकम् । "वुञ्छणादि"—(४।२।८०) सूत्रेण कुमुदादित्वाट्ठक् । निमित्तस्य कारणस्य अपाये नाशे नैमित्तिकस्य कार्यस्य अभावो भवति । तेन स्नातीत्यादौ षकारानिवृत्तौ णकारोऽपि निवर्तते । यथा तार्किकनये अपेक्षाबुद्धेर्नाशे द्वित्वं, यथा च वेदान्तिनये प्रारब्धनाशे विक्षेपः, यथा चोपाधिनाशे स्फटिकलौहित्यादि । अत्र ज्ञापकमपि "उदः स्थास्तम्भोः०" (८।४।६१) इत्यत्र 'स्था' इति निर्देशः । अनित्या चेयम् "च्छ्वोः शूडनुनासिके च" (६।४।१९) इत्यत्र सतुग्ग्रहणात् । प्रकृतिप्रत्ययापत्तिवचनाद्वा । तेन 'अस्यापत्यम् इः' इत्यत्र प्रकृत्यपायेऽपि प्रत्ययानिवृत्तिः । दण्डनाशेऽपि घटनाशस्यादर्शनात् । अत एव विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति भरतसूत्रविवेचनावसरे रसं प्रति विभावादिवस्तुनः अकृतव्यूहपरिभाषया परामर्शस्य निमित्तकारणत्वाभ्युपगमेऽपि तन्नाशस्य न रसप्रत्ययनाशकता इत्यलंकारिकाः । वस्तुतः अकृतव्यूहपरिभाषाया एवेयं प्रपञ्चभूता ॥ १०१ ॥

इत्यष्टमे चतुर्थः अष्टमाध्यायश्च ॥

अथ प्रायेण न्यायमूलाः परिभाषाः—

गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ १०२ ॥

मुख्यं प्रसिद्धं तदन्यद् गौणम् । यदुक्तं हरिणा—

"अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः
शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु" (वाक्यपदीय) इति ।

तत्सदृशेषु न शास्त्रं प्रवर्त्यमित्यर्थः । प्रसिद्धत्वेन प्रथमोपस्थितशब्देष्वेव विधेर्निराकाङ्क्षत्वात् । यथा गौरनुबध्यतामित्युक्ते वाहीको न बध्यते इति "अग्नेः स्तुत्स्तोमसोमाः" (८।३।८२) इत्यत्र भाष्ये न्यायसिद्धतास्याः स्पष्टा । तेन तत्सूत्रेऽग्निशब्दस्य मुख्यस्य ग्रहणाद् अग्निसोमौ माणवकौ इत्यत्र गौणे न षत्वम् । प्रातिपदिककार्ये तु नेयं प्रवर्तते इति गौर्वाहीकः इत्यादौ वृद्ध्यादि सिध्यतीति "ओत्" (१।१।१५) इति सूत्रे कैयटः । दीक्षितास्तु गौणमुख्यन्यायस्य अर्थवद्ग्रहणमूलकत्वादर्थोपस्थितेश्च रूपविशेषग्रहसापेक्षत्वाद्विशिष्टरूपोपादान एव प्रवृत्तेर्गां वाहीकं पाठयेत्यादौ वर्णपुरस्कारेण विधीयमाने वृद्ध्यादिके तु कर्तव्ये प्रवृत्तिर्न इति प्रत्यपीपदन् ॥ १०२ ॥

---

१ A षकारस्य निमित्तो णकारनिमित्ती. २ A गौणं लाक्षणिकं मुख्यं शक्तम् । तथा गौरनुबध्यतामित्युक्ते. ३ A reads एतेन तेन रक्तं रागादिति सूत्रे रज्यतेनेनेति रागः कुसुम्भादिस्तद्योगाद् वस्त्रमपि लक्षणया कुसुम्भादि, ततः स्वार्थे अण्प्रत्यये 'कौसुम्भम्' इति वर्धमानमतमाश्रित्योदाहृतं परास्तम् । गङ्गायां घोषः इत्यत्र अधिकरणसंज्ञा तु भवत्येव । "साधकतमं करणम्" इति तमग्रहणेन क्वचिदेतत्परिभाषाया अनुपस्थितिज्ञापनात् instead of प्रातिपदिककार्ये तु...... इति प्रत्यपीपदन् ।

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः ॥ १०३ ॥

कृत्रिमं पारिभाषिकम् । यथा "कर्मणि द्वितीया" (२।३।२) इत्यत्र "कर्तुरीप्सिततमं कर्म" (१।४।४९) इति कर्म गृह्यते, न तु क्रिया । संज्ञाविधिभिः सर्वार्थाभिधानशक्तानामपि संज्ञाशब्दानां व्यवहाराय विशिष्टार्थशक्तेर्नियमनादर्थान्तरप्रतीतिरप्रसङ्गात् । "कर्तरि कर्मव्यतिहारे" (१।३।१४) इत्यत्र तु क्रियैव गृह्यते कर्मग्रहणसामर्थ्यात् । अन्यथा हि क्रियाया अपि संदर्शनप्रार्थनाध्यवसायैराप्यमाणत्वेन कृत्रिमकर्मत्वादुभयोरपि ग्रहणप्रसङ्गे किं तेन । किं चात्मनेपदेनाक्षिप्तोनुवृत्तो वा धातुः कर्मव्यतिहारेण विशेष्यते तत्र वर्तमानाद्धातोरिति । न च धातुः साधनकर्मणि वर्तते तस्य क्रियावाचित्वादिति पदमञ्जर्यादावुक्तम् ॥ १०३ ॥

प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः ॥ १०४ ॥

अप्रधानमनुवादकम् । तेन "आकडारादेका संज्ञा" (१।४।१) इत्यत्र प्रथमोपस्थितोपि "प्राक्कडारात्समासः" (२।१।३) इति कडारशब्दो न गृह्यते । तस्यानुवादकत्वात् । अपि तु कडाराः कर्मधारय इति । यथा हि सैन्ययुद्धे जयपराजयौ राजन्येव प्रतीयेते ॥ १०४ ॥

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ १०५ ॥

तेन 'नारायणं नमस्कृत्य' 'मुनित्रयं नमस्कृत्य' इत्यादौ "नमःस्वस्ति०" (२।३।१६) इति न चतुर्थी अपि तु द्वितीयैवेत्याहुः । माधवाचार्यास्तु "नमःस्वस्ति०" (२।३।१६) इति सूत्रे अर्थवत्त्वात्स्वस्त्यादिसाहचर्याच्च स्वरादिपठितस्यैव नमःशब्दस्य ग्रहणात् साक्षात्प्रभृतिगणस्थनमःशब्दयोगे द्वितीयैव भवति । गतिसंज्ञकस्यापि नमःशब्दस्योपसर्गवद् द्योतकतया कृञ एव प्रणत्यर्थकत्वेन "कर्मणि द्वितीया" (२।३।२) इत्यस्य प्रवृत्तेरित्याहुः । कथं तर्हि 'रावणाय नमस्कुर्याः' इति भट्टिः । रावणमनुकूलयितुमित्यर्थः इति गृहाण । अत्र नमःस्वस्तीति चतुर्थीति जयमङ्गलोक्तिस्तु चिन्त्या । "नमस्पुरसोः०" इति सत्वानापत्तेः । नैमः कुर्याः इत्यपि पाठोस्तीति केचित् । ननु नमस्यति देवानित्यत्र स्वरादिनमःशब्देन योगे चतुर्थ्यापत्तिः । मैवम् । प्रकृत्यन्तरत्वात्सिद्धमिति वार्तिकात् प्रकृतपरिभाषया वा इति भाष्ये व्यक्तम् । गुरुचरणास्तु 'ज्योतिष्टोमेन यजेत' इत्यादौ यत्रैकस्या विभक्तेरुपपदविभक्तित्वं कारकविभक्तिकत्वं च तत्रैवेयं प्रवर्तते । तेन ज्योतिष्टोमेनेति करणे तृतीया न तु अभेद इति वदन्ति । युक्तं चैतद् । सूक्तवाकेन प्रस्तरं प्रहरति इत्यादौ तथैवाङ्गीकृतत्वाद् । अन्ये तूदाहरणान्तरमप्याहुः । तथा हि । कुतोध्यागच्छति कुतः पर्यागच्छति इत्यादौ अधिपर्योः "अधिपरी अनर्थकौ" (१।४।९३) इति कर्मप्रवचनीयत्वेपि किंशब्दात् अपादाने पञ्चम्येव न द्वितीयेति । अस्मिन्मतेन्तरङ्गन्यायसिद्धोयमर्थः ॥ १०५ ॥

---

१ A om. संज्ञाविधिभिः......प्रतीतिरप्रसङ्गात् । २ A om. गतिसंज्ञकस्यापि... प्रवृत्तेः. ३ A. B. इति गृहाण. ४ B. om. नमः कुर्याः इत्यपि पाठोस्तीति केचित् । ५ A. सूक्तवाक्येन.

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ १०६ ॥

रथकाराधिकरणन्यायसिद्धोयमर्थः । यत्तु अत एव ' कर्मणि कुशलः ' इति रूढिहेतुकल्लक्षणोदाहरणं काव्यप्रकाशकारोक्तमसमञ्जसं मत्वा 'कलिङ्गः साहसिकः' इत्युदाहृतं साहित्यदर्पणे तच्चिन्त्यमुदाहरणम् । " दीधीवेवीटाम् " (१।१।६) इत्यत्र दीङ् क्षये इत्यादीनामग्रहणम् । न्यासकारस्त्वाह—यदि तत्र दीङादिग्रहणमभिमतमभविष्यत्तदा निःसंदिग्धं[1] ' वीवेधीदीटाम् ' इति न्यासमकरिष्यत् । न चैवं कृतमतो न तेषां ग्रहणमिति निःप्रयोजनेयमिति । किं च । प्रधानाप्रधानन्यायेनैवेयं गतार्था ॥ १०६ ॥

गामादाग्रहणेष्वविशेषः ॥ १०७ ॥

तेन घुमास्थागादिसूत्रे (६।४।६६) गाग्रहणेन 'गै शब्दे' 'गा स्तुतौ' 'गाङ् गतौ' "गाङ् लिटि" (२।४।४९) "णौ च संश्चङोः" (२।४।५१) इत्येते गृह्यन्ते । माग्रहणेन च मामाङ्मेङः । दाग्रहणेन " दाधा घ्वदाप् " (१।१।२०) इत्यत्र दोदाङ्देङ्दाणः । इयं च परिभाषा लक्षणपरिभाषाया अपवादः, न तु अर्थवत्परिभाषायाः । तेन घुसंज्ञायां दाशयतेर्दाशब्दस्य न ग्रहणमनर्थकत्वात् नापि साहचर्यपरिभाषायाः[2] । तेन " ह्वावामश्च " (३।२।२) इत्यत्र सानुबन्धकह्वेञ्वेञ्साहचर्यान्माङ्मेङोरेव ग्रहणं न तु मा माने इत्यस्य । तथा " गापोष्टक् " (३।२।८) इत्यत्र परस्मैपदिना पिबतिना साहचर्याद्गायतेरेव ग्रहणं न गाङः । गा स्तुतौ इत्यस्य तु छान्दसत्वान्न ग्रहणम् । एवं घ्वादिसूत्रेपि[3] गायतेरेव ग्रहणमस्तु इति चेन्न । गाङ्कुटादीत्यत्र (१।२।१) गाङ्ग्रहणात् । नापि लुग्विकरणपरिभाषायाः । तेन " नेर्गदनद० " (८।४।१७) इत्यत्र माङ्मेङोरेव ग्रहणं न तु मा माने इत्यस्य । एतेन[4] नेर्गदेति सूत्रे मा माने इत्यस्यापि ग्रहणात् 'प्रणिमाति' इति चन्द्रगोमिनोदाहृतं परास्तम् । नापि निरनुबन्धकपरिभाषायाः । तस्याः प्रत्ययविधिविषयत्वात् ॥ १०७ ॥

सामान्यातिदेशे विशेषस्यानतिदेशः ॥ १०८ ॥

तेन " आशंसायां भूतवच्च " (३।३।१३२) इति सूत्रे ' देवश्चेदवर्षीद्धान्यमवाप्स्म ' इत्यत्र भूतसामान्यविहितो लुङेव भवति न लङ्लिटौ[5] । लोकेपि हि ब्राह्मणवत् क्षत्रिये वर्तितव्यम् इत्युक्ते ब्राह्मणसामान्यकार्यमतिदिश्यते । अत एव[6] ' व्यातेने किरणावलीमुदयनः ' इत्यत्र व्यातेने इत्याशंसायां लिडिति केषांचिद्व्याख्याया अनादेयत्वादेतत्प्रयोगे साधुत्वं चिन्त्यम् । यत्तु वर्धमानेन " णलुत्तमो वा " (७।१।९१) इति ज्ञापकादपरोक्षेपि लिडिति समाहितं तदयुक्तम् । ' बहु जगद पुरस्तात्तस्य मत्ता किलाहम् ' इत्यादौ चित्तविक्षेपात्पारोक्ष्य एव " णलुत्तमो वा " (७।१।९१) इत्यस्य उपक्षीणसामर्थ्येन मूलशैथिल्यादिति दिक् ॥

---

१ A. om. निःसंदिग्धं......ग्रहणमिति. २ A. साहचर्यपरिभाषाया तेन. ३ A. घ्वादिसूत्रेपि. ४ A. om. एतेन नेर्गदेति......परास्तम् । ५ A. न लिङ्लिटौ; B. न लिङ्लोटौ. ६ A. om. अत एव व्यातेने........इति दिक् ।

नन्वेवं स्थानिवत्सूत्रेपि सामान्यातिदेशादग्रहीत् इत्यत्र "ग्रहोऽलिटि दीर्घः" (७।२।३७) इति दीर्घस्य स्थानिवत्वात् ईङ्रूपत्वं न स्यादिति चेन्न। एतन्न्यायस्याव्यापकत्वात्। अनल्विधाविति विधिग्रहणात्। तेन हि अलाश्रयो विधिरल्विधिरित्युत्तरपदलोपिसमासलाभात् सामान्याश्रयविशेषाश्रयं च यावत्प्राप्तं कार्यं निषिध्यते। तत्र यदि सामान्यस्यैव कार्यस्यातिदेशो भवेत्तदा अनलः इति संबन्धवाचिन्या षष्ठ्यैव तेन तस्मात्तस्य तस्मिंश्च विधौ स्थानिवत्त्वनिषेधः सिध्यति इति तस्याप्रयोजनत्वात् प्रदीव्य इत्यादौ च वलादिविशेषाश्रयस्येटः अतिदेशो न स्यादेवेति किं विधिग्रहणेन इति सीरदेवस्तन्न। व्यूढोरस्केनेत्यादौ विसर्गादिर्व्यापकीभूतस्याट्त्वादेर्निषेधेनैव तस्य चरितार्थत्वात्। अतो "न ल्यपि" (६।४।६९) इति निषेधाद् विशेषातिदेशोऽभ्युपेयः ॥ १०८ ॥

श्रुतानुमितयोः श्रुतसंबन्धो बलीयान् ॥ १०९ ॥

तेन 'हर्यनुभवः' इत्यत्र रेफस्य न द्वित्वम्। "अचो रहाभ्यां०" (८।४।४६) इति प्रत्यक्षश्रुतेन निमित्तभावेन यरन्तर्भाविणानुमितस्य कार्यित्वस्य बाधात्। अस्तु द्वित्वेऽस्य "रो रि" (८।३।१४) इति लोपो भविष्यतीति चेन्न। द्वित्वस्य लोपं प्रत्यसिद्धत्वात्। "हलो यमां०" (८।४।६४) इत्यस्यापि वैकल्पिकत्वेन पाक्षिकरेफद्वयश्रवणापत्तेः। तक्रकौण्डिन्यन्यायसिद्धोयमर्थः। यत्तु पुरुषोत्तमदेवः "ग्रामह्रदोत्तरपदात्" (४।२।१४२) इति निर्देशोऽस्या ज्ञापक इत्याह तन्न। "हलो यमां०" (८।४।६४) इति लोपसंभवात् ॥१०९॥

पित्स्वराच्चित्स्वरो बलीयान् ॥ ११० ॥

तेन 'आम्बष्ठ्या' इत्यत्र चापि कृते "चितः" (६।१।१६३) इत्यन्तोदात्तत्वेन अनुदात्तत्वं बाध्यते। अयमर्थश्चाप्करणादेव लभ्यते। अन्यथा हि टाबुत्तरं यङश्चेत्येवावक्ष्यत्। चापः पित्त्वं तु हल्ङ्याबित्यादौ विशेषणार्थम् ॥११०॥

विधिनियमसंभवे विधिरेव ज्यायान् ॥ १११ ॥

नियमः परिसंख्या। सा च त्रिदोषा। यथाहुः—

"श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा" इति॥

अतो विधेः संभवे सा न युक्ता। तेन "ह्वावामश्च" (३।२।२) इत्यत्र सोपसर्गेभ्य एव तेभ्यो नान्येभ्यः इति नियमो न भवति ॥१११॥

---

१ A. इङ्रूपं न स्यात्. २ A. तस्याः प्रयोजनत्वात्. ३ A. om. इति सीरदेवस्तन्न......विशेषातिदेशोऽभ्युपेयः। ४ A. द्वित्वमेकस्य. ५ Before सा च त्रिदोषा A. ins. तस्वं चान्यनिवृत्तिविषयत्वम्। यत्तु 'तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते' इति तत्तु लक्षणघटकमपि स्वौत्सर्गिकमित्यवधेयम्। अत एवैकस्मिन्कार्येऽन्यतरस्य सत्त्वेन सह पाक्षिकप्राप्तावपि नानृतं वदेदिति परिसंख्याविधिरेव न नियमविधिरिति।

प्रतिपदविधानाद्योगविभागो गरीयान् ॥ ११२ ॥

तेन 'जभोचि, रभेश्च, नेट्यलिटि' इति न्यासेन एकस्य रधिग्रहणस्य न वैयर्थ्यमिति सीरदेवः । तन्न । एवं हि योगविभागमाश्रित्य पदप्रत्याख्यानं भाष्योक्तमसंगतं स्याद् । अत[1] एव "तृज्वत् क्रोष्टुः" (७।१।९५) इत्यत्र 'एवं तर्हि द्विः क्रोष्टुग्रहणं योगविभागाल्लघु' इति कैयटीयं चिन्त्यम् । न च रधिग्रहणं व्यर्थम् । एकदेशानुवृत्तिपरिभाषाया अनित्यत्वज्ञापनार्थत्वात् । किं च "श्वीदितो निष्ठायाम्" (७।२।१४) इत्यत्र श्विग्रहणस्य यथा भवता वैचित्र्यं प्रयोजनमभिहितमेवमिहाप्यस्तु । एतेन एकयोगे ग्रन्थगौरवेपि एकैकवाक्यार्थप्रतीतिरुदेति, भिन्नयोगे तु प्रतियोगं भिन्नबुद्ध्युदयाद् व्यक्तं प्रतिपत्तिगौरवमिति परास्तम् । तस्मादयुक्तैवेयं[2] परिभाषा ॥११२॥

सर्वविधिभ्यो लोपविधिर्बलवान् ॥ ११३ ॥

तेन कानि सन्ति इत्यत्र यैण[3]: प्रागल्लोपः इति सीरदेवस्तन्न । परिभाषां विनापि परत्वान्नित्यत्वाच्च यणः प्रागल्लोपस्य प्रवृत्तेः । न चान्तरङ्गत्वात् पूर्वं यण् आशङ्क्यः । अहल्न्यूहपरिभाषाविरोधात् । यदप्याह प्रत्ययलक्षणसूत्रं (१।१।६२) अत्र ज्ञापकमिति तदपि न । 'जगत्' इत्यत्रान्तरङ्गत्वात् क्विपो लोपे ततो "गमः क्वौ" (६।४।४०) इत्यनुनासिकलोपात् "ह्रस्वस्य पिति" (६।१।७१) इति तु गतार्थतया प्रत्ययलक्षणसूत्रस्योपक्षीणत्वात् ॥ ११३ ॥

अनैन्त्याविकारे अन्त्यसदेशस्य ॥ ११४ ॥

अनैन्त्यस्य[4] यो विकारः सोन्त्यसमीपवर्तिनः स्यान्न यस्य कस्यचित् । तेन अदमुयङ् इत्यत्र परस्यैव मुत्वं यदुक्तं केचिदन्त्यसदेशस्येति । यत्तु[5] "ष्यङः संप्रसारणम्०" (६।१।१३) इत्यत्र भाष्ये प्रत्याख्यातेयमिति केचित्तन्न । प्रयोजनानामुदाहरणमात्रमित्याद्यग्रिमभाष्यग्रन्थविरोधात् । नन्वेवं "तदोः सः सावनन्त्ययोः" (७।२।१०६) इत्यत्रैतत्परिभाषाप्रवृत्तेः स्यः इत्यत्र सत्वं न स्यात् इति चेत् न । "र्वोरुपधाया दीर्घ इकः" (८।२।७६) इत्यत्र उपधाग्रहणबलादस्या असार्वत्रिकत्वज्ञापनात् । अत एव "अत उपधायाः" (७।२।११६) इत्यत्र उपधाग्रहणं कृतम् । अत एव यत्रैव अन्त्यसदेशश्चानन्त्यसदेशश्च युगपत् समवस्थितौ तत्रैषा परिभाषा भवतीति भाष्यकारेणोक्तम् ॥ ११४ ॥

नानर्थकेलोन्त्यविधिरनभ्यासविकारे ॥ ११५ ॥

अव्यक्तानुकरणस्येत्यत्र आच्छब्दस्य संपूर्णस्य पररूपसिद्धिस्तु नास्याः प्रयोजनम् । "नाम्रेडितस्यान्त्यस्य तु वा" (६।१।९९) इति ज्ञापकेनैव तत्सिद्धेः । नापि

---

१ A. om. अत एव ...... चिन्त्यम् । २ B. om. तस्मादयुक्तैवेयं परिभाषा । ३ A. reads यणः प्रागल्लोपः । प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रमेवात्र मूलम् । भाष्ये त्वियं न स्वीकृता अर्थाभावात् ॥ ४ A. अन्त्य for अनन्त्य. ५ A. reads ष्यङः संप्रसारणमित्यत्र भाष्ये तु प्रत्याख्यातेयम् for यत्तु...भाष्यकारेणोक्तम् ॥

" हलि लोपः " (७।२।११३) इति इदूपलोपेन आभ्यामिति रूपसिद्धिः । अनादेशे कृते तस्य लोपविज्ञानात् । " घ्वसोरेद्धावभ्यासलोपश्च " (६।४।११९) इत्यत्रापि हि द्विप्रकारकानिर्देशान्न दोषः । अत्रग्रहणस्य सर्वादेशार्थत्वाच्च " अत्र लोपोऽभ्यासस्य " (७।४।५८) इत्यत्र । अत एव " तस्य लोपः " (१।३।९) इत्यत्र तस्यग्रहणमावश्यकम् । एवं च अजीगणत् इत्याद्यर्थमनभ्यासविकारे इत्यपि न वाच्यम् ॥ ११५॥

प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् ॥ ११६ ॥

इयमपि परिभाषा मास्तु । प्रयोजनाभावात् । "सनाशंसभिक्ष उः" (३।२।१६८) इत्यत्र हि गर्गादिषु जिगीषुशब्दपाठादेव प्रत्ययस्य ग्रहणम् । अत एव "अपृक्त एकाल्प्रत्ययः" (१।२।४१) "स्वाङ्गे तस्प्रत्यये कृभ्वोः" (३।४।६१) इत्यत्र प्रत्ययग्रहणस्य न वैयर्थ्यम् । अत एव च " विज इट् " (१।२।२) इति सूत्रे प्रत्ययस्येटो न ग्रहणम् । " वृद्धिर्यस्याचामादिस्तद् वृद्धम् " (१।१।७३) इत्यत आदिग्रहणानुवृत्तेर्वा ॥११६॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ ११७ ॥

तेन " पूरणगुण० " (२।२।११) इत्यत्र पूर्वोत्तरसाहचर्यात् कृदेवाव्ययं गृह्यते तथा " गुपूधूपविच्छि० " (३।१।२८) इत्यत्र पनिसाहचर्यात्पणेरपि स्तुत्यर्थस्यैव ग्रहणम् । लौकिक एवायं न्यायः । तद्यथा । अस्य गोर्द्वितीयेनार्थ इति गौरेवोपादीयते नाश्वो न गर्दभः इति । अव्यापकश्चायम् । द्विस्त्रिश्चतुरित्यत्र (८।३।४३) कृत्वोर्थग्रहणात् । तेन " दीधीवेवीटाम् " (१।१।६) इत्यत्र आगमस्य इटो ग्रहणम् ॥११७॥

यथोद्देशं संज्ञापरिभाषम् ॥ ११८ ॥

तेन " ईदूदेद्द्विवचनम्० " (१।१।११) इत्यग्नी इत्यादौ प्लुतस्यासिद्धत्वेन तत्काल[1]त्वात् प्रगृह्यसंज्ञा । अन्यथा तत्र "अणोऽप्रगृह्यस्य०" (८।४।५७) इत्यवसाने अनुनासिकापत्तिः । तथा राज्ञः इत्यत्र श्चुत्वे कर्तव्ये असिद्धपरिभाषया नाल्लोपस्यासिद्धत्वम् ॥११८॥

कार्यकालं संज्ञापरिभाषम् ॥ ११९ ॥

तेन रामैः इत्यादावसिद्धस्यापि रोरुकारस्य इत्संज्ञा । तथा ' नार्कुटः ' इत्यत्र " खरवसानयोः० " (८।३।१५) इति त्रिपादीस्थो विसर्जनीयो न । असिद्धपरिभाषया वृद्धेरसिद्धत्वात् । अनयोः परिभाषयोर्भाष्यकारादिभिरादृतत्वात् प्रामाण्यमिष्टानुसाराच्च व्यवस्था ॥ ११९ ॥

गणकार्यमनित्यम् ॥ १२० ॥

" तनादिकृञ्भ्य उः " (३।१।७९) इत्यत्र तनादित्वेन सिद्धे पुनः कृञ्ग्रहणात् । तेन ' न विश्वसेत् ' इत्यादि सिद्धम् । " अदिप्रभृतिभ्यः० " (२।४।७२) इति शब्लुको गणकार्यत्वेनानित्यत्वात् । एतेन 'स चापि गदया दैत्यः सर्वा एवाहनत्प्रभुः' इति मार्कण्डेयपुराणं व्याख्यातम् ॥१२०॥

---

१ A. om. अत एव...आवश्यकम्. २ A. om. ईदूदेद्द्विवचनं...तथा. ३ A. om. रामः इत्यादौ...तथा. ४ A. om. अदिप्रभृतिभ्यः...व्याख्यातम्.

संदेहे बहुवचनं प्रयोक्तव्यम् ॥ १२१ ॥

यथा ' कति भवतः पुत्राः ' इति । अत्र व्याप्तिन्यायेन बहुवचनं सर्ववचनानामनुग्रहार्थम् ॥ १२१ ॥

अर्थवशाद्विपरिणामः ॥ १२२ ॥

यथा ' उच्चानि देवदत्तस्य गृहाणि आमन्त्रयस्वैनम् ' इति । तेन " लिङः सलोपोनन्त्यस्य " (७।२।७९) इत्यत्र सप्तम्यन्तं सार्वधातुकपदं षष्ठ्यन्ततया विपरिणम्यते ॥ १२२ ॥

योगविभागादिष्टसिद्धिः ॥ १२३ ॥

यथा " सुसर्वार्धाज्जनपदस्य " (७।३।१२) " दिशोऽमद्राणाम् " (७।३।१३) " प्राचां ग्रामनगराणाम् " (७।३।१४) इति सूत्रत्रयकरणात् 'पौर्वमद्रः ' इतिवत् ' सौम्द्रः ' इति न भवति । पूर्वसूत्रे अमद्राणामित्यस्यासंबन्धात् । तथोत्तरसूत्रे दिशः इत्येवानुवर्तत इति 'सुपाटलिपुत्रकः' इति न भवति । यत्तु " दिशोऽमद्राणाम् " (७।३।१३) इति सूत्रे योगविभाग उत्तरार्थ इत्याहुस्तच्चिन्त्यम् । तथा " न मु ने " (८।२।३) इत्यत्र न इति योगविभागात् कचित् पूर्वत्रासिद्धीयं बाध्यते । यत्तु अतः 'समार्त' इति सिद्धं सिज्लोपस्यै सिद्धत्वेन परत्वाद् वृद्धेर्बाधादिति तन्न । अच्यैष्ट इत्यादावपि तथात्वापत्तेः । एतेनैव समाध्यन्तरं निरसनीयम् ॥ १२३ ॥

पर्यायशब्दानां गुरुलाघवचर्चा नाद्रियते ॥ १२४ ॥

तेन ' नद्याः शेषस्यान्यतरस्याम् " (६।३।४४) इत्यत्र वाग्रहणेनान्यतरस्यामित्यस्य गतार्थत्वं नै शङ्क्यम् । ज्ञाप्याभावविषयिका चेयम् ॥ १२४ ॥

व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ १२५ ॥

तेन " इको ह्रस्वोऽङ्यो गालवस्य " (६।३।६१) इत्यनेन कौमुदगन्धीपतिः इत्यत्र न ह्रस्वः । जातिपक्षस्यायं प्रपञ्चः ॥ १२५ ॥

भावाभावात्मको हि विकल्पः ॥ १२६ ॥

तत्र जातेरेकत्वादेकत्र कृतोपि भावः सर्वत्र कृतः इति विकल्पस्य चरितार्थत्वात् लक्ष्ये लक्षणं सकृत् प्रवर्तते ॥ १२६ ॥

अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति ॥ १२७ ॥

तेन "यावादिभ्यः कन्" (५।४।२९) इत्येवमादीनां प्रत्ययसंज्ञा ॥ १२७ ॥

अन्वर्था हि प्रत्ययसंज्ञा ॥ १२८ ॥

अर्थं प्रति यन्ति ते प्रत्ययाः इति । विकारागमयोस्तु नानया प्रत्ययत्वम् । यत्र हि प्रकृतेः पृथगर्थः तत्रैवास्याः प्रवृत्तिः । न हि विकारागमरहिता प्रकृतिरर्थवती ॥ १२८ ॥

---

१ A. व्याप्तिन्यायेन हि बहुवचननिर्देशेन सर्ववचनानामनुग्रहात् ॥ २ A. सिज्लोपस्यासिद्धत्वेन. ३ A. न शक्यम् । ४ A. विकल्पार्थः ।

ज्ञापकसिद्धं न सर्वत्र ॥ १२९ ॥

अगत्या तदाश्रयणात् । तेनात्मनेपदानित्यत्वेन न सर्वत्र परस्मैपदमपि तु शिष्टप्रयोगे ॥ १२९ ॥

युगपदधिकरणवचने द्वन्द्वः ॥ १३० ॥

अधिकरणस्य वृत्तिघटकपदार्थस्य युगपद्वचनेभिधाने द्वन्द्वो भवति । तेन ' अङ्गवङ्गकलिङ्गाः ' इत्यत्र " तद्राजस्य बहुषु तेनैवास्त्रियाम् " (२।४।६२) इत्यनेनापत्यकृतबहुत्वविवक्षायां विधीयमानस्य लुकः सिद्धिः । युगपदधिकरणतां विना हि तद्राजार्थस्य बहुत्वान्वयो न स्यात् । बहुत्वस्याव्यासज्यवृत्तित्वात् । तद्राजान्तेन बहुत्वोक्तौ लुक् इत्युच्यमाने तु प्रियो वाङ्गो येषां ते प्रियवङ्गाः इत्यत्रापि लुक् प्रसज्येत । तथा देवदत्तयज्ञदत्तौ पचतः इत्यत्र एकदैव क्रियाकारकसंबन्धः । अतो द्विवचनान्तक्रिया ताभ्यां संबध्यते । एकदैव हि द्वन्द्वे प्रत्येकं सर्वार्थप्रतीतिः । तथा चाहुः—

" सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयोः ।
क्रमेणार्थप्रतीतौ तु न स्याद् द्विवचनादिकम् " इति ।

यत्तु " चार्थे द्वन्द्वः " (२।२।२९) इत्यत्र भाष्ये ' सेयं युगपदधिकरणवचनता दुःखा दुरुपपादा च ' इत्युक्तं तस्यायमाशयः । विग्रहे खल्वपि युगपद्वचनता दृश्यते इत्यादिपूर्वभाष्यानुसाराद्विग्रहे दुरुपपादा प्रक्रियादशायां प्रथमवृत्तस्यैकवचनस्य विग्रहे त्यक्तुमशक्यतया देवदत्तौ च यज्ञदत्तौ चेति विग्रहस्यानौचित्यात् । समासदर्शनानुरोधमात्रेण तदौचित्याङ्गीकारे तु षष्ठीतत्पुरुषादेरुच्छेदप्रसङ्ग इति । अत एवोक्तम्—

केषांचिन्मतमेतत्तु पापीयः प्रतिभासते ।
न हि वाक्ये पदस्यास्ति शक्तिः सर्वार्थबोधने इति ।

अत एव राजपुरुषः इत्यत्र राजा चासौ पुरुषश्चेति विग्रहं वदन्तो मीमांसकाः प्रत्युक्ताः ॥ १३० ॥

पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण ॥ १३१ ॥

तेन संस्क्रियते इत्यत्र " गुणोर्ति० " (७।४।२९) इति न गुणः । उपसर्गसंबन्धिकार्यस्य सुटो बहिरङ्गत्वेन असिद्धत्वात् । " णेरध्ययने वृत्तम् " (७।२।२६) इत्यत्र अध्ययने इति निर्देशात् । यद्यपि " ओमाङोश्च " (६।१।९५) इति सूत्रीयाङ्ग्रहणमूलकपूर्वधातुरुपसर्गेणयुज्यतेइत्यादिपक्षः ' परिष्कण्णः, ' इत्यत्रैवात्र गृह्यते तथापि न गुणः । नित्यग्रहणानुवृत्त्या नित्यसंयोगादेव तद्विधानात् ॥ १३१ ॥

---

१ A. एकदैकैकानामर्थाभिधाने द्वन्द्वो भवति । तेन देवदत्तयज्ञदत्तौ पठतः for अधिकरणस्य वृत्तिघटकपदार्थस्य........यज्ञदत्तौ पचतः. २ B. क्रियया कारकसंबन्धः. ३ B. om. एकदैव...प्रतीतिः । ४ A. om. तस्यायमाशयः .... मीमांसकाः प्रत्युक्ताः । ५ A. om. णेरध्ययने....निर्देशात् ।

समासकृत्तद्धितेषु संबन्धाभिधानं भाव[1]प्रत्ययेन अन्यत्र रूढयभिन्नरूपाव्यभिचारिसंबन्धेभ्यः ॥ १३२ ॥

समासादिभ्य उत्पन्नेन भावप्रत्ययेन संबन्धोऽभिधीयते । ' [2]वृत्तौ भेदाविनाभाव्यनुमेयभेदकः संसर्गः सामर्थ्यम् ' इति समर्थसूत्रगतभाष्योक्तमव्यमपक्षे संबन्धस्य समासार्थतया समासादिभ्य उत्पन्नस्य भावप्रत्ययस्य कृत्प्रकृत्यर्थतावच्छेदकशक्त्यैव उपपत्तौ शक्त्यन्तरकल्पनाया अनौचित्यात् इति न्यायसिद्ध एवार्थोऽयं भर्तृहरिणा स्पष्टप्रातिपदिकार्थमुपनिबद्धः । अत एव एतद्वचनादेव संबन्धे शक्त्यन्तरमस्तु इत्यपास्तम् । तत्र तावत्समासाद्यथा-नीलोत्पलत्वम् । अत्र हि नीलोत्[3]पलयोरभेदसंबन्धः त्वप्रत्ययेन प्रतीयते । [4]ननु परविशेषणत्वेन उपस्थितस्य पदार्थतावच्छेदकद्वयस्य कथं सामानाधिकरण्ये अन्वयः । अत्राहुः—कर्मधारयोत्तरभावप्रत्ययस्य सामानाधिकरण्यसंबन्धेनैकपदार्थतावच्छेदकवदपरपदार्थतावच्छेदकमर्थः । तथा च नीलत्ववदुत्पलत्वमेव प्रकृते त्वर्थ इति । केचित्तु नीलपदार्थतावच्छेदकीभूतनीलत्वं प्रकारीभूयैव भासते इति नीलत्ववदभिन्नोत्पलवृत्तित्वेन भाने नीलत्ववद्वृत्तित्वमुत्पलत्वे लब्धमिति सामानाधिकरण्यलाभ इत्याहुः । अन्ये तु भावप्रत्ययस्य धर्मत्वमेव शक्यतावच्छेदकं प्रकृते तु लक्षणया निर्वाहः इति वदन्ति । [5]तच्चिन्त्यम् । घटत्वमित्यादौ प्रतीतिवैचित्र्यानुभवविरोधात् । तस्माद् गोत्वमित्यत्र जातौ कैयटरीत्या शब्दस्वरूपे वा, रूपत्वमित्यत्र रूपवृत्तिजातौ, शुक्लत्वमित्यत्र ये गुणिपराः शुक्लादयस्तेभ्यो गुणे, ये तु गुणपरास्तेभ्यो जातौ, पाचकत्वमित्यत्र क्रियायां, डित्थत्वमित्यत्र संज्ञायां, धूमवत्त्वमित्यत्र धूमे इति यथानुभवं भावप्रत्ययः ॥

तत्र जात्यादाववच्छेदकं गोत्वत्वादिकम् । तच्च यद्यप्यविद्या आविद्यको धर्मविशेषो ब्रह्मसत्तैव वा जातिरिति स्वीकारात्सर्वत्रैकमेव तथापि तत्तत्प्रकृतिसमभिव्याहारस्य तत्तद्विशेषबोधजनकत्वमिति नातिप्रसङ्गः । तथा च वार्तिकम्—यस्य गुणस्य भावाद् द्रव्ये निवेशस्तदभिधाने त्वतलाविति । त्वतलाविति भावप्रत्ययोपलक्षणम् । अत्र[6] धर्मिप्रकारको धर्मविशेष्यको बोधः । अथवा शब्दप्रकारको धर्मविशेष्यको बोधः इति सिद्धान्तः ॥

[7]कृदन्ततद्धिताभ्यां यथा—पाचकत्वम्, दण्डित्वम् । अत्र हि विक्लित्त्यनुकूलव्यापाराश्रयत्व दण्डसंबन्धश्चार्थः । रूढ्यभिन्नरूपाव्यभिचारिसंबन्धेभ्यस्तु न संबन्धाभिधानम् । [8]जात्यादेरेव प्रतीतेः । तत्र रूढिविशिष्टाद्यथा कुम्भकारत्वमिति । अत्र जातिरभिधीयते भावप्रत्ययेन । [9]अभिन्नरूपात् शुक्तित्वम् । अत्र " तदस्यास्त्यस्मिन्निति " (५।२।९४) मतुपो

---

१ A. om. भावप्रत्ययेन. २ A. om. वृत्तौ भेदाविनाभाव्यनुमेयभेदकः .... तत्र तावत्. ३ A. नीलत्वोत्पलत्वयोः सामानाधिकरण्यसंबन्धः त्वप्रत्ययेन. ४ B. om. ननु ... अन्वयः. ५ A. om. तच्चिन्त्यम्...नातिप्रसङ्गः । ६ A. om. अत्र धर्मिप्रकारकः... इति सिद्धान्तः । ७ A. कृत्तद्धितयोर्यथा पक्तृत्वं दण्डित्वम् । अत्र पाकतत्कर्तृत्वयोः सामानाधिकरण्यम्, दण्डदण्डित्वयोः सामानाधिकरण्यं चार्थः । ८ A. om. जात्यादेरेव...यथा. ९ A. अभिन्नरूपं तृतीयः । अत्र " पूरणाद्भागे तीयादन् " इत्यना भागमात्रमुच्यते न संबन्धः । अव्यभिचारित्वं अत्रोत्पत्तिमत्त्वपि.

" गुणवचनेभ्यो मतुपो लुगिष्टः " (५।२।९४ वा. ३) इति लुमत्वात्तद्धितान्तत्वेऽपि तत उत्पन्नेन त्वप्रत्ययेन संबन्धो नाभिधीयते, अपि तु गुणः । घटः शुक्ल इति प्रतीत्या गुणगुणिनोर्भेदसंबन्धस्य तिरोधानात् । अव्यभिचारिणः । सत्ता । अत्रोत्पत्तिमत्स्वपि पदार्थेषु सच्छब्दः संबन्धं न व्यभिचरतीति तत उत्पन्नो भावप्रत्ययः क्रियासंबन्धं नाह, अपि तु सामान्यम् । इदं च भर्तृहरेर्वचनमित्युक्तम् ॥

यत्तु मथुरानाथभट्टाचार्या वदन्ति पाणिनिवचनमिदमिति तदतिरभसादिति ध्येयम्। अत एव वार्तिककारवचनमिदमिति वदन्तो मीमांसका अपि प्रत्युक्ताः । केचित्तु व्याख्यानतो विशेषप्रातिपत्तिरित्यादिसर्वपरिभाषा व्याडिमुनिना विरचिता इत्याहुः । वस्तुतस्तु नानाचार्याणामिमानि वचनानि पूर्वोदाहृतल्ण्सूत्रादिगतणकाराद्युपादानतात्पर्यज्ञापकेन्य इष्टसिद्धये केवलं पाणिन्यादिमुनित्रयेण उररीक्रियन्ते । अत एवानिष्टप्रसक्तौ नैषामभ्युपगम इति ज्ञापकसिद्धं न सर्वत्र इति परिभाषाया न्यायसिद्धार्थानुवादकत्वमिति न परिभाषावशादनिष्टापादनं सांप्रतमिति सकलेष्टसिद्धिः ॥१३२॥

परिभाषाकमलिनीर्युक्तिरुग्भिर्विकासयन् ।
भास्करः पण्डितालीनां स्वान्तं सानन्दयत्वयम् ॥१॥
त्र्यम्बकेश्वरपुरीकृतवासादग्निहोत्रकुलनीरधिचन्द्रात् ।
पुण्यपूर्णपुरुषोत्तमभट्टादुद्बभूव सुकृती हरिभट्टः ॥२॥
वेदवाक्यनिचयावचयेन प्रेक्षितो विधिरिवेह बुधौघैः ।
लोकगीतविमलायतकीर्तिः सोऽपि सज्जनमणिर्जयति स्म ॥३॥
तस्मादुद्धातकीर्तेः कृतसुकृतभरान्मन्त्रतन्त्रस्वतन्त्रः
साधूनामग्रगण्यो गददलनविधौ माणवानां शरण्यः ।
काशीक्षेत्राधिवासी हतकठिनतरारातिषड्वर्गदम्भः
श्रीमानापाजिभट्टः सुरयजनरतः शुद्धधीराविरासीत् ॥४॥
तनय इह तदीयोऽरीरचद् भास्कराख्यः
फणिपतिभणितीनामाशयं भावयित्वा ।
परमतपरिभाषाभास्करं चार्पितं
सुखवरविपादे सच्चिदानन्दरूपे ॥५॥
अत्राभ्यासो मनीषा वा सुकृतं वा न किंचन ।
मन्ये गुरुकृपाकल्पलतिकैवादिकारणम् ॥६॥

इति श्रीमत्कश्यपान्वयसंभवाग्निहोत्रिकुलतिलकायमानहरिभट्टसूनुश्रीमदापाजिभट्टसूनुभास्करविरचितः परिभाषाभास्करः समाप्तिमगमत् ॥ शुभं भवतु ॥

---

१ A. om. अत एव वार्तिककार ... प्रत्युक्तः । २ A. om. वस्तुतस्तु ... सकलेष्टसिद्धिः । ३ A. विकाशयन्...स्वान्तमानन्दयत्वयम् ॥ इति श्रीमदग्निहोत्रिवंशावतंसहरिभट्टात्मजापाजिभट्टसुतपराभिधानहरिभास्करकृतः परिभाषाभास्करः समाप्तिमगात् ॥

श्रीनागेशभट्टविरचितपरिभाषेन्दुशेखरस्थपरिभाषापाठः ।

(१६)

[N. B. Serial numbers are given according to the edition of the Bhandarkar Oriental Research Institute, Poona. In the Anandāśrama Poona edition, continuous numbers are given as 93, 94, 95 etc. instead of 93-1, 93-2 etc. and 120-1, 120-2 etc. The Paribhāṣā येन नाप्राप्ते etc. below No. 57 is read as an additional one in the Banaras editions.]

१ व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ।
२ यथोद्देशं संज्ञापरिभाषम् ।
३ कार्यकालं संज्ञापरिभाषम् ।
४ अनेकान्ता अनुबन्धा इति ।
५ एकान्ताः ।
६ नानुबन्धकृतमनेकाल्त्वम् ।
७ नानुबन्धकृतमनेजन्तत्वम् ।
८ नानुबन्धकृतमसारूप्यम् ।
९ उभयगतिरिह भवति ।
१० कार्यमनुभवन्हि कार्यी निमित्ततया नाश्रीयते ।
११ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ।
१२ निर्दिश्यमानस्यादेशा भवन्ति ।
१३ यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ।
१४ अर्थवद्ग्रहणे नानर्थकस्य ।
१५ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ।
१६ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन तदन्तविधिं प्रयोजयन्ति ।
१७ एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ।
१८ क्वचिदेकदेशोऽप्यनुवर्तते ।
१९ भाव्यमानेन सवर्णानां ग्रहणं न ।
२० भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति ।
२१ वर्णाश्रये नास्ति प्रत्ययलक्षणम् ।
२२ उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ।
२३ प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ।
२४ प्रत्ययग्रहणे चापञ्चम्याः ।
२५ उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम् ।
२६ स्त्रीप्रत्यये चानुपसर्जने न ।
२७ संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ।
२८ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ।
२९ पदाङ्गाधिकारे तस्य च तदन्तस्य च ।
३० व्यपदेशिवदेकस्मिन् ।
३१ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ।
३२ व्यपदेशिवद्भावोऽप्रातिपदिकेन ।
३३ यस्मिन्विधिस्तदादावल्ग्रहणे ।
३४ सर्वो द्वन्द्वो विभाषैकवद् भवति ।
३५ सर्वे विधयश्छन्दसि विकल्पन्ते ।
३६ प्रकृतिवदनुकरणं भवति ।
३७ एकदेशविकृतमनन्यवत् ।
३८ पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ।
३९ पुनःप्रसङ्गविज्ञानात्सिद्धम् ।

४० सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ।

४१ विकरणेभ्यो नियमो बलीयान् ।

४२ परान्नित्यं बलवत् ।

४३ शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति ।

४४ शब्दान्तरात्प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम् ।

४५ लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः ।

४६ क्वचित्कृताकृतप्रसङ्गमात्रेणापि नित्यता ।

४७ यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् ।

४८ यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम् ।

४९ स्वरभिन्नस्य प्राप्नुवन् विधिरनित्यो भवति ।

५० असिद्धं बहिरङ्गमन्तरङ्गे ।

५१ नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ।

५२ अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते ।

५३ पूर्वोत्तरनिमित्तकार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न ।

५४ अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते ।

५५ वार्णादाङ्गं बलीयो भवति ।

५६ अकृतव्यूहाः पाणिनीयाः ।

५७ अन्तरङ्गादप्यपवादो बलीयान् ।

[येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ।]

५८ क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ।

५९ पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ।

६० मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ।

६१ अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति ।

६२ पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः ।

६३ प्रकल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते ।

६४ उपसंजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधत इति ।

६५ अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते ।

६६ अभ्यासविकारेषु बाध्यबाधकभावो नास्ति ।

६७ ताच्छीलिकेषु वासरूपविधिर्नास्ति ।

६८ क्त्ल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ।

६९ लादेशेषु वासरूपविधिर्नास्ति ।

७० उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ।

७१ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।

७२ विभक्तौ लिङ्गविशिष्टाग्रहणम् ।

७३ सूत्रे लिङ्गवचनमतन्त्रम् ।

७४ नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ।

७५ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः ।

७६ सांप्रतिकाभावे भूतपूर्वगतिः ।

७७ बहुव्रीहौ तद्गुणसंविज्ञानमपि ।

७८ चानुकृष्टं नोत्तरत्र ।

७९ स्वरविधौ व्यञ्जनमविद्यमानवद् ।

८० हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ।

८१ निरनुबन्धकग्रहणे न सानुबन्धकस्य ।

८२ तदनुबन्धकग्रहणे नातदनुबन्धकस्य ।

८३ क्वचित्स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ।

८४ समासान्तविधिरनित्यः ।

८५ संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।
८६ संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ।
८७ ताच्छीलिके णेऽण्कृतानि भवन्ति ।
८८ धातोः कार्यमुच्यमानं तत्प्रत्यये भवति।
८९ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ।
९० लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ।
९१ प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम् ।
९२ अङ्गवृत्ते पुनर्वृत्तावविधिः ।
९३-१ संज्ञापूर्वकविधेरनित्यत्वम् ।
९३-२ आगमशास्त्रमनित्यम् ।
९३-३ गणकार्यमनित्यम् ।
९३-४ अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्।
९३-५ नञ्घटितमनित्यम् ।
९३-६ आतिदेशिकमनित्यम् ।
९३-७,८ सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् ।
९३-९ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ।
९३-१० विधौ परिभाषोपतिष्ठते नानुवादे।
९४ उपपदविभक्तेः कारकविभक्तिर्बलीयसी।
९५ अनन्त्यविकारेऽन्त्यसदेशस्य ।
९६ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ।
९७ प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः।
९८ अवयवप्रसिद्धेःसमुदायप्रसिद्धिर्बलीयसी।
९९ व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ।
१०० विधिनियमसंभवे विधिरेव ज्यायान् ।
१०१ सामान्यातिदेशे विशेषानतिदेशः ।
१०२ प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम्।
१०३ सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ।
१०४ श्रुतानुमितयोः श्रुतसंबन्धो बलवान् ।
१०५ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ।
१०६ गामादाग्रहणेष्वविशेषः ।
१०७ प्रत्येकं वाक्यपरिसमाप्तिः ।
१०८ क्वचित्समुदायेपि ।
१०९ अभेदका गुणाः ।
११० बाधकान्येव निपातनानि ।
१११ पर्जन्यवल्लक्षणप्रवृत्तिः ।
११२ निषेधाश्च बलीयांसः ।
११३ अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ।
११४ योगविभागादिष्टसिद्धिः ।
११५ पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते ।
११६ ज्ञापकसिद्धं न सर्वत्र ।
११७ पूर्वत्रासिद्धीयमद्विर्वचने ।
११८ एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भविष्यति ।
११९ संप्रसारणं तदाश्रयं च कार्यं बलवत्।
१२०-१ क्वचिद् विकृतिः प्रकृतिं गृह्णाति।
१२०-२ औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ।
१२०-३ श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥
१२१ पदगौरवाद्योगविभागो गरीयान् ।
१२२ अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ।

इति श्रीनागेशभट्टकृतपरिभाषेन्दुशेखरपरिभाषापाठः समाप्तः ॥

श्रीमच्छेषाद्रिसुधीकृतः

॥ परिभाषाभास्करः ॥

१७

नत्वा गुरुचरणयुगं स्मृत्वा ब्रह्माखिलात्मकं विमलम् ।
रचयति शेषाद्रिसुधीः परिभाषाभास्करं स्वशिष्यकृते ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥ १ ॥

व्याख्यानतः अभिमतार्थबोधकाभियुक्तवचनाद्विशेषस्य अभिमतार्थस्य निर्णयो भवति । अत्र संदेहपदेन कोटिद्वयावगाहिज्ञानमभिमतानभिमतसाधारणज्ञानमनभिमतमात्रज्ञानं चोच्यते । यस्माच्छास्त्रमलक्षणमभिमतार्थाबोधकं न भवतीत्यर्थः । तत्र 'ङेर्यः' (७।१।१३) 'ङेराम्नद्याम्नीभ्यः' (७।३।११६) इत्यादौ कोटिद्वयावगाहिज्ञाने प्राप्ते 'ङेर्यः' इत्यत्र चतुर्थ्येकवचनस्य 'ङेराम्' इत्यत्र सप्तम्येकवचनस्य ग्रहणमिति व्याख्यानादभिमतस्य निर्णयः । 'प्रातिपदिकान्तनुम्विभक्तिषु च' (८।४।११) इत्यादौ उत्तरपदतदितरप्रातिपदिकान्तमात्रग्रहणे प्राप्ते उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वमिति व्याख्यानादभिमतस्य निर्णयः । 'अट्कुप्वाङ्नुम्व्यवायेपि' (८।४।२) इत्यादौ अनभिमतस्य नुम एव ग्रहणे प्राप्ते नुम्ग्रहणमनुस्वारोपलक्षणार्थमिति व्याख्यानादभिमतस्य निर्णयः । अत्र ज्ञापकम्—'अइउण्' इत्यत्र आसक्तस्यैव णकारस्य 'लण्' इत्यत्र पुनरासञ्जनम् । तद्धि अनभिमतप्रतीतिकृदपि क्रियते अभिमतार्थप्रतीतेर्व्याख्यानसाध्यत्वबोधनाय ॥ १ ॥

सर्वसंज्ञापरिभाषविषयं पक्षद्वयम्—

यथोद्देशं संज्ञापरिभाषम् ॥ २ ॥

कार्यकालं संज्ञापरिभाषम् ॥ ३ ॥

उद्देशमनतिक्रम्य यथोद्देशम् । यथार्थेऽव्ययीभावः । उद्देशशब्देन ज्ञापकदेश उच्यते । स च पठितानां पाठदेशः । इतरेषां ज्ञापनदेशः । तमनतिक्रम्य संज्ञापरिभाषं वर्तत इत्यर्थः । संज्ञासूत्रैः स्वोच्चारणप्रदेशे वृद्ध्यादिपदानां शक्तिं ग्राहयद्भिः सर्वशास्त्रे व्यवहारप्रवर्तनात् । परिभाषाभिश्च स्वप्रदेशे स्वार्थं बोधयन्तीभिः सकलप्रदेशोपकारात् । आचार्यप्रणीतत्वादस्य किंचित्प्रयोजनं भविष्यतीति यो गृह्णाति, तदपेक्षोऽयं पक्षः ॥

यत्तु—"परिभाषाविषये 'तस्मिन्०' (१।१।६६) इत्यादिवाक्यार्थबोधे सप्तमीनिर्देशाद क्वेति पर्यालोचनायां सकलतत्तद्विध्युपस्थितौ सकलतत्तत्संस्काराय गुणभेदं परिकल्प्य एकवाक्यतयैव नियमः । कार्यकालपक्षे तु त्रिपाद्यामप्युपस्थितिरिति विशेषः ।

एतदेवाभिप्रेत्य ' अधिकारो नाम त्रिप्रकारः । कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति ' इत्याद्युक्तं भाष्ये (१।१।४९ वा. ४)। दीपो यथा प्रभाद्वारा गृहस्थसर्वपदार्थप्रकाशकः, एवमेषोऽधिकारोऽपि स्वबुद्धिजननद्वारा सर्वशास्त्रोपकारकः । एतच्च पक्षद्वयसाधारणं भाष्यम् । पक्षद्वयेऽपि प्रदेशैकवाक्यताया इतः प्रतीतेः । तत्रैतावान्विशेषः— यथोद्देशपक्षे परिभाषाप्रदेश एव सर्वविध्युपस्थितिपूर्वकं तैरेकवाक्यता परिभाषाणाम् । तदुक्तं ' क्क्ङिति च ' (१।१।५) इति सूत्रे कैयटेन— ' यथोद्देशे प्रधानान्यात्मसंस्काराय संनिधीयमानानि गुणभेदं प्रयुञ्जते ' इति । ' कार्यकालपक्षे तु तत्तद्विधिप्रदेशे परिभाषाबुद्ध्यैकवाक्यता ' इति । अत्र एकदेशस्थ इत्यनेन तत्तद्देशे तत्तद्बुद्धावपि तत्तद्देशीयत्वं वारयति । संज्ञाशास्त्रस्य तु कार्यकालपक्षे न पृथग्वाक्यार्थबोधः, किं तु प्रदेशवाक्येन सहैव । अत एव 'अणोऽप्रगृह्यस्य०—' (८।४।५७) इत्येतदेकवाक्यतापन्नम् 'अदसो मात्' (१।१।१२) इत्येतत्प्रति न मुत्वादि असिद्धम्, असिद्धत्वस्य कार्यार्थितया कार्यज्ञानोत्तरमेव प्रवृत्तिः कार्यज्ञानं च प्रदेशदेश एवेति तद्देशस्थस्यासिद्धत्वात्पूर्वग्रहणेनाग्रहणात् । एवं तद्बोधोत्तरमेव विरोधप्रतिसंधानं चेति तत्रत्यपरत्वमेव विप्रतिषेधसूत्रप्रवृत्तौ बीजम् । अत एव कार्यकालपक्षे 'अयादिभ्यः परैव प्रगृह्यसंज्ञा' (महाभाष्य१।१।१२) इति 'अदसो मात्' (१।१।१२) इति सूत्रे भाष्ये उक्तम् । आकडारादिस्थभपदसंज्ञादिविषये तु यथोद्देशपक्ष एवेति तत्रत्यपरत्वेनैव बाध्यबाधकभावः । पदादिपदानां तत्र जातशक्तिग्रहेणैव त्रिपाद्यामपि व्यवहारः । अत एव ' पूर्वत्रासिद्धम् ' (८।२।१) इति सूत्रे 'परिभाषाणामेव त्रिपाद्यामप्रवृत्तिमाशङ्क्य कार्यकालपक्षाश्रयणेन समाहितम् 'इत्याहुः"(परिभाषेन्दुशेखर परि.२,३)॥

अत्रेदं वक्तव्यम्— क्व सप्तमीनिर्देश इत्याद्यपेक्षायाः किमस्य प्रयोजनमित्याद्यपेक्षायाः भविष्यति किंचिदनेन प्रयोजनमिति सामान्यप्रयोजनकल्पनया शान्तिवद् भविष्यति शास्त्रे क्वचित्सप्तमीनिर्देश इति सामान्यकल्पनया शान्तिसंभवेन गुणभूतपरिभाषादेशे प्रधानभूतसकलतद्विध्युपस्थितिपूर्वकमेकवाक्यत्वकल्पनमन्याय्यम् । लोके हि राज्ञ उपकारापेक्षायामपि राजदेशं प्रति सेवकौ गच्छति, न तु राजा सेवकदेशम् । प्रदेशविशेषाकाङ्क्षा तु प्रयोजनविशेषाकाङ्क्षावत् कार्यकालपक्षेणैव शाम्यति । अपि च पक्षद्वयेऽप्येकवाक्यत्वे यथोद्देशकार्यकालपक्षयोर्भेदो न स्यात् । " कार्यकालपक्षे त्रिपाद्यां परिभाषाप्रवृत्तिर्विशेषः " (परिभाषेन्दुशेखर परि. २,३) इत्यप्ययुक्तम् । तत्तद्देशं गच्छतां तत्तद्देशस्थत्वे यथोद्देशपक्षेऽपि त्वत्पक्षे परिभाषादेशं गच्छतां त्रिपादीपठितकार्याणां परिभाषादेशस्थत्वेन तत्र ' पूर्वत्रासिद्धम् ' (८।२।१) इत्यस्याप्रवृत्त्या यथोद्देशपक्षेऽपि त्रिपाद्यां परिभाषाणां प्रवृत्तिसंभवात् तत्तद्देशं गच्छतामपि न तत्तद्देशस्थत्वमिति त्वदीयकल्पनायां कार्यकालपक्षेऽपि त्रिपाद्यां परिभाषाप्रवृत्तेर्दुरुपपादत्वात् ॥

किं च प्रधानान्यङ्गदेशं गच्छन्ति किं तदितरसमस्ताङ्गयुक्तानि, तद्रहितानि वा । आद्ये एकं कार्यं प्रति अनेकस्य संज्ञापरिभाषस्याङ्गतया सर्वविशिष्टनिष्प्रयोजनानेकवाक्यार्थबोधकल्पनापत्तिः । अन्त्ये भाष्योक्तवाक्यापरिसमाप्तिन्यायेन शाब्दबोधस्यैवानुत्पत्त्यापत्तिः । इह सप्तमीनिर्देश इत्यादिबोधकल्पनं तु यथोद्देशकार्यकालपक्षयोर-

काकारबोधवादिनस्तवासंमतं व्यर्थं च। यथोद्देशपक्षे तत्तद्देशस्थसर्वसंज्ञापरिभाषार्थबोधोपस्कृतेन कार्यकालपक्षे स्वदेशसंनिहितसर्वसंज्ञापरिभाषासहितेन प्रधानविधिनैवाभिमतार्थबोधजननात्॥

"अधिकारो नाम त्रिप्रकारः (महाभाष्य १।१। ४९ वा. ४) इति भाष्यं पक्षद्वयसाधारणम्" (परिभाषेन्दुशेखर परि. २,३) इत्यप्ययुक्तम्। 'एकदेशस्थः' इत्यनेन तस्य यथोद्देशपक्षविषयत्वप्रतीतेः। किं च गुणभूतपरिभाषानुरोधेन प्रधानविधीनामावृत्तिकल्पने 'गर्गाः शतं दण्डयन्ताम्। अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्डयन्ति' (महाभाष्य १।१।१ वा. १२) इति वृद्धिसूत्रस्थभाष्यग्रन्थः, दण्डपरायां हि चोदनायां 'शतस्येप्सिततमत्वात्प्राधान्यम्। तच्च अर्थिनश्च राजान इत्यनेन सूच्यते। अपादानस्थानप्राप्ता गर्गाः गुणकर्म। न च गुणभेदेन प्रधानभेदः इति नावृत्तिः शतदण्डनस्येति समूहे शतदण्डनं समाप्यते' (महाभाष्यप्रदीप १।१।४९ वा. ४) इति तत्रत्यकैयटग्रन्थश्च विरुध्येत॥

'क्ङिति च' (१।१।५) इति सूत्रस्थकैयटग्रन्थस्तु यथोद्देशपक्षे प्रधानानां परिभाषासंनिधिबोधको न्यायविरोधादुक्तभाष्यकैयटग्रन्थविरोधाच्चोपेक्ष्यः। तथा हि ईदूत्सूत्रे (१।१।११) 'यथोद्देशपक्षे न संज्ञापरिभाषस्य प्रदेशैकवाक्यता' इति कैयटः स्पष्टमाह। एवं 'पूर्वत्रासिद्धम्' (८।२।१) इति सूत्रेऽपि। किं च प्रधानानां गुणदेशसंनिधौ गुणभेदप्रयुक्तिरपि न युक्ता, सकृच्छ्रुतस्यैव गुणस्य भेदमन्तरेण युगपदुपस्थितसर्वप्रधानोपकारकत्वसंभवात्। तथा च एकशेषसूत्रे भाष्ये 'यथैव बह्वो यत्रः, एवं प्रकृतयोऽपि बह्वयः स्युः' इति कंचित्पक्षमुपन्यस्य, 'अथ वा पुनरस्त्वेका प्रकृतिः। बह्वश्च यत्रः' (महाभाष्य १।२।६४ वा.२०) इति न्याय्यं पक्षान्तरमुक्तम्। तत्र कैयटश्च 'एकैकस्यापत्यस्य प्रकृत्यर्थेन योगात् प्रधानभेदे च गुणाभ्यावृत्त्या गर्गशब्दानामेवैकशेषः क्रियते' इति प्रकृतिबहुत्वं सोपपत्तिकं व्याख्याय 'प्रकृत्यर्थस्यैकत्वात्तेनैव बहूनामपत्यानां संबन्धसंभवात्' (महाभाष्यप्रदीप १।२।६४ वा. २०) इति एका प्रकृतिरिति द्वितीयपक्षं व्याचख्यौ। युगपदुपस्थितानेकापत्यं प्रति सकृच्छ्रुतस्यैव गुणस्य गर्गस्य तन्त्रेण संबन्धसंभवात् प्रधानभेदेऽपि न गुणभेदो न्याय्यः इति हि तदाशयः। व्यक्तिपक्षे सर्वव्यक्तीनां युगपदनुपस्थितत्वात् तद्भेदे शास्त्रभेदो नानुपपन्नः इत्येतद्भाष्यकैयटग्रन्थविरोधाच्चोपेक्ष्यः।

"संज्ञाशास्त्रस्य तु कार्यकालपक्षे न पृथग्वाक्यार्थबोधः" (परिभाषेन्दुशेखर परि. २,३) इत्यप्ययुक्तम्। यथोद्देशपक्षेऽपि त्वत्पक्षे क्व वृद्धिसंज्ञेत्यपेक्षायां त्वत्पक्षे परिभाषासु दर्शितरीत्या 'सिचि वृद्धिः' (७।२।१) इत्यादेः संनिधानेन तदेकवाक्यताया आवश्यकत्वात्। एतेन "अणोऽप्रगृह्यस्येत्येतदेकवाक्यतापन्नमदसो मादित्येतत्प्रति न मुत्वाद्यसिद्धम्" (परिभाषेन्दुशेखर परि. २, ३) इत्यादि निरस्तम्। त्वत्पक्षे 'अदसो मात्' (१।१।१२) इति प्रगृह्यसंज्ञैकवाक्यतापन्नम् 'अणोऽप्रगृह्यस्य०' (८।४।५७) इत्येतत्प्रति यथोद्देशपक्षे मुत्वादेरसिद्धत्वस्य दुर्वारत्वात् संज्ञाप्रदेश एव कार्यस्य ज्ञातत्वेन कार्यार्थासिद्धत्वस्याप्रवृत्तिरित्यस्य दुर्वचत्वात्। त्वन्मते कार्यदेशं गच्छन्त्या अपि संज्ञायाः

देशस्थत्वाभावाच्च ' एकदेशस्थः सर्वं शास्त्रमभिज्वलयति ' इति भाष्योक्तहेतोः संज्ञासाधारण्यात्। अत एव 'कार्यज्ञानानन्तरं विरोधनिरूपणात्संज्ञासूत्राणां कार्यदेशस्थपरत्वमेव विप्रतिषेधसूत्रप्रवृत्तौ बीजम्' इति 'अदसो मात्' (१।१।१२) इति सूत्रस्थत्वदुदाहृतभाष्यग्रन्थश्च त्वन्मते विरुद्धः। मन्मते तु यथोद्देशपक्षे कार्यसूत्राणां संज्ञाप्रदेशे असंनिधानात् कार्यकालपक्षे संज्ञासूत्राणां कार्यदेशेषु संनिधानात् तत्र संनिहितानां च तद्देशस्थत्वात् ' अदसो मात् ' (१।१।१२) इति सूत्रस्थत्वदुदाहृतभाष्यग्रन्थोपपत्तिः ॥

" आकडाराधिकारस्थभादिसंज्ञासु यथोद्देशपक्ष एव " (परिभाषेन्दुशेखर परिभाषा २,३) इत्यप्ययुक्तम्। त्रिपादीस्थसूत्राणां यथोद्देशपक्षे भादिसंज्ञां प्रति असिद्धत्वेन तत्रत्यभादिपदशक्तिग्राहकत्वासंभवात्। कार्यकालपक्षस्यावश्यं तासु स्वीकरणीयत्वात्, संज्ञाकरणस्य च सिद्धकाण्डस्थकार्ये चरितार्थत्वात्, इतरसंज्ञास्वपि तथात्वस्य वक्तुं शक्यतया ' आकडाराधिकारस्थसंज्ञासु ' इति विशेषाभिधानस्य निर्युक्तिकत्वात्। तस्मात्तत्र परस्परं पूर्वत्वपरत्वाभ्यां बाध्यबाधकभावे यथोद्देशपक्षः, त्रिपादीस्थकार्यसंबन्धे तु कार्यकालपक्ष एवेति युक्तम् ॥

' पूर्वत्रासिद्धम् ' (८।२।१) इति सूत्रे त्रिपाद्यां परिभाषाणामप्रवृत्तिमाशङ्क्य कार्यकालपक्षाश्रयणेन तत्समाधानपरं भाष्यं संज्ञानामप्युपलक्षणं व्याख्येयम्। अन्यथा ' संयोगान्तस्य लोपः ' (८।२।२३) इत्यस्य सूत्रस्य संयोगादिसंज्ञां प्रत्यसिद्धतया तत्रत्यसंयोगादिपदशक्त्यग्राहकत्वापत्तेः । न च ' संयोगान्तस्य लोपः ' (८।२।२३) इत्यस्य बोधकत्वानुपपत्तिः। संयोगान्तशब्दस्य पदशब्दस्य च स्थाने लोपशब्द आदेशो भवतीत्येवमर्थकत्वोपपत्तेः । न च ' स्वं रूपम्०' (१।१।६८) इति संज्ञां प्रत्यप्यसिद्धत्वेन नेदृगर्थकल्पनं युक्तमिति वाच्यम्। तत्प्रत्यसिद्धत्वेऽपि तत्प्रत्याख्यानाय 'न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः ' (१।१।६८ वा. २) इति वार्तिकोक्तान्तरङ्गन्यायं प्रत्यसिद्धत्वाभावात् ॥

पूर्वशास्त्रं प्रति हि परं शास्त्रमसिद्धम्। न तु न्यायं प्रति। तस्य लौकिकत्वेन पूर्वशास्त्रत्वाभावात्। अत एव ' पूर्वत्रासिद्धम् ' (८।२।१) इति सूत्रे 'षष्ठी स्थानेयोगा' इति परिभाषां प्रति ' संयोगान्तस्य लोपः ' (८।२।२३) इति शास्त्रस्यासिद्धत्वेऽपि तस्याः ' निर्दिश्यमानस्यादेशा भवन्ति ' इत्येवमर्थकतावर्णनाय भाष्योक्तं " शब्दस्य तु शब्देन कोऽन्योभिसंबन्धो भवितुमर्हति अन्यदतः स्थानात् " (महाभाष्य १।१।४९ वा. ४) इति न्यायं प्रति नासिद्धत्वमित्यभिप्रायेण " अन्तरङ्गत्वात्स्थानसंबन्धविज्ञानेऽपि सर्वस्य पदस्य लोपप्रसङ्गः " इत्युक्तं कैयटेन। अत एव तत्र ' कथम् ' इत्याशङ्क्य ' कार्यकालं संज्ञापरिभाषम् ' इति संज्ञाग्रहणपूर्वकं समाहितम्। अत एव 'अदसो मात्' (१।१।१२) इति सूत्रे ' मात्प्रगृह्यसंज्ञायामयावेकादेशप्रतिषेधः ' (१।१।१२ वा. १) इति प्रगृह्यसंज्ञां प्रति मुत्वादेरसिद्धत्वमाशङ्क्य प्रगृह्यसंज्ञाविधानसामर्थ्यादसिद्धत्वं न भवतीति समाधानमाशङ्क्य ' वचनायों हि सिद्धे ' (१।१।१२ वा. २) इति कार्यकालपक्षे ' अणोऽप्रगृह्यस्य० ' (८।४।५७) इत्यत्र वचनस्य चरितार्थत्वान्नेदं

वचनबलल्भ्यमिति वार्त्तिके उक्तम् । तत्रैव यथोद्देशपक्षे आश्रयात्सिद्धत्वं च भाष्ये कैयटे चोक्तम् । तद्भाष्यकैयटग्रन्थविरोधादपि यथोद्देशपक्षे प्रधानानां परिभाषादेशसंनिधिबोधक: ' क्क्ङिति च ' (१।१।५) इति सूत्रस्थकैयटग्रन्थ उपेक्ष्य: । तस्माद्यथोद्देशपक्षे संज्ञापरिभाषस्य स्वदेशे स्वार्थमात्रबोधे सति तेन कार्यप्रदेशोपकार इति प्राचां पक्ष एव युक्त इति सिद्धम् ॥ २ ॥

'कार्यकालं संज्ञापरिभाषम्' इत्यस्य कार्याणां काल एव कालो यस्येति विग्रहेण संज्ञापरिभाषस्य कार्यदेशस्थत्वं प्रतिपाद्यते। कालस्यैवात्र शास्त्रे देशशब्देन प्रतिपादनात्। अत एव भाष्ये ' कार्यकालं संज्ञापरिभाषम् ' इत्युक्त्वा ' यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् ' (महाभाष्य १।१।१२ वा. ३) इति तदर्थकथनं संगच्छेते । अन्यथा 'यदा कार्यं तदा द्रष्टव्यम् ' इत्युक्तं स्यात् ॥ कालत्वेन ताद्विवक्षायां दाप्रत्यय:, (५।३।१५) अधिकरणत्वसामान्यविवक्षायां त्रल्प्रत्यय: (५।३।१०) इत्यत्रेदमेव भाष्यं प्रमाणम् । संज्ञापरिभाषस्य च प्रयोजनविशेषमन्तरेणापरितुष्यतस्तावत्प्रदेशपर्यालोचनेन तद्विशेषमवगच्छतोऽङ्गभूतसंज्ञापरिभाषस्य च प्रधानभूतकार्यदेशस्थत्वं तदेकवाक्यतया च प्रयोजनविशेषं निश्चिन्वतस्तीक्ष्णबुद्धीन् प्रत्ययं पक्ष: । एतत्सर्वं प्रगृह्यसंज्ञासूत्रे ' कथं पुनरयं पक्ष: यावता कार्यार्थित्वात्संज्ञापरिभाषस्य कार्यकालतैव न्याय्या ' इति वदता कैयटेन ध्वनितम् । अस्मिंश्च पक्षे त्रिपाद्यामपि संज्ञापरिभाषस्य प्रवृत्ति:, त्रिपादीं गच्छत: संज्ञापरिभाषस्य तद्देशस्थत्वेन ' पूर्वत्रासिद्धम् ' (८।२।१) इत्यस्याप्रवृत्ते: । यथोद्देशपक्षे तु संज्ञापरिभाषस्य स्वदेशस्थत्वेन तत्प्रति त्रिपाद्या असिद्धत्वाद्यथोद्देशपक्षे संज्ञापरिभाषं त्रिपाद्यां न प्रवर्तते । अत एव ' पूर्वत्रासिद्धम् ' (८।२।१) इति सूत्रे त्रिपाद्यां संज्ञापरिभाषस्याप्रवृत्तिमाशङ्क्य कार्यकालपक्षाश्रयणेन त्रिपाद्यां संज्ञापरिभाषस्य प्रवृत्तिर्भाष्ये उपपादिता ॥

यत्तु—"कार्यकालपक्षे 'ङमो ह्रस्वात्०' (८।३।३२) इत्यादौ 'तस्मादित्युत्तरस्य' (१।१।६७) ' तस्मिन्निति निर्दिष्टे पूर्वस्य ' (१।१।६६) इति परिभाषाद्वयोपस्थितौ परत्वात् 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति तस्मिन्नितिसूत्रभाष्यासंगति:" (परि. शे. परि. २, ३) इत्याशङ्क्य, अस्मिन्नपि पक्षे अष्टाध्यायीपाठापेक्षपरत्वमाश्रित्य समाधाय " न हि कार्यकालपक्ष इत्येतावता तदपैति । पक्षद्वयेऽपि प्रदेशेषु स्वदेशेषु च बुद्धिजननेनाविशेषात् । न हि तत्पक्षेऽप्यचेतनस्य शास्त्रस्य स्वदेशं विहायान्यदेशगमनं संभवति। नाप्यस्मदादिबुद्धिजननेन स्वदेशत्यागो भवति । अत एव भाष्ये एकदेशस्थस्यैव सर्वशालाभिव्याल्पकत्वमुक्तम् । यदि कार्यवशात्तत्तद्देशं गच्छतां तत्तद्देशस्थत्वं स्यात्, तर्हि सर्वशास्त्राणां प्रयोगार्थत्वेन प्रयोगरूपैकदेशस्थत्वेन क्वापि परत्वं न स्यात् । यथोद्देशपक्षे च परिभाषादेशे संनिधीयमानानां कार्याणां पाठापेक्षं परत्वं न स्यात् " (परि. शे. परि. २, ३) इति नव्यैरुक्तम् । अत्रेदं वक्तव्यम्—तत्तद्देशं गच्छतां तत्तद्देशस्थत्वाभावे संज्ञापरिभाषस्य त्रिपाद्यां प्रवृत्तिसिद्धये कार्यकालपक्ष आश्रयणीय इति 'पूर्वत्रासिद्धम्' (८।२।१) इति सूत्रस्थभाष्यग्रन्थविरोध: । कार्यकालपक्षेऽपि संज्ञापरिभाषस्य सपादसप्ताध्यायीस्थत्वानपायात् 'पूर्वत्रासिद्धम्' इति सूत्रेण कार्याणामसिद्धत्वेन कार्याभावे संज्ञापरिभाषस्य तत्र प्रवृत्त्ययोगात्।

' प्रयोगरूपैकदेशस्थत्वात्सर्वशास्त्राणां क्वापि परत्वं न स्यात् ' इत्यप्ययुक्तम्, तथात्वे विप्रतिषेधसूत्रस्यानर्थक्यापत्त्या प्रयोगातिरिक्तप्रदेशसंबन्धकृतपरत्वस्यैव विप्रतिषेधप्रवृत्तिबीजत्वात् ॥

'यथोद्देशपक्षे परिभाषादेशं गच्छतां कार्याणां परत्वव्यवस्था न स्यात्' इत्यप्ययुक्तम्। यथोद्देशपक्षे कार्याणां परिभाषादेशगमनस्य न्यायविरुद्धत्वादनेकभाष्यकैयटग्रन्थविरोधेनोपेक्षणीयत्वात् । परिभाषाणां परस्परं बाध्यबाधकभावे यथोद्देशपक्षः, कार्यैकवाक्यतायां तु कार्यकालपक्षः इति व्यवस्थया पक्षद्वयस्वीकारेण 'तस्मिन्निति०–'(१।१।६६) इति सूत्रे भाष्येऽभिहितस्य ' ङमो ह्रस्वात्०– ' (८।३।३२) इत्यत्र 'तस्मात्०–'(१।१।६७) इत्यस्योपस्थानं परत्वादेत्वस्यार्थस्योपपत्तेः । अत एव ' इको गुणवृद्धी ' (१।१।३) इति सूत्रे ' यथोद्देशपक्षे च परिभाषयोः पौर्वापर्यं न तु कार्यकालतायाम् ' इति कैयटः ॥

' अचेतनस्य शास्त्रस्य देशान्तरगमनानुपपत्तिः ' इत्यप्ययुक्तम्, शास्त्राणां तद्देशस्थत्वं हि तद्देशे आचार्यतात्पर्यविषयज्ञानविषयत्वम् । तद्देशपठ्यमानत्वस्य तद्देशस्थत्वप्रयोजकत्वे ज्ञापकसिद्धपरिभाषासु तद्देशस्थत्वं न स्यात् । एवं सति कार्यप्रदेशे आचार्यतात्पर्यविषयज्ञानविषयस्य संज्ञापरिभाषस्य तद्देशस्थत्वं सुस्थिरम् । आचार्यतात्पर्यविषयेतिविशेषणान्न यत्र क्वचिदाकस्मिकोपस्थितिविषयस्य तद्देशस्थत्वापत्तिः । अत एव 'अदसो मात्' (१।१।१२) इति सूत्रे भाष्ये ' एवं तर्हि ' परैव प्रगृह्यसंज्ञा ' इति प्रगृह्यसंज्ञायाः परत्वं प्रतिज्ञाय, पूर्वदेशपठितायास्तस्याः परदेशपठनं विना कथं परत्वमित्यभिप्रायेण ' कथम् ' इति परिचोद्य ' कार्यकालं संज्ञापरिभाषम् । यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् । प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति–– अदसो मादिति ' इति ग्रन्थेन प्रगृह्यसंज्ञायाः परदेशे उपस्थितत्वात्तत्र परदेशपाठं विनापि परत्वं भाष्योक्तं संगच्छते ॥

कार्याणां परिभाषादेशोपस्थितेर्न्यायविरोधेन आचार्यतात्पर्याविषयत्वान्न कार्याणां विप्रतिषेधानुपपत्तिः । अत एव 'अचः परस्मिन्०–' (१।१।५७) इति सूत्रे ' इको यणचि ' (६।१।७७) इति सकृत्पठितस्यैव सूत्रस्य पट्व्या मृद्व्या इति लक्ष्यभेदाद्भेदमाश्रित्य पटु ई आ इति स्थिते उकारस्य ईकारस्य च युगपद्यणि प्राप्ते लक्ष्यकृतं परत्वमाश्रित्य ईकारस्य प्रथमं यणादेश. इति ' परश्चासौ व्यवस्थया ' (१।१।५७ श्लोकवार्तिक) इति वार्त्तिकं, ' व्यवस्थया चासौ परः ' इति तद्भाष्यं च संगच्छते इति दिक् ॥३॥

अनुबन्धेषु पक्षद्वयम्––

अनेकान्ता अनुबन्धाः ॥ ४ ॥
एकान्ता अनुबन्धाः ॥ ५ ॥

अनेकान्ता अनवयवा इत्यर्थः । अत्र अनेकान्ता इति पक्षे क्ङित् (१।१।५) इत्यादौ समीपार्थे बहुव्रीहिः । अस्मिन्पक्षे वुञ्छणादिसूत्रे (४।२।८०) प्रत्ययद्वयमध्यपतितस्य अनुबन्धस्यान्यतरसंबन्धे व्याख्यानमेव शरणम् । ' काश्यादिभ्यष्ठञ्ञिठौ ' (४।२।११६) इत्यादौ ञिठप्रत्ययञित्त्वं व्यर्थं सत् एकस्यानुबन्धस्य प्रत्ययद्वयमध्योच्चारित-

स्यापि एकेनैव संबन्धो नोभाभ्यामित्यस्यार्थस्य ज्ञापकम् ॥ ४ ॥

'अनुबन्धा एकान्ताः' इत्यस्य अवयवा अनुबन्धा इत्यर्थः। अस्मिंश्च पक्षे वुन्छणादिसूत्रे प्रत्ययद्वयमध्यपठितस्यानुबन्धस्यैकतरेणैव संबन्धो व्याख्यानगम्यः। परं तु क्विडित्यादौ लम्बकर्णादिवदवयवावयविभावे बहुव्रीहिरिति विशेषः। अस्मिंश्च पक्षे गोदः कम्बलदः इति 'आतोऽनुपसर्गे कः' (३।२।३) इति कप्रत्ययविषये 'कर्मण्यण्' (३।२।१) इति अणपि 'वासरूपोऽस्त्रियाम्' (३।१।९४) इति वचनात्प्राप्नोति। तथा 'अर्वणस्त्रसावनञः' (६।४।१२७) इति त्रादेशः 'अनेकाल्शित्सर्वस्य' (१।१।५५) इति सर्वादेशः प्राप्नोति। तथा 'अदाप्' (१।१।२०) इत्यत्र दैपः प्रतिषेधो वक्तव्यः। अनेकान्तत्वपक्षे अण्कयोरुत्सृष्टानुबन्धयोः सरूपत्वात्, त्रादेशस्य चैकाल्त्वात्, दैपश्चोपदेशे एजन्तत्वेनात्वे कृते दारूपत्वेन अदाबित्येव प्रतिषेधोपपत्तेर्नैते दोषाः ॥ ५ ॥

एकान्तत्वपक्षे तु एते दोषाः स्युरिति चेत्, न।

नानुबन्धकृतमसारूप्यम् ॥ ६ ॥

इति परिभाषया कविषये अणोऽप्रवृत्तेः। अस्याश्च परिभाषायाः 'ददातिदधात्योर्विभाषा' (३।१।१३९) इति कापवादशप्रत्ययविधायकसूत्रे पक्षे काम्यनुज्ञानाय क्रियमाणं विभाषाग्रहणं ज्ञापकम्। अनुबन्धकृते असारूप्ये तु कशयोरसारूप्यात् 'वासरूपोऽस्त्रियाम्' (३।१।९४) इत्यनेनैव विकल्पस्य सिद्धतया तदनर्थकं स्यात् ॥ ६ ॥

नानुबन्धकृतमनेकाल्त्वम् ॥ ७ ॥

इति परिभाषया न त्रादेशस्य सर्वादेशत्वप्रसङ्गः। अस्याश्च ज्ञापकम् 'अनेकाल्शित्सर्वस्य' (१।१।५५) इत्यत्र शिद्ग्रहणम्। अनुबन्धकृते अनेकाल्त्वे औशादीनामप्यनेकाल्त्वादेव सर्वादेशत्वसिद्धेः किं तेन ॥ ७ ॥

नानुबन्धकृतमनेजन्तत्वम् ॥ ८ ॥

इति दैपः पकाररूपानुबन्धसत्त्वेऽपि 'आदेच उपदेशे' (६।१।४५) इत्यात्वप्रवृत्त्या दारूपत्वेन 'अदाप्' (१।१।२०) इति प्रतिषेधोपपत्तेर्दैपः पृथक्प्रतिषेधो न वक्तव्यः ॥ ८ ॥

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः ॥ ९ ॥

कृत्रिमाकृत्रिमयोः शास्त्रप्रसिद्धलोकप्रसिद्धयोरर्थयोः कृत्रिमे शास्त्रप्रसिद्धे अर्थे कार्यं भवति। 'अङ्गस्य' (६।४।१) इत्याधिकारे 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' (१।४।१३) इति शास्त्रप्रसिद्धस्यैवाङ्गस्य ग्रहणम्, न तु लोकप्रसिद्धावयवानाम्। अस्याश्च परिभाषायास्तत्तत्संज्ञाकरणमेव मूलम् ॥

यत्तु—संज्ञाप्रणयनस्य तस्मिन्नर्थे लोकाप्रसिद्धशक्तिग्राहकतया लोकप्रसिद्धार्थनिवर्तने सामर्थ्याभाव इति तन्न। शास्त्रप्रयुक्तशब्दस्यार्थजिज्ञासायामिदंपरशास्त्रप्रसिद्धार्थस्यैव झटित्युपस्थितिकतया तेनैव नैराकाङ्क्ष्येण लोकप्रसिद्धस्यार्थस्यार्थान्निवृत्तेर्नियमे पर्यवसानात्। लक्षणप्रतिपदोक्तयोर्झटित्युपस्थितिकप्रतिपदोक्तानियमवत्। अत एव 'बहुगणवतुडति

संख्या ' (१।१।२३) इति सूत्रे भाष्ये " अर्थात् प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति । अतश्चार्थात्प्रकरणाद्वा । अज्ञ हि भवान् ग्राम्यं पांसुलपादमप्रकरणज्ञमागतं ब्रवीतु—गोपालकमानय कटजकमानयेति । उभयगतिस्तस्य भवति । साधीयो वा यष्टिहस्तं गमिष्यति " (१।१।२३ वा. ४ महाभाष्य) इति कृत्रिममात्रग्रहणं दूषयित्वा, पुनः कृत्रिमस्यैव ग्रहणमित्यस्यार्थस्य साधनाय " यथैव तर्ह्यर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति, एवमिहापि प्राप्नोति । जानाति ह्यसौ बह्वादीनामियं संज्ञा कृता " (१।१।२३ वा. ४ महाभाष्य) इति हेतुरुक्तः ॥

अत्र संज्ञासूत्रस्य प्रयोजनजिज्ञासायां प्रदेशवाक्यस्थसंज्ञानामर्थबोधोपयोगिशक्तिग्रहरूपोपकारापेक्षायाम् ' कार्यकालं संज्ञापरिभाषम् ' (परि. शे. परि. ३) इति न्यायेन अनन्यार्थसंज्ञासूत्रेणैव शक्तिग्रहौचित्यम् । लौकिकशक्तिग्राहकप्रमाणस्य तु लोकसिद्धव्यवहाररूपप्रयोजनेन निराकाङ्क्षस्य शास्त्रस्थपदशक्तिग्राहकत्वमाकाङ्क्षोत्थापनपूर्वकं वाच्यम् । न च तदुत्थिताकाङ्क्षशास्त्रे जागरूके संभवति । यत्र तु उत्थिताकाङ्क्षशास्त्रं नास्ति; यथा पशुरपत्यं देवतेत्यादौ, तत्र लोकप्रसिद्धस्याकाङ्क्षामुत्पाद्य शास्त्रस्थपदशक्तिग्राहकत्वं स्वीक्रियते । इममेव विशेषमभिप्रेत्य वार्त्तिककृता ' संख्यासंज्ञायां संख्याग्रहणम् । संख्यासंप्रत्ययार्थम् । इतरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथा लोके ' (१।१।२३ वा. १-३) इत्युक्तम् । यथा लोके कृत्रिमे प्रकरणादिज्ञानवतः कृत्रिमस्यैव संप्रत्ययस्तद्वदिति तदाशयः । पूर्वोदाहृतभाष्येऽपि कृत्रिमस्य प्रकरणमुपन्यस्तम्— ' जानाति ह्यसौ बह्वादीनामियं संज्ञा कृता' इति । कैयटेन च—' सर्वार्थाभिधानशक्तियुक्तः शब्दो यदा विशिष्टेऽर्थे संव्यवहाराये नियम्यते, तदा तत्रैव प्रतीतिं जनयति नान्यत्र' इति ग्रन्थेन शास्त्रे यः शब्दो यस्मिन्नर्थे संज्ञात्वेन विनियुक्तः, स शब्दस्तमेवार्थं शास्त्रे प्रकरणाद्बोधयतीति कृत्रिमे संप्रत्ययस्य न्यायसिद्धत्वमुपपादितम् ॥ यत्तु तत्र नियम्यत इत्युक्तम्, तत् उत्तरीत्या प्रदेशेषु अस्यैवार्थस्य ग्रहणे सत्यर्थादितरनिवार्त्ति भवतीत्यभिप्रायेण ॥

यत्तु भाष्ये—" न यथा लोके तथा व्याकरणे । उभयगतिरिह भवति " (१।१।२३ वा. ४ महाभाष्य) इत्युक्तम्, यच्च तत्र कैयटेन ' संख्याशब्दो हि बह्वादिप्रतिपादनाय संज्ञात्वेन विनियुक्तः, न स्वेकादिसंख्यानिरासाय ' इत्युक्तम्, तदुभयं प्रौढिवादेन । अत एव कैयटेन ' कर्तरि कर्मव्यतिहारे ' (१।३।१४) इत्यत्र लौकिककर्मग्रहणे धातोः कर्मव्यतिहारे वृत्त्यनुपपत्तिर्हेतुरुक्तः । अकृत्रिमकरणग्रहणे कारके तव्यदादिप्रत्ययविधानाय धातुसंज्ञा क्रियते । कृत्रिमकरणग्रहणे तदनुपप-

१. क. कार्ये संप्रत्ययो. २ क. अतश्च. ३ क. अन्यार्थं, ४ क. लोकस्य. ५ ख. तमेवार्थं प्रकरणात्. ६. क. यत्त्वत्र. ७ ख. इतरानिवृत्तिर्भवतीति. ८ क. ग्रहणे च कारके.

त्तिर्हेतुरुक्तः। अकृत्रिमाधिकरणग्रहणे द्वन्द्वस्य शक्त्यनभिधायकत्वं हेतुरुक्तः। लोकेऽपि हि मुख्यार्थस्य बाधे सति गङ्गायां घोष इत्यादावर्थान्तरं गृह्यते। एवं व्याकरणेऽपि कृत्रिमार्थस्य बाधे सति काममकृत्रिमार्थो गृह्यताम्। सति संभवे कृत्रिमार्थ एव न्याय्यः। अत एव उभयगतिपक्षे अस्वरसाद्भाष्ये तद्वदतिदेशादयः पक्षा उपन्यस्ताः। अत एव 'कर्मणा यमभिप्रैति०' (१।४।३१) इति सूत्रे 'क्रियाग्रहणमपि कर्तव्यम्' (१।४।३२ महाभाष्य) इति वार्त्तिकप्रत्याख्यानावसरे 'क्रियां हि लोके कर्मेति व्यपदिशन्ति' इत्युक्त्वा भाष्ये 'एवमपि न सिध्यति, कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययात् क्रियाया लौकिककर्मत्वेऽपि कृत्रिमकर्मत्वाभावात्' इति परिचोद्य, 'क्रियापि कृत्रिमं कर्म' इति समाहितम्। तस्मादसति बाधके कृत्रिमस्यैव ग्रहणं न्याय्यम्। यत्र प्रमाणान्तरवशेन अर्थान्तरेऽपि तात्पर्यनिर्णयः, अर्थान्तर एव वा, तत्र लोकवदेवार्थान्तरग्रहणम्। यत्र तु तादृशबाधकाभावः तत्र कृत्रिमस्यैव ग्रहणमिति युक्तमुत्पश्यामः ॥ ९ ॥

न हि कार्यी निमित्ततयाश्रीयते ॥ १० ॥

कार्यमस्मिन्नस्तीति कार्यी; यद्यत्कार्याधिकरणम्, तत्तत्कार्यं प्रति निमित्ततया नाश्रीयते इत्यर्थः। यथा— ऋधातोः सनि 'स्मिपूङ्०' (७।२।७४) इति इटि ऋ इस इति स्थिते 'सार्वधातुकार्ध०' (७।३।८४) इति गुणे अरिस इति स्थिते 'अजादेर्द्वितीयस्य (६।१।२) इति रिस्शब्दस्य द्वित्वे हलादिःशेषे अरिरिषतीति रूपं सिध्यति। इह इस् इति सनवयवे द्विरुक्ते सनः कार्याधिकरणतया द्वित्वं प्रत्यनिमित्तत्वात् 'द्विर्वचनेऽचि' (१।१।५९) इत्यस्याप्रवृत्त्या गुणरपरत्वे सिध्यतः। सनो द्वित्वनिमित्तत्वे तु 'द्विर्वचनेऽचि' (१।१।५९) इत्यस्य प्रवृत्तौ ऋ इस स्थिते 'अजादेर्द्वितीयस्य' (६।१।२) इति इस्शब्दस्य द्वित्वे अरीषतीति स्यात्। न च ऊर्णुधातोः सनि 'सनीवन्त०—' (७।२।४९) इति ऊर्णु इस इति स्थिते 'सन्यङोः' (६।१।९) इति षष्ठीनिर्देशात्सनः कार्यित्वेन द्वित्वं प्रत्यनिमित्तत्वे 'द्विर्वचनेऽचि' (१।१।५९) इत्यस्याप्रवृत्त्या परत्वाद्गुणावादेशयोः कृतयोर्नव्शब्दस्य द्वित्वे अभ्यासे उकारो न श्रूयेतेति वाच्यम्। इह सनो द्वित्वरूपकार्यानधिकरणत्वेन द्वित्वं प्रति निमित्तत्वात् ॥

अस्याश्च परिभाषाया ज्ञापकम्— 'स्थण्डिलाच्छयितरि व्रते' (४।२।१५) इति निर्देशः। कार्यिणो निमित्तत्वे 'शीङ् स्वप्ने' इति धातोर्ङित्त्वेन 'क्क्ङिति च' (१।१।५) इति गुणनिषेधप्रसङ्गात्। क्ङिति च इत्यत्र हि क्क्ङितीति न परसप्तमी;

१ ख. सति संभवे तु कृत्रिमार्थ एव न्याय्यः। २ स्मिपूङ्रञ्ज्वशां सनीति ३. क इष. ४. क. हलादिशेषे. ५. क. ऊर्णोतिस्सनीवन्तर्धेति इटि. ६ ख. om. इति.

किं तु 'यस्य च भावेन भावलक्षणम्' (२।३।३७) इति सत्सप्तमी। तेन क्क्ङि-न्निमित्तयोर्गुणवृद्ध्योः प्रतिषेधः। तेन भिन्न इत्यादौ लघूपधगुणनिषेधः सिध्यति। परसप्तमीस्वीकारे तु चितं स्तुतमित्यादावेव निषेध[1]: स्यादिति स्पष्टं भाष्यादौ। कुटादिषु 'कुङ् शब्दे' इति धातुपाठश्चा[2]स्या ज्ञापकः ॥ १० ॥

तदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ ११ ॥

यो यस्यागमः स तद्ग्रहणेन गृह्यते। तेन सर्वशब्दादामि 'आमि सर्वनाम्नः सुट्' (७।१।५२) इति सुडागमस्य सुब्ग्रहणेन ग्रहणात् 'बहुवचने झल्येत्' (७।३।१०३) इत्येत्वं सिध्यति। ननु शि तुकः पूर्वग्रहणेन ग्रहणात् कुर्वञ्छेते इत्यत्र नकारस्यापदान्तत्वात् णत्वप्रसङ्गः। अग्निचितः इत्यादौ 'जसि च' इति गुणप्रसङ्गः। 'छो छेदने' अस्माच्छिटि चच्छौ इत्यादौ अभ्यासे तुको निवृत्तिः स्यादिति चेत् न। 'स्तोः श्चुना' (८।४।४०) इति योगविभागेन स्तोः श्चुना योगे णत्वनिषे[3]धान्नाद्यो दोषः। 'ब्रुवः पञ्चानाम्०—' (३।४।८४) इति निर्देशाद्वर्णप्रयुक्तकार्याभावज्ञापनान्न द्वितीयो दोषः। ह्रस्वग्रहणे अनुवर्तमाने पुनस्तदनुकर्षणार्थं चकारक[4]रणात् ह्रस्व एवागमी, न ह्रस्वान्तः, स च समुदायग्रहणेन गृह्यते इत्यभ्यासग्रहणेनाग्रहणान्न तुको निवृत्तिः। दधि च्छादयतीत्यत्र 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (परि. शे. परि. ७९) इति व्यञ्जनस्याविद्यमानवत्त्वात् 'तिङ्ङतिङः' (८।१।२८) इति निघातप्रवृत्तिरिति न कोऽपि दोष इति प्राञ्चः ॥

अत्र नव्याः—"वर्णग्रहणेऽपीयं परिभाषा प्रवर्तते। अत एव 'आने मुक्' (७।२।८२) इति सूत्रे भाष्ये अङ्गान्त्यस्याकारस्य मुगित्यर्थे पचमानः इत्यत्र 'तास्यनुदात्तेत्०' (६।१।१८६) इति स्वरो न स्यादित्याशङ्क्य, अदुपदेशभक्तस्तद्ग्रहणेन ग्रहीष्यते (परि. शे. परि. ११) इति समाहितम्। 'ङमो ह्रस्वात्०' (८।३।३२) इति सूत्रे च ह्रस्वात्परे[5]स्य पदान्तस्य ङमोऽचि परे ङमुडिति पक्षे कुर्वन्नास्त इत्यत्र पूर्वनकारस्य णत्वमाशङ्क्य 'पदान्तभक्तोऽसौ नकारः पदान्तग्रहणेन ग्रहिष्यते' (८।३।३२ महाभाष्य) इति भाष्ये समाहितम्। किं च गुणादे रपरत्वे रेफविशिष्टे गुणत्वादि दृष्टव्यम्; अन्यथा ऋकारस्य गुणवृद्धी अरारावेवेति नियमो न स्यात्...। अत एव 'रदाभ्याम्०—' (८।२।४२) इति सूत्रे भाष्यम्—'गुणो भवति वृद्धिर्भवति; रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्तते' (८।२।४२ वा. ४ महाभाष्य) इति। अनित्या चेयम्, 'आने मुक्' (७।२।८२) इति मुग्विधानात्;

---

१ क. निषिद्धः स्यादिति. २ क. कुङ्शब्दपाठश्च. ३ क. निषेधः नाद्यो दोषः। ४ क. कर्षणात्. ५ क. परस्याद्न्तस्यागमः अचि परे.

अन्यथा पचमान इत्यादौ अकारस्य मुक्यनया परिभाषया विशिष्टस्य सवर्णदीर्घे तद्वैयर्थ्यं स्पष्टमेव । ‘अनागमकानां सागमका आदेशाः इत्यस्य त्वयमर्थः। आर्धधातुकस्येडागम इत्यर्थे ज्ञाते नित्येषु शब्देष्वागमविधानानुपपत्त्या अर्थापत्तिमूलकव्याख्यान्तरकल्पनेन इड्रहितबुद्धिप्रसङ्गे सेड्बुद्धिः कर्तव्येति । एवं च आदेशेष्विव अत्रापि बुद्धिविपरिणाम इति न नित्यत्वहानिः । स्थानिवत्सूत्रे च नेदृशादेशग्रहणम्, साक्षादष्टाध्यायीबोधितस्थान्यादेशभावे चारितार्थ्यात् । किं चैवं सति स्थानिबुद्ध्यैव कार्यप्रवृत्त्या निर्दिश्यमानपरिभाषाया अप्रवृत्त्या आगमसहितस्याप्यादेशापत्त्या लावस्थायामडिति भाष्योक्तसिद्धान्तासंगतिः । स्थानिवद्भावविषये ‘निर्दिश्यमानस्य’ (परि. शे. परि. १२) इति परिभाषाप्रवृत्तौ तिसृणामित्यत्र परत्वाद् तिस्रादेशे स्थानिवद्भावेन त्रयादेशमाशङ्क्य सकृद्गतिन्यायेन समाधानपरभाष्यासंगतिः । ‘एरुः’ (३।४।८६) इत्यादौ स्थानषष्ठीनिर्देशात्तदन्तपरतया पठितवाक्यस्यैव समुदायादेशपरत्वेन आदेशग्रहणसामर्थ्यात्तस्य स्थानिवद्भावसूत्रे ग्रहणेन न दोषः । आनुमानिकस्थान्यादेशभावकल्पनेऽपि श्रौतस्थान्यादेशभावस्य न त्याग इति ‘अचः परस्मिन्०’ (१।१।५७) इत्यादेर्नासंगतिः । एतेन ‘यदागमाः–’ (परि. शे. परि. ११) इति परिभाषा स्थानिवत्सूत्रेण गतार्थेत्यपास्तम् । एतत्सर्वम् ‘दाधा घ्वदाप्’ (१।१।२०) इति सूत्रे भाष्ये स्पष्टम्” इत्याहुः ॥

अत्र ब्रूमः— यदि वर्णविषये इयं परिभाषा प्रवर्तते, तर्हि ‘अय गतौ’ इत्यस्माद्धातोः क्विपि वलि लोपे (६।१।७६) ‘ह्रस्वस्य०’ (६।१।७१) इति तुकि अदिति रूपं माधवादिसंमतम् । तत औकारे अतावित्यत्र ‘वृद्धिरेचि’ (६।१।८८) इति वृद्धिप्रसङ्गः; अत इत्यत्र ‘प्रथमयोः०’ (६।१।१०६) इति पूर्वसवर्णदीर्घस्य अतमित्यत्र ‘अमि पूर्वः’ (६।१।१०७) इति पूर्वरूपस्य अतेत्यत्र इनादेशस्य अद्भ्यामित्यत्र ‘सुपि च’ (७।३।१०२) इति दीर्घस्येत्येवमादेरनिष्टसहस्रस्य प्रसक्तिः। न चैतत्सर्वमनित्यत्वेनैव परिहर्तव्यम् । प्रयोजनानां भूयस्त्वे तदनुसारेण स्वल्पदोषेषु अनित्यत्वेन प्रतिविधानं कर्तव्यम् । अत एव ‘कृन्मेजन्तः’ (१।१।३९) इति सूत्रे ‘दोषाः खल्वपि साकल्येन परिगणिताः । प्रयोजनानामुदाहरणमात्रम्’ इति भाष्ये संनिपातपरिभाषायाः प्रयोजनभूयस्त्वाभिप्रायेणोक्तम् । इह तु प्रयोजनत्रयं त्वदुक्तम् । दोषास्तु बहवः । कथं प्रयोजनत्रयानुसारेण परिभाषाया वर्णविषये प्रवृत्तिं स्वीकृत्य बहुषु दोषेष्वनित्यत्वेन प्रतिविधानं युज्यते । अपि च पचमानः इत्यत्र

---

१ ख. वाक्यान्तर. २ ख. न परित्याग इति अचः परस्मिन्० ३ क. तदागमा इति. ४ क. वृद्धेः प्रसङ्गः. ५ क स्वल्पदोषे. ६ क. वर्णविषयं.

लसार्वधातुकानुदात्तप्रवृत्तिर्न प्रयोजनम्, 'तास्यनुदात्तेत्–०' (६।१।१८६) इति सूत्रे अदुपदेशादित्युपदेशग्रहणसामर्थ्यात् शप्प्रवृत्तिकाले अतः पैरत्वमाश्रित्य[1] संप्रति मुका व्यवधानेऽपि स्वरप्रवृत्तिसंभवात् । अत एव पचावः पचाम इत्यादौ दीर्घे कृतेऽपि स्वरप्रवृत्तिः । न च प्रथमं स्वरप्रवृत्तौ पश्चाद्दीर्घोऽस्त्विति वाच्यम् । परत्वात् 'वार्णादाङ्गं बलीयः' इति न्यायाच्च प्रथमं दीर्घप्रवृत्तेः । अन्यथा पचमान इत्यत्रापि प्रथमं स्वरः पश्चान्मुगिति सुवचत्वात् ॥

'आने मुक्' (७।२।८२) इति सूत्रस्थभाष्यमपि मदुक्ताभिप्रायेणैव कैयटेन व्याख्यातम् । तत्र हि मुकि कृते अध्यर्धमात्रत्वाददिति तपरकरणेन तत्कालस्यैव ग्रहणात्कथं स्वरप्रवृत्तिरित्याशङ्क्य उपदेशग्रहणेन स्वरप्रवृत्तिं साधितवान्कैयटः । पचावः पचाम इत्यादौ उपदेशग्रहणादेव स्वरः प्रवर्तत इति चाह । दृश्यते च 'वाससी इव विवसानौ ये चरावः,' 'मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे' (ऋग्वेद ८।७।११) इत्यादौ दीर्घे कृतेऽपि लसार्वधातुकानुदात्तत्वम् । यदि च वर्णग्रहणेऽप्येतत्परिभाषाप्रवृत्तिरिष्टा स्यात्, तर्हि अवर्णत्वज[2]ातेरिव तत्कालत्वस्याप्यनयैव परिभाषया लाभात्कैयटोक्त[3] शङ्कासमाधाने असंगते स्याताम् । अत एव च तपरकरणात् 'आतो क्तिः' (७।२।८१) इत्येतदत्र न प्रवर्तत इति चाह कैयटः । को ह्युपदेशग्रहणतदभावावन्तरेण स्वरेयादेशयोर्विशेषः ! येन स्वरस्य प्रवृत्तिरियादेशस्य तु न प्रवृत्तिरिति व्यवस्था युक्ता स्यात् ॥

अतो गुणत्वमातो वृद्धित्वं च वदतस्तव तत्कालत्वमप्यनया परिभाषया लभ्यत एव। तपरे हि गुणवृद्धिसंज्ञे । उपदेशग्रहणेन पचावः पचाम इत्यादौ स्वरप्रवृत्तिं केवलतपरकरणादियादेशस्य चाप्रवृत्तिं वदन् कैयटो वर्णग्रहणेष्वस्याः परिभाषाया अप्रवृत्तिमभिप्रागात् । यद्यप्येवमकारान्तस्याङ्गस्य मुगिति पक्षेऽपि स्वरप्रवृत्तेः सूपपादतया[4] अङ्गान्त्यस्याकारस्य मुगिति पक्षसमर्थनं भाष्ये[5] व्यर्थमिति प्राप्तम्, तथापि वर्णग्रहणेष्वियं परिभाषा न प्रवर्तत इति स्पष्टं[6] वक्तुं शक्यत्वेऽपि शिष्यव्युत्पादनाय विचित्रगतिर्भाष्यकारोऽनया प्रणाल्या[7] वर्णग्रहणेष्वस्याः परिभाषायाः प्रसक्तिं संपाद्य निषिषेध । एवं हि वर्णग्रहणेष्वस्याः परिभाषायाः प्रसक्तिं संपादयितुमङ्गान्त्यस्याकारस्य मुगिति पक्षसमर्थनं भाष्ये कृतमिति न किंचिदनुपपन्नम् ॥

एवं च वर्णग्रहणेष्वस्याः परिभाषाया अप्रवृत्तिपरोऽयं भाष्यकैयटग्रन्थः कथमिति तत्प्रवृत्तिपरतया योजित इति न विद्मः । 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (परि.

---

१ क. प्रवृत्तिमाश्रित्य २ क. अवर्णजातेरिव. ३ क. कैयटोक्तशङ्का. ४ ख. सूपपादता.
५ ख. om. भाष्ये. ६ ख. om स्पष्टं. ७ ख. प्रणाल्या.

शे. परि. ७९) इति परिभाषयापि पचमान इत्यत्र अनुदात्तप्रवृत्तिः सुसाध्या। यद्यपि अग्निचित्वानित्यादौ 'ह्रस्वनुड्भ्याम्०' (६।१।१७६) इति मतुप उदात्तत्वापत्त्या इमं पाठं दूषयित्वा 'हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्' (परि. शे. परि. ८०) इति भाष्ये पठितम्, तथापि वर्णविषये उक्तपरिभाषाप्रवृत्तौ एनया परिभाषया मतुबु-दात्तत्वापत्तिर्दुर्वारा[1], ह्रस्वभकस्य तुकस्तद्ग्रहणेन ग्रहणात्। अथेयमनित्येति मतम्, 'स्वरविधौ०' इति पाठेऽपि तस्या अनित्यत्वान्नेह प्रवृत्तिरिति सुवचम्। तस्मात् पचमान इत्यादौ स्वरप्रवृत्तिरस्याः परिभाषाया वर्णविषयत्वे प्रयोजनमिति युक्तम्। नापि ङमुट्सूत्रस्थभाष्योपपत्तिस्तत्प्रयोजनमिति युक्तम्। आगमरहितस्य कार्यं सागमे एतत्प-रिभाषालभ्यम्। न त्वागमेऽपि आगमिधर्मः[2]। भूयासं भूयास्व भूयास्मेत्यादौ धातुरि[3]तिङ्त्वातिदेशापत्त्या पदसंज्ञायां रुत्वादिप्रसङ्गात्। ततश्च नकारद्वयसमुदायस्य पदा-न्तत्वलाभेऽपि पूर्वनकारस्य पदान्तत्वालाभेन उपपत्त्यभावेनोक्तभाष्यस्यैकदेश्युक्तित्वात्। अत एव 'तस्मिन्निति०' (१।१।६६) सूत्रे ङमो ङमुडागमे सति कुर्वन्नास्त इत्यत्र णत्वप्रसङ्गः। पदस्य चैको नकारोऽन्तो न द्वाविति 'पदान्तस्य' (८।४।३७) इति णत्वप्रतिषेधो नास्तीति वदता कैयटेन तस्यैकदेश्युक्तित्वं ध्वनितम्। अत एव 'शि तुक्' (८।३।३१) इति पूर्वसूत्रे 'तुगयं नियोगतः पूर्वान्त एषितव्यः, कुर्वञ्छेते इत्यत्र छत्वं यथा स्यात्' इत्युक्त्वा 'णत्वं तु न भवति, स्तोः श्चुनेति योगं विभज्य स्तोः श्चुना योगे णत्वं नेति व्याख्यानात्' इत्युक्तं भाष्ये। यदि च आगमे आगमि-धर्म एतत्परिभाषातिदेश्यः स्यात्, तर्हि नकारस्य स्वतः पदान्तत्वात् 'पदान्तस्य' (८।४।३७) इति णत्वनिषेधसिद्धेः स्तोः श्चुनेति योगविभागो भाष्योक्तोऽसंगतः स्यात्। यदि त्वागमविशिष्टे आगमिधर्मो बोध्यते, तदा न् न् इत्यस्य पदान्तत्वेऽपि नकारस्या-पदान्तत्वाद्भाष्योक्तो योगविभागो युज्यते। न चैवं कुर्वन्नास्त इत्यत्र णत्वापत्तिः। ङमो ङमुडिति पक्षस्य तत्र स्थितत्वान् ङमः परस्याच एव ङमुडिति सिद्धान्तात् तत्र पूर्वन-कारस्य पदान्तत्वेन उत्तरनकारस्य पदान्तरस्थत्वेन तेन व्यवधानेन च णत्वाप्रसङ्गात्[4]॥

अरारौ गुणवृद्धी इति तृतीयमपि प्रयोजनं न युक्तम्। न च ऋवर्णस्य गुण-वृद्धी अरारावेवेति नियमो न स्यादिति वाच्यम्। 'स्थानेऽन्तरतमः' (१।१।५०) इति सूत्रे 'अथवा अनान्तर्यमेव एतयोरान्तर्यम्'। (१।१।५० वा. १५ महाभाष्य) इति भाष्येण 'संप्रयोगो वा नष्टाश्वदग्धरथवत्' (१।१।५० वा. १६) इति वार्तिकतद्भाष्याभ्यां चास्य दोषस्य परिहृतत्वात्। 'इदं च ऋवर्णसामान्याभिप्रायम्'

१ क मतुबुदात्तत्वप्रवृत्ति०. २ न त्वागमे आगमिधर्मः. ३ क धातुटीति. ४ क. णत्वप्रसङ्गात्.

इति तत्र कैयटेन व्याख्यातत्वाच्च । ऋवर्णविशेषचिन्तापक्षे तु 'उरण्परः' (१।१।५१) इति सूत्रे यः उः स्थाने स रपर इति चेद् गुणवृद्ध्योरवर्णाप्रतिपत्तिरिति इममेव दोषं परिचोद्य 'सिद्धं तु प्रसङ्गे रपरत्वात्' (१।१।५० वा. ३) इति वार्तिकेन[1] उः स्थाने अण् प्रसज्यमान एव रपरो भवतीति भाष्येण च प्रवृत्तिकाल एव रपरत्व-विधानेन स्थानसाम्यमुपपाद्य समाहितम् । न च गुणानवयवभूतेन रेफेण कथं गुणस्य स्थानसाम्यमिति वाच्यम्, तदनवयवभूतेनापि तत्प्रसङ्ग एव नित्यसंनिहितेन रेफेण गुणवृद्ध्योः स्थानसाम्यमाश्रीयत इति द्वितीयस्थानेग्रहणानुवृत्तिसामर्थ्येन सुव-चत्वात् [2]तस्य प्रयोजनान्तराभावात् ॥

यदि च रेफस्यावयवत्वमिष्यते, तर्हि 'इको गुणवृद्धी' (१।१।३) इति-सूत्रस्थभाष्यं 'गुणे कृते रपरत्वे [3]चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति' इति, 'उरण्परः' (१।१।५१) इति सूत्रे पूर्वान्तत्वपक्षे 'गीर्यते स्वयमेव । पूर्यते स्वयमेव । अचः कर्तृयकि (६।१।१९५) इत्येष स्वरो न प्राप्नोति' (१।१।५१ वा. ८ महाभाष्य) इत्याशङ्क्य 'नैष दोषः । उपदेश इति वर्तते' (१।१।५१ वा. १० महाभाष्य) इति भाष्यं 'स्यसिच्०' (६।४।६२) इति सूत्रे '[4]उपदेशवचनमृकारगुणबली-यस्त्वात्' (६।४।६२ वा. १) इति वार्तिकम्, '[5]कारिष्यते । परत्वाद्गुणे कृते रपरत्वे चानजन्तत्वाच्चिण्वद्भावो न प्राप्नोति । उपदेशग्रहणाद्[6]भविष्यति' इति तद्भाष्यं च, 'ऋतो भारद्वाजस्य' (७।२।६३) इति सूत्रे 'ऋतो भारद्वाजस्येति नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य' (७।२।६३ वा. १) इति वार्तिकम्, 'गुणे कृते रपरत्वे चानजन्तत्वात्प्रतिषेधो न प्राप्नोति' इति तद्भाष्यं च, 'गुणे कृत इति । जहर्थेत्यादौ न ह्ययमजन्तो नाप्युपदेशे अत्वान्' इति तत्रत्यकैयटश्च विरुध्येत ॥

यत्तु— 'थलि च सेटि' (६।४।१२१) इति सूत्रे भाष्यं 'शशरिथेत्यादौ गुणस्यैषोऽकारः । कथम् । गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभि-निर्वर्तते' इति, तद् गुणो भवतीति विध्युपादानाद् गुणशब्देन 'उरण् रपरः' (१।१।५१) इति सूत्रसध्रीचीनेन

'प्रधानविधिवाक्यं खल्वङ्गवाक्यसमन्वितम् ।
अङ्गप्रधानसंयुक्तां विधत्तेऽपूर्वभावनाम् ॥'

इति न्यायेन अरित्यस्य गुणशब्देन [7]विधानाद्गुणशब्दस्य विधीयमानस्यारि-

---

१ क. वार्तिके ऽ उः. २ क. om. तस्य प्रयोजनान्तराभावात्. ३ क. ख, घ अनजन्तत्वाद्. ४ क. ख. उपदेशग्रहणमृकारस्य गुणस्य बलीयस्त्वात्. ५ क कारिष्यते । हारिष्यते । परत्वाद्गुणे० ६ क ख. भवति for भविष्यति. ७ क. om. विधानाद्गुणशब्दस्य.

त्यस्यावयवोऽकार इत्येवंपरम् । यच्च तत्र कैयटेन अरित्ययं गुण इत्युक्तं तदपि गुण-पदस्य गुणशब्देन विधीयत इत्यर्थकतया योज्यम्[1] । अत एव 'न शसददवादिगुणानाम्' (६।४।१२६) इति सूत्रे वृत्तिकृता 'गुण इत्येवमभिनिर्वृत्तस्य[2] च योऽकारः' इत्युक्तम् । तत्र हरदत्तेन च 'गुणशब्देन अभिनिर्वृत्तस्य संबन्धी योऽकार इत्यर्थः । संबन्धित्वमपि तस्य तत्स्थानिकत्वात्तदवयवत्वाच्च' इत्युक्तम् । सिद्धान्तकौमुदीकृताप्येवम् । अन्यथा उक्तभाष्यादिविरोधः[3] । न च पूर्वोक्तभाष्यादिकमनित्यत्वेन प्रवृत्तमिति वाच्यम् । इष्टस्थलेऽप्यप्रवृत्तौ परिभाषाया निर्विषयत्वापातात् । तस्मादस्याः परिभाषाया वर्णविषयत्वं निर्मूलं निष्फलं च ॥

'आने मुक्' (७।२।८२) इति मुग्विधानात्सवर्णदीर्घबाधनमन्तरेणानुपपद्यमानादियमनित्येत्यप्युक्तम् । न ह्यत्र सवर्णदीर्घः प्राप्नोति, किं तु 'आतो ङितः' (७।२।८१) इति इयादेशः । यद्यपि सवर्णदीर्घत्वं प्राप्नुयात्, तथापि नाप्राप्ते तस्मिन्नारभ्यमाणो मुक् अपवादत्वेन सवर्णदीर्घं बाधते ; न ह्यपवादेनोत्सर्गे बाध्यमाने कस्यचिदनित्यत्वं ज्ञापयितुं शक्यम् । 'अनागमकानां सागमका आदेशाः' इति भाष्यविरोधश्च । शब्दस्य नित्यत्वसमर्थनार्थोऽयं पक्षो भाष्ये उक्तः । न तु स्थान्यादेशभावाभिप्रायेणेत्यप्ययुक्तम् । स्थान्यादेशभावाभिप्रायकत्वे बाधकाभावात् । अत एव 'आद्यन्तौ टकितौ' (१।१।४६) इति सूत्रे आगमपक्षेऽपि 'यत्तावदयं सामान्येन शक्नोत्युपदेष्टुम्' इत्यादिना भाष्ये शब्दनित्यत्वसमर्थनं कृतम् । 'अनागमकानां सागमका आदेशाः' इति चानागमककार्यस्य स्थानिवद्भावेन सागमके लाभ एव प्रयोजनम् । स्थानिवत्सूत्रे 'एकदेशविकृतस्योपसंख्यानम्' (१।१।५६ वा. ९) इति वार्तिकेन एकदेशविकृते सर्वत्र स्थान्यादेशभावस्य स्फुटीकरणात् । अत्र विकारशब्देन लोपः वर्णान्तरमागमश्चोच्यते । पचत्विति तदुदाहरणेन 'श्वा पुच्छे कर्णे वा छिन्ने' इति तद्दृष्टान्तकथनेन आगमविषये 'एकदेशविकारे हि नित्यत्वं नोपपद्यते' इति भाष्यपठितश्लोके आगमे विकारशब्दप्रयोगेण[5] च त्रिविधस्यापि विकारपदार्थत्वप्रतीतेः । त्रिप्रकारविकारस्थले लोकन्यायेनाभेदप्रत्यभिज्ञया कार्यसिद्धावपि व्याकरणे शब्दान्तरस्योच्यमानं कार्यं 'स्वं रूपम्०' (१।१।६८) इति वचनाच्छब्दान्तरस्य यत्नं विना न सिध्यति । अत एव 'येन विधिः०' (१।१।७२) इति सूत्रे भाष्ये 'व्याकरणे अर्ध[6]परिमाणस्य संज्ञा कृता केनाधिकस्य स्याद्' इत्युक्तम् । स्थानिवत्सूत्रे

---

१ After योज्यम्, ख. ins. अन्यथा उक्तभाष्यादिविरोधात् । अन्यथा ... विरोधात् । २ क. अभिनिर्वर्तस्य. ३ ख. om. अन्यथा उक्तभाष्यादि विरोधः । ४ क. शब्दो न … ५ क. प्रयोगेन च. ६ क. उक्त.

च 'दृष्टान्तस्यापि पुरुषारम्भो निवर्तको भवति । अस्ति चेह कश्चित्पुरुषारम्भः । अस्तीत्याह । कः । स्वरूपविधिर्नाम ' (महाभाष्य १।१।५६ वा. १) इत्युक्तम् ॥

यद्यपि 'स्वं रूपम्' (१।१।६८) इति वचनं भाष्यवार्तिकयोः प्रत्याख्यातं तथापि उपस्थितस्वरूपविवक्षा स्वीकृतैव । एवदेवाभिप्रेत्य स्थानिवत्सूत्रे वार्तिककृता 'एकदेशविकृतस्योपसंख्यानम्' (१।१।५६ वा. ९) इत्युक्तम् । भाष्ये चादेशग्रहणं-स्य इदमेव प्रयोजनमुक्तम् । 'आद्यन्तौ टकितौ' (१।१।४६) इति सूत्रे च भाष्यकैयटयोः संज्ञाप्रकरणानुसारेण तद्धस्यैकारादिरितव्य आदेश इति स्फुटमेवोक्तम्॥ यत्तु घुसंज्ञासूत्रे कैयटेनोक्तम्—'यद्येवं दैशब्दस्य दाप्शब्द आदेशः क्रियते इति दाशब्दस्यानर्थकत्वप्रसङ्गः । नैष दोषः । नित्यतासमर्थनाय आदेशपक्ष आश्रितः । प्रक्रियायां तु कल्प्यमानायामागम एव । अन्यथा आगमादेशयोर्भेदेन व्यवहारो न स्यात्' (१।१।२० वा. ५ महाभाष्यप्रदीप) इति, तत् स्थानिवद्भावं विनापि 'तदागमाः०' इति परिभाषामाश्रित्य कार्यं निर्वोढुं शक्यत इत्यभिप्रायेण, न तु स्थानिवद्भावो नास्तीत्यभिप्रायेण । तस्मिन्नेव सूत्रे 'सर्वे सर्वपदादेशाः' इति श्लोकस्थ-पदशब्दं 'कार्यं प्रकृतिप्रत्ययादि' इति व्याचक्षाणेन कैयटेन स्थानिवद्भावेन कार्य-सिद्धेर्ध्वनितत्वाच्च । अत एव घुसंज्ञासूत्रे आद्यन्ताविति सूत्रे च सिद्धान्ततयोपन्यस्तः 'सर्वे सर्वपदादेशाः' इति न्यायेन 'अनागमकानां सागमका आदेशाः' इति पक्षः । इतरथा तत्र कार्यासिद्धिप्रसङ्गेन स पक्षो भाष्यकृता दूष्यः स्यात् । अत एव च स्थानि-वत्सूत्रे 'कार्यविपरिणामाद्वा सिद्धम्' (१।१।५६ वा. १४) इति वार्तिकतद्भाष्य-योर्बुद्धिविपरिणाम एव स्थानिवद्भावप्रयोजकः स्थान्यादेशभाव इत्युक्त्वा, अनन्तरवार्तिके 'अपवादप्रसङ्गस्तु स्थानिवत्त्वात्' (१।१।५६ वा. १५) इति 'आतोऽनुपसर्गे कः' (३।२।३) इति कप्रत्ययस्य 'कर्मण्यण्' (३।२।१) इत्यणादेशतया णित्त्वमाशङ्क्य, 'उक्तं वा' (१।१।५६ वा. १६) इति तदुत्तरवार्तिकेन परि-हृतम् । तत्रैव भाष्ये 'विषयेण तु नानालिङ्गकरणात्सिद्धम्' (महाभाष्य १।१।५६ वा. १६) इत्युक्तम् । तत्र च कैयटेन 'कापवादस्य टकः कित्करणान्नापवादे उत्सर्गकृतं भवति' (१।१।५६ वा. १६ महाभाष्यप्रदीप) इत्युक्तम् । यत्तु 'सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात्' (१।१।५६ वा. १७) इति तदुत्तर-वार्तिके स्थानषष्ठीनिर्देश एव स्थानिवद्भावप्रयोजक इत्युक्तम्, तत्तु आगमस्थलेऽपि षष्ठीनिर्देशसत्त्वात् 'षष्ठी स्थानेयोगा' (१।१।४९) इत्यस्यानुवृत्त्याश्रयणे गौरवात्

१ क. स्वरूपस्वरूपेनैव. २ क. ग्रहणस्येदमेव. ३ क. 'दाशब्दस्य...इति' इत्येतन्न पठ्यते.

'नाभि नभं च' (५ । १ । २ गवादिगण–गणसूत्र) इत्यादौ 'षष्ठी स्थाने-प्रथमा' इति कैयटोक्तकल्पनस्याप्रामाणिकत्वेन व्यभिचाराच्च न 'अनागमकानां सागमका आदेशाः' इति पक्षे स्थानिवद्भावविरोधि । अत एव वृद्धिसूत्रे 'षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते' इति भाष्यव्याख्यानावसरे 'षष्ठ्यभावेऽपि तदर्थसद्भावाद्भवत्येव स्थान्यादेशभावः । यथा—नाभि नभं च इत्यादौ' इति कैयटेनोक्तम् । एतदस्वरसादेव च पुनर्भाष्ये श्यन्श्नोश्नमिति शबपवादानां केषांचित् शित्करणमपवादे उत्सर्गकार्याप्रवृत्तेर्ज्ञापकमिति प्रथमपक्ष एवोपसंहृतः ॥

अत्रेदमवधेयम्—'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (परि. शे. परि ८९) 'तदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' (परि. शे. परि. ११) 'एकदेशविकृतमनन्यवद्भवति' (परि. शे. परि. ३७) इति वचनत्रयमिदं स्थानिवत्सूत्रेणैव (१।१।५६) सिद्धम् । यान्यत्र ज्ञापकानि— 'नेदमदसोरकोः' (७।१।११) 'णेरनिटि' (६।४।५१) 'आढ्यसुभगस्थूल०' (३।२।५६) इति, तानि स्थानिवत्सूत्रे (१।१।५६) आदेशग्रहणेन तेषां ग्रहणे ज्ञापकानि । एवं सति वचनत्रयाकल्पनाल्लाघवम् । तदागमैकदेशविकृतपरिभाषयोरल्विधावप्रवृत्तये ज्ञापकान्तरानुसरणमपि न कर्तव्यम्, अनल्विधाविति निषेधेनैव तत्र तदप्रवृत्तेः । अल्विधौ प्रवृत्तिप्रयोजनत्रयं तु प्रागेव दूषितम् । तस्मात्स्थानिवत्सूत्रेणेष्टसिद्धौ वचनत्रयमिदं न कर्तव्यमिति । इदं त्ववशिष्यते—अपिबदित्यत्र प्रथममटि कृते 'पाघ्रा०' (३।१।३७) इति पिबादेशः सर्वस्य स्यादिति । अत्र निर्दिश्यमानपरिभाषा (परि. शे. परि. १२) न भवति । न च पाशब्दस्य स्थाने अपाशब्द आदेश इति पक्षे स्थानिवद्भावेन कार्यस्य निर्दिश्यमानपरिभाषया वारणे तिसृणामित्यत्र निर्दिश्यमानत्रिशब्दाभावादेव त्रयादेशवारणसंभवे 'त्रयादेशे स्रन्तस्य प्रतिषेधः' (१।१।५६ वा. २६) इति स्थानिवत्सूत्रस्थवार्तिकं तद्भाष्यं च विरुध्येतेति वाच्यम् । अनागमकानां न ये केचित्सागमका आदेशाः । तथा सति तव्यस्य अभू इत्यादेशप्रसङ्गात् । किं तु सागमकास्त एवेति तद्बुद्धिपूर्वकमेवादेशशास्त्रस्य प्रवृत्तेः । अत एवास्याः परिभाषायाः 'प्रयोजनं सुप्तिङादेशेषु' (६।४।१३० वा. ४) इति वार्तिकोक्तप्रयोजनकथनपरभाष्ये 'यस्यै तस्यै इत्यत्र स्याटि कृते सस्याट्कस्य स्मैभावः प्राप्नोति । निर्दिश्यमानस्येति न दोषो भवति' (६।४।१३० वा. ४ महाभाष्य) इत्यागमस्यैव

१ क. श्नाश्नुरिति. २ ख. आदेशपदेन तेषां ग्रहणज्ञापकानि. ३ क. त्रयकल्पनाल्लाघवम्. ४ क. प्राग्दूषितम् । ५ क. सूत्रेणैवेष्ट ६ क. निर्दिश्यमानस्यादेशा न भवन्तीति परिभाषया निर्दोषो भवति.

उदाहरणं दर्शितम् । अन्यथा त्वत्पक्षेऽपि 'तदागमाः०' (परि. शे. परि. ११) इति शास्त्रस्य आगमविशिष्टे केवलकार्यप्रवृत्त्यर्थतया तद्विरोधेन कथं निर्दिश्यमानपरिभाषाप्रवृत्तिरित्याक्षेपस्य तुल्यत्वात् । आगमविशिष्टे अनागमकार्यानभ्युपगमे च सर्वेषामित्यत्र सुड्विशिष्टस्य सुप्त्वाभावेन 'बहुवचने झल्येत्' (७।३।१०३) इत्येत्वं न स्यात् । प्रत्युत देवदत्तस्याङ्गाधिक्ये तद्विशिष्टस्यैव देवदत्तबुद्धिविषयत्वमिति स्वीकार्यतया निर्दिश्यमानपरिभाषोपस्थानेऽपि अपा इत्यस्य पिबादेशो दुर्वारः । तस्माद्यत्र निर्दिश्यमानबुद्धयविरोधेनादेशप्रवर्तनं तत्र निर्दिश्यमापरिभाषाप्रवृत्तिरित्येव भाष्यवार्तिकाशयो युक्तः । यत्र तु निर्दिश्यमानबुद्धिविषयाघटित एकादेशः, तत्र स्थानिवत्सूत्रेण (१।१५६) कार्यप्रवृत्तौ न निर्दिश्यमानपरिभाषापेक्षास्तीति न 'त्र्यादेशे स्रन्तप्रतिषेधः' (१।१।५६ वा. २६) इति वार्तिकतद्भाष्ययोर्विरोधः । किं च 'शदेः शितः' (१।३।६०) इति सूत्रे भाष्ये आच्छीदित्यत्र 'आटि कृते साट्कस्य शछिभावः प्राप्नोति' इत्याशङ्क्य 'अस्तु, शब्दान्तरस्याकृत आडिति कृत्वा पुनराट् भविष्यति' इति समाधाय, 'ननु पुनश्च शछिभावः पुनराडिति चक्रकादव्यवस्था प्राप्नोति' इत्याशङ्क्य (१।३।६० वा.५ महाभाष्य) 'नैष दोषः। चक्रकेष्विष्टतो व्यवस्था' इति समाहितम् । तद्रीत्या अपा इत्यस्य पिबादेशेऽपि तस्य शब्दान्तरत्वात् पुनरटि इष्टतो व्यवस्थया अपिबदिति सिद्धमिति न तदर्थमेतत्परिभाषाया अनित्यत्वमाश्रयणीयमिति सर्वमनाविलम् ॥ ११ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ १२ ॥

सूत्रे यस्मात्पदात् षष्ठ्युच्चार्यते तस्यैवादेशो भवति, न तु तदन्तादेरिति अनुकार्यानुकरणयोरभेदपक्षे अर्थः । तयोर्भेदपक्षे तु यदनुकरणात् षष्ठ्युच्चारिता, तस्यानुकार्यस्यादेशा भवन्तीति । तेन 'पादः पत्' (६।४।१४०) इति पद्भावो द्विपद इत्यत्र पाच्छब्दस्यैव भवति, न तु द्विपाच्छब्दस्य । तथा यस्यै तस्यै इत्यत्र 'सर्वनाम्नः स्मैः' (७।१।१४) इति स्मैभावो न । अनया परिभाषया 'येन विधिः०' (१।१।७२) इति सूत्रेण पैदाङ्गाधिकारपरिभाषया स्थानिवत्सूत्रेण च अधिकस्य प्राप्ता वार्यन्ते । तत्र 'पादः पत्' (६।४।१३०) इत्यत्र 'येन विधिः' (१।१।७२) इति सूत्रेण अङ्गाधिकारपरिभाषया च तदन्तस्यादेशो वार्यते । यस्यै तस्यै इत्यत्र 'अनागमकानां सागमका आदेशाः' इति पक्षे स्थानिवद्भावेन विशिष्टस्य प्राप्तः

---

१ क. कार्यमात्रार्थतया. २ क 'कथम्' इति न पठ्यते. ३ क. सागमकार्यानभ्युपगमे च. ४ क. नानया परिभाषया ५ क. अङ्गाधिकारपरिभाषया ६ क. प्राप्तं वार्यते.

स्मायादेश एनया परिभाषया बाध्यते। निर्दिश्यमानस्य तु व्यवहितत्वान्न भवति। तथा अपिबदित्यत्र स्थानिवद्भावेन अड्विशिष्टस्य प्राप्तः पिबादेश एतत्परिभाषया केवलपा-शब्दस्य भवति ॥

नन्वेवमकज्विशिष्टस्य कादेशो न स्यात्, तथा अतिजरशब्दे जरसादेशो न स्यात्, स्थानिवद्भावप्राप्तस्याप्येनया परिभाषया वारणादिति चेत्, मैवम्। यत्र निर्दिश्यमानरूपाविरोधी आदेशः, तत्रैतत्परिभाषाप्रवृत्तिः। ककिंशब्दे अतिजरशब्दे च च निर्दिश्यमानरूपविरोधित्वादादेशयोः ' सर्वे सर्वपदादेशाः ' इति पक्षेऽपि एतत्परिभाषाया अप्रवृत्ते.। न चैवमतिजरशब्दस्य जरसादेशापत्तिरिति वाच्यम्, निर्दिश्यमानपरिभाषया जराशब्दस्य प्राप्तो जरसादेशः स्थानिवद्भावेन जैराशब्दस्यैव भवति। यत्तु—स्थानिवद्भावविषये नास्याः प्रवृत्तिः, तत्र स्थानिबुद्ध्यैव कार्यप्रवृत्तेरिति नव्यैरुक्तं तन्निर्दिश्यमानरूपाविरोध्यडाद्यागमविशिष्टादेशे स्थानिवद्भावप्राप्तस्याप्युक्तपरिभाषया निर्दिश्यमानरूपे नियमनोपपादनान्निरस्तम्। आदेशे स्थानिबुद्ध्या कार्यं प्रवर्तत इत्यवैयाकरणजल्पितम्। स्थानिकार्यं ह्यादेशे अतिदिश्यत इति स्थानिवत्सूत्रार्थः, न तु स्थानिबुद्धिरादेशे कर्तव्येति। तथा च स्थानिवत्सूत्रे भाष्यम्—' स्थानिकार्यमादेशे अतिदिश्यते ' (१।१। ५६ वा. १ महाभाष्य) इति। ' शास्त्रातिदेशानां कार्यार्थत्वात्प्राधान्यात्कार्यातिदेशः ' इति कैयटः। ' तदागमाः—' इति पृथक्स्वीकारे आगमविशिष्टे निर्दिश्यमानबुद्धेः स्वीकार्यतया अपिबदिति रूपासिद्धिश्चेति दिक् ॥

इयं च परिभाषा ' षष्ठी स्थानेयोगा ' (१।१।४९) इति सूत्रमेवेति भाष्ये वर्णिता—इदं हि सूत्रं षष्ठ्यामुच्चारितायाम् ' अस्तेर्भूः ' (२।४।५२) इत्यादावनेकार्थप्रसक्तावपि न स्थानरूपसंबन्धनियमार्थम्, अस्तेर्भूशब्देनार्थादिसंबन्धासंभवात्। आनन्तर्यस्य संभवेऽपि स्थान्यादेशयोर्लोके क्वचिदपि सहप्रयोगादर्शनेन अर्थप्रतिपत्त्यर्थं प्रयुज्यमानशब्दानामन्वाख्यायके अस्मिञ्शास्त्रे अर्थद्वारकसंबन्धस्यैवोपस्थितत्वेन अन्तरङ्गत्वाद्ग्रहणसिद्धेः। तदुक्तं कैयटेन—' अन्तरङ्गत्वाल्लक्ष्यापेक्षणाच्च ' इति। किं तु षष्ठीति प्रत्ययग्रहणपरिभाषया तदन्तमुच्यते। षष्ठ्यन्तमेव स्थानरूपसंबन्धेन युज्यत इत्यर्थ इति। तेन षष्ठ्यन्तेन निर्दिश्यमानस्यैव पाच्छब्दादेरादेशा इति सिद्धम् ॥१२॥

यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ॥ १३ ॥

इयं च परिभाषा ' स्थानेऽन्तरतमः ' (१।१।५०) इति सूत्रे ' षष्ठी स्थानेयोगा '

---

१ क. आदेश्यः २ क. परिभाषाप्रवृत्तेः ३ ख. जराशब्दस्ये ४ ख. रूपाविरुद्धाड्याद्यागम ५ ख. उपपादनान्न्यस्तम् ६ ख. संबन्धसंभवात् ७ ख. लक्ष्यापेक्षणा ८ ख. आन्तर्यं.

(१।१।४९) इत्यतोऽनुवृत्तेन स्थानग्रहणेन तृतीयान्ततया विपरिणतेन प्रसङ्गे सति स्थानेन सदृशतम आदेशो भवतीति वाक्यभेदेन भाष्ये समर्थिता। तेन चेता स्तोतेत्यत्र प्रमाणत आन्तर्यादकारो गुणो न। न च प्रसङ्गे सति सदृशतम आदेशो भवतीत्येकवाक्यतयैव व्याख्यानं किं न स्यादिति वाच्यम्। तत्र तमब्ग्रहणेन अनेकान्तर्यस्य ग्राह्यत्वबोधनात्। एकवाक्यत्वे तद्वैयर्थ्यात्। आन्तर्यं च स्थानार्थगुणप्रमाणैश्चतुर्भिरिति प्राञ्चः। तत्र स्थानत आन्तर्यम्— 'इको यणचि' (६।१।७७) इत्यादौ। अर्थत आन्तर्यम्- 'तृज्वत्क्रोष्टुः' (७।१।९५) इत्यादौ। गुणेनान्तर्यम्—वाग्घरिरित्यादौ। प्रमाणत आन्तर्यम्— 'अदसोऽसेः—' (८।२।८०) इत्यादाविति ॥

अर्थवद्ग्रहणे नानर्थकस्य ॥ १४ ॥

अर्थवतो ग्रहणे संभवति अनर्थकस्य ग्रहणं न भवतीत्यर्थः। इदं च विशिष्टस्वरूपोपादानविषयम्, तत्रोपस्थितस्यार्थस्य शब्दं प्रति विशेषणत्वे संभवति परित्यागायोगात्। अत एव अर्थवत्सूत्रे (१।२।४५) अर्थवद्ग्रहणं कृतम्। भाष्ये तु 'स्वं रूपम्—' (१।१।६८) इत्यत्र शब्दस्य स्वं संज्ञा इत्येतावता सिद्धे अतिरिच्यमानं रूपग्रहणमस्याः परिभाषाया ज्ञापकमित्युक्तम्; तेन 'प्रादूहोढ०' इति वृद्धिः प्रोढवानित्यत्र न भवति। यत्तु— 'अर्थः कल्पितान्वयव्यतिरेककल्पितः शास्त्रीयश्च गृह्यते' (परि. शे. परि. १४) इति नव्यैरुक्तं तत्र शास्त्रीयपदेन यदि पारमार्थिकत्वं विवक्षितम्, तदा असंभवः; ऊढशब्दस्य क्तान्तस्यापि न पारमार्थिकमर्थवत्त्वम्। अथ शास्त्रे प्रकृत्यादिकल्पनायां कल्पितत्वं शास्त्रीयत्वम्, तर्हि तस्य पृथग्ग्रहणवैयर्थ्यम्। अन्वयव्यतिरेकाभ्यां कल्पितार्थवत्त्वेनैव सर्वत्र परिभाषाप्रवृत्तिनिर्वाहाच्च। तस्मादिह अन्वयव्यतिरेककल्पित एवार्थो गृह्यते। अस्याः परिभाषाया व्रश्चादिसूत्रे (८।२।३६) राजेः पृथक् भ्राजिग्रहणं ज्ञापकमिति सीरदेवः। नन्विदमयुक्तं, षत्वविधौ राजिसाहचर्यात्फणादेरेव ग्रहणं न तु भ्राजृ दीप्तावित्यस्य तदर्थं भ्राजिग्रहणस्य सार्थक्यादिति चेत्, मैवम्। फणादौ टुभ्राजृ इति पठ्यताम्। एजृ भ्राजृ इत्यत्र ऋभ्राज इति पठ्यताम्। प्रकृतसूत्रे राजृ इति पठ्यताम्। एवं च ऋभ्राज इत्यस्याग्रहणं सिध्यति। वस्तुतः ऋभ्राज इत्यपि मास्तु। भ्राजेत्यकारोऽनुदात्त आत्मनेपदार्थः पठ्यताम्। 'भ्राजभास०' (३.२।१७७) इति सूत्रेण उपधाह्रस्वविकल्पस्यावश्यकतया 'नाग्लोपि०' (७।४।२) इति ह्रस्वनिषेधस्य ऋदित्कार्य-

[1] ख. 'आदेश:' इति न पठ्यते. [2] ख. तत्र इति न पठ्यते। [3] क. आन्तरीयं. [4] ख. संज्ञा इति न पठ्यते। [5] क पणादौ. [6] ख. भ्रेजृ. [7] क. ऋभ्राजृ.

स्यात्राभावात् केवलात्मनेपदप्रयोजनस्याकारेणापि सुसाधत्वात् । तस्मात्पृथगात्रिग्रहणं ज्ञापकमेव ॥ १४ ॥

गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ १५ ॥

गुणादागतो गौणः । यथा—गोशब्दस्य जाड्यादिगुणविशिष्टो वाहीकः । मुखमिव मुख्यः । शाखादित्वाद्यः । अप्रसिद्धश्च संज्ञादिरपि गौणः । झटित्युपस्थितिकलोकप्रसिद्धार्थस्यैव विशेषणत्वेनाप्रसिद्धसंज्ञादेर्वारणात् । यस्तु संज्ञादेरग्रहणे मुख्यगुणारोपेणैव प्रवर्तनमिति नव्योक्तो हेतुः (परि. शे. परि. १५) स न युक्तः । न हि गोपालक इति संज्ञाशब्दो गोपालकगुणारोपेण प्रवर्तते । गोपालकसंज्ञकः कश्चिदित्येव ततो बोधात् । तेन महद्भूतश्चन्द्रमा इत्यत्र अमहति गौणस्य महच्छब्दस्य 'आन्महतः०' इत्यात्त्वं न भवति । अग्निसोमौ माणवकावित्यत्र संज्ञात्वादीत्त्वषत्वे न भवतः । यदा तु लोकप्रसिद्धयोरग्नीषोमयोरेव अग्नीषोमपदं व्युत्पाद्यते पश्चान्माणवकविशेषणत्वम्, तदा मुख्यार्थाश्रयेण प्रथमप्रवृत्तयोरीत्त्वषत्वयोर्न निवृत्तिः । इयं च पदकार्येष्वेव प्रवर्तते, न प्रातिपदिककार्येष्विति कैयटः । हरदत्तस्तु गौणे तथात्वेऽपि अप्रसिद्धसंज्ञादिरूपांशे प्रातिपदिककार्येऽपि प्रवर्तत इत्याह ॥

अत्र कौस्तुभकृत्— "इयं स्वरूपोपादानविषया । अत एव ओत्सूत्रे (१।१।१५) गोभवादित्यत्रोक्तन्यायेन प्रगृह्यसंज्ञावारणपरभाष्यकैयटहरदत्तग्रन्थाः प्रौढिवादाः । अस्याः स्वरूपानुपादानेऽपि प्रवृत्तौ संज्ञया श्वशुरस्यापत्यं श्वाशुरिरित्यत्र इञपि न स्यात् । अत एव 'एकाच्च प्राचाम्' (५।३।९४) इत्यादौ प्रातिपदिककार्येऽप्ययं न्यायः । न चास्य न्यायस्य पदकार्येष्वेव प्रवर्तने कारकाणां क्रियासंबन्धद्वारक एव परस्परसंबन्धः । ततश्च गां वाहीकमानयेत्यत्र वाहीकपदसंबन्धवेलायामेव गोपदस्य गौणार्थत्वबुद्धिः, न तु ततः प्राक् इति कैयटाद्युक्तो हेतुरपि युक्तः । 'कट एव कर्म, तत्सामानाधिकरण्याद्भीष्मादिभ्यो द्वितीया' इति कारकाणां क्रियासंबन्धात्प्रागेव परस्परसंबन्धप्रतिपादकभाष्योक्तपक्षान्तरे तदसंभवात् । गां पाठयेत्यत्र क्रियासंबन्धात्प्रागेव गौणार्थत्वनिर्णयेन आत्वाभावप्रसङ्गाच्च" इत्याह ।

अत्र नव्याः— "उपात्तं विशिष्यार्थोपस्थापकं विशिष्टरूपं यत्र तादृशपदकार्यविषयमिदम् । परिनिष्ठितस्य पदान्तरसंबन्धे हि गौणत्वप्रतीतिः । न तु ततः प्राग्जाता-

---

१ ख. अकारेपि. २ क. शाखादित्वाद्यत् । ३ क. प्रवर्तनमिति. ४ ख. गोपाल इति. ५ क. कौस्तुभकारः । ६ क. कारणपर. ७ क. प्रवृत्तौ...इत्यादौ इति न पठ्यते. ८ क. पदकार्ये प्रवर्तने. ९ क वाहीक.

न्तरङ्गप्रातिपदिककार्यबाधो युक्तः । संज्ञया[1] श्वशुरस्यापत्यं श्वाशुरिरित्यत्र इञ्सिद्धये उपात्तमित्यादि । न च प्रातिपदिकपदं तादृशमिति वाच्यम्, तेन हि प्रातिपदिकपदत्वेनोपस्थितिरिति तस्य विशिष्यार्थोपस्थापकत्वाभावात् । निपातपदं तु चादित्वेनैव चादीनामुपस्थापकमिति तदुद्देश्यककार्यविधायके 'ओत्' (१।१।१५) इत्यादावेतत्प्रवृत्त्या गोनवदित्यादौ दोषो न । गां पाठयेत्यादौ क्रियासंबन्धात्प्रागेव गौणार्थत्वप्रतीतिरित्यप्ययुक्तम्, प्रयोक्तुः प्रागेव गौणार्थत्वप्रतीतावपि प्रतिपत्तॄणां स्वतन्त्रपदस्यैव पदान्तरेण संबन्धे गौणार्थत्वप्रतीतेः । त्वद्भवतीत्यादौ त्वमाद्यादेशकरणं महद्भूतश्चन्द्रमा इत्यत्र आत्वाकरणं च भाष्यस्थं प्रातिपदिककार्येष्वस्याप्रवृत्तौ पदकार्येषु प्रवृत्तौ च मानम्; अन्यथा वाक्यसंस्कारपक्षे त्वद्भवतीत्यादौ त्वादेशाद्यनापत्तिः । किं च गामिति पदं क्रियासामान्यनिरूपितकर्मत्वसामान्यापेक्षं संस्क्रियते । क्रियापदप्रयोगस्तु आक्षिप्तक्रियाविशेषनियमार्थ इत्यर्थवत्सूत्रे भाष्योक्तेः (१।२।४५) गामिति द्वितीयान्तपदसंस्कारदशायां न पाठनक्रियापेक्षा येन द्वितीयोत्पत्तेः प्रागेव गौणता स्यात् । प्रयोक्तुरप्येवमेव । एतन्मूलकः 'अभिव्यक्तपदार्थाः०' इति श्लोकोऽपि पदकार्यविषयकः । सर्वादिसूत्रे संज्ञाप्रतिषेधं कुर्वन्वार्त्तिककारः, पूर्वादिसूत्रे असंज्ञायामिति वदन्सूत्रकारः अन्वर्थसंज्ञया संज्ञाप्रतिषेधं प्रत्याचक्षाणो भाष्यकारश्चात्रानुकूलाः" (परि. शे. परि. १५) इत्याहुः ॥

अत्रोपात्तविशिष्टरूपस्थल एवैतन्न्यायप्रवृत्तिरित्ययुक्तम् । ओत्सूत्रे (१।१।१५) विशिष्टरूपानुपादानेऽपि एतन्न्यायस्य भाष्यादावुपन्यस्तत्वात् । न च निपातपदं विशिष्यार्थप्रतीत्यौपयिकरूपेण निपातानामुपस्थापकम्, तस्य[2] संज्ञाशब्दत्वेन प्रातिपदिकपदवत् स्वप्रकारक[3]बोधजनकत्वात् । यद्रूपावच्छिन्नस्य संज्ञा क्रियते तद्रूपबोधकत्वं संज्ञापदस्येत्यभ्युपगमेऽपि च्व्यन्तत्वेन निपातपदस्य च्व्यन्तोपस्थापकत्वम्, न स्वार्थप्रतीत्यौपयिकरूपेणेति निपातपदं च स्वाद्यर्थप्रतीत्यौपयिकरूपेणोपस्थापकमित्यप्ययुक्तम् । अत एव 'आन्महतः०' (६।३।४६) इति सूत्रे कैयटेन गोभवदित्यत्र 'शब्दविशेषानाश्रयेऽपि' इति ग्रन्थेन 'ओत्' (१।१।१५) इति सूत्रे अर्थप्रतीत्यौपयिकशब्दविशेषानाश्रयणमुक्तम् । तस्मात् 'ओत्' (१।१।१५) इति सूत्रे विशेषरूपाश्रयणमित्ययुक्तम् । किं च गौणत्वस्य पदान्तरसंबन्धसापेक्षत्वेन तत्र पदकार्ये प्रवृत्तावपि संज्ञायाः पदान्तरसंबन्धापेक्षां विनैव प्रयोक्तृप्रतिपत्तृभ्यां निर्णये[4] तत्र प्रातिपदिककार्येऽप्येतन्न्यायप्रवृत्तौ न किंचिद्बाधकम् । अत एव 'एकाच्च प्राचाम्'

१ क. संज्ञायाः २ क. उपस्थितस्य. ३ क. स्वप्रकाशक. ४ क. निर्णयः

(५।३।९४) इत्यत्र न स्मादादेशः, ' युष्मदस्मदोः ' (४।३।१, ६।१।२११, ७।२।८६, ८।१।२०) इत्यत्र न त्वमादेशः । न च त्वद्भवतीत्यादौ [1]त्वमाद्यादेशो न स्यादिति वाच्यम्, पदकार्यत्वाभ्युपगमेऽपि इह त्वाद्यादेशस्य [2]पदकार्यत्वेन तद्दोषस्य दुरुद्धरत्वात् । इह हि नान्तर्भूतसुप्रत्ययमपेक्ष्य त्वादेशः, ' अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते ' (परि. शे. परि. ५२) इति न्यायात्, अन्यथा गोमत्प्रिय इत्यादौ [3]नुमाद्यापत्तेः । किं तु च्विप्रत्ययमपेक्ष्य ' प्रत्ययोत्तरपदयोश्च ' (७।२।९७) इति सूत्रेणेति वक्तव्यम् । एवं च महद्भूतश्चन्द्रमा इत्यत्रेव गौणत्वानन्तरमेव च्विप्रत्ययोत्पत्त्या गौणपदविषयत्वं त्वाद्यादेशस्य स्पष्टम् । न च युष्मदस्मदोरिति प्रातिपदिकोद्देशेन विधीयमानत्वादस्य प्रातिपदिककार्यत्वमेवेति वाच्यम्, ' आन्महतः० ' (६।३।४६) इत्यात्वस्यापि प्रातिपदिकोद्देशेन विधीयमानतया तथात्वापत्तेः । समानाधिकरणोत्तरपदादौ विधीयमानस्यात्वस्य वस्तुतः प्रातिपदिकोद्देशेऽपि पदसंज्ञकमहच्छब्दे पर्यवसानात् पदकार्यत्वमिति तु युष्मदस्मदोरिति प्रातिपदिकोद्देशेऽपि च्विप्रत्यये परतो विधीयमानस्य त्वाद्यादेशस्य वस्तुतः पदसंज्ञकयुष्मदादिविषयतया पदकार्यत्वमिति तुल्यमिति पदकार्यविषयत्वपक्षेऽपि दुरुद्धरोऽयं दोषः ॥

सर्वादिसूत्रस्थवार्त्तिकादिग्रन्थः (१।१।२७ वा. २) संज्ञाविषयेऽप्यस्य न्यायस्य पदकार्यविषयत्वे प्रमाणमिति कल्पनं तु तदा स्यात्, यदि तत्रानन्यथासिद्धं प्रयोजनं लभ्येत । [4]तदभावे ' उपायस्योपायान्तरादूषकत्वम् ' इति न्यायेन प्रवृत्त इति व्याख्येयः । अत एव ' अनिर्व्यक्तपदार्था ये— ' इति पृथक्पठ्यते । सर्वादिसूत्रे संज्ञाप्रतिषेधो न वक्तव्यः, 'अभिव्यक्तपदार्था ये' इति न्यायादिति हरदत्तः । उपायस्योपायान्तरादूषकत्वन्यायश्च सर्वादिसूत्रे कैयटग्रन्थे स्पष्टः । तस्मात् शुद्धगौणत्वे पदकार्य एव, संज्ञारूपत्वे प्रातिपदिककार्येऽपीति युक्तम् । इदं त्ववशिष्यते—स्वरूपानुपादानेऽपि एतन्न्यायप्रवृत्तौ श्वाशुरिरित्यत्र ' राजश्वशुराद्यत् ' (४।१।१३७) इति यत्प्रत्ययवत् इञपि (४।१।९५) न स्यादिति, तत्रास्याः परिभाषाया अनित्यत्वमेव शरणम् । ' स्वं रूपम्० ' (१।१।६८) इत्यत्र रूपग्रहणेन ज्ञापितार्थवत्परिभाषा विशिष्टरूपानुपादानेऽपि प्रवर्तते, तन्मूला गौणमुख्यपरिभाषापि तथैवेति ओत्सूत्रस्थभाष्यादेराशयः । ' आनि लोट् ' (८।४।१६) इत्यत्र लोड्ग्रहणं प्रवपानीत्यत्र णत्ववारणार्थं क्रियमाणमर्थवत्परिभाषाया अनित्यत्वज्ञापकमिति तन्मूलाया अस्या अपि तत एवानित्यत्वम् । अत

---

[1] क. त्वाद्यादेशो [2] क पदकार्यत्वे तत्तद्दोषस्य. [3] क नुमि दीर्घाद्यापत्तेः । [4] क. तदभावे तु.

एवं त्वद्भवतीत्यादौ त्वाद्यादेशः, महद्भूता ब्राह्मणीत्यत्र पुंवद्भावश्चेति सर्वं सिद्धम् ॥१५॥

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ १६ ॥

[1]इदं 'येन विधि०' (१।१।७२) इति सूत्रे वार्त्तिककृता पठितम्। (१।१।७२ वा. २८ महाभाष्य)। तेन राज्ञ[2] इत्यत्रेव साम्न इत्यत्रापि अल्लोपः। दण्डिनावित्यत्रेव वाग्मिनावित्यत्रापि 'इन्हन्०' इति नियमार्थे[3] दीर्घः[4]। सुशर्मेत्यत्रेव सुप्रथिमेत्यत्रापि 'मनः' (४।१।११) इति ङीम्निषेधः। अर्थवत्परिभाषाया अनित्यत्वस्य प्रपञ्चोऽयम् ॥ १६ ॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १७ ॥

अत्र वाकार एवकारार्थे। एकयोगनिर्दिष्टानां सहैव प्रवृत्तिनिवृत्ती इत्यर्थः। तेन 'उश्च' (१।२।१२) इत्यत्र 'लिङ्सिचावात्मनेपदेषु' (१।२।११) इति कृत्स्नस्यानुवृत्तिर्भवति, न त्वेकदेशस्य। अत्र च ज्ञापकम्—'हनः सिच्' (१।२।१४) इति सिज्ग्रहणम्। यद्येकयोगनिर्दिष्टानामपि कस्यचित्प्रवृत्तिः कस्यचिन्निवृत्तिः स्यात्, तर्हि 'हनः' (१।२।१४) इति सूत्रे सिज्ग्रहणमनुवर्तते, इतरन्निवृत्तमिति वक्तुं शक्यत्वेन तत्र सिज्ग्रहणमनर्थकं सज्ज्ञापकम्। 'आर्धधातुकस्येड्वलादेः' (७।२।३५) इति सूत्रे पुनरिड्ग्रहणं तु न ज्ञापकम्, तस्येटो गुणनिवृत्त्यर्थत्वात्। एतच्च 'दीधीवेवीटाम्' (१।१।६) इति सूत्रे भाष्ये स्पष्टम्। यत्तु — 'आर्धधातुकस्येड्वलादेः' (७।२।३५) इति सूत्रे इड्ग्रहणं 'नेड्वशि (७ २।८)—' इत्यत्र भाष्ये प्रत्याख्यातमिति नव्योक्तम्, (परि.शे. परि. १७) तदप्ययुक्तम्। 'नेड्वशि (७।२।८)—' इति सूत्रे "यदि खल्वप्येषोऽभिप्रायः, द्विरिड्ग्रहणं न क्रियेतेति। पुरस्तादपि प्रतिषेधे सति तन्न करिष्यते। कथम्। इदमस्ति — 'नेड्वशि कृति' (७।२।८) इति। ततो वक्ष्यामि 'आर्धधातुकस्य वलादेः' (७।२।३५) इति। इड्ग्रहणमनुवर्तते। नेति निवृत्तम्" (महाभाष्य ७।२।८) इति वदन्भाष्यकार इड्विधानार्थं तत्रेड्ग्रहणं न कर्तव्यमित्याह न तु विकारान्तरनिवृत्त्यर्थमपि। अन्यथा 'दीधीवेवीटाम्' (१।१।६) इति सूत्रस्थभाष्य-

---

[1] ख. तदिदम्. [2] क. 'राज्ञः' इति न पठ्यते. [3] क. इत्यत्रेव विधिं विनापि इन्हन्०'. [4] क. 'न दीर्घः' इत्यनन्तरं 'सुपथाः इत्यत्रेव निस्तताः इत्यत्रापि असन्तत्वादुपधादीर्घः' इत्यधिकं पठ्यते.

विरोधात्। न चेदं भाष्यमेकेत्रेड्ग्रहणेनैवोपपत्तौ इड्द्वयाङ्गीकारेण प्रवृत्तत्वाद्गौरवग्रस्तत्वादेकदेश्युक्तिरिति युक्तम्। तथा सति इटो गुणप्रसङ्गात् तदर्थं 'क्ङिति च' (१।१।५) इति सूत्रानन्तरम् 'इटश्च' इति सूत्रकरणे अतिगौरवापत्तेः। 'एकयोगनिर्दिष्टानाम् --' इति न्यायविरोधेन 'इडिति वर्तते। नेति निवृत्तम्' इति (महाभाष्य ७।२।८) भाष्यस्यैवैकदेश्युक्तित्वकल्पनौचित्यात्। 'कचिदेकदेशोऽप्यनुवर्तते' (परि. शे. परि. १८) इति न्यायेन तत्समर्थनेऽपि विधेयसमर्पणार्थमिड्ग्रहणं न कर्तव्यमिति तदाशयो युक्तः, न तु विकारान्तरनिवृत्त्यर्थमपीड्ग्रहणं न कर्तव्यमिति, इति 'दीधीवेवीटाम्' (१।१।६) इति सूत्रस्थभाष्यविरोधादित्यवधेयम्॥ १७॥

एकयोगनिर्दिष्टानामप्येकदेशोऽनुवर्तते ॥ १८ ॥

तेन 'अलुगुत्तरपदे' (६।१।३) इति एकयोगनिर्दिष्टत्वेऽपि अलुगधिकारः प्रागानङः, उत्तरपदाधिकारस्त्वा पादपरिसमाप्तेरिति सिध्यति। तथा 'दामहायनान्ताच्च' (४।१।२७) इति सूत्रे 'संख्याव्ययादेर्ङीप्' (४।१।२६) इति पूर्वसूत्रे संख्याव्यययोर्निर्देशेऽपि संख्याग्रहणमनुवर्तते नाव्ययग्रहणमिति। एकदेशे स्वरितत्वप्रतिज्ञानात्सिद्धमिदम्। अलुगधिकारस्तु विरोध्यभावाद्विधेयाकाङ्क्षावशात्प्रागानङः, उत्तरपदाधिकारोऽपि तत एव अङ्गाधिकारात्॥ १८॥

भाव्यमानेन सवर्णानां ग्रहणं न ॥ १९ ॥

तेन 'इदम इश्' (५।३।३) 'इतः' इत्यत्र स्थानेन्तरमपरिभाषया प्लुतो न। 'सनाशंसभिक्ष उः' (३।२।१६८) इत्यत्र दीर्घो न। अणुदित्सूत्रे (१।१।६९) अप्रत्ययपदस्यायमर्थः। तत्र हि प्रत्यय इति न कृत्रिमस्य ग्रहणम्, आनर्थक्यात्। प्रतियन्ति येन अर्थं स प्रत्यय इति महासंज्ञाकरणेन लभ्यते; न च प्रत्ययसवर्णेनार्थप्रत्ययो भवति। तदुक्तं भाष्ये— 'प्रत्यये भूयान्परिहारः— अनभिधानात् प्रत्ययः सवर्णान्न ग्रहीष्यति' (महाभाष्य १।१।६९) इत्यादि। किं तु प्रतीयते विधीयत इति प्रत्यय इति विधीयमानस्य। तच्चाण एव विशेषणम्। न तु उदितोऽपि। 'चोः कुः' (८।२।३०) इत्यादौ विधीयमाने उदित्करणवैयर्थ्यापत्तेः। एवं सति अविधीयमानोऽण् सवर्णस्य ग्राहकः इत्यर्थः संपद्यते। अत एव केचित् 'भाव्यमानोण् सवर्णान्न गृह्णाति' इत्येव पठन्ति। अण् सवर्णान्गृह्णातीति

---

१ क. केड्ग्रहणेनेोपपत्तौ. २ क. इति पदणम्।

प्राप्तस्य जातिपक्षे तन्निर्देशाप्राप्तस्य सवर्णग्रहणस्य निरासार्थमिदम्। 'गुणानामभेदकत्वेन प्राप्तस्यापि निषेधार्थम्' (परि. शे. परि. १९) इति नव्योक्तिरयुक्ता, वृद्धिसूत्रे 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' (७।१।७५) इति विधीयमानस्यैव अनङवयवाकारस्य गुणानामभेदकत्वपक्षे अनुदात्तग्राहकतानिवृत्तये उदात्तग्रहणमिति भाष्यविरोधात्। न चात्राकारो विधीयमानावयवो न स्वयं विधीयत इति वाच्यम्। तथा सति विधीयमानेशाद्यादेशावयवेकारादेः सवर्णग्राहकतापत्तेः स्थानेन्तरतमपरिभाषया प्लुतेकारविशिष्टेशादेशापत्तेः[1]। यत्र स्वतन्त्रोऽण्, तत्रैव सवर्णग्राहकत्वम्। गुणानामभेदकत्वं तु स्वतन्त्रास्वतन्त्रसाधारणम्, उक्तभाष्यानुरोधादिति चेत्, एवं तर्हि अण् सवर्णान्गृह्णातीत्यत्र श्रुतमप्रत्ययपदं[2] प्रतिपदोक्तन्यायेन स्वतन्त्राणप्रयुक्तं[3] सवर्णग्राहकत्वमेव प्रतिषेधेत्; न स्वतन्त्रास्वतन्त्रसाधारणगुणाभेदकत्वप्रयुक्तसवर्णग्राहकत्वम्। अत एव 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (६।४।७१) 'चतुरनडुहोरामुदात्तः' (७।१।९८) इत्यादौ विधीयमानस्वतन्त्राणःस्थलेऽपि गुणाभेदकत्वप्रयुक्तानुदात्तादिग्रहणनिरासाय उदात्तग्रहणं दृश्यते, 'पथिमथ्यृभुक्षामात्' (७।१।८५) इत्यत्र आदिति प्रश्लेषोऽनुनासिकनिवृत्तये कौमुदीकृता आश्रितः। एतेन 'त्यदादीनामः' (७।२।१०२) इत्यत्र 'इदम्–'शब्दे उक्तवचनेन अनुनासिको नेति नव्योक्तिरप्यपास्तेत्यलम्। इदम्शब्दे अनुनासिकस्त्वकारस्यावृत्त्या वारणीयः, 'भेदका गुणाः' इति पक्षाश्रयणाद्वा[4]॥१९॥

क्वचिद्भाव्यमानोऽप्यण् सवर्णान् गृह्णाति ॥ २० ॥

तेन 'अदसोऽसेर्दादु दो मः' (८।२।८०) इत्यत्र उकारेण विधीयमानेन सवर्णग्रहणे सति आन्तरतम्याद् ह्रस्वव्यञ्जनयोर्ह्रस्वः, दीर्घस्य दीर्घ इति सिध्यति। अत्र च ज्ञापकम्–– 'ऋत उत्' (६।१।१११) इति तपरकरणम्। यद्यपि भाष्ये 'तित्स्वरितम्' (६।१।१९५) इति सूत्रे 'भवत्युकारेण भाव्यमानेन सवर्णानां ग्रहणम्' इति पठ्यते, तथापि 'स्याध्वोरिच्च' (१।२।१७) इति सूत्रे 'इच्च कस्य तकारेत्त्वं दीर्घो मा भूत्' इति वार्त्तिकग्रन्थोपपत्तये अस्माभिः सामान्यरूपेण पठितम्। अत एव 'भाव्यमानोऽण्सवर्णान्गृह्णातीत्येष परिहारोऽनित्यत्वान्नोक्तः' इति तत्र कैयटः॥ २० ॥

वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥ २१ ॥

तेन गवे हितं गोहितमित्यादावयादयो न। यत्र वर्णस्य प्राधान्येनाश्रयणम्,

---

1 क. विधियमाननिशाद्यादेशा०. 2 क. विशिष्टनिशादेशा०. 3 क. अप्रत्ययं पदम्.
4 क. प्रयुक्तसवर्ण. 5 क. 'उक्तवचनेन...इदम्शब्दे' इति न पठ्यते.

तद्विषयमिदम्। तेन अतृणेडित्यत्र 'तृणह इम्' (७।३।९२) इति इमागमः प्रत्ययलक्षणेन भवति, तत्र हलादौ पिति सार्वधातुक इति वर्णस्य प्रत्ययविशेषणत्वात्। इदं च 'प्रत्ययलोपे प्रत्ययलक्षणम्' (१।१।६२) इत्यत्र द्वितीयप्रत्ययग्रहणस्यार्थ-तया व्याख्यातम्। तथा हि—'प्रत्ययलोपे तल्लक्षणमित्युच्यमाने प्रत्ययस्य यत्र कार्ये निमित्तभावः प्रत्ययस्वरूपाश्रयेण वा वर्णरूपाश्रयेण वा तत्सर्वं स्यात्, सर्वनाम्नो वस्तुमात्रपरामर्शित्वात्। प्रत्ययग्रहणे तु सति प्रत्ययतानिमित्तमेव कार्यं प्रत्ययलोपेऽपि भवति, न वर्णतानिमित्तम्' (१।१।६२ प्रदीप) इति कैयटः। यत्तु—'प्रत्ययलक्षणसूत्रे स्थानिवदित्यनुवृत्त्यैव सिद्धे०' (परि.शे.परि.२१) इति नव्योक्तम्; तदयुक्तम्। लोपेऽप्या-देशत्वेनानुवृत्तिं विनैव स्थानिवद्भावस्य सिद्धत्वात्। 'अदर्शनं लोपः' (१।१।६०) इत्यादौ विच्छिन्नस्य स्थानिवत्पदस्य इहानुवृत्त्ययोगाच्च मण्डूकप्लुत्यादिकल्पने प्रमाणा-भावाच्च भाष्यग्रन्थस्य कैयटोक्तरीत्योपपन्नत्वाच्च। यदपि 'वर्णप्राधान्यं वर्णस्येतरा-विशेषणत्वं प्रत्ययनिरूपितविशेष्यता वा' (परि. शे. परि. २१) इत्युक्तं; तद-प्ययुक्तम्। वर्णस्य प्रत्ययनिरूपितविशेष्यतासत्त्वे इतराविशेषणत्वेनैव सिद्धेः प्रत्यय-निरूपितविशेष्यतायाः पृथग्ग्रहणवैयर्थ्यात्। न च विधेयं ङीबादिकं प्रति तस्य विशेषणत्वादितराविशेषणत्वमसिद्धमिति वाच्यम्। 'एचोऽयवायावः' (६।१।७८) इत्यादावप्यचीत्यस्य विधेयमायादिकं प्रति विशेषणत्वेनेतराविशेषणत्वप्रत्ययनिरूपित-विशेष्यतान्यतराभावेन वर्णप्राधान्यासिद्धेः। वस्तुतः सामानाधिकरण्येनेतराविशेषणत्वं वर्णस्य प्राधान्यमिति न कापि दोषः ॥ २१ ॥

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ २२ ॥

उणादय इति प्रत्ययाभिप्रायं पुंस्त्वम्। उणादिप्रत्ययान्तानि प्रातिपदिकानि अव्युत्पन्नवद्भवन्ति, व्युत्पत्तिकार्यं न लभन्त इत्यर्थः। तेन 'जीर्यतेः क्रिन् रश्च वः' (उणा. ५।४९) इति क्रिन्प्रत्यये रेफस्य वकारे धातुत्वाभावात् 'र्वोः०' (८।२।७६) इति दीर्घो न भवति— जिव्रिरिति। 'अतः कृकमि०' (८।३।४६) इति सूत्रे अयस्कंस इत्यत्र सर्वार्थे क्रियमाणं कंसग्रहणमत्र ज्ञापकम्। उणादीनां व्युत्पन्नत्वे 'कमेः सः' (उणा. ३।६२) इति कमिधातोः सप्रत्यये कंसशब्दस्य निष्पन्नतया कमिपरत्वेनैव सत्वसिद्धेः कंसग्रहणं व्यर्थं स्यात् ॥ २२ ॥

---

१ क. अर्थतया भाष्ये व्याख्यातम्। २ क. विशेष्यता चेत्युक्तं. ३ ख. विशेष्यतान्य-तराभावेन. ४ ख. जिर्विरिति. ५ क. स्वार्थं.

प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ २३ ॥

इयं परिभाषा 'यस्मात्प्रत्ययविधिः०' (१।३।१३) इति सूत्रे 'तदादि-प्रत्यये' इति योगविभागेन प्रत्यये गृह्यमाणे 'यस्मात्प्रत्ययस्तदादि गृह्यते' इत्यर्थ-माश्रित्य भाष्ये व्याख्याता। तेन कटं चिकीर्षुरित्यादौ कटादिविशिष्टस्य धातुसंज्ञा न। तेन लुन्लुङ् न। तथा कटशब्दात्प्राक् लङादावडागमो न। कटशब्दस्य द्वित्वं न। इत्थं तदाद्यंशलाभः। तदन्तांशलाभस्तु वचनादेव सिद्धः। अत एव 'येन विधिः' (१।१।७२) इति सूत्रे 'प्रत्ययग्रहणं चापञ्चम्याः' इति वार्त्तिकव्याख्यानावसरे 'प्रत्ययग्रहणे यस्मात्स विहितः' इति सिद्धे तदन्तविधावपञ्चम्या इति प्रतिषेधार्थं वचनमिति कैयटः। यत्तु नव्योक्तम्— 'विशेष्यान्तरासत्त्वे शब्दरूपं विशेष्यमादाय येनविधिसूत्रेण तदन्तविधिः सिद्धः' इति, तदयुक्तम्, 'इको यणचि' (६।१।७७) इत्यादौ तदन्तविधिप्रतिक्षेपपरयेनविधिसूत्रस्यभाष्यविरोधात्। यत्र प्रत्ययो निमित्तत्वेना-श्रीयते, तत्र तदाद्यंशमात्रोपस्थितिरिति 'अङ्गस्य' (६।४।१) इति सूत्रे भाष्य-कैयटयोः ॥

अस्यापवादः—

प्रत्ययग्रहणे चापञ्चम्याः ॥ २४ ॥

यत्र पञ्चम्यन्तात्परः प्रत्ययः कार्यान्तरविधानाय परिगृह्यते, तत्र तदन्तविधिर्न भवतीत्यर्थः। तेन 'रदाभ्याम्०' (८।२।४२) इत्यत्र तदन्तविध्यभावात् दृषत्तीर्ण इत्यत्र धातुतकारस्य न नत्वम्। 'स्यतासी लृलुटोः' (३।१।३३) इत्यत्र लृलुटोः परयोरित्यर्थे परत्वस्यावधिसापेक्षत्वेन उपस्थितस्य धातोरित्यस्य तत्रान्वयादपञ्चम्याः इति निषेधप्रवृत्तिः ॥ २४ ॥

उत्तरपदाधिकारे प्रत्ययग्रहणपरिभाषा न भवति ॥ २५ ॥

'हृदयस्य हृल्लेख०' (६।३।५०) इति सूत्रे लेखग्रहणाज्ज्ञापकात्। यद्यत्र प्रत्ययग्रहणपरिभाषा स्यात्, तर्हि हृदयं लिखतीति हृल्लेखः इत्यत्र कर्मण्यणन्ते लेख-शब्दे अणन्तत्वादेव हृदादेशसिद्धौ लेखग्रहणमनर्थकं स्यात्। तत्र लेखेत्यणन्तं गृह्यते न तु घञन्तम्, व्याख्यानात्। तेन कुमारीगौरीतरेत्यत्र 'घरूपकल्प०' (६।३।४३) इति कुमारीशब्दे ह्रस्वत्वं न भवति ॥ २५ ॥

---

[1] क. चिकीर्षतीत्यादौ. [2] क. धातुतकारस्य नत्वं न भवति। [3] क. इत्यर्थात्. [4] क. सापेक्षत्वात्.

स्त्रीप्रत्यये चानुपसर्जने न ॥ २६ ॥

अयं तदादिनियमापवादः। अनुपसर्जने स्त्रीप्रत्यये गृह्यमाणे यस्मात्स विहितः तदादि गृह्यत इति नियमो नास्ति, किं तु तदन्तमात्रं गृह्यते। तेन 'ष्यङः संप्रसारणम्०' (६।१।१३) इति ष्यङन्तपूर्वपदस्य विधीयमानं संप्रसारणं कारीषगन्धीपुत्रः इत्यत्रेव परमकारीषगन्धीपुत्रः इत्यत्रापि भवति। तदादिनियमप्रवृत्तौ परमकारीषगन्ध्याशब्दस्य पूर्वपदस्य ष्यङन्तत्वाभावात्संप्रसारणं न स्यात्। 'अनुपसर्जनात्' (४।१।१४) इति वचनादतिकारीषगन्ध्यापुत्र इत्यत्रोपसर्जनस्त्रीप्रत्यये तदादिनियमसद्भावादतिकारीषगन्ध्येति पूर्वपदस्य ष्यङन्तत्वाभावात्संप्रसारणं न। इयं च परिभाषा स्त्रीप्रत्ययसामान्यग्रहणे तद्विशेषग्रहणे च प्रवर्तते। इयम् 'ष्यङः संप्रसारणम्' (६।१।१३) इति सूत्रे भाष्ये वाचनिक्येव पठिता ॥ २६ ॥

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति। २७ ॥

तेन 'तरप्तमपौ घः' (१।१।२२) इत्यत्र तरबन्तस्य घसंज्ञाभावात् कुमारीगौरितरेत्यत्र कुमारीशब्दस्य 'पुंवत्कर्मधारय०' (६।३।४२) इति पुंवद्भावं बाधित्वा 'घरूप०' (६।३।४३) इति न[4] ह्रस्वः। केवलयोः संज्ञया च गौरितरेत्यत्र 'तसिलादिषु०' (६।३।३५) इति पुंवद्भावं बाधित्वा 'घरूप०' (६।३।४३) इति ह्रस्वः। अत्र च ज्ञापकम्— 'सुप्तिङन्तं पदम्' (१।४।१४) इत्यत्रान्तग्रहणम्। यदि प्रत्ययग्रहणपरिभाषा संज्ञाविधौ स्यात्, तदा विनैवान्तग्रहणं सुप्तिङन्तयोः पदसंज्ञासिद्धेस्तदनर्थकं स्यात्। 'कृत्तद्धितसमासाश्च' (१।२।४६) इत्यत्र संज्ञाविधावपि कृत्तद्धिताभ्यां तदन्तग्रहणम्, अर्थवद्ग्रहणानुवृत्तेः प्रशंसायां मतुपा प्रयोगप्रत्यासत्त्यैकार्थीभावरूपार्थवत्त्वस्य स्वीकारात्। 'युजेरसमासे' (७।१।७१) इति नुम्विधानात् कृदंशे तदन्तविधिः। 'घकालतनेषु०' (६।३।१७) इति अलुग्विधानात्तद्धितांशे तदन्तविधिरिति वा। समाससंज्ञायां समर्थपरिभाषया तदन्तविधिः। 'सामन्त्रितम्' (२।३।४८) इत्यत्र महासंज्ञाकरणात्तदन्तविधिः ॥ २७ ॥

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ २८ ॥

तेन 'अवतप्तेनकुलस्थितम्' इत्यादौ नकुलस्थितशब्दस्य कारकपूर्वस्य क्तान्तत्वेन 'क्षेपे' (६।२।१०८) इति सप्तमीसमासः, 'तत्पुरुषे' (६।३।१४)

---

१ ख अनुपसर्जनस्त्रीप्रत्यये. २ क. तदादिनियमप्रवृत्तौ कारीषगन्ध्याशब्दस्य पूर्वपदाभावात् परमकारीषगन्ध्याशब्दस्य पूर्वपदस्य. ३ क. वचनादकारीषगन्ध्या. ४ क. 'न' इति पदं न पठ्यते.

इति सप्तम्या अलुक्च सिध्यति । अस्याश्च परिभाषाया ज्ञापकम्— 'गतिरनन्तरः' (६।१।४९) इति सूत्रे अनन्तरग्रहणम्; तद्धि अभ्युद्धृतमित्यत्र अभेः प्रकृतिस्वरवारणाय। यदीयं परिभाषा न स्यात्, तदा उद्धृतशब्दस्य प्रत्ययग्रहणपरिभाषया तदादिनियमेन क्तान्तत्वाभावेन क्तान्तोत्तरपदपरत्वाभावेन प्रकृतिस्वराप्राप्तौ व्यर्थं स्यात् ॥ २८ ॥

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ २९ ॥

विशेषणविशेष्यभावव्यवस्थार्थमीदृशवार्त्तिकानां प्रवृत्तिरिति 'येन विधिः०' (१।१।७२) इति सूत्रे कैयटः । पदशब्देनात्र उत्तरपदं गृह्यते । तेनाङ्गाधिकारे उत्तरपदाधिकारे चाङ्गमुत्तरपदाक्षिप्तपूर्वपदं च विशेष्यम्, गृह्यमाणं तद्विशेषणम्। तेन गृह्यमाणस्याङ्गत्वे तदन्तस्याङ्गत्वे च तत्कार्यं भवति। तथा गृह्यमाणस्य पूर्वपदत्वे तदन्तस्य पूर्वपदत्वे च तत्कार्यं भवति। अङ्गाधिकारस्योदाहरणम्— जरसौ जरसः, निर्जरसौ निर्जरसः इत्युभयत्र जरसादेशः । उत्तरपदाधिकारस्योदाहरणम्--इष्टकचितं पक्वेष्टकचितमित्युभयत्र 'इष्टकेषीका०' (६।३।६५) इति ह्रस्वप्रवृत्तिः । 'पादस्य पदाज्यातिगोपहतेषु' (६।३।५२) इत्यत्र न तदन्तविधिः, लक्ष्यानुसारात् ।२९॥

व्यपदेशिवदेकस्मिन् ॥ ३० ॥

व्यपदेशो मुख्यव्यवहारो निमित्तसद्भावात् यस्यास्ति स व्यपदेशी। यस्तु निमित्ताभावेऽपि तद्व्यपदिष्टकार्यं लभते स तेन तुल्यं वर्तते इति व्यपदेशिवदित्युच्यते। तेन आभ्यामित्यत्र अदन्तत्वप्रयुक्तः 'सुपि च' (७।३।१०२) इति दीर्घः सिध्यति। इयायेत्यत्र च 'लिटि धातोरनभ्यासस्य' (६।१।८) इति द्वित्वम्। तत्र द्व्येकाचः इति बहुव्रीहिः पपाचेत्यादिसिद्धये स्वीकर्तव्यः। तत्र इण् धातुरेति यन्तीत्यादिप्रयोगभेदाद्बहुरूपः । तस्यायमेकाजवयव इव लक्ष्यते। अथ वा 'अर्थवतो धातोरयमिवर्णरूप एकाजवयवः इत्यर्थस्य त्यागोपादानाभ्यां भवति व्यपदेशः' इति कैयटः। यत्तत्र नव्योक्तम्-- 'अर्थस्य त्यागोपादानाभ्यां गौण एकाज्व्यपदेश इति कैयटोक्तमयुक्तम्, तस्य एकपदा ऋगित्यत्र पदं नामार्थः इति भाष्योक्तरीत्या मुख्यत्वात्' (परि. शे. परि. ३०) इति तदेवायुक्तम्। न हि पदादिशब्दा अर्थविशिष्टशब्दस्य वाचकाः। किं तु शब्दमात्रस्य। अत एव 'अर्थेन व्यपदेशः' इति भाष्यम्

---

१ क. तदादिनियमे क्तान्तत्वाभावेन. २ क. ईदृग्वार्त्तिकानां. ३ क. लक्ष्यानुरोधात्. ४ क. एकोऽजवयवः. ५ क. अत एवात्राप्यर्थेन व्यपदेशः.

'अभेदोपचारादर्थ एव पदादिशब्दैरभिधीयते' (१।१।२१ वार्तिक ५ महाभाष्यप्रदीप) इति व्याचक्षाणः कैयटस्तस्य व्यपदेशस्य गौणत्वं भाष्यस्यैकदेश्युक्तित्वं चाप्यनयत्। अत एव च 'अणुदित्सवर्णस्य चाप्रत्ययः' (१।१।६९) इति सूत्रे 'ह्रस्वसंप्रत्ययात्' (१।१।६९ वा. ३) इति वार्तिकव्याख्यानावसरे[1] भाष्ये 'ऋगित्युक्ते संपाठमात्रं गम्यते, नास्या अर्थो गम्यते' इत्युक्तम्। यदपि— 'इयानित्यत्र व्यपदेशिवद्भावात्तद्धितान्तत्वात्कार्यकालपक्षेऽपि[2] प्रातिपदिकसंज्ञा सिध्यति' (परि. शे. परि. ३०) इति नव्योक्तं प्रयोजनान्तरम्, तदपि[3] न युक्तम्। तस्य हि तदन्तत्वं व्यपदेशिवद्भावेन भवति, न तु यस्मात्स विहितस्तदादित्वविशिष्टतदन्तत्वमपि, मानाभावात्। प्रातिपदिकसंज्ञा तु स्थानिवद्भावेन[4] सिध्यति। स्थानिवत्सूत्रे हि 'एकदेशविकृतस्योपसंख्यानम्' इत्युक्तम्। आदेशग्रहणादयमर्थः सिद्ध इति भाष्यादावुक्तम्॥

न च कार्यकालपक्षे इ इयदित्यस्य प्रयोजनाभावात्प्रातिपदिकसंज्ञाया अप्रवृत्तेः स्थानिन्यविद्यमानत्वात्कथमादेशे अतिदिश्यत इति वाच्यम्। अतिदेशरूपप्रयोजनायैव तदानीं प्रातिपदिकसंज्ञाप्रवृत्तेः। यदि इकारो न लुप्येत, तर्हि इ इयदित्यस्य यस्मात्तद्धितविधिस्तदादितदन्तत्वस्य भरवात्प्रातिपदिकसंज्ञां लभ्येतेति[5] स्थानिनि संभावितस्याप्यातिदेशसंभवाच्च। 'न पदान्त०' (१।१।५८) इति सूत्रे वरेग्रहणं संभावितातिदेशे लिङ्गम्। न च इशब्दात् वतुप्रत्ययो न विहित इति वाच्यम्। इशब्दस्य स्थानिवद्भावेन इदम्शब्दत्वात्। जघानेत्यादौ कार्यकालपक्षे पदसंज्ञायामियमेव गतिः। न च इ इयदित्यस्य स्थाने[6] इयदित्यादेशो न विहितः इति वाच्यम्, 'यस्येति च' (६।४।१४८) इति लोपशास्त्रस्य 'सर्वे सर्वपदादेशाः' (१।१।२० वा. ५ महाभाष्य; ७।१।२७ वा. २ महाभाष्य) इति न्यायेन तादृगर्थे तात्पर्यात्। तस्मात् इयदित्यत्र कार्यकालपक्षेऽप्येकदेशन्यायेन प्रातिपदिकत्वसिद्धिः। यदपि— निजौ चत्वार एकाचः इति भाष्यम्, (६।१।१ महाभाष्य) एकस्मिन्नित्यनपेक्ष्य[7] इत्युक्तम्, तदप्ययुक्तम्। विशिष्टस्य एकाज्व्यपदेशे कर्तव्ये ससहायत्वेऽपि इकारमात्रस्यैकाज्व्यपदेशे कर्तव्ये असहायत्वात्। अत एव कुरुते इत्यत्र तकारेण ससहायस्यापि अकारस्य अकारादिव्यपदेशे कर्तव्ये असहायत्वमिति त्वयैवोक्तम्। समासन्नयनशब्दे तु आकारस्य[8] विशिष्टं प्रत्यादित्वव्यपदेशे कर्तव्ये ससहायत्वान्न वृद्धसंज्ञा विशिष्टस्येति दिक्॥ ३०॥

---

१ क. व्याख्यानभाष्ये. २ क. कार्यकालेपि. ३ क. तदप्ययुक्तम्. ४ क. स्थानिवद्भावात्. ५ क. संज्ञां लभेत इति. ६ क. स्थाने यदित्यादेशः। ७ क. इत्यनपेक्ष्येत्युक्तं. ८ क. आकारस्याविशिष्टं प्रति.

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ ३१ ॥

'येन विधिः' (१।१।७२) इति सूत्रेण प्राप्तस्तदन्तविधिरनेन प्रतिषिध्यते। तेन 'गर्गादिभ्यो यञ्' (४।१।१०५) इति यञ् परमगर्गशब्दान्न भवति। अस्याश्च ज्ञापकम्— 'सपूर्वाच्च' (५।२।८७) इति सूत्रम्। यदि गृह्यमाणेन प्रातिपदिकेन तदन्तविधिः स्यात्, तर्हि 'पूर्वादिनिः' (५।२।८६) इति गृह्यमाणेन पूर्वशब्देन अधिकृतप्रातिपदिकविशेषणे पूर्वशब्दान्तादपि इनेः सिद्धाविदमनर्थकं स्यात्। इयं च परिभाषा प्रत्ययविधिविषया, ज्ञापकभूमेः प्रत्ययविधित्वात्। अत एव 'येन विधिः०' (१।१।७२) इति सूत्रे महान् परममहानिति दीर्घविधौ महच्छब्देन तदन्तविधिरुदाहृतः ॥ ३१ ॥

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ३२ ॥

प्रातिपदिकेन व्यपदेशिवद्भावो नास्तीत्यर्थः। तेन 'क्रतूक्थादिसूत्रान्ताट्ठक्' (४।२।६०) इति विहितष्ठक् केवलसूत्रशब्दान्न। अस्यां च ज्ञापकम्— 'पूर्वादिनिः' (५।२।८६) इति पृथग्योगकरणम्। यदि प्रातिपदिकेन व्यपदेशिवद्भावः स्यात्, तर्हि 'पूर्वात्सपूर्वादिनिः' इति एकयोगकरणेऽपि पूर्वशब्दस्य व्यपदेशिवद्भावेन सपूर्वत्वेन पूर्वीति रूपस्य स्वतः सपूर्वत्वेन कृतपूर्वीतिरूपस्य च सिद्धौ तदनर्थकं स्यात्। न च 'इष्टादिभ्यश्च' (५।२।८८) इत्युत्तरसूत्रे 'सपूर्वात्' इत्यस्यानुवृत्तये तदिति वाच्यम्; तदनुवृत्तेर्ज्ञापकपरभाष्यबलेनानिष्टत्वावसायात्, एकयोगकरणेऽपि उत्तरत्र तदनुवृत्तिसंभवाच्च। इयमपि प्रत्ययविधिविषयैव, ज्ञापकभूमेस्तथात्वात् ॥ ३२ ॥

यस्मिन्विधिस्तदादावल्ग्रहणे ॥ ३३ ॥

इदं येनविधिसूत्रे तदपवादतया वार्त्तिककारेण पठितम् (१।१।७२ वा. २९)। अर्थस्तु— यस्मिन्निति सप्तम्यन्तविशेषणमुच्यते। वर्णरूपं विशेषणं सप्तम्यन्तं गृह्यमाणं यत्र, तत्कार्यं तद्वर्णादौ भवतीति। सप्तम्यन्तं वर्णरूपं विशेषणं तदादेः संज्ञेति तु फलितोऽर्थः। तेन 'वान्तो यि प्रत्यये'। (६।१।७९) इत्यत्र विधीयमानो वान्तादेशो गव्यमिति यकारादौ भवति। तथा 'अचिश्नुधातु० (६।४।७७)' इति विधीयमानावियङुवङौ शिश्रिय लुलुवतुरित्यत्राजादौ भवतः। शिश्रिय लुलुवेति मध्यम-

---

१ क. अस्माश्च. २ क. सपूर्वशब्दत्वेन. ३ ख. कृतपूर्वीत्यस्य च. ४ क. तदनुवृत्तेरुक्तज्ञापकपर. ५ क. फलितार्थः. ६ क. इत्यजादौ.

पुरुषबहुवचने तु व्यपदेशिवद्भावेनाजादित्वाद्भवतः । ज्ञापकं चात्र— ‘ गुणोऽपृक्ते ’ (७।३।९१) इत्यपृक्तग्रहणम् ; तद्धि और्णोदित्यत्र ‘ ऊर्णोतेर्विभाषा ’ (७।३।९०) इति विकल्पबाधनाय । यदि इयं न स्यात्, तर्हि ‘ उतो वृद्धिः० ’ (७।३।८९) इत्यतो हलीत्यनुवृत्य विहितस्य ‘ ऊर्णोतेर्विभाषा ’ (७।३।९०) इति वृद्धिविकल्पस्य हलन्तपित्सार्वधातुकाम्विषयतया चरितार्थस्य गुणेन और्णोदित्यत्र बाधसंभवेन अपृक्तग्रहणस्य वैयर्थ्यात्। अस्यां तु सत्यां हलादावेव विकल्पेन भाव्यतया अम्विषयेऽचरितार्थत्वादुभयोरेकविषयत्वप्राप्तौ मुख्यहलादौ विकल्पः, व्यपदेशिवद्भावेन हलादावपृक्ते तु नित्यं गुण इत्यपृक्तग्रहणमर्थवत् ॥ ३३ ॥

सर्वो द्वन्द्वो विभाषैकवद्भवति ॥ ३४ ॥

‘ द्वन्द्वश्च प्राणि० (२।४।२) ’ इत्यादिना येषां समाहार एव द्वन्द्वो विहितस्ततोऽन्यः सर्वो द्वन्द्व इत्यर्थः । तेन घटपटं घटपटावित्यादिसिद्धिः । न्यायसिद्धश्चायम्, ‘ चार्थे द्वन्द्वः ’ (२।२।२९) इति सूत्रेण समाहारेतरेतरयोगयोर्द्वन्द्वविधानात् । समाहारस्यैकत्वात्समाहारद्वन्द्वस्यैकवद्भावः । इतरेतरयोगे तु पदार्थानामनेकत्वात्तदभावः। ‘ द्वन्द्वश्च० ’ (२।४।२) इत्यादिना प्राण्यङ्गादीनां समाहार एव द्वन्द्वविधानात्तद्व्यतिरिक्तस्थल इत्यपि न्यायसिद्धम् । ज्ञापकमपि ‘ तिष्यपुनर्वस्वोः० ’ (१।२।६३) इति सूत्रे बहुवचनग्रहणम् ; । तद्धि ‘ उदितं तिष्यपुनर्वसू ’ इत्यत्र एकवचनस्य द्विवचनवारणाय । यद्यत्र समाहारद्वन्द्वो न स्यात्, तर्हि तदनर्थकम् । न चात्र ‘ जातिरप्राणिनाम् ’ (२।४।६) इति एकवद्भावप्रसङ्गः, तदनित्यत्वस्याप्यनेन ज्ञापनात् ॥ ३४ ॥

सर्वे विधयश्छन्दसि विकल्प्यन्ते ॥ ३५ ॥

‘ व्यत्ययो बहुलम् ’ (३।१।८५) इति सूत्रे बहुलमिति योगविभागेन ‘ षष्ठीयुक्तश्छन्दसि वा ’ (१।४।९) इति सूत्रे वेति योगविभागेन च एषा साधिता । तेन ‘ प्रतीपमन्य ऊर्मिर्युध्यति ’ इत्यादि सिद्धम् । युध्यत इति प्राप्नोति ॥ ३५ ॥

प्रकृतिवदनुकरणं भवति ॥ ३६ ॥

तेन ‘ अक्रन्ददित्यन्वाह ’ इति लङन्तानुकरणस्यानुकार्ये दृष्टमाद्युदात्तत्वं भवति।

---

१ क. व्यपदेशिवद्भावेन नाजादित्वात्. २ क. विकल्पने भाव्यतयाम्विषय चरितार्थत्वात्. ३ क. समाहारद्वन्द्वो. ४ ख. समाहारेतरयोर्द्वन्द्व. ५ क. समाहारस्यैकवद्भावः.

तथा ' मित्रैतामुखां तपेत्याह ' इत्यत्र तपेत्यनुकरणस्य ' तिङतिङः ' (८।१।२८) इति निघातः । अस्याश्च ज्ञापकम्— ' क्षियो दीर्घात् ' (८।२।४६) इति धात्वनुकरणस्य धातुप्रयुक्तेयङ्निर्देशः । तत्रैव अधातुरिति पर्युदासाप्रवृत्तेः प्रातिपदिकसंज्ञामाश्रित्य विभक्तिनिर्देशादनित्या चेयम् ॥ ३६ ॥

एकदेशविकृतमनन्यवद्भवति ॥ ३७ ॥

तेन पचतु अपचदित्यादौ तुशब्दस्य तकारस्य च तिङ्संज्ञया तिङन्तत्वात्पदत्वं सिध्यति । स्थानिवद्भावेन गतार्थमिदम् । यत्तु— "अनन्यवदित्यस्य अन्यवन्नेत्यर्थः। तत्रान्यसादृश्यनिषेधे अन्यत्वाभावः सुतराम् । अत एव तादृशादर्थबोधः । अन्यथा शक्ततावच्छेदकानुपूर्व्यज्ञानात्ततो बोधो न स्यात् । एवं च रामिति मान्तस्य यस्माद्विहितस्तत्त्वम् औ इत्यस्य परादिवत्त्वेन सुप्त्वमिति तदन्तत्वमार्थसमाजग्रस्तम् । छिन्नपुच्छे शुनि श्वत्वव्यवहारवत् मान्ते तत्त्वं लोकन्यायसिद्धम् । अत एव ' प्राग्दीव्यतः ' (४।१।८३) इति सूत्रे भाष्ये दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणमित्युक्त्वा, किमर्थं विकृतनिर्देशः, एतदेव ज्ञापयत्याचार्यः— भवत्येषा परिभाषा— एकदेशविकृतमनन्यवद्भवतीत्युक्तम् । एतेनायं न्यायः शास्त्रीयकार्य एव शास्त्रीयविकार एवेत्यपास्तम् । विकृतावयवनिबन्धनकार्ये तु नायम्, छिन्नपुच्छे शुनि पुच्छवत्त्वाभावाद्विकृतावयवव्यवहारस्य दुरुपपादत्वात् । एवमक्तपरिमाणग्रहणेऽपि नायम्, उक्तयुक्तेः । एतत् ' येन विधिः ' (१।१।७२) इति सूत्रस्थभाष्यकैयटयोर्ध्वनितम् । यत्र त्वर्धं तदधिकं वा विकृतं तत्र जातिव्यञ्जकभूयोवयवदर्शनाभावेन तत्त्वाप्रतीतौ कार्यसिद्ध्यर्थं विकृतानल्परूपावयवप्रतीत्यर्थं च स्थानिवत्सूत्रम् । क्वचित्तु लक्ष्यानुसारान्न्यायानाश्रयणम् । तेन अभीयादित्यादिसिद्धिः । स्पष्टं च क्वचिन्न्यायाप्रवृत्तिः 'प्रथमयोः पूर्वसवर्णः' (६।१।१) इत्यत्र कैयटेन दर्शितेत्यन्यत्र विस्तरः " (परि. शे. परि. ३७) इति नव्योक्तम्, तदयुक्तम् ॥

अनन्यपदेन 'द्वौ नञौ०' (हैमपरिभाषा११९) इति न्यायेन स एव बोध्यते। अंतविकारस्तदन्योऽपि तद्वत्कार्यं लभत इत्यर्थः । अन्यवन्नेति नञः क्रियासंबन्धे असमर्थसमासे गौरवम् । सुतरामन्यत्वनिषेध इत्यप्ययुक्तम् । अन्यसादृश्यनिषेधेऽपि अन्यत्वनिषेधे मानाभावात् । अन्यथा शक्ततावच्छेदकानुपूर्व्यज्ञानात्ततो बोधो न स्यादित्यप्ययुक्तम् । शक्ततावच्छेदकानुपूर्व्यज्ञानमीदृशप्रयोगात्पदस्फोटं साधयतो

१ क. पुच्छत्वाभावात्. २ क. विकारस्तदन्योऽपि.

वैयाकरणस्य गुणः । नैयायिकादीनां तु आदेशस्मारितस्थानिनामेव बोधकत्वस्वीकारान्न तत्र शक्ततावच्छेदकानुपूर्व्यज्ञानम् । अत एव नैयायिकमतानुसारेण प्रातिपदिकार्थवत्तासाधनपरस्य 'सिद्धं त्वन्वयव्यतिरेकाभ्याम्' (१।२।४५ वा. ९) इति वार्त्तिकस्य व्याख्याने भाष्ये वृक्षावित्यत्र आकारान्तो वृक्षशब्दोऽन्वयीत्युक्तम् । रामिति मान्तस्य यस्माद्विहितः प्रत्ययस्तत्त्वमार्थसमाजग्रस्तमित्यप्ययुक्तम् । रामशब्दाद्धि प्रत्ययो विहितः । न हि रामशब्दो राम्शब्दः । अत एव 'येन विधि०' इति सूत्रे 'तदेकदेशविज्ञानाद्वा सिद्धम्' (१।१।७२ वा.७) इति वार्त्तिकव्याख्यानावसरे सर्वके भिनत्तीत्यादौ 'अनेका नदी गङ्गां यमुनां च प्रविष्टा गङ्गायमुनाग्रहणेन गृह्यते । तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते' इति लौकिकन्यायेन सिद्धिमुपन्यस्य 'विषम उपन्यासः' इत्युपक्रम्य सर्वनामाव्ययधातुसंज्ञाः सर्व उच्चैः भिदिति परिच्छिन्नपरिमाणस्य कृता इत्यभिप्रेत्य 'इमाश्चापि संज्ञा अक्तपरिमाणस्य कृताः । ताः केनाधिकस्य स्युः' इत्युक्तम्; अन्यथा तत्राप्येकदेशविकृतन्यायेन सिद्धिसंभवे उक्तभाष्यमसंगतं स्यात्, देवदत्तादेर्गड्वाद्यपूर्वावयवोपजनेऽपि तद्विशिष्टे देवदत्तव्यवहारानपायात् 'देवदत्तो मुण्ड्यपि जट्यपि शिख्यपि स्वामाख्यां न जहाति' (१।१।१ वा. १३ महाभाष्य) इति वृद्धिसूत्रे भाष्यात् । अत्र जट्यपि शिख्यपीत्यवयवोपजनः, मुण्ड्यपीति उपजातावयवनाशश्चोच्यते । तथा घुसंज्ञासूत्रे भाष्ये आगमविषयपठितश्लोके 'एकदेशविकारे हि'० (१।१।२० श्लोकवार्तिक) इति आगमरूपोपजने विकारशब्दप्रयोगश्च । एतेन अपाय एव विकारो नोपजन इति कल्पनं गलहस्तितम् । घुसंज्ञासूत्र एव 'लब्धात्मनो भावस्य निमित्तवशाज्जायमानावुपचयापचयौ व्यपदेशहानिं न कुरुतः' इति कैयटोक्तेश्च । एवं सति 'श्वा कर्णे पुच्छे वा छिन्ने श्वैव भवति नाश्वो न गर्दभः' इति लौकिकन्यायो व्याकरणे न समाश्रयितुं युक्त इत्येतत् 'तदागमाः'० (परि.११) इति परिभाषायामवोचाम । रामावित्यत्र पदसंज्ञा तु कार्यकालपक्षेऽपि 'वृद्धिरेचि' इत्यादेशप्रवृत्तिकाले राम औ इत्यत्र अतिदेशरूपप्रयोजनाय प्रवृत्तिसंभवात् संभावनामात्रेणादेशे अतिदेशसंभवाच्च सुलभेति 'व्यपदेशिवदेकस्मिन्' (परि. ३०) इत्यत्रोपापीपदाम । अवयवे श्रुतो हि स्थान्यादेशभावः यस्य समुदायस्य कार्यं तत्समुदाये कल्प्यते । अत एव 'सर्वे सर्वपदादेशाः'० (१।१।२० श्लोकवार्तिक) इति कारिकायां 'पदशब्देन कार्यं प्रति यत्पद्यमानं प्रतीयमानं प्रकृतिप्रत्ययादि

---

१ क. प्रातिपदिकस्यार्थवत्ता. २ क. विहितस्तत्र. ३ क. परिभाषाणां कृताः. ४ क. श्रुते हि. ५ क. प्रतिपद्यमानं.

तस्यैव गृह्यते' (१।१।२० महाभाष्यप्रदीप) इति कैयटेनोक्तम्। एवं वदता कैयटेन स्थानिवद्भावः स्फुटमुपपादितः। 'प्राग्दीव्य तोऽण्' (४।१।८१) इति सूत्रे भाष्येऽपि उक्तपरिभाषां ज्ञापयित्वा 'किमेतस्य ज्ञापने प्रयोजनम्' इति परिचोद्य, 'एकदेशविकृतस्योपसंख्यानं चोदितम्। तन्न वक्तव्यं भवति' इति स्थानिवद्भाव एवोपपादितः। अक्तपरिमाणस्थलेऽयं न्यायो नेति त्वदुक्तिरपि तवायुक्ता। 'सुप्तिङन्तं पदम्' (१।४।१४) इत्यत्र हि यस्माच्छब्दात् प्रत्ययविधिस्तस्य शब्दस्य स एव शब्दः 'स्वं रूपम्०' (१।१।६८) इति वचनात्संज्ञा। सा चाक्तपरिमाणस्य कृतेति कथं राम्शब्दे प्रवर्तेत। त्वन्मतेऽपि यत्र त्वर्धं तदधिकं वा विकृतं तदर्थे स्थानिवद्भावस्यावश्यकत्वाच्च अभीयादित्यत्र 'एतेर्लिङि' (७।४।२४) इति ह्रस्वापत्तेश्च। अस्मन्मते तु 'उभयत आश्रयणे नान्तादिवत्' (१।१।५८ महाभाष्य) इति निषेधान्न ह्रस्वः। धात्वादिसंज्ञावदुपसर्गसंज्ञाया अप्यक्तपरिमाणे कृतत्वेन त्वन्मतेऽप्यत्र न्यायाप्रवृत्त्या न्यायानित्यत्ववर्णनस्यायुक्तत्वात्, एकदेशस्य नियोगतः परादित्वं स्वीकृत्यावशिष्टस्य प्रत्ययविधानावधित्वस्वीकारे 'न पदान्त०' (१।१।५८) इति सूत्रे 'कथं ब्रह्मबन्ध्वा ब्रह्मबन्ध्वै। उभयत आश्रयणे नान्तादिवत्' (१।१।५८ महाभाष्य) इति भाष्यविरोधाच्चेति संक्षेपः॥ ३७॥

परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः॥ ३८॥

पूर्वात्परं बलीयः, विप्रतिषेधसूत्रारम्भात्। तेन वृक्षेभ्य इत्यत्र परत्वात् 'सुपि च' (७।३।१०२) इति दीर्घं बाधित्वा 'बहुवचने झल्येत्' (७।३।१०३) इत्येत्वम्। परान्नित्यं बलीयः। तेन 'अस्मै' इत्यत्र नित्यत्वात्स्मायादेशः (७।१।१३) पश्चात् 'हलि लोपः' (७।२।११३)। नित्यादप्यन्तरङ्गं बलीयः। तेन 'यूयम्' इत्यत्र 'शेषे लोपष्टिलोपः' इति पक्षे नित्यमपि टिलोपं बाधित्वा अन्तरङ्गे 'अतो गुणे' (६।१।९७) कृते पश्चाट्टिलोपे अदन्तत्वाभावात् शीभावो न। अन्तरङ्गादप्यपवादो बलीयान्। तेन 'हरये' इत्यत्र वर्णमात्रापेक्षत्वेन अन्तरङ्गमपि यणं (६।१।७७) बाधित्वा अपवादत्वात् 'घेर्ङिति' (७।३।१११) इति गुणः॥ ३८॥

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव॥ ३९॥

तेन तिसृणामित्यत्र त्रि आम् इति स्थिते 'त्रिचतुरोः०' (७।२।९९) 'त्रेस्त्रयः' (७।१।५३) इति सूत्राभ्यां प्राप्तयोस्तिसृत्रयादेशयोः परत्वात्तिस्रादेशे कृते तस्य स्थानिवद्भावेन त्रिशब्दत्वमाश्रित्य त्रयादेशो न॥ ३९॥

१ क. प्रवर्तेत. २ क. अस्मिन्मते.

पुनःप्रसङ्गविज्ञानात्सिद्धम् ॥ ४० ॥

तेन भिन्धकीयत्र परत्वासिद्धिभावे (६।४।१०१) कृते पुनःप्रसङ्गविज्ञानादकच् । (५।३।७१) तथा ईजतुरित्यत्र परत्वात् 'वचिस्वपि०' (६।१।१५) इति संप्रसारणे कृते पुनःप्रसङ्गविज्ञानाद् द्वित्वम् (६।१।१) ॥

परिभाषाद्वयमपीदं विप्रतिषेधसूत्रस्य जातिव्यक्तिपक्षाभ्यां फलरूपम्। तथा हि— व्यक्तौ पदार्थे व्यक्तीनां शास्त्रं प्रति प्रधानत्वेन तद्भेदे गुणभूतशास्त्रभेदस्यावश्यकतया तावद्व्यक्तिगोचरतावच्छास्त्रोपप्लवे वृक्ष भ्यस् इत्येतद्व्यक्तिगोचरं 'सुपि च' (७।३।१०२) इति दीर्घशास्त्रमेकम्, 'बहुवचने झल्येत्' (७।३।१०३) इत्येत्त्वशास्त्रमेकम्। तयोश्चान्यत्राचरितार्थयोः शास्त्रत्वेन प्रमाणभूतयोः कस्यचिदप्रामाण्यकल्पनस्यायुक्तत्वाद् व्रीहियवशास्त्रवत् विकल्पेन प्रामाण्यसंरक्षणसंभवात् ण्वुल्तृचोरिव (३।१।१३३) पर्यायप्राप्तौ विप्रतिषेधसूत्रं (१।४।२) नियमार्थम्। 'विप्रतिषेधे परमेव न पूर्वम्' इति नियमः संपद्यते। तेन पूर्वशास्त्रं तद्व्यक्तिविषयं नोपप्लवते। एवं च तद्व्यक्तिविषयकपूर्वशास्त्राभावात् 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (परिभाषा ३९) इत्युपपद्यते। यदा तु जातौ शास्त्रं प्रवर्तते, तदा जातेरेकत्वादेकमेव शास्त्रम्। जातेस्तु कार्यसंबन्धो व्यक्तिं विना नोपपद्यत इति व्यक्त्याक्षेपे प्राप्ते यद्व्यक्त्याक्षेपे बाधकाभावः, ता व्यक्तय आक्षिप्यन्ते, न तु यत्र बाधकमस्ति सापि व्यक्तिः, शास्त्रस्य व्यक्त्यन्तराक्षेपेण चरितार्थत्वात्। तथा च वृक्ष भ्यस् इति व्यक्तेः परस्परविरोधादुभाभ्यामनाक्षेपे कस्यापि शास्त्रस्य तद्व्यक्तिसंबन्धाप्राप्तौ नियमासंभवात्परशास्त्रसंबन्धविधानार्थं विप्रतिषेधशास्त्रं संपद्यते। तस्मिंश्च कृते यद्यविरोधः, तर्हि पूर्वशास्त्रेणापि तद्व्यक्त्याक्षेपो नायुक्तः। तेन 'पुनःप्रसङ्गविज्ञानात्सिद्धम्' (परिभाषा ४०) इति सिद्धम्। इत्यमेव कैयटादयो व्याचख्युः ॥

यत्तु— "क्वचिच्चरितार्थयोरेकस्मिन्युगपदुभयोः कार्ययोरसंभवेन बाधकाभावात्पर्यायेण तृजादिवच्छास्त्रद्वयप्रसङ्गे नियमार्थं विप्रतिषेधसूत्रमिति सकृद्गतिन्यायसिद्धिः। यथा तुल्यबलयोरेकः प्रेष्यो भवति। स तयोः पर्यायेण कार्यं करोति। यदा तमुभौ युगपत्प्रेषयतः नानादिक्षु च कार्ये, तदोभयोर्न करोति यौगपद्यासंभवात्। तथा शास्त्रयोर्लक्ष्यार्थयोः क्वचिल्लक्ष्ये यौगपद्येन प्रवृत्त्यसंभवादप्रतिपत्तौ प्राप्तायामिदं परविप्रतिषेधमिति तत्र कृते यदि पूर्वप्राप्तिरस्ति, तर्हि तदपि भवत्येवेति पुनःप्रसङ्गविज्ञान-

१ क. भिन्दकीयत्र. २ क. एकस्मिन्नुभयोः.

सिद्धिरिति कैयटाद्युक्तं तु न युक्तम्। व्यक्तिपक्षे सर्वं लक्ष्यं शास्त्रं व्याप्नोति न जातिपक्ष इत्यत्र मानाभावात् 'न ब्राह्मणं हन्यात्' इत्यादौ जात्याश्रय-सकलव्यक्तिविषयत्वार्थमेव जातिपक्षाश्रयणस्य भाष्ये दर्शनात्। अत एव सरूपसूत्रे भाष्ये जातौ पदार्थे (१।२।६४) अनवयवेन साकल्येन विधेः प्रवृत्तेः 'गौरनुबन्ध्यः' इत्यादौ सकलगवानुबन्धनासंभवात्कर्मणो वैगुण्यमुक्तम्। द्रव्यवादे च असर्वद्रव्यगते-र्गौरनुबन्ध्य इत्यादौ एकः शास्त्रोक्तोपरोऽशास्त्रोक्त इत्युक्तम्। किं च भाष्योक्ततृजा-दिदृष्टान्तस्य व्यक्तिपक्ष एव सर्वविषयत्वं न जातिपक्ष इत्यत्र च न मानमस्ति। अपि च व्यक्तिपक्षेऽप्यन्यव्यक्तिरूपविषयलाभेन चरितार्थयोरियं व्यक्तिर्विरोधास्त्वविषयकत्वं न कल्पयतीति वक्तुं शक्यम्। जातिपक्षेऽपि तज्जात्याश्रयतद्व्यक्तिविषयकत्वमेव, नैतद्व्यक्तिविषयकत्वमित्यत्र विनिगमकाभावः। तत्र लक्ष्यानुसारात् क्वचिच्छास्त्री-यदृष्टान्ताश्रयणम्, क्वचिल्लौकिकदृष्टान्ताश्रयणमिति भाष्यसंमतमार्ग एव युक्तः" (परि. शे. परि. ४०) इति नव्यैरुक्तम्, तत्त्वयुक्तम्॥

तत्रान्यत्र चरितार्थयोरुभयोरेकस्मिन्युगपदसंभवेन बाधकाभावेन तृजादिवत्पर्या-यत्वमित्ययुक्तम्, बाधकाभावेनेति हेतोरसिद्धेः असंभवस्यैव बाधकत्वात्। शास्त्रयो-रन्यत्र चरितार्थत्वादप्रवृत्तिरेव स्यात्, न[1] त्वत्र तृजादिवत्पर्यायत्वम्[2]। तृजादौ हि तृचो नित्यं प्रवृत्तौ ण्वुल्शास्त्रस्यान्यत्राचरितार्थस्याप्रामाण्यप्रसङ्गेन ण्वुलो नित्य-प्रवृत्तौ तथाविधतृच्छास्त्रस्याप्रामाण्यप्रसङ्गेन दोषदुष्टमपि विकल्पमभ्युपेत्यागत्या पाक्षि-काप्रामाण्यात्वं पर्यायत्वमाश्रितम्। इह त्वीदृशपर्यायत्वं विनापि विषयान्तरमादाय शास्त्रयोरिह प्रवृत्तिं विनैव प्रामाण्योपपत्तेः। न च भाष्यग्रन्थविरोधः, भाष्यस्य व्यक्ति-पक्षाभिप्रायकत्वेन कैयटादिभिर्व्याख्यातत्वात्। न च व्यक्तिपक्षेऽप्युक्तदोषः, तत्र व्यक्तीनां प्राधान्यात् प्रतिप्रधानं गुणावृत्तेर्यावत्यो व्यक्तयस्तावन्ति शास्त्राणि परिकल्प-नीयानि। तत्र यदेतद्व्यक्तिविषयं शास्त्रद्वयं तस्यान्यत्राचरितार्थतयात्यन्तबाधे अप्रा-माण्यप्रसङ्गेन तृजादितुल्यत्वं युक्तम्। प्रधानानां च गुणभेदप्रयोजकत्वं 'प्रधानान्या-त्मसंस्काराय संनिधीयमानानि गुणभेदं प्रयुञ्जते' इति कैयटग्रन्थमुपन्यस्य स्वयैवानु-मोदितम्। 'क्क्ङिति च' (१।१।५) इति सूत्रे भाष्ये च तस्य परिभाषात्वमाश्रित्य 'पुगन्तलघूपधस्य च' (७।३।८६) इति प्रधानं प्रति 'क्क्ङिति च' (१।१।५) इत्यस्य भेदमाश्रित्य तदनवकाशत्वेन भिन्नमित्यादौ निषेधप्रवृत्तिरुपपादिता। लोके च

१ क. ख. शास्त्रोक्तमपरोऽशास्त्रोक्तमित्युक्तम्। २ क. न तु तृजादिवत्. ३ क. तृजादौ तृचो.

राज्ञां भेदे हि सेवका भिद्यन्त इति लोकप्रसिद्धोऽयं न्यायः । तस्माद्व्यक्तिपक्षमनपेक्ष्य तृजादिदृष्टान्तस्य पर्यायत्वप्राप्तेश्च महतामनादरणपूर्वकं वर्णनं साहसमात्रम् । 'तुल्यबलयोरेकः प्रेष्यो भवति' इत्यपि भाष्यं जातिपक्षाश्रयेण प्रवृत्तम् । तत्र हि जातेरेकत्वेन शास्त्रस्याप्येकत्वेन जातेः कार्याय एकशेषसूत्रे 'अधिकरणगतिः साहचर्यात्' (१।२।६४ वा.५५) इति वार्त्तिकोक्तन्यायेन व्यक्त्याक्षेपे विरोधशून्यव्यक्तीनामेवाक्षेपेण विरुद्धव्यक्तेरनाक्षेपादविरुद्धव्यक्तिमादाय शास्त्रस्य प्रामाण्योपपत्तेर्विरुद्धव्यक्तिविषयत्वकल्पने मानाभावात् विप्रतिषेधसूत्रं परशास्त्रसंबन्धप्रतिपत्तिपरमिति युज्यते ॥

यत्तु—'व्यक्तिपक्षे सर्वं लक्ष्यं शास्त्रं व्याप्नोति न जातिपक्ष इत्यत्र मानाभावः' (परि.शे.परि.४०) इति तन्मानस्योक्तपादितत्वान्निरस्तम् । यदपि —'सर्वजात्याश्रयव्यक्तिसंग्रहाय न ब्राह्मणं हन्यात् इत्यत्र एकशेषसूत्रे जातिपक्षाश्रयणं भाष्ये दृश्यते' इति, तत् 'एकः शब्दः एकमर्थं प्रत्याययति' इति नियममाश्रित्य एकशेषानारम्भे व्यक्तेः शब्दार्थत्वे ब्राह्मणं सुरामिति एकेन शब्देन एकैव ब्राह्मणव्यक्तिः सुराव्यक्तिश्च प्रतीयते । ततश्च तद्धननं तत्पानं च निषिध्येत । जातेः शब्दार्थत्वे तु तस्या एकत्वेन तस्याश्च हननपानयोर्व्यक्त्याक्षेपमन्तरेणानुपपत्तेर्विरोधाभावाद्विनिगमनाविरहाच्च सर्वव्यक्त्याक्षेपसिद्धेरेकशेषस्यानारम्भणीयत्वाच्च जातिपक्ष एवाश्रयणीय इत्येवंपरम् । अत एव सरूपसूत्रे (१।२।६४) जातिपक्षे साकल्येन सर्वव्यक्तीनां प्राप्तावेकस्यां व्यक्तावनुष्ठीयमानायां कर्मणो वैगुण्यं स्यादिति भाष्ये जातिपक्षाश्रयणस्य सर्वव्यक्तिलाभः फलमुक्तमित्यपि निरस्तम् । विरोधाभावविनिगमनाविरहाभ्यां जातिपक्षेऽप्याश्रीयमाणे तत्र सर्वव्यक्तिलाभात् । एतेनैव व्यक्तिपक्षे एकः शास्त्रोक्तमपरोऽशास्त्रोक्तमिति किंचिद्व्यक्तिविषयकत्वं भाष्ये दर्शितमिति तद्विरोध इत्यपास्तम् । 'एकः शब्द एकमेवार्थं प्रत्याययति' इति नियमस्वीकारे एकशेषानारम्भे च व्यक्तिपक्षस्येत्थं फलं भवतीत्यभिप्रायकत्वाच्च भाष्यस्य । अत एव तदनन्तरभाष्ये 'एवं तर्ह्यनवयवेन चोद्यते । प्रत्येकं च परिसमाप्यते । यथा आदित्यः' इति जातिपक्षे पूर्वोक्तं दोषमुद्धृत्य 'ननु च यस्यापि द्रव्यं पदार्थस्तस्यापि अनवयवेन चोद्यते प्रत्येकं च परिसमाप्यते' इति व्यक्तिपक्षेऽपि 'एकः शास्त्रोक्तमपरोऽशास्त्रोक्तम्' इति दोषमुद्धृत्य 'एकशेषस्त्वया वक्तव्यः' इति व्यक्तिपक्षे दोष उक्तः । जातिपक्षे 'त्वया द्विवचनबहुवचनानि साध्यानि' इति च ॥

---

१ क. नित्याक्षेपे. २ क. व्यक्तिपक्षाश्रये.

'उक्तभाष्येण जातिव्यक्तिपक्षयोर्भाष्यकारेण समत्वं दर्शितम्' इति तत्र कैयटः। तत्र जातिपक्षे विरोधाभावविनिगमनाविरहाभ्यामाक्षेपात्सर्वव्यक्तिलाभः। व्यक्तिपक्षे तु शब्दत एव सर्वव्यक्तिलाभ इति विशेषः। तथा च जातिपक्षे विरोधेन विरुद्धव्यक्तेः प्रकृतेऽनाक्षेपेण न सर्वव्यक्तिविषयत्वम्। शास्त्रस्याविरुद्धव्यक्त्याक्षेपेण अन्यत्र चरितार्थत्वात्। व्यक्तिपक्षे तु प्रतिप्रधानं गुणावृत्तेरेतल्लक्ष्यव्यक्तिविषयकशास्त्रद्वयस्यान्यत्राचरितार्थतया अत्यन्तबाधे 'शास्त्रस्याप्रामाण्यापत्त्या च पर्यायत्वप्राप्तिः। जातिपक्षे तु अप्राप्तिरेवेति कैयटाद्युक्तमेव युक्तम्। एतेन भाष्योक्ततृजादिदृष्टान्तस्य व्यक्तिपक्ष एव संभव इत्यत्र मानाभाव इत्यपास्तम्। मानस्योक्तत्वात्। एतेन व्यक्तिपक्षेऽपि शास्त्रस्य व्यक्त्यन्तरे चरितार्थतेति निरस्तम्। एतद्व्यक्तिविषयकशास्त्रद्वयस्यान्यत्राचरितार्थत्वात्। अत एव जातिपक्षेऽपि विनिगमकाभावाद्विरुद्धव्यक्तिविषयकत्वमपीपि परास्तम्, विरोधाभावस्यैव विनिगमकत्वादिति कैयटाद्युक्तमेव युक्तम्। नव्योक्तिस्तु न्यायापरिज्ञानविजृम्भितेति युक्तमाकलयामः ॥ ४० ॥

विकरणेभ्यो नियमो बलीयान् ॥ ४१ ॥

तेन एधते पचते इत्यत्र परमपि शपं बाधित्वा 'अनुदात्तङितः०' (१।३।१२) इत्यात्मनेपदसिद्धिः। अन्यथा परत्वाद्विकरणे कृते अनुदात्तङितः परत्वाभावादात्मनेपदनियमो न स्यात्। अत्र 'वृद्भ्यः स्यसनोः' (१।३।९२) इति स्यविषये विकल्पेन परस्मैपदविधानं ज्ञापकम्। यदि परत्वाद्विकरणः स्यात्, तर्हि 'तिङस्०' (३।४।७८) इति सामान्यसूत्रेणैव सिद्धे पक्षे परस्मैपदविधानमनर्थकं स्यात्। 'अनुदात्त०' (१।३।१२) इत्यादेः 'तिङस्०' (३।४।७८) इत्यनेनैकवाक्यतायां सार्वधातुकापेक्षविकरणापेक्षया नियमस्य प्राबल्यं सिद्धमेव। न च स्यादिभ्यः प्राबल्यमेवमपि न सिध्यति तेषां लकारापेक्षत्वेन सार्वधातुकानपेक्षत्वादिति वाच्यम्। विशेषापेक्षेभ्यस्तेभ्यो लसामान्यापेक्षनियमस्यान्तरङ्गत्वेन बलवत्त्वसिद्धेः। भिन्नवाक्यतापक्षे इदं वचनम्। अस्मिन्नेव पक्षे कृतेऽपि विकरणे नियमप्रवृत्तिरित्यत्र इदमेव ज्ञापकमिति 'शदेः शितः' (१।३।६०) इति सूत्रे कैयटः ॥ ४१ ॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ४२ ॥

अन्तर्भूतानि अङ्गानि यस्य तद् अन्तरङ्गम्। एवं बहिरङ्गम्। तेन पचावेदं

---

१ क. आक्षेपात्. २ क. शास्त्राप्रामाण्यापत्त्या च. ३ क. मानस्योक्तत्वात्......परास्तम् इति ग्रन्थः पतितः। ४ क. एवं बहिरङ्गम् इति न पठ्यते।

पचोमेदमित्यत्र एत ऐत्वं न भवति, एकादेशस्य पदद्वयापेक्षत्वेन बहिरङ्गत्वात् 'एत ऐ' (३।४।९३) इत्यस्य एकपदापेक्षत्वेनान्तरङ्गत्वात्। अत्र 'पूर्वं पूर्वमन्तरङ्गम्, परं परं बहिरङ्गम्,' 'अल्पापेक्षमन्तरङ्गम्, बह्वपेक्षं बहिरङ्गम्' इति तत्र तत्र व्याख्यातारः। अत्र बहिरङ्गशास्त्रनिमित्तान्तर्भूतनिमित्तकत्वमन्तरङ्गत्वमित्ययुक्तम्। 'एत ऐ' (३।४।९३) इत्यस्य बहिरङ्गशास्त्रनिमित्ताकारेकारानन्तर्भूतैकारनिमित्तकत्वेन अन्तरङ्गत्वाभावापत्तेरेत ऐत्वस्य बारणासंभवात्। यदि तु अल्पापेक्षमन्तरङ्गम्, तदा अकारेकाररूपनिमित्तद्वयापेक्षित्वादेशादेकाररूपनिमित्तापेक्षत्वस्यान्तरङ्गत्वं युज्यते। अत एव 'येन विधिः०' (१।१।७२) इति सूत्रे "इको यणचि (६।१।७७) इत्यादौ तदन्तविधौ अन्तरङ्गबहिरङ्गे न प्रकल्पेयाताम्। तत्र को दोषः। स्योनः स्योना। अन्तरङ्गलक्षणस्य यणादेशस्य बहिरङ्गलक्षणो गुणो बाधकः प्रसज्येत। ऊनशब्दं ह्याश्रित्य यणादेशो नशब्दमाश्रित्य गुणः" (१।१।७२ महाभाष्य) इति भाष्यं व्याचक्षाणः कैयटः "सिवेर्बाहुलकादौणादिके नप्रत्यये कृते गुणो वलोप ऊठ् इति त्रयः प्राप्नुवन्ति। तत्रापवादत्वादूठा वलोपो बाध्यते। गुणस्त्वन्तरङ्गत्वाद्बाध्यते। गुणो ह्यङ्गसंबन्धिनीमिग्लक्षणां लघ्वीमुपधामार्धधातुकं चाश्रयते। ऊठ् तु वकारान्तमङ्गमनुनासिकादिं च प्रत्ययमित्यल्पापेक्षत्वादन्तरङ्गः" इत्याह ॥

यत्तु— कैयटग्रन्थमनूद्य "तदन्तविधावपि बहुपदार्थापेक्षत्वरूपबहिरङ्गत्वस्य गुणे सत्त्वेन तत्र दोषकथनपरभाष्यासंगतेः। बहिरङ्गान्तरङ्गशब्दाभ्यां बह्वपेक्षत्वाल्पापेक्षत्वयोः शब्दमर्यादया अलाभाच्च। तथा सति 'असिद्धं बह्वपेक्षमल्पापेक्षे' इत्येव वदेत्। अत एव विप्रतिषेधसूत्रे भाष्ये 'गुणाद्यणादेशोऽन्तरङ्गत्वात्' इत्यस्य स्योन इत्युदाहरणम्। न तु गुणादूठ् अन्तरङ्गत्वादित्युक्तम्" (परि. शे. परि. ५०) इति नव्योक्तदूषणम्, तदत्रयुक्तम्। यन्निमित्तघटितनिमित्तकं यन्न भवति, तत् तदपेक्षया बहिरङ्गमिति तावन्नार्थः, धर्मिग्राहकमानविरोधात्। विश्वौहः इत्यत्र संप्रसारणं बहिरङ्गं गुणस्त्वन्तरङ्ग इत्याश्रित्य इयं परिभाषा ज्ञापिता। तत्र गुणस्य निमित्तं ण्विः। संप्रसारणस्य निमित्तं शस्। न चास्य गुणनिमित्तघटितताऽस्ति, येन बहिरङ्गता स्यात्। यन्निमित्तोपस्थित्युत्तरोपस्थितिकनिमित्तकं यन्न भवति, तत् तदपेक्षयान्तरङ्गमिति स्वीकारे गुणनिमित्तण्व्युपस्थित्युत्तरोपस्थितिकशस्निमित्तत्वात्संप्रसारणस्य बहिरङ्गता च युज्यते। एवं हि ऊनशब्दमाश्रित्य प्रवृत्तयणः पूर्वोपस्थितिकनिमित्तक-

१ क. प्रसारणस्य.

त्वेन तदन्तविधिप्रवृत्तावपि स्वस्पक्षेऽप्यन्तरङ्गत्वानपायादुक्तभाष्यग्रन्थस्यैकदेशयुक्तित्वात् 'गुणस्य बह्वपेक्षत्वेन बहिरङ्गत्वम्' इत्युक्तभाष्यं व्याचक्षाणेन कैयटेनास्यैकदेशयुक्तिवननात्। भाष्ये 'अन्तरङ्गं च' इति यदन्तरङ्गमुपक्रान्तम्, तदेव 'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इति बहिरङ्गलक्षणासिद्धत्वापादकतयोपसंहृतम्। उपक्रमे च 'अन्तरङ्गबलीयस्त्वं न्यायसिद्धम्' इति कैयटः। तत्पर्यालोचनया प्रथमोपस्थितमन्तरङ्गं पश्चादुपस्थितं बहिरङ्गमिति गम्यते, प्रथमोपस्थितस्य प्रथममेव करणस्य न्याय्यत्वात्। अल्पापेक्षं च प्रथममुपतिष्ठते यथा उत्सर्गः। बह्वपेक्षं पश्चादुपतिष्ठते यथा अपवादः। इममेव विशेषमभिप्रेत्य कैयटेनोक्तम्—'गुणो बहिरङ्गः' इति। 'असिद्धं बह्वपेक्षमल्पापेक्षे' इति तु नोक्तम्। गुणोऽन्तरङ्गो बहिरङ्गं संप्रसारणमित्यस्यासिद्धिप्रसङ्गात्। उक्तरीत्या ऊठो गुणापेक्षयान्तरङ्गत्वेऽपि यणोऽप्यन्तरङ्गत्वेन तदुदाहरणोपपत्तेः भाष्ये अवचनमात्रेण न्यायसिद्धस्योठोऽतरङ्गत्वस्य प्रत्याख्यानायोगात्॥

यत्तु—पद्संज्ञायां नलोपस्य असिद्धत्ववचनं केषांचिदयुक्तम्। नलोपस्य बहिरङ्गत्वाभावादिति। तदयुक्तम्। 'नलोपः सुप्स्वर०' (८।२।२) इति हि नलोपस्यासिद्धत्वम्, न तु उक्तपरिभाषया। यद्यपि नलोपस्य पद्संज्ञापेक्षया बहिरङ्गत्वं ततश्च तेनैव सिद्धौ 'बह्वपेक्षं बहिरङ्गम्' इत्यस्यानित्यत्वज्ञापनाय प्रकृतसूत्रे संज्ञाग्रहणम्। तेन न कश्चिदतिप्रसङ्गः। अत एव 'ह्रस्वत्वं तुग्विधेः। ग्रामणि कुलम्। नलोपः। वृत्रहभिः' इति संनिपातपरिभाषायाः प्रयोजनद्वयं 'कृन्मेजन्तः' (१।१।२९) इति सूत्रे बहिरङ्गपरिभाषयान्यथासिद्धमित्युक्तम्। एवं प्रत्ययलक्षणसूत्रेऽपि तुकोऽतरङ्गत्वमुक्तम्—ग्रामणि कुलमिति। 'नपुंसकह्रस्वत्वमपि अर्थापेक्षत्वात् बरिरङ्गम्' इति तत्रापि तुगभावः कैयटेन साधितः। 'अन्तरङ्गपरिभाषयैवात्र तुग्वारणम्। यदि संनिपातपरिभाषया स्यात्तर्हि ग्रामणिच्छत्रमित्यत्र 'छे च' (६।१।७३) इति तुङ् न स्यात्' इति च कैयटः। न चैतद्भाष्यमेकदेश्युक्तिः। स्वमनीषिकामात्रेण उपपत्तिसहस्य भाष्यस्यैकदेश्युक्तित्वकल्पनस्यायुक्तत्वात्। तुकोऽन्तरङ्गत्वानभ्युगमे वृत्रहच्छत्रमित्यत्र 'छे च' (६।१।७३) इति तुगभावापत्तेश्च। एतेन 'वृत्रहभ्यामित्यादौ पदसंज्ञानिमित्तकत्वेऽपि नलोपस्य बहिरङ्गत्वाभावात्कृतितुग्ग्रहणमर्थवत्, श्यामः पदत्वनिमित्तत्वेऽपि नलोपस्य तन्निमित्तकत्वाभावात्' इत्य-

---

[1] ख. इति असिद्धत्वापादकतया. [2] क. प्रथममुपस्थितस्य. [3] ख. अन्तरङ्गत्वे. [4] ख. वृत्रहच्छत्र.

पास्तम्। एवं सति ज्ञापकविरोधापत्तेः संप्रसारणस्य भसंज्ञानिमित्तत्वेऽपि त्वदुक्तरीत्या शास् निमित्तकत्वाभावेन बहिरङ्गत्वाभावात्। 'अर्थापेक्षत्वेन बहिरङ्गत्वे त्रयादेशस्यान्तरङ्गतापत्त्या 'त्रेयादेशे स्रन्तस्य प्रतिषेधः' इति स्थानिवत्सूत्रस्थभाष्यविरोधापादनं तु ऋषिवाचकात्रिशब्दैकदेशत्रिशब्दस्य ग्रहणवारणाय अर्थवत्परिभाषालभ्यार्थापेक्षत्वेन त्रयादेशस्यापि बहिरङ्गत्वतौल्यात् परिभाषाया अनित्यत्वाच्च वारितम्। एतेन 'गौधेरः', 'पचेरन्' इत्यादौ अङ्गसंज्ञानिमित्तकस्यैयादेशस्य बहिरङ्गत्वे यलोपो न स्यात्। न च वलिलोपे बहिरङ्गपरिभाषा न प्रवर्तत इति वाच्यम्, वृश्चतीत्यादौ वकारोपदेशसामर्थ्येन 'वलिलोपाप्रवृत्तेर्भाष्योक्ताया असंगत्यापत्तेः' इति निरस्तम्। तद्भाष्यग्रन्थस्यौत्सर्गिकप्रवृत्तिमादायोपपत्तेः वलिलोपे अप्रवृत्तिमाश्रित्यैव 'अचः परस्मिन्०' (१।१।५७) इति सूत्रे भाष्योक्ते युवजानिरित्यत्र वलिलोपप्रवृत्तेस्त्वयापि वक्तव्यत्वात्॥

इदं चावधेयम्--अन्तरङ्गपदेन प्रथमोपस्थितियोग्यार्थकत्वमुच्यते। तच्चाल्पकाले शाब्दबोधजनकत्वम्। यत्सूत्रपदश्रवणमारभ्य यावति काले तदर्थशाब्दबोधो भवति, ततोऽधिककालापेक्षशाब्दबोधजनकत्वं बहिरङ्गत्वमुच्यते। लक्ष्ये प्रथमोपस्थितनिमित्तकत्वं चान्यदन्तरङ्गत्वम्, पश्चादुपस्थितनिमित्तकत्वं च बहिरङ्गत्वम्। 'पुरुषोऽयं प्रातरुत्थाय' इत्यादिना 'अचः परस्मिन्' (१।१।५७) इति सूत्रे भाष्यकारेण द्वितीयातरङ्गत्वबहिरङ्गत्वे उक्ते। आद्यं तु 'अल्पापेक्षमन्तरङ्गं बह्वपेक्षं बहिरङ्गम्' इति पर्यवस्यति। अल्पार्थविषयकशाब्दबोधस्याल्पकालेन जननात् अधिकपदज्ञानतदर्थस्मृतिपूर्वकशाब्दबोधस्याधिककालेन जननात् तत्रोभयत्र अन्तरङ्गबलीयस्त्वम्। प्रथमोपस्थितस्य प्रथमं प्रवृत्तिर्न्यायसिद्धा। प्रथमप्रवृत्तिकबह्वपेक्षापेक्षया निमित्तवशात्पश्चादुपस्थितात्पापेक्षं प्रत्यसिद्धत्वं ज्ञापकसाध्यम्। अत एव 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषायाः पचावेदं पचामेदमिति भाष्यादावुदाहृतम्॥

अत्र च ज्ञापकम् – 'वाह ऊठ्' (६।४।१३२) इति सूत्रे ऊठ्ग्रहणम्। तद्धि विश्वौह इत्यत्र 'एत्येधत्यूठ्सु' (६।१।८९) इति वृद्ध्यर्थम्। यदीयं परिभाषा न स्यात्, तर्हि विश्वं वहतीति विग्रहे 'वहश्च' (३।२।६४) इति ण्विप्रत्यये उपपदसमासे शसि भसंज्ञायां "वाह ऊठ्" (६।४।१३२) इति सूत्रेण 'वसोः संप्रसारणम्'

१ ख. बहिरङ्गत्वेन त्रयादेश. २ क. त्रयादेशे तिस्रन्त. ३ क. भाष्यादिविरोधापादनं. ४ क. वलिलोपे प्रवृत्ते. ५ क. इदं त्ववधेयम्. ६ ख. वाह ऊठ्सूत्रे.

(६।४।१३१) इत्यतोऽनुवृत्तसंप्रसारणविधौ ' संप्रसारणाच्च ' (६।१।१०८) इति पूर्वरूपे ण्विप्रत्ययमाश्रित्य लघूपधगुणे ' वृद्धिरेचि ' (६।१।८८) इति वृद्धौ विश्वौह [1]इति सिद्धेरनर्थकं स्यात्। एतत्सत्त्वे तु भसंज्ञानिमित्तशस्प्रत्ययमाश्रित्य कृतसंप्रसारणस्य लघूपधगुणनिमित्तण्विप्रत्ययोपस्थित्युत्तरकालोपस्थितिकशस्निमित्तकत्वेन बहिरङ्गत्वादसिद्धत्वाल्लघूपधगुणाभावे ' वृद्धिरेचि ' (६।१।८८) इत्यस्याप्रवृत्तेः ' एत्येधत्यूठ्सु ' (६।१।८९) इति वृद्धये ऊठ्ग्रहणमर्थवत्। ननु अकारान्तोपसर्ग उपपदे प्रौह इत्यत्र ' एङि पररूपम् ' (६।१।९४) इति पररूपं बाधित्वा वृद्ध्यर्थमूठ्ग्रहणं। तथा अनकारान्ते शाल्यूह इत्यत्र उकारश्रवणार्थं तदिति चेत्, अत्र कैयटादयः— उक्तस्थले वहेर्ण्विर्न भवति उक्तवार्त्तिकबलेनानभिधानकल्पनादिति। ईदृशस्थले वाहेर्विजपि अनभिधानान्नेति नव्योक्तिस्त्वयुक्ता, तत्कल्पने मानाभावात्। तत्र प्रवाहः [2]शालिवाह इत्येव शसादौ रूपस्य स्वीकरणीयत्वात्। न च तत्र ऊठ् भवति, णिलोपस्य स्थानिवत्त्वात्। अत एव विजिव विच् क्विब्विरर्थ इति केषांचित्कल्पनापि परास्ता। तत्र णिलोपस्य ' क्वौ लुप्तं न स्थानिवत् ' (१।१।५८ महाभाष्य) इति स्थानिवत्त्वनिषेधेऽपि ' वचिस्वपि० ' (६।१।१५) इति संप्रसारणप्रसङ्गात् अनभिधानकल्पनापेक्षया ' क्वौ लुप्तम्० ' इत्यस्य पिपठिषतीत्यत्रेवानाश्रयणस्यैव युक्तत्वाच्च ॥

ननु विश्वौह इत्यत्र ' ऊडिदं० ' (६।३।११७) इति विभक्त्युदात्तत्वसिद्धये ' वाह ऊठ् ' (६।४।१३२) इति ऊठ्ग्रहणं स्यात्। अत्र केचित्— स्वरार्थत्वे ' ऊडिदम्० ' (६।३।११७) इत्यत्र ऊठ्ग्रहणमपनीय वुग्रहणं कर्तव्यम्; वकारसंबन्ध्युपधाभूतो य उस्ततः परविभक्तेरुदात्तो भवतीत्यर्थः। एवं च ऊठ्ग्रहणं विनैव स्वरसिद्धिरिति। तदयुक्तम्। एवं हि तस्थुष इत्यादौ ' वसोः संप्रसारणम् ' (६।४।१३१) इति संप्रसारणात्परविभक्तेरप्युदात्तत्वप्रसङ्गात्। न चेष्टापत्तिः, तस्थुषश्च विदुषा दाशुषा इत्यादौ विभक्तेरनुदात्तत्वदर्शनात्। अत एव ' ऊडिदम् ' (६।१।११७) इति सूत्रितम्। तस्मादूठ्ग्रहणं स्वरार्थं कथं ज्ञापकमिति। वयं तु ब्रूमः--' वाह ऊठ् ' इति सूत्र्यताम्। ' ऊडिदम्० ' (६।१।११७) इति सूत्रे ' ठिदिदम्-- ' इति सूत्र्यताम्। ' ठित्युपधाग्रहणम् ' इति च वार्तिकं कर्तव्यम्। एवं सति ' वाह ऊठ् ' (६।४।१३२) इत्यत्र दीर्घोच्चारणाल्लाघवं

---

१ क. इति सिद्धे अनैकान्त्यादेतत्सत्त्वे तु. २ क. शालीवाह इत्येव.

स्वरश्च सिध्यतीति दीर्घोच्चारणं ज्ञापकमेवेति । अथ वा 'च्छ्वोः०' (६।४।१९) इति सतुक्कग्रहणं ज्ञापकमस्याः । तदप्युक्तं भाष्ये—'क्रियमाणेऽपि वै अग्रहणे अवश्यमत्र तुगभावे यत्नः कर्तव्यः । अन्तरङ्गत्वाद्धि तुक् प्राप्नोति इति । एवं वदता तेन तुगभावे यत्नोऽन्तरङ्गपरिभाषाज्ञापक इति ध्वनितम् ॥

इयं परिभाषा कार्यकालपक्षेऽपि त्रिपाद्यां न प्रवर्तत इति नव्योक्तिस्त्वयुक्ता। दध्यत्रेत्यादौ त्रिपादीस्थेऽन्तरङ्गे संयोगान्तलोपे भाष्यवार्त्तिकयोरस्याः परिभाषायाः संचारितत्वात् 'खरवसानयोः०' (८।३।१५) इति सूत्रे वार्त्तिककृता संचारितत्वाच्च तत्र प्रवृत्तौ बाधकाभावाच्च । यद्यपि विसर्जनीयसूत्रे भाष्ये 'अयुक्तोयं परिहारः । न वा बहिरङ्गलक्षणत्वात्' इत्युपक्रम्य 'यथा ह्यन्तरङ्गपरिभाषया पूर्वस्यासिद्धत्वमुच्यते एवं 'पूर्वत्रासिद्धम्' (८।२।१) इति परिभाषयापरस्यान्तरङ्गस्याप्यसिद्धत्वस्य वक्तुं शक्यत्वात्' इति हेतुरुक्तः, तथापि 'चोद्यान्तरमेतद्भाष्यम्' इति कैयटेनोक्तत्वात् वचनेनैव तत्र तत्र समाधाने गौरवात् 'इत्युत्तरस्य' 'कर्णोष्ठनव्ययस्य' इत्यादिनिर्देशात् आनुमानिक्याप्यन्तरङ्गपरिभाषया प्रत्यक्षसिद्धस्यापि 'पूर्वत्रासिद्धम्' (८।२।१) इत्यस्य बाध इति ज्ञापनसंभवात् कार्यकालपक्षे त्रिपाद्यामन्तरङ्गपरिभाषाप्रवृत्तिर्युक्तैव । वस्तुतस्तु 'तस्मादित्युत्तरस्य' (१।१।६७) 'कर्णोष्ठनव्ययस्य' (८।३।४६) इत्यादि निर्देशा एव इमां परिभाषां त्रिपाद्यामस्याः प्रवृत्तिं च ज्ञापयन्तीति न किंचिदनुपपन्नम् ॥ ४२ ॥

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ४३ ॥

उत्तरकालप्रवृत्तिके यत्राच आनन्तर्यमाश्रीयते, तत्र बहिरङ्गपरिभाषा न प्रवर्तत इत्यर्थः । तेन अक्षद्यूरित्यादौ अक्षैर्दीव्यतीति विग्रहे 'क्विप् च' (३।२।७६) इति क्विपि तमाश्रित्य वकारस्य 'च्छ्वोः०' (६।४।१९) इत्यूठि तस्य बहिरङ्गत्वेऽपि तमाश्रित्य यण् सिध्यति । इतरथा बहिरङ्गपरिभाषया ऊठोऽसिद्धत्वेन यण् न स्यात्। अत्र च ज्ञापकम्—'षत्वतुकोरसिद्धः' (६।१।८६) इति सूत्रम् । तद्धि कोऽसिचत् अधीत्येत्यादौ षत्वं मा भूत्, तुक्च यथा स्यादित्येवमर्थम् । एकादेशस्य पदद्वयापेक्षत्वेन बहिरङ्गतया एकपदापेक्षत्वेनान्तरङ्गे षत्वे तुकि च कर्तव्ये अन्तरङ्गपरिभाषयैवासिद्धत्वसिद्धौ अनर्थकं तदुक्तार्थं ज्ञापयति ॥

१ क. यत्र चानन्तर्य०

यत्तु— 'अत्र षत्वग्रहणं न ज्ञापकम्, एकादेशस्य पूर्वान्तवत्त्वे षत्वस्यापि पदद्वयाश्रितत्वात् त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषा न प्रवर्तत इत्युक्तत्वाच्च' (परि. शे. परि. ५१) इति नव्योक्तम्, तदयुक्तम् । एकादेशस्य पूर्वान्तत्वेन ग्रहणे तुकोऽपि पदद्वयाश्रितत्वेन तुग्ग्रहणस्याज्ञापकत्वप्रसङ्गात् । अथ 'अन्तादिवच्च' (६।१।८५) इत्यतिदेशस्य कार्यार्थतया परत्वेन परादित्वमाश्रित्य तुग्ग्रहणस्य ज्ञापकत्वं समर्थ्यते, तर्हि षत्वेऽप्येवं वक्तुं शक्यम् । किं च षत्वे पूर्वान्तत्वाश्रयणे 'सात्पदाद्योः' (८।३।१११) इति निषेधेन षत्वाभावसिद्धेरनर्थकमसिद्धवचनं स्यात् । त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषाप्रवृत्तिर्वार्त्तिककृत्प्रभृतिसर्वग्रन्थकृत्संमता निर्दोषा सप्रमाणा चेत्युपपादितम् । कृत्स्नसूत्रस्य ज्ञापकत्वं वदन्भाष्यकारोऽप्यत्रानुकूलः । वस्तुतस्तु उक्तज्ञापकेन अन्तरङ्गपरिभाषाया अनित्यत्वमेव ज्ञाप्यते । तेन अक्षद्यूरित्यत्र बहिरङ्गस्योठोऽसिद्धत्वेन यणि कृते वलोपो न ॥ ४३ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते ॥ ४४ ॥

तेन गोमान् प्रियो यस्येति विग्रहे बहुव्रीहौ गोमत् सु प्रिय सु इति स्थिते पदद्वयापेक्षसमासापेक्षलुकः प्रागेवान्तरङ्गत्वात्सुप्रत्ययमपेक्ष्य 'उगिदचाम्०' (७।१।८०) इति नुम्, 'अत्वसन्तस्य०' (६।४।१४) इति दीर्घश्च न । अत्र च ज्ञापकम्— 'प्रत्ययोत्तरपदयोश्च' (७।२।९८) इति सूत्रे 'मपर्यन्तस्य' (७।२।९१) इत्यस्यानुवृत्तिः । सा हि त्वत्कृतं मत्कृतमित्यादौ सर्वादेशत्वबाधनार्था । यदि च लुग्विषये स्यात्, तर्हि विभक्तिमपेक्ष्य 'त्वमावेकवचने' (७।२।९७) इति सूत्रेणान्तरङ्गत्वात्त्वमादेशप्रवृत्तौ व्यर्था स्यात् । न च तव पुत्रस्त्वत्पुत्रः तुभ्यं हितं त्वद्धितमित्यादौ तवममाद्यादेशबाधनाय प्रवर्तमानयोस्त्वमयोः सर्वादेशत्वबाधनार्थं तदिति वाच्यम्, मपर्यन्ताधिकारेण विहितानां तवममाद्यादेशानां मपर्यन्त एव प्रवृत्त्या तदपवादभूतयोस्त्वमयोरपि विनैव मपर्यन्तानुवृत्तिम् 'उत्सर्गसमानदेशा अपवादाः' इति न्यायेन मपर्यन्तादेशत्वस्य सर्वादेशत्वस्य च सिद्धेः ॥

न च श्नमवद्बहुजकक्षु भिन्नदेशेष्वपि शप्कल्पबादीनामपवादत्वदर्शनान्नोत्सर्गसमानदेशत्वनियमोऽपवादस्येति वाच्यम्, श्नमो मित्करणेन बहुचि पुरस्ताद्ग्रहणेनाकचि प्राग्ग्रहणेन च उक्तानियमभङ्गेऽपि अन्यत्र तत्स्वीकारे बाधकाभाव इति नव्याः ॥ कैयटस्तु— उक्तसूत्रे स्थानिप्रक्लृप्त्यर्थं तवममाद्यादेशानामनुवृत्तिं स्वीकृत्य एकार्थयो-

---

१ क. तुग्ग्रहणस्यापि अज्ञापकत्व०

र्युष्मदस्मदोस्तवममाद्यादेशस्थानिनोरनेन सूत्रेणादेशविधानं स्वीकृत्य तवममाद्यादेशस्थले मपर्यन्तस्थानिकत्वस्य स्थानिप्रकल्प्त्यर्थानुवृत्ततवममादिभिरेव सिद्धत्वात्तत्र प्रयोजनाभावेन मपर्यन्तग्रहणस्यासंबन्धात् त्वया कृतं त्वत्कृतं मया कृतं मत्कृतमित्यत्र सर्वादेशत्ववारणायैव मपर्यन्तानुवृत्तिः । यदि लुग्विषये अन्तरङ्गपरिभाषा स्यात्, तर्हि 'त्वमावेकवचने' इत्यनेनैव तत्सिद्धेर्व्यर्था स्यादिति 'उत्सर्गसमानदेशा अपवादाः' इति नियमाभावेऽपि उक्तार्थज्ञापिका संपद्यत इत्याह ॥ हरदत्तस्तु– यदि लुग्विषये अन्तरङ्गं स्यात्, तर्हि अन्तरङ्गत्वात्तवममाद्यादेशेषु कृतेषु मपर्यन्ताभावान्मपर्यन्तानुवृत्तिर्व्यर्था सती ज्ञापिकेत्याह । न च ममादेशे मपर्यन्तत्वमस्तीति वाच्यम्, युष्मच्छब्दादेशे तथापि मपर्यन्तत्वाभावादिति तदाशयः ॥ प्रत्ययोत्तरपदयोर्विधीयमानत्वमादेशयोस्तवममाद्यादेशापवादत्वेनान्तरङ्गादप्यपवादस्य बलीयस्त्वेनाप्रवृत्तेषु तवममाद्यादेशेषु मपर्यन्तत्वसंभवादिदमयुक्तमिति नव्योक्तमयुक्तम्, 'तवकममकावेकवचने' इतित्वमयोः सर्वादेशत्वेन तदपवादत्वमन्तरेणापि विधानसंभवात् । 'तस्मिन्नणि च युष्माकास्माकौ' इत्यत्र विशिष्टादेशविधानम् 'उत्सर्गसमानदेशा अपवादाः' इति न्यायं ज्ञापयतीत्यप्ययुक्तम् । अत्र हि आकञादेशो विधीयतामाकादेशो वा । आद्ये ञ्नमो मित्त्वेनेव आकञो ङित्त्वेनाप्यन्त्यादेशत्वसिद्धौ विशिष्टादेशविधानवैयर्थ्यध्रौव्यात् । द्वितीये 'उत्सर्गसमानदेशाः०' इति न्यायस्वीकारे यौष्मेकीण[1] इति रूपासिद्ध्या विशिष्टादेशस्यावश्यकत्वात्, युष्माभिः कृतो ग्रन्थो यौष्माकीणः युष्मासु भवो यौष्माकीणः इत्यादौ केनाप्यादेशेनानाक्रान्तविषये सावकाशत्वेनोक्तादेशयोरपवादत्वस्यैवासिद्धेः । तवकममकयोस्तु एकवचन इत्यभिधानात् यद्यपि तवमाद्यपवादत्वसंभवः, तथापि तयोस्त्वन्मते 'उत्सर्गसमानदेशाः०' इति न्यायेन मपर्यन्तस्य प्राप्तौ तावकीन इत्यादिरूपासिद्धिः । आकञादेशविधाने च तवायं तावक इत्यत्र रूपसिद्धावपि त्वयि भव इत्यादौ रूपासिद्धेर्भिन्नविषयापवादत्वं परित्यज्य विशिष्टा एवादेशा विधेया इति किमिह व्यर्थं सत् कस्यार्थस्य ज्ञापकमित्युक्तमिति सुधियो विदांकुर्वन्तु । वार्त्तिकरीत्या इदं ज्ञापकं भाष्यमते तु वाचनिकमेवेत्यप्ययुक्तम्, भाष्यमतेऽपि ज्ञापकत्वस्य कैयटेनोपपादितत्वादित्यलम् ॥ ४४ ॥

पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न ॥ ४५ ॥

तेन पूर्वेषुकामशमः इत्यत्र 'दिशोऽमद्राणाम्' (७।३।१३) इत्युत्तरपदादिवृद्धिः

१ क. अन्तरङ्गपरिभाषा न स्यात्. २ क. यौष्माकीनः

सिध्यति । इतरथा ‘ उभयत आश्रयणे नान्तादिवत् ’ इति निषेधेन दिग्वाचकशब्दात्परदेशवाचकशब्दाभावात् ‘ दिशोऽमद्राणाम् ’ (७।३।१३) इत्युत्तरपदादिवृद्धिर्न स्यात् । [1]अत्र च ज्ञापकम्— ‘नेन्द्रस्य परस्य’ (७।३।२२) इत्युत्तरपदवृद्धिप्रतिषेधः । [2]यदि ह्युत्तरपदादिवृद्धेः प्रागेकादेशः स्यात्, तदा उत्तरपदेन्द्रपदे इकारस्य एकादेशेनापहृतत्वाद् द्वितीयस्य ‘ यस्येति ’ (६।४।१४०) इति लोपेनापहृतत्वादनच्क इन्द्रशब्दो भवतीति व्यर्थः स्यात् ॥ ४५ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते ॥ ४६ ॥

तेन प्रदायेत्यत्र ‘ दो दद् घोः ’ (७।४।४६) इत्यन्तरङ्गोऽपि दद्भावो न । अत्र च ज्ञापकम्-- ‘ अदो जग्धिः० ’ (२।४।३६) इत्यत्र ति कितीत्येव सिद्धे ल्यब्ग्रहणम् ॥ ४६ ॥

वार्णादाङ्गं बलीयः ॥ ४७ ।

वर्णनिमित्तं वार्णम् ; अङ्गाधिकारे विहितमाङ्गम् ; तद् वार्णाद्बलीयः इत्यर्थः । तेन [3]कारकः इत्यत्रान्तरङ्गमपि यणं (६।१।७७) बाधित्वा ‘अचो ञ्णिति’ (७।२।११५) इति वृद्धिः । अस्याश्च ज्ञापकम्— ‘ अभ्यासस्यासवर्णे ’ (६।४।७८) [4]इत्यत्र असवर्णग्रहणम् । तद्धि ईषतुरित्यत्र अन्तरङ्गत्वात्सवर्णदीर्घसिद्धेरनर्थकं स्यात् । अनित्या चेयम्, ‘ छ्वोः० ’ (६।१।१९) इति सूत्रे सतुक्कग्रहणात् । आङ्गस्य बलीयस्त्वे हि वार्णमन्तरङ्गमपि तुकं बाधित्वा आङ्गत्वात् शादेशसिद्धौ किं सतुक्कग्रहणेन । तेन स्योन इत्यत्राङ्गमपि लघूपधगुणं बाधित्वा अन्तरङ्गो यण् सिध्यति ॥ ४७ ॥

अकृतव्यूहाः पाणिनीयाः ॥ ४८ ॥

न कृतो विरुद्ध ऊहो विनङ्क्ष्यतोपि निमित्तत्वेन आश्रयणं यैरित्यर्थः । तेन [5]सेदुषः इत्यादौ ‘भाषायां सद०’ (३।२।१०८) इति लिटः क्वसौ ‘लिटि धातोः०’ (६।१।८) इति द्वित्वे ‘अत एकहल्०’ (६।४।१२०) इत्येत्वाभ्यासलोपयोः सेद् वस् इति । ततः शसि ‘वसोः संप्रसारणम्’ (६।४।१३१) इति संप्रसारणेन विनङ्क्ष्यतो वकारस्य निमित्तत्वेनानाश्रयणाद्वलादिलक्षणेटोऽभावः । विनङ्क्ष्यतोऽनाश्रयणं च लोकसिद्धम । लोको हि नङ्क्ष्यन्तं [6]प्रभुमुपेक्ष्य भाविनं प्रभुमाश्रयति । तथा च माघः—

---

[1] क. अत्र ज्ञापकं. [2] क. यदा ह्युत्तर. [3] क. कारकमित्यत्र. [4] क. इति सूत्रे. [5] क. सेदुस् । [6] क. प्रभुमपेक्ष्य.

‘छायामपास्य महतीमपि वर्तमानामागामिनीं जगृहिरे जनतास्तरूणाम्।
सर्वोऽपि नोपगतमप्यपचीयमानं वर्धिष्णुमाश्रयमनागतमभ्युपैति’ (शिशु० ५।१४) इति।

यत्तु– ‘निमित्तनाशे नैमित्तिकस्यापि नाशो भवतीति वकारस्य संप्रसारणेन नाशे इटोऽपि नाश इत्यर्थः। लोकसिद्धश्चायं न्यायः– नैयायिकमते अपेक्षाबुद्धिनाशस्य द्वित्वनाशकत्वं दृष्टं वेदान्तिनये प्रारब्धनाशस्य विक्षेपशक्तिनाशकत्वं दृष्टमिति इहापि निमित्तनाशात्कार्यनाशो भवतीति ज्ञापनमेव युक्तम्, न तु भाविनि निमित्तनाशे पूर्वमनुत्पत्तौ कश्चिन्न्यायः; नापि संप्रतिपन्नो दृष्टान्तः’ (परिभाषेन्दुशेखर परि.५६) इति नव्योक्तम्, तत् विनङ्क्ष्यतोऽनाश्रये सकललोकसंप्रतिपन्नदृष्टान्तोपन्यासेन निरस्तम्। यद्यपि निमित्तकारणनाशस्य क्वचित्कार्यनाशहेतुत्वं तान्त्रिकसंप्रतिपन्नम्, तथापि न लोकसंप्रतिपन्नम्। लौकिकन्याय एवास्मिन् शास्त्रे उपजीव्यते, न तु तान्त्रिकन्यायः। तदुपजीवनसंभवेऽपि कार्यस्य भाविनं निमित्तविनाशं पर्यालोच्य तदप्रवृत्तिज्ञापनमेव लघु। ‘प्रक्षालनाद्धि०’ इति न्यायात्। अस्याः परिभाषाया ज्ञापकम्— ‘समर्थानां प्रथमाद्वा’ (४।१।८२) इति सूत्रे समर्थग्रहणम्। तद्धि ‘सौत्थितिः’ इत्यादौ कृतसंधेस्तद्धितोत्पत्तये। यदीयं परिभाषा न स्यात्, तदा अन्तरङ्गत्वात्सवर्णदीर्घे कृते पश्चात्तद्धितोत्पत्तिसिद्धेरनर्थकं स्यात्। अनित्या चेयम्, ‘अल्लोपोऽनः’ (६।४।१३४) इति तपरकरणात्। तद्धि ‘अन प्राणने’ इति धातोराङि उपपदे क्विचि सवर्णदीर्घत्वे ‘आनः’ इत्यत्रोपधालोपवारणाय। यदीयं परिभाषा स्यात्, तर्हि भाविना लोपेन विनङ्क्ष्यतोऽकारस्य सवर्णदीर्घं प्रति निमित्तत्वेनानाश्रयणात्सवर्णदीर्घाप्रवृत्तौ अनर्थकं स्यात्। अयमप्यन्तरङ्गपरिभाषाया अनित्यत्वस्य प्रपञ्चः॥ ४८॥

येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवादः॥ ४९॥

अत्र येन लक्षणसमुदायेन, येन एकेन लक्षणेनेति चार्थद्वयं विषयवशाद् व्यवस्थितम्। आद्येऽपि बाध्यसामान्यचिन्ता बाध्यविशेषचिन्ता चेति पक्षद्वयम्। तत्र बाध्यसामान्यचिन्तापक्षस्य ‘अचि र ऋतः’ (७।२।१०२) इति रोदेश उदाहरणम्। तेन हि स्वविषये प्राप्तस्य गुणादेः सर्वस्य बाधनात्॥ ४९॥

बाध्यविशेषचिन्तापक्षे—

---

१ ख. भाविनिमित्तनाशे. २ क. अथापि. ३ क. प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात्। ४ क. क्विचि. ५ क. तदेकदेश.

पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान् ॥ ५० ॥
मध्येऽपवादाः पूर्वानेव विधीन्बाधन्ते नोत्तरान् ॥ ५१ ॥

तत्र पुरस्तादपवादन्यायस्य 'एत्येधत्यूठ्सु' (६।१।८९) इति वृद्धिरुदाहरणम्। तथा हि– स्वात्मलाभाय पररूपे बाधनीये समनन्तरस्य 'एङि पररूपम्' (६।१।९४) इत्यस्य बाधनेन चारितार्थ्यात्तदनन्तरोपस्थितस्य 'ओमाङोश्च' (६।१।९५) इति पररूपस्यापि बाधने प्रमाणाभावात् विप्रतिषेधशास्त्रेण आङि परतः पररूपमेव भवति— अवेहीति। 'मध्येऽपवादाः' इत्यस्य ओष्ठादिषु ङीष्विधिरुदाहरणम्— तेन हि स्वात्मलाभाय कश्चन ङीष्प्रतिषेधो बाधनीयः। तत्र विप्रतिषेधसूत्रेणैव बाध्यतया निश्चितस्य 'असंयोगोपधात्' (४।१।५४) इति प्रषिषेधस्य बाधनेन चारितार्थ्याद्विप्रतिषेधसूत्रेण स्वबाधकत्वेन सिद्धस्य सहनञ्लक्षणप्रतिषेधस्य (४।१।५७) बाधे प्रमाणाभावात्। न्यायमूलकं चेदं वचनद्वयम्। येनैकेन लक्षणेनेति पक्षे तु तल्लक्षणं तेनावश्यं बाध्यत एव, अन्यथा तस्य स्वात्मलाभाभावात्। यथा 'आद्गुणः' (६।१।८७) इत्ययं 'वृद्धिरेचि' (६।१।८८) इत्यनेन बाध्यते ॥ ५० ॥ ५१ ॥

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ॥ ५२ ॥

तेन 'नेटि' (७।२।४) इति निषेधः अनन्तरस्य 'वदव्रज०' (७।२।३) इत्यस्यैव भवति; न तु 'सिचि वृद्धिः०' (७।२।१) इत्यस्य। व्यवहितत्वात्! 'सुडनपुंसकस्य' (१।१।४३) इत्यत्र अनपुंसकस्येति निषेधः सुट्त्वप्रयुक्तसंज्ञाया एव भवति, न तु शित्वप्रयुक्तसंज्ञाया इति 'सुडनपुंसकस्य' (१।१।४३) इत्यत्र भाष्यकैयटयोः स्पष्टम्। अत्र शित्वप्रयुक्तसंज्ञाया अपि निषेधे 'शि सर्वनामस्थानम्' (१।१।४२) इत्येतन्निर्विषयं स्यादिति कैयटः। अत्र 'सर्वनामस्थानम् (१।१।४२) इति संज्ञायाः शसः शिर्विषय इति अयं कैयटश्चिन्त्यः' इति नव्योक्तिः कैयटाशयानवबोधविजृम्भिता। तथा हि–– 'अनपुंसकस्य' (१।१।४३) इत्यनेन 'शि सर्वनामस्थानम्' (१।१।४२) इत्यस्यापि प्रतिषेधमिच्छता त्वया किं नपुंसकस्य यत् तत् सर्वनामस्थानं नेति वाक्यार्थः स्वीक्रियते उत नपुंसकस्य सुट् सर्वनामस्थानं नेति। द्वितीये लक्षणप्रतिपदोक्तन्यायेन सुट्पदवत्तया उपस्थितस्य 'सुडनपुंसकस्य' (१।१।४३) इत्यस्यैव निषेधः स्यात्, न तु 'शि सर्वनामस्थानम्' (१।१।४२) इत्यस्य। आद्ये नपुंसकस्य यत् तत् सर्वनामस्थानं नेति स्वीकारे शसः शिरपि

---

१ क. तदुत्तरोपस्थितस्य. २ क. विप्रतिषेधशास्त्रेणैव. ३ क. शि सर्वनामस्थानमिति.

नपुंसकसंबन्ध्येवेति तस्यापि प्रतिषेधविषयत्वात् 'शि०' (१।१।४२) इत्येतन्निर्विषयं स्यादिति सूक्तं कैयटेन ॥ ५२ ॥

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गः ॥ ५३ ॥

प्रकल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते ॥ ५४ ॥

इति न्यायद्वयं वैकल्पिकम् । तेन ददतीत्यत्र द्वित्वे कृते 'अदभ्यस्तात्' (७।१।४) इत्यदादेशविषये 'झोऽन्तः' (७।१।३) इति अन्तादेशः प्रागेव न प्रवर्तते। इदं च न्यायद्वयं जातिव्यक्तिपक्षयोः फलभूतमित्यभिप्रेत्य 'अत्र दर्शनद्वयम्— सर्वविषयस्वीकारेण उत्सर्गस्य प्रवृत्तिः, कतिपयविषयावगाहनेन वा' इति 'प्रातिपदिकार्थ०' (२।३।४६) इति सूत्रे कैयटः। व्यक्तिविषयत्वे सर्वव्यक्तिक्रोडीकारेण शास्त्रप्रवृत्तेः 'सकृद्गतौ०' इति न्यायव्याख्यानावसरेऽस्माभिरुपपादितत्वात्, जातिपक्षे च जातिमात्रे शास्त्रे प्रवृत्ते तदनुपपत्त्या व्यक्तीनामाक्षेप इति कतिपयव्यक्तिस्वीकारेऽपि शास्त्रप्रवृत्तिसंभवात्। लक्षणैकचक्षुष्कस्य आद्यो न्यायः, लक्ष्यैकचक्षुष्कस्य तु द्वितीयः (परि. शे. परि. ६२) इति नव्योक्तिस्त्वयुक्ता। ईदृग्व्यवस्थायां मानाभावात्। लक्षणैकचक्षुष्कस्यापि अपवादवाक्यार्थबोधपूर्वकमपवादप्रवर्तनात्प्रागपि उत्सर्गवाक्यार्थबोधेन लक्ष्यसंस्कारे बाधकाभावात्, निर्ज्ञातलक्ष्यैस्यापि[2] प्रथममपवादवाक्यार्थबोधः पश्चादुत्सर्गवाक्यार्थबोध इति कल्पने बाधकाभावाच्च। यदि तु व्यक्तिपक्षे उत्सर्गशास्त्रमपवादशास्त्रात्प्राक्प्रवर्तेत, तर्ह्येवापवादविषयेऽपि तस्य प्रवृत्त्या विकल्पापत्तिरिति स्वोक्तदूषणं युज्यते, जातिपक्षे तु कतिपयलक्ष्यस्वीकारेण प्रवृत्तस्योत्सर्गस्य पश्चात्प्रवृत्तावपवादशास्त्रेण बाधसंभवात्। तस्माज्जातिव्यक्तिपक्षयोः फलभूतमिदं न्यायद्वयमिति युक्तम्। "अभ्यस्तसंज्ञासूत्रे 'प्रकल्प्य वा०' इति प्रतीकमुपादाय यथा 'न संप्रसारणे०' (६।१।३७) इति परस्य यणः पूर्वं संप्रसारणं पूर्वस्य तन्निमित्तः प्रतिषेधः' इति कैयटोक्तं स्वक्षराननुगुणम्" (परि. शे. परि. ६४) इति नव्योक्तमयुक्तम्, अपवादप्रवृत्तेः प्रागुत्सर्गप्रवृत्तिरिति कैयटोक्तार्थे अपवादवाक्यावबोधात्प्रागप्युत्सर्गवाक्यार्थबोधः इति स्वोक्तार्थापेक्षया अननुगुणत्वस्य[3] कस्यचिदनुपपादनात् प्राक्पदाध्याहारस्य द्वयोरपि तुल्यत्वात्। प्रत्युत अभिनिविशत इत्यस्य प्रवृत्तौ स्वारस्येन कैयटोक्तमेवाक्षरानुगुणमिति विपश्चितो विदांकुर्वन्तु ॥ ५३ ॥ ५४ ॥

---

१ क. इत्यादेशविषये. २ क. निर्ज्ञानलक्ष्यस्यापि. ३ क. अनानुगुण्यस्य.

अपवादोऽपि यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते ॥ ५५ ॥

अयजे इन्द्रं वृक्षे इह इत्यत्र अयज इ इन्द्रं, वृक्ष इ इह इति स्थिते दैत्यारिरित्यत्र आद्गुणस्य (६।१।८७) अपवादोऽपि सवर्णदीर्घः (६।१।१०१) एकपदाश्रयेणान्तरङ्गेणाद्गुणेन बाध्यते । यदि सवर्णदीर्घः स्यात्, पुनराद्गुणे अयजेन्द्रमिति स्यात् । तदुक्तम्— 'इण्ङिशीनामाद्गुणः सवर्णदीर्घत्वात्' (१।४।२ वा. १०) इति उभयोः समानबलस्थले प्राप्तगुणबाधनेन सवर्णदीर्घस्य चरितार्थत्वेन अधिकबलान्तरङ्गबाधने प्रमाणाभावोऽत्र मूलम् । "आगमादेशयोर्न बाध्यबाधकभावः, भिन्नफलत्वात् । अत एव 'ब्राह्मणेभ्यो दधि दीयतां कम्बलः कौण्डिन्याय' इत्यादौ कम्बलेन[2] दध्नो न बाध इति कैयटोक्तम् 'अपवादो नुक् दीर्घत्वस्य' इति 'दीर्घोऽकितः' (७।४।८३) इति सूत्रस्थभाष्यविरोधादयुक्तम्" (परिशे. परि. ६५) इति नव्योक्तं त्वयुक्तम् । नुकि कृते दीर्घस्य संभवाभावात् । अजन्तस्य ह्यभ्यासस्य दीर्घो विधीयते । असंभवस्थले[3] आगम आदेशस्य बाधको भवत्येवेति भाष्याभिप्रायः । संभवस्थलेऽपि बाधे तक्रकौण्डिन्यन्याय उदाहरणम् । तत्र च भिन्नार्थस्य न बाधकत्वमित्यभिप्रायेण 'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय' इति कम्बलेन न दधिबाध इति कैयटेनोक्तम् । अस्ति च स्यूरित्यादौ[4] ऊठि कृते वकारस्य लोपसंभवः । एवं चासंभवस्थले आगमस्याप्यादेशबाधकत्वमिति 'दीर्घोऽकितः' (७।४।८३) इति सूत्रस्थभाष्याशयः । अत एव तत्र भाष्ये 'अकित इति शक्यमकर्तुम् । कस्मान्न भवति——यंयम्यते रंरम्यत इति । अनजन्तत्वात्' इति असंभव उक्तः । एवं च संभवस्थले कैयटोक्तोऽबाधः[5], असंभवस्थले भाष्योक्तो बाध इति न कश्चिद्विरोधः ॥ ५५ ॥

अभ्यासविकारेषु बाधका न बाधन्ते ॥ ५६ ॥

'दीर्घोऽकितः' (७।४।८३) इति सूत्रे अकिद्ग्रहणमस्याः परिभाषाया ज्ञापकम् । तद्धि यंयम्यत इति दीर्घनिवृत्तये क्रियते । नाप्राप्ते दीर्घे आरभ्यमाणेन नुका अपवादत्वाद्दीर्घबाधे सिद्धे अनर्थकं सदस्यां ज्ञापकम् । प्रयोजनम्——अचीकरदित्यत्र दीर्घेण परत्वात्सन्वद्भावस्य न बाधः, किं तु प्रथमं सन्वद्भावे कृते पश्चाद्दीर्घः । एवं मीमांसत इत्यत्र इत्वस्य बहिरङ्गस्य अन्तरङ्गेणापि दीर्घेण न बाधः । "अत एकहल्०" (६।४।१२९) इति सूत्रे पापच्यत इत्यत्र दीर्घेण एत्वाभ्यासलोपबाधस्य

---

[1] ख. आद्गुण इत्यस्यापवादोपि. [2] क. कम्बलेन न दध्नो बाध. [3] क. असंभवस्थलेपि कौण्डिन्याय. [4] क. स्युरित्यादौ. [5] क. कैयटोक्त अबाधः [6] क. इत्यादौ.

भाष्योक्तस्य समर्थनाय तत्र कैयटेन 'अभ्यासविकारेषु बाधका न बाधन्ते' इत्येतत्तु यत्र सर्वेषां प्रवृत्तिस्तत्राश्रीयते" इत्युक्तं तत् बाध्यप्रवृत्त्युत्तरं बाधकस्यापि प्रवृत्तिसंभवमभिप्रेत्य। यत्तु नव्योक्तम् "अयं कैयटग्रन्थो न युक्तः, धर्मिग्राहकमानविरोधात्। मान्‌वधादीनां दीर्घे कृते ह्रस्वस्याप्राप्त्या 'गुणो यङ्लुकोः' (७।४।८२) इति सूत्रे भाष्ये तदुदाहरणासंगतेश्च" इति, तत्कैयटाशयानवबोधविजृम्भितम्। अस्ति हि अचीकरत् मीमांसत इति भाष्योक्तोदाहरणद्वयेऽपि बाध्येत्त्वप्रवृत्तेरनन्तरं बाधकदीर्घप्रवृत्तिः। पापच्यत इत्यत्र तु बाध्ययोरेत्त्वाभ्यासलोपयोः प्रवृत्तौ बाधकदीर्घप्रवृत्त्यसंभवात् बाध्यप्रवृत्त्युत्तरं बाधकप्रवृत्तिसंभवस्थले इयं परिभाषा प्रवर्तत इति कैयटाशयात्। अत एव न धर्मिग्राहकमानविरोधोऽपि। अकित इत्यनुक्तौ बाध्यदीर्घप्रवृत्तावपि बाधकस्य नुको भूतपूर्वगत्यास्त्वमाश्रित्य पश्चात्प्रवृत्तिसंभवात् तत्र दीर्घाप्रवृत्तये क्रियमाणस्य अकिद्ग्रहणस्य उक्तपरिभाषाज्ञापकत्वसंभवाच्च। नव्यस्य तु 'अत एक॰' (६।४।१२९) इति सूत्रस्थभाष्यविरोधः। ५६॥

ताच्छीलिका अपवादा अताच्छीलिकानुत्सर्गांस्ताच्छीलिकांश्च नित्यं बाधन्ते॥ ५७॥

तत्र प्रथमस्योदाहरणम्--तच्छीलार्थे अलंकृञ इष्णुजेव भवति (३।२।१३६) अलंकरिष्णुः, न तु ण्वुल्तृचौ (३।१।१३३)। ज्ञापकं च— निन्दहिंसादिसूत्रे (३।२।१४६) निन्दहिंसादिग्रहणम्। तेन हि सूत्रेण ताच्छीलिके वुञ्प्रत्ययो विधीयते निन्दकः इत्यादिसिद्धये। यदि वासरूपविधिः (३।१।९४) स्यात् ण्वुला निन्दक इत्यादि सिद्धम्। [3]न हि स्वरे विशेषः। ञिल्लित्स्वरयोरिह विशेषाभावात्। ज्ञापिते तु वासरूपविध्यभावे 'तृन्' (३।२।१३५) इति तृना बाधो मा भूदिति निन्दादिग्रहणमर्थवत्। द्वितीयस्योदाहरणम्--अस्मिन्नेव वुञ्विषये तृन्न भवति। तथा 'स्थेशभास॰' (३।२।१७५) इति वरज्विषये 'अनुदात्तेतश्च हलादेः (३।२।१४९) इति युच् न भवति। ज्ञापकं चात्र-- 'लषपत॰' (३।२।१५४) इत्युकञ्विषये 'जुचंक्रम्य॰' (३।२।१५०) इति पदधातोर्युज्विधानम्। यदि वासरूपविधिः स्यात्, तदा 'अनुदात्तेतश्च॰' (३।२।१४९) इति युचि सिद्धे [4]तदनर्थकं स्यात्। प्रायिकं चैतत्। 'सूददीप॰' (३।२।१५३) इति दीपेर्युज्निषेधाल्लिङ्गात्। यदि सार्वत्रिकं स्यात्, तर्हि

१ क. तत्राकित. २ क. संभवाच्च न एकहलिति. ३ क. न च स्वरे विशेषः। ञित्स्वरयोरिह. ४ सिद्धेनर्थकं.

'नमिकम्पि०' (३।२।१६७) इति रेण युचो बाधे सिद्धे किं तन्निषेधेन । तेन कम्रा कमना युवतिरिति रविषये युजपि सिध्यति ॥ ५७ ॥

क्त्ल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ॥ ५८ ॥

तेन 'नपुंसके भावे क्तः' (३।३।५९) इति क्तविषये 'भावे' (३।३।१८) इति घञ्न भवति; तथा हसनमिति ल्युड्विषयेऽपि । तथा इच्छति भोक्तुमिति 'समानकर्तृकेषु०' (३।३।१५८) इति तुमुन्विषये इच्छामि भुञ्जीत भवानित्यसमानकर्तृकस्थले चरितार्थौ 'इच्छार्थेषु लिङ्लोटौ' (३।३।१५७) इति लिङ्लोटौ न भवतः । तथा ईषत्पानः सोमो भवतेति 'आतो युच्' इति युज्विषये अनाकारान्तेषु चरितार्थः 'ईषद्दुःसुषु०' (३।३।१२६) इति खल् न भवति । वासरूपविधेरनित्यत्वादेतत्सिद्धम् । अनित्यत्वज्ञापकं तु 'प्रैषातिसर्ग०' (३।३।१।६३) इति कृत्यग्रहणम् । वासरूपविधेर्नित्यत्वे तेनैव लोटा समावेशस्य सिद्धतया तदानर्थक्यं स्पष्टमेव ॥ ५८ ॥

लादेशेषु वासरूपविधिर्नास्ति ॥ ५९ ॥

आदेशकृतवैरूप्यवत्सु लकारेषु स नास्तीत्यर्थः । अत्र च 'हशश्वतोर्लङ् च' (३।२।११६) इति लङ्विधानं ज्ञापकम् । अन्यथा परोक्षे लिटा लङः समावेशात्किं लङ्विधानेन । तेन व्योऽपचदिति लङ्विषये लुङ् न भवतीत्याहुः । इदं तु आदेशकृतवैरूप्यस्य स्थानिन्याश्रयणे मानाभावादयुक्तम् । 'हशश्वतोर्लङ् च' (३।२।११६) इति लङ्विधानमप्यत एवार्थवत् । अत एव वासरूपसूत्रे भाष्ये इत्थं ज्ञापकमुपवर्ण्य, अनन्तरमन्यकृतासारूप्येणान्यस्य तथात्वेऽतिप्रसङ्ग इत्यभिप्रेत्य 'अथ वा प्रयोगे असरूपाणां वा विधौ न सर्वमिष्टं संगृहीतमिति कृत्वा द्वितीयः प्रयोग उपास्यते । कोऽसावुपदेशो नाम' (३।१।९४ वा. भाष्य) इत्युक्तम् ॥ ५९ ॥

उभयनिर्देशे पञ्चमीनिर्देशो विप्रतिषेधेन ॥ ६० ॥

तेन 'ङः सि धुट्' (८।३।२९) इत्यत्र सस्य धुट् सिध्यति । यत्र तु पञ्चमीसप्तमीनिर्देशयोर्मध्ये अन्यतरोऽन्यत्र चरितार्थः, तत्राचरितार्थविभक्तिवशाद्व्यवस्था । यत्र तूभावप्यन्यत्र चरितार्थौ तत्राप्यनया व्यवस्था । यथा 'ङमो ह्रस्वात्०' (८।३।३२) इत्यत्र 'मय उञः०' (८।३।३३) इति सूत्रे चरितार्थोऽचीति सप्तमीनिर्देशो ङमः इति पञ्चमीनिर्देशेन बाध्यते । यथा 'आमि सर्वनाम्नः सुट्' (७।१।५०) इत्यत्र

१ क. किं निषेधेन. २ क. क्तप्रत्ययविषये. ३ क. वैरूप्यस्थानिन्याश्रयणे. ४ क. यथा च आमि.

'आज्जसेः०' (७।१।५०) इति पञ्चमीनिर्देशस्य पूर्वत्र चारितार्थ्येऽपि आमीति सप्तमीनिर्देशस्य 'त्रेस्त्रयः' (७।१।५३) इति परत्र चारितार्थ्येऽपि[1] पञ्चमीनिर्देशद्व्यवस्था। विप्रतिषेधसूत्रफलमेतद् 'तस्मिन्निति०' (१।१।६६) इति सूत्रे वार्तिककारेण पठितम् ॥ ६० ॥

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ ६१ ॥

लिङ्गग्रहणेनात्र स्त्रीत्वबोधकाष्टाबादयो गृह्यन्ते। प्रातिपदिकं गृहीत्वा यत्कार्यमुच्यते तत् टाबादिविशिष्टस्यापि भवति। तेन 'कुसूलकूप०' (६।२।१०२) इति स्वरः कुसूलबिलमित्यत्रैव[2] कुसूलीबिलमित्यत्रापि भवति। ज्ञापकं चात्र 'कुमारः श्रमणादिभिः' (२।१।७०) इति समासार्थं पठ्यमाने श्रमणादिगणे श्रमणा प्रव्रजिता गर्भिणीत्यादिस्त्रीलिङ्गपाठः। न ह्यन्तरेण लिङ्गविशिष्टग्रहणं स्त्रीलिङ्गैः श्रमणादिशब्दैः कुमारशब्दस्य सामानाधिकरण्यं संभवति। लिङ्गविशिष्टग्रहणे तु सति कुमारीशब्दस्य सामानाधिकरण्यं संभवतीति श्रमणादिपाठो युज्यते। इयं च परिभाषा स्वरूपग्रहणे प्रातिपदिकविशेषग्रहणे प्रातिपदिकसामान्यग्रहणे च प्रवर्तते। आद्यस्योदाहरणमुक्तम्। द्वितीयस्य— 'सर्वनाम्नस्तृतीया च' (२।३।७२) भवत्या हेतुना भवत्या हेतोरित्याद्युदाहरणम्। तृतीयस्य— 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' (३।१।११ वा.) गौरीवाचरति गौरयतीत्याद्युदाहरणम्। अनित्या चेयम्। तेन मद्राणां राज्ञी मद्रराज्ञीत्यादौ 'राजाहःसखिभ्यष्टच्' (५।४।९१) इत्यादिना टजादयो न। अनित्यत्वज्ञापकं तु— 'शक्तिलाङ्गल०' (३।२।९ वा. १) इत्यज्विधायके वार्त्तिके घटग्रहणात्पृथक् घटीग्रहणम्। 'विभक्तौ लिङ्गविशिष्टाग्रहणम्' (परि. शे. परि. ७२) इत्यादिकं तु अनित्यत्वप्रपञ्चः ॥ ६१ ॥

सूत्रे लिङ्गवचनमतन्त्रम् ॥ ६२ ॥

तेन 'तस्यापत्यम्' (४।१।९२) इति उपग्वोरपत्यम् औपगव इति द्विवचनान्तेऽपि भवति। लिङ्गस्याविवक्षितत्वात्पुंलिङ्गेऽपि भवति। इदं च न्यायसिद्धम्, केनचिद्वचनेन लिङ्गेन च विना निर्देशस्य कर्तुमशक्यतया तदुपादानस्य नान्तरीयकतया अविवक्षोपपत्तेः। अत एव 'स्वरितात्संहितायाम्०' (१।२।३९) इति सूत्रे भाष्ये 'नात्र बहुवचनेन निर्देशस्तन्त्रम्। कथं पुनस्तेनैव नाम निर्देशः क्रियते; तच्चातन्त्रं स्याद्। तत्कारी च भवान् तद्द्वेषी च। नान्तरीयकत्वादत्र बहुवचनेन निर्देशः क्रियते।

१ क. चरितार्थेपि. २ क. कुसूलमित्यत्रैव.

अवश्यं कयाचिद्विभक्त्या केनचिद्वचनेन निर्देशः कर्तव्य इति। तद्यथा— 'कश्चिदन्नार्थी शालिकलापं सपलालं सतुषमाहरति, नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सकण्टकान्सशकलानाहरति, नान्तरीयकत्वात्। स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजति' (१।२।३९ महाभाष्य; ३।३।१८ महाभाष्य; ३।४।२१ महाभाष्य; ४।१।९२ महाभाष्य) इत्युक्तम्। ज्ञापकं चात्र— 'अर्धं नपुंसकम्' (२।२।२) इति सूत्रे नपुंसकग्रहणम्। यदि सूत्रे लिङ्गवचनं विवक्षितं स्यात्, अर्धमिति निर्देशादेव सिद्धे नपुंसकग्रहणमनर्थकं स्यात्॥ ६२ ॥

नञिवयुक्तमन्यत्सदृशाधिकरणे तथा ह्यर्थगतिः ॥ ६३ ॥

अन्यदित्यतस्मिन्निर्थेऽव्ययम्। नञ्युक्तमिवयुक्तं च अन्यस्मिन्सदृशे अधिकरणे अर्थे वर्तते। तथा हि अर्थबोधो भवतीत्यर्थः। यथा अब्राह्मणमानयेत्युक्ते न ब्राह्मणभिन्नं लोष्टमानीय कृती भवती। प्रयोजनं च—'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' (३।१।१२) इति पर्युदासेन विधीयमानः क्यङ् च्व्यन्तसदृशेभ्यः अभूततद्भावार्थेभ्य एव भवति, 'क्व दिवा भृशा भवन्ति' इत्यत्र न भवति। तथा 'समासेऽनञ्०' (७।१।३७) इति विधीयमानो ल्यप् अव्ययपूर्वपद एव भवति। न्यायश्चायं लौकिकः, नञ्सूत्रे आरोपितत्वं नञ्द्योत्यमाश्रित्य आरोपितब्राह्मणस्य क्षत्रियादेरब्राह्मणपदेनाभिधानमिति भाष्यकैयटयोरुक्तत्वात्। न च क्षत्रियादिः कथं ब्राह्मणपदेन प्रतिपाद्यत इति वाच्यम्। आरोपस्थले अद्वैतिनये शुक्त्यपेक्षया भेदेनानिर्वचनीयस्य रजतस्योत्पत्त्या तदानीं शुक्तौ रजतशब्दप्रयोगवत् क्षत्रियादावपि ब्राह्मणारोपे तत्पदयोगसंभवात् ईदृशारोपस्य च सादृश्यव्याप्यतया सादृश्यस्यार्थाल्लाभात्॥ ६३ ॥

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः ॥ ६४ ॥

तेन व्याघ्री अश्वक्रीति कच्छपीति सिध्यति। व्याङ्पूर्वात् 'घ्रा गन्धोपादाने' इत्यस्माद्धातोः 'आतश्चोपसर्गे' (३।१।३६) इति कप्रत्यये 'आतो लोपः०' (६।४।६४) इति आकारलोपे घ्र इत्यस्य व्याङ्भ्याम् 'कुगतिप्रादयः' इति समास एषितव्यः। यदि उत्पन्ने सुपि समासः स्यात्, घ्रशब्दस्य जातिवाचित्वाभावात् स्त्रीत्वे टापि पश्चात् व्याङ्भ्यां समासे अदन्तत्वाभावात ङीप् न स्यात्। यदि तु कृदन्तेन समासः,

---

१ क. कथंचिदन्नार्थी. २ क. इति अच्वेरिति पर्युदासेन. ३ क. नञा योत्य. ४ क. तादृश्यार्थाल्लाभात्।

तर्हि टाबुत्पत्तेः पूर्वमेव समाससंभवेन जातिवाचित्वाच्च ङीष् सिध्यति । एवं अश्वक्रीतीत्यत्र अदन्तत्वात् 'क्रीतात्करणपूर्वात्' (४।१।५०) इति ङीष् सिध्यति । कच्छपीत्यत्रापि कृदन्तेन समासे जातिलक्षणङीष् सिध्यति । तत्र च प्रमाणम्-- 'उपपदमतिङ्' (२।२।१९) इति सूत्रे अतिङ्ग्रहणम् । तद्धि मा भूदित्यत्र माङस्तिङन्तेन समासाभावाय । न च तत्र समासः संभवति । सुपेत्यधिकारेण सुबन्तेन समासविधानात् । ततश्च तत् व्यर्थं सत् सुपेत्यस्योसंबन्धं ज्ञापयति । पूर्वसूत्रेपि (२।२।१८) कुप्रादय इति योगं विभज्य गत्यंशे अतिङित्यस्यापकर्षेण व्याख्यानात् गत्युपपदयोः कृद्भिः सह समाससिद्धिः । कारकांशे तु 'कर्तृकरणे०' (२।३।३२) इति सूत्रे कृद्ग्रहणम् । तद्धि न तिङन्तेन समासवारणाय । तथा हि-- कर्ता करणमिति कारकं क्रियानिरूपितम् । क्रियावाची च धातुः । ततश्च द्वये प्रत्ययाः— तिङश्च कृतश्च । तत्र तिङन्तेन समासः सुपेत्यस्यानुवृत्त्यैव वारित इति कृदन्तेनैव सिद्धे अतिरिच्यमानं कृद्ग्रहणं कृदवस्थायामेव सुबुत्पत्तेः प्राक्समासविधानाय । इत्थमेव 'उपपदमतिङ्' (२।२।१९) इति सूत्रे कैयटः । 'कर्तृकरणे कृता बहुलम्' (२।३।३२) इति समास एव कारकग्रहणस्योदाहरणमिति ध्वनितम् ॥

यत्तु नव्योक्तम्— "कारकांशे प्राचीनव्याकरणस्य एकदेशानुमतिद्वारा आश्रयणम्" (परि. शे. परि. ७५) इति, तत् कृद्ग्रहणस्य ज्ञापकत्वोपन्यासेन निरस्तम् । यदपि "कारकांशे कारकविभक्तिमात्रस्य कृदन्तेन समासः । अत एव 'उपपदमतिङ्' (२।२।१९) इति सूत्रे 'षष्ठीसमासादुपपदसमासो विप्रतिषेधेन । न वा षष्ठीसमासाभावादुपपदसमासः । उपपदसमासो हि कृदन्तेन भवति । षष्ठीसमासस्तूत्पन्ने सुपि भवन्बहिरङ्गः' इति वार्तिकोक्तस्य षष्ठीसमासविषये उपपदसमासनियमस्य प्रयोजनाभावेन भाष्ये प्रत्याख्यानं कृतम्" (परि. शे. परि. ७५) इति, तदप्ययुक्तम् । उपपदसमासनियमस्य वार्तिकोक्तप्रयोजनप्रत्याख्यानपरत्वात् । भाष्यस्य षष्ठीसमासस्यापि कृदन्तेन सह प्रवृत्तिरित्यत्राप्रमाणत्वात् । अत एव तत्र कैयटेन प्रयोजनाभावाद्विप्रतिषेधो न पठितव्यः इति उक्तभाष्यस्य तात्पर्यं वर्णितम्, न तु षष्ठीसमासोऽपि सुबुत्पत्तेः प्राक् भवतीति । अत एव "न लुमताङ्गस्य" (१।१।६३) इति सूत्रे "उत्तरपदत्वे च पदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं भवतीति वक्ष्यामि । तन्नियमार्थं भविष्यति—पदादिवि-

१ क. टाबुत्पत्तेः प्राक्समास. २ क. 'एवं...सिध्यति' । इति न पठ्यते. ३ क. समासवारणाय. ४ क. प्राप्तिः संभवति. ५ ख. सुप्सुपेत्यस्या० ६ क. षष्ठीसमासो विप्रतिषेधेन. ७ क. समासस्याभावादुपपद.

धावेव, न पदान्तविधाविति। तेन दधिसेचौ दधिसेच इति 'सात्पदाद्योः' (८।३।११) इति षत्वनिषेधो भवति" (१।१।६३ वा. ६ महाभाष्य) इति भाष्ये सिद्धान्तितम्। तत्र च कैयटेन "दध्नः सेचाविति षष्ठीसमासः। उपपदसमासे तु प्राक्सुबुत्पत्तेः समासविधानात् सेच्शब्दस्य पदसंज्ञाया अभावात् पदादित्वं सकारस्य न स्यात्। अनभिधानाच्च सोपपदाद्विजभावः" इत्युक्तम्। यदि षष्ठीसमासोऽपि सुबुत्पत्तेः प्रागेव स्यात्, तर्हि 'सात्पदाद्योः' (८।३।१११) इति षत्वनिषेधो नैव स्यादित्युक्तभाष्यविरोधः। एवं हरिसेवनं गुरुसदनमित्यादावपि षत्वप्रसङ्गः, यदि कृदन्तेन षष्ठ्याः समासः स्यात्। न च षष्ठीसमासस्य प्राक् कृदन्ते प्रवृत्तौ भाष्यसंमतं प्रयोजनमस्ति, येनैवं कल्प्येतेत्यास्तां तावत्। कारकांशे 'कर्तृकरणे०' (२।३।३२) इति सूत्रे कृद्ग्रहणेन ज्ञाप्यमानेयं बहुलग्रहणात्क्वचिन्न भवति। तेन 'सा हि तस्य धनक्रीता' इति सिध्यति। एतदर्थमजादावयं पाठ्य इति व्यर्थम् ॥ ६४ ॥

सांप्रतिकाभावे भूतपूर्वगतिः ॥ ६५ ॥

तेन 'उगिदचाम्०' (७।१।८०) इति अधातुग्रहणस्य सांप्रतिकधातुव्यावृत्त्या प्रयोजनालाभे, गोमन्तमात्मन इच्छति गोमत्यति, तस्मात्क्विपि अल्लोपयलोपयोर्गोमानित्यत्र भूतपूर्वाधातोर्नुम्प्रापणं प्रयोजनम्। इदं तत्तद्वचनसिद्धं भवति ॥ ६५ ॥

बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ६६ ॥

तस्य गुणस्य वर्तिपदार्थस्य सम्यक् विज्ञानं कार्यसंबन्ध इत्यर्थः। अपिना कार्यानन्वयोऽपि बोध्यते। यत्र संयोगसमवायान्यतरसंबन्धेन वर्तिपदार्थोऽन्यपदार्थविशेषणम्, तत्र तद्गुणसंविज्ञानम्। अन्यत्र अतद्गुणसंविज्ञानम्। तेन 'सर्वादीनि सर्वनामानि' (१।१।२७) इति सर्वशब्दस्यापि सर्वनामसंज्ञा सिध्यति। 'जक्षित्यादयः षट्' (६।१।६) इत्यत्र जक्षितिपदेनैव जक्षेरभ्यस्तसंज्ञायाः सिद्धत्वात् 'कण्वादिभ्यो गोत्रे' (४।२।११) इत्यत्रेवादिपदस्य पूर्ववाचित्वेन परिच्छेद्यपरिच्छेदकभावसंबन्धेनान्यपदार्थविशेषणत्वात् न तद्गुणसंविज्ञानम्। 'कण्वादिभ्यो गोत्रे' (४।२।१११) इत्यत्र हि शाकल्यस्येदं शाकलमिति रूपसिद्धये कण्वस्य आदिः कण्वादिरिति षष्ठीसमास आश्रितः। न च कण्वशब्दस्य शकलशब्दोऽवयवो भवतीति सामर्थ्यादादिशब्दोऽत्र पूर्ववाची। तथा च वार्तिकम्— 'कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते'

---

१ क. तत्र कैयटेन. २ क. षष्ठीसमासस्य सुबुत्पत्तेः प्राक्. ३ क. उदन्तात्तद्वचन. ४ ख. जक्ष इति. ५ क. अन्यपदार्थे विशेषण.

(४।१।१८ श्लोकवार्त्तिक) इति । एतेनोभयत्र प्राय·पदप्रक्षेपो (परि. शे. परि. ७७) नव्यकृतो निरस्तः । संयोगसंबन्धस्थले "चित्रवाससमानय । लोहितोष्णीषा ऋत्विजः प्रचरन्ति" (१।१।२७ महाभाष्य) इति भाष्ये दर्शनात्तदनुक्तेर्नव्यस्य न्यूनता ।६६॥

चानुकृष्टं नोत्तरत्र ॥ ६७ ॥

तेन 'भुवो भावे' (३।१।१०७) इति सूत्रे 'वदः सुपि क्यप् च' (३।१।१०६) इति क्यबनुवर्तने, चानुकृष्टो यत्तु नानुवर्तते । तेन ब्रह्मभूयमिति सिध्यति, यति गुणप्रसङ्गात् । ज्ञापकमस्याः णमुल्यनुवर्तमाने 'अव्ययेऽयथाभिप्रेताख्याने०' (३।४।५९) इत्युत्तरत्र संबन्धार्थं क्रियमाणं णमुल्ग्रहणम् । चानुकृष्टस्योत्तरत्र संबन्धस्वीकारे 'क्त्वा च' (२।२।२२) इत्येव सिद्धेस्तदा[1]नर्थक्यं स्यात् । इदमनित्यम्, 'तृतीया च होश्छन्दसि' (२।३।३) इति सूत्रे चानुकृष्टाया द्वितीयायाः 'अन्तरान्तरेण०' (२।३।४) इत्यादावुत्तरत्र संबन्धदर्शनात् अनुवृत्त्यननुवृत्त्योर्व्याख्यानैकगम्यत्वात् ॥६७॥

हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ॥ ६८ ॥

इयं परिभाषा 'समासस्य' (६।१।२२३) इति सूत्रे वार्त्तिककृता पठिता । फलं तु 'समासस्य' (६।१।२२३) इत्यन्तोदात्तस्य राजपुरुष इत्यजन्तसमास इव राजदृषदिति हलन्तसमासेऽपि प्रवृत्तिः । अन्यथा '[2]योऽयं समासस्यान्तः स नोदात्तधर्मयोग्यः । यश्च योग्यः स[3] न समासान्त इति हलन्तेषु समासस्वरो न स्यात् । न च दकारस्य 'अष्टन आ विभक्तौ' (७।२।८४) इत्याकारवदुदात्तैः[4] स्थानसाम्यात् लकार आदेशो भवत्विति वाच्यम्, तथापीष्टासिद्धेः । अकारो ह्युदात्त इष्यते । नन्वेवं दधीस्यत्र 'उदात्तादनुदात्तस्य स्वरितः' (८।४।५६) इति स्वरितत्वं न स्यात्, धकारेण व्यवधानात् । तथा अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत् व्यञ्जनादेर्व्यञ्जनान्ताच्च न स्यादिति चेत्, न । 'उदात्तादनुदात्तस्य०' (८।४।५६) इति सूत्रे अनुदात्तशब्दस्य न विद्यते उदात्तो यस्मिन्संघाते तदनुदात्तमिति यौगिकस्यानुदात्तस्य ग्रहणात् तत्र च 'आदेः परस्य' इति धकारस्य स्वरप्राप्तिसत्त्वेन आद्यदोषाभावात् 'नोत्तरपदेऽनुदात्तादौ' (६।२।१४२) इति 'देवताद्वन्द्वे च' (६।२।१४१) इत्युभयपदप्रकृतिस्वरं प्रतिषिध्य 'अपृथिवीरुद्रपूषमन्थिषु' (६।२।१४२) इति पृथिव्यादिपर्युदासात् व्यञ्जनादावप्यनुदात्तादिनिमित्तककार्यप्रवृत्तिज्ञापनेन द्वितीयदोषाभावाच्च । न चोक्तदोषपरिहाराय 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (१।१।५१ वा. ८ महाभाष्य) इति पठ्यताम् ।

---

१ क. तदानर्थक्यात्. २ क. योत्र. ३ क. नासौ समासान्त. ४ क. उदात्तस्थान.

स्वरसंबन्धी सर्वोऽपि विधिः [1]स्वरविधिर्ग्रहीष्यते तेन सर्वेष्टसिद्धिरिति वाच्यम् । उदश्वित्वान्घोषः विद्युत्वान् बलाहक इत्यादौ 'ह्रस्वनुड्भ्यां मतुप्' (६।१।१७६) इति मतुबुदात्तत्वप्रसङ्गात् । 'हल्स्वरप्राप्तौ' इति पाठे तु तत्र तकारस्य स्वरप्राप्त्यभावेन विद्यमानत्वेन व्यवधानान्मतुबुदात्तत्वाप्रवृत्तेः । 'समासस्य' (६।१।२२३) इति सूत्रे इत्थमेव भाष्यकैयटयोः स्थितम् ॥

वृत्तिकारस्तु 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति पठित्वा 'ह्रस्वनुड्भ्यां मतुप्' (६।१।१७६) इत्यत्र इयं परिभाषा न प्रवर्तत इत्याह। अत्र च ज्ञापकम्– 'यतोऽनावः' (६।१।२१३) इत्याद्युदात्तविधौ नौप्रतिषेधः । स हि नाव्यमित्यत्राद्युदात्ताभावाय क्रियते । यदि नकारस्य विद्यमानत्वं स्यात्, तर्हि नौप्रतिषेधोऽनर्थकः स्यात् । एवं भाष्यवृत्तिकैयटादिग्रन्थेषु स्थितेषु यन्नव्योक्तम्—"स्वरविधौ व्यञ्जनमविद्यमानवदित्येका परिभाषा । सा स्वरोद्देश्यकविधिविषया । हल्स्वरप्राप्तावित्यन्या । आद्यायाः वृषिव्यादिपर्युदासो ज्ञापकः । द्वितीयायास्तु नौप्रतिषेध इति । 'समासस्य' (६।१।२२३) इति सूत्रे भाष्ये परिभाषाद्वयं च स्पष्टम् ।" (परि. शे. परि. ७९, ८०) इति तत भाष्ये परिभाषाद्वयस्यापाठादुपेक्ष्यम् । भाष्ये हि प्रथमं 'हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्' इति पठित्वा दूषणत्रयमुद्भाव्य, तादृशदूषणपरिहारार्थं 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति पठ्यतामित्याशङ्क्य, उदश्वित्वान्घोषः विद्युत्वान्बलाहक इत्यत्र मतुबुदात्तत्वप्रसङ्गेन तं पाठं दूषयित्वा हल्स्वरप्राप्ताविति पक्ष एव दूषणोद्धारः कृतः; न तु परिभाषाद्वयं स्वीकृतम् (६।१।२२३ महाभाष्य) ॥

अत एव 'आने मुक्' (७।२।८२) इति सूत्रे अग्निचित्वानित्यादौ 'ह्रस्वनुड्भ्याम्०' (६।१।१७६) इति मतुबुदात्तत्वप्रसङ्गेन 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति दूषयित्वा 'हल्स्वरप्राप्तौ०' इति पाठो भाष्यकारेणाश्रित [3]इति कैयटेनोक्तम् । नापि भाष्ये स्वरविधावित्यस्य स्वरोद्देश्यकविधावित्यर्थ आश्रितः, प्रत्युत स्वरविधाविति सर्वविभक्त्यन्तः समास इत्युक्तम्। किं च स्वरोद्देश्यकत्वं स्वरनिमित्तकत्वेन विधीयमानत्वं वा [4]उतं स्वरस्थानिकत्वेन विधीयमानत्वं वा । नाद्यः, उदश्वित्वानित्यत्र[5] दोषतादवस्थ्यात् 'ह्रस्वनुड्भ्याम्०' (६।१।१७६) इत्यत्र अन्तोदात्ताधिकारेण मतुबुदात्तत्वस्य स्वरनिमित्तकत्वेन स्वरोद्देश्यकत्वात् । नापि द्वितीयः, 'अनुदात्तादेरञ्' (४।२।४४)

[1] क. स्वरविधिरिति ग्रहीष्यते । [2] ख. 'क्रियते' इति न पठ्यते. [3] क. इत्युक्तं कैयटेन । [4] ख. 'उत' इति न पठ्यते. [5] ख. इत्यत्र तद्दोष.

इत्यादेः स्वरस्थानिकत्वाभावेन व्यञ्जनादेरप्रवृत्तिप्रसङ्गात् । इदं तु बोध्यम्— हल्स्वरविधाविति भाष्योक्तपाठे दोषत्रये प्रतिविधानं कर्तव्यम् । स्वरविधाविति वृत्तिकारादिपाठे तु मतुबुदात्तत्वे एकत्रैव प्रतिविधातव्यम । अत एव भाष्यकारस्यापि हल्स्वरप्राप्ताविति पाठे नाग्रहः । 'उरण् रपरः' (१।१।५१) इति सूत्रे भाष्ये रेफस्याभक्तत्वपक्षे गीर्यते स्वयमेव पूर्यते स्वयमेवेत्यत्र 'अचः कर्तृयकि' (६।१।१९२) इति स्वराप्राप्तिमाशङ्क्य, स्वरविधौ व्यञ्जनमविद्यमानवदित्युक्तम् ॥ ६८ ॥

निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ ६९ ॥

तेन 'पूरणगुण०' (२।२।११) इति निषेधस्तव्यप्रत्ययान्ते भवतीति तव्यदन्तस्य समासो भवति–स्वकर्तव्यम् । तथा 'दिव औत्' (७।१।८४) इत्यौत्त्वं दिविति प्रातिपदिकस्य, न तु 'दिवु क्रीडा०' इति धातोः ॥ ६९ ॥

तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥ ७० ॥

तेन 'यतोऽनावः' (६।१।२१३) इत्याद्युदात्तत्वं कार्यमिति ण्यदन्ते न भवति । अनयोर्ज्ञापकम्— 'वामदेवाड्ड्यड्ड्यौ' (४।२।९) इति सूत्रे ड्यस्य च डित्करणम् । तद्धि न टिलोपार्थं[1], 'यस्य०' (६।४।१४०) इति लोपेनैव सिद्धत्वात् । किं तु 'ययतोश्चातदर्थे' (६।१।१५६) इति विधीयमानमुत्तरपदान्तोदात्तत्वम् अवामदेव्यशब्दे मा भूदित्येवमर्थम् । यद्येते परिभाषे न स्याताम्, तर्हि डकारे लुप्ते यद्रूपत्वानपायात् भाव्यमेव स्वरेणेति डित्करणमनर्थकं स्यात् । द्वितीयपरिभाषा च किंचिदनुबन्धविशिष्टग्रहणविषया यत्र त्वनुबन्धविनिर्मुक्तं रूपं गृह्यते तत्र न प्रवर्तते । यथा— 'वनो र च' (४।१।७) इति ॥ ७० ॥

क्वचित्स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ ७१ ॥

तेन कुटीशब्दस्य स्त्रीलिङ्गत्वेऽपि 'कुटीशमीशुण्डाभ्यो रः' (५।३।८८) इति स्वार्थिकरप्रत्ययान्तस्य कुटीरशब्दस्य पुंस्त्वसिद्धिः । ज्ञापकम्— 'कर्मव्यतिहारे णच् स्त्रियाम्' (३।३।४३) इति विहितणजन्तात् 'णचः स्त्रियामञ्' (५।४।१४) इति स्वार्थिकाञ्विधायकसूत्रे स्त्रीग्रहणम् ॥ ७१ ॥

समासान्तविधिरनित्यः ॥ ७२ ॥

तेन 'घृतधनुषमह्नाय' (महिम्नस्तोत्र श्लोक २३) इत्यत्र 'धनुषश्च' (५।४।१३२)

---

1 क. टिलोपार्थे.

इत्यनङ् न भवति । ज्ञापकम्— 'प्रतेरंश्वादयस्तत्पुरुषे' (६।२।१९३) इति अन्तोदात्तत्वाय अंश्वादिगणे राजन्शब्दपाठः । समासान्तविधेर्नित्यत्वे 'राजाहःसखिभ्यष्टच्' (५।४।९१) इति टचश्चित्त्वेन अन्तोदात्तत्वसिद्धौ किं तेन ॥ ७२ ॥

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ७३ ॥

संनिपातः द्वयोः संबन्ध ; सः लक्षणं निमित्तं यस्य सः तद्विघातस्य अनिमित्तम् । ययोर्द्वयोः संबन्धं निमित्तीकृत्य यो विधिः प्रवृत्तः, स तयोः संबन्धं न विहन्तीत्यर्थः । तेन अतिजरैरित्यत्र अकारान्ताङ्गसंबन्धनिमित्तक ऐस् जरसादेशस्यानिमित्तम् । तथा [1]गौध्यितेत्यत्र यकारादिप्रत्ययसंबन्धं निमित्तीकृत्य प्रवृत्तोऽवादेशस्तद्विघातस्य 'यस्य हलः' (६।४।४९) इति यलोपस्यानिमित्तम् । अत्र [2]च ज्ञापकम्— 'वामि' (१।४।५) 'ङिति ह्रस्वश्च' (१।४।६) इति पृथग्योगकरणम् । यदीयं न स्यात्, तदा 'वाचि ह्रस्वश्च' इत्येव वक्तव्यं स्यात् । अस्यां तु सत्यां श्रीणामित्यत्र अजादिसंबन्धं निमित्तीकृत्य प्रवृत्ता नदीसंज्ञा अजादित्वविघा[3]तकस्य नुटोऽनिमित्तं स्यादिति 'वामि' (१।४।५) इति पृथग्योगकरणमुपपद्यते ॥

यत्तु अस्याः परिभाषाया दोषकथनपरं 'कृन्मेजन्तः' (१।१।३९) इति सूत्रे वार्त्तिकम्— 'तस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्य' इति । तस्यायमर्थः— 'अत इञ्' (४।१।९५) इत्यकारप्रातिपदिकसंबन्धनिमित्तक इञ् दाक्षिरित्यत्र तद्विघातकस्य 'यस्य०' (६।४।१४०) इति लोपस्यानिमित्तं स्यादिति । यत्तु तत्र भाष्यम्— 'न प्रत्ययः संनिपातलक्षणः । अङ्गसंज्ञा तर्ह्यनिमित्तं स्यात्' (१।१।३९ वा. १० महाभाष्य) इति, तत्काक्वा योज्यम् । तथा हि— अत्र संनिपातशब्देन पौर्वापर्यसंबन्ध एव गृह्यते इति केचिद्वदन्ति, तदनेन भाष्येण दूष्यते । प्रत्ययः किं संनिपातलक्षणो न भवति । भवत्येवेत्यर्थः । [4]अङ्गसंज्ञा तर्ह्यनिमित्तं स्यात्, अङ्गसंज्ञापि निमित्तं भवत्येवेत्यर्थः । अयं भावः— पौर्वापर्यमेवात्र संबन्ध इति न निर्बन्धः, संकोचे मानाभावात् । तथात्वे वार्तिकोक्तदूषणासांगत्यं स्यात् । न चाङ्गसंज्ञाया निमित्तत्वाभावो वार्तिककृत्तात्पर्यविषय इति वाच्यम्, तस्याः संनिपातलक्षणत्वाभावात् । अङ्गसंज्ञायाः संनिपातलक्षणत्वे शैवो गाङ्गः इत्यादौ 'यस्य०' (६।४।१४०) इति लोपो न स्यात् । ततश्च

---

१ क. गव्यता नाव्यतेत्यत्र. २ क. 'च' इति न पठ्यते. ३ ख. विघातुकस्य ४ क. 'अङ्गसंज्ञा... ... स्यात्' इति न पठ्यते.

'वर्णाश्रयः प्रत्ययः०' (१।१।३९ वा. १०) इति वार्त्तिके वर्णाश्रयग्रहणमनर्थकं स्यात्। प्रत्ययपदस्य चाङ्गसंज्ञायां लक्षणा स्यात्। न च मुख्यार्थसंभवे सा युक्ता इति। न च काका योजनं भाष्ये क्वापि न दृष्टमिति वाच्यम्। 'अस्ति पुनरपवादे प्रतिषिद्धे उत्सर्गोऽपि न भवतीति। अस्तीत्याह' (१।१।३ वा. १० महाभाष्य)। अस्ति चेह कश्चित्पुरुषारम्भः। अस्तीत्याह' (१।१।४६ महाभाष्य; १।१।५६ वा. १ महाभाष्य) इत्यादौ काक्वा योजनस्य शतशो दर्शनात्॥

यत्तु नव्यग्रन्थे— "केचित्तु[1] संनिपातलक्षणविधित्वमस्या लिङ्गम्। स्वप्रवृत्तेः प्राक्स्वनिमित्तभूतो यः संनिपातस्तद्विघातकस्य स्वातिरिक्तशास्त्रस्य स्वयमनिमित्तमिति फलमिति। नन्वेवं रामायेत्यादौ 'सुपि च' (७।३।१०२) इति दीर्घानापत्तिः, अदन्ताङ्गेसंनिपातेन जातस्य यादेशस्य तद्विघातकत्वात्। न च यञादित्वनिमित्तकदीर्घस्य बहिरङ्गतया असिद्धत्वान्नात्र संनिपातविघात इति वाच्यम्। आरोपितासिद्धत्वेऽपि वस्तुतस्तद्विघातस्य जायमानत्वेनैतत्प्रवृत्तेः[3]। किंचान्तरङ्गे कर्तव्ये बहिरङ्गस्यासिद्धत्वेऽपि तत्र कृते तस्यासिद्धत्वे मानाभावः। किं चातिदेशिकसंनिपातविघाताभावमादायैतदप्रवृत्तौ गौरीत्यादौ संबुद्धिलोपेऽपि स्थानिवत्त्वेन ह्रस्वनिमित्तसंनिपातविघाताभावात्तत्रैतस्यातिव्याप्तिपरकृन्मेजन्त (१।१।३९) इति सूत्रस्थभाष्यासंगतिः। संनिपतस्याशास्त्रीयत्वान्नात्र स्थानिवत्त्वमिति चेत्, तत्रासिद्धत्वमपि कथमिति[4] विभावय। अशास्त्रीये असिद्धत्वाप्रवृत्तेः 'ईदूदेत्०' (१।१।११) इति सूत्रे कैयटेन स्पष्टमुक्तत्वात्। एवं च पूर्वत्रासिद्धीयेऽपि कार्ये एतत्परिभाषाप्रवृत्तिर्भवत्येवेति चेत्, न। 'कष्टाय' (३।१।१४) इतिनिर्देशेनैतस्या अनित्यत्वात्। ययोः संनिपातस्य विघातकं शास्त्रम्, तयोः संनिपातनिमित्तकविधावुपादानेन भाव्यमिति तु नाग्रहः। अत एव दाक्षिरित्यत्र अकारान्तप्रकृतीञ्संनिपातनिमित्ताङ्गसंज्ञा अनया परिभाषया अल्लोपस्य निमित्तं न स्यादित्याशङ्क्य, अनित्यत्वेन समाहितं 'कृन्मेजन्तः' इति सूत्रे भाष्ये। न ह्यङ्गसंज्ञायामदन्तस्याङ्गसंज्ञेत्युक्तमस्ति" (परि. शे. परि. ८५) इत्युक्तं। तत्र केचिदित्युक्त्यैव स्पष्टमस्वरसो गम्यते। संनिपातलक्षणो[2] विधिरिति सामान्यशब्दस्य संकोचे मानाभावः। न च 'ङेर्यः' (७।१।१३) इति शास्त्रस्य अकारान्ता-

---

१ अत्र 'केचित्तु' इति परिभाषेन्दुशेखरे नोपलभ्यते। पूर्ववाक्यान्ते 'वार्तिककृतेति केचित्' इत्युपलभ्यते। ततो निष्कृष्य संनिपातलक्षणविधित्वमस्या लिङ्गम्— इत्यादिना योजितं परिभाषाभास्करकृद्भिरिति भाति। २ क. लक्षणविलक्षणविधित्व. ३ क. जायमानत्वेन तत्प्रवृत्तेः। ४ क. 'कथमिति' न दृश्यते।

ङ्गडेसंबन्धनिमित्तकयादेशस्य तत्संबन्धविघातकत्वात्प्रवृत्त्यनुपपत्तिः संकोचे मानम्। विधानबलादेव तत्प्रवृत्त्युपपत्तेः। स्वप्रवृत्तेः प्रागित्याद्यप्ययुक्तम्। स्वप्रवृत्तेः प्राक् स्वनिमित्तभूतङेऽकारान्तसंबन्धस्य यादेशेनैव विहिततया दीर्घस्य तदविघातकत्वेन तदप्रवृत्तिशङ्काया अयोगात्। अतिजरैरित्यत्र अकारान्ताङ्गभिस्संबन्धस्य ऐस्प्रवृत्तिनिमित्तस्य ऐसैव विहततया जरसादेशस्य तद्विघातकत्वाभावेन तत्र संनिपातपरिभाषया जरसादेशवारणस्य भाष्योक्तस्यासंगत्यापत्तेः तदविघातकं प्रत्यप्यनिमित्तत्वे परिभाषायां तद्विघातस्येति पदानर्थक्यात्। दीर्घस्य बहिरङ्गपरिभाषया असिद्धत्वेन संनिपातपरिभाषाविरोधाभावमाशङ्क्य, आतिदेशिकासिद्धत्वेऽपि वास्तवविघातस्य सत्त्वादिति समाधानमप्ययुक्तम्। बहिरङ्गस्य ह्यन्तरङ्गे कर्तव्ये असिद्धत्वम्। यथा-- 'दीधीवेवीटाम्' (१।१।६) इति सूत्रे भाष्ये 'इट् इडेव यथा स्यात्, यदन्यत्प्राप्नोति तन्मा भूत्' इत्युक्त्वा, 'यद्येवं पिपठिषतेरप्रत्ययः पिपठीरिति दीर्घत्वं न प्राप्नोति' इत्याशङ्क्य 'आङ्गं यत्कार्यं तन्नियम्यते। न चैतदाङ्गम्। अथ वा असिद्धं दीर्घत्वम्। तस्यासिद्धत्वान्नियमो न भविष्यति' इति समाहितम्। अत्र द्वितीयसमाधाने आर्धधातुकस्येड्वलादेरितिसूत्रस्थ इडिडेव यथा स्यादिति वाक्यं प्रति 'र्वोरुपधायाः०' (८।२।७६) इति दीर्घविधेरसिद्धत्वान्नियमस्य न विरोधः' इति कैयटेन तदाशयः कथितः। प्रकृते च किमन्तरङ्गं प्रति दीर्घस्यासिद्धत्वमाशङ्क्यते। संनिपातपरिभाषां प्रतीति चेत्, न। सा हि सनिमित्तं यादेशं दीर्घं चापेक्षमाणा दीर्घाद्बहिरङ्गा। नापि अन्तरङ्गमनपेक्ष्यैव असिद्धत्ववर्णनं युज्यते। 'असिद्धं बहिरङ्ग०' इति न्याये अन्तरङ्गपदवैयर्थ्यापत्तेः सर्वत्र बहिरङ्गस्यासिद्धत्वे तद्विधायकवैयर्थ्यापत्तेश्च। एतेन दीर्घे कृते वास्तवविरोधोऽस्त्येवेति समाधानमप्यपास्तम्। पिपठीरित्यत्रापि वास्तवदीर्घसत्त्वेन उदाहृतभाष्यविरोधापत्तेः। आतिदेशिकसंनिपाताविघातमादाय एतत्परिभाषाया अप्रवृत्तौ हे गौरीत्यत्र नदीह्रस्वत्वं संबुद्धिलोपस्यानिमित्तं स्यादिति शङ्कापरभाष्यासंगतिः। संबुद्धिलोपस्य स्थानिवद्भावेन ह्रस्वनिमित्तसंनिपाताविघातादित्यप्ययुक्तम्। स्थानिवत्सूत्रं हि स्थानिकार्यमादेशे अतिदिशति, न तु स्थानिनमपि संनिधापयति, येन संनिपातविघातो न स्यात्। ययोः संनिपातस्येत्याद्यप्ययुक्तम्, तयोर्वस्तुस्थित्या निमित्तत्वे त्यदादिभिः संनिपातनिमित्तकत्यदाद्यत्वस्य तद्विघातकैसं प्रति निमित्तत्वाभावापत्तेः ऐस्विधेर्वृक्षैरित्यत्र चरितार्थ-

१ क. विघायकत्वात्. २ क. विहिततया. ३ क. बलादेरित्यत्रस्थ. ४ क. संनिपातविघात. ५ क. परिभाषाप्रवृत्तौ. ६ क. लोपस्य निमित्तं. ७ क संनिपातविघातात्. ८ क. 'चरितार्थत्वात्' इति न पठ्यते.

त्वात् । शब्दोपात्तत्वविवक्षणे तु त्यदादिविभक्तिसंनिपातस्यैव अत्वं प्रति शब्दोपात्त-निमित्तत्वेन भिसोऽशब्दोपात्ततया ऐसस्तद्विघातकत्वेऽपि न विरोधः । 'अङ्गसंज्ञा तदनिमित्तं स्यात्' इति भाष्यग्रन्थस्तु प्रागेव योजित इति न तद्विरोधोऽपि । न चानित्यत्वेन तत्समाधानं युक्तम्, तथा सत्याङ्गमात्रस्य येननाप्राप्तिन्यायेन संनिपात-परिभाषापवादतया जरसादेशादौ तत्संचारणपरभाष्यविरोधात् ॥

यदपि— अस्या अनित्यत्वे फलानाम् 'वर्णाश्रयः०' (१।१।३९वा१०) इत्या-दिना 'नदीह्रस्वत्वं संबुद्धिलोपस्य' (१।१।३ वा. १६) इत्यन्तेन भाष्ये परिगणितत्वात् 'दोषाः खल्वपि साकल्येन परिगणिताः' इति भाष्याच्च "इतोऽन्यत्र प्रवृत्तिः" (परि. शे. परि. ८५) इति नव्योक्तं तदप्ययुक्तम् । बाभ्रवीयाः माण्डवीया इत्यत्रापरिगणितस्थलेऽपि संनिपातपरिभाषाया अप्रवृत्तिदर्शनात् । अत एव 'अचः परस्मिन्०' (१।१।५७) सूत्रे बाभ्रवीया इति भाष्यप्रतीकमुपादाय 'संनिपातपरिभाषाया अनित्यत्वात् यशब्द-संनिपातनिमित्तो वान्तादेशो यलोपनिमित्ततां प्रतिपद्यते' इति कैयटेनोक्तम् । 'दोषाः खल्वपि०' इति भाष्यं तु दोषाल्पत्वाभिप्रायमिति प्रागेवोक्तम् । अनित्या[1] चेयम् । 'न यासयोः' (७।३।४६) इति निर्देशात् । अत्र[2] हि विभक्त्यानन्तर्यं निमित्तीकृत्य त्यदा-द्यत्वस्य टाप्प्रवर्तकत्वमाश्रित्य निर्देशः । यत्तु — 'कष्टाय क्रमणे' इति[3] निर्देशो ज्ञापक इति, तद् यञीति यकारेण प्रत्याहाराश्रयणसामर्थ्याद्दीर्घसिद्धेरयुक्तमित्यपि वदन्ति ॥ ७३ ॥

संनियोगशिष्टानामन्यतरापाय उभयोरप्यपायः ॥ ७४ ॥

तेन पञ्च इन्द्राण्यो देवता अस्य पञ्चेन्द्रः इत्यत्र 'द्विगोर्लुगनपत्ये' (४।२।८८) इति देवतार्थस्याणो लुकि 'लुक्तद्धितलुकि' (१ २।४९) इति ङीपो लुकि तत्संनियोग-शिष्टस्यानुकोऽपि निवृत्तिर्भवति । ज्ञापकम्—'बिल्वकादिभ्यश्छस्य लुक्'(६।४।१५३) इति सूत्रे छग्रहणम् । तद्धि न छस्य लुक्प्राप्त्यर्थम्, बिल्वकेति नडाद्यन्तर्गणीभूतसकुक-बिल्वादेर्व्याख्यानाद् ग्रहणमिति स्वीकृत्य ततो विहितस्य तद्धिते परतो लुगित्यर्थस्वीकारेण छस्यैव कुग्विशिष्टाद्विधानेन तस्यैव लुक्सिद्धेः । 'नडादीनां कुक्च' (४।२।९१) इत्यत्र 'धिन्विकृण्व्योर च' (३।१।८०) इतिवत् शब्दक्रमेण प्रथमं कुग्विधीयते, पश्चाच्चानुकृष्टोयमिति[4] तस्य कुग्विशिष्टाद्विधानसंभवः । एवं सिद्धे सति छग्रहणं

---

१ क. अनित्येयं परिभाषा । २ ख. अत्र विभक्त्यानन्तर्य. ३ क. 'इति' इति पदं न पठ्यते.
४. ख. चानुकृष्टश्छ इति तस्य.

छस्यैव निवृत्तिर्यथा स्यात्, तत्संनियोगशिष्टस्य कुको निवृत्तिर्मा भूदित्येवमर्थं सदुक्त-परिभाषाज्ञापकम् ॥

अनित्येयम् । तेन श्यैनेयः श्रौत्रमित्यादि सिद्धमिति कैयटः । यत्तु— "णावि-ष्ठवदित्यनेन पुंवत्त्वविधानमेतदनित्यत्वज्ञापनार्थम् । अन्यथा एतयतीत्यादौ टिलोपेनैव ङीपि निवृत्ते संनियोगशिष्टपरिभाषया नैस्यापि निवृत्त्या एतयतीत्यादिसिद्धौ पुंवत्त्ववै-यर्थ्यं स्पष्टमेवेति कैयटोक्तमयुक्तम् । श्यैनेय इत्यादि तु स्थानिवद्भावेन सिद्धम्" (परि. शे. परि. ८६) इति नव्योक्तं तदयुक्तम् । स्थानिवद्भावप्रत्ययलक्षणासिद्धत्वैर्हि स्थानि-कार्यमादेशे सत्यपि क्रियते, न तु स्थानी संनिधाप्यते येन तस्यापायो न स्यात् । एवं च श्यैनेय इत्यत्र नकारश्रवणार्थमुक्तपरिभाषाया अनित्यत्वमेव शरणीकरणीयम् । यद्यपि 'अचः परस्मिन्०' (१।१।५७) इति स्थानिवत्त्वमशास्त्रीयेऽपि प्रवर्तते इति सिद्धान्तः । अत एव घटयतीत्यादावशास्त्रीयोऽपि उपधावृद्ध्यभावः स्थानिवत्त्वाद्भवति । तथा चाशा-स्त्रीयनकारानिवृत्तावपि स्थानिवद्भावप्रवृत्त्या नकारनिवृत्तिवारणं संभवति । तथापि श्रौत्र-मित्यत्र युवादिगणे 'श्रोत्रियस्य यलोपश्च' (गणसूत्र ५।१।३१ युवादिगण) इति पाठेन घे निवृत्तेऽपि तत्संनियोगशिष्टः श्रोत्रभावो न निवर्त्यते । न चात्र 'अचः परस्मिन्०' (१।१।५७) इति स्थानिवद्भावः संभवति, अनजादेशत्वात् । यदि प्रत्ययलक्षणेन संनिधानमाश्रित्य अत्र श्रोत्रभावः समर्थ्यते तर्हि धर्मिग्राहकमानविरोधः । बैल्वकमि-त्यत्रापि छस्य लुकि प्रत्ययलक्षणेन तत्संनिधानस्य वक्तुं शक्यत्वात् । न च 'न लुमताङ्गस्य' (१।१।६३) इति निषेधः । छसंनिधानस्यानङ्गकार्यत्वेन तदनुपपत्तेः । तस्मात् श्रौत्रमित्यत्र श्रोत्रभावस्यानिवृत्तये उक्तपरिभाषाया अनित्यत्वमेषितव्यम् । इदमपि बिल्वकादिसूत्रे (६।४।१५३) कैयटेनानित्यत्वफलमुक्तम् । तस्मात्सूक्तं कैयटेन— इयमनित्येति । नव्योक्तं तद्दूषणमेवायुक्तमिति दिक् ॥ ७४ ॥

ताच्छीलिके णेऽप्यणि कृतं कार्यं भवति ॥ ७५ ॥

तेन चुरा शीलमस्याश्चौरीत्यादौ 'शीलम्' (४।४।६१) इत्यधिकारे 'छत्रादिभ्यो णः' (४।४।६२) इति विहितणप्रत्ययान्तात् अणन्तत्वप्रयुक्तो ङीप् भवति । अत्र च ज्ञापकम् । 'कार्मस्ताच्छील्ये' (६।४।१७२) इति निपातनम् । तद्धि 'अन्' (६।४।१६७) इति विहितस्यानः प्रकृतिभावस्य बाधनार्थं क्रियते । यदि ताच्छीलिके णे अण्कृतं

---

१ क. श्रोत्रः. २ क. रस्यापि. ३ क. यलोपश्च. ४ क. परिभाषया. ५ ख. अत्र ज्ञापकम् ६ क. अन्निति अणि विहितस्यानः ७ क ताच्छीलिकेणि.

कार्यं न स्यात्, तर्हि तद्वैयर्थ्यं स्पष्टमेव । 'ताच्छीलिक' इति विशेषणात् 'तदस्यां प्रहरणमिति क्रीडायां णः' (४।२।५७) इति णान्तात् टाबेव भवति । दाण्डा ॥७५॥

धातोः कार्यमुच्यमानं तत्प्रत्यये भवति ॥ ७६ ॥

धातोरसाधारणप्रत्यये तत्कार्यं भवतीत्यर्थः । तेन रज्जुसृड्भ्यामित्यत्र 'सृजि-दृशोः०' (६।१।५८) इत्यमागमः भ्यामाश्रित्य न भवति । ज्ञापकम् 'दाण्डिनायन०' (६।४।१७४) इति सूत्रे भ्रौणहत्येति तत्वनिपातनम् । यदीयं परिभाषा न स्यात् तर्हि 'हनस्तोः०' (७।३।३२) इत्यनेनैव तत्सिद्धेः किं तेन ॥ ७६ ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ७७ ॥

तेन सर्वके उच्चकैः भिनत्तीत्यादौ सर्वनामाव्ययधातुग्रहणैर्ग्रहणात् शीभावः सुब्लुक् अन्तोदात्तत्वं च सिध्यति । ज्ञापकम् 'नेदमदसोरकोः' (७।१।११) इत्यत्र अकोरिति प्रतिषेधः । स हि इमकैः अमुकैरित्यत्र 'नेदमदसोः' इति प्रतिषेधवारणाय । साकच्कस्य शब्दान्तरत्वे तद्वैयर्थ्यं स्पष्टमेव । इदं स्थानिवत्सूत्रेण गतार्थम्, 'सर्वे सर्व-पदादेशाः' (१।१।२० श्लोकवार्तिक) इति न्यायात् । ईदृशादेशस्यापि तत्र ग्रहणे 'अकोः' इति प्रतिषेध[3] एव ज्ञापक इति 'तदागमाः०' (परिभाषा ११) इत्यत्रोक्तम् । न चैवं ग्रन्थकाराणां पृथक्पाठविरोधः, प्रपञ्चार्थत्वेन तदुपपत्तेः ॥ ७७ ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ॥ ७८ ॥

तेन 'गातिस्था०' (२।४।७७) इति सूत्रे पाग्रहणेन पिबतिरेव गृह्यते, न तु पाति-र्लुग्विकरणः । तेन तस्य अपासीदिति भवति । ज्ञापकम्– 'स्वरतिसूति०' (७।२।४४) इति सूत्रे सूतिसूयत्योः पृथग्ग्रहणम् । इतरथा षूङिति सानुबन्धकस्य निर्देशेनैव 'षू प्रेरणे' इति तौदादिकनिवृत्तिसिद्धेः पृथग्ग्रहणमनर्थकं स्यात् । यत्तु "साहचर्यादलु-ग्विकरणस्यैव ग्रहणे प्राप्ते लुग्विकरणस्य ग्रहणार्थं पृथङ्निर्देशोपपत्तिरिति नेदं ज्ञापकम्" (परि. शे. परि. ९०) इति नव्योक्तं तन्न । साहचर्यस्यासार्वत्रिकत्वात् 'द्विखिः०' इति सूत्रे कृत्वोर्थग्रहणात् ज्ञापकात् इष्टवशादिहानाश्रयणेन ज्ञापकत्वसिद्धेः । यद्यपि भा[4]ष्यकारेणेयं कण्ठतो न पठिता, तथापि कैयटादिभिरुक्तत्वात्प्रमाणं भवत्येव ॥७८॥

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणं कुत्वविषये भवति ॥ ७९ ॥

तेन प्रजिघाययिषतीति ण्यन्तात्सनि कुत्वसिद्धिः, 'अचङि' (७।३।५६) इति

---

१ क. सुब्लुगन्तत्वोदात्तं च. २ क. इति सूत्रे. ३ क. प्रतिषेधो ज्ञापकः ४ क. भाष्य-कारेण कण्ठतो न.

प्रतिषेधात् । तथा च वार्त्तिकम्— 'इक्ष्वङि प्रतिषेधानर्थक्यमङ्गान्यत्वात् । ज्ञापकं तु चङोऽन्यत्र ण्यन्तेऽपि कुत्वभावस्य' इति ॥ ७९ ॥

अङ्गवृत्ते पुनरङ्गवृत्तावविधिः ॥ ८० ॥

अङ्गाधिकारीये कस्मिंश्चित्कार्ये कृते अन्यत् अङ्गाधिकारीयं न भवतीत्यर्थः । तेन अस्मभ्यमित्यत्र भ्यमादेशपक्षे शेषे लोपोऽन्त्यलोप इति पक्षे 'बहुवचने झल्येत्' (७।३।१०३) इत्येत्वं न भवति । ज्ञापकम् 'ज्यादादीयसः' (६।४।१६०) इति सूत्रे आकारविधानम् । अन्यथा 'बह्वोर्लोपः०' (६।४।१५८) इत्यतो लोपग्रहणमनुवृत्य ज्यात्परस्य ईयसः 'आदेः परस्य' (१।१।५४) इति ईकारलोपविधानेन 'अकृत्सार्वधातुकयोः' (७।४।२५) इति दीर्घे कृते ज्यायानिति रूपसिद्धेः किं तेन । अनित्येयम् । द्वयोरिति निर्देशात् । त्यदाद्यत्वे कृते 'ओसि च' (७।३।१०४) इत्येत्वमपि निर्दिष्टम् । 'निष्ठितस्य' इति केषांचित्पाठः, अनित्यत्वफलं क्रोडीकृत्य । केचित्त्वियं प्रयोजनाभावान्न स्वीकर्तव्येत्याहुः ॥ ८० ॥

संज्ञापूर्वको विधिरनित्यः ॥ ८१ ॥

तेन स्वायंभुवमित्यत्र 'ओर्गुणः' (६।४।१४६) इति गुणाभावः सिद्धः । ज्ञापकं 'ओर्गुणः' (६।४।१४६) इति सूत्रे 'ओरोत्' इति वक्तव्ये गुणग्रहणम् ॥ ८१ ॥

अनित्यमागमानुशासनम् ॥ ८२ ॥

तेन इडागमस्यानित्यत्वात् 'तर्तुकामस्य' इत्यादि सिद्धम् । 'स्तोः श्चुना श्चुः' (८।४।४०) इति सूत्रे स्तोरिति निर्देशो ज्ञापक इति सीरदेवः । अत्र नुम्करणं ज्ञापकमिति तदाशयः । यत्तु—अस्यां सत्यां "घोर्लोपो लेटि वा' इति सूत्रे वाग्रहणप्रत्याख्यानं भाष्योक्तं न युज्यते, अनया परिभाषयाडागमाप्रवृत्तौ दधादिति रूपासिद्धिप्रसङ्गेन वाग्रहणस्यावश्यकत्वात्" इति नव्योक्तं तन्न । औत्सर्गिकप्रवृत्तिमादाय प्रत्याख्यानभाष्योपपत्तेः । अत एव रूपसिद्ध्यर्थं वाग्रहणं न कर्तव्यमिति भाष्याभिप्रायमभिप्रेत्य कैयटन्यासकारौ 'अनित्यमागमानुशासनम्' इति ज्ञापयितुं वाग्रहणमित्याहतुः ॥ ८२ ॥

गणकार्यमनित्यम् ॥ ८३ ॥

---

१ क. इति दीर्घकृते. २ क. एत्वमपि विनिर्दिष्टम्. ३ क. आगमशासनम्. ४ क. इति तत्र. ५ क. आगमशासनम् इति परिभाषां ज्ञापयितुम्.

तेन 'न विश्वसेदविश्वस्तम्' इत्यादि सिद्धम । 'तनादिकृञ्भ्य उः' (३।१।७९) इति तनादित्वादेव सिद्धे कृञ्ग्रहणमस्यां ज्ञापकम् ॥ ८३ ॥

अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ॥ ८४ ॥

तेन 'स्फायन्निर्मोकसंधि' इत्यादि सिद्धम् । ज्ञापकम्— चक्षिङो ङित्करणम् । यत्तु—ङकारस्य अन्तेदित्त्वाभावसंपादनेन नुम्वारणेन चारितार्थ्यादज्ञापकत्वमिति, तदयुक्तम् । नुम्वारणैकप्रयोजनत्वे चक्षेरयकारमनुदात्तं पठेत् । एवं स्थिते ङकारोच्चारणं ज्ञापकमेवेति ॥ ८४ ॥

नञ्घटितमनित्यम् ॥ ८५ ॥

तेन 'हा पितः क्वासि हे सुभ्रु' इति 'नेयङुवङ्०' (१।४।४) इति निषेधस्यानित्यत्वात्सिध्यति । कालिदासोऽपि— 'विमानना सुभ्रु कुतः पितुर्गृहे' इति । अनुदात्तं पदमेकवर्जम्' इति सूत्रे विनार्थनञा समासस्वीकारात्सिद्धे वर्जग्रहणं ज्ञापकम् । यत्तु— "एषां वचनानां भाष्येऽनुपलम्भात् भाष्यानुक्तज्ञापितार्थस्य साधुतानियामकत्वे मानाभावात् भाष्याविचारितप्रयोजनानां सौत्राक्षराणां पारायणादृष्टमात्रार्थकत्वकल्पनाया एवौचित्यात्" (परि. शे. परि. ९३.५) इति नव्योक्तम्, तदयुक्तम । व्याकरणं हीदं स्मृतिरूपं प्रमाणम् । तस्याश्च प्रामाण्यं स्वकालसत्ताग्राहकप्रत्यक्षसध्रीचीनपूर्वकालसत्ताग्राहकपूर्वस्मृतिमूलतया । तथा च हरदत्तः— "गवादिशब्दानामनादित्वमेव साधुत्वं गाव्यादीनां तु वाचकाशक्तिजत्वादसाधुत्वं च प्रसाध्य, कथं पुनराचार्येण पाणिनिनावगतम्— एते साधव इति । आपिशलेन व्याकरणेन । आपिशलिना तर्हि केनावगतम् । ततः पूर्वेण व्याकरणेन । यद्येवमन्धपरंपरा स्यादिति मूलाशुद्धिमाशङ्क्य, नैष दोषः । सर्व एव हि स्वे स्वे काले गाव्यादिभ्यो विभक्तान्गवादिशब्दान्प्रत्यक्षेणोपलभन्ते । पूर्वकालसत्तां च पूर्वव्याकरणतोऽध्यवस्यन्ति । तेऽपि स्वकालसत्तां प्रत्यक्षेण पूर्वकालसत्तां पूर्वव्याकरणादिति नान्धपरंपरेति व्याकरणस्य समूलतामुपापीपदत्" पार्थसारथिश्च व्याकरणाधिकरणे व्याकरणस्य समूलतामुपपादयन्—

"स्मृतेः स्मृत्यन्तरं मूलं साधुरूपनिरूपणे ।
प्रत्यक्षव्यवधानाच्च नान्धवाक्यसमानता"

इत्याह । स्वेनापि ग्रन्थादौ 'प्राचीनवैयाकरणतन्त्रे वाचनिकानि अत्र पाणिनीये तन्त्रे ज्ञापकन्यायसिद्धानि' (परि. शे. परि. १) इत्युक्तम् । यद्यपि 'भाष्यवार्तिकयो-

---

१ ख. इत्यत्र. २ ख. अस्यां. ३ क. वर्ज्यग्रहणं. ४ क. येषां

निबद्धानि परिभाषारूपाणि' (परि. शे. परि. १) इत्युक्तम्; तथापि भाष्यवार्त्तिकयोरनिबद्धान्यपि प्राचीनव्याकरणसिद्धानि व्याख्यातृपरंपरयाभियुक्तैः स्मर्यमाणानि सौत्रज्ञापकानुमोदितानि नाप्रमाणीभवितुमर्हन्ति । अत एव 'मणीवादीनां प्रतिषेधः' इति तु मुनित्रयानुक्तत्वादप्रामाणिकमिति सौत्रज्ञापकाभावोऽपि अप्रामाण्यज्ञापकत्वेन कैयटादिभिरुक्तः । वृद्धिसूत्रे भाष्ये 'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रणिधानेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम् । किं पुनरियता सूत्रेण' (१।१।१ महाभाष्य) इति सामान्यत आचार्यवचसां सार्थक्यमुक्तम् । तत्र[1] यत्सूत्रोक्तं भाष्यवार्त्तिककृद्भ्यां प्रत्याख्यायते तस्य प्रयोजनान्तरं परंपराप्राप्तमभियुक्तैरविगानेन यत्र वर्ण्यते तत्र भाष्यवार्त्तिकयोस्तद्ग्रहणं तत्प्रयोजनं न भवतीति प्रयोजनविशेषप्रत्याख्याने[2] तात्पर्यम् । प्रयोजनान्तरं त्वभियुक्तैः कथ्यमानं यदि भाष्यवार्त्तिकाभ्यां न विरुध्यते तदा तदपि प्रमाणमेव । यत्र तु तैरपि प्रयोजनान्तरं नोच्यते, तत्र नैष्फल्यमेवेति युक्तम् ॥

यत्तु— प्रत्याख्यातानामदृष्टार्थपारायणादौ विनियोग इति, तदविचारितरमणीयम् । अदृष्टं हि वैदिकप्रमाणकम् । न च ईदृशानि पाणिनीयानि वाक्यानि पठेत् इति वेदोऽस्ति, पाणिनेः सादित्वेन ततः पूर्वमेतद्वेदस्याबोधकत्वप्रसङ्गात् । यद्यपि 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' (महाभाष्य आ० १) इति भाष्योक्ता श्रुतिः प्रमाणं भवेत्, तथापि सा दृष्टप्रयोजना । अध्ययनसंस्कृतेन वेदेन फलवदर्थावबोधं संपादयेदिति वेदांशे तस्या अर्थात्तदैकरूप्याय व्याकरणांशेऽपि दृष्टसाधुत्वप्रतिपत्तिरूपप्रयोजनत्वमेव युक्तम् । न त्वदृष्टार्थत्वम् । 'यस्य दृष्टं न लभ्येत स्यात्तस्यादृष्टकल्पना' इति न्यायात् । किं च अदृष्टार्थत्वं कल्प्यमानमपि अङ्गाध्ययनत्वेन कल्प्येत । अङ्गत्वं च व्याकरणत्वादिना । व्याकरणत्वं च शब्दसाधुत्वप्रतिपत्तिप्रयोजकशब्दत्वम्[3] । न च तत् शब्दसाधुत्वप्रतिपत्त्यनुपयोगिषु प्रत्याख्यातपदेषु विद्यते[4] येन तेषां तादृशश्रुतिबलाददृष्टार्थता कल्प्येत । ईदृशश्चार्थो भाष्यानुक्तो न्यायापेतश्च त्वया कल्प्यमानो यदि प्रामाणिकः, तदैतद्व्याकरणप्रामाण्योपजीव्यानां पूर्वव्याकरणपठितवचनानां भाष्यानुक्तानामपि सौत्रज्ञापकसिद्धत्वेनाभियुक्तपरंपरया वर्ण्यमानानामर्थानामप्रामाणिकत्ववचनं तेषु[5] मात्सर्यमात्रनिबन्धनमिति दिक् ।

---

[1] ख. तत्र तत्र. [2] क. प्रयोजनविषयप्रत्याख्याने. [3] क. प्रयोजनकशब्दत्वम्. [4] क. वर्धते. [5] ख. तेषु तेषु

एतेन 'स्वायंभुवमित्यादि लोके असाध्वेव' इति निरस्तम् । तेषामेतत्कालप्रयोगदर्शनेन पूर्वकालसत्तायाश्च 'संज्ञापूर्वको विधिरनित्यः' (परि. ८१) इति पूर्वव्याकरणनिश्चितत्वेन अनादित्वलक्षणसाधुत्वनिश्चयात् । किं चाशक्तिजत्वमसाधुत्वम्; न च 'स्वायंभुवं नमस्कृत्य' 'मनुः स्वायंभुवोऽब्रवीत्' इत्यादिप्रयोक्तॄणां स्मर्तॄणामशक्तिः कल्पयितुं शक्येत्यास्तां तावत् ॥ ८५ ॥

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ ८६ ॥

तेन हन्तेर्यङ्लुकि आशीर्लिङि 'सन्यङोः' (६।१।९) इति द्वित्वादौ 'जङ्घन्' इत्यस्य हन्तिग्रहणेन ग्रहणात् 'हनो वध लुङि लिङि' च (२।४।४२) इति वधादेशः । तस्य द्विर्वचनं तु न भवति, स्थानिवत्त्वेन 'अनभ्यासस्य' (६।१।८) निषेधात् । तद्धि समानाधिकरणं धातोर्विशेषणं बहुव्रीहित्वादिति माधवादयः । इदं च षाष्ठद्विर्वचनं स्थाने द्विर्वचनमिति पक्षे स्थानिवद्भावलभ्यम् । द्विःप्रयोगो द्विर्वचनमिति पक्षे संघातस्य द्विरुक्ततद्रूपत्वादेकाज्द्विर्वचनन्यायेन संघात एव प्रकृतिप्रयुक्तकार्यप्रवृत्तिन्यायलभ्यम् । यत्तु— "द्वयोः प्रत्येकं तेन न्यायेन तत्त्वबोधनेऽपि संघाते तत्त्वबोधने मानाभावः । अत एव 'दयतेर्दिगि०' (७।४।९) इति सूत्रे अस्तेः परत्वाद्द्वित्वे कृते परस्यास्तेर्भूभावे कृते पूर्वस्य श्रवणं प्राप्नोतीत्याशङ्क्य, विषयसप्तम्याश्रयणेन परिहृतं भाष्ये । त्वदुक्तरीत्या एकाज्द्विर्वचनन्यायेन समुदायस्यैवादेशापत्तौ तदसंगतिः स्पष्टैव । तस्मादुत्तरखण्डमादायैव यथायोगं तत्तत्कार्यप्रवृत्तिर्बोध्या । भूसुवोरित्यस्य तदन्ताङ्गस्येत्यर्थाद्प्राप्तस्य गुणस्य बोभूत्विति नियम इति न तद्विरोधः" (परि. शे. परि. ९३.९) इति नव्योक्तं तन्न । समुदाये तत्त्वबोधने एकाज्द्विर्वचनन्यायस्य मानत्वात् । अन्यथा जुहुधीत्यादौ धित्वादेरनापत्तेः । न चोत्तरभागस्य झल्त्वमाश्रित्य धित्वप्रवृत्तिः, तस्यानङ्गत्वात् । धिविधेरङ्गाधिकारीयत्वात् । न चाङ्गाधिकारे तदन्तग्रहणात्सिद्धिः । 'अलैवानर्थकेन तदन्तविधिः' (१।१।७२ वा. २८ महाभाष्य) इति येनविधिसूत्रस्थवार्त्तिकतद्भाष्यविरोधात् । हन्तादेर्ग्रहणापत्तेश्च । न चोत्तरभागोर्थवानेवेति वाच्यम् । तुल्यन्यायतया पूर्वभागस्याप्यर्थवत्त्वापत्तौ 'नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे' (१।१।६ वा. २) इति अलोन्त्यादिसूत्रस्थवार्तिकतद्भाष्यविरोधापत्तेः । 'शब्दस्याव्रुति-

---

१ ख. वध लिङि. २ इदं वार्तिकं "अलोन्त्यात्पूर्व उपधा" (१।१।६५) इति सूत्रे भाष्ये उपलभ्यते । 'अलोन्त्यादिनिसूत्रस्थ०' इत्यादिपाठः स्यात् ।

नर्थिस्येत्यभ्यासोऽनर्थकः' इति तत्र कैयटः। एवं च वदता उत्तरखण्डस्याप्यनर्थकत्वं स्पष्टमुक्तम्। एतेन 'भूसुवोः०' (७।३।८८) इति सूत्रे तदन्तस्याङ्गस्येति व्याख्यानात् बोभूत्वित्यस्य नियमार्थत्वोपपत्तिरिति निरस्तम्। यद्यपि जुहुधीत्यत्र विधानसामर्थ्यात् धित्वं भवतीति शक्यं वक्तुं तथापि ममङ्क्थ ननंष्ठ इत्यत्र 'मस्जिनशोर्झलि' (७।१।६०) इति नुम्, ररन्ध जजम्भेत्यत्र चं 'रधिजभोरचि' (७।१।६१) इति नुम् नं स्यात्, सस्रष्ठ दद्रष्ठ इत्यत्र 'सृजिदृशोः०' (६।१।५८) इत्यमागमश्च न स्यादित्यादिदोषा बोध्याः। 'दयतेः०' (७।४।९) इति सूत्रस्थभाष्यग्रन्थस्तु उक्तभाष्यविरोधात् तत्रैव सूत्रे उपक्रमे दिग्यादेशस्य द्वित्ववारणाय 'साभ्यासस्य दिग्यादेश इति वक्तव्यम्' (७।४।९ महाभाष्य) इति परिचोद्य, 'ननु च द्विर्वचने कृते साभ्यासस्य दिग्यादेशो भविष्यति' (७।४।९ महाभाष्य) इति साभ्यासग्रहणप्रत्याख्यानपरभाष्यविरोधादुपपत्तिविरोधाच्चैकदेश्युक्तिः। स्वपक्षे हि पूर्वविप्रतिषेधेन प्रथमं द्विर्वचनेऽपि उत्तरभागस्यैव दिग्यादेशेन भाव्यतया 'ननु च द्विर्वचने कृते साभ्यासस्य दिग्यादेशो भविष्यति' इति भाष्यविरोधः स्पष्टः। 'हनस्तोऽचिण्णलोः' (७।३।३२) इति सूत्रे जघानेत्यत्र तत्वव्यावृत्तये क्रियमाणो णल्पर्युदासः 'प्रकृतिग्रहणे द्विरुक्तस्य ग्रहणं भवति' इत्यस्यार्थस्य ज्ञापक इत्यपि शक्यते वदितुमिति संक्षेपः ॥ ८६ ॥

विधौ परिभाषा नानुवादे ॥ ८७ ॥

तेन 'वृद्धिर्यस्य०' (१।१।७३) इत्यत्र इक्परिभाषानुपस्थानात् शालादिशब्दानामपि वृद्धसंज्ञा सिध्यति। ज्ञापकम् 'उदीचामातः०' (७।३।४६) इति सूत्रे स्थानेग्रहणम्। यद्यनुवाद्यविशेषणे परिभाषाणामुपस्थितिः स्यात्, तर्हि आत इति षष्ठ्याः 'षष्ठी स्थानेयोगा' (१।१।४९) इति परिभाषयैव स्थानार्थकत्वसिद्धेः किं तेन। अनित्या चेयम्, 'संख्याव्ययादेर्ङीप्' (४।१।२६) इत्यत्रादिग्रहणात्। तद्धि द्विविधोघ्नीत्यत्र ङीबर्थम्। यद्यनुवादे परिभाषा न स्यात्, तदा संख्याव्ययादिति निर्देशेऽपि 'तस्मादित्युत्तरस्य' (१।१।६७) इत्यस्याभावात् संख्याव्ययात्परो य ऊधःशब्दस्तदन्ताद्बहुव्रीहेर्ङीबिति सूत्रार्थे द्व्यूघ्नीत्यत्रेव द्विविधोघ्नीति व्यवहितस्थलेऽपि सिद्धे व्यर्थं स्यात्। अनुवादेऽपि परिभाषाप्रवृत्तौ तु द्विविधोघ्नीति व्यवहितस्थलेऽपि ङीबर्थमादिग्रहणम्। आदिग्रहणे हि सति संख्याव्ययादेरिति बहुव्रीहिविशेषणम्। तेन संख्या-

---

[1] क. संभवतीति. [2] ख. 'च' इति पदं न दृश्यते. [3] ख. 'न स्यात्' इति न पठ्यते. [4] क. अमागमो न स्यात्. [5] क. सिध्यतीति.

व्ययादिरूधःशब्दान्तो यो बहुव्रीहिस्ततो ङीबित्यर्थात् द्विविधोघ्नीत्यत्रापि सिध्यति। अनित्यत्वफलं तु 'अचो रहाभ्यां द्वे' (८।४।४६) इत्यत्र अचोऽव्यवहितपराभ्यां रेफहकाराभ्यामित्यर्थलाभः। तेन किं ह्लयतीत्यादौ यकारादेरनेन न द्वित्वम् ॥

यत्तु—"उदात्तस्वरितयोः० (८।२।४) इत्यादौ 'ष्यङः संप्रसारणम्०'(६।१।१३) इति सूत्रभाष्योक्तरीत्या 'अल्लोपोऽनः' (६।४।१३४) इत्यादौ चैतस्या व्यभिचारात्। भाष्यानुक्तत्वाच्च। स्थानसंबन्धोऽनया परिभाषया न लभ्यते इत्यर्थस्य 'षष्ठी स्थानेयोगा' (१।१।४९) इति सूत्रे भाष्ये स्पष्टमुक्तत्वेन त्वदुक्तज्ञापकासंभवाच्च। तत्र स्थानेग्रहणं तु स्पष्टार्थमेव। किं च विधौ परिभाषेति प्रवादः 'इको गुणवृद्धी' (१।१।३) 'अचश्च' (१।२।२८) इत्यनयोर्विधीयत इत्यध्याहारमूलकः। अन्यत्र तु नास्याः फलम्" (परि. शे. परि. ९३. १०) इति नव्योक्तम्, तदसत्, अनित्यत्वादस्याः 'उदात्तस्वरितयोः०' (८।२।४) 'अल्लोपोऽनः' (६।४।१३४) इत्यनयोरिष्टसिद्धेः। भाष्यानुक्तत्वं तु न दोष इत्युक्तम्। 'उरण् रपरः' (१।१।५१) इति सूत्रे 'सिद्धं तु प्रसङ्गे रपरत्वात्' (१।१।५१वा.) इति वार्त्तिकव्याख्याने भाष्यकृता 'स्थाने' इत्यनुवर्तते। स्थानं च प्रसङ्गः। यथैवमादेशोऽविशेषितो भवति। आदेशश्च विशेषितः। कथम्। द्वितीयं स्थानग्रहणमनुवर्तते। तत्रैवमभिसंबन्धः करिष्यते 'उः स्थाने अण् स्थाने' इति वदता एतद्वचनस्य सूचनात् कैयटेन तत्र स्पष्टमुक्तत्वाच्च स्थानसंबन्धस्य 'षष्ठी स्थानेयोगा' (१।१।४९) इति परिभाषालभ्यत्वाभावेऽपि 'व्याख्यानतो विशेषप्रतिपत्तिः०' (परिभाषा १) इति परिभाषालभ्यत्वस्य तस्मिन्नेव सूत्रे भाष्ये स्पष्टतया ज्ञापकत्वसंभवाच्च। एतेन स्थानेग्रहणं स्पष्टार्थमित्यपास्तम्। 'इको गुणवृद्धी' (१।१।३) 'अचश्च' (१ २।२८) इत्यनयोः सूत्रयोर्विधीयत इत्यध्याहारे गौरवात् मानाभावाच्च उक्तपरिभाषयैव तत्फललाभात् 'क्ङिति च' इत्यादौ व्यवहितेऽपि निषेधप्रवृत्तेरपि एतत्परिभाषाफलत्वात् 'अचः परस्मिन्—' इति सूत्रे व्यवहितपूर्वाजादेशस्य स्थानिवत्त्वलाभस्यैतत्परिभाषाफलत्वात्। तत्फलं तु प्रतिदीव्नेत्यत्र 'भ्रोः०' (६।४।१९) इत्यूठोऽभावः। तस्माद्यत्र नेष्यते, तत्रानित्यत्वेन समाधानमिति दिक् ॥ ८७ ॥

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ ८८ ॥

तेन 'नमस्कृत्य हृषीकेशम्' इत्यत्र 'नमःस्वस्ति०' (२।३।१६) इति चतुर्थी

---

१ क. अनेन द्वित्वम्. २ क. च तस्य. ३ क. परिभाषया लभ्य.

बाधित्वा कारकविभक्तेस्तु बलीयस्त्वात् द्वितीया भवति। कारकविभक्तित्वं च क्रियान्वयिनि जायमानविभक्तित्वम्। तेन प्रथमाया अपि कारकविभक्तित्वम्। अभिहितकारकवाचिनी प्रथमेति पक्षे तु कारकार्थविभक्तित्वमेव कारकविभक्तित्वम्। इदं च न्यायसिद्धम्। सर्वेषां पदानां प्रथमं क्रियायामन्वयः पश्चात् तद्द्वारकः परस्परसंबन्धः इति पाश्चात्त्यसंबन्धापेक्षया प्रवर्तमानोपपदविभक्त्यपेक्षया प्राथमिकक्रियासंबन्धनिमित्तकारकविभक्तेर्बलीयस्त्वस्यान्तरङ्गन्यायसिद्धत्वात्। न चैवं 'यस्य च भावेन०' (२।३।३७) इति विहितसप्तम्यपेक्षया अधिकरणसप्तम्याः प्राबल्यं भाष्ये सूचितं विरुध्येतेति वाच्यम्, 'यस्य च भावेन०' (२।३।३७) इति अश्रुतलक्षणाक्रियापेक्षसप्तम्यपेक्षया श्रुतक्रियामात्रापेक्षाधिकरणसप्तम्या अन्तरङ्गत्वेन प्राबल्योपपत्तेः। न च नमस्यन्ति देवानित्यत्र एतत्परिभाषया चतुर्थीवारणं भाष्योक्तं विरुध्येतेति वाच्यम्। तत्र हि नमस्येति क्यजन्तस्य पूजावाचित्वमाश्रित्य कर्मणि द्वितीया उपपादिता। तत्र च क्यजर्थक्रियाद्वारक एव नमःशब्दार्थेन संबन्ध इति तद्विरोधाभावात्। अत एव तदुत्तरभाष्ये क्यजादीनामेव करणग्रहणानुवृत्त्या क्रियावाचित्वं साधितम्। एतेन 'नमःशब्दस्य क्रियावाचित्वम्' (परि. शे. परि. ९४) 'इयं च वाचनिक्येव' (परि. शे. परि. ९४) इत्यादि नव्योक्तमपास्तम् ॥ ८८ ॥

अनन्त्यविकारेऽन्त्यसदेशस्य ॥ ८९ ॥

तेन अदमुयङित्यत्र प्रथमदकाराकारयोर्मुत्वं न। इयं च परिभाषा अन्त्यसदेशतद्भिन्नयोः कार्यित्वेन प्रसक्तयोरेकलक्ष्यस्थितौ प्रवर्तते। तेन लीढः इत्यत्र यथा ढत्वं प्रवर्तते, एवं लेढव्यमित्यत्रापि भवति। यत्तु "अन्त्यसदेशत्वमन्त्यवर्णतद्वर्णयोरितराव्यवधानेन बोध्यम्। अत एव विद्ध इत्याद्यर्थं 'न संप्रसारणे०' (६।१।३७) इति चरितार्थम्। 'अलोपोऽनः' (६।४।१३४) इत्यादेरनस्तक्ष्णेत्यादावाद्याकारादावप्रवृत्तिरस्याः फलम्" (परि. शे. परि. ९५), तथा "मिमार्जिषतीत्यत्र वृद्ध्यप्रवृत्तिरप्यस्याः फलम्। तत्र हि वृद्धेः पूर्वमन्तरङ्गत्वात् द्वित्वे परत्वादभ्यासकार्ये ततोऽभ्यासेकारस्य वृद्धेर्दुर्वारत्वात्" (परि.शे. परि. ९५) इति नव्योक्तं तदसत्। अन्त्यसदेशत्वमन्त्यवर्णतद्वर्णयोरव्यवहितत्वमित्यभ्युपगमे अदसादेशे अदमुयङित्यसिद्धिप्रसङ्गात्। तत्र हि अन्त्यवर्ण इकारः। तस्य दकारस्य च मध्ये रेफो व्यवधायकोऽस्ति। न च

---

१ क. कारकविभक्तिबलीयस्त्वात्. २ ख. क्यजन्तार्थं. ३ क. वाचित्वं क्वाचित्कम्. ४ क. असिद्ध.

रेफस्यैवान्त्यसदेशत्वम्। दकारस्यान्त्यसदेशत्वाभावेन तत्रैतत्परिभाषाया अप्रवृत्तिप्रसङ्गाच्च। विर्दः इत्येतत्परिभाषोदाहरणभाष्यविरोधप्रसङ्गाच्च। अनस्तक्षणेत्युदाहरणमपि यजादिपरत्वेनानो विशेषणाद्भाष्ये दूषितम्। अङ्गस्यैव प्रत्ययं प्रत्युत्थिताकाङ्क्षत्वादुक्तवाक्यार्थवर्णनं न न्याय्यमिति भाष्यदूषणमप्यविचारितरमणीयम्। अङ्गस्य प्रत्ययसामान्यं प्रति उत्थिताकाङ्क्षत्वेऽपि यजादिप्रत्ययं प्रति तस्य तथात्वाभावात्। तेनाङ्गविशेषणे प्रयोजनाभावाच्च। न चानस्तक्षभ्यामित्यादौ अल्लोपवारणं तत्प्रयोजनम्। 'भस्य' (६।४।१२९) इत्यधिकारेण तत्र भसंज्ञाभावादेव तद्वारणसिद्धेः। तस्मात् कार्यकालपक्षाश्रयेणोपस्थाप्यमानं यचीति पदं स्वसार्थक्याय अन एव विशेषणं भवतीति भाष्याभिप्रायात्। मिमार्जिषतीत्युदाहरणमपि भाष्ये दूषितम्। कृतायां वृद्धौ अभ्यासह्रस्वप्रवृत्तेरिति ॥

यत्तु— परत्वादभ्यासकार्येषु प्रवृत्तेषु पश्चाद्वृद्धिप्रवृत्तौ सकृत्प्रवृत्तत्वात् पुनर्ह्रस्वो दुर्लभ इति भाष्यदूषणं तदप्ययुक्तम्। वृद्धिर्ह्यन्तरङ्गा, मृजेरङ्गस्य वृद्धिविधानात्। अङ्गाक्षिप्तप्रत्यये तद्विधानेऽपि 'सन्यङोः' (६।१।९) इति द्वित्वापेक्षया अन्तरङ्गत्वमेव। प्रत्ययग्रहणपरिभाषया द्वित्वस्यापि प्रकृतिप्रत्ययसापेक्षत्वात् प्रथमैकाजपेक्षत्वेन द्वित्वं बहिरङ्गमेव। साम्येऽपि परत्वाद् वृद्धौ कृतायां पश्चाद्द्वित्वमिति वृद्धेः सकृत्प्रवृत्तत्वान्न पुनरभ्यासेकारेऽपि प्राप्तिरिति समाधाने स्थिते, व्यक्तिपक्षमाश्रित्य इकारव्यक्तिविषयकशास्त्रस्य प्रागप्रवृत्तत्वात्पुनः प्रवृत्तिः स्यादित्यभिप्रायेण वार्त्तिककारेण प्रयोजनमुक्तम्। व्यक्तिपक्षाश्रयणे 'शदेः शितः' (१।३।६०) इति सूत्रभाष्योक्तरीत्या एतद्द्विव्यक्तिविषयकह्रस्वशास्त्रस्य प्रागप्रवृत्तत्वात्पुनः प्रवृत्तिरिति भाष्ये समाहितम्। जातिपक्षाश्रयणे वृद्धेः प्राक्प्रवृत्तत्वान्नैवाभ्यासे वृद्धिः प्राप्नोति। व्यक्तिपक्षाश्रये तु पुनर्ह्रस्वप्रवृत्त्या इष्टं सिध्यतीति तदाशयः। एवं हि भाष्ये न किंचिद्दूषणम्। एवमुपपत्तिसहानपि भाष्यग्रन्थान् तत्र तत्र दूषयत उपपत्तिशून्यान्भाष्यग्रन्थानाश्रित्य प्राचां ग्रन्थादूषयतः परस्योन्मत्तकेलिरित्यास्तां तावत्। इयं च परिभाषा प्रयोजनाभावान्न स्वीकार्या। अत एव 'न संप्रसारणे०' (६।१।३७) इति सूत्रे भाष्ये 'नैतस्याः परिभाषायाः प्रयोजनानि सन्ति' इत्युक्तम्। एतत्सूत्रसाध्यप्रयोजनानि न सन्तीत्यर्थ इति तदर्थकथनं तु संकोचे मानाभावादयुक्तम्। भाष्ये अप्रत्याख्यातप्रयोजनस्यानुपन्यासात्।

१ क. विद्भमित्येतत्. २ क. श्रयणोपस्थाप्यमानं. ३ क. प्रवृत्तत्वात्पुन. ४ क. पक्षाश्रये.
५ क. परस्योन्मत्तकेलिरास्तां.

अदमुयङिति प्रयोजनं तु अनियतत्वात् 'अदसोऽद्रेः०' (८।२।८० श्लो. वा.) इति वचनेनैव साध्यमिति दिक् ॥ ८९ ॥

नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ॥ ९० ॥

तेन हल्लोपः आभ्यामित्यत्र इदः कृत्स्नस्य भवति। अत्र अभ्यासोऽनर्थक इति अनभ्यासविकार इत्युक्तम्। तत्र 'शब्दस्यावृत्तिर्नार्थस्य' (१।१।६५ वा. २ प्रदीप) इति कैयटः। एवं च वदता द्विरुक्तस्थले संघात एवार्थवानिति सूचितं भवति। 'अभ्यासोऽनर्थकः। उत्तरखण्डस्त्वर्थवान्' इति तु प्रतिज्ञामात्रम्। विनिगमनाविरहात्, अभ्यासस्याप्रयोगप्रसङ्गाच्च। उत्तरखण्डेनैवार्थस्य प्रत्यायितत्वात्। 'सिद्धं त्वन्वयव्यतिरेकाभ्याम्' (१।२।४५ वा.९) इत्यर्थवत्सूत्रे वार्त्तिककारोक्त्या अर्थवत्त्वस्य लोकगम्यत्वेन विशिष्ट एवान्वयव्यतिरेकाभ्यामर्थवत्ताग्रहणादिति दिक्। एतत्परिभाषाप्रत्याख्यानम् 'अलोन्त्यात्०' (१।१।६५) इति भाष्ये स्पष्टम् ॥ ९० ॥

प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः ॥ ९१ ॥

तेन ब्राह्मणवत्सा च ब्राह्मणीवत्सश्च इत्यत्र एकशेषो न भवति, अप्रधानीभूतब्राह्मणादिपदगतविशेषस्यापि विद्यमानत्वात् प्रधानमात्रकृतविशेष एवैकशेषप्रवृत्तेः ॥ ९१ ॥

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ ९२ ॥

अर्थवद्ग्रहणपरिभाषया अर्थे गृह्यमाणे समुदायप्रसिद्धार्थो गृह्यते झटित्युपस्थितिकत्वात्, नावयवप्रसिद्धार्थः। तेन स्वस्रादिषु मातृशब्दस्य जननीरूपार्थविशिष्टस्यैव ग्रहणम्। तेन परिच्छेत्तृवाचिनो ङीप् भवत्येव (४।१।५) मात्रीति। लाघवन्यायमूलेयम्। यत्तु "योगजबोधे केवलरूढिज्ञानस्य प्रतिबन्धकत्वव्युत्पत्तिरेतस्या मूलमिति" (परि. शे. परि. ९८) तद्व्यर्थम्। रूढौ हि स्मृतस्य पदार्थस्य झटित्युपस्थितिकस्य शब्दविशेषणत्वम्। योगे तु स्मृतपदार्थानां परस्परसमन्वये सति वाक्यार्थविषयोपस्थितस्य मन्दोपस्थितिकत्वं स्पष्टमेव। यदि योगजबोधे तदनालिङ्गितरूढ्युपस्थितिः प्रतिबन्धिका स्यात्, परिच्छेदकर्तृबोधो मातृशब्दान्नैव स्यादित्यास्तां तावत् ॥ ९२ ॥

---

१ क. कृत्स्नस्य लोपः भवति. २ क. विकारेषु. ३ क. ह्रस्वादिषु मात्रशब्दस्य.

सामान्यातिदेशे विशेषानतिदेशः ॥ ९३ ॥

तेन 'आशंसायां भूतवच्च' (३।३।१३२) इति भूतवद्भावातिदेशे भूतसामान्यसंबद्धस्य लुङ एवातिदेशः, न तु 'अनद्यतने लङ्' (३।२।१११) 'परोक्षे लिट्' (३।२।११६) इति भूतविशेषसंबद्धयोर्लङ्लिटोः । शब्दोपात्तसामान्यस्य स्वसंबन्धिकार्योपस्थापकत्वात् झटित्युपस्थितसामान्यकार्येणैव नैराकाङ्क्ष्यमत्र बीजम् । स्थानिवत्सूत्रे (१।१।५६) तु अनल्विधाविति यत्नाद्विशेषोऽप्यतिदिश्यत इति स्थानिवत्सूत्रभाष्यकैयटयोः ॥ ९३ ॥

प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् ॥ ९४ ॥

तेन 'सनाशंसभिक्ष उः' (३।२।१६८) 'वले' (६।३।८) इति सूत्रयोः सनधातोः पचाद्यजन्तवलशब्दस्य च न ग्रहणम् । इयं च वाचनिक्येव । वस्तुतस्तु इयं प्रयोजनाभावान्न स्वीकार्या । 'सनाशंस०' (३।२।१६८) इत्यत्र शास्त्रस्य भूयोविषयत्वलाभाय प्रत्ययो गृह्यते । यथा एकाज्द्विर्वचनं शास्त्रस्य भूयोविषयत्वलाभाय समुदायैकाचो भवति नावयवैकाचाम् । एवमिहापि प्रत्ययग्रहणे सर्वेभ्यो धातुभ्यः सनुत्पत्त्या शास्त्रस्य बुभूषुरित्यादिभूयोविषयत्वं लभ्यते । धातोर्ग्रहणे एक एव विषयः स्यात् ॥ अपि च यत्र धातोर्ग्रहणमिष्टम्, तत्र 'जनसनखनाम्०' (६।४।४२) इत्यादावकारेण निर्देशं करोति । न चात्रापि सनेत्यकारान्त एव च्छेत्तव्य इति वाच्यम्, तथा सत्यसंदेहाय 'सनभिक्षाशंस उः' इत्येव ब्रूयात् । अतोऽकारेणानिर्देशादपि प्रत्ययस्यैव ग्रहणम् । 'वले' (६।३।११८) इत्यत्रापि 'लक्षणप्रतिपदोक्तयोः०' (परिभाषा ९७) इति न्यायेन प्रतिपदोक्तवलस्य प्रत्ययस्यैव ग्रहणम्, पचाद्यजन्तस्य लाक्षणिकत्वात् । अत एव 'तित्स्वरितम्' (६।१।१८५) इति सूत्रे

> " तस्यास्तु परिभाषाया भाष्यवार्त्तिकयोरिह ।
> अदर्शनादयं यत्नो महानस्माभिरादृतः " (६।१।८५ पदमञ्जरी)

इति हरदत्तेनोक्तम् । कैयटेनापि—'इयं परिभाषा क्वापि नाश्रिता' इत्युक्तम् । यद्यपि 'अङ्गस्य' (६।४।१) इति सूत्रप्रत्याख्यानाय भाष्यकृतेयं कण्ठत उक्ता, तथापि प्रयोजनाभावान्न स्वीकार्येति तदाशयं तद्व्याख्यातार आहुः ॥ ९४ ॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ ९५ ॥

तेन पराजयति सेनेत्यत्र औचन्तेन पराशब्देन योगे 'विपराभ्यां जेः'

---

१. सामान्यस्य. २ क. उपस्थापित. ३ क. महैकाचो. ४ क. 'एवम्' इति न पठ्यते.
५ क. सनुत्पत्त्या बुभूषुरित्यादि शास्त्रस्य भूयो. ६ क. कण्ठोक्ता. ७ क. दाद्यन्तेन.

(१।३।१९) इत्यात्मनेपदं न। उपसर्गेण विशब्देन साहचर्यात्तादृशस्यैव पराशब्दस्य ग्रहणात्। पक्षिवाचिनो विशब्दस्य संभवेऽपि परस्परसाहचर्यादुपसर्गग्रहणं [1]व्याख्येयमिति कैयटः। अयं न्यायोऽनित्यः। 'द्विस्त्रिः०' (८।३।४३) इति सूत्रे सुजन्ताभ्यां द्विस्त्रिःशब्दाभ्यां साहचर्याच्चतुःशब्दस्यापि सुजन्तस्य ग्रहणे सिद्धे तदर्थं कृत्वोर्थग्रहणात्॥ ९५॥

श्रुतानुमितयोः श्रुतसंबन्धो [2]बलीयान्॥ ९६॥

तेन प्रियसक्थ्ना ब्राह्मणेनेत्यत्र अङ्गस्य पुंस्त्वेऽपि [3]सक्थिशब्दस्य नपुंसकत्वादनङ् (७।१।७५) सिध्यति। 'जश्शसोः शि.' (७।१।२०) 'नपुंसकाच्च' (७।१।१९) 'नपुंसकस्य झलचः' (७।१।७२) इत्यत्र तु नपुंसकग्रहणेन अङ्गमेव विशेष्यते। तेन प्रियत्रपू प्रियत्रपव इत्यत्र शिशीनुमो न भवन्तीत्याहुः। यद्यपि 'येन विधिः' (१।१।७२) इति सूत्रे 'येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः' (१।१।७२ वा: १) इति वार्त्तिकपर्यालोचनया तदन्तस्यैव [4]श्रुतत्वं श्रुतस्य तु तद्विशेषणत्वाद्विशेषणान्तरसंबन्धायोग्यता चेति गम्यते, तथापि 'सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात्' (१।१।७२ वा. २) इति तदुत्तरवार्त्तिके यथेष्टं विशेषणविशेष्यभावप्रदर्शनात् शिशीनुम्विधिषु अङ्गेन नपुंसकं विशेष्यते। एवं चासंभवात्तदन्तविधिनिवृत्तिः। तेन अङ्गस्यैव नपुंसकत्वं फलति। तेन [5]प्रियत्रपू इत्यादौ नातिप्रसङ्गः। अस्थ्याद्यनङ्विधौ तु अस्थ्यादिभिरिव नपुंसकेनापि अङ्गं विशेष्यते— नपुंसकान्तमस्थ्याद्यन्तं यदङ्गमिति। विशेषणविशेष्ययोर्यथेष्टत्वस्य प्रपञ्चोऽयम्। "शिशीनुम्विधिषु अङ्गस्य नपुंसकं विशेषणम्" (परि. शे. परि. १०४) इति वदतो नव्यस्य तदन्तविधिना प्रियत्रपू इत्यादौ दोषो दुर्वार इत्यास्तां तावत्॥ ९६॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्॥ ९७॥

प्रतिपदोक्तमिति 'लक्षणेनाभि०' (२।१।१४) इति समासः। यत्पदं गृहीत्वा यत्कार्यमुच्यते, तत्पदं तत्पदोच्चारणविहितस्थले भवति। यथा— 'विभाषा दिक्समासे०' (१।१।२८) इति बहुव्रीहौ दिक्पदसंशब्दनेन विधीयमानः सर्वनामसंज्ञाविकल्पः 'दिङ्नामान्यन्तराले' (२।२।२६) इति दिक्पदसंशब्दितबहुव्रीहावेव भवति। तस्य दिक्पदवत्त्वेन झटित्युपस्थितिकत्वात्। तेन 'अनेकमन्यपदार्थे' (२।२।२४) इति

---

[1] क. व्याख्येयमिति विपराभ्यामिति सूत्रे कैयटः। [2] क. बलवान्. [3] क. सक्थिन्शब्दस्य. [4] क. श्रुतत्वं तस्य तु. [5] क. प्रियत्रपु.

बहुव्रीहौ दक्षिणपूर्वाया इति सर्वनामसंज्ञाविकल्पो न । लक्षणशब्देन लक्ष्यते यथाकथंचित् ज्ञाप्यते इति [1]मन्दोपस्थितिकमुच्यते । झटित्युपस्थितिकार्येनैव शास्त्रस्य नैराकाङ्क्ष्ये मन्दोपस्थितिकस्य अग्रहणन्यायमूलेयम् । अनित्या चेयम्, 'भुवश्च महाव्याहृतेः' (८।२।२७) इति सूत्रे महाव्याहृतिग्रहणात् । तद्धि भूशब्दाज्जसि उवङि मन्दोपस्थितिकभुवःशब्दस्य ग्रहणव्यावृत्तये क्रियते । यदीयं परिभाषा स्यात्, तर्हि तदानर्थक्यं स्पष्टमेव ॥ ९७ ॥

गामादाग्रहणेष्वविशेषः ॥ ९८ ॥

तेन 'गै शब्दे' इत्यस्माद्धातोः क्तप्रत्यये गारूपस्य लाक्षणिकत्वेऽपि 'घुमास्था०' (६।४।६६) इति ईत्वं भवति गीतमिति । तथा 'मेङ् प्रणिदाने' इत्यस्य 'आदेचः०' (६।१।४५) इत्यात्वे कृते प्रणिमातेत्यत्र मारूपस्य लाक्षणिकत्वेऽपि 'नेर्गद०' (८।४।१७) इति णत्वं सिध्यति । तथा 'देङ् रक्षणे' इत्यस्य दारूपस्य लाक्षणिकत्वेऽपि घुसंज्ञा सिध्यति । ज्ञापकमदाविति प्रतिषेधार्थं क्रियमाणं दैपः पित्त्वम् । इतरथा लाक्षणिकत्वादेव दैपो दारूपस्याग्रहणसिद्धेः । अविशेष इत्युक्तेः '[2]निरनुबन्धकपरिभाषा लुग्विकरणपरिभाषा चानया बाध्यते 'गातिस्था०' (२।४।७७) इति सूत्रे तु इणादेशस्य ग्रहणं वाचनिकमेव ॥ ९८ ॥

प्रत्येकं वाक्यपरिसमाप्तिः ॥ ९९ ॥

समुदाये वाक्यपरिसमाप्तिः ॥ १०० ॥

[3]इदं न्यायद्वयं लौकिकम् । पूर्वन्यायेन प्रत्येकं गुणवृद्धिसंज्ञे भवतः । उत्तरन्यायेन संयोगसंज्ञादयः समुदाये भवन्ति । देवदत्तादयो भोज्यन्तामित्युक्ते क्रिया स्वभावात्प्रत्येकं परिसमाप्यते । नाढ्यक्रिया तु समुदाये परिसमाप्यते (१।१।१ वा. १२ प्रदीप) इति कैयटः ॥ १०० ॥

अभेदका इह शास्त्रे गुणाः ॥ १०१ ॥

तेन 'वृद्धिरादैच्' (१।१।१) इत्यत्र तपरकरणस्य ऐजर्थत्वेऽपि षड्भिस्याकारस्य वृद्धिसंज्ञा सिध्यतीति भाष्ये स्पष्टम् । ज्ञापकम् 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' (७।१।७५) 'अड्डुदात्तः' (६।४ ७१) इत्युदात्तवचनम् । यदि भेदका गुणाः, तर्ह्युदात्तोच्चारणेनैव सिद्धेरुदात्तग्रहणं व्यर्थं स्यात् । [4]नान्तरीयक उच्चार्यमाणो गुणः प्रयत्नमन्तरेण न विवक्ष्यते । 'अनुदात्तादेः' (४।२।४४, ४।३।१४०) इत्यादौ शब्दोपा-

१ क. महोपस्थितिकत्वं. २ ख. निरनुबन्धपरिभाषा. ३ ख. इदं च न्यायद्वयं. ४ क. नान्तरीयोच्चार्यमाणो गुणः.

सत्तु गुणो विवक्ष्यत एव। 'उञः ऊँ' (१।१।१७, १८) इत्यत्र स्थानेन्तरतमपरिभाषया अननुनासिके उच्चारणीये अनुनासिकोच्चारणं विवक्षार्थम्। "न चैवमस्थ्यादीनां 'नब्विषयस्य' (फिट्सूत्र २६) इत्याद्युदात्तानामन्त्यादेशस्यानङः स्थान्यनुरूपे अनुदात्त एवोच्चारणीये उदात्तोच्चारणं विवक्षार्थमिति कथमस्य ज्ञापकत्वमिति वाच्यम्। परमास्थिशब्दादावन्तोदात्ते उदात्तगुणकस्यापि स्थानित्वसंभवेन तद्विवक्षायां मानाभावात्। 'चतसर्याद्युदात्तनिपातनं करिष्यते' (७।२।९९ वा. २ महाभाष्य) 'पदादयोऽन्तोदात्ता निपात्यन्ते' (६।३।५२ वा. १ महाभाष्य) 'सहस्य स उदात्तो निपात्यते' (६।३।७८ महाभाष्य) इत्यादिभाष्यं तु एकश्रुत्याष्टाध्यायीपाठे क्वचिदुदात्ताद्युच्चारणं विवक्षार्थमित्याशयेन। त्रैस्वर्येण पाठ इति पक्षे तु ज्ञापकपरं भाष्यमिति कैयटादयः" (परि. शे. परि. १०९)।

यत्तु "निपातनं नाम अन्यादृशे प्रयोगे प्राप्ते अन्यादृशप्रयोगकरणम्। तद्रूपत्वात्तत्र तत्रोदात्तादिविवक्षा। 'तिसृचतसृ' (७।२।९९) इत्यत्रापि द्वन्द्वप्रयुक्ते अन्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणम्। अन्यत्र स्थान्यनुरूपे स्वरे उच्चारणीये यदन्यथोच्चारणं तद् विवक्षार्थम्। संपूर्णाष्टाध्यायी आचार्येण एकश्रुत्या पठितेत्यत्र न मानम्। क्वचिदस्त्येकश्रुत्यापि पाठः। यथा— 'दाण्डिनायन०' (६।४।१७४) इति सूत्रे ऐक्ष्वाकेति। यद्यप्यध्येतार एकश्रुत्यैवाङ्गानि पठन्ति, तथापि व्याख्यानतोऽनुनासिकत्वादिवदुदात्तनिपातनादिज्ञानमित्याहुः" (परि. शे. परि. १०९) इति पक्षान्तरं नव्योक्तं तदसत्। एवं हि अस्थ्यादावनङयपि व्याख्यानाद्गम्यमानमुदात्तत्वं विवक्षार्थमित्युदात्तग्रहणज्ञापनपरभाष्यविरोधः। किं च व्याकरणे यावत्कार्यजातं तत्सर्वमन्यथा प्रयोगे प्राप्ते क्रियते इति सर्वत्र तदुच्चारणं विवक्षार्थं स्यात्। 'तिसृचतसृ' (७।२।९९) इत्यत्र द्वन्द्वप्रयुक्तान्तोदात्ते कर्तव्ये अन्यथोच्चारणं विवक्षार्थमित्यपि न। अनङ्यपि 'फिषोऽन्तः' (फिट्सूत्र १) इत्यन्तोदात्ते कर्तव्ये आद्युदात्तोच्चारणं विवक्षार्थं स्यादिति सर्वथा ज्ञापनपरभाष्यविरोधः। तस्मात् कैयटाद्युक्तैव व्यवस्था युक्ता। यदपि "विधेयाणिविषये अप्रत्यय इति निषेधात् 'मादुपधायाः—' (८।२।९) इति मकारस्य विधीयमानं वत्वमनुनासिकं न" (परि. शे. परि. १०९) इति नव्योक्तम्, तदपि स्थान्यनुसारेणानुनासिके उच्चारणीये अननुनासिकस्य विवक्षासंभवादयुक्तम् ॥ १०१ ॥

बाधकानि निपातनानि ॥ १०२ ॥

नाप्राप्ते अन्यथाप्रयोगे निपातनस्यारम्भादपवादतुल्यत्वमिति सर्वादिसूत्रे भाष्ये

---

१ क. अनुदात्ते उच्चारणीये. २ क. ज्ञापकमिति. ३ क. स्थानित्वेन. ४ क. अननुनासिको न. ५ ख. निपातस्य. ६ ख. तुल्यत्वादिति.

उक्तम् । 'पुराणप्रोक्तेषु०' (४।३।१०५) इति निपातनात् पुरातनशब्दस्य बाधः प्राप्तः । पृषोदरादित्वात् (६।३।१०९) न भवतीति कैयटः । 'अबाधकान्यपि निपातनानि' (पुरु. परि. वृत्ति. परि. ९९) इति तु भाष्यविरुद्धम् ॥ १०२ ॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥ १०३ ॥

सिद्धमपि पुनः प्रवर्तयति शास्त्रमित्यर्थः । तेन उखधातोर्लिटि द्वित्वे ह्रस्वत्वे हलादिशेषे सवर्णदीर्घत्वे अभ्यासग्रहणेन ग्रहणात् पुनर्ह्रस्वो न भवति । यद्यह्रस्व एव ह्रस्वशास्त्रेण प्रवर्तितव्यम्[1], तर्हि ह्रस्वदशायां ह्रस्वशास्त्राप्रवृत्तौ कृते दीर्घे ह्रस्वशास्त्रप्रवृत्तौ उक्तरूपं न सिध्येत् । तदुक्तम्––'इको झल्' (१।२।९) इति सूत्रे भाष्ये 'कृतकारि खल्वपि शास्त्रं पर्जन्यवत्' (१।२।९ महाभाष्य) इति । न च प्राग्[2] ह्रस्वप्रवृत्तावपि पुनर्दीर्घे व्यक्तिभेदात् ह्रस्वशास्त्रं कुतो न प्रवर्तेत[3] इति वाच्यम् जातिपक्षे तदभ्यासावयवाच्त्वजात्यवच्छिन्ने[4] साधुत्वपरिच्छेदकतया शास्त्रस्य सकृत्प्रवृत्त्या[5] चरितार्थत्वेन पुनः प्रवृत्तौ बीजाभावात् । पुनः प्रवृत्तिस्वीकारे च बभूवेत्यत्र ह्रस्वशास्त्रस्यासकृत्प्रवृत्तिसंभवेन स्थानेन्तरतमसूत्रे 'यथा तप्ते भ्राष्ट्रे तिलाः प्रक्षिप्ता मुहूर्तमपि नावतिष्ठन्ते एवमिमे वर्णा मुहूर्तमपि नावतिष्ठेरन्' (१।१।५० वा. २ महाभाष्य) इति भाष्योक्तरीत्या अप्रवृत्तनित्यविध्यविषयत्वलक्षणसाधुत्वपरिच्छेदानापत्तेः । यदा तु व्यक्तिपक्षः, तदा व्यक्तिभेदेन शास्त्रभेदात्पुनरपि तच्छास्त्रं प्रवर्तत एव । अत एव मिमार्जिषतीत्यत्र पुनर्ह्रस्वप्रवृत्तिरित्युक्तं भाष्ये (६।१।१३ वा. ९ महाभाष्य) । एतौ च जातिव्यक्तिपक्षौ लक्ष्यवशाद्व्यवस्थितौ ॥

यत्तु— "'लक्ष्ये लक्षणं सकृदेव प्रवर्तते' इत्यत्र 'समः सुटि' (८।३।५) इति सूत्रारम्भो मानम्, एतदभावेऽपि लक्षणस्य पुनः प्रवृत्तौ 'समो वा लोपमेके' (१।१।२७ वा. १ महाभाष्य) इति भाष्योक्तलोपेन एकस्य सकारस्य, 'अनचि च' (८।४।४७) इति द्वित्वेन द्विसकारस्य, पुनर्द्वित्वप्रवृत्त्या त्रिसकारस्य सिद्धौ तद्वैयर्थ्यात् 'संप्रसारणाच्च' (६।१।१०८) इति सूत्रे भाष्ये स्पष्टमुक्तत्वाच्च" (परि. शे. परि. १११) इति नव्योक्तं तन्न, भाष्यकृद्वचनेन सूत्रवैयर्थ्यं संपाद्य ज्ञापकत्ववर्णनस्यायुक्तत्वात् । स एवायं सकार इति प्रत्यभिज्ञानेन तत्र व्यक्तिभेदाभावेन पुनर्द्वित्वशास्त्रप्रवृत्त्ययोगेन त्रिसकाररूपसिद्धये तदावश्यकत्वाच्च । न चादेशः स्थानिसकारादन्य इति वाच्यम्, एवं सति द्वित्वशास्त्रप्रवृत्तेरविरामप्रसङ्गात् । वैरूप्यविशिष्टव्यक्तेरेव व्यक्त्यन्तरपदार्थत्वौचित्यात् । 'संप्रसारणाच्च' (६।१।१०८)

---

१ क. प्रवर्तितव्यस्तर्हि. २ क. ख. प्राक्. ३ ख प्रवर्तते इति. ४ क. तदभ्यासावयवाच्त्वजात्यवच्छिन्ने. ५ क. शास्त्रस्य सकृत्.

इति सूत्रे भाष्ये 'संप्रसारणपूर्वत्वे समानाङ्गग्रहणम्' इति चोदयित्वा, शेकद्ध्र्यमित्यत्र[1] संप्रसारणपूर्वरूपं[2] न भवतीति तस्य प्रयोजनमप्युक्त्वा, 'कार्यकृतत्वाद्वा सिद्धम्' इति प्रतिज्ञाय, सकृत् शास्त्रं कृतमिति कृत्वा पुनर्न भविष्यतीत्युपपाद्य, 'विषम उपन्यासः' इत्यादिना 'तस्माददपरिहारः' इत्यन्तेन सकृत्कार्यस्य कृतत्वादिति समाधानं दूषितम्। कैयटेनापि—'शास्त्रस्यास्मिन्विषये प्रवृत्तत्वात्पुनः प्रवृत्त्यभावः' इति परिहाराभिप्राय-मुक्त्वा, 'फलभेदे पुनः शास्त्रं प्रवर्तेत एव' इति दूषणग्रन्थस्याभिप्राय उक्तः ॥

'सिचि वृद्धिः०' (७।२।१) इति सूत्रस्थभाष्यं तु जातिपक्षाश्रयेण[3] नेयम्। 'सहिवहोरोदवर्णस्य' (६।३।११२) इति सूत्रे वर्णग्रहणसामर्थ्यादप्ययमर्थः साधयितुं शक्यते। तद्धि प्रागेव वृद्धिप्रवृत्त्यर्थम्। यदि आत्त्वे कृते 'संप्रसारणाच्च' (६।१।१०८) इति सूत्रभाष्योक्तरीत्या व्यक्तिभेदात्पुनर्वृद्धिः प्रवर्तेत, तर्हि प्राक्प्रवृत्तेः प्रयोजनाभावात् व्यर्थं तत्स्यात्। यदि व्यक्तिभेदेऽपि नियमेन सकृदेव शास्त्रप्रवृत्तिः स्यात्, तर्हि 'न संप्रसारणे संप्रसारणम्' (६।१।३७) इति सूत्रम्, 'ष्यङः संप्रसारणम्०' (६।१।१३) इतिसूत्रस्थभाष्यम्, 'संप्रसारणाच्च' (६।१।१०८) इतिसूत्रस्थभाष्यम्, 'चिणो लुक्' (६।४।१०४) इतिसूत्रस्थभाष्यम्, 'शदेः शितः' (१।३।६०) इति सूत्रे 'अस्तु शब्दान्तरस्याकृत आडिति कृत्वा पुनराट् भविष्यति' इति भाष्यं च विरुध्येत। तस्मादत्र नव्योक्तो लक्षणस्य सकृत्प्रवृत्तिनियमोऽयुक्त इति दिक् ॥ १०३ ॥

निषेधाश्च बलीयांसः ॥ १०४ ॥

यत्तु— 'निषेधाश्च बलीयांसः' इति पठित्वा "अन्तरङ्गादुपजीव्यादपि बलीयांस इत्यर्थः। तेन 'स्यन्दू प्रस्रवणे' इत्यस्माल्लुटि स्यन्त्स्यतीत्यत्र सकारादिविशेषापेक्ष-त्वादात्मनेपदाभावनिमित्तत्वाच्च 'न वृद्भ्यश्चतुर्भ्यः' (७।२।५९) इति निषेधस्य बहि-रङ्गत्वेन अन्तरङ्गत्वादूदिल्लक्षणस्य इड्विकल्पस्याप्रवृत्तिः। अन्तरङ्गापेक्षयापि प्रतिषेधस्य[4] बलीयस्त्वात्। चतुर्ग्रहणं तु भाष्ये प्रत्याख्यातम्। अत एव 'नाज्झलौ' (१।१।१०) इत्यत्र सवर्णसंज्ञाया विकल्पो न। इतरथा उपजीव्यत्वात्तेन 'न तौ पशौ करोति' इत्यत्र मीमांसकोक्तरीत्या विकल्पापत्तिः। विध्युन्मूलनाय प्रवृत्तिरस्या बीजम्" (परि. शे. परि. ११२) इति नव्योक्तम्, तदयुक्तम्। 'वृद्भ्यः' इति बहुवचननिर्देशेन वृता-दिषु सर्वेषु 'न वृद्भ्यश्चतुर्भ्यः' (७।२।५५) इति निषेधेन प्रवर्तितव्यमिति कल्पनेन

---

१ ख. एकद्ध्र्यमित्यत्र. २ ख. पूर्वं न. ३ क. पक्षाभावे. ४ क. प्रतिषेधस्य.

अन्तरङ्गस्यापि विकल्पस्य प्रतिषेधसिद्धेः । अत एव चतुर्ग्रहणप्रत्याख्यानपरभाष्यस्य 'कृपेरनन्तरं वृत्करणात्' इत्ययमर्थः कैयटेन विवृतः । तेन नाद्यं प्रयोजनम् । द्वितीयमपि न । अपौरुषेये हि वाक्ये तात्पर्यस्य [1]शास्त्रैकगम्यतया प्राप्तिमन्तरेण निषेधायोगात्प्राप्तेश्च शास्त्रातिरिक्तप्रमाणेनासंभवात्प्रापकशास्त्रस्याप्रामाण्यायोगात्तत्र विकल्पः स्वीकृतो मीमांसकैः । पुंवाक्ये तु अभिप्रायस्य मानान्तरगम्यत्वाद्विधेर्निषेधाविषयविषये तात्पर्यनिर्णयान्न विकल्पः । अत एव सर्वादिसूत्रे (१।१।२७) भाष्ये 'अथ कः प्रतिषेधो नाम । अविशेषेण किंचिदुक्त्वा, विशेषेण नेत्युच्यते । तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते इदं न भवतीति' इत्युक्तम् । 'द्वन्द्वे च' (१।१।३१) 'विभाषा जसि' (१।१।३२) इत्येतत्तु ईदृगर्थे आचार्यस्य तात्पर्यग्राहकमिति ॥ १०४ ॥

[2]अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति ॥ १०५ ॥

तेन 'यावादिभ्यः कन्' (५।४।२९) 'गुप्तिज्किद्भ्यः सन्' (३।१।५) इत्येतौ प्रत्ययौ स्वार्थे भवतः । प्रत्यय इति महासञ्ज्ञाकरण परंपरयापि [3]प्रकृत्यर्थमादाय उपपद्यते इति तदेवास्य मूलम् ॥ १०५ ॥

पूर्वत्रासिद्धीयमद्विर्वचने ॥ १०६ ॥

'पूर्वत्रासिद्धम्' (८।२।१) इत्यधिकारे भवं नलोपादि पूर्वत्रासिद्धीयम् । [4]गहादित्वात् (४।२।१३८)छः । तत् द्विर्वचनादन्यत्र असिद्धं भवति । अथवा पूर्वत्र सपादसप्ताध्याय्यामसिद्धं नलोपादि, तत्र भवमसिद्धत्वं पूर्वत्रासिद्धीयम्, तत् द्विर्वचने कर्तव्ये न भवतीति हरदत्तः । तेन द्रोग्धा द्रोग्धा, द्रोढा द्रोढा इति सिध्यति । द्रुहधातोस्तृचि 'एकाच०' (७।२।१०) इति इण्निषेधे 'वा द्रुह०' (८।२।३३) इति कदाचित् घत्वं कदाचित् ढत्वम् । तत्र यदि द्विर्वचने घत्वादेरसिद्धत्वं स्यात्, तर्हि द्रुहृतृशब्दस्य द्वित्वे (८।१।१) पश्चात् पाक्षिकघत्वढत्वयोः प्रवृत्तौ द्रोग्धा द्रोढा, द्रोढा द्रोग्धेत्यनिष्टं प्रसज्येत । यदा तु सिद्धत्वम्, तदा घत्वविशिष्टस्य ढत्वविशिष्टस्य द्वित्वात् द्रोग्धा द्रोग्धा द्रोढा द्रोढेत्युभयत्रैकरूप्यं सिध्यति ॥

ज्ञापकम्— 'सर्वस्य द्वे' (८।१।१) इति सूत्रे सर्वग्रहणम् । तद्धि अर्शआद्यजन्तस्य रूपम्, सर्वकार्यविशिष्टस्येत्यर्थः । यादृशकार्यविशिष्टस्य द्वित्वं न प्राप्नोति, तादृशसर्वकार्यविशिष्टस्य द्वित्वार्थं क्रियते । पूर्वत्रासिद्धीयकार्यविशिष्टस्य द्वित्वं न

---

१ क. न्यायैकगम्यतया. २ क. अनिर्दिष्टार्थाः स्वार्थे. ३ क. स्वप्रकृत्यर्थमादाय. ४ क. 'गहादित्वाच्छः' इत्यारभ्य 'पूर्वत्रासिद्धीयम्' इत्यन्तं न पठ्यते.

प्राप्नोति, 'पूर्वत्रासिद्धम्' (८।२।१) इत्यसिद्धत्वात्। तद्वारणार्थं क्रियमाणं सर्वग्रहणं ज्ञापकम्। सर्वग्रहणस्य प्रयोजनान्तरं प्राचीनैर्निरस्तं तत एवावगन्तव्यम्। यत्तु "यत्र सिद्धत्वासिद्धत्वयोः फलभेदस्तत्रैवेयम्। कृष्णर्द्धिरित्यादौ जश्त्वात्पूर्वमनन्तरं वा द्वित्वे रूपे विशेषाभावेन नास्याः प्रवृत्तिः" (परि. शे. परि. ११७) इति नव्योक्तं तन्न। जश्त्वात्पूर्वं धकारस्य द्वित्वं प्रवर्तने, कृते जश्त्वे दकारस्येति शब्दभेदस्य स्पष्टत्वात्। इहैतत्परिभाषाया अप्रवृत्तिसाधने प्रयोजनाभावाच्च। अनित्येयम्। 'उभौ साभ्यासस्य' (८।४।२१) इति लिङ्गात्। तेन औजि[1]ढदिति सिध्यति ॥ १०६ ॥

एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भविष्यति ॥ १०७ ॥

तेन स्वस्वामिभावसंबन्धे गवां स्वामीति षष्ठ्या प्रतिपादयितुमुपक्रान्ते अश्वस्वामित्वप्रतिपादनाय षष्ठ्येव भवति अश्वानां चेति। अश्वेष्विति शब्दान्तरप्रयोगे अर्थान्तरसंशयप्रसङ्गात्। असंदिग्धार्थप्रतिपादकोपादाने संभवति संदिग्धार्थप्रयोगस्याकर्तव्यत्वादुपस्थितायाः षष्ठ्या एवान्यत्रापि प्रयोगनिर्वाहकत्वोपपत्तेः। उपस्थितिलाघवमत्र मूलम् ॥ १०७ ॥

संप्रसारणं तदाश्रयं च कार्यं बलवत् ॥ १०८ ॥

तेन वि[2]व्यथे इत्यत्र हलादिशेषात्पूर्वं संप्रसारणे विव्यथे इति सिध्यति। पूर्वं हलादिशेषे (७।४।६०) वस्य संप्रसारणं स्यात्। इदं चोभयोर्षांग्रहणस्य (६।१।१७) प्रयोजनं 'लिट्यभ्यासस्योभयेषाम्' (६।१।१७) इति सूत्रे भाष्ये स्पष्टम् ॥ १०८ ॥

श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च। यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥ १०९ ॥

'हन्तियातिवाति०' (८।४।१७) इत्यादयः श्तिपा निर्देशाः। 'भरज्ञपिसनाम्' (७।२।४९) इति शपा निर्देशः। अनुबन्धनिर्देशो द्विधा— 'शीङः सार्वधातुके गु[3]णः' (७।४।२१) इत्यादिः स्वरूपेण। 'अनुदात्तङितः०' (१।३।१२) इत्यादिः सामान्येन च। गणनिर्देशः— 'दिवादिभ्यः श्यन्' (३।१।६९) इत्यादिः। यत्र च एकाज्ग्रहणम्। एतानि पञ्च कार्याणि यङ्लुकि न भवन्तीत्यर्थः। एषा च परिभाषा पूर्ववैयाकरणपठिता (पुरु.परि.पाठ.परि.९४) अभियुक्तपरंपरया तत्तन्निर्देशसार्थक्याय स्वीकृता [4]भाष्याविरुद्धा

1 क. ओजढदिति. 2 क. विव्यधे. 3 क. 'गुणः' इति न पठ्यते. 4 क. भाष्यविरुद्धा च.

च। उदाहरणानि निर्देशोपन्यासेनोहितुं शक्यानि। इदं च 'एकाच उपदेशेऽनुदात्तात्' (७।२।१०) इति सूत्रे एकाज्ग्रहणेन ऐकदेशानुमतिद्वारा ज्ञाप्यत इति सिद्धान्तकौमुद्याम्।

यत्तु "एकाज्ग्रहणं वधिव्यावृत्त्यर्थम्। न च वधिः स्थान्युपदेशे एकाजेवेति वाच्यम्। साक्षादुपदेशसंभवेन एतद्विषये स्थान्युपदेशाग्रहणात्। उपदेशस्थावच्छेदेन एकाच इत्यर्थाच्च। किं चोत्तरार्थमेकाज्ग्रहणम्। अत एव जागरितवानित्यादौ उपदेशे उगन्तत्वमादाय 'श्र्युकः किति' (७।२।११) इति निषेधो न। तत्र उपदेश इत्यनुवृत्तिश्च स्तीर्णमित्यादाविण्निषेधायेति स्पष्टमाकरे। न च भाष्ये यङ्लोपे बेभिदितेत्यादाविट्प्रवृत्त्यर्थम् 'उपदेशेऽनुदात्तादेकाचः श्रूयमाणात्' इत्यर्थे तत्र 'सनीट्प्रतिषेधः' इति दोषोपन्यासवत् यङ्लुकि दोषानुपन्यासेन तत्रेडिष्ट इति वाच्यम्। इड्विषये यङ्लुकोऽनभिधानेन च्छन्दसि सर्वविधीनां वैकल्पिकत्वेन चादोषात्। अन्यथा एकाज्ग्रहणं किमर्थमिति प्रश्नस्य उत्तरत्र जागर्त्यर्थमिह च वध्यर्थमित्युत्तरस्य च भाष्ये निरालम्बनत्वापत्तेः। न चार्धधातुकाक्षिप्तधातोरेकाच इति विशेषणम्। एवं बिभित्सतीत्यादावुत्तरखण्डस्य धातोरेकाच्त्वमस्त्येव। उत्तरखण्डे अस्तित्ववत्। तच्च 'दयतेः०' (७।४।९) इति सूत्रे भाष्ये स्पष्टम्। एवं च प्रकृतभाष्यासंगतिरिति वाच्यम्, आक्षेपे आक्षिप्तस्यान्वये च मानाभावात्। अङ्गत्वं तु विशिष्ट एवेति 'एकाचो द्वे०' (६।१।१) इति सूत्रे भाष्ये स्पष्टम्। धातुत्वं तु उत्तरखण्ड एव, अत एव 'एकाचो बशः०' (८।२।३७) इति सूत्रे धातोरवयवो य एकाच् इति वैयधिकरण्येनान्वये गर्धप्सिद्धिः प्रयोजनमुक्तं भाष्ये, न त्वजर्घा इति। अजर्घाः बेभिदीतीत्यादौ श्यन्श्नमादयस्तु 'चर्करीतं च' इत्यदादौ पाठात् यङ्लुगन्ते गणान्तरप्रयुक्तविकरणस्याप्राप्त्या न भवन्ति। छान्दसत्वादेव कार्यान्तराणामपि च्छन्दसि दृष्टप्रयोगेषु अदृष्टानामभावो बोध्यः। भाषायां तु तादृशानामभाव एव। श्तिप्शबादिनिर्देशास्तु 'भवतेरः' (७।४।७३) इत्यादिवत्" (परि. शे. परि. १२०-३) इति नव्योक्तम्।

तत्र वधिव्यावृत्त्यर्थमेकाज्ग्रहणमित्ययुक्तम्। आद्युदात्तनिपातनसामर्थ्येन तद्व्यावृत्तेर्भाष्यकैयटयोः स्पष्टत्वात्। तथा च 'एकाचः०' (७।२।१०) इति सूत्रे भाष्यम्— 'वध इट्प्रतिषेधः प्राप्नोति— वधिषीष्टेति। नैष दोषः। आद्युदात्तनिपातनसामर्थ्यात्। हन्त्युपदेशविषयानुदात्तत्वाश्रय इट्प्रतिषेधो न भवति। न ह्येतदाद्युदात्तत्वं प्रयागसमवायि, सति शिष्टेन प्रत्ययस्वरेण बाधात्' इति। 'अच इत्येकत्वविवक्षया' इत्या-

---

१ क. एकदेशानुमिति. २. उपदेशाग्रहणात्. ३ क. प्रकृतिभाष्यासंगति०. ४ क. बेभिदित इत्यादौ.

दिना कौमुदीकृता बधिव्यावृत्तिरन्यथापि साधिता । उत्तरार्थमेकाज्ग्रहणमित्यपि न । जागरितवानित्यत्र 'जाग्रोऽवि०' (७।३।८५) इति गुणे रपरत्वे च कृते अनुगन्तत्वेन निषेधाप्रवृत्तेः । न च उपदेशाधिकारात्प्राप्तिः । उपदेशाधिकारस्य प्रयोजनाभावात् । न च स्तीर्णमित्यादाविण्निषेधः प्रयोजनम् । 'यस्य विभाषा' (७।२।१५) इत्यनेनैव तत्र प्रतिषेधसिद्धेः । 'इट् सनि वा' (७।२।४१) इति तस्य सनि इड्विकल्पविधानात् । तथा च भाष्यम्— इट् सनि वेति सनि विभाषा । यस्य विभाषेति इट्प्रतिषेधो भविष्यति' इति । अत्र कैयटः— 'यस्य विभाषेति । ननु ॠकारान्तस्य सनि विकल्पविधानादित्वरपरत्वयोरनृकारान्तत्वात् यस्य विभाषेति प्रतिषेधाप्रसङ्गः । नैष दोषः । सनि विकल्पविधौ ऋकारान्तत्वापेक्षणेऽपि यस्य विभाषेत्यत्र यस्य क्वचिदिड्विकल्पो दृष्टः स धातुराश्रीयते, न तु विकल्पकारणमृकारान्तत्वम् । भवति चेत्वरपरत्वयोः कृतयोरपि स एव धातुरिति प्रवर्तते प्रतिषेधः' इति । इत्थमाश्रयणे उक्तभाष्यमेव प्रमाणमिति तदाशयः । एवमुपदेशग्रहणानुवृत्तेः प्रयोजनाभावादुत्तरार्थत्वेपि 'इह किंचित्रपो' इति न्यायेन ज्ञापकत्वसंभवाच्च । उत्तरार्थमेकाज्ग्रहणं न कर्तव्यमिति एतद्भाष्याशयः कैयटेन विवृतः । एवं च प्रयोजनाभावे आकरे स्पष्टे सति, प्रयोजनं स्पष्टमिति वादः कथमिति स एव प्रष्टव्यः ॥

यङ्लुगन्ते बेभेदितेति इड्विशिष्टरूपस्य 'यत्रैकाज्ग्रहणं चैव' इति प्राचीनव्याकरणानुमोदितस्य कैयटादिभट्टोजियज्वान्तैरभियुक्तैर्लोकेऽप्यङ्गीकृतस्य स्वबुद्धयानभिधानकल्पनमप्ययुक्तमेव । एतेन च्छन्दसि सर्वविधीनां विकल्प इत्यप्यपास्तम्, भाष्ये एकाज्ग्रहणं किमर्थमिति प्रयोजनद्वयस्यापि निराकरणेन भाष्ये तदर्थतोक्तेत्यस्य भाष्यानवधानमूलकत्वात् । 'अङ्गत्वं विशिष्टस्य, धातुत्वं तु उत्तरखण्डस्य' इति वैषम्यकल्पनमप्ययुक्तम्, धातोरेव सनादिप्रत्ययविधानेन पूर्वभागस्य धातुत्वाभावे बिभित्सं इत्यस्य यस्मात्प्रत्ययविधिस्तदादित्वाभावेन समुदायस्याङ्गसंज्ञाया अभावप्रसङ्गात् । अङ्गसंज्ञा पदसंज्ञा च एकाज्द्विर्वचनन्याये समुदाये प्रवर्तते, नावयवे इति 'एकाचो द्वे प्रथमस्य' (६।१।१) इति सूत्रे भाष्ये स्पष्टम् । प्रथमस्यैव प्रत्ययविधानावधित्वमाश्रित्य तदादिग्रहणात्समुदायस्यैव ते इति पक्षान्तरमपि तत्र स्पष्टम् । एवं च यद्यपि प्रत्ययोत्पत्तये धातुसंज्ञा अवयवे प्रवृत्ता प्राक्, तथापि कार्यान्तरार्थतया अङ्गसंज्ञावत्पुनः प्रवर्तमाना धातुसंज्ञा शास्त्रहानिन्यायेन समुदाय एव युक्ता, न त्ववयवे । एवं 'स्वं रूपम्०' (१।१।६८) इति वचनादस्त्यादिसंज्ञा अपि

१ क. ऋकारान्त. २ क. किमर्थमिति प्रश्नस्य उत्तरार्थमिह च बधिव्यावृत्त्यर्थमिति प्रयोजनस्यापि. ३ क. मूलत्वात्. ४ क. बिभिदि इत्यस्य. ५ क. अङ्गसंज्ञा च. ६ ख. न्यायेन. ७ क. विधानात् विधित्व.

समुदायस्यैव युक्ताः[1] । 'दयतेर्दिगि लिटि' (७।४।९) इति सूत्रे उत्तरभागस्यास्तित्वमाश्रित्य भूभावप्रवर्तनपरभाष्यं तु उक्तभाष्यविरोधात्तत्सूत्रोपक्रमभाष्यविरोधाच्च दोषोपलक्षणतया व्याख्यातम्—बभूवेति न सिध्यतीति । उक्तरीत्या अर्थवत्त्वस्यापि समुदाय एव प्राप्त्या उत्तरभागोऽर्थवानिति गलहस्तितम् । भव्भावे धातोरवयव इत्याश्रयणस्य गर्धप्सिद्धिः प्रयोजनमिति भाष्यं च अजर्घा इत्यादेरप्युपलक्षणं व्याख्येयम् ॥

यदाहुः— 'न चोदाहरणमादर्तव्यम्' इति । एतत्परिभाषाभावे[2] दिवादिप्रभृतिभ्यो यङ्लुकि श्यनादिप्रसङ्गः । 'चर्करीतं च' इत्यदादौ पाठस्तु श्नादेः शब्लुगर्थतया चरितार्थ, न श्यनादिवारणसमर्थः । छान्दसत्वादित्युक्तिर्लोके अभावप्रसङ्गादुपेक्ष्या । तेषामसाधुत्वमेवेति तु अभियुक्तपरंपरावचनविरोधादुक्तपरिभाषाविरोधाच्चोपेक्ष्यम् । एतेन[3] शिश्वाबादिनिर्देशानां वैयर्थ्यमेवेत्यपास्तम् । भाष्यानुक्तत्वं तु न पूर्वव्याकरणस्य प्रामाण्यविरोधि, किं तु भाष्यविरोध एवेति प्रागुक्तम् । अनित्येयम्, 'गुणो यङ्लुकोः' (७।४।८२) इति ज्ञापकात् । एकाज्व्यपदिष्ट हि द्वित्वं यदि यङ्लुकि न प्रवर्तेत[4], तर्हि तत्राभ्यासाभावादभ्यासस्य विधीयमानो गुणोऽनर्थकः स्यात् । तेन जङ्घनीतीत्यत्र 'अभ्यासाच्च' (७।३।५५) इति हन्तेरिति श्तिपा निर्देशेन विधीयमानं कुत्वं सिध्यतीतीष्टं सिद्धम् ॥ १०९ ॥

पूर्वत्रासिद्धीये न स्थानिवत् ॥ ११० ॥

इदं 'न पदान्त०' (१।१।५८) इति सूत्रे वार्त्तिककृता पठितम् । भाष्ये ज्ञापकोपन्यासात्परिभाषेत्युच्यते । तेन पापच्यतेः पापक्तिः, यायज्यतेर्यायष्टिः, पाचयतेः पाक्तिः, याजयतेर्याष्टिः । अल्लोपणिलोपयोः स्थानिवत्त्वाभावात्कुत्वषत्वे भवतः ॥ अत्र[5] ज्ञापकम्— 'नाग्लोपि०' (७।४।२) इति सूत्रे अग्लोपिप्रतिषेध इति भाष्ये उक्तम् । स हि मालामाख्यत् अममालदित्यत्र ह्रस्ववारणाय । यदि स्थानिवद्भावः स्यात्, तर्ह्युपधात्वादाकारस्य[6] ह्रस्वाप्राप्तेरनर्थकः[7] स्यात् । ननु राजानमत्यक्रमीत् अत्यरराजदित्यत्र अज्झल्समुदायस्य टेर्लोपस्य स्थानिवत्त्वाभावात् ह्रस्वनिषेधार्थं तदिति चेत्, अत्र भाष्यम्— अग्लोपित्वमपि तस्य न स्यात्, अगनकसमुदायस्यैव तत्र लोपात् । अगपि तत्र लुप्यते इत्यग्लोपित्वस्वीकारे अज्झल्समुदायस्यादेशोऽजादेश इत्यपि शक्यते वक्तुमिति स्थानिवत्त्वमपि तस्य स्यात्[8] । इदं तु 'हलचोरादेशः स्थानिवदिति चेद्दिशते-

१ क. युक्ता. २ क. तत्परिभाषा०. ३ क. एनेन निश्वाबादि. ४ क. प्रवर्तते. ५ क. अतः. ६ आकार ह्रस्वाप्राप्ते. ७ क. अनर्थकं. ८ क. स्यादिति ।

लिलोप एकादेशः' इति 'अ[1]चः परस्मिन्०' (१।१।५७) सूत्रस्थभाष्यविरोधा-दुपपत्तिविरोधाच्चायुक्तम्। अगनकसमुदायलोपे अग्लोपित्वं तु अग्लोपिग्रहणसामर्थ्या-द्भवति। तस्मात् 'यीवर्णयोः०' (७।४।५३) इति सूत्रे वर्णग्रहणमस्या ज्ञापकम्। तद्धि ण्यन्ताद् ण्वुलि आदीधकः इत्यत्र नित्यत्वात्प्रथमं णिलोपे पश्चाद्भूतपूर्वगत्या इवर्ण-परत्वमाश्रित्य लोपाय। स्थानिवत्त्वे णिलोपस्य तदानर्थक्यं स्पष्टमेव। यद्यपि आदीधी इ अक इति स्थिते अन्तरङ्गत्वात् दीधीवेव्योरं[2]न्त्यस्य लोपे पश्चाण्णिलोपे सिध्यतीष्टम्, तथापि वर्णग्रहणेनान्तरङ्ग[3]बलीयस्त्वस्यानित्यत्वमपि ज्ञाप्यते। तेन 'ने[4] धातुलोपे०' (१।१।४) इति सूत्रे भेषत इत्यत्र प्रथमं णिलोपे कृते पश्चात् 'न धातुलोपे०' (१।१।४) इति निषेधवारणाय धातुलोप इति बहुव्रीह्याश्रयणमिति भाष्यग्रन्थः संग-च्छते। कौस्तुभकृत्तु—"न्यायसिद्धमिदम्, 'अचः परस्मिन्०' (१।१।५७) इति स्थानिवद्भावं प्रति त्रिपाद्या असिद्धत्वेन तत्र स्थानिवद्भावाप्रवृत्तेः" इत्याह ॥११०॥

तस्य दोषः संयोगादिलोपलत्वणत्वेषु ॥ १११ ॥

तेन तक्षयतेः क्विपि णिलोपस्य स्थानिवद्भावात् संयोगादिलोपाभावे संयोगान्त-लोपः। तथा निगाल्यते इत्यत्र ण्यन्ताद्यकि 'अचि विभाषा' (८।२।२१) इति लत्वं भवति। तथा माषवपनीत्यत्र 'प्रातिपदिकान्त०' (८।४।११) इति णत्वं न भवति, 'यस्येति च०' (६।४।१४०) इति लोपस्य स्थानिवत्त्वात्। न चासत्यपि स्थानिवत्त्वे ङीप एव प्रातिपदिकान्तत्वं न नकारस्येति वाच्यम्। 'गतिकारकोपपदानाम्०' (परि. ६४) इति ङीबुत्पत्तेः प्राक् समासस्वीकारात्। किं च माषवपनीयमित्यत्रासति स्थानिवत्त्वे णत्वं प्राप्नोति। [5]स्थानिवत्त्वान्न भवति णत्वमिति ज्ञाप्यमिति ज्ञाप्यते। 'ज्ञापकसिद्धं न सर्वत्र' (परि. शे. परि. १२६) इति वा उक्तस्थले स्थानिवत्त्वमिति कैयट इति दिक् ॥ १११ ॥

इति

श्रीशेषाद्रिनाथसुधीविरचितः

परिभाषाभास्करः

* ॥ समाप्तः ॥ *

---

१ ख. परस्मिन्नितिसूत्रस्थ. २ क. अन्तस्य. ३ क. अन्तरङ्गस्य बलीयस्त्वस्य. ४ ख. नधातुलोपसूत्रे. ५ क. णत्वे स्थानिवत्त्वाद्भवति णत्वमिति।

अनुक्रमाङ्कः	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८
१ अकर्मका अपि हि धातवः सोप॰	...	...	८	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२ अकृतकारि खल्वपि शास्त्रम्	...	...	...	...	...	...	...	...	...	१११	...	१०४	५०	४९	६१	५१	५६	७८
३ अकृतव्यूहाः पाणिनीयाः	६५	८४	६९	...	...	...	...	...	६८	...	...	...	...	...	...	...	...	...
४ अक्षरादिविध्यादपि योग॰	...	९३	७७	८३	...	...	...	...	...	...	...	११९	...	१२३	...	...	...	...
५ अगत्या हि खलु परिभाषा॰	...	...	...	...	...	...	...	...	...	...	...	७१	७४	९१	८६	९४	९२	८०
६ अङ्गवृत्ते पुनर्वृत्तावविधिः	३४	३८	...	...	...	...	...	...	...	...	...	८५	...	७७	...	७९	...	...
७ अङ्गाधिकारे तस्य तदुत्तर॰	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
८ अचः परस्मिन् पूर्वविधौ	...	...	...	...	...	...	...	...	...	२७	...	...	...	...	...	...	...	...
९ अचो ह्रस्वदीर्घप्लुताः	...	...	...	...	...	...	...	...	...	२५	...	...	...	...	...	...	...	...
१० अजानन्तर्ये न बहिरङ्गपरि॰	...	...	...	४६	...	...	...	...	...	...	...	...	...	...	...	...	...	...
११ अणुदित्सवर्णमेव गृह्णाति	...	६६	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१२ अतन्त्रं तरनिर्देशः	६६	८५	७०	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१३ अतुल्यबलयोः स्पर्धो न भवति	...	...	...	...	...	...	...	...	६६	...	...	...	...	...	...	...	...	...
१४ अदर्शनं लोपः	...	...	...	...	५१	...	५१	६६	...	...	...	...	...	...	...	...	...	...
१५ अदाप्यदाप्योरनदादेरेव॰	...	...	...	...	...	...	...	...	...	...	६०	...	...	...	...	...	...	...
१६ अननुबन्धकग्रहणे न सानुबन्ध॰	...	...	४८	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१७ अनन्तरस्य विधिर्वा प्रति॰	१६	१९	२०	३०	१८	१५	१९	२०	...	५३	१३३	१७	५५	४८	५१	५०	६१	५२
१८ अनन्यविकारे अन्त्यसदेशस्य	५२	६३	...	...	...	...	...	...	१०	...	...	१०७	६२	११२	९४	११४	९५	८९
१९ अनन्यपूर्वा लादेशाः	...		...	...	...	...	...	५५	...	...	...	...	...	...	...	...	...	...
२० अनित्यमागमशासनम्	७६	९९	७९	७८	...	...	...	...	३०	...	३५	८४	...	९८	...	१००	...	८२
२१ अनित्यमातिदेशिकम्	...	९५	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२२ अनित्यो णिच् चुरादीनाम्	...	...	...	...	...	...	...	...	...	...	९७	...	...	...	...	...	...	...
२३ अनिमित्तकप्रत्यासन्नता	...	१२९	३	...	...	...	...	...	४	...	७६	७७	१७	६५	१५	६७	१६	१६
२४ अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे	...	...	...	...	...	...	...	...	...	...	...	...	९०	१२५	११४	१२७	११३	१०५
२५ अनिर्दिष्टार्थो विधयः स्वार्थे	...	...	...	२९	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२६ अनुकरणशब्दा अनुकार्यशब्दे॰	...	...	...	...	...	...	...	...	११	...	...	...	...	...	...	...	६३.४	८४
२७ अनुदात्तेत्त्वलक्षणमात्मनेपदम॰	...	...	...	...	...	...	...	...	...	...	...	...	७८	...	...	...	...	...
२८ अनुबिद्धानुबिद्धयोरनुबिद्धस्यैव	...	...	...	...	...	...	...	८१	...	...	...	...	...	...	...	...	...	...
२९ अनेकार्थाः सर्वत्र	...	...	...	...	६	३६	७	१०	...	...	...	...	...	...	...	...	४	४
३० अनेकान्ता अनुबन्धाः	...	...	...	...	...	...	...	...	...	...	...	...	४	...	...	...	...	...
३१ अन्तरङ्गं बहिरङ्गात्	...	...	...	...	...	...	...	६१	...	६३	४२	...	...	...	...	...	...	...
३२ अन्तरङ्गबहिरङ्गयोरन्तरङ्गो॰	...	११५	९४	४७	...	५०	७७	१०४	...	...	...	४३	...	२२	२७	२२	...	...
३३ अन्तरङ्गविधेः प्रतिषेधविधिः	८९	११६	९०	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
३४ अन्तरङ्गवचनानवकाशो बलीयः	...	...	...	...	...	५१	७९	१०५	...	...	५४	...	...	...	...	...	...	...
३५ अन्तरङ्गादनवकाशो बलीयान्	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	५७	...
३६ अन्तरङ्गानपि...लुक् बाधते	...	१२८	...	...	...	...	...	...	६५	...	...	९८	४८	८५	६१	८८	५२	४४
३७ अन्तरङ्गानपि...ल्यप् बाधते	...	...	...	...	...	...	...	...	८६	...	७९	५४	४७	३४	६२	३४	५४	४६
३८ अन्तरङ्गे कार्ये बहिरङ्ग॰	...	४३	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
३९ अन्यथा ह्येकवर्जिताः सानु॰	...	...	...	...	...	१९	...	...	...	...	...	...	...	...	...	...	...	...
४० अन्यस्थाने अन्त्यसदेशस्य	...	...	५६	...	३९	९	४२	१३	२८	१५	...	...	...	...	...	...	...	...

अनुक्रमाङ्काः	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८
४१ अन्यकार्यान्तरा द्विवचिनः	...	...	...	...	...	...	...	४	...	...	...	...	...	...	...	...	...	...
४२ अन्यार्थे तद्गुणसंविज्ञान०	...	...	...	१२	...	...	...	...	...	...	...	...	...	...	...	...	...	...
४३ अपवादविषयं परिहृत्य	...	...	...	...	...	५५	...	...	...	...	...	...	...	...	...	...	...	...
४४ अपवादविषयेऽप्युत्सर्ग०	८३	१०१	८५	...	३७	५६	३९	४१	...	८६	५६	...	...	...	...	...	६५	५५
४५ अपवादो यद्यन्यत्र	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
४६ अपेक्षातोऽधिकारः	...	...	...	...	...	...	...	...	...	४८	१२	...	...	...	...	...	...	...
४७ अनाप्तिपूर्विका हि विभाषा	...	...	...	...	...	...	...	४१	...	...	...	...	...	...	...	...	...	...
४८ अबाधकान्यपि निपातनानि	...	...	...	...	...	...	...	...	...	...	...	६६	...	७६	११०	७८	...	...
४९ अभिधानलक्षणाः सनादि०	...	...	...	८१	...	...	...	...	...	...	...	...	...	...	...	...	...	...
५० अभिधानलक्षणाः कृद्०	७२	९०	७६	...	...	...	...	...	...	११७	...	...	...	...	...	...	...	...
५१ अभिधेयवल्लिङ्गवचनानि	...	७३	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
५२ अभेदका गुणाः	...	...	...	...	...	...	...	...	...	...	...	५७	...	८०	१०७	८३	१०९	१०९
५३ अभ्यासविकारेषु बाध्य०	...	...	...	...	...	...	...	...	...	...	...	...	...	...	५२	...	६६	५६
५४ अभ्यासविकारेष्वपवादा	२०	२३	...	...	६४	...	...	...	...	...	...	२०	...	६६	...	१८	...	...
५५ अर्थवद्ग्रहणे नानर्थ०	१	१	१	१	४	१	४	[illegible]	३	५७	१४	१	१५	९	११	९	१४	१४
५६ अर्थवशाद्विभक्ति०	६३	८२	६७	७४	२५	१३	२७	११	१४	५५	१३	८८	...	१२०	...	१२२	...	...
५७ अर्थापत्त्या शास्त्रे सिद्धिः	...	...	...	८४	...	...	...	...	...	...	...	...	...	...	...	...	...	...
५८ अर्थमात्रालाघवेन०	...	...	...	...	...	...	...	...	...	...	...	...	२५	...	...	...	१२२	...
५९ अलिङ्गमसंख्यमव्ययम्	...	९८	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
६० अल्पाश्रयमन्तरङ्गम्	...	...	...	...	...	...	...	...	८१	...	...	...	...	...	...	...	...	...
६१ अवयवप्रसिद्धेः समुदाय०	...	१०८	...	...	...	...	...	...	...	...	...	१०९	...	१०४	९१	१०६	९८	९२
६२ अवयवशोऽपि नामतो०	८८	११४	८९	...	...	...	...	...	४३	...	...	...	...	...	...	...	...	...
६३ अवयवे कृतं लिङ्गं	...	...	...	...	...	...	...	...	...	...	१०७	...	...	...	...	...	...	...
६४ अवयवेन विग्रहः	...	८	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
६५ अवयवेष्ववयववद्	...	...	...	...	...	...	...	...	...	४७	...	...	...	...	...	...	...	...
६६ अव्यक्ते प्रधानगामि	...	...	...	...	...	...	...	८६	...	...	...	...	...	...	...	...	...	...
६७ अव्यक्तगुणसंदेहे	८७	११०	८८	७२	...	...	...	...	...	...	...	६०	...	...	...	...	...	...
६८ असति बाधे	...	...	...	...	...	...	...	[illegible]	...	...	...	...	...	...	...	...	...	...
६९ असति संभवे बाधनं	२१	२४	२५	३२	...	...	...	...	...	...	...	३१	...	३५	४५	३६	...	...
७० असिद्धं बहिरङ्ग०	१६,७९	४२	८३	४५	३३	४३	३५	४२	६७	९८	२०	४१	४५	६६	५८	७३	५०	४३
७१ अस्ति च संभवो यदुभयं	...	२६	...	३४	...	...	...	...	...	...	...	३२	...	३५	४६	३७	...	...
७२ आख्यातानाख्यातयोः	...	...	...	...	...	...	...	४१	...	...	...	...	...	...	...	...	...	...
७३ आगमशास्त्रमनित्यम्	...	...	...	...	...	...	...	२१	...	...	...	८४	७६	९८	६७	१००	६३.२	...
७४ आगमा अनुदात्ताः	...	१०५	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
७५ आगमात्सर्वादेशो विधिः	...	...	...	...	४१	४७	४४	४६	...	१०२	५१	...	...	...	...	...	...	...
७६ आगमादेशयोरागमः	...	...	...	...	४०	४६	४३,४८	४५,१[illegible]	...	...	...	...	...	...	...	...	...	...
७७ आगमास्तद्गुणीभूताः	...	...	...	७	१४	१२	१५	२२	...	६६	६७	१८	...	४	...	४	...	...
७८ आनिदेशिकमनित्यम्	...	९५	...	...	...	...	...	...	...	...	...	...	...	...	...	...	९३.६	...
७९ आत्मनेपदमनित्यम्	...	...	...	...	...	...	...	...	...	...	९४	...	...	...	...	...	...	...
८० आदिष्टादचः पूर्वस्य	...	...	...	...	...	...	...	...	...	३२	...	...	...	...	...	...	...	...

अनुक्रमाङ्काः	१ [illegible]	२ [illegible]	३ [illegible]	४ [illegible]	५ [illegible]	६ [illegible]	७ [illegible]	८ [illegible]	९ [illegible]	१० [illegible]	११ [illegible]	१२ [illegible]	१३ [illegible]	१४ [illegible]	१५ [illegible]	१६ [illegible]	१७ [illegible]	१८ [illegible]
८१ आद्यशब्दः संख्या	...	...	...	...	...	...	...	...	...	...	९०	...	...	...	...	...	...	...
८२ आदेशादागमः	...	...	...	...	...	...	...	...	...	१०१	५०	...	...	...	...	...	...	...
८३ आद्यन्तवदेकस्मिन्	...	...	...	१८	२०	१८	२१	२१	...	१५	५	...	...	...	...	...	...	...
८४ आभाच्छास्त्रस्य क्वचिदसिद्धता	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
८५ इकारोऽकः सविभक्तिकादेशो०	...	...	...	...	५८	३८	६१	...	६६	...	...	...	...	...	...	...	...	...
८६ इको गुणवृद्धी	...	...	...	...	...	...	...	...	...	२४	...	...	...	...	...	...	...	...
८७ इतोऽपरं कार्यमकुर्वत्	...	...	...	५४	...	...	...	...	...	...	...	...	...	...	...	...	...	...
८८ इतरेतराश्रयाण्यपि कार्याणि	२४	२८	२८	२८	...	...	...	...	...	...	...	६६	...	३	३	१	...	...
८९ इष्टोपिकाराणां प्रवृत्ति०	...	...	...	४३	...	...	...	...	...	...	...	...	...	...	...	...	...	...
९० इह शास्त्रे व्यवस्थितविभाषा	३२	३२	...	...	...	...	...	...	५४	...	...	...	...	...	...	...	...	...
९१ उकार एवैको भाव्यमानोऽपि	३१	३१	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
९२ उक्तार्थानामप्रयोगः	५१	६०	५३	२८	४६	२२	४९	६२	...	७७	२८	...	...	...	...	...	...	...
९३ उगित्कार्यं वर्णकार्यं च	...	...	...	...	...	...	...	...	३६	...	...	...	...	...	१३२	...	...	...
९४ उच्चरितप्रध्वंसिनोऽनुबन्धाः	११	१३	१३	१४	५५	...	५८	७१	...	...	...	...	...	...	...	...	...	...
९५ उणादयोऽव्युत्पन्नानि नामानि	...	...	...	...	...	...	...	...	...	...	१०३	७०	२३	१५	२०	१५	२२	२२
९६ उत्तरपदत्वे चापदादिविधौ	...	...	...	...	...	...	...	...	...	४४	...	...	...	...	...	...	...	...
९७ उत्तरपदाधिकारे प्रत्ययग्रहणे	...	...	...	...	...	...	...	...	...	...	...	...	२६	...	...	...	२५	२५
९८ उत्सर्गापवादयोरपवाद०	...	...	...	...	६३	५२	६६	४८	६०	८५	५५	...	...	...	...	...	...	...
९९ उदित्सवर्णमेव	५५	...	...	...	...	...	...	...	...	...	...	८९	...	१७	१३१	१७	...	...
१०० उपजातनिमित्तोऽपि	...	...	...	...	...	...	...	...	...	...	...	...	...	६३	...	६६	...	...
१०१ उपपदविभक्तेः	...	...	...	६९	...	५९	७४	१११	...	६७	४६	४८	८१	१०३	६०	१०५	६४	८८
१०२ उपसंजनिष्यमाण०	...	...	...	...	...	...	...	...	...	...	...	...	...	...	६६	...	६४	...
१०३ उपसर्गो न व्यवधायी	...	...	...	...	...	...	...	...	...	...	६९	...	...	...	...	...	...	...
१०४ उभयगतिरिह	...	...	३६	...	...	...	...	...	३०	...	...	...	१०	...	...	...	९	...
१०५ उभयत आश्रयणे	४४	५१	४६	...	...	...	...	...	३०	...	...	५१	...	६०	१२०	६२	...	...
१०६ उभयत्रेह शास्त्रे षष्ठी न	...	...	६६	६६	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१०७ उभयथापि वाक्यसमाप्तिः	...	३४	३४	६७	...	...	...	...	...	...	...	...	...	...	१०६	...	...	...
१०८ उभयनिर्देशे पञ्चमी०	...	...	६७	...	...	...	...	...	...	...	...	६३	६०	२३	३७	२३	७०	६०
१०९ उभयस्थाननिष्पन्नः	...	...	...	...	...	...	...	...	...	...	१०६	...	...	...	...	...	...	...
११० उभयोर्विभाषयोर्मध्ये	...	...	...	...	...	११	...	७८	...	...	...	...	...	...	...	...	...	...
१११ ऊकारोक्तः सविभक्तिक	...	...	...	...	...	...	...	३४	...	...	...	...	...	...	...	...	...	...
११२ ऋकारादिष्टं कार्यमॢकार	...	...	...	...	...	...	...	...	...	...	७९	...	...	...	...	...	...	...
११३ ऋकारो रलौ	...	...	...	...	...	...	...	...	...	२०	...	...	...	...	...	...	...	...
११४ ऋतोर्वृद्धिमद्विधौ	...	...	...	...	...	...	...	...	...	४	३	...	...	...	...	...	...	...
११५ एकदेशविकृतमनन्यवद् भवति	...	१६	१७	१५	१	१६	१	३	११	३७	७	१४	३८	४७	१२५	४२	३७	३४
११६ एकदेशेऽन्यत्र न व्यपदेशः	...	...	...	१६	...	...	...	...	...	...	...	...	...	...	...	...	...	...
११७ एकपदाश्रयत्वेनान्तरङ्गत्वम्	...	...	...	...	...	...	...	...	८२	...	...	...	...	...	...	...	...	...
११८ एकपदाश्रयत्वेनान्तरङ्गत्वादि०	...	...	...	...	...	...	...	...	८३	...	...	...	...	...	...	...	...	...
११९ एकयोगनिर्दिष्टानां सहैव	...	...	...	...	...	९	...	...	...	४९	...	२४	१८	१४	१९	१४	१७	१७
१२० एकयोगनिर्दिष्टानामप्येकदेशा	३१	२७	२७	३९	...	...	...	...	...	५०	...	२५	१९	८	१०	१४	...	१८

अनुक्रमाङ्कः	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८
१२१ एकवर्णो विधिन्ते	...	...	...	...	...	...	६	११	...	...	...	...	...	...	...	...	...	...
१२२ एकाच्चस्वरसंख्यार्थ	...	...	...	...	...	...	...	...	...	...	९१	...	...	...	...	...	...	...
१२३ एकस्मिन्नपि व्यपदेशिवद्भावः	६१	७८	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१२४ एकस्या आकृतेश्चरितार्थः	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	११८	१०७
१२५ एकानुबन्धग्रहणमनित्यम्	४५	५५	...	...	...	...	...	...	३६	...	...	...	...	...	...	...	...	...
१२६ एकानुबन्धग्रहणे न	४६	५२	४७	५	...	...	...	...	२२	८२	३३	३७	...	५१	...	५३	...	...
१२७ एकान्ताः (अनुबन्धाः)	...	...	...	...	...	...	...	...	...	...	...	...	५	...	...	...	५	५
१२८ एकाश्रितमन्तरङ्गम्	...	...	...	...	...	...	८५	११६	...	...	...	...	...	...	...	...	...	...
१२९ एव इष्टसंश्च	...	...	...	...	...	...	...	६०	...	२३	...	...	...	...	...	...	...	...
१३० औपदेशिकप्रायोगिक	५	५	६	...	४२	...	४५	५१	...	...	...	४	...	८०	१३५	८४	१२०,२	...
१३१ कार्यकाले संज्ञा०	५०	५८	५१	...	...	...	...	—	२	११२	...	१०६	३	११७	११८	११९	३	३
१३२ कार्यनिर्देशः कार्यनिमित्त०	...	८१	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१३३ कार्यमनुभवन् हि कार्यी	...	...	...	...	...	...	...	...	...	...	...	...	११	...	...	...	१०	...
१३४ कार्यानुबन्धाद्विकारानुवृत्तिः	...	...	...	४१	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१३५ कार्यी निमित्तं कार्यमित्येव	...	...	...	...	५६	२८	५१	७१	...	...	...	...	...	...	...	...	...	...
१३६ किं हि वचनान्न भवति	...	...	...	...	...	...	...	...	...	...	१३९	...	४३	...	...	...	...	...
१३७ कृताकृतप्रसङ्गि नित्यम्	...	११७	...	७६	...	...	५२	५१	७८	...	...	...	...	...	...	...	...	...
१३८ कृतेऽप्यस्मिन्धातुप्रत्ययकार्ये	...	...	...	...	...	...	...	...	...	...	८२	...	...	...	...	...	...	...
१३९ कृत्रिमाकृत्रिमयोः कृत्रिमे	६	६	७	...	...	...	...	...	...	७२	२३	७	९	१०१	८८	१०३	...	९
१४० कृत्रिमाकृत्रिमयोरुभयगतिः	७	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१४१ कृदभिहितो भावो द्रव्यवत्	...	१११	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१४२ कृद्ग्रहणे गतिकारकपूर्वस्यापि	६३	१२६	...	...	...	...	...	...	६५	८	...	४६	२९	६२	३५	६४	२८	२८
१४३ कृद्धाऽप्रत्ययोऽविधानात्	...	...	...	...	...	...	...	...	...	८९	...	...	...	...	...	...	...	...
१४४ क्तक्तवतुतुमुन्खलर्थेषु वाक्यरूप०	...	...	...	...	...	...	...	...	...	...	...	७६	५८	३६	५४	३८	६८	५८
१४५ क्रियाविशेषणानां कर्मत्वं	...	...	...	...	...	...	...	...	...	...	...	...	...	५४	१३४	५६	...	...
१४६ क्वचित्कृताकृतप्रसङ्गमात्रेणापि	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	४६	...
१४७ क्वचित् पूर्वम्	...	...	...	...	...	...	...	...	...	१०५	...	...	...	...	...	...	...	...
१४८ क्वचित्समुदायेऽपि	...	...	...	...	...	...	...	...	...	...	...	३०	...	७६	१०५	८१	१०८	...
१४९ क्वचित्स्वार्थिकाः प्रकृतितो	...	...	...	...	...	...	...	...	६६	...	...	...	६८	५८	७३	...	८३	७१
१५० क्वचिदनुवृत्तिं (चानुकृष्टं)	...	...	...	...	...	...	...	...	...	५२	...	...	...	...	...	...	...	...
१५१ क्वचिदपवादविषयेऽप्युत्सर्गः	...	...	...	...	...	...	...	...	...	...	...	११५	५२	३३	४४	३३	५८	...
१५२ क्वचिदर्थवतापि	...	...	...	...	...	...	...	३३	...	...	...	...	...	...	...	...	...	...
१५३ क्वचिदुभयगतिः (शास्त्रेग्रह०)	...	...	...	...	...	...	...	...	...	७३	२४	...	...	...	...	...	...	...
१५४ क्वचिदुभयथा वाक्यपरिसमाप्ति	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	८२	...	...
१५५ क्वचिदेकदेशोऽप्यनुवर्तते	...	...	...	...	...	...	...	...	...	...	...	...	...	८	१०	८	१८	...
१५६ क्वचिद्व्यपमानोऽप्यत्र सवर्णाद्	...	...	...	...	...	...	...	...	...	...	...	२५	...	...	...	...	...	३०
१५७ क्वचिद्वृत्तिः प्रकृतिं गृह्णाति	...	...	...	...	...	...	...	...	...	...	...	...	६३	४१	१३२	४१	१२०,१	...
१५८ क्वचिन्नादेशत्व	...	...	...	...	...	...	...	९१	...	...	...	...	...	...	...	...	...	...
१५९ क्विति व्यञ्जनकार्यमनित्यम्	...	...	...	...	...	...	...	...	...	...	९५	...	...	...	...	...	...	...
१६० क्विबन्ता धातुत्वं न जहति	...	१३२	...	...	...	...	...	...	...	...	१०५	...	...	...	...	...	...	...

अनुक्रमाङ्काः	१	२	३	४	५	६	७	८	९	१०	११	१२	१२ क	१३	१४	१५	१६	१७
१६१ क्विबर्थं प्रकृतिरेवाह	...	...	...	...	...	...	...	...	...	...	११६	...	...	...	...	...	...	...
१६२ क्नौ लुप्ते न स्थानिवत्	...	...	...	...	...	...	...	...	४०	...	...	...	...	...	...	...	...	...
१६३ खविधिर्बलवान्	...	...	...	...	...	...	...	...	४३	...	...	...	...	...	...	...	...	...
१६४ गणकार्यमनित्यम्	...	...	...	...	२९	...	३१	...	...	...	...	१०९	७७	११८	९२	१२०	९३-३	८३
१६५ गतिकारकोपपदानां कृद्भिः	११८	...	...	...	...	...	...	...	...	...	८८	४७	६२	३२	४२	६२	७५	६४
१६६ गत्यर्था ज्ञानार्थाः	...	...	...	...	...	...	...	...	...	...	१०१	...	...	...	...	...	...	...
१६७ गमकत्वे कर्मत्वे गः	...	...	...	५७	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१६८ गमयमाद्यधिकोर्थोविकि	...	...	...	५८	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१६९ गर्भवद्भावाद्यो भवन्ति	...	...	...	...	...	...	...	...	...	...	...	११६	...	...	...	...	...	...
१७० गत्वादाग्रहणेष्वविशेषः	...	१२४	...	...	...	...	...	...	७	...	७७	६९	८७	१०५	१०३	१०७	१०६	९८
१७१ गुकार्ये निवृत्ते पुनर्न	...	...	...	...	...	...	...	...	४१	...	...	...	...	...	...	...	...	...
१७२ गुणबाधिका वृद्धिर्भवति	...	...	...	...	...	६०	...	...	...	...	...	...	...	...	...	...	...	...
१७३ गुणस्थानभाविन प्रकृतिस्थाश्च	...	...	...	...	...	...	...	...	१४	...	...	...	...	...	...	...	...	...
१७४ गोरधिकारे तदन्तस्य च	...	...	...	...	...	...	...	...	११	...	...	...	...	...	...	...	...	...
१७५ गौणमुख्ययोर्मुख्ये कार्य॰	४	४	५	५३	...	२	८८	८०	४	...	२२	५	१६	१००	१४	१०२	१५	१५
१७६ घञाधिकवाद्वाधिकयम्	...	८८	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१७७ ग्रहणवता प्रातिपदिकेन	...	८९	७३	११	...	...	...	...	...	...	७५	७८	३२	५५	७१	५७	३१	३१
१७८ ङित्	...	...	...	...	...	...	...	...	...	१४	...	...	...	...	...	...	...	...
१७९ ङित्वेन कित्वं बाध्यते	...	...	...	...	...	...	...	...	...	...	१२९	...	...	...	...	...	...	...
१८० चकारो यस्मात्स हल्ग्रहणेन	...	...	...	...	...	...	...	...	...	...	११८	...	...	...	...	...	...	...
१८१ चक्रकेऽभिष्टन्तो व्यवस्था	...	१३९	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१८२ चविकालोऽपवादा उत्सर्गान्न॰	...	...	...	...	...	...	...	...	७५	...	...	...	...	...	...	...	...	...
१८३ चानुकृष्टमुत्तरत्र नानुवर्तते	५९	७६	६२	४०	...	...	२२	...	...	५९	११९	८७	६५	४६	५७	४८	७८	६७
१८४ चानुकृष्टेन न यथासंख्यम्	...	...	...	...	...	...	...	...	...	...	१२०	...	...	...	...	...	...	...
१८५ ज्ञापकज्ञापिता॰	...	...	...	...	६०	...	६३	...	...	...	...	...	...	...	...	...	...	...
१८६ ज्ञापकसिद्धं न सर्वत्र	...	१४०	...	...	...	...	...	...	...	...	...	११८	९१	१२६	११९	१२९	११६	...
१८७ ज्ञापकेऽर्थमनित्यवत्	...	...	...	७७	...	...	...	...	...	...	...	...	...	...	...	...	...	...
१८८ टकितावाद्यन्तौ	...	...	...	...	...	...	...	...	...	१८	...	...	...	...	...	...	...	...
१८९ डलयोः समानविषयत्वं	...	...	...	...	...	...	...	...	१०७	...	...	...	...	...	...	...	...	...
१९० ञिद्वदित्	...	...	...	...	...	...	...	...	...	३४	...	...	...	...	...	...	...	...
१९१ ञित्संनियोगे एव	...	...	...	...	...	...	...	...	...	...	९९	...	...	...	...	...	...	...
१९२ ञिवकोः	...	...	...	...	...	...	...	...	...	४३	...	...	...	...	...	...	...	...
१९३ ञिलोपोप्यनित्यः	...	...	...	...	...	...	...	...	...	...	९८	...	...	...	...	...	...	...
१९४ ञेप्यन्तत्वं भवति	...	...	...	...	...	...	...	...	४४	...	...	...	...	...	...	...	...	...
१९५ णौ कृतं द्वित्वे न स्थानिवत्	...	...	...	...	...	...	...	...	...	...	...	...	...	...	१२७	...	...	...
१९६ णौ कृतं स्थानिवत्	...	...	...	२१	...	...	...	...	...	...	९२	३३	...	६५	...	६७	...	...
१९७ तदनुबन्धकग्रहणे नातदनु॰	...	५४	४९	...	...	...	...	...	...	...	...	३८	...	५२	७०	५४	८२	७०
१९८ तदागमास्तद्गुणीभूताः	...	...	१९	...	...	...	...	...	३५	...	...	...	...	...	...	...	...	९९
१९९ तदादेशस्तद्ग्रहणेन गृह्यते	...	...	६६	...	...	...	...	...	३६	...	...	...	...	...	...	...	...	...
२०० तदेकदेशभूतस्तद्ग्रहणेन	६२	८२	...	...	...	...	...	...	...	...	...	...	...	८	१०	१४	...	१८

अनुक्रमाङ्काः	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८
२०१ तद्धितीयो भावप्रत्ययः	...	...	...	...	...	...	...	...	...	...	८७	...	...	...	...	...	...	...
२०२ तद्धितेषु नावयवार्थः	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२०३ तद्वतस्तद्ग्रहणेन गृह्यते	१७	२०	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२०४ तद्भेदे विधेर्भेदः	...	...	...	...	५७	२९	६०	६१	...	...	...	...	...	...	...	...	...	...
२०५ तन्मध्यपतितस्तद्ग्रहणेन	१८	२१	२२	८	...	...	...	...	१५	६४	६६	१९	७२	७५	८१	७७	८९	७७
२०६ तस्मादप्यनन्तकार्यो पञ्	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२०७ तस्य दोषः॰	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	१११
२०८ ताच्छीलिका अपवादा॰	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	५७
२०९ ताच्छीलिके णे॰	...	...	...	...	...	...	...	...	...	...	...	६६	...	७३	७९	७५	८७	७५
२१० ताच्छीलिकेषु वासरूप॰	२७	३१	३२	...	...	...	...	...	...	...	...	२८	५७	४४	५३	४५	६७	...
२११ तिपा शपानुबन्धेन	...	...	...	...	...	...	...	...	...	...	१८	...	...	...	...	...	...	...
२१२ तिवाककारकाणां	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२१३ त्यग्रहणे चाकारः	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२१४ त्यपग्रहणे परमात्म	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२१५ त्यान्तसंज्ञावे स्वस्य	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२१६ त्यादिष्वस्योर्भ्यं नामरूपो॰	...	...	...	...	...	...	...	...	...	...	१११	...	...	...	...	...	...	...
२१७ दृष्टानुविधिश्छन्दसि	...	६८	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२१८ द्वन्द्वान्तरः	...	...	...	...	...	...	...	...	...	...	१३७	...	...	...	...	...	...	...
२१९ द्वित्वबहुत्वयोरेकत्वं	...	...	...	...	...	...	...	६[illegible]	...	...	...	...	...	...	...	...	...	...
२२० द्वित्वे कर्तव्ये णो हलं	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२२१ द्वित्वे सति पूर्वस्य	...	...	...	...	...	...	...	...	...	...	८१	...	...	...	...	...	...	...
२२२ द्विर्बद्धं	९२	१३६	९८	...	...	...	...	...	५१	...	९३	...	...	...	...	...	...	...
२२३ द्विमवि	...	...	२४	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२२४ द्विर्वचनेऽचि	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
२२५ द्वौ नञौ	...	...	...	...	...	...	...	...	...	३३	...	...	...	...	...	...	...	...
२२६ धात्वन्यधिकारे	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...	...
